M. T. B. COLLEGE, SURAT
Manuscripts Library
No Ref. 423
Ser.
Title : Matsyapurāṇa.

423

C

Mātsyapurāṇa	Title
	Author
	Editor
	Year, Vols.
	Publisher
	Remarks

423

श्रीगणेशाय नमः ॥ ॐ नमो भगवते वासुदेवाय ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमं ॥ देवीं सरस्वतीं चैव ततो
जयमुदीरयेत् ॥ १ ॥ अजोपि यः क्रियायोगान्नारायण इति स्मृतः ॥ त्रिगुणाय त्रिवेदाय नमस्तस्मै स्वयंभुवे ॥ २ ॥ सूत
मेकाग्रमासीनं नैमिषारण्यवासिनः ॥ मुनयो दीर्घसत्रांते पप्रछुर्दीर्घसंहितां ॥ ३ ॥ प्रवृत्तासु पुराणासु धर्म्यासु सुल
लितासु च ॥ कथासु शौनकाद्यास्तु चाभिनंद्य मुहुर्मुहुः ॥ ४ ॥ कथितानि पुराणानि यान्यस्माकं त्वयानघ ॥ ता
न्येवामृतकल्पानि श्रोतुमिच्छामहे पुनः ॥ ५ ॥ कथं ससर्ज भगवाँल्लोकनाथश्चराचरं ॥ कस्माच्च भगवान्विष्णुर्म
त्स्यरूपमुपाश्रितः ॥ ६ ॥ भैरवत्वं भवस्यापि पुरारित्वं निगद्यते ॥ कुतो हेतोः कपालित्वं जगाम सवृषध्वजः ॥ ७ ॥
सर्वमेतत्समाचक्ष्व सूत विस्तरतः क्रमात् ॥ त्वद्वाक्येनामृतस्येव न तृप्तिरिह जायते ॥ ८ ॥ सूत उवाच ॥ ॥ पुण्यं
पवित्रमायुष्यमिदानीं शृणुत द्विजाः ॥ मात्स्यं पुराणमखिलं यज्जगाद गदाधरः ॥ ९ ॥ पुरा राजा मनुर्नाम चीर्ण
वानखिलं तपः ॥ पुत्रे राज्यं समारोप्य क्षमावान् रविनंदनः ॥ १० ॥ मलयस्यैकदेशे तु सर्वात्मगुणसंयुतः ॥ समदुः
खसुखो वीरः प्राप्तवान्योगमुत्तमं ॥ ११ ॥ बभूव वरदश्चास्य वर्षायुतशते गते ॥ वरं वृणीष्व चोवाच प्रीतात्मा क
मलासनः ॥ १२ ॥ एवमुक्तोब्रवीद्राजा प्रणम्य स पितामहं ॥ एकमेवाहमिच्छामि त्वत्तो वरमनुत्तमं ॥ १३ ॥ भूतग्रा रा म
मस्य सर्वस्य स्थावरस्य चरस्य च ॥ भविता रक्षणायाहं प्रलये समुपस्थिते ॥ १४ ॥ एवमस्त्विति विश्वात्मा तत्रैवांत १

र्धीयत ॥ पुष्पवृष्टिश्च महती खात्संपात सुरार्पिता ॥ १५ ॥ कदाचिदाश्रमे तस्य कुर्वतः पितृतर्पणं ॥ पपात पाण्योरु
परि शफरी जलसंयुता ॥ १६ ॥ दृष्ट्वा तच्छफरीरूपं स दयालुर्महीपतिः ॥ रक्षणायाकरोद्यत्नं स तस्मै करकोदके ॥
१७ ॥ अहोरात्रेण चैकेन षोडशांगुलविस्तृतः ॥ सोभवन्मत्स्यरूपेण पाहि पाहीति चाब्रवीत् ॥ १८ ॥ स तमादाय मणि
के प्राक्षिपज्जलचारिणं ॥ तत्रापि चैकरात्रेण हस्तमात्रमवर्धत ॥ १९ ॥ पुनः प्राहार्तनादेन सहस्रकिरणात्मजं ॥
स मत्स्यः पाहि पाहीति त्वामहं शरणं गतः ॥ २० ॥ ततः स कूपे तं मत्स्यं प्राहिणोद्रविनंदनः ॥ यदा न माति तत्रापि त
दा मत्स्यं सरोवरे ॥ २१ ॥ क्षिप्तः स पृथुतामागात्पुनर्योजनसंमितां ॥ तत्राप्याह पुनर्दीनः पाहि पाहि नृपोत्तम ॥ २
२ ॥ ततः स मनुना क्षिप्तो गंगायामप्यवर्धत ॥ समुद्रे तं गृहीत्वा तु प्राक्षिपन्मेदिनीपतिः ॥ २३ ॥ तदा समुद्रम
खिलं व्याप्यासौ समवस्थितः ॥ तदा प्राह मनुर्भीतः कोपि त्वमसुरेतरः ॥ २४ ॥ अथवा वासुदेवस्त्वमन्य ईदृक्
कथं भवेत् ॥ योजनायुतविंशत्या कस्य तुल्यं भवेद्वपुः ॥ २५ ॥ साधु साध्विति चोवाच सम्यक् ज्ञातस्त्वयानघ ॥ अचि
रेणैव कालेन मेदिनी मेदिनीपते ॥ २६ ॥ भविष्यति जले मग्ना सशैलवनकानना ॥ नौरियं सर्वदेवानां निकाये
न विनिर्मिता ॥ २७ ॥ महाजीवनिकायस्य रक्षणार्थं महीपते ॥ स्वेदांडजोद्भिजा जीवा ये च जीवा जरायुजाः ॥ २८ ॥
अस्यां निधाय सर्वांस्तान् अनाथान्पाहि सुव्रत ॥ युगांतवातानिहता यदा चलति नौर्नृप ॥ २९ ॥ शृंगेस्मिन्मम राजेंद्र त

द्विषेसि ततो लयांते सर्वस्य स्थावरस्य चरस्य च ॥३०॥ प्रजापतिस्त्वं भविता जगतः पृथिवीपते ॥ एवं कृते
राजसवृत्तो धृतिमान्नृषिः ॥ मन्वंतराधिपश्चापि देवपूज्यो भविष्यसि ॥३१॥ ॥इति श्रीमत्स्यपुराणे मनुम
त्स्यसंवादे प्रथमसर्गे प्रथमोध्यायः ॥१॥ ॥सूत उवाच ॥ ॥ एवमुक्तो मनुस्तेन पप्रछासुरसूदनं ॥ विषैः कियद्भि
र्भगवन्भविष्यंतरात्क्षयः ॥१॥ सत्वानि च कथं नाथ रक्षिष्ये मधुसूदन ॥ त्वया सह पुनर्योगः कथं वा भविता
मम ॥२॥ श्रीमत्स्य उवाच ॥ ॥ अद्यप्रभृत्यनावृष्टिर्भविष्यति महीतले ॥ यावद्वर्षशतं साग्रं दुर्भिक्षं नरकावहं ॥
३॥ ततोल्पसत्वक्षयदाः रश्मयः सप्तदारुणाः ॥ सप्तसप्तेर्भविष्यंति प्रतप्तांगारवर्षिणः ॥४॥ और्वानलोपि वि
कृतिं गमिष्यति युगक्षये ॥ विषाग्निश्चापि पातालात्संकर्षणमुखाच्युतः ॥५॥ भवस्यापि ललाटस्थतृतीयनय
नेनलः ॥ त्रिजगद्दग्धं तथाक्षोभं समेष्यति महामते ॥६॥ एवं दग्धामही सर्वा यदास्याद्भस्मसंनिभं ॥ आकाशमू
ष्मणा तप्तं भविष्यति परंतप ॥७॥ ततः सदेवनक्षत्रं योगयास्यति संक्षयं ॥ संवर्तो भीमनादश्च द्रोणश्चंडो बल
लाहकः ॥८॥ विद्युतातोक्तशोणांबुः सप्तैते लयवारिदाः ॥ अग्निप्रस्वेदसंभूताः प्लावयिष्यंति मेदिनीं ॥९॥ समु
द्राः क्षोभमेष्यंति तत्रैकेन व्यवस्थिताः ॥ एतदेकार्णवं सर्वं भविष्यति जगत्त्रये ॥१०॥ वेदनावमिमां गृह्य सर्वबीजा
नि सुव्रत ॥ आरोप्य रक्षयोगेन मत्स्यदत्तेन सुव्रत ॥११॥ संयम्य नावं मच्छृंगे मत्प्रभावाभिरक्षितः ॥ एकःस्थास्य

राम ·
२

ति देवेषु दग्धेष्वपि परंतप ॥१२॥ सोमसूर्यावहं ब्रह्मा चतुर्लोकसमन्वितः ॥ नर्मदा च नदी पुण्या मार्कंडेयो महा
नृषिः ॥१३॥ भवो वेदाः पुराणं च विद्याभिः सर्वतो वृतं ॥ त्वया सार्धमिदं सर्वं स्थास्यत्यंतरसंक्षये ॥१४॥ एकमे
कार्णवे जाते चाक्षुषेंतरसंक्षये ॥ वेदान्प्रवर्तयिष्यामि त्वत्सर्गादौ महीपते ॥१५॥ सूत उवाच ॥ एवमुक्त्वा स
भगवांस्तत्रैवांतरधीयत ॥ मनुरप्यास्थितो योगं वासुदेवप्रसादजं ॥१६॥ यथाभूतं तदा भूतसंप्लवः सर्वसू
चितः ॥ काले यथोक्ते संजाते वासुदेवमुखोद्गते ॥१७॥ शृंगी प्रादुरभूत्तस्य मत्स्यरूपी जनार्दनः ॥ अनामातार
ज्जुरूपेण मनोः पार्श्वमुपागमत ॥१८॥ भूतसंघान्समाकृष्य योगेनारोप्य धर्मवित् ॥ भुजंगरज्ज्वा मत्स्यस्य शृंगे
नावमयोजयत् ॥१९॥ उपर्युपस्थितस्तस्य प्रणिपत्य जनार्दनं ॥ आभूतसंप्लवे तस्मिन्नतीते योगशायिना ॥२०॥
पृष्टेन मनुना प्रोक्तं पुराणं मत्स्यरूपिणा ॥ तदिदानीं प्रवक्ष्यामि शृणुध्वमृषिसत्तमाः ॥२१॥ यद्भवद्भिः पुरा पृष्टः
सृष्ट्यादिकमहं द्विजाः ॥ तदेवैकार्णवे तस्मिन्मनुः पप्रच्छ केशवं ॥२२॥ मनुरुवाच ॥ ॥ उत्पत्तिं प्रलयं चैव वंशान्म
न्वंतराणि च ॥ वंशानुचरितं चैव भुवनस्य च विस्तरं ॥२३॥ दानधर्मविधिं चापि श्राद्धकल्पं च शाश्वतं ॥ वर्णाश्रम
विभागं च तथेष्टापूर्तसंज्ञितं ॥२४॥ देवतानां प्रतिष्ठां च यच्चान्यद्विद्यते भुवि ॥ तत्सर्वं विस्तरेण त्वं धर्मं व्याख्या
तुमर्हसि ॥२५॥ श्रीमत्स्य उवाच ॥ ॥ महाप्रलयकालांत एतदासीत्तमोवृतं ॥ प्रसुप्तमिव चातर्क्यमप्रज्ञय म

क्षणं॥२६॥दुर्विज्ञेयमविज्ञातं जगत्स्थाणुचरिष्णु च॥ततः स्वयंभूरव्यक्तः प्रभवः पुण्यकर्मणां॥२७॥व्यंजयन्नेतदखिलं
प्रादुरासीत्तमोनुदः॥योतींद्रियः परोव्यक्तादणुर्ज्यायान्सनातनः॥२८॥नारायण इतिख्यातः स स्वेन स्वेच्छमुद्ध
ता॥स्वशरीरादभिध्याय सिसृक्षुर्विविधं जगत्॥२९॥अप एव ससर्जादौ तासु वीर्यमवासृजत्॥तदेवांडं समभव
द्धेमरूपमयं भवत्॥३०॥संवत्सरसहस्रेण सूर्यायुतसमप्रभं॥प्रविश्यांतर्महातेजाः स्वयमेवात्मसंभवः॥३१
प्रभावादपि तद्व्याप्त्या विष्णुत्वमगमत्पुनः॥तदंतः प्रभवादेष सूर्यः समभवत्पुरा॥३२॥आदित्यश्चादिभूतत्वा
द्ब्रह्मा ब्रह्मपठन्नभूत्॥स एव स सर्वादौ दिवंभूमिं समं सृजत्॥३३॥दिव्यवर्षसहस्रं तु तदंडस्थाकमकपं॥
स चाकारादिद्विधाः सर्वमध्ये व्योम चकार स्वतं॥३४॥जरायुर्मेरुरभवत्सुशैलास्तस्याभवंस्तदा॥यदुल्वं तदभून्मे
घस्तडित्संघातमंडलः॥३५॥नद्योऽंडस्य संजाताः पितरो मनवस्तथा॥सप्ता पश्चि समुद्राश्च तेपि चांतर्ज
लोद्भवाः॥३६॥लवणेक्षुसुराद्याश्च नानारत्नसमन्विताः॥सिसृक्षुरभवद्देवः प्रजापतिररिंदम॥३७॥तत्ते
जसश्च तत्रैव मार्तंडः समजायत॥मृतेंडे जायते यस्मान्मार्तंडस्तेन संस्मृतः॥३८॥रजोगुणमयं तच्च रूपं
तस्य महात्मनः॥चतुर्मुखः स भगवानभूल्लोकपितामहः॥३९॥येन सृष्टं जगत्सर्वं सदेवासुरमानुषं॥
तमेव हि रजोरूपं महद्रूपमुदाहृतं॥४०॥ ॥इति श्रीमत्स्यपुराणे मनुमत्स्यसंवादे ब्रह्मांडवर्णने॥मनुरुवाच॥

चतुर्मुखत्वमगमत्कस्माल्लोकपितामहः॥कथं च लोकानसृजद्ब्रह्मन्ब्रह्मविदांवर॥१॥श्रीमत्स्य उवाच॥
तपश्चचार प्रथमममराणां पितामहः॥आविर्भूतास्ततो वेदाः सांगोपांगपदक्रमाः॥२॥पुराणं ब्रह्मशास्त्राणां
प्रथमं ब्रह्मणा स्मृतं॥नित्यं शब्दमयं पुण्यं शतकोटिप्रविस्तरं॥३॥अनंतरं च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः
मीमांसान्यायसहिता प्रमाणाष्टकसंयुता॥४॥वेदाभ्यासरतस्यास्य प्रजाकामस्य मानसाः॥मनसः पूर्वसृष्टा
वै जातास्तेन मानसाः॥५॥मरीचिरभवत्पूर्वं ततोत्रिर्भगवानृषिः॥अंगिराश्चाभवत्पश्चात्पुलस्त्यस्तदनंतरं
६॥ततः पुलहनामा वै ततः क्रतुरजायत॥प्रचेताश्च ततः पूर्वं वसिष्ठश्चाभवत्ततः॥७॥पुत्रो भृगुरभूत्तद्वन्ना
रदोप्यचिरादभूत्॥दशेमान्मानसान्ब्रह्मा मुनीन्पुत्रानजीजनत्॥८॥शारीरानथ वक्ष्यामि मातृहीनान्प्र
जापतेः॥अंगुष्ठाद्दक्षिणाद्दक्षः प्रजापतिरजायत॥९॥धर्मः स्तनांतादभवद्धृदयात्कुसुमायुधः॥भ्रूमध्या
द्भवत्क्रोधो लोभश्चाधरसंभवः॥१०॥बुद्धेर्मोहः समभवदहंकारादभूत्मदः॥प्रमोदश्चाभवत्कंठान्मृत्यु
र्लोचनतो नृप॥११॥भरतः करमध्यात्तु ब्रह्मसूनुरभूत्ततः॥एते नव सुता राजन्कन्या च दशमी पुनः॥अ
ंगजा रतिविख्याता दशमी ब्रह्मणः सुता॥१२॥श्रीमनुरुवाच॥॥बुद्धेर्मोहः समभवदिति यत्परिकीर्तितं॥अ
हंकारः स्मृतः क्रोधो बुद्धिर्नाम किमुच्यते॥१३॥श्रीमत्स्य उवाच॥॥सत्त्वं रजस्तमश्चैव त्रिगुणं त्रयमुदाहृतं॥साम्यवे

स्थितिरेतेषांस्मृतिः परिकीर्त्तिता॥१४॥ केचित्प्रधानमित्याहुरव्यक्तमपरेजगुः॥ एतदेवप्रजासृष्टिंकरोतिविकरोति
च॥१५॥ गुणेभ्यःक्षोभ्यमाणेभ्यस्त्रयोदेवाविजज्ञिरे॥ एकामूर्त्तिस्त्रयोभागाब्रह्मविष्णुमहेश्वराः॥१६॥ सविकारात्प्रधानात्तु
महत्तत्त्वमजायत॥ महानितियतःख्यातिर्लोकानांजायतेसदा॥१७॥ अहंकारश्चमहतोजायतेमानवर्द्धनः॥ इं
द्रियाणिततःपंचवक्ष्येबुद्धिवशानितु॥१८॥ प्रादुर्भूतानिचान्यानितथाकर्मवशानितु॥ श्रोत्रंत्वक्चक्षुषीजिह्वा
नासिकाचयथाक्रमं॥१९॥ पायूपस्थंहस्तपादौवाक्चेंद्रियसंग्रहः॥ शब्दःस्पर्शश्चरूपंचरसोगंधश्चपंचमः
॥२०॥ उत्सर्गानंदनादानगत्यालापाश्चतत्क्रियाः॥ मनएकादशंतेषांबुद्धिकर्मगुणान्वितं॥२१॥ इंद्रियाव
यवान्सूक्ष्मानपरूपमत्रेमनीषिणः॥ यांतितस्माच्चतन्मात्राःशरीरयोगात्तजीवोपिशरीरीतिनिगद्यते॥२२॥
मनाःसृष्टिंविकुरुतेनोद्यमानंसिसृक्षया॥ आकाशंशब्दतन्मात्रादभूच्छब्दगुणात्मकं॥२३॥ आकाशविकृते
र्वायुःशब्दस्पर्शगुणोभवत्॥ वायुश्चस्पर्शतन्मात्रात्तेजश्चाविरभूत्ततः॥२४॥ त्रिगुणंतद्विकारेणतच्छब्दस्पर्श
रूपवत्॥ तेजोविकारादभवद्वारिराजंश्चतुर्गुणं॥२५॥ रसतन्मात्रसंभूतंप्रायोरसगुणात्मकं॥ भूमिस्तुगं
धतन्मात्रादभूत्पंचगुणान्ततः॥२६॥ प्रायःगंधगुणासातुबुद्धिरेषागरीयसी॥ एभिःसंपादितंभुंक्तेपुरुषःपंच
विंशकः॥२७॥ ईश्वरेच्छावशःसोपिजीवात्माकथ्यतेबुधैः॥ एवंषड्विंशकंप्रोक्तंशरीरमिहमानवैः॥२८॥ सां

ख्यंसंख्यात्मकत्वाच्चकपिलादिभिरुच्यते॥ एवंतत्वात्मकंकृत्वाजगद्वेधाअजीजनत्॥२९॥ सावित्रींलोकसृष्ट्यर्थंहृ
दिकृत्वासमास्थितः॥ ततःसंजपतस्तस्यभित्वादेहमकल्मषं॥३०॥ स्त्रीरूपमर्द्धमकरोदर्द्धंपुरुषरूपवत्॥ शतरू
पाचसाख्यातासावित्रीचनिगद्यते॥३१॥ सरस्वत्यथगायत्रीब्रह्माणीचपरंतप॥ ततःस्वदेहस्तुसंभूतामात्मजामि
त्यकल्पयत्॥३२॥ दृष्ट्वातांव्यथितस्तावत्कामबाणार्दितोविभुः॥ अहोरूपमहोरूपमितिचाहप्रजापतिः॥३३॥
ततोवसिष्ठप्रमुखाभगिनीमितिचुक्रुशुः॥ ब्रह्मानकिंचिद्ददृशेतन्मुखालोकनादृते॥३४॥ अहोरूपमहोरूप
मितिप्राहपुनःपुनः॥ ततःप्रणामनम्रांतांपुनस्तामभ्यलोकयत्॥३५॥ अथप्रदक्षिणंचक्रेसापितुर्वरवर्णि
नी॥ पुत्रेभ्योलज्जितस्यास्यतद्रूपालोकनेच्छया॥३६॥ आविर्भूतमथोवक्त्रंदक्षिणंपांडुमेवच॥ विस्मयस्फुरदो
ष्ठंचपश्चात्यमुदगात्ततः॥३७॥ चतुर्थमभवत्पश्चाद्वामंकामशरातुरं॥ ततोन्यदभवत्तस्यकामातुरतयातदा॥ ऊर्ध्व
उत्पतंत्यास्तदाकाशमालोकनकुतूहलात्॥ सृष्ट्यर्थंयत्कृतंतेनतपःपरमदारुणं॥३८॥ तत्सर्वंनाशमग
मत्स्वसुतोपगमेच्छया॥ ततोर्ध्ववक्त्रमभवत्पंचमंतस्यधीमतः॥४०॥ आविर्भवज्जटाभिश्चतद्वक्त्रंचावृणोत्प्र
भुः॥ ततस्तानब्रवीद्ब्रह्मापुत्रानात्मसमुद्भवान्॥४१॥ प्रजाःसृजध्वमभितःसदेवासुरमानुषाः॥ एवमुक्तास्त
तःसर्वेसमसृजुर्विविधाःप्रजाः॥४२॥ गतेषुतेषुसृष्ट्यर्थंप्रणामावनतामिमां॥ उपयेमेसविश्वात्माशतरूपाम

निर्दिता॥४३॥ एवमुक्तवतीयस्मादतिकामातुरो विभुः॥ सलज्जां चकमे देवः कमलोदरमंदिरे॥४४॥ यावदब्दश
तं दिव्यं यथान्यः प्राकृतो जनः॥ ततः कालेन महता तस्य पुत्रोभवन्मनुः॥४५॥ स्वायंभुव इति ख्यातः स विरा
डिति नः श्रुतं॥ तद्रूपगुणसामान्यादधिपूरुष उच्यते॥४६॥ वैराजा यत्र ते जाता बहवः शंसितव्रताः॥ स्वायंभु
वा महाभागाः सप्तसप्त तथापरे॥४७॥ स्वारोचिषाद्याः सर्वे ते ब्रह्मतुल्यस्वरूपिणः॥ औत्तमिप्रमुखास्तद्वद्ये
षां त्वं सप्तमोधुना॥४८॥ ॥इति श्रीमत्स्यपुराणे मनुमत्स्यसंवादे प्रसुखोत्पत्तिः॥३॥ ॥श्रीमनुरुवाच॥ ॥अहो
कष्टतरं चैतदंगजागमनं प्रभो॥ कथं न दोषमगमत्कर्मणानेन पद्मजः॥१॥ परस्परं च संबंधः सगोत्राणा
मभूत्कथं॥ वैवाहिकस्तत्सुतानां छिंधि मे संशयं प्रभो॥२॥ श्रीमत्स्य उवाच॥ ॥दिव्येयमादिसृष्टिस्तु रजोगु
णसमुद्भवा॥ अतींद्रियेंद्रिया तद्वदतींद्रियशरीरिका॥३॥ दिव्यतेजोमयी भूप दिव्यज्ञानसमुद्भवा॥ न मर्त्यै
रभितः शक्या वेत्तुं तत्समं चक्षुषा॥४॥ यथा भुजंगाः सर्पाणां आकाशे विश्वपक्षिणः॥ तद्विदं सर्वं दिव्या ए
व न मानुषाः॥५॥ कार्याकार्ये देवानां शुभाशुभफलप्रदे॥ यस्मात्तस्मान्न राजेंद्र तद्विचारो नृणां शुभः॥ अ
न्यच्च सर्ववेदानां अधिष्ठाता चतुर्मुखः॥ गायत्री ब्रह्मणस्तद्वदंगभूता निगद्यते॥६॥ अमूर्त्तमूर्तिमद्वा
पि मिथुनं तत्प्रचक्षते॥ विरंचीयत्र भगवान्तत्र देवी सरस्वती॥७॥ भारती यत्र तत्रैव तत्र तत्र प्रजापतिः॥ य

था तपेन रहितश्छायया दृश्यते क्वचित्॥८॥ गायत्री ब्रह्मणा पार्श्वं तथैव न विमुंचति॥ देवराशिः स्मृतो ब्रह्मा सा
वित्री तमवस्थिता॥९॥ तस्मान्न कश्चिद्दोषः स्यात्सावित्रीगमने विभोः॥ तथापि लज्जावनतः प्रजापतिरभू
त्पुरा॥१०॥ स्वसुतोपगमाच्छुक्ला शशाप कुसुमायुधं॥ यस्मान्ममापि भवता मनः संक्षोभितं शरैः॥११॥ त
स्मात्त्वद्देहमचिराद्रुद्रो भस्मीकरिष्यति॥ ततः प्रसादयामास कामदेवश्चतुर्मुखं॥१२॥ न मामकारणे शप्तुं
मिहार्हसि मानद॥ अहमेवंविधः सृष्टस्त्वयैव चतुरानन॥१३॥ इंद्रियक्षोभजनकः सर्वेषामेव देहिनां॥
स्त्रीपुंसोरभिचारेण मया सर्वत्र सर्वदा॥१४॥ क्षोभ्यं मनः प्रयत्नेन त्वयैवोक्तं पुरा विभो॥ तस्मादनप
राधेन स्वयं शप्तस्त्वया विभो॥१५॥ कुरु प्रसादं भगवन् स्वशरीरावाप्तये पुनः॥१५॥ श्रीब्रह्मोवाच॥ ॥वैव
स्वतेंतरे प्राप्ते यदेवान्वयसंभवः॥ कथंचिद्दग्धो रुद्रेण किमर्थं कुसुमायुधः॥१६॥ रामो रामपरा मत्स्योभ
त्स्यत्वबलमास्थितः॥ अवतीर्णस्त्रिपुरध्वंसी द्वारकामधिवत्स्यति॥१७॥ तद्भ्रातुस्तत्समस्यैव तदा पुत्रत्वमेष्य
सि॥ एवं शरीरमासाद्य भुक्त्वा भोगानशेषतः॥१८॥ ततो भरतवंशांते भूत्वा वत्सनृपात्मजः॥ विद्याधराधिप
त्वं च प्राप्य दास्तसंभवः॥१९॥ सद्यो निधनमेत्य प्राप्य मत्समीपमुपैष्यसि॥ एवं शापप्रसादाभ्यां मुदितः कुसु
मायुधः॥२०॥ शोकप्रमोदाभिहतो जगाम स यथागतं॥२१॥ ऋषय ऊचुः॥ ॥कोसौ मनुरिति प्रोक्तो यद्वंशे क

म०पु० मसंभवः॥ कथं च दग्धो रुद्रेण किमर्थं कुसुमायुधः॥२१॥ भरतश्चान्वये कस्य का च सृष्टिः पुराभवत्॥ सर्वमेत
६ न्ममाचक्ष्व सूत नः संशयो हि नः॥ सूत उवाच॥ ॥यस्मा देहार्द्धसंभूता गायत्री ब्रह्मवादिनी॥ जननी या मनो
र्देवी शतरूपा शतेन्द्रिया॥२३॥ रतिर्मनस्तथो बुद्धिर्महदादिसमुद्भवः॥ ततः स शतरूपायां सप्तापत्यान्यजी
जनत्॥२४॥ ये मरीच्यादयः प्रोक्ता मानसास्तस्य धीमता॥ तेषामयमभूल्लोकः सर्वज्ञानात्मकः पुनः॥२५॥
ततोऽसृजद्वामदेवं त्रिशूलवरधारिणं॥ सनत्कुमारं च विभुं सर्वेषामपि पूर्वजं॥२६॥ वामदेवस्तु भगवानसृ
जन्मुखतो द्विजान्॥ राजन्यानसृजद्बाह्वोर्विट्शूद्रावूरुपादयोः॥२७॥ विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषि
च॥ छंदांसि च ससर्जादौ पर्जन्यं च ततः परं॥२८॥ साध्यान्गणानी रात्र्यांस्त्रिनेत्रानसृजत्पुनः॥ कोटयश्चतु
राशीतिर्जरामरणवर्जिताः॥२९॥ स संसृजतमर्त्यांस्तान्ब्रह्मणा विनिवारितः॥ नैवंविधा भवेत्सृष्टिर्जराम
रणवर्जिता॥३०॥ शुभाशुभात्मिका या तु सैव सृष्टिः प्रशस्यते॥ एवं स्थितः स तेनादौ सृष्टेः स्थाणुरतोऽभवत्॥
३१॥ स्वायंभुवो मनुर्धीमांस्तपस्तप्त्वा सुदुःकरं॥ पत्नीमवाप्य रूपाढ्यामनंतां नामनामतः॥३२॥ प्रियव्रतोत्ता राम.
नपादौ मनुस्तस्यामजीजनत्॥ धर्मस्य कन्या चतुरा सूनृता नाम भामिनी॥३३॥ उत्तानपादात्तनयान्प्रा ६
पमंथरगामिनी॥ अपस्यातिमपस्तंतं कीर्तिमंतं ध्रुवं तथा॥३४॥ उत्तानपादोऽजनयत्सूनृतायां प्रजापतिः॥ ध्रु

वो वर्षसहस्राणि त्रीणि तप्त्वा तपः पुरा॥३५॥ दिव्यमापत सस्थानं अचलं ब्रह्मणो वितात्॥ यमेवं पुरतः कृत्वा ध्रु
वं सप्तर्षयः स्थिता॥ धन्या नाम मनोः कन्या ध्रुवात्सृष्टिमजीजनत्॥ अग्निकन्यां तु सुछायां नष्टायां स चाक्षुषः
३६॥ जनयामास तनयान्दश ऋरानकल्मषान्॥ कुरुपुरुशतद्युम्नस्तपस्वी सत्यवाकृकविः॥३८॥ अग्निष्टु
सु दतिरात्रश्च सुद्युम्नश्चापराजिताः॥ अभिमन्युश्च दशमो नड्वलायामजायत॥३९॥ कुरुस्तोजनयत्पुत्रान्पणाग्ने
यी तिसुव्रतान्॥ अंगं सुमनसं स्वातिं क्रतुमंगिरसं गयं॥४०॥ पितृकन्या सुनीथा वैनमंगात्सृजीजनत्॥ वेनमन्या
यिनं विप्रा ममंथुस्तत्कराद्भूत्॥४१॥ पृथुर्नाम महातेजाः स पुत्रौ द्वावजीजनत्॥ अंतर्द्धानं हविर्धानं मारीच
ड्डिन्यामजीजनत्॥४२॥ हविर्धानात्षडाग्नेयी धिषणाजनयत्सुतान्॥ प्राचीनबर्हिषां सांगं यमं शुक्रं बलं
४३॥ प्राचीनबर्हिर्भगवान्महानासीत्प्रजापतिः॥ हविर्धानाः प्रजास्तेन बहवः संप्रवर्तिताः॥४४॥ सवर्णायां तु
सामुद्र्यां दशाधत्तसुतान्प्रभुः॥ सर्वे प्रचेतसो नाम चतुर्वेदस्य पादगाः॥४५॥ तत्तपो प्रथिता हस्ता बभूवुर्लोक
संमताः॥ देवादेशाद्वृतानग्निरदहद्भूरुविनंदनः॥४६॥ सोमकन्याभवत्पत्नी मारिषा नाम विश्रुता॥ तेभ्यः स दु
क्षमेकं स पुत्रमग्र्यमजीजनत्॥४७॥ दक्षादनंतरं वृक्षानौषधानि च सर्वशः॥ अजीजनत्सोमकन्या नदीश्चं
द्रवती तथा॥४८॥ सोमांशस्य च तस्यापि दक्षस्याशीतिकोटयः॥ नासां तु विस्तरं वक्ष्ये लोके यः संप्रतिष्ठितः॥४९॥

द्विपदाश्चाभवन्केचित्केचिद्बहुपदा नराः॥ बलीमुखाः शंकुकर्णास्तथा॥ ५०॥ अश्वऋक्षमुखाः केचित्सिंहाननास्तथा॥ श्वसूकरमुखाः केचित्केचिदौष्ट्रमुखास्तथा॥ जनयामास धर्मात्मा म्लेच्छान्सर्वाननेकशः॥ स सृष्ट्वा मनसा दक्षः स्त्रियः पश्चादजीजनत्॥ ५२॥ ददौ स दश धर्माय कश्यपाय त्रयोदश॥ सप्तविंशतिसोमाय दश नक्षत्रसंज्ञिताः॥ देवासुरमनुष्यादि ताभ्यः सर्वमभूत्जगत्॥ ५३॥ ॥ इति श्रीमत्स्यपुराणे मनुमत्स्यसंवादे आदिः॥ ॥ ऋषय ऊचुः॥ ॥ देवानां दानवानां च गंधर्वोरगरक्षसां॥ उत्पत्तिं विस्तरेणैव सूत ब्रूहि यथातथं १॥ ॥ सूत उवाच॥ ॥ संकल्पाद्दर्शनात्स्पर्शात्पूर्वेषां सृष्टिरुच्यते॥ दक्षात्प्राचेतसादूर्ध्वं सृष्टिर्मैथुनसंभवा॥ २॥ प्रजाः सृजेति व्यादिष्टः पूर्वं दक्षः स्वयंभुवा॥ यथैव च ससर्जादौ तथैव शृणुत द्विजाः॥ ३॥ यदा तु सृजतस्तस्य देवर्षिगणपन्नगान्॥ न वृद्धिमगमल्लोकस्तदा मैथुनयोगतः॥ ४॥ दक्षः पुत्रसहस्राणि पंचसोम्यामजीजनत्॥ तांस्तु दृष्ट्वा महाभागान्सिसृक्षुर्विविधाः प्रजाः॥ ५॥ नारदः प्राह हर्यश्वान्दक्षपुत्रान्समागतान्॥ भुवः प्रमाणं सर्वत्र ज्ञात्वा धर्मधरा वचः॥ ६॥ ततः सृष्टिं विशेषेण कुरुध्वमृषिसत्तमाः॥ ते पितुर्वचनं श्रुत्वा प्रयाताः सर्वतो दिशं॥ ७॥ अद्यापि न निवर्तन्ते समुद्रादिव सिंधवः॥ हर्यश्वेषु च नष्टेषु पुनर्दक्षः प्रजापतिः॥ ८॥ वीरिण्यामेव पुत्राणां सहस्रमसृजत्प्रभुः॥ सबला नाम ते विप्राः समेताः सृष्टिहेतवः॥ ९॥ नारदोऽनुगतः प्राह पुनस्तान्

पूर्ववत्सतान्॥ भुवः प्रमाणं सर्वत्र ज्ञात्वा वै भ्रातरः सुनः॥ १०॥ आगत्याथ ससृष्टिं च करिष्यथ विशेषतः॥ ते पि तेनैव मार्गेण जग्मुर्भ्रातृन्यथा पुरा॥ ११॥ ततः प्रभृति न भ्रातुः कनीयान्मार्गमिच्छति॥ अन्विष्य दुःखमाप्नोति तेन तान्परिवर्जयेत्॥ १२॥ ततस्तेषु विनष्टेषु षष्टिं कन्याः प्रजापतिः॥ वीरिण्यां जनयामास दक्षः प्राचेतसस्तथा॥ १३॥ प्रादात्स दश धर्माय कश्यपाय त्रयोदश॥ सप्तविंशति सोमाय चतस्रोऽरिष्टनेमये॥ १४॥ द्वे चैव भृगुपुत्राय द्वे कृशाश्वाय धीमते॥ द्वे चैवांगिरसे तद्वत्तासां नामानि विस्तरात्॥ १५॥ शृणुध्वं देवमातॄणां प्रजाविस्तरमादितः॥ मरुत्वती वसुर्यामी लंबा भानुररुंधती॥ १६॥ संकल्पा च मुहूर्ता च साध्या विश्वा च भामिनी॥ धर्मपत्न्यः समाख्यातास्तासां पुत्रान्निबोधत॥ १७॥ विश्वेदेवास्तु विश्वायाः साध्या साध्यानजीजनत्॥ मरुत्वत्यां मरुत्वंतो वसोस्तु वसवस्तथा॥ १८॥ भानोस्तु भानवस्तद्वन्मुहूर्तायां मुहूर्तकाः॥ लंबायां घोषनामानो नागवीथी तु यामियां॥ १९॥ पृथिवीतलसंभूतमरुंधत्यामजायत॥ संकल्पायास्तु सृष्टिं निबोधत॥ २०॥ ज्योतिष्मंतस्तु ते देवा व्यापकाः सर्वतोदिशं॥ वसवस्ते समाख्यातास्तेषां सर्गं निबोधत॥ २१॥ आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः॥ प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः॥ २२॥ आपस्य पुत्राश्चत्वारः शांतो वै दंड एव च॥ सांबोऽथ मणिवक्त्रश्च यज्ञरक्षाधिकारिणः॥ २३॥ ध्रुवस्य कालः पुत्रस्तु वर्चाः सोमादजायत॥ द्रविणो हव्यवाहश्च धरपुत्रावुभौ स्मृतौ॥ २४॥ कल्मा

म०पु०
९

कल्याणिस्तांततोःप्राणोरमणाःशिशिरोपिच॥मनोहरास्तपुत्रानवापापहरेःसुतान्॥२५॥शिवात्मत्पपसजवैअं
विज्ञातगतिंतथा॥अवापचानलात्पुत्रानग्निप्रायगुणान्प्रभुः॥२६॥तस्यत्वग्रजोविज्ञानरस्यनैगमेयःस्त्वयंभुवः॥
अपत्यंकृत्तिकानांतुकार्त्तिकेयस्ततःस्मृतः॥२७॥प्रत्यूषस्यविभुःपुत्रऋषिर्नाम्नाथदेवलः॥प्रसादमवनोद्यान
प्रतिमाभूषणादिषु॥२८॥तथागारामकूपेषुस्मृतासोमस्त्वदीक्षिः॥अजैकपादहिर्बुध्न्योविरूपाक्षोथरैवत
॥२९॥हरश्चबहुरूपश्चत्र्यंबकश्चसुरेश्वरः॥सावित्रश्चजयंतश्चपिनाकीचापराजितः॥३०॥एतेरुद्राःस
माख्याताएकादशगणेश्वराः॥कोटयश्चतुराशीतिरुत्पन्नाश्चाक्षयाःस्मृताः॥३१॥दिक्षुसर्वासुयेरक्षांप्र
कुर्वंतिगणेश्वराः॥पुत्राःपौत्राःस्मृताश्चैतेसुरभीगर्भसंभवाः॥३२॥इतिश्रीमत्स्यपुराणेवसुरुद्रान्वयोनाम॥
सूतउवाच॥॥कश्यपस्यप्रवक्ष्यामिपत्नीभ्यःपुत्रपौत्रकं॥अदितिर्दितिश्चैवअरिष्टासुरमादनुः॥१॥सुरभिर्वि
नतातम्रताम्राक्रोधवशाइरा॥कद्रूर्विषमतिस्तासांपुत्रान्निबोधत॥२॥तुषितानामयेदेवाश्चाक्षुषस्यां
तरेमनोः॥वैवस्वतेतरेंचैतेआदित्याद्वादशास्मृताः॥३॥इंद्रोधाताभगस्त्वष्टामित्रोथवरुणोयमः॥विवस्वा
न्सविताकृषापूषांशुमान्विष्णुरेवच॥४॥एतेसहस्रकिरणाआदित्याद्वादशास्मृताः॥इंद्रोधाताभगस्त्वष्टमा
रीचात्कश्यपादयः॥५॥पुत्रानजीजनदिमेदेवानदितिरुत्तमान्॥मन्वंतरस्मिन्नरूपेःपुत्रादेवप्रहरणाःस्मृताः॥६

राम०
९

एतेदेवगणाविप्राप्रतिमन्वंतरेषुच॥उत्पद्यंतेप्रलीयंतेकल्पेकल्पेतथैवच॥७॥दितिःपुत्रद्वयंलेभेकश्यपाद्दितिवः
श्रुतं॥हिरण्यकशिपुंश्चैवहिरण्याक्षंतथैवच॥८॥हिरण्यकशिपोस्तद्वत्जातंपुत्रचतुष्टयं॥प्रह्लादपुत्रश्चा
पुष्पानशिविबाष्किलएवच॥९॥विरोचनश्चतुर्थश्चसबलिंपुत्रमाप्तवान्॥बलेःपुत्रशतंत्वासीद्बाणज्येष्ठंत
तोद्विजाः॥१०॥धृतराष्ट्रस्तथासूर्यश्चंद्रांशुतापनः॥निकुंभनाभोगुर्वक्षःकुक्षिर्भीमोविभीषणः॥११॥एवमा
द्यास्तुवहवोबाणज्येष्ठगुणाधिकं॥बाणःसहस्रबाहुश्चसर्वास्त्रगुणसंयुतः॥१२॥तपसातोषितोयस्यपु
रेवसतिशूलभृत॥महाकालत्वमगमत्साम्यंयस्यपिनाकिनः॥१३॥हिरण्याक्षस्यपुत्रोभूतद्दुर्हरःशकुनि
स्तथा॥भूतसंतापनश्चैवमहानाभस्तथैवच॥१४॥एतेभ्यःपुत्रपौत्राणांकोटयःसप्तसप्ततिः॥महाबलाम
हाकायानानारूपामहौजसः॥१५॥दनुःपुत्रशतंलेभेकश्यपाद्बलदर्पितं॥विप्रचित्तिःप्रधानोभूत्तेषांम
ध्येमहाबलः॥१६॥द्विमूर्धाशकुनिश्चैववस्तथाशंकुशिरोधरः॥अयोमुखःशंबरश्चकपिलोवामनस्तथा॥
१७॥मरीचिर्मघवाश्चैवइरागर्गतरास्तथा॥विद्रावणश्चकेतुश्चकेतुवीर्यःशतह्रदः॥१८॥इंद्रजिछत्रुजिच्चैववज्र
नाभस्तथैवच॥एकचक्रोमहाबाहुर्वज्राक्षस्तारकस्तथा॥१९॥असिलोमापुलोमाचबिंदुर्बाणोमहासुरः॥
स्वर्भानुर्वृषपर्वाचएवमाद्यादनोःसुताः॥२०॥स्वर्भानोःसुप्रभाकन्यासर्वाश्चैवपुलोमजाः॥उपदानवीमयस्या

सीत्तथामंदोदरीकुहूः॥२१॥शर्मिष्ठासुंदरीचैवचंद्राकरूपप्रभा॥पुलोमाकालिकाश्चैवैश्वानरसुतेहिते॥
२२॥बह्वपत्येमहासत्वेमारीचेःसपरिग्रहः॥तयोःषष्टिसहस्राणिदानवानामभूत्पुरा॥२३॥पुराणंवैहिरण्य
पुरवासिनः॥पौलोमान्कालकेयांश्चमारीचोजनयत्सुतान्॥२४॥चतुर्मुखाल्लब्धवरास्तेहताविजयेनवै॥विप्र
चित्तिःसिंहिकेयान्सिंहिकायामजीजनत्॥२५॥हिरण्यकशिपोर्वैभागिनेयास्त्रयोदश॥कंसःशल्यश्चराजें
द्रनलोवातापिरेवच॥२६॥इल्वलोनमुचिश्चैवस्वसृपश्चांजनस्तथा॥नरकःकालनेमिश्चशरमाशरणश्चैववच॥
२७॥कल्पवीर्यश्चविख्यातादनुवंशविवर्द्धनाः॥संह्रादस्यतुदैत्यस्यनिवातकवचाःसुताः॥२८॥अवध्याः
सर्वदेवानांगंधर्वोरगरक्षसांयेहताबलमाश्रित्यअर्जुनेनरणाजिरे॥२९॥षट्कन्याजनयामासताम्राम
रीचबीजतः॥शुकीश्येनीचभासीचसुग्रीवीगृध्रिकाशुचिः॥३०॥शुकीशुकानुलूकांश्चजनयामासधर्मतः॥ ज
श्येनीश्येनांस्तथाभासीकुररानप्यजीजनत्॥३१॥गृध्रीगृध्रान्कपोतांश्चपारापतविहंगमान्॥हंसासार
सक्रौंचांश्चप्लवान्शुचिरजीजनत्॥३२॥अजाश्वमेषोष्ट्रखरान्सुग्रीवीचाप्यजीजनत्॥एषताम्रान्वयःप्रो राम.
क्तोविनतायाःनिबोधत॥३३॥गरुडःपततांनाथअरुणश्चापिपक्षिणां॥सौदामिन्यातथाकन्यायेयंन १
भसिविश्रुत॥३४॥संपातिश्चजटायुश्चअरुणस्यसुतावुभौ॥संपातिपुत्रोबभ्रुश्चशीघ्रगश्चापिवि

श्रुतः॥३५॥जटायुषःकरःशतगामीचविश्रुतौ॥रासोजल्पवालश्चनकंउश्चापितत्सुताः॥३६॥तेषामनंतमभवत्प
क्षिणांपुत्रपौत्रकं॥सुरसायाःसहस्रंतुसर्पाणामभवत्पुरा॥३७॥सहस्रशिरसांकद्रूःसहस्रंचापिसुव्रता
॥प्रधानास्तेषुविख्याताःषड्विंशतिररिंदमाः॥३८॥शेषवासुकिककर्कोटशंखैरावतकंबलाः॥धनंजयम
हानीलपद्माश्वतरतक्षकाः॥३९॥एलापत्रमहापद्मधृतराष्ट्रबलाहकाः॥शंखपालमहाशंखपुष्पदंष्ट्रशुभा
ननाः॥४०॥शंकुरोमाचनहुषोवामनःपाणिरेवच॥कपिलोदुर्मुखश्चापिपतंजलिरितिस्मृताः॥४१॥एषा
मनंतमभवत्तेषांपुत्रपौत्रकं॥प्रायसोयत्पुरादग्धंजनमेजयमंदिरे॥४२॥रक्षोगणंक्रोधवशास्वनामान
मजीजनत्॥दंष्ट्रिणांनियुतंतेषांभीमसेनाद्गतःक्षयं॥४३॥रुद्राणांचगणांस्तद्वत्गोमहिष्योवरांगनाः॥सुर
भिर्जनयामासकश्यपाच्छिवतत्पराः॥४४॥तृणवृक्षलतागुल्ममिरासर्वमजीजनत्॥विश्वातुरक्षरक्षांसि
जनयामासकोटिशः॥४५॥एषमन्वंतरोराजन्सर्गःस्वारोचिषेस्मृतः॥एतेकश्यपदायादाःशतशोथसहस्र
शः॥४६॥ततएकोनपंचाशन्मरुतःकश्यपाद्दितिः॥जनयामासधर्मज्ञान्सर्वानिमरवल्लभान्॥४७॥॥इति
श्रीमत्स्यपुराणेमनुमत्स्यसंवादेकश्यपान्वयोनाम॥६॥ऋषयऊचुः॥॥दितेःपुत्राःकथंजातामरुतोदेववल्ल
भाः॥देवैश्चचक्रुःसापत्न्यात्कस्मात्तेसख्यमुत्तमं॥१॥सूतउवाच॥॥पुरादेवासुरेयुद्धेहतेषुहरिणासुरैः॥

म० पु०
१०

पुत्रपौत्रेष्वशोकां गत्वा मूलारिमुत्तमं ॥२॥ समंतपंचके तीर्थे सरस्वत्यास्तटे शुभे ॥ मनुर्वरा धनपरा तपउग्रं चचा
र ह ॥३॥ तदा दितिर्दैत्यमाता ऋषिरूपेण सुप्रभा ॥ फलाहारा तपस्तेपे कृच्छ्रचांद्रायणादिकं ॥४॥ पावद्वर्षश
तं साग्रं जराशोकसमाकुला ॥ तत्तेसा तपसा तप्ता वसिष्ठादीनपृच्छत ॥५॥ कथयंतु भवंतो मे पुत्रशोकविनाश
नं ॥ व्रतं सौभाग्यफलदं इहलोके परत्र च ॥६॥ ऊचुर्वसिष्ठप्रमुखा मदनद्वादशीव्रतं ॥ यस्याः प्रभावाद्नवतस्तु
तशोकविवर्जिता ॥७॥ ऋषय ऊचुः ॥ श्रोतुमिच्छामहे सूत मदनद्वादशीव्रतं ॥ सुतानेकोनपंचाशत्येन ले
भे दितिः पुनः ॥८॥ सूत उवाच ॥ यद्वसिष्ठादिभिः पूर्वं दितेः कथितमुत्तमं ॥ विस्तरेण तदेवेदं मत्सकाशान्नि
बोधत ॥९॥ चैत्रमासि सिते पक्षे द्वादश्यां नियतव्रतः ॥ स्थापयेदव्रणं कुंभं सितचंदनचर्चितं ॥ नानाफलयु
तं तद्वदिक्षुदंडसमन्वितं ॥ उत्सुक्तं ॥ तस्याप्युपरिका मंतु कदलीदलसंयुतं ॥१०॥ कुपाज्ञायद्विपीपेतं च
रितं तस्य वामतः ॥ सितवस्त्रयुगाछन्नं सितचंदनचर्चितं ॥१२॥ गंधधूपैस्ततो दद्यात्गीतं वाद्यं च कारयेत् ।
तदभावे कथां कुर्यात्कामकेशवयोर्नरः ॥१३॥ कामनाम्ना हरेरर्चास्नापयेद्गंधवारिणा ॥ शुक्लपुष्पाक्षतफ
लैरर्चयेन्मधुसूदनं ॥१४॥ कामाय पादौ संपूज्य जंघे सौभाग्यदाय च ॥ ऊरू स्मरायेति तथा मन्मथायेति राम
वै कटिं ॥१५॥ स्वच्छोदराय तु उदरं अनंगायेत्युरो हरेः ॥ मुखं पद्ममुखायेति बाहू पंचशरायवै ॥१६॥ नमः सर्वा १०

त्मने मौलिमर्च्चयेदिति केशवं ॥ ततः प्रभाते तं कुंभं ब्राह्मणाय निवेदयेत् ॥१७॥ ब्राह्मणान्भोजयेद्भक्त्या स्वयं च ज
वणाहृते ॥ शुक्लां तु दक्षिणां दद्यादिमं मंत्रमुदीरयेत् ॥१८॥ प्रीयतामत्र भगवान्कामरूपी जनार्दनः ॥ हृद
ये सर्वभूतानां य आनंदो विधीयते ॥१९॥ अनेन विधिना सर्वं मासि मासि समाचरेत् ॥ उपवासी त्रयोदश्याम
र्चयेद्विष्णुमव्ययं ॥२०॥ फलमेकं तु संप्राप्य द्वादश्यां भूतले स्वपेत् ॥ ततस्त्रयोदशे मासि घृतधेनुसमन्विता ॥
२१॥ शय्यां दद्यादनंगाय सर्वोपस्करसंयुतां ॥ कांचनं कामदेवं च शुक्लां गां च पयस्विनीं ॥२२॥ वासोभिर्द्विज
दंपत्यं पूजयेच्छक्त्या विभूषणैः ॥ शय्यागंधादिकं दद्यात्प्रीयतामिति मुदीरयेत् ॥२३॥ होमः शुक्लतिलैः का
र्यः कामनामानि कीर्तयेत् ॥ गव्येन हविषा तद्वत्पायसेन च धर्मवित् ॥२४॥ विप्रेभ्यो भोजनं दद्याद्वित्तशा
ठ्यविवर्जितः ॥ इक्षुदंडान्स्मयादद्यात्पुष्पमालां च शक्तितः ॥२५॥ यः कुर्याद्विधिनानेन मदनद्वादशीव्रतं ।
सर्वपापविनिर्मुक्तः प्राप्नोति हरिसाम्यतां ॥२६॥ इहलोके परान्पुत्रान्सौभाग्यफलमश्नुते ॥ यः स्मरः स
स्मृतो विष्णुरानंदात्मा महेश्वरः ॥२७॥ सुखार्थी कामरूपेण स्मरमंगजमीश्वरं ॥ एतच्छ्रुत्वा चकारासौ दितिः स
र्वमशेषतः ॥२८॥ कश्यपो व्रतमाहात्म्यादागत्य परया मुदा ॥ चकार च कृशांगीं पुनः रूपयौवनशालिनीं ॥२९॥
वरेण छंदयामास सा तु वव्रे ततो वरं ॥ पुत्रं शक्रवधार्थाय समर्थममितौजसं ॥३०॥ वरयामि महात्मानं स

वमिरति शूद्रदनं॥ उवाच कश्यपो वाक्यं इन्द्रहंतारमूर्जितं॥३१॥ प्रदास्याम्यहमेवेडं किं त्वेतत्क्रियतां शुभे॥ आ
पस्तंबां करोमीष्टिं पुत्रीयामद्य सुव्रते॥३२॥ दधास्यति ततो गर्भे इंद्रशत्रुनिषूदनं॥ आपस्तंबां ततश्चक्रे पुत्रेष्टिं
द्रविणाधिकां॥३३॥ इंद्रशत्रुर्भवस्वेति जुहाव च सविस्तरं॥ देवास्तु मुमुदुर्दैत्या विमुखाः स्युश्च दानवाः॥
३४॥ दिति गर्भमथाधत्त कश्यपः प्राह तां पुनः॥ त्वया यत्नो विधातव्यो ह्यस्मिन्नार्भे वरानने॥३५॥ संवत्सरशतं
त्वेकं अस्मिन्नेव तपोवने॥ संध्यायां नैव भोक्तव्यं गर्भिण्या वरवर्णिनि॥३६॥ न स्थातव्यं न गंतव्यं वृक्षमूलेषु
सर्वदा॥ नोपस्करेषु पविशेन्मुशलोलूखलादिषु॥३७॥ जलं न चावगाहेच्च शून्यागारं च वर्ज्जयेत्॥ वल्मीका
ये न तिष्ठेच्च न चोद्विग्नमना भवेत्॥३८॥ विलिखेन्न नखैर्भूमिं नांगारेण न भस्मना॥ न शयालु सदा तिष्ठेद्व्या
मं च विवर्ज्जयेत्॥३९॥ न तुषांगारभस्मास्थिकपालेषु समाविशेत्॥ वर्ज्जयेत्कलहं लोके गात्रभंगं तथैव च॥४०
न मुक्तकेशी तिष्ठेत नाशुचिः स्यात्कदाचन॥ न शयीतोत्तरशिरा न चापरशिराः क्वचित्॥ न वस्त्रहीना नोद्वि
ग्ना न चार्द्रचरणा सती॥ नामंगल्यां वदेद्वाचं न च हास्याधिका भवेत्॥४२॥ कुर्याच्च गुरुशुश्रूषां नित्यं मंगल्यत
त्परा॥ सर्वौषधिभिः कोष्णेन वारिणा स्नानमाचरेत्॥४३॥ कृतरक्षा सुभूषा च वास्तुपूजनतत्परा॥ तिष्ठेत्प्रसन्न
वदना भर्तुः प्रियहिते रता॥४४॥ दानशीला तृतीयायां पार्वण्यां नक्तमाचरेत्॥ इति हन्ना भवेन्नारी विशेषेण तु

गर्भिणी॥४५॥ यस्तु तस्यां भवेत्पुत्रः शीलायुर्वृद्धिसंयुतः॥ अन्यथा गर्भपतनमवाप्नोति न संशयः॥४६॥ तस्मात्त्व
ममतया ह्यस्मिन् गर्भेस्मिन्यत्नमाचर॥ स्वस्त्यस्तु ते गमिष्यामि तथेत्युक्तस्तया पुनः॥४७॥ पश्यतां सर्वभूतानां त
त्रैवांतरधीयत॥ ततः सा कश्यपोक्तेन विधिना समतिष्ठत॥४८॥ अथ भीतस्तदर्थेंद्रो दितेः पार्श्वमुपागमत्॥
विहाय देवसदनं तच्छुश्रूषुरवस्थितः॥४९॥ दितेश्छिद्रांतरप्रेप्सुरभवत्पाकशासनः॥ विनीतो भवदव्यग्रः प्रशां
तवदनो बहिः॥५०॥ अजानन् किल तत्कार्यमात्मनः शुभमाचरन्॥ ततो वर्षशतोने सा न्यूने तु दिवसैस्त्रिभिः
५१॥ मेने कृतार्थमात्मानं प्रीत्या विस्मितमानसा॥ अकृत्वा पादयोः शौचं प्रसुप्ता मुक्तमूर्द्धजा॥५२॥ निद्राभरस
माक्रांता दिवापरशिराः क्वचित्॥ ततस्तदंतरं लब्ध्वा प्रविष्टस्तु शचीपतिः॥५३॥ वज्रेण सप्तधा कायं तद्गर्भं त्रि
दशाधिपः॥ ततः सप्तैव ते जाताः कुमाराः सूर्यवर्चसः॥५४॥ रुदंतः सप्त ते बाला निषिद्धा गिरिदारिणा॥ भूयो
पि रुदतश्चैनानेकैकं सप्तधा हरिः॥५५॥ चिच्छेद शत्रुहंता वै पुनस्तदुदरस्थितः॥ एवमेकोनपंचाशद्भूत्वा ते रु
रुदुर्भृशं॥५६॥ इंद्रो निवारयामासमादिष्टपुनः पुनः॥ ततः स चिंतयामास किमेतदिति वृत्रहा॥५७॥ धर्म
समाहात्म्यात्पुनः संजीविता स्त्वमी॥ विदित्वा ध्यानयोगेन मदनद्वादशीफलं॥५८॥ नूनमेतत्परिणतं मे धुना
कृष्णपूजनात्॥ वज्रेणाभिहतां संतो न विनाशमवाप्नुयुः॥५९॥ एकोप्यनेकतामाप यस्मादुदरगोप्यलं॥ अवध्या

नूनमेते वै तस्माद्देवं नवत्विति॥६०॥ यस्मान्मारोदते तु क्वारुदंतो गर्भसंस्थिताः॥ मरुतो नाम ते नेह भवंतु मख
भागिनः॥६१॥ ततः प्रसाद्य देवेशः क्षमस्वेति दितिं पुनः॥ अर्थशास्त्रं समास्थाय मयैतद्दुःकृतं कृतं॥६२॥
कृत्वा मरुद्गणं देवैः सामान्यममराधिपः॥ दितिं विमानमारोप्य ससुतामनयद्दिवं॥६३॥ यज्ञभागभुजो जाता
मरुतस्ते ततो द्विजाः॥ न जग्मुरैक्यमसुरैरतस्ते सुरवल्लभाः॥६४॥ इति श्रीमत्स्यपुराणे मरुदुत्पत्तौ मदन
द्वादशीव्रतं॥ ॥ ऋषय ऊचुः॥ आदिसर्गस्त्वया सूत कथितो विस्तरेण तु॥ प्रतिसर्गे च ये येषामधिपास्तान्व
दस्व नः॥१॥ सूत उवाच॥ ॥ यदाभिषिक्तः सकलाधिराज्ये पृथुर्धरित्र्यामधिपो भवेत॥ तदौषधीनामधि
पं चकार यज्ञव्रतानां तपसां च चंद्रं॥२॥ नक्षत्रताराद्विजवृक्षगुल्मलतावितानस्य च रुक्मगर्भः॥ अपाम
धीशं वरुणं धनानां राज्ञां प्रभुं वैश्रवणं च तद्वत्॥३॥ विष्णुं रवीनामधिपं वसूनामग्निं च लोकाधिपतिं च
कार॥ प्रजापतीनामधिपं च दक्षं चकार शक्रं मरुतामधीशं॥४॥ दैत्याधिपानामथ दानवानां प्रह्लादमी
शं च यमं पितृणां॥ पिशाचरक्षःपशुभूतयक्षवेतालराजं त्वथ शूलपाणिं॥५॥ प्रालेयशैलं च पतिं गिरी
णामीशं समुद्रं सरितां नदीनां॥ गंधर्वविद्याधरकिन्नराणामीशं पुनश्चित्ररथं चकार॥६॥ नागाधिपं वासु
किमुग्रवीर्यं सर्पाधिपं तक्षकमादिदेश॥ दिशां गजानामधिपं चकार गजेंद्रमैरावणनामधेयं॥७॥ सुप

र्णमीशं पततां तथाश्वराजे उच्चैःश्रवसं चकार॥ सिंहं मृगाणां वृषभं गवां च प्लक्षं पुनः सर्ववनस्पतीनां॥८॥
पितामहः पूर्वमथाभिषिंचदेतान्पुनः सर्वदिशाधिनाथान्॥ पूर्वेण दिक्पालमथाभ्यषिंचन्नाम्ना सुधर्माणम
रातिकेतुं॥९॥ ततोधिपं दक्षिणतश्चकार सर्वेश्वरं शंखपदाभिधानं॥ सकेतुमंतं दिगधीशमीशं चकार पश्चा
द्भुवनांडगर्भः॥१०॥ हिरण्यरोमाणमुदग्दिगीशं प्रजापतिर्देवसुतं चकार॥ अद्यापि कुर्वंति दिशामधीशाः श
त्रून्दहंतः पुरतोभिरक्षां॥११॥ चतुर्भिरेभिः पृथुनामधेयो नृपोभिषिक्तः प्रथमं पृथिव्यां॥ गतेंतरे
चाक्षुषिनामधेये वैवस्वताख्ये च पुनः प्रवृत्ते॥ प्रजापतिः सोस्य चराचरस्य बभूव सूर्यान्वयवंशचिह्नः॥१२॥
इति श्रीमत्स्यपुराणे मन्वाधिपत्यं नाम॥ ॥ सूत उवाच॥ एवं श्रुत्वा मनुः प्राह पुनरेव जनार्दनं॥ पूर्वेषां
चरितं ब्रूहि मनूनां मधुसूदन॥१॥ श्रीमत्स्य उवाच॥ ॥ मन्वंतराणि सर्वाणि मनूनां चरितं च यत्॥ प्रमाणं
चैव कालं च तत्सृष्टिं शृणु समाहितः॥२॥ एकचित्तः प्रशांतात्मा शृणु मार्तंडनंदन॥ यामानाम पुरा देवा आस
न्स्वायंभुवेंतरे॥३॥ पूर्वे च ऋषयः सर्वे ये मरीच्यादयः स्मृताः॥ आग्नीध्रश्चातिबाहुश्च सहः सवन एव च॥
४॥ ज्योतिष्मान्द्युतिमान्हव्यो मेधा मेधातिथिर्वसुः॥ स्वायंभुवस्यास्य मनोर्दशैते वंशवर्द्धनाः॥५॥ प्रतिसर्ग
मथी कृत्वा जग्मुस्ते परमं पदं॥ एतत्स्वायंभुवं प्रोक्तं स्वारोचिषमतः परं॥६॥ स्वारोचिषस्य तनयाश्चत्वारो

देववर्चसः॥नक्रोनजस्यः प्रसृतिर्भरतः कीर्त्तिवर्धनः॥७॥ततो विश्वावतस्तंबः प्राणः कश्यप एव च॥और्वोबृहस्प
तिश्चैव सर्वेतिऋषयः स्मृताः॥८॥देवाश्च ऋषिता नामस्मृताः स्वारोचिषेंतरे॥हवीध्रसुकृतोमूर्त्तिराप्योज्योति
रयस्मयः॥९॥वसिष्ठस्य स्मृताः सप्त ये प्रजापतयः सुताः॥द्वितीयमेतत्कथितं मन्वंतरमतः परं॥१०॥तृतीयं
तुम वक्ष्यामि तथा मन्वंतरं शृणु॥मनुर्नामौत्तमिर्यत्र दश पुत्रानजीजनत्॥११॥इषः सहस्य ऊर्जश्च शुचिः
शुक्रं तथैव च॥मधुश्च माधवश्चैव नभस्योपनभस्तथा॥१२॥सहः कनीयानेतेषां उदाराः कीर्त्तिवर्धनाः
भावाख्यस्तत्र देवाः सुस्वर्काः सप्तर्षयः स्मृताः॥१३॥कौकुरंडिश्च दुल्कश्च संख्यः प्रवहणः स्मृतः॥मित
श्च संमितश्चैव सप्तैते योगवाहनाः॥१४॥मन्वंतरे चतुर्थे च तामसं नाम विश्रुतं॥काव्यः पृथुस्तथैवाग्निरश्वः
कपिल एव च॥१५॥तथैव जन्यधामानौ मुनयः सप्त तामसे॥साध्या देवगणा यत्र कथितास्तामसेंत
रे॥१६॥अकल्मषस्तथा धन्वी तपोमूलस्तपोधनौ॥तपोरतिस्तपस्यश्च तपोद्युतिपरंतपौ॥१७॥तामसस्य
सुताः पूर्वे दशा वै शाविवर्द्धनाः॥पंचमस्य मनोस्तत्र रैवतस्यांतरं शृणु॥१८॥ऐंद्रबाहुः सुबाहुश्च पर्जन्यः
सोमपो मुनिः॥हिरण्यरोमा सप्ताश्वः सप्तैते ऋषयः स्मृताः॥१९॥देवाश्च भूतरजसस्तथा प्रकृतयः स्मृ
ताः॥अरुणस्तत्वदर्शी च धृतमानहव्यमान्कपिः॥२०॥अंतोमिस्तुकः सतो निमेषोपप्रकाशकः॥धर्म

ब

वीर्यबलोपेता दशैते रैवतात्मजाः॥२१॥भृगुः सुधामा विरजः सहिष्णुर्नाद एव च॥विवस्वानतिनामा च सप्तर्ष
योपरे॥२२॥चाक्षुषस्यांतरे देवा लेखा नाम परिश्रुताः॥वसवोथ पृथग्भाश्च पारिस्रवा दिवौकसः॥२३॥चा
चाक्षुषस्यांतरे प्रोक्ता देवानां पंचयोनयः॥रुरुः प्रसूतकस्तद्वत् चाक्षुषस्य सुता दश॥२४॥प्रोक्ताः स्वायं
भुवे वैमे पे मया पूर्वमेव तु॥अंतरं चाक्षुषं चैतत् मया ते परिकीर्त्तितं॥२५॥सप्तमं च प्रवक्ष्यामि यद्वैवस्वतमु
च्यते॥अत्रिश्चैव वसिष्ठश्च कश्यपो गौतमस्तथा॥२६॥भरद्वाजस्तथा योगी विश्वामित्रः प्रतापवान्॥जमदग्नि
श्च सप्तैते सांप्रतं तेमहर्षयः॥२७॥साध्या विश्वे च रुद्राश्च मरुतो वसवोश्विनौ॥आदित्याश्च सुरास्तद्वत् सप्तदे
वगणाः स्मृताः॥२८॥इक्ष्वाकुप्रमुखाश्चापि तस्य पुत्राः स्मृता भुवि॥मन्वंतरेषु सर्वेषु सप्त सप्त महर्षयः॥२९॥
कृत्वा धर्मव्यवस्थानं प्रयांति परमं पदं॥सावर्ण्येस्तु प्रवक्ष्यामि मनोर्भावितयांतरं॥३०॥अश्वत्थामा हरिं
श्च कौशिको गालवस्तथा॥शतानंदः कश्यपश्च राम ऋषयः स्मृताः॥३१॥धृतिर्वरीयान्यवसः सुवर्णो वि
ष्णुरेव च॥रविशुराजः सुमतिर्बृहस्पतिश्च वीर्यवान्॥३२॥भाविनो दशसावर्णेर्मनोः पुत्राः प्रकीर्त्तिताः॥रौ
च्यादयस्तथान्येपि मनवः संप्रकीर्त्तिताः॥३३॥रुचेः प्रजापतेः पुत्रो रौच्यो नाम भविष्यति॥मनुर्भूतिसुतस्तद्वद्भौ
त्यो नाम भविष्यति॥३४॥ततः सुमेरुसावर्णिर्ब्रह्मसूनुर्मनुः स्मृतः॥ऋतुश्च ऋतुधामा च विष्वक्सेनो मनु

ख्यया॥३५॥ अतीतानागताश्चैते मनवः परिकीर्तिताः॥ बहूनं युगसाहस्रं एतैर्व्याप्तं नराधिप॥३६॥ संकीर्तनं सर्व
मिदं मया प्रोक्तं तवानघ॥ स्वस्वेंतरे सर्वमिदं समुत्पाद्यं चराचरं॥३७॥ कल्पक्षये विनिर्वृत्ते मुच्यंते ब्रह्मणा सह। यं
एते युगसहस्रांते विनश्यंति पुनः पुनः॥३८॥ ब्रह्माद्या विष्णुसायुज्यं याता यास्यंति वै द्विजाः॥३९॥॥ इति श्री
मत्स्यपुराणे मन्वंतरानुकीर्तनं॥॥ ऋषय ऊचुः॥॥ बहुभिर्धरणी भुक्ता नृपालैः श्रूयते पुरा॥ पार्थिवीयो
गतः॥१॥ किमर्थं च कृता संज्ञा भूमेः किं स्यात्पारिभाषिकं। गौरितीव च विख्याता सूत कस्माद्ब्रवीहि नः॥२॥ सू
त उवाच॥ वंशे स्वायंभुवस्यासीदंगो नाम प्रजापतिः॥ मृत्योस्तु दुहिता तेन परिणीता सुदुर्मुखा॥३॥ सुनीथा ना
दे म तस्यास्तु वेनो नाम सुतः पुरा॥ अधर्मनिरतस्त्वासीद्बलवान्स नराधिपः॥४॥ लोकेप्यधर्मकृज्जातः परभार्या
पहारकः॥ ममंथुर्ब्राह्मणास्तस्य बलाद्देहमकल्मषाः॥५॥ तत्कायान्मथ्यमानात्तु निपेतुर्म्लेच्छजातयः॥ शरी
रे मातुरंशेन कृष्णांजनसमप्रभाः॥६॥ पितुरंशस्य चांशेन धार्मिको धर्मकारिणः॥ उत्पन्नो दक्षिणाद्धस्तात्सधनुः सश
रो गदी॥७॥ दिव्यतेजोमयवपुः सरत्नकवचांगदः॥ पृथुरेवान्ववायस्य ततः पृथुरजायत॥८॥ ततः स्थित्वैक
देशे तु किं करोमीति साब्रवीत॥ पृथुरप्यवदद्वाक्यमीप्सितं देहि सुव्रते॥९॥ सर्वस्य जगतः शीघ्रं स्थावरस्य चरस्य च। रस्य०
तथेति चाब्रवीद्भूमिर्दुहितं मां नराधिप॥१०॥ स्वकेपापो पृथुर्वत्सं कृत्वा स्वायंभुवं मनुं॥ तदन्नमभवद्दुग्धं राम०

प्रजाजीवंति येन तु॥११॥ ततस्तु ऋषिभिर्दुग्धा वत्सः सोमस्तथाभवत्॥ दोग्धा बृहस्पतिरभूत्पात्रं वेदस्तपो
रसः॥१२॥ देवैश्च वसुधा दुग्धा दोग्धा मित्रस्तथाभवत्॥ इंद्रो वत्सः समभवत्क्षीरमूर्जस्करं बलं॥ देवानां कां
चनं पात्रं पितृणां राजतं तथा॥ अंतकश्चाभवद्दोग्धा यमो वत्सः स्वधा रसः॥१४॥ पातालपात्रे नागानां तक्ष
को वत्सकोभवत्॥ विषं क्षीरं ततो दोग्धा धृतराष्ट्रोभवत्पुनः॥१५॥ असुरैरपि दुग्धेयमायसे शक्रपीडनं॥ पा
त्रे मायाभवद्वत्सः प्राह्लादिस्तु विरोचनः॥१६॥ दोग्धा द्विमूर्द्धा तत्रासीन्मायायात प्रवर्तकः॥ यक्षैश्च वसुधा दुग्धा
पुरांतर्द्धानमीप्सुभिः॥१७॥ कृत्वा वैश्रवणं वत्समामपात्रे महीपते॥ प्रेतरक्षोगणैर्दुग्धा धरा रुधिरमुल्बणं॥१८
रोप्यनाभोभवद्दोग्धा सुमाली वत्स एव च॥ गंधर्वैश्च पुरा दुग्धा वसुधा साप्सरोगणैः॥१९॥ वत्सं चैत्ररथं कृत्वा
गंधान्पद्मदले तथा॥ दोग्धा वररुचिर्नाम नाट्यवेदस्य पारगः॥२०॥ गिरिभिर्वसुधा दुग्धा रत्नानि विविधा
नि च॥ औषधानि च दिव्यानि दोग्धा मेरुर्महाचलः॥२१॥ वत्सोभूद्धिमवांस्तत्र पात्रं शैलमयं पुनः॥ वृक्षैश्च व
सुधा दुग्धा क्षीरं छिन्नप्ररोहणं॥२२॥ पलाशपात्रे दोग्धा तु शालपुष्पलताकुलः॥ प्लक्षोभवत्ततो वत्सः सर्ववृ
क्षवनाधिपः॥२३॥ एवमन्यैश्च वसुधा तदा दुग्धा यथेप्सितं॥ आयुर्धनानि सौख्यं च पृथौ राज्यं प्रशासति॥२४ ख्यं
निसंप्रमुदिता लोका दुःखशोकविवर्जिताः॥ धनुःकोट्या च शैलेंद्रानुत्सार्य च महाबलः॥२५॥ भुवस्तलं समं च

के लोकानां हितकाम्यया ॥ न दरिद्रस्तदा कश्चिन्न रोगी न च पापकृत् ॥२६॥ नोपसर्गेण चान्नोभिक्ष्य पौ राज्यं प्रशास
ति ॥ नगरग्रामदुर्गाणि न चायुधधरा नराः ॥२७॥ क्षयातिशयदुःखं च नार्थशास्त्रस्य चादरः ॥ धर्मैकतानाः पुरु
षाः पृथौ राज्यं प्रशासति ॥ कथितानि च पात्राणि वत्सक्षीरं च यथा तथा ॥ ये यांये नरुचिरास्तेभ्यो देयं विजान
ता ॥२९॥ यज्ञे श्राद्धे च सर्वेषु मया तुभ्यं निवेदितं ॥ दुहितृत्वं गता यस्मात्पृथोर्धर्मवतो मही ॥ तदानुरागयोगा
च्च पृथिवी विश्रुता बुधैः ॥३०॥ इति श्रीमत्स्यपुराणे वैन्याभिवर्णनं नाम ॥ ऋषय ऊचुः ॥ आदित्यवंशमखि
लं वद सूत यथाक्रमं ॥ सोमवंशं च तत्त्वज्ञ यथावद्वक्तुमर्हसि ॥१॥ सूत उवाच ॥ विवस्वान्कश्यपात्पूर्वम
दित्यामभवत्सुतः ॥ तस्य पत्नीत्रयं तद्वत्संज्ञा राज्ञी प्रभा तथा ॥२॥ रैवतस्य सुता राज्ञी रैवतं सुषुवे सुतं ॥ प्रभातं
सुषुवे त्वाष्ट्री नाम्नी संज्ञा तथा मनुं ॥३॥ यमश्च यमुना चैव यमलौ च बभूवतुः ॥ ततस्तेजोमयं रूपमसहंती वि
वस्वतः ॥४॥ नारीमुत्पादयामास स्वशरीरादनिंदिता ॥ त्वाष्ट्री स्वरूपरूपेण नाम्ना छायेति भामिनी ॥५॥ किं
करोमीति पुरतः संस्थिता तां च भाषत ॥ छाये त्वं भज भर्तारमस्मदीयं वरानने ॥६॥ अपत्यानि मदीयानि मातृ
स्नेहेन पालय ॥ तथेत्युक्त्वा च सा देवी मगाधर्मपि सुव्रता ॥७॥ कामयामास देवोऽपि संज्ञेयमिति चादरात् ॥ जन
यामास तस्यां तु मनुं मनुसरूपिणं ॥८॥ सवर्णत्वाच्च सावर्णिर्मनोर्वैवस्वतस्य तु ॥ ततः शनिं च तपतीं विष्टिं

च क्रमेण तु ॥९॥ छायायां जनयामास संज्ञेयमिति भास्करः ॥ छाया स्वपुत्रेऽभ्यधिकं स्नेहं चक्रे मनौ तदा ॥१०॥ पू
र्वो मनुस्तु तत्क्षामो यमः क्रोधमूर्च्छितः ॥ संतर्जयामास तदा पादमुद्यम्य दक्षिणं ॥११॥ शशाप च यमं छा
या सर्वतः कृमिसंयुतः ॥ पादोऽयमेको भविता पूयशोणितविस्रवः ॥१२॥ निवेदयामास पितुर्यमः शापामर्षि
तः ॥ निःकारणमहं शप्तो मात्रा देव सकोपया ॥१३॥ बालत्वाद्यन्मया किंचिदुद्यतश्चरणः सकृत् ॥ मनुना वा
र्यमाणापि मम शापमदाद्विभो ॥१४॥ प्रायो न माता सास्माकं शापेनाहं यतो हतः ॥ देवोऽप्याह यमं भूयः किं क
रोमि महामते ॥१५॥ मौर्ख्यात्कस्य न दुःखं स्यादथवा कर्मसंततिः ॥ अनिवार्या भवस्यापि का कथान्येषु जंतुषु ॥
१६॥ कृकवाकुर्मया दत्तो यः कृमीरक्षयिष्यति ॥ क्लेदं च रुधिरं चैव वत्सायमपनेष्यति ॥१७॥ एवमुक्तस्तपस्तेपे
यमस्तीव्रं महायशाः ॥ गोकर्णतीर्थे वैराग्यात्फलपत्रानिलाशनः ॥१८॥ आराधयन्महादेवं यावद्वर्ष
शतायुतं ॥ वरं प्रादान्महादेवः संतुष्टः शूलभृत्तदा ॥१९॥ स वव्रे लोकपालत्वं पितृलोके तथालयं ॥ धर्मा
धर्मात्मकस्यापि जगतस्तु परीक्षणं ॥२०॥ एवं स लोकपालत्वमगमच्छूलपाणिनः ॥ पितॄणामाधिपत्यं च ध
र्माधर्मस्य चानघ ॥२१॥ विवस्वानथ तज्ज्ञात्वा संज्ञायाः कर्मचेष्टितं ॥ त्वष्टुः समीपमगमदाचचक्षे च रोषवान् ॥
२२॥ तमुवाच ततस्त्वष्टा सांत्वपूर्वं द्विजोत्तमाः ॥ तेजोऽसहंती महतीव्रं तमोनुदं ॥२३॥ वडवारूपमास्थाय म

त्वकारं समागता॥निवारिता मया सा च त्वद्भयेन दिवाकर॥२४॥यस्मादविज्ञातमना मत्सकाशं त्वमागता॥तस्मा
न्मदीयभवनं प्रवेष्टुं न त्वमर्हसि॥२५॥एवमुक्त्वा जगामाशु मरुदेशमनिंदिता॥वडवारूपमास्थाय भूतले सं
प्रतिष्ठिता॥२६॥तस्मात्प्रसादं कुरु मे यद्यनुग्रहभागहं॥अनपेक्ष्यामि तत्तेजः कृत्वा यंत्रे दिवाकर॥२७॥
रूपं तव करिष्यामि लोकानंदकरं प्रभो॥तथेत्युक्तः स रविणा भ्रमौ कृत्वा दिवाकरं॥२८॥पृथक्चकार तत्तेज
श्चक्रं विष्णोरकल्पयत्॥त्रिशूलं चापि रुद्रस्य वज्रमिंद्रस्य चाधिकं॥२९॥दैत्यदानवसंघातसहस्रकिर
णात्मकं॥रूपं चाप्रतिमं चक्रे त्वष्टा पद्भ्यामृते महत्॥३०॥न शशाक च यः संद्रष्टुं पदारूपं रवेः पुनः॥अर्चा
श्चापि ततः पादौ न कश्चित्कारयेद्रवेः॥३१॥यः करोति स पापिष्ठां गतिमाप्नोति निंदितां॥कुष्ठरोगमवाप्नोति
लोकेस्मिन्दुःखसंयुतः॥३२॥तस्मान्न धर्मकामार्थी चित्रेष्वायतनेषु च॥न कश्चित्कारयेत्पादौ देवदे
वस्य धीमतः॥३३॥ततः स भगवान्गत्वा भूर्लोकममराधिप॥कामयामास कामार्त्तो मुखमेव दिवाक
रः॥३४॥अश्वरूपेण महता तेजसा च समावृता॥संज्ञा च मनसा क्षोभमगमद्भयविह्वला॥३५॥नासा
पुटाभ्यामुत्सृष्टं परोयमिति शंकया॥तस्माद्रेतस्ततो जातावश्विनाविति निःश्रुतं॥३६॥अश्वौष्टतानुसं
जातौ नासत्यौ नासिकाग्रतो॥ज्ञात्वा चिरात्ततो देवी संतोषमगमत्परं॥३७॥विमानेनागमत्स्वर्गे पत्या स

ह मुदान्विता॥सावर्णोपि मनुर्मेरावद्याप्यास्ते तपोधनः॥३८॥शनिस्तपोबलादाप ग्रहसाम्यं ततः पुनः॥यमु
ना तपती चैव पुनर्नद्यौ बभूवतुः॥३९॥विष्टिर्घोरा तामसी कालत्वेन व्यवस्थिता॥मनोर्वैवस्वतस्या
सन्दश पुत्रा महाबलाः॥४०॥इलस्तु प्रथमस्तेषां पुत्रेष्ट्यां समजायत॥इक्ष्वाकुः कुशनाभश्च अरिष्टो धृष्ट
एव च॥४१॥नरिष्यन्तः करूषश्च शर्यातिश्च महाबलः॥पृषध्रश्चाथ नाभागः सर्वे ते देवमानुषाः॥४२॥अ
भिषिच्य मनुः पुत्रमिलं ज्येष्ठं स धार्मिकः॥जगाम तपसे भूयो महेन्द्रवनमालयं॥४३॥अथ दिग्जयसिद्ध्यर्थं
इलः प्रायान्महीमिमां॥भ्रमन्द्वीपानि सर्वाणि क्ष्माभृतः संप्रमर्दयन्॥४४॥जगामोपवनं शंभोरश्वारू
ढः प्रतापवान्॥कल्पद्रुमलताकीर्णं नाम्ना शरवणं महत्॥४५॥रमते यत्र देवेशः शंभुः सोमार्ध
शेखरः॥उमया रूपयस्तत्र पुरा संचरणे कृतं॥४६॥पुन्नामसत्वं यत्किंचिद्गमिष्यति यने॥स्त्री
त्वमेष्यति तत्सर्वं दशयोजनमंडलं॥४७॥अज्ञातसमयो राजा प्रविष्टस्तद्वनं पुरा॥स्त्रीत्वमाप विशि
ष्टेव वडवात्वं हयस्तदा॥४८॥पुरुषत्वे कृतं सर्वं स्त्रीरूपे विस्मृतं नृप॥इलेति नाम्ना सा नारी पीन
स्तनघनस्तनी॥४९॥उन्नतश्रोणिजघना पद्मपत्रायतेक्षणा॥पूर्णेन्दुवदना तन्वी विलासोत्कसितेक्षणा॥
५०॥स्थूलोन्नतायतभुजा नीलकुंचितमूर्धजा॥तनुलोमसुदशना मृदुगंभीरभाषिणी॥५१॥श्यामा गौरेण व

र्मेनहंसवारणगामिनी॥ कामरूपगुणोपेतातनुतातनुताम्रनखांकुरा॥५२॥ भ्रमतीच वनेतस्मिंश्चिंतयामासभामि
नी॥ को मे पिता पभ्राता वा का मे ता भवेदिह॥५३॥ कस्य भर्तुरहं दत्ता कियद्वत्स्यामि भूतले॥ इति चिंतयती दृष्टा सो
मपुत्रेण सांगना॥५४॥ इलारूपसमाक्षिप्तो मनसा वरवर्णिनी॥ बुधस्तु कामयामास तां वने कामपीडितः॥५५॥
विशिष्टाकारवान् दंडी सकमंडलुपुस्तकः॥ वेणुदंडकृतानेकपवित्रकरणोत्रिकः॥५६॥ द्विजरूपः शिखी ब्रह्मनि
गदन् रुक्मकुंडलः॥ बटुविस्त्रान्वितो युक्तः समित्पुष्पकुशोदकैः॥५७॥ किलान्विष्य वने तस्मिन्नाजुहाव सता
मिलां॥ हविर्वनस्थितिरित किल पादपमंडलैः॥५८॥ समंन्नमनकस्मात्वसोपालंभमिवाद्वैतत्॥ त्यक्ताग्निहो
त्रं शुश्रूषां क गता मंदिरान्मम॥५९॥ इयं विहारावेला वते अतिक्रामति सांप्रतं॥ एह्येहि पृथुलश्रोणि संभ्राता
केन हेतुना॥६०॥ इयं सायंतनी वेला विहारस्येह वर्त्तते॥ कृतमल्पैः पनैः पुष्पैरलं कुरु गृहं मम॥६१॥ सात ब्रवी
द्विस्मृता हं सर्वमेतत्तपोधन॥ आत्मानं तां च भर्तारं कुलं चैव वदस्व मे न घ॥६२॥ बुधः प्रोवाच तां तन्वीमिलां त्वं व
रवर्णिनी॥ अहं च कामुको नाम बहुविद्यो बुधः स्मृतः॥६३॥ तेजस्विनि कुले जातः पिता मे ब्राह्मणाधिपः॥
इति सा तस्य वचनात् प्रविष्टा बुधमंदिरं॥६४॥ रम्यं स्तंभसमाकीर्णं दिव्यमायाविनिर्मितं॥ इला कृतार्थमात्मा
नं मेने तद्भवनस्थिता॥६५॥ अहो दृष्टं समहो रूपमहो धनमहो कुलं॥ ममचास्य च मे भर्तुरहो लावण्यमुत्तमं॥

६६॥ रेमे च सा तेन सममतिकालमिता ततः॥ सर्वभोगमये गेहे यथेंद्रभवने तथा॥६७॥॥ इति श्रीमत्स्यपुराणे बुधसमा
गमो नाम॥॥ सूत उवाच॥॥ अथान्विषंतो राजानं भ्रातरस्तस्य मानवाः॥ इक्ष्वाकुप्रमुखा जग्मुस्तदा शरवणां
तिकं॥१॥ ततस्ते ददृशुः सर्वे वडवामग्रतः स्थितां॥ रत्नपर्याणकिरणदीप्तकायामनुत्तमां॥२॥ पर्याणप्रत्य
भिज्ञानात्सर्वे विस्मयमागताः॥ अयं चंद्रप्रभो नाम वाजी तस्य महात्मनः॥३॥ अगमद्वडवारूपमुत्तमं केन
हेतुना॥ ततस्तु मैत्रावरुणिं पप्रच्छुस्ते पुरोधसं॥४॥ किमन्यत्तदभूच्चित्रं वद योगविदां वर॥ वसिष्ठश्चाब्र
वीत्सर्वं दृष्ट्वा तद्ध्यानचक्षुषा॥५॥ समयः शंभुदयिताशंकरेण कृतः पुरा॥ यः पुमान् प्रविशेदत्र स नारी
त्वमवाप्स्यति॥६॥ अयमश्वोपि नारीत्वमगाद्राजा सहैव तु॥ पुनः पुरुषतामेति यथा धनदोपमा॥७॥ तथैव प
त्नः कर्तव्यः आराध्ये वपिना किनं॥ ततस्ते मानवा जग्मुर्यत्र देवो महेश्वरः॥८॥ तुष्टुवुर्विविधैः स्तोत्रैः पार्व
तीपरमेश्वरौ॥ तावूचतुरलंघ्योयं समयः किंतु सांप्रतं॥९॥ इक्ष्वाकोरश्वमेधेन यत्फलं स्यात्तदावयोः॥ दत्त
किंपुरुषो वीरः स भविष्यत्यसंशयः॥१०॥ तथेत्युक्त्वा ततस्ते तु जग्मुर्वैवस्वतात्मजाः॥ इक्ष्वाकोरश्वमेधे न
इलः किंपुरुषो भवेत्॥११॥ मासमेकं पुमान् वीरः स्त्री च मासं पुनः पुमान्॥ बुधस्य भवने तिष्ठन्निला गर्भ
वने बुधात्॥१२॥ अजीजनत्पुत्रमेकमनेकगुणसंयुतं॥ बुधश्चोत्पाद्य तं पुत्रं स्वर्लोकमगमत्ततः॥१३॥ इलस्य

म०पु०
१८

नाम्नातद्वषमिलाहूतमभूत्तदा॥ सोमार्कवंशयोरादाविलोभून्मनुनंदन॥१४॥ एवंपुरूरवापुंसोरसोमवंशवर्धनः॥
इक्ष्वाकुरर्कवंशस्यतथैवोक्तस्तपोधना॥१५॥ इलःकिंपुरुषश्चैवसुद्युम्नइतिचोच्यते॥ एवंपुत्रश्चोपमन्युःसु
द्युम्नाश्चापराजितः॥१६॥ उत्कलोवैगयस्तष धरिताश्चश्चवीर्यवान्॥ उत्कलस्योत्कलानामगयस्यचगयामता॥
१७॥ हरिताश्वस्यदिक्पूर्वाविश्रुताकुरुभिःसह॥ प्रतिष्ठानेभिषिच्यायसपुरूरवसंसुतं॥१८॥ जगामेलाहूतेमो
क्षंदिव्यंवर्षफलाशनं॥ इक्ष्वाकुरस्यदायादोमध्यदेशमवाप्नुयात्॥१९॥ नरिष्यंतस्यपुत्रोभूत्शकोनाममहा
बलः॥ नाभागस्यांबरीषस्तुधृष्टस्यतुसुतत्रयं॥२०॥ धृष्टकेतुःकेतुनाघोरणधृष्टस्तुवीर्यवान्॥ आनर्त्तोनाम
शार्यातिःसुकन्याचैवदारिका॥२१॥ आनर्त्तस्याभवत्पुत्रोरोचमानःप्रतापवान्॥ आनर्त्तोनामदेशोभून्नगरी
चकुशस्थली॥२२॥ रोचमानस्यरेवोभूद्रेवाद्रैवतएवच॥ ककुद्मीचापरंनामज्येष्ठःपुत्रशतस्यच॥ रेवतीतस्य
साकन्याभार्यारामस्यविश्रुता॥ करूषस्यतुकारूष्याबहवःप्रथिताभुवि॥२४॥ पृषध्रोगोवधाच्छूद्रोगुरुशा
पादजायत॥ इक्ष्वाकुवंशंवक्ष्यामिशृणुध्वमृषिसत्तमाः॥२५॥ इक्ष्वाकोःपुत्रतामापविकुक्षिर्नामदेववत्॥
ज्येष्ठःपुत्रशतस्यासीद्दशपंचचतत्सुताः॥२६॥ मेरोरुत्तरतस्तेतुजाताःपार्थिवसत्तमाः॥ चतुर्दशोत्तरंचा
न्यच्छतमस्यत्रयाभवेत्॥२७॥ मेरोर्दक्षिणतोयेवैराजानःसंप्रकीर्तिताः॥ ज्येष्ठस्तुककुत्स्थोनाम्नाभूत्तत्सुतस्तुसु

राम०
१८

योधनः॥२८॥ तस्यपुत्रःपृथुर्नामविश्वगश्वःपृथोःसुतः॥ इंदुस्तस्यचपुत्रोभूत्युवनाश्वस्ततोभवत्॥२९॥ श्राव
स्तस्यमहातेजावत्सकस्ततोभवत्॥ निर्मितायेनशावस्तीगौडदेशेद्विजोत्तमाः॥३०॥ वत्साच्चबृहदश्वोभूत्कुरु
वालस्ततोभवत्॥ धुंधुमारत्वमगमत्धुंधोर्नामशिवःपुरो॥३१॥ तस्यपुत्रास्त्रयोजाताहृढाश्वोदंडएवच॥ कपि
लाश्वश्चविख्याता धुंधुमारःप्रतापवान्॥३२॥ दृढाश्वस्यप्रमोदस्तुहर्यश्वस्तस्यचात्मजः॥ हर्यश्वस्यनिकुंभोभूत्सं
हताश्वस्तथाभवत्॥३३॥ सुकृदाश्वोरणाश्वश्चसंहताश्वसुतावुभौ॥ युवनाश्वोरणाश्वस्यमांधाताचततोभवत्॥
३४॥ मांधातुःपुरुकुत्सोभूत्धर्मसेनश्चपार्थिवः॥ मुचुकुंदश्चविख्यातःशत्रुजिच्चप्रतापवान्॥३५॥ पुरुकुत्सस्य
पुत्रोभूत्वसुदोनर्मदापतिः॥ संभूतिस्तस्यपुत्रोभूद्विधन्वाचततोभवत्॥३६॥ विधन्वनःसुतोजातःत्र्यारणइ
तिस्मृतः॥ तस्मात्सत्यप्रज्ञोनामतस्मात्सत्यरथःस्मृतः॥३७॥ तस्यपुत्रोहरिश्चंद्रोहरिश्चंद्राच्चरोहितः॥ रोहिताच्च
वृकोजातोवृकाद्बाहुरजायत॥३८॥ सगरस्तस्यपुत्रोभूत्यज्वापरमधार्मिकः॥ द्वेभार्येसगरस्यापिप्रभाभानुमती
तथा॥३९॥ ताभ्यामाराधितःपूर्वमौर्वाग्निःपुत्रकाम्यया॥ और्वस्तुष्टस्तयोःप्रादाद्यथेष्टंवरमुत्तमं॥४०॥ एकाष
ष्टिसहस्राणिसुषुवेयादवीप्रभा॥ खनंतःपृथिवींदग्धाविष्णुनायेश्वमार्गणाः॥४१॥ असमंजसस्तुतनयोयों
शुमान्नामविश्रुतः॥ तस्यपुत्रोदिलीपस्तुदिलीपात्तुभगीरथः॥४२॥ तेनभागीरथीचैवतपःकृत्वावतारिता॥ भगी

म०पु० १९

रथस्य तनयो नाम नाग इति विश्रुतः॥४३॥ नाभागस्यांबरीषोभूत्सिंधुद्वीपस्ततोभवत्॥ तस्यायुतायुः पुत्रोभूदृतुपर्णस्त

तोभवत्॥४४॥ तस्य कल्माषपादस्तु सर्वकर्मतितोभवत्॥ तस्यान शापः पुत्रोभून्निघ्नस्तस्य सुतोभवेवत्॥४५॥ नि

घ्नपुत्रावुभौ जातौ अनमित्ररघूत्तमौ॥ अनमित्रो वनमगाद्भविता सुकृतो नृपः॥४६॥ रघोरभूत्दिलीपस्तु दिलीपा

दजकस्तथा॥ दीर्घबाहुरजाज्जात अजपालस्ततोभवत्॥४७॥ तस्माद्दशरथो जातस्तस्य पुत्रचतुष्टयं॥ नारायणा

त्मकाः सर्वे रामस्तेषग्रजोभवत्॥४८॥ रावणांतकरस्तु रघूणां वंशवर्धनः॥ वाल्मीकिस्तस्य चरितं चक्रे भा

गवसत्तम॥४९॥ तस्य पुत्रौ कुशलवाविक्ष्वाकुकुलवर्धनौ॥ अतिथिस्तु कुशाज्जज्ञे निषधस्तस्य चात्मजः॥५०॥ न

लस्तु नैषधस्तस्मान्नभस्तस्मादजायत॥ नभसः पुंडरीकोभूत्क्षेमधन्वा ततः स्मृतः॥५१॥ तस्य पुत्रोभवद्वीरो देवा

नीकः प्रतापवान्॥ अहीनगुस्तस्य सुतः सहस्राश्वस्तस्य सुतः॥५२॥ अतश्चंद्रावलोकस्तु तारापीडस्ततोभवत्॥ त

स्यात्मजश्चंद्रगिरिर्जानुश्चंद्रस्ततोभवत्॥५३॥ श्रुतायुरभवत्तस्माद्भारते यो निपातितः॥ नलौ द्वावेव विख्यातौ वंशे

कश्यपसंभवे॥५४॥ वीरसेनसुतस्तद्वन्नैषधश्च नराधिपः॥ एते विवस्वतो वंशे राजानो भूरिदक्षिणाः॥५५

इक्ष्वाकुवंशप्रभवाः प्राधान्येन प्रकीर्तिताः॥५६॥ ॥इति श्रीमत्स्यपुराणे सूर्यवंशानुकीर्तनं॥ ॥मनुरुवाच॥ ॥भ

गवन् श्रोतुमिच्छामि पितॄणां वंशमुत्तमं॥ रवेश्च श्राद्धदेवत्वं सोमस्य च विशेषतः॥१॥ श्रीमत्स्य उवाच॥ हंत ते क

राम. १९

थयिष्यामि पितॄणां वंशमुत्तमं॥ स्वर्गे पितृगणाः सप्त त्रयस्तेषाममूर्तयः॥२॥ मूर्तिमंतोथ चत्वारः सर्वे एवामितौज

सः॥ अमूर्तयो पितृगणा विराजस्य प्रजापतेः॥ यजंति यान् देवगणा वैराजा इति विश्रुताः॥३॥ ये वै ते योगविभ्रष्टाः

प्राप्य लोकान् सनातनान्॥४॥ पुनर्ब्रह्मदिनांते तु जायंते ब्रह्मवादिनः॥ संप्राप्य तां स्मृतिं भूयो योगं सांख्यमनु

त्तमं॥५॥ सिद्धिं प्रयांति योगेन पुनरावृत्तिदुर्लभां॥ योगिनामेव देयानि तस्मात् श्राद्धानि दातृभिः॥६॥ एतेषां

मानसी कन्या पत्नी हिमवतो मता॥ मेनाकस्तस्य दायादः क्रौंचस्तस्याग्रजोभवत्॥७॥ क्रौंचद्वीपः स्मृतो येन चतुर्थो

घृतसंवृतः॥ मेना तु सुषुवे तिस्रः कन्या योगवतीस्ततः॥८॥ उमैकपर्णापर्णा च तपस्तीव्रपरायणाः॥ रुद्रस्यैकाशि

वस्यैका जैगीषव्यस्य चापरा॥ दत्ता हिमवता बालाः सर्वलोकतपोधिकाः॥९॥ ऋषय ऊचुः॥ कस्माद्दाक्षायणी

पूर्वं ददाहात्मानमात्मना॥ हिमवद्दुहिता तद्वत्कथं जाता महीतले॥१०॥ संहरंती स्वतनुं पुस्तुतब्रत्यातनूं तुगा॥

दक्षेण लोकजननी सूत विस्तरतो वद॥११॥ सूत उवाच॥ दक्षस्य यज्ञे वितते प्रभूतवरदक्षिणे॥ समाहूतेषु

प्रोवाच पितरं सती॥१२॥ किमर्थं तात भर्तामि यज्ञेस्मिन्नानिमंत्रितः॥ अयोग्य इति तामाह दक्षो यज्ञेषु सुमध्यम

त॥१३॥ उपसंहारकृद्रुद्रस्तेनामंगल्यभागयं॥ चुकोपाथ सती देहं त्यक्ष्यामीति त्वदुद्भवं॥१४॥ दशानां त्वं च

भविता पितॄणामेकपुत्रकः॥ क्षत्रियेश्वमेधस्य रुद्रात्त्वेनाशमेष्यति॥ इत्युक्त्वा योगमास्थाय स्वदेहोद्भवतेज

मा॥ निर्दहंतीतदात्मानं सदेवासुरकिंनरैः॥१६॥ किंकिमेतदितिप्रोक्तं गंधर्वगणगुह्यकैः॥ उपगम्याब्रवीद्दक्षः
प्रणिपत्यापदुःखितः॥१७॥ त्वमस्यजगतोमाताजगत्सौभाग्यदेवता॥ दुहितृत्वंगतादेविममानुग्रहकाम्य
या॥१८॥ नत्वयारहितंकिंचिदस्तिब्रह्मांडेसचराचरे॥ प्रसादंकुरुधर्मज्ञेनमांत्यक्तुमिहार्हसि॥१९॥ प्राह
देवीयदारब्धंतत्कार्यंमेनसंशयः॥ किंत्ववज्ञप्तत्वयामत्र्मेहितपस्तेनशूलिना॥२०॥ प्रसाद्यलोकेस्वस्थार्थंयत्
कार्यंममांतिके॥ प्रजापतिस्त्वंभवितादक्षणानामंगजोप्यलं॥२१॥ मदंशेनांगनाषष्टिर्भविष्यंतिसुतास्तव॥ म
त्संनिधौतपःकुर्वन्प्राप्स्यसेयोगमुत्तमं॥२२॥ एवमुक्तोब्रवीद्दक्षःकेषुकेषुमयानघे॥ तीर्थेषुचत्वंद्रष्टव्यास्ते
नव्याकेषुनामभिः॥२३॥ श्रीदेव्युवाच॥ सर्वदासर्वभूतेषुद्रष्टव्यासर्वतोभुवि॥ सप्तलोकेषुयत्किंचिद्र
हितंनमयाहितत्॥२४॥ तथापियेषुस्थानेषुद्रष्टव्यासिद्धिमीप्सुभिः॥ स्मर्तव्याभूतिकामैर्वातानिवक्ष्यामि
तत्वतः॥२५॥ वाराणस्यांविशालाक्षीनैमिषेलिंगधारिणी॥ प्रयागेललितादेवीकामुकागंधमादने॥२६॥ मा
नसेकुमुदानामविश्वकायातुपुष्करे॥ गोमंतेगोमतीनाममंदरेकामचारिणी॥२७॥ मदोत्कटाचैत्ररथेजयं
तीहस्तिनापुरे॥ कन्याकुब्जेतथागौरीरंभामलयपर्वते॥२८॥ एकाम्रिकेकीर्तिमतीविश्वाविश्वेश्वरेविदुः॥ पुष्क
रेपुरुहूताचकेदारेमार्गदायिनी॥२९॥ नंदाहिमवतःपृष्ठेगोकर्णेभद्रकर्णिका॥ स्थाण्वीश्वरेभवानीतुबिल्व

पत्रिका॥३०॥ श्रीशैलेमाधवीनामभद्राभद्रेश्वरेतथा॥ जयावराहशैलेतुकमलाकमलालये॥३१॥ रुद्रकोट्यांतु
रुद्राणीकालीकालिंजरेतथा॥ महालिंगेतुकपिलामकोटेमुकुटेश्वरी॥३२॥ शालग्रामेमहादेवीशिवलिंगे
जलप्रिया॥ मायापुर्यांकुमारीचसंतानेललितातथा॥३३॥ उत्पलाक्षेसहस्राक्षीहिरण्याक्षीमहोत्पले॥ गयायां
मंगलानामविमलापुरुषोत्तमे॥३४॥ विपाशायाममोघाक्षीपाटलापुंड्रवर्धने॥ नारायणीसुपार्श्वेतुत्रिकू
टेभद्रसुंदरी॥३५॥ विपुलेविपुलानामकल्याणीमलयाचले॥ कोटवीकोटितीर्थेसुसुगंधामाधवीवने॥३६॥
कुब्जाम्रकेत्रिसंध्यातुगंगाद्वारेरतिप्रिया॥ शिवकुंडेसुनंदाचनंदिनीदेविकातटे॥३७॥ रुक्मिणीद्वारवत्यां
तुराधावृंदावनेवने॥ देवकीमथुरायांतुपातालेपरमेश्वरी॥३८॥ चित्रकूटेतथासीताविंध्येविंध्यनिवा
सिनी॥ सह्याद्रावेकवीराचहरिश्चंद्रेतुचंद्रिका॥३९॥ रमणारामतीर्थेतुयमुनायांमृगावती॥ करवीरेम
हालक्ष्मीरुमादेवीविनायके॥४०॥ आरोग्यावैद्यनाथेतुमहाकालेमहेश्वरी॥ अभयापुष्णतीर्थेतुअमृतावा
विंध्यकंदरे॥४१॥ मांडव्येमांडवीनामस्वाहामाहेश्वरेपुरे॥ छागलांडेप्रचंडाचचंडिकामरकंटके॥४२॥ सोमे
श्वरेवरारोहाप्रभासेपुष्करावती॥ देवमातासरस्वत्यांपारापारातटेमता॥४३॥ महालयेमहाभागापयो
ष्ण्यांपिंगलेश्वरी॥ सिंहिकाकृतशौचेतुकार्तिकेयेयशस्करी॥४४॥ उत्पलावर्तकेलोलासुभद्राशोणसंग

म० पु०
२१

मे॥ माता सिद्धपुरे लक्ष्मीरनंगा भरताश्रमे॥४५॥ जालंधरे विश्वमुखी तारा किष्किंधपर्वते॥ देवदारुवने पुष्टिर्मे
धा काश्मीरमंडले॥४६॥ भीमा देवी हिमाद्रौ तु तुष्टिर्वस्त्रेश्वरे तथा॥ कपालमोचने सिद्धिर्माता कायावरोह
णे॥४७॥ शंखोद्धारे ध्वनिर्नाम धृतिः पिंडारके तथा॥ काला तु चंद्रभागायामच्छोदे शिवधारिणी॥४८॥ वेण्णा
यने मृतानाम बदर्यामुर्वशी तथा॥ औषधी चोत्तरकुरौ कुशद्वीपे कुशोदका॥४९॥ मन्मथा हेमकूटे तु कु
मुदे सत्यवादिनी॥ आश्वत्थे वंदनीया तु निधिर्वैश्रवणालये॥५०॥ गायत्री वेदवदने पार्वती शिवसन्निधौ॥
देवलोके तथेंद्राणी ब्रह्मास्ये तु सरस्वती॥५१॥ सूर्यबिंबे प्रभा नाम मातॄणां वैष्णवी मता॥ अरुंधती सती नां
तु रामासु च तिलोत्तमा॥५२॥ चित्रे ब्रह्मकला नाम शक्तिः सर्वशरीरिणां॥ एतदुद्देशतः प्रोक्तं नामाष्टशतमुत्त
मं॥५३॥ अष्टोत्तरं च तीर्थानां शतमेतदुदाहृतं॥ यः स्मरेत्स्पृशपाशापि सर्वपापैः प्रमुच्यते॥५४॥ एषु पः
स्नात्वा ताश्च चर्ययितिमानवः॥ सर्वपापैर्विनिर्मुक्तः कल्पं शिवपुरे वसेत्॥५५॥ यस्तु मत्परमः कालं करोत्ये
तेषु मानवः॥ स भित्वा ब्रह्मसदनं सदोभ्येति शांकरं॥५६॥ नाम्नामष्टशतं यस्तु श्रावयेत् शिवसंनिधौ॥ त राम०
तीयायामथाष्टम्यां बहुपुत्रो भवेन्नरः॥५७॥ गोदाने श्राद्धदाने च अहन्यहनि चापुनः॥ देवार्चनविधौ वि २१
द्वान् परं ब्रह्माधिगच्छति॥५८॥ एवं वदंती सा तत्र ददाहात्मानमात्मना॥ स्वायंभुवोपि कालेन दक्षः प्राचेतसोभ

वत्॥५९॥ पार्वती सा न वा देवी शिवदेहार्धधारिणी॥ मेनागर्भसमुत्पन्ना भुक्तिमुक्तिफलप्रदा॥६०॥ अरुंधती जपं
त्येनं तदा प्राप योगमुत्तमं॥ पुरूरवाश्च राजर्षिर्लोके ध्वजेय तामगात्॥६१॥ ययातिः पुत्रलाभं च धनलाभं च भा
र्गवः॥ तथान्ये देवदैत्याश्च ब्राह्मणाः क्षत्रियास्तथा॥६२॥ वैश्याः शूद्राश्च बहवः सिद्धिमीयुर्यथेप्सितं॥ यत्रैतल्लि
खितं तिष्ठेत् पूज्यते देवसंनिधौ॥६३॥ न तत्र शोको दौर्गत्यं कदाचिदपि जायते॥६३॥ इति श्रीमत्स्यपुराणे गौ
रीनामाष्टोत्तरंशतं॥ सूत उवाच॥ लोकाः सोमपथा नाम यत्र मारीचनंदनाः॥ पितरो यान् देवा भावयंत्यलं॥१
अग्निष्वात्ता इति ख्याता यज्वानो यत्र संस्थिताः॥ अच्छोदा नाम तेषां तु मानसी कान्यकादीनि॥२॥ अच्छोदं नाम
च सरः पितृभिर्निर्मितं पुरा॥ अच्छोदा तु तपश्चक्रे दिव्यं वर्षसहस्रकं॥३॥ आजग्मुः पितरस्तुष्टाः किल दास्यंति
ते वरं॥ दिव्यरूपधराः सर्वे दिव्यमाल्यानुलेपनाः॥४॥ सर्वे युवानो बलिनः कुसुमायुधसन्निभाः॥ तन्मध्ये मा
वसुनामपितरं वीक्ष्य सांगना॥५॥ वव्रे वरार्थिनी संगं कुसुमायुधपीडिता॥ योगात्तु भ्रष्टा सा तेन व्यभिचा
रेण भामिनी॥६॥ धरां न सस्पृशे पूर्वं पपाताथ भुवस्तले॥ तथा च मावसुर्यस्यामिच्छां चक्रेन तां प्रति॥७॥ धैर्येण
तस्य सा लोके रमावास्येति विश्रुता॥ पितॄणां वल्लभा तस्मात्तस्यामक्षयकारकं॥८॥ अच्छोदाधोमुखी दीना ल
ज्जिता तपसः क्षयात्॥ सा पितॄन्प्रार्थयामास पुनरेवात्मसमृद्धये॥९॥ विलज्जमाना पितृभिरिदमुक्ता तपस्विनी॥

म०छ० २२

नविष्यदर्यमा लोकस्य देवकार्यं च तेतदा ॥१०॥ इदमूचुर्महाभागा प्रसादस्थ नयागिरा ॥ द्विविदिव्यशरीरेण यत्किंचि
त्क्रियते बुधैः ॥११॥ तेनैव तत्कर्मफलं भुज्यते वरवर्णिनि ॥ सद्यः फलंति कर्माणि देवत्वे प्रेत्य मानुषे ॥१२॥ तस्मात्त्वं
पुत्रि तपसः प्राप्स्यसे प्रेत्य तत्फलं ॥ इत्युक्ता विरजे भविष्या त्वं द्वापरे मत्स्ययोनिजा ॥१३॥ व्यतिक्रमात्पितॄणां त्वं कष्टं
कुलमवाप्स्यति ॥ द्वापे तु बलदरायस्य मच्युत ॥१४॥ स तस्यामा वासोः कन्या त्वमवश्यं भविष्यसि ॥ कन्या भूत्वैव लो
कांस्तान् पुनः प्राप्स्यसि दुर्लभान् ॥१५॥ पराशरस्य वीर्येण सुतमेकमवाप्स्यति ॥ द्वीपे च बदरप्राये बादरायणम
च्युतं ॥१६॥ स वेदमेकं बहुधा विभजिष्यति वै सुतः ॥ पौरवस्यात्मजौ द्वौ तु समुद्रांशस्य शंतनोः ॥१७॥ विचित्रवीर्य
स्तथा तथा चित्रांगदो नृपः ॥ इमावुत्पाद्य तनयौ क्षेत्रजातस्य धीमतः ॥१८॥ प्रौष्ठपद्यष्टका रूपा पितृलोके भ
विष्यसि ॥ नाम्ना सत्यवती लोके पितृलोके तथाष्टका ॥१९॥ आयुरारोग्यदा नित्यं सर्वकामफलप्रदा ॥ भवि
ष्यसि परे लोके नदी त्वं च गमिष्यसि ॥२०॥ पुण्यतोया सरिच्छ्रेष्ठा लोके ह्यच्छोदनामिका ॥ इत्युक्त्वा स गणस्तेषां
तत्रैवांतरधीयत ॥२१॥ साप्यवाप च चारित्रं फलमायफदितं पुरा ॥२२॥ इति श्रीमत्स्यपुराणे मनुमत्स्यसंवादे पि
तृवंशानुकीर्तनं ॥ ॥ सूत उवाच ॥ ॥ विभ्राजा नाम तो न्ये तु निवसंति सुवर्चसः ॥ लोका बर्हिषदो यत्र तिष्ठंति फ राम
लदायिनः ॥२॥ तत्राभ्युदयशालासु मोदंते श्राद्धदायिनः ॥ यानं दानवासुरगणा गंधर्वाप्सरसां गणाः ॥२॥ यक्ष २२

रक्षोगणाश्चैव यजंति दिवि देवताः ॥ पुलस्त्यपुत्राः शतशस्तपोयोगसमन्विताः ॥३॥ महात्मानो महाभागा भक्ता
नाम भयप्रदाः ॥ एतेषां पीवरी कन्या मानसा दिवि विश्रुता ॥४॥ योगिनी योगमाता च तपश्चक्रे सुदारुणं ॥ प्रसा
नो भगवांस्तस्या वरं वव्रे तु सा हरेः ॥५॥ योगवंतं सुरूपं च भर्तारं विजितेंद्रियं ॥ देहि देव प्रसन्नस्त्वं यदि मे वदतां व
र ॥६॥ उवाच देवो भविता व्यासपुत्रो यदा शुकः ॥ भविष्या तस्य भार्या त्वं योगाचार्यस्य सुव्रते ॥७॥ भविष्यति च
ते कन्या कृत्वी नाम च योगिनी ॥ पंचालाधिपते देया मानुषस्य तदा तदा ॥८॥ जननी ब्रह्मदत्तस्य योगसिद्धा च गौः
स्मृता ॥ कृष्णो गौरः प्रभुः शंभुर्भविष्यंति च ते सुताः ॥९॥ महात्मानो महाभागा गमिष्यंति परं पदं ॥ तां तु स्वाद्यं
पुनर्योगित्स वरा मोक्षमेष्यसि ॥१०॥ सुमूर्त्तिमंतः पितरो वसिष्ठस्य सुकालिनः ॥ नाम्ना तु मानसाः सर्वे सर्वे ते ध
र्ममूर्त्तयः ॥११॥ ज्योतिर्भासि भुवो लोके पुष्ये वसंति दिवः परं ॥ विराजमानाः क्रीडंति यत्र ते श्राद्धदायिनः ॥१२॥ सर्व
कामसमृद्धेषु विमानेष्वपि पादजाः ॥ किं पुनः श्राद्धदा विप्रा भक्तिमंतः क्रियान्विताः ॥१३॥ गौर्नाम कन्या येषां तु
मानसी दिवि राजते ॥ शुक्रस्य दयिता पत्नी साध्यानां कीर्तिवर्द्धनी ॥१४॥ मरीचिगर्भनाम्ना तु लोका मार्तंडमंडले ॥
पितरो यत्र तिष्ठंति हविष्मंतोंगिरः सुताः ॥१५॥ तीर्थश्राद्धप्रदा यांति ये च क्षत्रियसत्तमाः ॥ राज्ञां तु पितरस्ते
वै स्वर्गमोक्षफलप्रदाः ॥१६॥ एतेषां मानसी कन्या यशोदा लोकविश्रुता ॥ पत्नी त्वंशुमतः श्रेष्ठा स्नुषा पंचजनस्य

म॰पु॰ २३

च॥१७॥जननीचदिलीपस्य भगीरथपितामही॥लोकाः कामदुहो नाम कामभोगफलप्रदाः॥१८॥सुस्वधानामपित
रोयत्रतिष्ठंतितेसुताः॥श्रेष्ठपानामलोकेषुकर्दमस्यप्रजापतेः॥१९॥पुलहांगजदायादावैश्यास्तान्भावयंति
च॥यत्रश्राद्धकृतःसर्वेपश्यंतियुगपत्क्रताः॥२०॥मातृभ्रातृपितृस्वसृसखिसंबंधिबांधवाः॥अपिजन्मायुते
दृष्टानतुभूतास्सहस्रशः॥२१॥एतेषांमानसीकन्याविरजानामविश्रुता॥यापत्नीनहुषस्यासीत्ययाते
र्जननीतथा॥२२॥एकाष्टकाभवत्पश्चाद्ब्रह्मलोकगतासती॥यत्रएतेगणाःप्रोक्ताश्चतुर्थंतुवदाम्यतः॥२
३॥लोकास्तुमानसानामब्रह्मांडोपरिसंस्थिताः॥एतेषांमानसीकन्याधर्मदानामविश्रुता॥२४॥सोमपाना
मपितरोयत्रतिष्ठंतिशाश्वताः॥धर्ममूर्तिधराःसर्वेपरतोब्रह्मणःस्मृताः॥२५॥उत्पन्नाःस्वधयातेतुब्रह्मत्वं
प्राप्ययोगिनः॥कृत्वासृष्ट्यादिकंसर्वंमानसेसंप्रतेस्थिताः॥२६॥कर्मदानामतेषांतुकन्यातोयवहासरित्॥
भूतानियापावयतिदक्षिणापथगामिनी॥२७॥तेभ्यःसर्वेमनवःप्रजासर्वेषुविनिर्मिताः॥ज्ञात्वाश्राद्धानिकु
र्वंतिधर्मजावेपिसर्वदा॥२८॥तेभ्यएवमनुप्राप्तप्रसादाद्योगसंततीं॥पितॄणामादिसर्गेतुश्राद्धमेवविनिर्मितं॥ रम॰
२९॥सर्वेषांराजतंपात्रमथवारजतान्वितं॥दत्तंस्वधांपुरोधायपितॄन्प्रीणातिसर्वदा॥३०॥अग्नीषोमयमानांतु
कार्यमाप्यायनंबुधैः॥अग्न्यभावेपिविप्रस्यपाणौवापिजलेपिवा॥३१॥अजकर्णेश्वकर्णेवागोष्ठेवापसिशिवांति २३

के॥पितॄणामंबरंस्थानंदक्षिणादिक्प्रशस्यते॥३२॥प्राचीनावीतमुदकंतिलाःसव्यांगमेवच॥दर्भामांसंचपा
वीनंगोक्षीरंमधुरापरसः॥३३॥खड्गलोहामिषंचैवमधुश्यामाकशालयः॥यवनीवारमुद्गाश्चशुक्लपुष्पघृता
निच॥३४॥मसूरसणतिष्पावराजमाषकुसुंभिका॥पद्मबिल्वार्कधत्तूरपारिभद्राटरूषकाः॥३५॥नदेयाःपि
तृकार्येषुपयश्चाजाविकंतथा॥कोद्रवोदारवरटःकपित्थमधुकातसी॥३६॥एतान्यपिनदेयानिपितृभ्यःप्रि
यमिच्छता॥पितॄन्प्रीणातियोभक्त्यातेपुनःप्रीणयंतितं॥३७॥यच्छंतिपितरःपुष्टिंस्वर्गारोग्यप्रजाफलं॥देवकार्या
दपिपुनःपितृकार्यंविशिष्यते॥३८॥देवतानांचपितरःपूर्वमाप्यायनंस्मृतं॥३९॥शीघ्रप्रसादास्त्वक्रोधाःप्रशांताः
स्थिरसौहृदाः॥३९॥शांतात्मानःशौचपराःसततंप्रियवादिनः॥भक्तानुरक्ताःसुखदाःपितरःपूर्वदेवताः॥
४०॥हविष्मतामाधिपत्येश्राद्धदेवःस्मृतोरविः॥एतद्वःसर्वमाख्यातंपितृवंशानुकीर्तनं॥पुण्यंपवित्रमायुष्यं
कीर्तनीयंसदान्नृभिः॥४१॥॥इतिश्रीमत्स्यपुराणेपितृवंशानुकीर्तनंनाम॥॥सूतउवाच॥॥श्रुत्वैतत्सर्वमिम
लंमनुःपप्रच्छकेशवं॥श्राद्धकालंचविविधंश्राद्धभेदंतथैवच॥१॥श्राद्धेभुजोजनीयाश्चवर्ज्याद्विजातयः।
कस्मिन्वासरभागेवापितृभ्यःश्राद्धमाचरेत्॥२॥कस्मिन्दत्तंकथंयातिश्राद्धंतुमधुसूदन॥विधिनाकेनकर्त
व्यंकथंप्रीणातितान्सिहेत॥३॥श्रीमत्स्यउवाच॥॥कुर्यादहरहःश्राद्धमन्नाद्येनोदकेनवा॥पयोमूलफलैर्वापि

पितृभ्यःप्रीतिमाहरेत्॥४॥नित्यंनैमित्तिकंकाम्यंत्रिविधंश्राद्धमुच्यते॥नित्यंतावत्प्रवक्ष्यामिअर्घावाहनवर्जितं॥
५॥अदैवंतद्विजानीयात्पार्वणंपर्वसुस्मृतं॥पार्वणंत्रिविधंप्रोक्तंशृणुतावन्महीपते॥६॥पार्वणेयेनियोज्यास्तु
तान्शृणुष्वनराधिप॥पंचाग्निःस्नातकश्चैवत्रिसुपर्णःषडंगवित्॥७॥श्रोत्रियःश्रोत्रियसुतोविधिवाक्यवि
शारदः॥सर्वज्ञोवेदविन्मंत्रीज्ञातवंशःकुलान्वितः॥८॥पुराणवेत्ताधर्मज्ञःस्वाध्यायजपतत्परः॥शिवभक्तः
पितृपरःसूर्यभक्तोथवैष्णवः॥९॥ब्रह्मण्योयोगविच्छांतोविजितात्माचशीलवान्॥भोजयित्वापिदौहित्रं
यत्नतःश्वशुरंगुरुं॥१०॥विट्पतिंमातुलंबंधुंऋत्विगाचार्यसोमपान्॥यश्चव्याकुरुतेवाचंयश्चमीमांसतेध्वरं॥
नपाव ११॥सामस्वरविधिज्ञश्चपंक्तिपावनः॥सामगोब्रह्मचारीचवेदयुक्तोथब्रह्मवित्॥१२॥यत्रैतेभुंजतेश्राद्धेतद्दे
वपरमार्थवित्॥एतेभोज्याःप्रयत्नेनवर्जनीयान्निबोधमे॥१३॥पतितोभिशस्तःक्लीबांधःपिशुनोव्यंगरो
गिणः॥कुनखीश्यावदंतस्तुकुंडगोलाजपालकाः॥१४॥परिवित्तिःपरिवेत्तामन्नोन्मत्ताश्चदारुणाः॥बैडालीच
कुहकीश्छिद्रदेवलकादयः॥१५॥कृतघ्नान्नास्तिकास्तद्वन्म्लेच्छदेशनिवासिनः॥त्रिशंकुर्बर्बरोंध्रश्चीनद्र
विडकौंकणान्॥१६॥वर्जयेल्लिंगिनःसर्वान्श्राद्धकालेषुधर्मवित्॥पूर्वेद्युरपरेद्युर्वाविनीतात्मानिमंत्रयेत्॥१७॥ राम॰ २४
निमंत्रितान्हिपितरउपतिष्ठंतितान्द्विजान्॥वायुभूताःप्रगच्छंतितथासीनानुपासते॥१८॥दक्षिणाजानुपा

तंकृत्वामयान्ननिमंत्रितः॥एवंनिमंत्र्यनियमंश्रावयेत्पितृभक्तिमान्॥१९॥अक्रोधनैःशौचपरैःसततंब्रह्मचा
रिभिः॥भवितव्यंभवद्भिश्चमयाचश्राद्धकारिणा॥२०॥पितृयज्ञंविनिर्वर्त्यतर्पणाख्यंतुयोग्निमान्॥पिंडान्वाहा
र्यकंकुर्यात्श्राद्धमिंदुक्षयेसदा॥२१॥गोमयेनोपलिप्तेतुदक्षिणाप्रवणेवनौ॥श्राद्धंसमाचरेत्भक्त्यागोष्ठेवाज
लसन्निधौ॥२२॥अग्निमान्निर्वपेत्पित्र्यंचरुंवासममुष्टिभिः॥अभिघार्यततःकुर्यान्निर्वापत्रयमग्रतः॥२४॥तेवि
तस्त्यायताःकार्यानिर्वापत्रयमग्रतः॥तेवितस्त्यायताःकार्याश्चतुरंगुलविस्तृताः॥२५॥दर्वीत्रयंतुकुर्वीतखा
दिरंरजतान्वितं॥रत्निमात्रंपरिश्लक्ष्णाःहस्ताकाराग्रवृत्तयः॥२६॥उदपात्रंचकांस्यंचमेक्षणंचसमित्कुशान्॥ति
लपात्राणिसद्वासोगंधधूपानुलेपनं॥२७॥आहरेदपसव्यंतुसर्वंदक्षिणतःशनैः॥एवमासाद्यतत्सर्वंभवनस्या
ग्रतोभुवि॥२८॥गोमयेनानुलिप्तायांगोमयेनतुमंडलं॥अक्षताभिःसपुष्पाभिस्तदभ्यर्च्यापसव्यवत्॥२९॥विप्रा
णांक्षालयेत्पादावभिवंद्यपुनःपुनः॥आसनेषूपक्लृप्तेषुदर्भवत्सुविधानवत्॥३०॥उपस्पृष्टोदकान्विप्रा
नुपवेश्यानुमंत्रयेत्॥द्वौदेवेपितृकार्येत्रीनेकैकमुभयत्रवा॥३१॥भोजयेदीश्वरोपीहनकुर्याद्विस्तरंबु
धः॥देवपूर्वंनियोज्याथविप्रानर्घादिनाबुधः॥३२॥अग्नौकुर्यादनुज्ञातोविप्रैर्विप्रोयथाविधि॥स्वगृह्योक्त
विधानेनकाश्यपेकृत्वाचरुंततः॥३३॥अग्नीषोमयमाभ्यांतुकुर्यादाप्यायनंबुधः॥दक्षिणाग्नौप्रणीतेवायएकाग्नि

द्विजोत्तमः ॥३४॥ यज्ञोपवीतं निर्दिश्य ततः पर्युक्षणादिकं ॥ प्राचीनावीतिना कार्यमेतत्सर्वं विजानता ॥३५॥ षट्तुतस्मा
द्विशेषान्पिंडान्कृत्वा तथोदकं ॥ दद्यादुदकपात्रेतु सलिलं सव्यपाणिना ॥३६॥ कृत्वापसव्यं दत्वेत दर्भयुक्तो
विमत्सरः ॥ विधाय लेखां यत्नेन निर्वपेदवनेजनं ॥३७॥ दक्षिणाभिमुखः कुर्यात्करे दर्वीं निधाय वै ॥ विधाय पिंड
मेकैकं सर्वदर्भोपरिक्रमात् ॥३८॥ विनयेदप दर्भेषु नामगोत्रानुकीर्तनैः ॥ तेषु दर्भेषु तं हस्तं निमज्ज्यालेपभागि
नां ॥३९॥ तथैतान्नमस्कृत्वा गंधधूपार्हणादिभिः ॥ एवमावात्य तत्सर्वं वेदमंत्रैर्यथोदितैः ॥४०॥ एकाग्रेएक
एवस्यान्निर्वपेद्दर्विका तथा ॥ तरेद्दद्यात्तत्पत्नीभ्यः कुशानन्बुधः ॥४१॥ तद्वत्पिंडादिकं कुर्यात् आवाहनविस
र्जने ॥ ततो गृहीत्वा पिंडेभ्यो मात्राः सर्वाः क्रमेणतु ॥४२॥ तानेव विप्रान्प्रथमं प्राशयेन्नरः ॥ यस्माद्त्राधृतात्वं
त्रान्नक्षयं तिद्विजातयः ॥४३॥ अन्वाहार्यकमित्युक्तं तस्मात्तद्दन्नेक्षयं ॥ पूर्वं दत्वातु तत्हस्ते सपवित्रं तिलो
दकं ॥४४॥ तत्पिंडाग्रं प्रयच्छेत स्वधैषामस्त्विति ब्रुवन् ॥ वर्णयन्भोजयेदन्नं मृष्टं पूतं च सर्वदा ॥४५॥ वर्जयेत्क्रो
धपरतां स्मरन्नारायणं हरिं ॥ तृप्तान्ज्ञात्वा ततः कुर्याद्विकिरं सार्ववर्णिकं ॥४६॥ सोदकान्नान्नवद्धृत्वा सलिलं
प्रक्षिपेद्भुवि ॥ आचांतेषु पुनर्दद्यात् जलं पुष्पाक्षतोदकं ॥४७॥ स्वस्तिवाचनिकं सर्वं पिंडोपरि समाहरेत् ॥ दे
वाद्यंतं प्रकुर्वीत श्राद्धनाशोन्यथा भवेत् ॥४८॥ विसृज्य ब्राह्मणांस्तांस्तु तेषां कृत्वा प्रदक्षिणां ॥ दक्षिणां दिश

माकांक्षन्याचेतिमान्वरः ॥४९॥ दातारो नोभिवर्द्धंतां वेदाः संततिरेव च ॥ श्रद्धा च नो मा व्यगमत् बहुदे
यं च नोस्त्विति ॥५०॥ अन्नं च नो बहु भवेदतिथींश्च लभेमहि ॥ याचितारश्च नः संतु मा च याचिष्म कंचन ॥५१॥ ए
तत्सततं भोक्तुं मत्वाहार्यं तु पार्वणं ॥ यथेंदुसंक्षये तद्वदन्यापि विनिगद्यते ॥५२॥ पिंडांस्तु गोजविप्रेभ्यो दद्याद्दग्नौ
जलेपि वा ॥ विप्रान्नतो वा विकिरेद्वयोभिरथवाशयेत् ॥५३॥ पत्नीतु मध्यमं पिंडं प्राशयेद्विनयान्विता ॥ आधत्त
पितरो गर्भमत्र संतानवर्द्धनं ॥५४॥ तावद्विवर्णतिष्ठेयुर्वृद्धिमाविसर्जिताः ॥ वैश्वदेवं ततः कुर्यान्निवृत्ते
पितृकर्मणि ॥५५॥ इष्टैः सह ततः शांतो भुंजीत पितृसेवितं ॥ पुनर्भोजनमध्वानं यानमायासमैथुनं ॥५६
श्राद्धकृत् श्राद्धभुक्चैव सर्वमेतद्विसर्जयेत् ॥ स्वाध्यायं कलहं चैव दिवास्वापं च सर्वदा ॥५७॥ अनेन विधि
ना श्राद्धं त्रिरब्दस्येह निर्वपेत् ॥ कन्याकुंभवृषस्थे के कृष्णपक्षेषु सर्वदा ॥५८॥ यत्र यत्र प्रदातव्यं सपिंडीकर
णात्परं ॥ तत्रानेन विधानेन देयमग्निमता सदा ॥५९॥ ॥ इति श्रीमत्स्यपुराणे श्राद्धकल्पो नाम ॥ सूत उ
वाच ॥ अतः परं प्रवक्ष्यामि विष्णुना यदुदीरितं ॥ श्राद्धं साधारणं नाम भुक्तिमुक्तिफलप्रदं ॥१॥ अयने
विषुवे युग्मे सामान्ये चार्कसंक्रमे ॥ अमावास्याष्टकाकृष्णपक्षे पंचदशीषु च ॥२॥ आर्द्रामघारोहिणीषु द्रव्य
ब्राह्मणसंगमे ॥ गजच्छायाव्यतीपाते विष्टिवैधृतवासरे ॥३॥ वैशाखस्य तृतीयायां नवमी कार्त्तिकस्य या ॥

पंचदशी चमाघस्य न नसे चत्रयोदशी ॥४॥ युगादयः स्मृतास्तेतादत्तस्याक्षयकारकाः ॥ तथा मन्वंतरादौ
च देयं श्राद्धं विजानता ॥५॥ अश्वयुजि शुक्लनवमी द्वादशी कार्तिके तथा ॥ तृतीया चैत्रमासस्य तथा भाद्रप
दस्य च ॥६॥ फाल्गुनस्य अमावासी पौषस्यैकादशी तथा ॥ आषाढस्यापि दशमी माघमासस्य सप्तमी ॥७॥ श्राव
णस्याष्टमी कृष्णा तथाषाढी च पूर्णिमा ॥ कार्तिकी फाल्गुनी चैत्र ज्येष्ठे पंचदशी सिता ॥८॥ मन्वंतराद्यः प्रोक्ता
ता दत्तस्याक्षयकारकाः ॥ यस्यां मन्वंतरस्यादौ रथमारूढो दिवाकरः ॥९॥ माघमासस्य सप्तम्यां सा तु
स्याद्रथसप्तमी ॥ पानीयमप्यत्र तिलैर्विमिश्रितं दद्यात्पितृभ्यः प्रयतो मनुष्यः ॥ श्राद्धं कृतं तेन समाः स
हस्रं रहस्यमेतत्पितरो वदंति ॥१०॥ वैशाखस्य उपरागेषु तथोत्सवमहालये ॥ तीर्थायतनगोष्ठेषु द्वीपो
द्यानगृहेषु च ॥११॥ विविक्तेषूपलिप्तेषु श्राद्धं देयं विजानताः ॥ विप्रान्पूर्वे परे वाह्नि विनीतात्मा निमंत्र
येत् ॥१२॥ शीलव्रतगुणोपेतान्वयोरूपसमन्वितान् ॥ द्वौ दैवे त्रीन्पित्र्ये एकैकमुभयत्र वा ॥१३॥ भोजये
त्सुसमृद्धोपि न प्रसज्जेत विस्तरे ॥ विश्वान्देवान्यवैः पुष्पैरभ्यर्च्यासनपूर्वकं ॥१४॥ पूरयेत्पात्रयुग्मं तु स्था
प्य दर्भपवित्रकं ॥ शन्नो देवीत्यपः कुर्याद्यवोसीति यवानपि ॥१५॥ गंधपुष्पैश्च संपूज्य वैश्वदेवं प्रतिन्यसे
त् ॥ विश्वेदेवास इत्याभ्यामावाह्य विकिरेद्यवान् ॥१६॥ गंधपुष्पैरलंकृत्य यादिव्येति पउत्सृजेत् ॥ अभ्यर्च्य ता

भ्यामुत्सृष्टं पितृकार्यं समारभेत् ॥१७॥ दर्भासनादि दत्वादौ त्रीणि पात्राणि पूरयेत् ॥ सपवित्राणि कृत्वादौ श
न्नो देवीत्यपः क्षिपेत् ॥१८॥ तिलोसीति तिलान्कुर्याद्गंधपुष्पादिकं पुरः ॥ पात्रं वनस्पतिमयं तथा पर्ण
मयं पुनः ॥१९॥ जलजं वापि कुर्वीत तथा सागरसंभवं ॥ सौवर्णं राजतं वापि पितृणां पात्रमुच्यते ॥२०॥ राज
तस्य कथा वापि दर्शनं दानमेव च ॥ राजतैर्भाजनैरेषामथवा रजतान्वितैः ॥२१॥ वार्यपि श्रद्धया दत्तमक्षया
योपकल्पते ॥ तथार्घपात्रैः पिंडैः पितृणां राजतं मतं ॥२२॥ शिवनेत्रोद्भवं यस्मात्तस्मात्तत्पितृवल्लभं ॥ अ
मंगलं तद्यत्नेन देवकार्येषु वर्जयेत् ॥२३॥ एवं पात्राणि संकल्प्य यथालाभं विमत्सरः ॥ या दिव्येति पितुर्ना
म गोत्रैर्दर्भकरो न्यसेत् ॥२४॥ पितृनावाहयिष्यामि कुर्यादित्युक्तुस्तैः पुनः ॥ उशंतस्त्वा तथायंतु ऋचा वा
हयेत्पितॄन् ॥२५॥ या दिव्येत्यर्घमुत्सृज्य दत्वा गंधादिकं पुनः ॥ वस्त्रोत्तरमुपरीक्षं दत्वा संस्रवमादितः ॥२६॥ पि
तृपात्रे निधायाथ न्युब्जमुत्तरतो न्यसेत् ॥ पितृभ्यः स्थानमसीति निधाय परिषेचयेत् ॥२७॥ तत्रापि पूर्ववत्कु
र्यात् अग्निकार्यं विमत्सरः ॥ उभाभ्यामपि हस्ताभ्यामाहृत्य परिवेषयेत् ॥२८॥ प्रशांतचित्तः सकलं दर्भपाणिरशे
षतः ॥ गुणैश्च सूपशाकाद्यैर्नानाभक्ष्यैस्तथैव च ॥२९॥ अन्नं तु सादवक्षारं गोघृतं च करान्वितं ॥ मासं प्रीणाति
वै सर्वान्पितृन्नित्याह केशवः ॥३०॥ द्वौ मासौ मत्स्यमांसेन त्रीन्मासान्हारिणेन तु ॥ औरभ्रेणाथ चतुरः शाकुंते

नाथपंचवै॥३१॥षण्मासांश्छागमांसेनतृप्यंतिपितरस्तथा॥सप्तलोहस्यमांसेनतृप्तिःस्यादेणजेनतु॥३२॥ए
षतस्यतुमांसेनतृप्तिर्मासान्नवैवतु॥दशमासांस्तुतृप्यंतिवाराहमहिषामिषैः॥३३॥शशकूर्मयोर्मांसेनमासा
नेकादशैवतु॥संवत्सरंतुगव्येनपयसापायसेनच॥३४॥रौरवेणतुतृप्यंतिमासान्पंचदशैवतु॥वाध्रीणस
स्यमांसेनतृप्तिर्द्वादशवार्षिकी॥३५॥कालशाकेनदानंवाखड्गमांसेनचैवहि॥यत्किंचिन्मधुमिश्रंतुगोक्षीरंघृ
तपायसं॥३६॥दत्तमक्षयमित्याहुःपितरःपूर्वदेवताः॥स्वाध्यायंश्रावयेत्पित्र्येंपुराणान्यखिलानिच॥३७॥
ब्रह्मवस्तुकरुणाख्यांस्तवानिविविधानिच॥ऐंद्राग्निसोमसूक्तानिपावमानानिशक्तितः॥३८॥बृहद्रथंतरेत
द्वत्ज्येष्ठसामसरौहिणं॥तथैवशांतिकाध्यायंमब्राह्मणमेवच॥३९॥सकलंब्राह्मणेतद्वत्प्रीतिकारितुपस्तु
तः॥विप्राणामात्मनश्चैवतत्सर्वंसमुदीरयेत्॥४०॥भुक्तवत्सुततस्तेषुभोजनोपांतिकेनृप॥सार्ववर्णिकमन्ना
द्यंसंनीयाप्लाव्यवारिणा॥४१॥समुत्सृजेद्भुक्तवतामग्रतोविकिरन्भुवि॥अग्निदग्धास्तुयेजीवायेप्यदग्धाः
कुलेमम॥भूमौदत्तेनतृप्यंतुप्रयांतुपरमांगतिं॥४२॥येषांनमातानपितानबंधुर्नगोत्रशुद्धिर्नतथागतिस्तु
तत्तृप्तयेन्नंभुविदत्तमेतत्प्रयातुलोकायसुखायतद्वत्॥४३॥असंस्कृतप्रमीतानांत्यागिनांकुलयोषितां
उच्छिष्टभागधेयंस्याद्दर्भेषुविकिरश्चयत्॥४४॥तृप्तान्ज्ञात्वोदकंदद्यात्सकृत्सकृत्क्षिप्रकरेतदा॥उपलिप्तेमही

दृष्टेगोशकृन्मूत्रवारिणा॥४५॥निधायदर्भान्विधिवद्दक्षिणाग्राननुप्रयत्नतः॥सर्ववर्णेनचान्नेनपिंडांस्तुपितृयज्ञ
वत्॥४६॥अवनेजनपूर्वंतुनामगोत्रेणमानवः॥गंधधूपादिकंदद्यात्कृत्वाप्रत्यवनेजनं॥४७॥कृत्वापसव्यं
सव्येनमपिपत्सुदक्षिणं॥पित्र्यमानिधनात्कार्यंविधिवद्दर्भपाणिना॥४८॥दीपप्रज्वालनंतद्वत्कुर्यात्तु
ष्पार्चनंबुधः॥अथाचांतेषुचाचम्यवारिदद्यात्कृतकृत्॥४९॥अथपुष्पाक्षतान्पश्चाद्दक्षयोदकमेवच॥स
लिलेनामगोत्रेणदद्याच्छक्त्याचदक्षिणां॥५०॥गोभूहिरण्यवासांसिभव्यानिशयनानिच॥दद्याद्यदिष्टंविप्राणा
मात्मनःपितुरेवच॥५१॥वित्तशाठ्येनरहितःपितृभ्यःप्रीतिमाहरेत्॥ततःस्वधावाचनकंविश्वेदेवेषुचोद
कं॥५२॥दत्वाशीरितिगृह्णीयात्द्विजेभ्यःप्राङ्मुखोबुधः॥अघोराःपितरःसंतुसंतत्वित्युक्तःपुनर्द्विजैः॥
५३॥गोत्रंतथावर्द्धतांनस्तथेत्युक्तश्चतैःपुनः॥दातारोनोभिवर्द्धंतांइतिचैवमुदीरयेत्॥५४॥एताएवाशिषःसं
तुसंत्वित्युक्तश्चतैःपुनः॥स्वस्तिवाचनिकंकुर्यात्पिंडानुद्धृत्यभक्तितः॥५५॥उच्छेषणंतुतत्तिष्ठेद्यावद्विप्रावि
सर्जिताः॥ततोगृहबलिंकुर्यादितिधर्मोव्यवस्थितः॥५६॥उच्छेषणंभूमिगतमजिह्मस्याशठस्यच॥दास
वर्गस्यतत्पित्र्येभागधेयंप्रचक्षते॥५७॥पितृभिर्निर्मितंपूर्वमेतदाप्यायनंसतां॥अपुत्राणांसपुत्राणांस्त्री
णामपिनराधिप॥५८॥ततःस्नानगतमजिह्मस्याशिस्थित्वापरिगृह्योदपात्रकं॥वाजेवाजेइतिजपन्कुशा

ग्रेण विसर्जयेत्॥६०॥ बहिः प्रदक्षिणां कुर्यात्पदान्यष्टावनुव्रजेत्॥ बंधुवर्गेण सहितः पुत्रभार्यासमन्वितः॥६१॥
निवृत्य प्रणिपत्याथ पर्युक्ष्याग्निं समंत्रवित्॥ वैश्वदेवं प्रकुर्वीत नैत्यिकं बलिमेव च॥६२॥ ततस्तु वैश्वदेवांते सभृ
त्यसुतबांधवः॥ भुंजीतातिथिसंयुक्तः सर्वं पितृनिषेवितं॥६३॥ एतच्चानुपनीतोपि कुर्यात्सर्वेषु पर्वसु॥ श्राद्धं सा
धारणं नाम सर्वकामफलप्रदं॥६३॥ भार्याविरहितोप्येतत्प्रवासस्थोपि भक्तिमान्॥ शूद्रोप्यमंत्रवत्कुर्यादने
नेन विधिना बुधः॥६४॥ तृतीयमाभ्युदयिकं वृद्धिश्राद्धं तदुच्यते॥ उत्सवानंदसंभारे यज्ञोद्वाहादिमंगले॥६५॥
मातरः प्रथमं पूज्याः पितरस्तदनंतरं॥ ततो मातामहा राजन् विश्वेदेवास्तथैव च॥६६॥ प्रदक्षिणोपचारेण
दध्यक्षतफलोदकैः॥ प्राङ्मुखो निर्वपेत्पिंडान् दूर्वया च कुशैर्युतान्॥६७॥ संपन्नमित्यभ्युदये प्रीयतामिति
दीरयेत्॥ यज्ञो द्विजातयः पूज्या वस्त्रकार्तस्वरादिभिः॥६८॥ तिलार्थस्तु यवैः कार्यो नांदीशब्दानुपूर्वकः॥ मं
गल्यानि च सर्वाणि पावयेत् द्विजपुंगवान्॥६९॥ एवं शूद्रस्य सत्याह भगवान्प्रभुः॥ दानेन सर्वकामाप्तिरस्य
संजायते यतः॥७०॥ ॥इति श्रीमत्स्यपुराणे साधारणाभ्युदयिकोनाम॥ ॥सूत उवाच॥ ॥एकोद्दिष्टमतो वक्ष्ये
यदुक्तं चक्रपाणिना॥ मृतैः पुत्रैः यथा कार्यमाशौचं च पितुर्यपि॥१॥ दशाहं शावमाशौचं ब्राह्मणेषु विधीयते॥
क्षत्रियेषु दशाहे च पक्षो वैश्यस्य चैव हि॥२॥ शूद्रे मासमाशौचं सपिंडेषु विधीयते॥ नैशाचाकृतचूडस्य

त्रिरात्रं परतः स्मृतं॥३॥ जननेप्येवमेवं तु सर्ववर्णेषु सर्वदा॥ तथास्थिसंचयनादूर्ध्वं अंगस्पर्शो विधीयते॥४॥ प्रेताय
पिंडदानं तु द्वादशाहं समाचरेत्॥ पाथेयं तस्य तत्प्रोक्तं यतः प्रीतिकरं महत्॥५॥ तस्मात्प्रेतपुरं प्रेतो द्वादशेन
नीयते॥ गृहं पुत्रकलत्रं च द्वादशाहं प्रपश्यति॥६॥ तस्मान्निधेयमाकाशे दशरात्रं पयस्तथा॥ सर्वदाहोपशां
त्यर्थं पथि श्रमनाशनं॥७॥ एकादशाहे विप्राणां तद्दिनैकादशेन तु॥ क्षत्रादिसूतकांते तु भोजयेदयुजो द्विजा
न्॥८॥ द्वितीयेह्नि पुनस्तद्वदेकोद्दिष्टं समाचरेत्॥ आवाहनाग्नौकरणं दैवहीनं विधानतः॥९॥ एकं पवित्र
मेकार्घ एकपिंडो विधीयते॥ उपतिष्ठतामित्येतद्देयं पश्चात्तिलोदकं॥१०॥ स्वदितं विकिरे ब्रूयाद्विसर्गे चाभि
रम्यतां॥ शेषं पूर्ववदत्रापि कार्यं विधिविदा पुनः॥११॥ अनेन विधिना सर्वमनुमासं समाचरेत्॥ सूतकांता
द्वितीयेह्नि शय्यां दद्याद्विचक्षणः॥१२॥ कांचनं पुरुषं तद्वत्फलवस्त्रसमन्वितं॥ संपूज्य द्विजदंपत्यं नानाभ
रणभूषणैः॥१३॥ वृषोत्सर्गं प्रकुर्वीत देया च कपिला शुभा॥ उदकुंभश्च दातव्यो भक्ष्यभोज्यसमन्वितः॥१४॥
यावदब्दं नरश्रेष्ठ सतिलोदकपूर्वकं॥ ततः संवत्सरे पूर्णे॥१५॥ सपिंडीकरणादूर्ध्वं प्रेतः पार्वणभाग्भवेत्॥
वृद्धिपूर्वेषु योग्यश्च गृहस्थश्च भवेत् द्विजः॥१६॥ सपिंडीकरणे श्राद्धं दैवपूर्वं नियोजयेत्॥ पितॄनेवाशयेत्तत्र
पृथमां इति द्वाभ्यां मार्घं तु विसृजेद्विधः॥१७॥ चतुर्थस्य पुनः कार्यं न कदाचिदतो भवेत्॥ ततः पितृत्वमापन्नः

म०ष्ठ० २६

सर्वतः पुष्टिमागतः ॥१८॥ अग्निष्वात्तादिमध्यत्वं प्राप्नोत्यमृतनमं ॥ सपिंडीकरणादूर्ध्वं तस्मै तस्माल्लदीयते ॥१९॥ पित्रे
दिव्ये वदातव्यं तत्पिंडो येषु संस्थितः ॥ ततः प्रभृति संक्रांतावुपरागादिपर्वसु ॥२०॥ त्रिपिंडमाचरेत् श्राद्धमेकोद्दि
ष्टं मृताहनि ॥ एकोद्दिष्टं परित्यज्य मृताहे यः समाचरेत् ॥२१॥ सदैव पितृहा सस्यान्मातृभ्रातृविनाशकः ॥ मृ
ताहे पार्वणं कुर्वन्नधोधो याति मानवः ॥२२॥ संपृक्तेष्वाकुलीभावे प्रेतेषु तु यतो भवेत् ॥ प्रतिसंवत्सरं तस्मा
त्तएकोद्दिष्टं समाचरेत् ॥२३॥ यावद्वर्षं च यो दद्यादुदकुंभं विमत्सरः ॥ प्रेतायान्नसमायुक्तं सोश्वमेधफलं लभे
त् ॥२४॥ आमश्राद्धं यदा कुर्याद्विधिज्ञः श्रद्धयान्वितः ॥ तेनाग्नौकरणं कुर्यात्पिंडांस्तेनैव निर्वपेत् ॥२५॥ त्रिभिः
सपिंडीकरणे मासे कृत्वा त यं पिता ॥ यदा माग्नि प्रतिकालेन तदा मुच्येत बंधनात् ॥२६॥ मुक्तः फलोपभोगित्वं प्रा
प्नोति कुशमार्जनात् ॥ लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभाजिनः ॥ पिंडदः सप्तमस्तेषां सापिंड्यं साप्तपौरुषं ॥२७
इति श्रीमत्स्यपुराणे श्राद्धकल्पे सपिंडीकरणो नाम ॥ ॥ ऋषय ऊचुः ॥ ॥ कथं कव्यानि दत्तानि हव्यानि च जनैरि
ह ॥ गच्छंति पितृलोकस्थान् प्रापकोत्र निगद्यते ॥१॥ यदि मर्त्ये स्थिता महान् ॥ प्रपितामहास्तथा दिव्या नि रा०म०
त्येवं वैदिकी श्रुतिः ॥ नामगोत्रं पितॄणां तु प्रापकं हव्यकव्ययोः ॥२॥ श्राद्धस्य मंत्राः श्रद्धा च उपयोज्यानि भक्ति २६
तः ॥ अग्निष्वात्तादयस्तेषामाधिपत्ये व्यवस्थिताः ॥४॥ नामगोत्रे कालदेशा भवांतरगतानपि ॥ प्राणिनः

प्रीणयंत्येते तदाहारत्वमागतान् ॥५॥ देवो यदि पिता जातः शुभकर्मानुयोगतः ॥ तस्यान्नममृतं भूत्वा दिव्यत्वे
प्यनुगच्छति ॥६॥ दैत्यत्वे भोगरूपेण पशुत्वे च तृणं भवेत् ॥ श्राद्धान्नं वायुरूपेण सर्पत्वेप्युपतिष्ठति ॥७॥
पानं भवति यक्षत्वे गृध्रत्वेपि तथामिषं ॥ दनुजत्वे तथा माया प्रेतत्वे रुधिरोदकं ॥८॥ मनुष्यत्वेन्नपानानि ना
नाभोगरसं भवेत् ॥ रतिसक्तिः स्त्रियः कांतिर्भोज्यं भोजनशक्तिता ॥९॥ दानशक्तिः सविभवा रूपमारोग्यमे
व च ॥ श्राद्धपुष्पमिदं प्रोक्तं फलं ब्रह्मसमागतः ॥१०॥ आयुः पुत्रान्धनं विद्यां स्वर्गं मोक्षं सुखानि च ॥ राज्यं चैव
प्रयच्छंति प्रीताः पितृगणा नृणां ॥११॥ श्रूयते च परं मोक्षं प्राप्ताः कौशिकसूनवः ॥ पंचभिर्जन्मसंबंधैर्गता वि
ष्णोः परं पदं ॥१२॥ ॥ इति श्रीमत्स्यपुराणे श्राद्धकल्पे फलानुगमनो नाम ॥ ॥ ऋषय ऊचुः ॥ ॥ कथं कौशि
कदायादाः प्राप्तास्ते योगमुत्तमं ॥ पंचभिर्जन्मसंबंधैः कथं कर्मक्षयो भवेत् ॥१॥ सूत उवाच ॥ कौशिको भा न
मधर्मात्मा कुरुक्षेत्रे महानृषिः ॥ नामतः कर्मतस्तस्य सुताः सप्त निबोधत ॥२॥ स्वपः क्रोधनो हिंस्रः पिशुनः
कविरेव च ॥ वाग्दुष्टः पितृवर्ती यगर्गशिष्यास्तथा भवत् ॥३॥ पितर्युपरते तेषामभूत्तदुर्भिक्षमुल्बणं ॥ अना
वृष्टिश्च महती सर्वलोकभयंकरी ॥४॥ गर्गादेशाद्वने दोग्ध्रीं रक्षंतस्ते तपोधनाः ॥ भक्षाम कपिलामेतां वयं
क्षुत्पीडिता भृशं ॥५॥ इति चिंतयतां पापं लघुः प्राह तदानुजः ॥ यद्यवश्यमियं वध्या श्राद्धरूपेण योज्यतां ॥६

म०छ० श्राद्धे नियोज्यमाने यं पापात्त्रास्यति नो ध्रुवं ॥ एवं कुर्वत्यनुज्ञातः पितृवर्त्ती तदानुजः ॥ ७॥ चक्रे समाहितः श्राद्धमुपपु
३० त्यचतां पुनः ॥ दोदैवे भ्रातरौ कृत्वा पित्र्ये त्रीनप्यनुक्रमात् ॥ ८॥ तथैकमतिथिं कृत्वा श्राद्धदः स्वयमेव तु ॥ चक्रा
रमंत्रवच्छ्राद्धं स्मरन्पितृपरायणः ॥ ९॥ विनागवां च सर्वेषां गुरवे निवेदितं ॥ व्याघ्रेण निहता धेनुः सप्तर्षिभिस्तै
स्तपोधने ॥ १०॥ वैदिकं बलमाश्रित्य क्रूरकर्मणि निर्भयाः ॥ ततः कालाद्वदृष्टास्ते व्याधा दशार्णे द्विजपावने ॥ ११॥ जा
तिस्मरत्वं संप्राप्ताः पितृभावेन भाविताः ॥ पितृकृतं क्रूरकर्मापि श्राद्धरूपेण तेन तदा ॥ १२॥ तेन ते मृगवने जाता व्याधा
नां क्रूरकर्मणां ॥ नीलकंठस्य पुरतः पितृभावेन भाविताः ॥ १३॥ तत्रापि ज्ञातवैराग्यात्प्राणानुत्सृज्य धर्मतः ॥
लोकैरवेक्षमाणास्ते तीर्थं पतितो नगान्तेन ते ॥ १४॥ मानसे चक्रवाकास्ते संजाताः सप्तयोगिनः ॥ नामतः कर्मतः स
वान्शृणुध्वमृषिसत्तमाः ॥ १५॥ सुमनाः कुमुदः शुद्धश्छिद्रदर्शी सुनेत्रकः ॥ अनेत्रश्चांशुमांश्चैव संप्रेते योगपा
रगाः ॥ १६॥ योगभ्रष्टाल्पयस्तेषां बभूवुस्त्वाल्पचेतनाः ॥ दृष्ट्वा विभ्राजनामानं सुधानेस्त्रीभिरन्वितं ॥ १७॥ क्रीडं
तं विविधैर्भोगैर्महाबलपराक्रमं ॥ पंचाला लयुयोस्तं तं प्रसूतबलवाहनं ॥ १८॥ राज्यकामो भवत्वेकस्तेषां मध्ये
जलौकसां ॥ पितृवर्त्ती च यो विप्राः श्राद्धकृत्पितृवत्सलः ॥ १९॥ अपरौ मंत्रिणौ दृष्ट्वा प्रभूतबलवाहनौ ॥ मंत्रि रा म०
त्वे चक्रतुस्पृहा अस्मिन्मर्त्ये द्विजोत्तमाः ॥ २०॥ तन्मध्ये ये तु निष्कामास्ते वभूवुर्द्विजोत्तमाः ॥ विभ्राजपुत्रस्तेके ३०

पूत ब्रह्मदत्त इति स्मृतः ॥ २१॥ मंत्रिपुत्रौ तथैवोभौ चकंडरीकसुवालकौ ॥ ब्रह्मदत्तोपि त्रिपिकः सन्पुरोहि
तविपश्चिता ॥ २२॥ पंचालराजो विक्रांतः सर्वशास्त्रविशारदः ॥ योगवित्सर्वजंतूनां रुतवेत्ताभवन्नदा ॥ २३॥
तस्य राज्ञोभवद्भार्या देवलस्यात्मजा शुभा ॥ संनतिर्नामविख्याता कपिलाया भवत्पुरा ॥ २४॥ पितृकार्ये नि
युक्तत्वादभवद्ब्रह्मवादिनी ॥ तया चकार सहितः स राज्यं राजनंदन ॥ २५॥ कदाचिदुद्याने गतस्तया सह पार्थि
वः ॥ ददर्श कीटमिथुनं मंगकलहाकुलं ॥ २६॥ पिपीलिकामनुनयन्परितः कीटकामुकः ॥ पंचबाणेन जित
प्रांगः सगद्गदमुवाचह ॥ २७॥ न त्वया सदृशी लोके कामिनी विद्यते क्वचित् ॥ मध्ये क्षामातिजघनादृहस्ते
भगामिनी ॥ २८॥ सुवर्णवर्णा सुश्रोणी मज्जिका चारुहासिनी ॥ सुलक्षणेत्र रसना गुडशर्करावत्सला ॥ २९॥ भो
क्ष्यसे मयि भुक्ते त्वं स्नासि स्नाने तथा मपि ॥ प्रोषिते सति दीना त्वं क्रुद्धे पि जय चंचला ॥ ३०॥ किमर्थं वद कल्याणि
सरोषवदना स्थिता ॥ सा तमाह सकोपा तु किमालपसि मां शठ ॥ ३१॥ त्वया मोदकचूर्णं तु मां विहाय प्रिया न्यता
प्रमत्तेनयतिक्रांते दिनेन्यास्याः समर्पितं ॥ ३२॥ पिपीलिकउवाच ॥ त्वत्सादृश्यान्मया दत्तामन्यस्यै वरवर्णिनि
॥ तदेकमपराधं मे क्षंतुमर्हसि गामिनी ॥ ३३॥ नैतदेवं करिष्यामि पुनः क्वापीह गामिने ॥ स्पृशामि पादौ सत्येन
प्रसीदप्रणतस्य मे ॥ ३४॥ सूत उवाच ॥ ॥ इति तद्वचनं श्रुत्वा सा प्रसन्नाभवत्ततः ॥ आत्मानमर्पयामास मोह

म०पु०

३१ नायपिपीलिका॥३५॥ब्रह्मदत्तोप्यहो षं तत्तज्ज्ञात्वा विस्मयमागतः॥सर्वसत्वरुतज्ञत्वात्सा वाचक्रपाणिनः
३६॥ ॥इतिश्रीमत्स्यपुराणे पिपीलिकावहासो नाम॥२०॥ ॥सूत उवाच॥ ॥तस्मिन्नेव पुरे जातास्तेतु चक्राह्वया
स्तदा॥वृद्धद्विजस्य दायादा विभ्राजा तिस्मराः पुरा॥१॥धृतिमांस्तत्वदर्शी च विद्याचंडस्तपोत्सुकाः॥
नामतः कर्मतश्चैते सुदरिद्रस्य ते सुताः॥२॥तपसे बुद्धिरभवत्तदा तेषां द्विजन्मनां॥यास्यामः परमां
सु सिद्धिमित्यूचुस्ते द्विजोत्तम॥३॥ततस्तद्वचनं श्रुत्वा सुदरिद्रो महातपाः॥उवाच दीनया वाचा किमेतदिति
पुत्रकाः॥४॥अधर्म एवं विधिवत्पितातान्स्पयोजयत्॥वृद्धं पितरमुत्सृज्य दरिद्रं वनवासिनं॥५॥को
नु धर्मो भविता मह्यं क्रांतिमेव वा॥ऊचुस्ते कल्पिता वृत्तिस्तव तात वरस्वमे॥६॥हन्तमेतत्पुरो राज्ञः स ते दा
स्यति पुष्कलं॥धनं ग्रामसहस्राणि प्रभाते प्रवतस्तवे॥७॥ये विप्रमुख्याः कुरुजांगलेषु व्याधास्तथा दशा
पुरे मृगाश्च॥कालिंजिरे सप्त च चक्रवाका ये मानसे ते च यमत्र सिद्धाः॥८॥इत्युक्त्वा पितरं जग्मुस्ते वनं तप
से पुनः॥वृद्धोपि राजभवनं जगामात्मार्थसिद्धये॥९॥अणुहो नाम वैभ्राजो पंचालाधिपतिः पुरा॥पुत्रा राम
र्थं देवेशं हरिं नारायणं परं॥१०॥आराधयामास विभुं तीव्रव्रतपरायणः॥ततः कालेन महता तुष्टस्त ३१
स्य जनार्दनः॥११॥वरं वरणीष्व भक्तं ते हृदये नेप्सितं नृप॥एवमुक्तस्तु देवेन वव्रे स वरमुत्तमं॥१२॥पुत्रं मे

देहि देवेश महाबलपराक्रमं॥पारगं सर्वविद्यानां धार्मिकं योगिनं परं॥१३॥सर्वसत्वरुतज्ञं मे देहि योगिन
मात्मजं॥एवमस्त्विति विश्वात्मा तमाह परमेश्वरः॥१४॥ब्रयमप्यय योगात्मा स पिपीलिक आगतः॥ये ब्रत
क्रीडमि पुनः रममाणमव स्थितं॥१५॥ततस्सा सन्नतिर्दृष्ट्वा हसंतं शुचिस्मिता॥किमप्याशंक्य मनसा तमपृच्छ
न्नरेश्वरं॥१६॥सन्नतिरुवाच॥॥अकस्मादतिहास्यस्ते किमर्थमिमवल्लभ॥हास्यहेतुं न जानामि यदकाले कृतं
त्वया॥१७॥सूत उवाच॥अवगगजः पुत्रोपि स पिपीलिकभाषितं॥रागादेवमुत्सन्नमेतथास्य वरानने॥१८
न चास्य कारणं किंचिद्धास्यहेतोः शुचिस्मिते॥न चाप्यन्यत्ततद्देवी प्राहालीकमिदं वचः॥१९॥अहमेवावहसि
तान जीविष्ये न याधुना॥कथं पिपीलिकालापं मर्त्यो वेत्ति नरेश्वर॥२०॥त्वयाहमेव हि कथं हसिता किमतः
परं॥ततो निरुत्तरो राजा जिज्ञासुस्तत्सुरोत्तरहरेः॥२१॥आस्ते नियमस्थो सप्तरात्रमकल्मषः॥स्वप्ने प्राह हृषी
केशः प्रभाते पर्यटन्पुरीं॥२२॥वृद्धद्विजो यस्तवाक्यं सर्वं तस्य त्वयोपतः॥इत्युक्त्वांतर्दधे विष्णुः प्रभाते पनृपः
पुरात्॥२३॥निर्गच्छन्मंत्रिसहितः सभार्यो वृद्धमग्रतः॥ततस्तं वृद्धमापांतं तं हदंसहदर्शह॥२४॥ब्राह्मण
उवाच॥ये विप्रमुख्याः कुरुजांगलेषु व्याधास्तथा दशपुरे मृगाश्च॥कालिंजिरे सप्त च चक्रवाका ये मानसे ते
च यमत्र सिद्धाः॥२५॥सूत उवाच॥॥इत्याकर्ण्य वचस्तस्य सपपात शुचान्वितः॥जातिस्मरत्वमस्तोच मंत्रिव

रावुनौ॥२६॥कामरूपास्वभणेता चवाजनेयस्तुवालकः॥पंचालंइतिग्नालेषुविश्रुतसर्वशास्त्रवित्॥२७॥कंविस्म
याच्छ्रद्धमाहात्म्यमखिलंद्यपुनःपुनंततस्तस्मैधनंदत्वाप्रभूतग्रामसंयुतं॥२८॥विसृज्यब्राह्मणंतंचदृढंधन
मुदान्वितं॥आत्मीयंनृपतिःपुत्रंनृपलक्षणसंयुतं॥२९॥विष्वक्सेननाभिधानंतुराजाराज्येभ्यषेचयत्॥मा
नसेमिलिताःसर्वेततस्तेयोगिनांवराः॥३०॥ब्रह्मदत्तादयस्तस्मिन्मिलितःजनस्तोविमत्सराः॥संनतिश्चापित्द
ष्टामयैतत्किलकारितं॥३१॥राजन्योगफलंसर्वंयदेतद्भिलप्यते॥तप्येतिप्राहराजातुपुनस्तामभिनंद
यन्॥३२॥त्वत्प्रसादादिदंसर्वंमयैतत्प्राप्यतेफलं॥ततस्तेयोगमास्थायसर्वेविमनोमयं॥३३॥ब्रह्मरंध्रेणप
रंपदमापुस्तपोबालात्॥एवमायुर्धनंविद्यांस्वर्गंमोक्षंसुखानिच॥३४॥प्रयच्छंतिसुतान्राज्यंनृणांप्री
ताःपितामहाः॥यइदंपितृमाहात्म्यंब्रह्मदत्तस्यचद्विजाः॥३५॥द्विजेभ्यःश्रावयेद्योवाशृणोत्यपठेतवा॥
कल्पकोटिशतंसाग्रंब्रह्मलोकेमहीयते॥३६॥इतिश्रीमत्स्यपुराणेश्राद्धकल्पेपितृमाहात्म्यंनाम॥
ऋषयऊचुः॥कस्मिन्कालेचतच्छ्राद्धमनंतफलदंभवेत्॥कस्मिन्वासरभागेतुश्राद्धकृतश्राद्धमाचरेत्॥१॥
सूतउवाच॥॥अपराह्णेतुसंप्राप्तेअभिजिद्रौहिणोदये॥यत्किंचिद्दीयतेतत्रतदक्षयमुदाहृतं॥२॥तीर्था
निश्राद्धानिपितृणांवल्लभानिच॥नामतस्तानिवक्ष्यामिसंक्षेपेणद्विजोत्तमाः॥३॥पितृतीर्थंगयानामसर्वती

र्थवरंशुभं॥तत्रास्तेदेवदेवेशःस्वयमेवपितामहः॥४॥तत्रैषापितृभिर्गीतागाथागंगायानतीप्सुभिः॥एष्टव्या
बहवःपुत्रायद्येकोपिगयांव्रजेत्॥५॥यजेतवाश्वमेधेननीलंवावृषमुत्सृजेत्॥तथावाराणसीपुण्यापि
तृणांवल्लभासदा॥६॥तत्राविमुक्तसान्निध्यंभुक्तिमुक्तिफलप्रदं॥पितृणांवल्लभंतद्वत्पुण्यंचविमलेश्वरं
॥७॥पितृतीर्थंप्रयागंतुसर्वकामफलप्रदं॥वटेश्वरस्तुभगवान्माधवेनसमन्वितः॥८॥योगनिद्राशयस्त
त्रसदावसतिकेशवः॥दशाश्वमेधिकंपुण्यंगंगाद्वारंतथैवच॥९॥नंदाथललितातद्वत्तीर्थंमायापुरीशुभं
॥तथामित्रपदंनामततःकेदारमुत्तमं॥१०॥गंगासागरमित्याहुःसर्वतीर्थमयंशुभं॥तीर्थंब्रह्मसरस्त
द्वच्छतद्रुसलिलेह्रदे॥११॥तीर्थंतुनैमिषंनामसर्वतीर्थफलप्रदं॥गंगोद्भेदस्तुगोमत्यांयत्रप्रादुर्भूतःसना
तनः॥१२॥तथायज्ञवराहस्तुदेवश्चशूलभृत्॥यत्रतत्काचनद्वारमष्टादशभुजोहरः॥१३॥नेमिस्तुहरि
चक्रस्यशीर्णायत्राभवत्पुरा॥तदेवनैमिषारण्यंसर्वतीर्थनिषेवितं॥१४॥देवदेवस्यतत्रापिवाराहस्यचद
र्शनं॥यःप्रयातिसपूतात्मानारायणपदंव्रजेत्॥१५॥कृतशौचंमहापुण्यंसर्वपापनिषूदनं॥यत्रास्ते
नरसिंहस्तुस्वयमेवजनार्दनः॥१६॥तीर्थमिक्षुमतीनामपितृणांवल्लभंसदा॥संगमेयत्रतिष्ठंतिगंगा
याःपितरःसदा॥१७॥कुरुक्षेत्रंमहापुण्यंसर्वतीर्थसमन्वितं॥तथाचसरयूःपुण्यासर्वदेवनमस्कृता॥१८॥

म०पु०
३२

इरावती नदी तद्वत् पितृतीर्थाधिवासिनी ॥ यमुना देविका काली चंद्रभागा दृषद्वती ॥१९॥ नदी वेयुमती पुण्यापा
रा वेत्रवती तथा ॥ पितृणां वल्लभा ह्येताः श्राद्धे कोटिगुणा न ता ॥२०॥ जंबूमार्गं महापुण्यं यत्र स्वर्गो हि लक्ष्यते ॥
अद्यापि पितृतीर्थं तत् सर्वकामफलप्रदं ॥२१॥ नीलकुंडमिति ख्यातं पितृतीर्थं द्विजोत्तमाः ॥ तथा भद्रसरः पुण्यं
सरो मानसमेव च ॥२२॥ मंदाकिनी तथा छोदा विपाशाथ सरस्वती ॥ पूर्वमित्रपदं तद्वद्वैद्यनाथं महाफलं ॥
२३॥ क्षिप्रा नदी महाकालस्तथा कालिंजरं शुभं ॥ वंशोद्भेदं फलोद्भेदं गंगोद्भेदं महाफलं ॥२४॥ भद्रेश्वरं वि
ष्णुपदं नर्मदाद्वारमेव च ॥ गयापिंडप्रदानस्य समान्याहुर्महर्षयः ॥२५॥ एतानि पितृतीर्थानि सर्वपाप
हराणि च ॥ स्मरणादपि लोकानां किमु श्राद्धकृतां नृणां ॥२६॥ ओंकारं पितृतीर्थं च कावेरी कापिलादकं मले
भेदश्चंडवेगायास्तथैवामरकंटकः ॥२७॥ कुरुक्षेत्राच्छतगुणं तस्मिन् स्नानादिकं भवेत् ॥ शुक्रतीर्थं च वि
ख्यातं तीर्थं सोमेश्वरं ॥२८॥ सर्वव्याधिहरं पुण्यं शतकोटिफलप्रदं ॥ श्राद्धदाने तथा ब्रह्मन् स्नाने ध्याये जपे संवि
धौ ॥२९॥ कायावरोहणं नाम तथा चर्मण्वती नदी ॥ गोमती वारुणा तद्वत्तीर्थमौशनसं परं ॥३०॥ भैरवं भृगुतुं
गं च गौरतीर्थमनुत्तमं ॥ तीर्थं वैनायकं नाम वस्त्रेश्वरमतः परं ॥३१॥ तथा पापहरं नाम पुण्या च तपती न
दी ॥ तापी मूलं पयोष्णी च पयोष्णीसंगमस्तथा ॥३२॥ महाबोधिः पाटला च नागतीर्थमवंतिका ॥ तथा वेणु

राम०
३२

नदी पुण्या महाशालं तथैव च ॥३३॥ महारुद्रं महालिंगं दशार्णा च नदी शुभा ॥ शतरुद्रा शताह्वा च तथा
विश्वपदं परं ॥३४॥ अंगारवाहिका तद्वत् नदौ तौ शोणघर्घरौ ॥ कालिका च नदी पुण्या वितस्ता च नदी तथा
३५॥ एतानि पितृतीर्थानि शस्यंते स्नानदानयोः ॥ श्राद्धमेतेषु यद्दत्तं तदनंतफलं स्मृतं ॥३६॥ द्रोणी वट
नदी धारा सरित्क्षीरनदी तथा ॥ गोकर्णं गजकर्णं च तथा च पुरुषोत्तमः ॥३७॥ द्वारकं कृष्णतीर्थं च तथा
र्बुदसरस्वती ॥ नदी मणिमती नाम तथा च गिरिकर्णिका ॥३८॥ धूतपापं तथा तीर्थं समुद्रो दक्षिणस्त
था ॥ एतानि पितृतीर्थानि श्राद्धमानंतमश्नुते ॥३९॥ तीर्थं मेघकरं नाम स्वयमेव जनार्दनः ॥ यत्र शार्ङ्गधरो
विष्णुर्मेखलायामवस्थितः ॥४०॥ तथा मंदोदरीतीर्थं तत्र चंपा नदी तथा ॥ तथा सामलनाथं च महाशाल न
दी तथा ॥४१॥ चित्रकूटं चक्रकोटं तथा जल्पेश्वरं हृदः ॥ अर्जुनं त्रिपुरं चैव सिद्धेश्वरमतः परं ॥४२॥
श्रीशैलं शूकरं तीर्थं नारसिंहमतः परं ॥ महेंद्रं च तथा पुण्या तथा श्रीकुंकुसंज्ञितं ॥४३॥ एते रैवहकृते श्रा
द्धमनंतफलदं भवेत् ॥ दर्शनादेव पापानि हरंति च नसंशयः ॥४४॥ तुंगभद्रा नदी पुण्या त्रिसंध्या तीर्थमु
त्तमं ॥ एतत्तीर्थं महापुण्यं तथा भीमरथी सरित् ॥४५॥ भीमेश्वरं कृष्णवेणा कावेरी वंजुला नदी ॥ गोदा
वरी पुण्यविसंध्या तीर्थमुत्तमं ॥४६॥ तीर्थं त्रैयंबकं नाम सर्वतीर्थनमस्कृतं ॥ यत्रास्ते भगवानीशः स्वय

म॰पु॰ ३४

मेवत्रिलोचनः॥४७॥श्राद्धमेतेषुतीर्थेषुदत्तंकोटिगुणंभवेत्॥स्मरणादपिपापानिनश्यंतिशतधाद्वि
जः॥४८॥श्रीपर्णीचनदीपुण्यादानतीर्थमनुत्तमं॥तथामत्स्यनदीकाशिवाधारातथैवच॥४९॥ना
वतीर्थंचविख्यातंपंचतीर्थंचशाश्वतं॥पुण्यंपरामेश्वरंतद्वदेलापुरमलंपुरं॥५०॥श्रृंगसूतिंचविख्यातमाकां
डंकमलवकं॥ताम्रनाकेश्वरंतद्वदेकाम्रकमतःपरं॥५१॥गोवर्धनंहरिश्चंद्रंसरःपुण्यंपृथूदकं॥सह
स्राक्षंहिरण्याक्षंतथाचकदलीनदी॥५२॥रामत्रिताजिनाचैवतथासौमित्रिसंगमं॥इंद्रकीलमहाना
दंतथाचप्रियमेलकं॥५३॥एतान्यपिसदाश्राद्धेप्रशस्तान्यधिकानितु॥एतेषुसर्वदेवानांसान्निध्यंप
व्यतेयत॥५४॥दानमेतेषुसर्वेषुभवेत्कोट्यधिकंयतः॥वस्रूदाचनदीपुण्यातथासिद्धवनंशुभं॥५५॥
तीर्थपाशुपतंनामनदीपर्वतिकातथा॥श्राद्धमेतेषुदत्तंकोटिशतोत्तरं॥५६॥तथैवपितृतीर्थंतुपत्रगोदा
वरीनदी॥पुवालिंगसहस्रेणसर्वतःसमलावृता॥५७॥जामदग्न्यस्यतीर्थंतुक्रमादेतद्वदुत्तमं॥प्रातीक
स्मनयाज्ञित्वापत्रगोदावरीनदी॥५८॥तत्रतीर्थंहव्यकव्यानामप्सरोयुगसंज्ञितं॥श्राद्धाग्निकार्यदानेषुतथा
कोटिशताधिकं॥५९॥तथासहस्रलिंगंचराघवेश्वरमुत्तमं॥इंद्रफेनानदीपुण्यायत्रेंद्रःपतितःपुरा॥६०
निहत्यनमुचिंशक्रस्तपसास्वर्गमापुयात्॥तत्रदत्तंनरैःश्राद्धमनंतफलदंभवेत्॥६१॥तीर्थंतुपुष्करंना

राम ३४

मशालिग्रामस्तथैवच॥शोणपादस्तुविख्यातोयत्रवैश्वानरालयं॥६२॥तीर्थंसारस्वतंनामस्वामितीर्थंतथै
वच॥मलंदस्तनदीपुण्याकौशिकीचंद्रिकानदी॥६३॥विदर्भाचापवेणाचपयोष्णीप्राङ्मुखापुनः॥का
वेत्राकायीतयाजालंधरोगिरिः॥६४॥एतेषुश्राद्धतीर्थेषुश्राद्धमानंत्यमश्नुते॥लोहदंडंतथातीर्थंचित्रकू
टस्तथैवच॥६५॥विंध्ययोगेश्वरंगंगातयानद्यास्तटंशुभं॥कुब्जाम्रंतुतथातीर्थंवंशीपुलिनंतथा॥६६॥
संसारमोचनंतीर्थंतथैवऋणमोचनं॥एतेष्वपिचतीर्थेषुश्राद्धमानंत्यमश्नुते॥६७॥अट्टहासंतथातीर्थं
गौतमेश्वरमेवच॥तथावसिष्ठतीर्थंतुहारीतंतुततःपरं॥६८॥ब्रह्मतीर्थंकुशावर्तंहयतीर्थंतथैवच॥
स्तम्भतीर्थंचविख्यातंमानंत्यश्राद्धदानया॥६९॥तीर्थंवेदशिरोनामतथैवोघवतीनदी॥तीर्थंचवसुस्नाम
छागलांडस्तथैवच॥७०॥एतेषुश्राद्धदातारःप्रयांतिपरमांगतिं॥तथाचबदरीतीर्थंगणतीर्थंतथैवच
॥७१॥जयंतंविजयंचैवशुक्रतीर्थंतथैवच॥श्रीपतेश्चतथातीर्थंतीर्थंरैवतकंतथा॥७२॥तथैवसार
दातीर्थंभद्रकालेश्वरंतथा॥वैकुंठतीर्थंचपरंभीमेश्वरमथापिवा॥७३॥एषुश्राद्धप्रदातारःप्रयांतिगतिं॥
तीमानवग्रहंनामकरवीरपुरंतथा॥७४॥सप्तगोदावरीतीर्थंसर्वतीर्थेश्वरेश्वरं॥जलेश्वरंचविख्यातंगो
रीशिखरमेवच॥७५॥नकुलीशस्यतीर्थंतुकर्दमालंतथैवच॥दंडीमुंडीकरंतद्वत्पुंडरीकपुरंतथा॥७६

म० पु० तत्र श्राद्धं प्रदातव्यं फलमानंत्यमीप्सुभिः ॥ एषउद्देशतः प्रोक्तस्तीर्थानां संग्रहो मया ॥७७॥ वागीशोपि नश
३५ क्नोति गदितुं किमु मानवः ॥ सत्यं तीर्थं दया तीर्थं तीर्थमिंद्रियनिग्रहः ॥७८॥ वर्णाश्रमाणां गेहेपि तीर्थं तु समु
दाहृतं ॥ एतत्तीर्थेषु यच्छ्राद्धं तत्कोटिगुणसंमितं ॥७९॥ यस्मात्तस्मात्प्रयत्नेन तीर्थे श्राद्धं समाचरेत् ॥
प्रातःकालो मुहूर्त्तास्त्रीन् पूर्वाह्णस्तावदेव तु ॥८०॥ मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततः परं ॥ सायाह्न
स्त्रिमुहूर्त्तः स्यात् श्राद्धं तत्र न कारयेत् ॥८१॥ राक्षसी नाम सा वेला गर्हिता सर्वकर्मसु ॥ अह्नो मुहूर्त्ता विख्याता
दश पंच च सर्वदा ॥८२॥ तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृतः ॥ मध्याह्ने सर्वदा यस्मान्मंदीभवति भा
स्करः ॥८३॥ तस्मादनंतफलदस्तदारंभो विधीयते ॥ मध्याह्नः खड्गपात्रं तु तथा नेपालकंबलः ॥८४॥ रूप्यो
दर्भास्तिलगावो दौहित्रश्चाष्टमः स्मृतः ॥ पापं कुत्सितमित्याहुस्तस्य संतापकारिणः ॥८५॥ अष्टावेते यतस्तस्मा
त्कुतपा इति विश्रुताः ॥ ऊर्ध्वं मुहूर्त्तात्कुतपाद्यन्मुहूर्त्तचतुष्टयं ॥८६॥ मुहूर्त्तपंचकं चैतत्स्वधाभवनमिष्यते ॥
विष्णोर्देहसमुद्भूताः कुशाः कृष्णास्तिलास्तथा ॥८७॥ श्राद्धस्य लक्षणं चैतत्सर्वमाहुर्दिवौकसः ॥ तिलोदकांज
लिर्देयो जलस्थैस्तीर्थवासिभिः ॥८८॥ सदर्भहस्तेनैकेन श्राद्धसेवनमिष्यते ॥ पुण्यं पवित्रमायुष्यं सर्वपापवि राम०
नाशनं ॥८९॥ पुरा मत्स्येन कथितं तीर्थश्राद्धानुकीर्त्तनं ॥ शृणोति यः पठेद्वापि श्रीमान्संजायते नरः ॥९०॥ श्रा ३५

द्धकाले च वक्तव्यं तथा तीर्थनिवासिभिः ॥ सर्वपापोपशांत्यर्थमलक्ष्मीनाशनं परं ॥९१॥ इदं पवित्रं यशसो नि
धानं चैतन्महापापहरं च पुंसां ॥ ब्रह्मार्करुद्रैरभिपूजितं च श्राद्धस्य माहात्म्यमुशंति तज्ज्ञाः ॥९२॥ ॥ इति
श्रीमत्स्यपुराणे श्राद्धकल्पो नाम ॥ ॥ ऋषय ऊचुः ॥ सोमः पितृणामधिपः कथं शास्त्रविशारद ॥ तद्वंश्या
ये च राजानो बभूवुः कीर्त्तिवर्द्धनाः ॥१॥ सूत उवाच ॥ ॥ आदिष्टो ब्रह्मणा पूर्वमत्रिः सर्गविधौ पुरा ॥ अ
नुत्तमं नाम तपः सृष्ट्यर्थं तप्तवान्प्रभुः ॥२॥ यदानंदकरं ब्रह्म जगतः क्लेशनाशनं ॥ ब्रह्मविष्ण्वर्करुद्राणा
मभ्यंतरमतींद्रियं ॥३॥ शांतकृच्छ्रात्मनसांत दत्तनयनेस्थितं ॥ महां तं तपसा विप्राः परमानंदकारकं ॥४
कस्मादुमापतेः सार्द्धमुमया तदधिष्ठितं ॥ दृष्ट्वा चाष्टमांशेन तस्मात्सोमोभवच्छिशुः ॥५॥ अथ सुस्राव नेत्रा
भ्यां तत्तेजश्चांबुसंभवं ॥ दीपयद्विश्वमखिलं ज्योत्स्नया सचराचरं ॥६॥ तद्दिशो जगृहुः स्त्रीरूपेण सुतेच्छ
या ॥ गर्भोभूत्तोदरे तासां आस्थितश्चायतत्रयं ॥७॥ आशास्तं मुमुचुर्गर्भमसमर्था धारणे ततः ॥ समादाय
य तं गर्भमेकीकृत्य चतुर्मुखः ॥८॥ युवानमकरोद्ब्रह्मा सर्वायुधधरं नरं ॥ स्यंदनेथ सहस्राश्वे देवशक्तिम
ये प्रभुः ॥९॥ आरोप्य लोकमनयदात्मनः स पितामहः ॥ ततो ब्रह्मर्षिभिः प्रोक्तमस्मत्स्वामी भवत्वयं ॥१०॥
ऋषिभिर्देवगंधर्वैरौषधीभिस्तथैव च ॥ तुष्टुवुः सोमदैवत्यैर्ब्रह्माद्यामंत्रसंग्रहैः ॥११॥ स्तूयमानस्य तस्या

म०पु०
३६

नूदधिको धामसंचयः॥ तेजोवितानादजवतस्तु विदिव्यौषधीगणः॥१२॥ तद्दीप्तिरधिका तस्माद्रात्रौ भवति
सर्वदा॥ तेनौषधीशः सोमोभूत् द्विजेशश्च निगद्यते॥१३॥ वेदधामरसश्चापि यदिदं चंद्रमंडलं॥ क्षीय
ते वर्द्धते चैव शुक्ले कृष्णे च सर्वदा॥१४॥ विंशतिश्च तथा सप्त दक्षः प्राचेतसो ददौ॥ रूपलावण्यसंयुक्ताः
स्तस्मै कन्याः सुवर्चसः॥१५॥ ततः पद्मसहस्राणां सहस्राणि दशैव तु॥ तपश्चचार शीतांशुर्विष्णुध्यानैक
तत्परः॥१६॥ ततस्तु तुष्टभगवांस्तस्मै नारायणो हरिः॥ वरं वृणीष्व चोवाच परमात्मा जनार्दनः॥१७॥ ततो
वव्रे वरं सोमः शक्रलोके व्रजाम्यहं॥ प्रत्यक्षमेव भोक्तारो भवंतु मम मंदिरे॥१८॥ राजसूये सुरगणा ब्र
ह्माद्याः संतु मे द्विजाः॥ रक्षपालः शिवोस्माकमास्तां शूलधरो धरः॥१९॥ तथेत्युक्तः समाजह्रे राजसूयं तु वि
ष्णुना॥ होतात्र भृगुरध्वर्युर्ब्रह्माभूच्चतुर्मुखः॥२०॥ ब्रह्मत्वमगमत्तस्य उपद्रष्टा हरिः स्वयं॥ सदस्याः सन
काद्यास्तु राजसूयविधौ स्मृताः॥२१॥ चमसाध्वर्यवस्तत्र विश्वेदेवा दशैव तु॥ त्रैलोक्यं दक्षिणा तेन ऋत्वि
ग्भ्यः प्रतिपादिता॥२२॥ ततः समाप्तेवभृथे तद्रूपालोकनेप्सवः॥ कामबाणाभितप्तांग्यो नवदेव्यः सिषेवि
रे॥२३॥ लक्ष्मीर्नारायणं त्यक्त्वा सिनीवाली च कर्दमं॥ द्युतिर्विभावसुं तद्वत् पुष्टिर्धातारमव्ययं॥२४॥ प्रभा
करं प्रभा त्यक्त्वा हविष्मंतं कुहूः स्वयं॥ कीर्तिर्जयंतं भर्तारं वसुर्मारीचिकश्यपं॥२५॥ धृतिस्त्यक्त्वा पतिं देवं सो

राम०
३६

ममेवाभजत्तदा॥ स्वकीया इव सोमोपि कामयामास तास्तदा॥२६॥ एवं कृतोपचारस्य तासां भर्तृगणस्तदा।
न शशाकापचाराय शापैः शस्त्रादिभिः पुनः॥२७॥ तथाप्यभजत्त्रैविभुं दशधा भावयन्दिशः॥ सोमः प्राप्यमै
श्वर्यमपहृतं सुरलोकैकनाथत्वमाप्तः स तपसा तदा॥२८॥ कदाचिदुद्यानगतामपश्यदनेकपुष्पाभरणा
पशोभां॥ बृहन्नितंबस्तनभारमंदपरां पुष्पावतंसामतिनिर्मलांगीं॥२९॥ भार्यां च तां देवगुरोरनंगबाणा
भिरामायतचारुनेत्रां॥ तारां सताधिपतिः स्मरार्त्तः केशेषु जग्राह विविक्तभूमौ॥३०॥ सापि स्मरार्त्ता स
ह तेन रेमे तद्रूपकांत्याहृतमानसेव॥ चिरं विहृत्यापि जगाम तारां विधुर्गृहीत्वा च स्वगृहं ततोपि॥३१॥
न तृप्तिरासीत्स्वगृहे पितस्य तारानुरक्तस्य सुखागमेषु॥ बृहस्पतिस्तद्विरहाग्निदग्धस्तद्ध्यानैक
मना बभूव॥३२॥ शशाक शापं न च दातुमस्मै न मंत्रशस्त्राग्निविषैरशेषैः॥ तस्यापकर्तुं विविधै
रुपायैर्नैवापचारैरपि वागधीशः॥३३॥ स याचयामास ततस्तु दैन्यात्सोमं स्वभार्यार्थमनंगतप्तः॥ स या
च्यमानोपि ददौ न तारां बृहस्पतेस्तत्सुखपाशबद्धः॥३४॥ महेश्वरेणाथ चतुर्मुखेन साध्यैर्मरुद्भिः सह लो
कपालैः॥ ददौ यदा तां न कथंचिदिंदुस्तदा शिवः क्रोधपरो बभूव॥३५॥ यो वामदेवः प्रथितः पृथिव्याम
नेकरुद्रार्चितपादपद्मः॥ ततः सशिष्यो गिरिशः पिनाकी बृहस्पतिस्नेहवशानुबद्धः॥३६॥ धनुर्गृहीत्वा

म॰पु॰
३७

जगवंपुरादैरिर्जगाम भूतेश्वरसिद्धजुष्टः॥युद्धाय सोमेन विशेषदीप्तस्तृतीयनेत्रानलभीमवक्त्रः॥३७॥स
हैवजग्मुसगणेशकोटोघैर्विशद्यतुःषष्टिरथास्त्वयुक्त॥ पक्षेश्वरःकोटिशतेरनेकैर्युतोन्वगात्स्यंदनसं
स्थितानां॥३८॥ वेतालयक्षामरकिन्नराणांपद्मेनचैकेनतथार्बुदेन॥लक्षैस्त्रिभिर्द्वादशभीरथानां
सोमोप्यगात्तत्रविवृद्धमन्युः॥३९॥ नक्षत्रदैत्यासुरसैन्ययुक्तःशनैश्चरांगारकवृद्धतेजाः॥जग्मुर्न
यं सप्ततथैवलोकाश्चराचरद्वीपसमुद्रगर्भाः॥४०॥ससोमसेनास्यगमत्प्रिनाकीगृहीतदीप्तास्त्रविशाल
वह्निः॥अपाम्नवत्त्तीपृणतीमसेनासैन्यास्तत्स्यापिमहाहवोसो॥४१॥अशेषसत्वक्षयकृत्प्रवृद्धस्तीक्ष्णा
युधास्त्रज्वलनैकरूपः॥शस्त्रास्त्रघातोत्कमशेषसैन्यंक्षयंजगामक्षतमुग्रतीक्ष्णैः॥४२॥पतंतिशस्त्राणि
तयोज्ज्वलानिस्वर्भूमिपाताळतलंविहंति॥रुद्रःकोपात्ब्रह्मशीर्षंमुमोचसोमोपिसोमास्त्रममोघवी
र्यं॥४३॥तयोर्निपातेनचदिग्भूम्योरथांतरिक्षस्यचभीतिरासीत्॥ततस्तुयुद्धेजगतःक्षयायप्रवृद्ध
यानेचपितामहोपि॥४४॥अंतःप्रविश्यापतयाकथंचिन्निवारयामाससुरैःसहैव॥अकारणंकिंक्ष
यकृज्जनानांसोमत्वयापीदमकार्यकार्यं॥४५॥यस्मात्परस्त्रीहरणायसोमत्वयाकृतंयुद्धमिदंचभि
न्नं॥पापग्रहस्त्वंभविताजनेषुशांतोप्यलंरस्तुनमभीप्सितंते॥४६॥भार्यामिमामर्पयवाक्पतेस्त्वंनचा

राम॰
३७

पमानोस्तिपरस्वहारे॥४६॥सूतउवाच॥॥तथेतिचोवाचहिमांशुमाली॥जीवःप्रदायपदक्रामदतःप्रशांतः॥बृह
स्पतिस्तामपगृह्यतारांहृष्टोजगामस्वगृहंसरुद्रः॥४७॥॥इतिश्रीमत्स्यपुराणेसोमवंशगारभ्याने॥॥सूतउ
वाच॥॥ततःसंवत्सरस्यांतेद्वादशादित्यसन्निभः॥दिव्यपीतांबरधरोदिव्याभरणभूषणः॥१॥तारोदरा
द्विनिःक्रांतोद्वादशादित्यसंनिभः॥सर्वार्थशास्त्रवितधीमानूसर्वशास्त्रप्रवर्त्तकः॥२॥नामयद्राजपुत्री
पियंविश्रुतंविश्ववेद्यकं॥राज्ञःसोमस्यपुत्रत्वात्तस्यपुत्रोबुधःस्मृतः॥३॥जातमात्रःसतेजांसिसर्वा
ण्येवाजयत्बली॥ब्रह्माद्यास्तत्रचाजग्मुर्देवादेवर्षिभिःसह॥४॥बृहस्पतिगृहेसर्वेजातकर्मोत्सवो
दिताः॥अपृछंस्तेसुरास्तारांकेनजातःकुमारकः॥५॥ततःसाजज्जितातेषांनकिंचिदवदत्तदा॥पुनः
पुनस्तदापृष्टालज्जयंतीवरांगना॥६॥सोमस्येतिचिरादाहततोग्रहात्विधुःसुतं॥बुधइत्यकरोन्नामप्रा
दाद्राज्यंचभूतले॥७॥अभिषेकंततःकृत्वाप्रधानमकरोद्विभुः॥ग्रहसाम्यंप्रदायाथब्रह्माब्रह्मर्षिसंयु
तः॥८॥पश्यतांसर्वदेवानांतत्रैवांतरधीयत॥इलोदरेचधर्मिष्ठंबुधःपुत्रमजीनत॥९॥अश्वमेधश
तंसाग्रंमकरोद्यःस्वतेजसा॥पुरूरवाइतिख्यातःसर्वलोकनमस्कृतं॥१०॥हिमवच्छिखरेरम्येसमा
राध्यजनार्दनं॥लोकैश्वर्यमगाद्राजासप्तद्वीपपतिस्तदा॥११॥केशिप्रभृतयोदैत्याःकोटिशोयेनधा

म०पु० तिता:॥ उर्वशीयस्यपत्नीत्वमगमद्रूपमोहिता॥१२॥ सप्तद्वीपावसुमतीसशैलवनकानना॥ धर्मेणापालि
३८ तातेनसर्वलोकहितैषिणा॥१३॥ चामरग्राहिणीकीर्त्तिःसदाचैवांगवाहिकी॥ विष्णुप्रसादाद्देवेंद्रोददाव
र्द्धासनंतदा॥१४॥ धर्मार्थकामधर्मेणसमामेवाभ्यपालयत्॥ धर्मार्थकामाःसंद्रष्टुंआजग्मुःकौतुकात्पुरा॥
१५॥ जिज्ञासवस्तच्चरितंकथंपश्यतिनःसमं॥ भक्त्याचक्रेततस्तेषामर्घपाद्यादिकंनृपः॥१६॥ आसनत्रयमानी
यदिव्यंकनकभूषितं॥ निवेश्याथाकरोत्पूजामीषद्धर्मेधिकांपुनः॥१७॥ जग्मतुस्तेतुकामार्थावतिकोपेनतंप्र
ति॥ अर्थःशापमदात्तस्मैलोभात्त्वंनाशमेष्यसि॥१८॥ कामोप्याहतवोन्मादोभविता गंधमादने॥ कुमारवन
माश्रित्यावियोगादुर्वशीभवात्॥१९॥ धर्मोप्याहचिरायुष्ट्वंधार्मिकश्चभविष्यसि॥ संततिस्तवराजेंद्रयावच्चंद्रार्कं
२०॥ शतशोवृद्धिमायातुननाशंभुवियास्यति॥ इत्युक्त्वांतर्दधुःसर्वेराजाराज्यंतदान्वभूत्॥२१॥ अहन्यहनि
देवेंद्रंद्रष्टुंयातिसराजराट्॥ कदाचिदारुह्यरथंदक्षिणांबरचारिणा॥२२॥ सार्धमर्केणसोपश्यन्नीयमानम
थांबरा॥ केशिनाम्नादेवेंद्रंचित्रलेखामथोर्वशीं॥२३॥ तंविनिर्जित्यसमरेविविधायुधपाणिना॥ बुधपुत्रेणा राम०
वायव्यमस्त्रंमुक्त्वाचपार्थिवा॥२४॥ तथाशक्रोपिसमरेयेनवज्रीविनिर्जितः॥ मित्रत्वमगमद्देवैरदादिंद्राय ३९
चोर्वशीं॥२५॥ ततःप्रभृतिमित्रत्वमगमत्पाकशासनः॥ सर्वलोकातिशायित्वंबलमूर्जंयशःश्रियं॥२६॥

प्रायवज्रीतुसंतुष्टोगायतान्भरतेनच॥ सापुरूरवसःप्रीत्यैगायंतीचरितंमहत्॥२७॥ लक्ष्मीस्वयंवरंना
मभरतेनप्रवर्तितं॥ मेनकामुर्वशींरंभांनृत्यतेतितदादिशं॥२८॥ ननर्तसलयंतत्रलक्ष्मीरूपेणचोर्वशी॥
सापुरूरवसंदृष्ट्वानृत्यंतीकामपीडिता॥२९॥ विस्मृताभिनयंसर्वंयत्पुराभरतोदितं॥ शशापभरतःक्रोधा
द्वियोगादस्यभूतले॥३०॥ पंचपंचाशदब्दानिलतासूक्ष्माभविष्यसि॥ पुरूरवाश्चसानंदंतत्रैवानुभविष्य
सि॥३१॥ ततस्तामुर्वशींगत्वाभर्तारमकरोच्चिरं॥ शापांतेभरतस्याथउर्वशीबुधसूनुतः॥३२॥ अजीजनत्सु
तानष्टौनामतस्तान्निबोधत॥ आयुर्दृढायुरश्वायुर्धनायुर्धृतिमान्वसुः॥३३॥ शुचिविद्यःशतायुश्चसर्वेदिव्यब
लौजसः॥ आयुषोनहुषःपुत्रोवृद्धशर्मातथैवच॥३४॥ रजिर्दंभोविपाप्माचवीराःपंचमहारथाः॥ रजेःपुत्र
शतंजज्ञेराजेयाइतिविश्रुताः॥३५॥ रजिराराधयामासनारायणमकल्मषं॥ तपसातोषितोविष्णुर्वरंप्रा
दान्महीपते॥३६॥ देवासुरमनुष्याणामभूत्सविजयीतदा॥ अथदेवासुरंयुद्धमभूद्वर्षशतत्रयं॥३७॥
प्रह्लादशक्रयोर्भीमंनकश्चिद्विजयीतयोः॥ ततोदेवासुरैःपृष्टःप्राहदेवश्चतुर्मुखः॥३८॥ अनयोर्विजयी
कःस्यादजिर्जेतिसोब्रवीत्॥ जयायप्रार्थितोराजासहायस्त्वंभवस्वनः॥३९॥ दैत्यान्प्राहयदिस्वामीवोभवामि
ततस्त्वलं॥ नासुरैःप्रतिपन्नंतत्प्रतिपन्नंसुरैस्तदा॥४०॥ स्वामीभवत्वमस्माकंसंग्रामेनाशयद्विषः॥ ततोविना

म॰पु॰ ३९

न्नीताः सर्वे येऽवध्यावज्रपापिना॥४१॥पुनस्त्वमगमन्नष्टस्तस्येंद्रः कर्मणा विभुः देवैश्चायतदाराज्यं जगामतपसे
रजिः॥४२॥रजिपुत्रैस्तथाछिन्नं बलादिंद्रस्य वैभवं॥यज्ञभागं तु राज्यं च तत्तोगुणबलान्वितैः॥४३॥राज्या
द्भ्रष्टस्तथा शक्रो रजिपुत्रैर्निपीडितः॥प्राहवाचस्पतिर्दीनः पीडितोस्मि रजेः सुतैः॥४४॥न यज्ञभागो राज्यं
च राजेया नां बृहस्पते॥राज्यलाभाय त्वं यत्नं विधत्स्व धिषणाधिप॥४५॥ततो बृहस्पतिः शक्रमकरोद्बलदर्पितं॥ग्र
हशांतिविधानेन पौष्टिकेन च कर्मणा॥४६॥गत्वाथ मोहयामास रजेः पुत्रान्बृहस्पतिः॥जिनधर्मं समास्था
य वेदबाह्यं स वेदवित्॥४७॥वेदत्रयीपरिभ्रष्टांश्चकार धिषणाधिपः॥वेदबाह्यान्परिज्ञेयहेतुवादसमन्विता
न्॥४८॥जघान शक्रो वज्रेण सर्वान्धर्मबहिः कृतान्॥नहुषस्य प्रवक्ष्यामि पुत्रान्सप्तैव धार्मिकान्॥४९॥य
तिर्ययातिः संयातिरुद्भवः पाचिरेव च॥सर्यातिर्मेघसपातिः सप्तैते वंशवर्द्धनाः॥५०॥यतिः कुमारभावोपि यो
गी वैखानसोभवत्॥ययातिरकरोद्राज्यं धर्मैकशरणस्तदा॥५१॥शर्मिष्ठा तस्य भार्याभूत्दुहिता वृषपर्वणः
॥भार्गवस्यात्मजा तद्वद्देवयानी च सुव्रता॥५२॥ययातेः पंचदायादास्तान्प्रवक्ष्यामि नामतः॥देवयानी यदुं पु
त्रं तुर्वसुं चाप्यजीजनत्॥५३॥तथा द्रुह्युमनुं पूरुं शर्मिष्ठाजनयत्सुतान्॥यदुः पूरुश्चाभवतां तेषां वंशवर्द्धनौ॥ राम॰
५४॥ययातिर्नाहुषश्चासीद्राजा सत्यपराक्रमः॥पालयामास च महीमीजे च विविधैर्मखैः॥५५॥अतिभक्त्या पितॄ ३९

न्श्चदेवांश्च प्रयतस्सदा॥अयाजयज्जनव्रजाः सर्वान्ययातिरपराजितः॥५६॥सशाश्वतीः समाराजाप्रजाधर्मेण
पालयन्॥जरामर्छन्महाघोरां नाहुषो रूपनाशिनीं॥५७॥जराभिभूतः पुत्रान्स राजा वचनमब्रवीत्॥यदुं पूरुं
तुर्वसुं च द्रुह्युं चानुं च पार्थिवः॥५८॥यौवनेन त्वदीयेन चरेयं विषयानहं॥यजतो दीर्घसत्रैर्मे शापेचोशनसो मु
नेः॥५९॥कामार्थः परिहीणो मे तप्स्येयं तेन पुत्रकाः॥तांस्वकेन शरीरेयाराजमेकप्रशासुवः॥६०॥अहं तन्वा
भिनवया युवा कामानवाप्नुयां॥नैते तस्य प्रत्यगृह्णन्यदुप्रभृतयो जरां॥६१॥चत्वारस्तान्स राजर्षिरशप
च्चेति नः श्रुतं॥तमब्रवीत्ततः पूरुः कनीयान्सत्यविक्रमः॥६२॥राजंश्चराभिनवया तन्वा मे यौवनेन च॥अहं
जरां तवादाय राज्ये स्थास्यामि तेऽज्ञया॥६३॥एवमुक्तः स राजर्षिस्तपोधैर्यसमाश्रयात्॥संचारयामास जरां तदा
पुत्रे महात्मनि॥६४॥पौरवेणाथ वयसा राजा यौवनमास्थितः॥ययातेनाथ वयसा राज्यं पूरुरकारयत्॥६५
ततो वर्षसहस्रान्ते ययातिरपराजितः॥अतृप्त इव कामानां पूरुं पुत्रमुवाच ह॥६६॥त्वया दायाद्वान्स्मि त्वं मे
वंशकरः सुतः॥पौरवो वंश इत्येवं ख्यातिं लोके गमिष्यति॥६७॥ततः स नृपशार्दूलः पूरुं राज्येभिषिच्य च॥का
लेन महता पश्चात्कालधर्ममुपेयिवान्॥६८॥पूरुवंशं प्रवक्ष्यामि शृणुध्वमृषिसत्तमाः॥यत्र ते भारता जाता भ
रतान्वयवर्द्धनाः॥६९॥इति श्रीमत्स्यपुराणे सोमवंशे ययातिचरिते॥॥ऋषय ऊचुः॥॥किमर्थं पौरवो वंशः

म० पु०
५०

श्रेष्ठत्वं प्रापनृतले।।श्रेष्ठत्वं प्राप भूतले।।श्रेष्ठस्यापि यदोर्वंशाः किमर्थं हीयते श्रिया।।१।।अन्यथ ययातेश्चरितं म
तविस्तरतो वद।।यस्मात्सुएपतमायुष्यमत्रिनेयं सुरैरपि।।२।।सूतउवाच।।।।एतदेवगुरापृष्टः शतानीकेन शौ
नकः।।पुण्यं पवित्रमायुष्यं ययातिचरितं महत्।।३।।शतानीकउवाच।।।।ययातिः पूर्वजोस्माकं दशमो यः प्रजा
पतेः।।कथं सशुक्रतनयां लेभे परमरूपिणीं।।४।।एतदिच्छाम्यहं श्रोतुं विस्तरेण तपोधनी।।आनुपूर्व्याच मे शंस पू
रोर्वंशधरान्नृपान्।।५।।शौनकउवाच।।ययातिरासीद्राजर्षिर्देवराजसमद्युतिः।।तं शुक्रवृषपर्वाणौ वव्राते
वैयथापुरा।।६।।तन्नेहं संप्रवक्ष्यामि पृच्छतो राजसत्तम।।देवयान्याश्च संयोगं ययातेर्नाहुषस्य च।।७।।सुराणाम
सुराणां चामर्षास्त्वासवन्मिथः।।ऐश्वर्यं दिप संमपात्रैलोकेसत्वरे।।८।।जिगीषया ततो देवा वव्रुरांगिरसं
मुनिं।।पौरोहित्ये च यज्ञार्थे काव्यं तूशनसं परे।।९।।ब्राह्मणौ तावुभौ नित्यमन्योन्यस्पर्द्धिनौ भृशं।।तत्र देवा
निजघ्नुर्यान् दानवान्युधि संगतान्।।१०।।तान्पुनर्जीवयामास काव्यो विद्याबलाश्रयात्।।ततस्ते पुनरुत्थाय
योधयांचक्रिरे सुरान्।।११।।असुरास्तु निजघ्नुर्यान्सुरान्समरमूर्धनि।।नतान्संजीवयामास बृहस्पतिरुदा
रधीः।।१२।।नहि वेद स तां विद्यां यां काव्यो वेद वीर्यवान्।।संजीवनीं ततो देवा विषादमगमन्परं।।१३।।अथ देवा न
यो द्विग्नाः काव्यादुशनसस्ततः।।ऊचुः कचमुपागम्य ज्येष्ठं पुत्रं बृहस्पतेः।।भजमानान्भजस्वास्मान्कुरु सा

नो

राम
५०

हाय्यमुत्तमं।।यासौ विद्या निवसति ब्राह्मणेऽमिततेजसि।।१४।।शुक्रे तामाहर क्षिप्रं भागभाङ्नो भविष्यसि।।वृ
षपर्वसमीपे तु शक्यो द्रष्टुं त्वया द्विजः।।१५।।रक्षते स दानवांस्तत्र न च रक्षत्यदानवान्।।तमाराधयितुं शक्तो न
न्यः पूर्वतमो मुने।।१७।।देवयानी च दयिता सुता तस्य महात्मनः।।तामाराधयितुं शक्तो नान्यः कश्चिदृते त्व
या।।१८।।शीलदाक्ष्यंपराचारेण दमेन च।।देवयान्यां च तुष्टायां विद्यां त्वं प्राप्स्यसि ध्रुवं।।१९।।तथेत्यु
क्त्वा कचः प्रायाद्बृहस्पतिसुतस्तदा।।यदाभिपूजितो देवैः समीपं वृषपर्वणः।।२०।।स गत्वा त्वरितो राजन्देवैः सं
प्रेषितः कचः।।असुरेन्द्रपुरे शुक्रं दृष्ट्वा वाक्यमुवाच ह।।२१।।ऋषेरंगिरसः पौत्रं साक्षात्पुत्रं बृहस्पतेः।।नाम्ना कचेति
विख्यातं शिष्यं गृह्णातु मां भवान्।।२२।।ब्रह्मचर्यं चरिष्यामि त्वय्यहं परमं गुरौ।।अनुमन्यस्व मां ब्रह्मन्सह
स्रं परिवत्सरान्।।२३।।शुक्र उवाच।।।।अथ मेहीति शाह्वेयत्तं संजीवयामितं।।ततः संजीविनीं विद्यां प्रयुक्त्वा
कचमाहूयत्।।२४।।आहूतः प्रादुरभवत्कचो हृष्टः सविद्यया।।स पुनर्देवयान्या शुक्रः पुष्पाहारो यदृच्छ
या।।२५।।वनं ययौ कचो विप्राः पवनं ब्रह्म सनातनं।।ततो द्वितीयं तत्स्यात्सुः पुनः कृत्वा च वर्त्मनि।।२६।।प्रायच्छन्
ब्राह्मणेनैव सुरा या मम सुरास्तथा।।देवयान्यथ तत्पोपि पितरं वाक्यमब्रवीत्।।२७।।पुष्पाहारप्रेषणकृत कच
स्तात नदृश्यते।।कचस्तु सागते नेस्तु प्रतिगृह्णामि ते वचं।।२८।।अर्चयिष्ये हमर्चं त्वामर्चितोस्तु बृहस्पतिः।।२९

म॰ पु॰
५१

शौनक उवाच ॥ ॥ कचस्तु तं तथेत्युक्त्वा प्रतिजग्राह तद्व्रतं ॥ आदिष्टं कविपुत्रेण शुक्रेणोशनसा स्वयं ॥२९॥ व्रत
स्य व्रतकालं स यथोक्तं वै गृहीतवान् ॥ आराधयन्नुपाध्यायं देवयानीं च भारत ॥३०॥ नित्यमाराधयिष्यंस्तां
युवा यौवनगोचरे ॥ गायन् नृत्यन् वादयंश्च देवयानीमतोषयत् ॥३१॥ संशीलयन् देवयानीं कन्यां संप्राप्तयौ
वनां ॥ पुष्पैः फलैः प्रेषणैश्च तोषयामास भारत ॥३२॥ देवयान्यपि तं विप्रं नियमव्रतधारिणं ॥ ललनादेह
संस्कारेहरः प्रत्यचरत्तदा ॥३३॥ पंच वर्षशतान्येवं कचस्य चरतो व्रतं ॥ तत्रातीयुरथो बुध्वा दानवास्तं च तदा
कचं ॥३४॥ गा रक्षंतं च ते दृष्ट्वा रहस्येवममर्षिताः ॥ जघ्नुर्बृहस्पतेर्द्वेषाद्विद्यारक्षार्थमेव च ॥३५॥ हत्वा शाला
वृकाभ्यश्च प्रायच्छंस्तिलशः कृतं ॥ ततो गावो निवृत्तास्ता अगोपाः स्वनिवेशनं ॥३६॥ ता दृष्ट्वा रहिता गास्तु क
चेनाभ्यागता वनात् ॥ उवाच वचनं काले देवयान्यथ भारत ॥३७॥ कृतं चैवाग्निहोत्रं ते सूर्यश्चास्तं गतः प्र
भो ॥ अगोपाश्चागता गावः कचश्चैव न दृश्यते ॥३८॥ व्यक्तं हतो वापि कचस्तात भविष्यति ॥ तं विना न च जीवा
मि वचः सत्यं ब्रवीमि ते ॥३९॥ शुक्र उवाच ॥ ॥ बृहस्पतेर्नन्दनः पुत्रो गतः प्रेतगतिं कचः ॥ विद्यया जीवितोप्येष राम॰
पुनस्ते करवाणि किं ॥४०॥ मैवं शुचो मा रुद देवयानि न मत्वा हशी मर्त्यमनुप्रशोचेत् ॥ यस्यास्तव ब्रह्म च ब्रा ५१
ह्मणाश्च सेन्द्राश्च देवा वसवोश्विनौ च ॥४१॥ सुरद्विषश्चैव जगच्च सर्वमुपस्थिता मत्प्रभावात् ॥ अशक्योसौ

जीवयितुं द्विजातिः संजीवितो म्रियते चैव भूयः ॥४२॥ देवयान्युवाच ॥ ॥ यस्यांगिरा वृद्धतमः पितामहो बृहस्पति ह
श्चापि पिता तपोनिधिः ॥ ऋषेः पुत्रमथवापि पौत्रं कथं न शोचेयमहं न रुद्यां ॥४३॥ स ब्रह्मचारी च तपोधनश्च
सदोत्थितः कर्मसु चैव दक्षः ॥ कचस्य मार्गं प्रतिपत्स्ये न भोक्ष्ये प्रियो हि मे तात कचोभिरूपः ॥४४॥ शौनक
उवाच ॥ ॥ स त्वेवमुक्तो देवयान्या महर्षिः संरंभेणाजुहावाथ काव्यः ॥ असंशयं मामसुरा द्विषं
ति ये मे शिष्यानागतान् सूदयंति ॥४५॥ अब्राह्मणं कर्तुमिच्छंति रौद्रा एभिर्यथा प्रस्तुतं दानवैर्हि ॥ तत्कर्म
णोप्यस्य भवेदिहांतः कं ब्रह्महत्या न दहेदपीन्द्रं ॥४६॥ इत्येनाहूतो विद्यया चोपहूतः शनैर्वाचं जठरे व्याजहा
र ॥ तमब्रवीत्केन पथोपयातो ममोदरे तिष्ठसि ब्रूहि विप्र ॥४७॥ कच उवाच ॥ ॥ भवत्प्रसादान्न जहाति मां स्मृतिः
सर्वं स्मरे यच्च यथा च वृत्तं ॥ न त्वेवं न स्यात् तपसः क्षयो मे ततः क्लेशं घोरतरं सहामि ॥४८॥ असुरैः सुरायां भवतो रा
स्मि दत्तो हत्वा दग्ध्वा चूर्णयित्वा च काव्य ॥ ब्राह्मीं मायां त्वासुरी त्वन्मया यां त्वयि स्थिते कथमेवातिवर्त्ते ॥४९॥
शुक्र उवाच ॥ ॥ किं ते प्रियं करवाण्यद्य वत्से वधेन मे जीवितं स्यात् कचस्य ॥ नान्यत्र कुक्षेर्मम भेदनेन दृश्येत् कचो
मद्गतो देवयानि ॥५०॥ देवयान्युवाच ॥ ॥ द्वौ मां शोकावग्निकल्पौ दहेतां कचस्य नाशस्तव चाप्युपघातः ॥ कच
स्य नाशे मम नास्ति शर्म तवोपघाते जीवितुं नास्मि शक्ता ॥५०॥ शुक्र उवाच ॥ ॥ संसिद्धरूपोसि बृहस्पतेः सुत

म०पु० ४२

यत्नात्म कमजते देवयानि॥ विद्यामिमामुहि जीविनीं त्वं नचेदिदं कचरूपीत्वमद्य॥५१॥ पुत्रो भूत्वा भावयित्वा मम
त्वं तस्माद्देहान्नवनिःक्रांतिरस्तु॥ समा च वृ रक्षे धर्मवतामापश्चेपुरःसकाशात्प्राप्य विद्यां सविद्यः॥५२॥ भित्वा कु
क्षिं निविचक्रामविप्रः कचोभिरूपो दक्षिणं ब्राह्मणस्य॥ प्रालेयाद्रेः शुक्लमभ्रं यथा स्पष्टं गरात्मागमो पौर्णमास्यामि
वेदुः॥५३॥ दृष्ट्वा च तं पतितं ब्रह्मराशिं स्त्वापर्यमासततः कचोपि॥ विद्यां सिद्धां तामवाप्याभिवाद्य ततः कचस्तं गु
रुमित्युवाच॥५४॥ ऋतस्य धातारममनुत्तमस्य निधिं निधीनां च परंपराणां॥ ये नाद्रियंते गुरुमर्चनीयं पापा
ल्लोकांस्ते व्रजंत्यप्रतिष्ठान्॥५५॥ शौनक उवाच॥ ॥ सुरापानाद्वंचनां प्रापयित्वा संज्ञानाशं चेसमस्तापि घो
रां॥ दृष्ट्वा कचं चापि तथाभिरूपं पीतं तथा सुरया मोहितेन॥५६॥ समन्युरुत्थाय महानुभाव स्तदोशना वि
प्रहितं चिकीर्षुः॥ काव्यः स्वयं वाक्यमिदं जगाद सुरापानात्प्रत्यसौ जाततर्कः॥५७॥ शुक्र उवाच॥ यो ब्राह्म
णोद्यप्रभृतीह कश्चिन्मोहात्सुरां पास्यति मंदबुद्धिः॥ आपतधर्मा ब्रह्महा चैव स स्यादस्मिल्लोके गर्हितः स्या
त्परे च॥५८॥ मया चेमां विप्रधर्मोक्तिसीमां मर्यादां च स्थापितां सर्वलोके॥ संतो विप्राः शुश्रुवांसो गुरूणां दि
व्यालोकाश्चोपशृण्वंतु सर्वे॥५९॥ शौनक उवाच॥ ॥ इतीदमुक्त्वा समहानुभावस्तपोनिधीनां निधिरप्रमे राम० ४२
यः॥ तान्दानवांश्चैव विमूढबुद्धीनिदं समाहूय वचो सुवाच॥६०॥ शुक्र उवाच॥ आचक्षे वो दानवा बालिशा

स्सुशिष्यः कचो वत्स्यति मत्समीपे॥ संजीवनीं प्राप्य विद्यां ममायं तुल्यप्रभावो ब्राह्मणो ब्रह्मभूतः॥६१॥ शौनक
उवाच॥ ॥ गुरोरिर्षित्वा स काशे च दशवर्षशतानि च॥ अनुज्ञातः कचो गंतुमियेष त्रिदशालयं॥६२॥ ॥ इति
श्री मत्स्यपुराणे मनुमत्स्यसंवादे सोमवंशे ययातिचरिते॥ ॥ शौनक उवाच॥ ॥ समाप्तव्रतं तु व्रतांतं विसृष्टं गु
रुणा ततः॥ प्रस्थितं त्रिदशावासे देवयान्यब्रवीदिदं॥१॥ देवयान्युवाच॥ ॥ ऋषेरंगिरसः पौत्र वृत्तेनाभिजने
न च॥ ऋषेरंगिरसः पौत्र वृत्तेनाभिजनेन च॥ भ्रासते विद्यया चैव तपसा च दमेन च॥२॥ ऋषिर्यथांगि
रा मान्यः पितुर्मम महायशाः॥ तथा मान्यश्च पूज्यश्च मम भूयो बृहस्पतिः॥३॥ एवं ज्ञात्वा विजानीहि यद्ब्र
वीमि तपोधन॥ व्रतस्थे नियमोपेते यथा वर्त्ताम्यहं त्वयि॥४॥ स समाप्तव्रतविद्यो मां भक्तां न त्यक्तुमर्हसि॥
गृहाण पाणिं विधिवन्मम मंत्रपुरस्कृतं॥५॥ कच उवाच॥ ॥ पूज्यो मान्यश्च भगवान्यथा मम पिता तव॥ तथा
त्वमनवद्यांगि पूजनीयोत्तमा॥६॥ आत्मप्राणैः प्रियतमा भार्गवस्य महात्मनः॥ त्वं भद्रे धर्मतः पूज्या गुरुपु
त्री सदा मम॥७॥ गुरुर्नित्यं पूज्यतमो मान्यः शुक्रः पिता तव॥ देवयानि तथैव त्वं नैवं मां वक्तुमर्हसि॥८॥
देवयान्युवाच॥ ॥ गुरुपुत्रस्य पुत्रो मे न तु त्वमसि मे पितुः॥ तस्मान्मान्यश्च पूज्यश्च ममापि त्वं द्विजोत्तम॥९॥
असुरैर्हन्यमाने च कच त्वयि पुनः पुनः॥ तदा प्रभृति या प्रीतिस्तां त्वं चेत्सि किं॥१०॥ सौहार्दे चानुरागे च वेत्थ मे

म॰ पु॰
४३

भक्तिमनुव्रतां ॥ न मामर्हसि धर्मज्ञ त्यक्तुं भक्तामनागसं ॥ ११ ॥ कच उवाच ॥ ॥ अनियोज्ये नियोगे मां नियुंक्षसि शुभ
व्रते ॥ प्रसीद सुभ्रु त्वमस्माकं गुरोर्गुरुतरा शुभे ॥ १२ ॥ यत्रोषितं विशालाक्षि त्वया चंद्रनिभानने ॥ तत्राहमुषितो भ
द्रे कुक्षौ काव्यस्य भामिनि ॥ १३ ॥ धर्मतो मे त्वं मैवं वाचः शुभानने ॥ सुखेनाध्युषितो भद्रे न मन्युर्विद्यते मम ॥ १४
आपृच्छे त्वां गमिष्यामि शिवमस्तु च मे पथि ॥ अविरोधेन धर्मस्य स्मर्तव्योऽस्मि कथांतरे ॥ १५ ॥ अप्रमत्तोत्थि
ता नित्यमाराधय गुरुं मम ॥ १५ ॥ देवयान्युवाच ॥ ॥ यदि मां धर्मकामार्थे प्रत्याख्यास्यसि धर्मतः ॥ ततः कच
नात विद्या सिद्धिमेषा गमिष्यति ॥ १६ ॥ कच उवाच ॥ ॥ गुरुपुत्रीति कृत्वाहं प्रत्याचक्षे न दोषतः ॥ गुरुणा चा
भ्यनुज्ञातः काममेवं शपिष्यसि ॥ १७ ॥ आर्षं धर्मं ब्रुवाणो हि देवयानि यथा त्वया ॥ शप्तो नार्होऽस्मि शापस्य
कामतोऽद्य न धर्मतः ॥ १८ ॥ तस्माद्भवत्या यः कामो न तथा स भविष्यति ॥ ऋषिपुत्रो न ते कश्चित्कदा पाणिं
ग्रहीष्यति ॥ १९ ॥ फलिष्यति न मे विद्या तव चक्षेति तत्तथा ॥ अध्यापयिष्यामि च यं तस्य विद्या फलिष्यति ॥ २०
शौनक उवाच ॥ ॥ एवमुक्त्वा नृपश्रेष्ठ देवयानीं कचस्तदा ॥ त्रिदशेशालयं शीघ्रं जगाम द्विजपुंगवः ॥ २१ ॥ त
मागतमभिप्रेक्ष्य देवाः सेंद्रपुरोगमाः ॥ बृहस्पतिं सभाज्येदं कचमाहुर्मुदान्विताः ॥ २२ ॥ देवा ऊचुः ॥ यत्त्व
मस्मद्धितं कर्म कृतवान्महदद्भुतं ॥ न ते यशः प्रणशिता भागभाक्च भविष्यसि ॥ २३ ॥ ॥ इति श्रीमत्स्यपुराणे सोमवं

राम॰
४२

शोपयाति चरितं ॥ २ ॥ शौनक उवाच ॥ ॥ कृतविद्ये कचे प्राप्ते हृष्टरूपा दिवौकसः ॥ कचादधीत्य तां विद्यां कृ
तार्था भरतर्षभ ॥ १ ॥ सर्व एव समागम्य शतक्रतुमथाब्रुवन् ॥ कालस्ते विक्रमस्याद्य जहि शत्रून्पुरंदर ॥ २ ॥
एवमुक्तस्तु सहितैस्त्रिदशैस्त्रिदशाधिपः ॥ तथेत्युक्त्वा पचक्रामः सोऽपश्यद्विपिने स्त्रियः ॥ ३ ॥ क्रीडंतीनां
तु कन्यानां वने चैत्ररथोपमे ॥ वायुभूतः स वस्त्राणि सर्वाण्येकव्यमिश्रितानि तु ॥ ४ ॥ ततो जलात्समुत्तीर्य ताः क
न्याः सहितास्तदा ॥ वस्त्राणि जगृहुः स्वानि यथासंख्यमनेकधा ॥ ५ ॥ तत्र वासो देवयान्याः शर्मिष्ठा जग
हे तदा ॥ अतिक्रमममजानंती दुहिता वृषपर्वणः ॥ ६ ॥ ततस्तयोर्मिथस्तत्र विरोधः समजायत ॥ देवयान्याश्च
राजेंद्र शर्मिष्ठायाश्च तत्कृते ॥ ७ ॥ देवयान्युवाच ॥ ॥ यस्माद्गृह्णासि मे वस्त्रं शिष्या भूत्वा ममासुरि ॥ समुदाचा
रहीनाया न ते श्रेयो भविष्यति ॥ ८ ॥ शर्मिष्ठोवाच ॥ आसीनं च शयानं च पिता ते पितरं मम ॥ स्तौति तिष्ठति चाभी
क्ष्णं नीचस्थः सुविनीतवत् ॥ ९ ॥ याचतस्त्वं च दुहिता स्तुवतः प्रतिगृह्णतः ॥ अनायुधा सायुधायाः किं त्वं कु
प्यसि भिक्षुकि ॥ १० ॥ लप्स्यसे प्रतियोद्धारं न च त्वां गणयाम्यहं ॥ ११ ॥ शौनक उवाच ॥ ॥ सा विस्मयां देवयानीम
नासक्तां च वाससि ॥ शर्मिष्ठा प्राक्षिपत्कूपे ततः स्वपुरमाव्रजत् ॥ ११ ॥ हतेयमिति विज्ञाय शर्मिष्ठा पापनि
श्चया ॥ अनवेक्ष्य गता तस्मात्क्रोधवेगपरायणा ॥ १२ ॥ ततस्तं देशमभ्यागाद्ययातिर्नहुषात्मजः ॥ श्रांतयुग्मः

श्रांतहयोमृगलिप्सुःपिपासितः॥१३॥नाकृषिःप्रेक्षमाणोपस्सनिपातेगतोदके॥ददर्शकन्यांतांतत्रदीप्तामग्नि
शिखामिव॥१४॥तामपृच्छत्सतत्रैवकन्याममरवर्णिनीं॥सांत्वयित्वान्नृपश्रेष्ठःसाम्नापरमवल्गुना॥१५॥का
त्वंचारुमुखीश्यामासुमृष्टमणिकुंडला॥दीर्घंध्यायसितात्यर्थंकस्माच्छोचसिचातुरा॥१६॥कथंचपतिता
ह्यस्मिन्कूपेवीरुत्तृणावृते॥दुहिताचैवकस्यत्वंवदसत्यंसुमध्यमे॥१७॥देवयान्युवाच॥योसौदे
वैर्हतान्दैत्यानुत्थापयतिविद्यया॥तस्यशुक्रस्यकन्याहंसमांनूनंनमन्यते॥१८॥राषमेदक्षिणोरा
राजन्पाणिस्ताम्रनखांगुलिः॥समुद्धरगृहीत्वामांकुलीनीत्वंहिमेमतः॥१९॥जानामित्वांचसंशांतं
यशस्विनं॥तस्मान्मांपतितांकूपादस्मादुद्धर्तुमर्हसि॥२०॥शौनकउवाच॥॥जानातिब्राह्मणींस्त्रींचराजाचन
हुषात्मजः॥गृहीत्वादक्षिणेपाणावुज्जहारततोवदात्॥२१॥उद्धृत्यचैनांतरसातस्मात्कूपान्नराधिपः॥आ
मंत्रयित्वासुश्रोणींययातिःस्वपुरंययौ॥२२॥देवयानित्वरितंघूर्णिकेनगच्छसर्वमाचक्ष्वमेपितुः॥नेदानीं
तुप्रवेक्ष्यामिनगरेवृषपर्वणः॥२३॥शौनकउवाच॥॥सात्वैत्वरितंगत्वाघूर्णिकासुरमंदिरं॥दृष्ट्वाका
व्यमुवाचेदंकंपमानाविचेतना॥२४॥आचचक्षेमहाभागांदेवयानींवनेहतां॥शर्मिष्ठयामहाप्राज्ञदुहित्रा
वृषपर्वणः॥२५॥वचनंतीक्ष्णपरुषंक्रोधरक्तेक्षणानृपं॥स्तुवतोदुहितासित्वंयाचतःप्रतिगृह्णतः॥२६

सुताहंस्तूयमानस्यददतोतिगृह्णत॥इतिमामाहशर्मिष्ठादुहितावृषपर्वणः॥२७॥क्रोधसंरक्तनयनादर्पपू
र्णेननानतः॥यद्यहंस्तुवतस्तातदुहिताप्रतिगृह्णतः॥प्रसादयिष्येशर्मिष्ठामित्युक्ताहिसखीमये॥२८॥
शुक्रउवाच॥स्तुवतोदुहितानत्वंयाचकेनप्रतिगृह्णतः॥अतस्त्वंस्तूयमानस्यदुहितादेवयान्यसि॥२९॥वृ
षपर्वेतितेदेवाःशक्रोराजाचनाहुषः॥अचिंत्यंब्रह्मनिर्द्वंद्वमैश्वर्यंहिबलंमम॥३०॥॥इतिश्रीमत्स्यपु
राणेययातिचरिते॥॥शौनकउवाच॥॥यःपरेषांनरोनित्यमतिवादांस्तितिक्षते॥देवयानिविजानीहि
तेनसर्वमिदंजितं॥१॥यःसमुत्पतितंकोपंक्षमयैवनिरस्यति॥यथोरगस्त्वचंजीर्णांसवैपुरुषउच्यते॥२॥
यश्चस्मानवयतेधर्मंयोतिमात्रंतितिक्षति॥यश्चतप्तोनतपतिदृढंसोर्थस्यभाजनं॥३॥योयजेदश्वमेधे
नमासिमासिशतंसमाः॥यस्तुक्रुध्येन्नसर्वस्यतयोरक्रोधनोवरः॥४॥यःकुमाराकुमार्यश्चवैरंकुर्युरचेत
सः॥नतत्प्राज्ञोनुकुर्वीतविदुस्तेनबलाबलं॥५॥देवयान्युवाच॥वेदाहंतातबालापिकार्याणांनगतां
गतिं॥क्रोधेचैवातिवादेचवेदचापिबलाबलं॥६॥शिष्यस्यापिचवर्तेहितंक्षंतव्यंबुभूषता॥तस्मात्संकी
र्णवृत्तेषुवासोममनरोचते॥७॥पुंसोयेनाभिनंदंतिवृत्तेनाभिजनेनच॥तेषुसाधुषुवस्तव्यंसवासःश्रे
ष्ठउच्यते॥८॥तस्मिन्नस्पतिनष्टस्यादभिकामस्ववारणं॥वाग्दुरुक्तंमहाघोरंदुहितुर्वृषपर्वणा॥९॥नत

म०पु० ४५

स्यात दुश्ववचनं मन्ये ज्ञो केषु पितृषु॥ यः समपतल्लिप्रपेदीनां हीनवश्रीः पर्युपासते॥१०॥ ॥इतिश्रीमत्स्यपुराणेयया
तिचरिते॥ ॥शौनक उवाच॥ ततः काव्यो भृगुश्रेष्ठः समन्युरुपगम्य ह॥ वृषपर्वाणमासीनमित्युवाचत्वरा
न्वितः॥१॥ नाधर्मश्चरितो राजन् सद्यः फलति गौरिव॥ शनैरावर्त्यमानस्तु मूलान्यपि निकृंतति॥२॥ यो
हि नात्मनि पुत्रेषु न चेत्नप्तृषु तिनप्तृषु॥ पापमाचरितं कर्म त्रिवर्गमतिवर्त्तते॥३॥ फलत्येव ध्रुवं पापं गु
रुभुक्तमिवोदरे॥ यदा घातयिता विप्रं कचमांगिरसं॥४॥ अपापशीलं धर्मज्ञं शुश्रूषुं मद्गृहे रतं॥ व
धादनर्हतस्तस्य वधाच्च दुहितुर्मम॥५॥ वृषपर्वन्निबोधत्वं त्यक्ष्यामि त्वां सबांधवं॥ स्थातुं त्वद्विषये राजन्
न शक्ष्यामि त्वया सह॥६॥ अद्यैव मामिजानामि दैत्यं मिथ्याप्रलापिनं॥ यतस्त्वमात्मनो दोषं दुहितां स्वाम
पेक्षसे॥७॥ वृषपर्वोवाच॥ ॥न धर्ममनृतं वा वा दं त्वयि जानामि भार्गव॥ त्वयि सत्यं च धर्मं च तत्प्रसीदतु नो
भवान्॥८॥ यद्यस्मानपहाय त्वमितो यास्यसि भार्गव॥ समुद्रं संप्रवेक्ष्यामो नान्यदस्ति परायणं॥९॥ शुक्र
उवाच॥ ॥समुद्रं प्रविशध्वं वा दिशो वा जनतासुराः॥ दुहितुर्नाप्रियं श्रोतुं शक्तोहं दयिता हि मा॥१०॥ प्रसाद्यतां
देवयानी जीवितं ह्यत्र मे स्थितं॥ योगक्षेमकरस्तेहं इंद्रस्य च बृहस्पतिः॥११॥ वृषपर्वोवाच॥ ॥ यत्किंचिदसुरें
द्राणां विद्यते वसु भार्गव॥ भुवि हस्तिगवाश्वं च तस्य त्वं मम चेश्वरः॥१२॥ शुक्र उवाच॥ ॥ यत्किंचिदस्ति द्रविणं

राम ४५

दैत्येंद्राणां महासुराः॥ तस्येश्वरोस्मि यदि ते देवयानी प्रसाद्यतां॥१३॥ शौनक उवाच॥ ॥ततस्तु त्वरितः शु
क्रः स च राजा समाययौ॥ उवाच चैनां सुभगे प्रतियत्नेव चस्मना॥१४॥ देवयान्युवाच॥ ॥यदि त्वमीश्वरस्ता
त राज्ञो वित्तस्य भार्गव॥ नाभिजानामि तत्तेहं राजा वदतु मां स्वयं॥१५॥ वृषपर्वोवाच॥ यं काममभिजाना
सि देवयानि शुचिस्मिते॥ तत्तेहं संप्रदास्यामि यद्यपि स्यात्सुदुर्लभं॥१६॥ देवयान्युवाच॥ ॥दासीं कन्यास
हस्रेण शर्मिष्ठामभिकामये॥ अनुयास्यति मां तत्र यत्र दास्यति मे पिता॥१७॥ वृषपर्वोवाच॥ ॥उत्तिष्ठ धात्रि
गच्छ त्वं शर्मिष्ठां शीघ्रमानय॥ यं च कामयते कामं देवयानी करोमि तं॥१८॥ ॥शौनक उवाच॥ ततो धात्री त
त्र गत्वा शर्मिष्ठामिदमब्रवीत्॥ उत्तिष्ठ भद्रे शर्मिष्ठे ज्ञातीनां सुखमावह॥१९॥ त्यजति ब्राह्मणः शिष्यान् देव
यान्या प्रणोदितः॥ यं सा कामयते कामं स कार्योद्य त्वयानघे॥२०॥ दासीत्वमभिजानासि देवयान्याः सुशो
भने॥२०॥ शर्मिष्ठोवाच॥ ॥ यं च कामयते कामं करवाण्यहमद्य तं॥ मा गान्मत्सुवशं शुक्रो देवयानी च म
व त्कृते॥२१॥ शौनक उवाच॥ ततः कन्यासहस्रेण वृता शिबिकया तदा॥ पितुर्निदेशात्त्वरिता निश्चक्राम पुरोत्तमा
त्॥२२॥ शर्मिष्ठोवाच॥ ॥अहं कन्यासहस्रेण दासीभिः परिवारिता॥ अनुत्वां तत्र यास्यामि यत्र दास्यति ते पिता॥
२३॥ देवयान्युवाच॥ ॥स्तुवतो दुहिता चाहं वंदितः प्रतिगृह्णतः॥ रूपमानस्य गेहे त्वं कथं दासी भविष्यसि॥२४॥

शर्मिष्ठोवाच॥ येन केनचिदार्त्तानां ज्ञातीनां सुखमावहेत॥ अनुयास्याम्यहं तत्र यत्र दास्यति ते पिता॥२५॥
शौनक उवाच॥ प्रतिश्रुते दासभावे दुहित्रा वृषपर्वणः॥ देवयानी नृपश्रेष्ठ पितरं वाक्यमब्रवीत॥२६॥ प्रवि
शामि पुरं तात तुष्टास्मि द्विजसत्तम॥ अमोघं तव विज्ञानमस्ति विद्याबलं च ते॥२७॥ एवमुक्तो द्विजश्रेष्ठो दुहि
त्रा सुमहायशाः॥ प्रविवेश पुरं हृष्टः पूजितः सर्वदानवैः॥२८॥ इति श्रीमत्स्यपुराणे ययातिचरिते॥ शौन
क उवाच॥ अथ दीर्घेण कालेन तस्मिन्नेव नृपोत्तम॥ एवं तं देवयानी याता क्रीडार्थं वरवर्णिनी॥१॥ तेन दासी
सहस्रेण सार्द्धं शर्मिष्ठया तदा॥ तमेव देशं संप्राप्य यथाकामं चचार सा॥२॥ ताभिः सखीभिः सहिता सर्व
भिर्मुदिता भृशं॥ क्रीडंत्याभिरताः सर्वाः पिबंत्यो मधुमाधवीं॥३॥ खादंत्यो विविधान्भक्ष्यान्विदशंत्यः फ
लान्यपि॥ पुनश्च नाहुषो राजा मृगलिप्सुर्यदृच्छया॥४॥ तमेव देशं संप्राप्तो जललिप्सुः सुकर्षितः॥ ददर्श
देवयानीं च शर्मिष्ठां ताश्च योषितः॥५॥ पिबंत्यो ललमानाश्च दिव्याभरणभूषिताः॥ उपविष्टां च ददृशे देव
यानीं शुचिस्मितां॥६॥ रूपेणाप्रतिमां तासां स्त्रीणां मध्ये वरांगनां॥ शर्मिष्ठया सेव्यमानां पादसंवाहना
दिभिः॥७॥ ययातिरुवाच॥ दासीकन्यासहस्राभ्यां द्वे कन्ये परिवारिते॥ गोत्रे च नामनी चैव द्वयोः पृच्छा
म्यहं पतः॥८॥ देवयान्युवाच॥॥ आख्यास्याम्यहमादत्स्व वचनं मे नराधिप॥ शुक्रो नामासुरगुरुः सुतां

जानीहि तस्य मां॥९॥ इयं च मे सखी दासी यत्राहं तत्रगामिनी॥ दुहिता दानवेंद्रस्य शर्मिष्ठा वृषपर्वणः॥१०॥
ययातिरुवाच॥ कथं च ते सखी दासी कन्येयं वरवर्णिनी॥ असुरेंद्रसुता सुभ्रु परं कौतूहलं हि मे॥११॥ देवया
न्युवाच॥॥ सर्व एव नरव्याघ्र विधानमनुवर्त्तते॥ विहितं विधिना मत्वा मा विचित्रीयथा नृप॥१२॥ राजव
द्रूपवेषस्ते ब्राह्मीं वाचं बिभर्षि च॥ किंनामा त्वं कुतश्चासि कस्य पुत्रश्च शंस मे॥१३॥ ययातिरुवाच॥ ब्रह्म
चर्येण कृत्स्नो मे वेदः श्रुतिपथं गतः॥ राजाहं राजपुत्रश्च ययातिरिति विश्रुतः॥१४॥ देवयान्युवाच॥
केनार्थेन त्वं नृपते इमं देशं समागतः॥ जिघृक्षुर्वारिजं किंचिदथवा मृगलिप्सया॥१५॥ ययातिरुवाच॥
मृगलिप्सुरहं भद्रे पानीयार्थमिहागतः॥ बहुधाप्यनुयुक्तोस्मि तदनुज्ञातुमर्हसि॥१६॥ देवयान्युवाच॥ द्वा
भ्यां कन्यासहस्राभ्यां दास्या शर्मिष्ठया सह॥ त्वदधीनास्मि भद्रं ते सखा भर्त्ता च मे भव॥१७॥ ययातिरुवाच॥
विद्ध्यौशनसि भद्रं ते न त्वामर्होस्मि भामिनि॥ अविवाह्या हि राजानो देवयानि पितुस्तव॥१८॥ देवयान्युवा
च॥॥ संसृष्टं ब्रह्मणा क्षत्रं क्षत्रेण ब्रह्म संश्रितं॥ ऋषिश्च ऋषिपुत्रश्च नाहुषाद्य भजस्व मां॥१९॥ ययातिरुवा
च॥॥ एकदेहोद्भवा वर्णाश्चत्वारोपि वरानने॥ पृथग्धर्माः पृथक्शौचास्तेषां वै ब्राह्मणो वरः॥२०॥ देवयान्युवा
च॥॥ पाणिग्रहो नाहुषायं न पुंभिः सेवितः पुरा॥ तं मे त्वमग्रहीरग्रे वृणोमि त्वामहं ततः॥२१॥ कथं नु मे मनस्वि

न्या पाणिमन्यः पुमान्स्पृशेत्। गृहीतमृषिपुत्रेणास्वयं वाप्यृषिपाल्यया ॥२२॥ ययातिरुवाच ॥ क्रुद्धादा
शीविषात्सर्पाज्ज्वलनात्सर्वतोमुखात्। दुर्धर्षतरो विप्रात्पुरुषेण विजानता ॥२३॥ देवयान्युवाच ॥ कथमा
शीविषात्सर्पाज्ज्वलनात्सर्वतोमुखात्। दुर्धर्षतरो विप्रादित्यर्थः पुरुषर्षभ ॥२४॥ ययातिरुवाच ॥ हन्यादा
शीविषस्त्वेकं शास्त्रेणैकस्तु वध्यते। हंति विप्रः सराष्ट्राणि पुराण्यपि च कोपितः ॥२५॥ दुर्धर्षतरो विप्रस्त
स्मात्भीरु मतो मम। अतो दत्तां हि पित्रा त्वां नाकेन विवहाम्यहं ॥२६॥ देवयान्युवाच ॥ दत्तां वहस्व पित्रा मां त्वं हि
राजन्वृतो मया। अयाचतो भयं नास्ति दत्तां च प्रतिगृह्णतः ॥२७॥ शौनक उवाच ॥ त्वरितं देवयान्या च प्रेषितं
पितुरात्मनः। सर्वं निवेदयामास धात्री तस्मै यथाश्रुतं ॥२८॥ श्रुत्वैव च स राजानं दर्शयामास भार्गव ॥ दृष्ट्वै
वमागतं विप्रं ययातिः पृथिवीपतिः ॥२९॥ ववंदे ब्राह्मणं काव्यं प्रांजलिः प्रणतः स्थितः। तं वाचाभ्यवदत्काव्यः
साम्ना परमवल्गुना ॥३०॥ देवयान्युवाच ॥ राजायं तात पस्मात दुर्गमे पाणिमग्रहीत्। नमस्ते देहि मामस्मै
लोके नान्यं पतिं वृणे ॥३१॥ शुक्र उवाच ॥ वृतो नया पतिर्वीर सुतया त्वं ममेष्टया। गृहाणेमां मया दत्तां महिषीं
नहुषात्मज ॥३२॥ ययातिरुवाच ॥ अधर्मो न स्पृशेदेवं पापं मामिह भार्गव। वर्णसंकरजो ब्रह्मन्निति त्वां
प्रवृणोम्यहं ॥३३॥ शुक्र उवाच ॥ अधर्मात्त्वां विमोक्ष्यामि वरं वरय चेप्सितं। अस्मिन्विवाहे मा ग्लासीरहं

पापं नुदामि ते ॥३४॥ वहस्व भार्यां धर्मेण देवयानीं शुचिस्मितां। अनया सह संप्रीतिमतुलां त्वमवाप्नुहि ॥३५
इयं चापि कुमारी ते शर्मिष्ठा वार्षपर्वणी। संपूज्या सततं राजन्मा चैनां शयने ह्वयेः ॥३६॥ शौनक उवाच ॥
एवमुक्तो ययातिस्तु शुक्रं कृत्वा प्रदक्षिणं। जगाम स्वपुरं हृष्टः सोनुज्ञातो महात्मना ॥३७॥ इति श्रीमत्स्यपु
राणे ययातिचरिते ॥ ॥ शौनक उवाच ॥ ययातिः स्वपुरं प्राप्य महेंद्रपुरसंनिभं। प्रविश्यांतःपुरं त
त्र देवयानीं निवेशयेत ॥१॥ देवयान्याश्चानुमते सुतां तां वृषपर्वणः। ददर्श योवनप्राप्तो रुतुं सा कमले
क्षणा ॥२॥ चिंतयामास धर्मज्ञा ऋतुप्राप्तं तु भामिनी। ऋतुकालश्च संप्राप्तो न कश्चिन्मे पतिर्वृतः ॥३॥
किं प्राप्तं किं नु कर्तव्यं किं कृत्वा सुकृतं भवेत्। देवयानी प्रजाता सा वृथाहं प्राप्तयौवना ॥४॥ यथा तया वृतो
भर्ता तथैवाहं वृणोमि तं। राज्ञा पुत्रफलं देयं इति मे निश्चिता मतिः ॥५॥ यदि दानीं स धर्मात्मा रहो मे दर्श
नं व्रजेत ॥५॥ शौनक उवाच ॥ अथ निष्क्रम्य राजासौ तस्मिन्काले यदृच्छया। अशोकवनिकाभ्याशे शर्
मिष्ठासहितः स्थितः ॥६॥ तमेकं रहसि दृष्ट्वा शर्मिष्ठा चारुहासिनी। प्रत्युद्गम्यांजलिं कृत्वा राजानं वाक्यम
ब्रवीत् ॥७॥ शर्मिष्ठोवाच ॥ सोमस्येंद्रस्य विष्णोर्वा यमस्य वरुणस्य च। तव वा नाहुष गृहे कः स्त्रियं द्रष्टु
मर्हति ॥८॥ रूपाभिजनशीलैर्हि त्वं राजन्वेत्थ मां सदा। सा त्वां याचे प्रसाद्याहं ऋतुं देहि नराधिप ॥९॥ य

म०पु० ४८

यातिरुवाच॥॥ वेद्मित्वांशीलसंपन्नांदैत्यकन्यामनिंदितां॥ रूपंतुतेनपश्यामिसूच्यग्रमपिनिंदितं॥१०॥ ममात्र
वीत्तदाशुक्रोदेवयानीयदावहं॥ नेयमाह्वयितव्यातेशयनेवार्षपर्वणी॥११॥ शर्मिष्ठोवाच॥॥ ननर्मयुक्तं
वचनंहिनस्तिनस्त्रीषुराजन्नविवाहकाले॥ प्राणात्ययेसर्वधनापहारेपंचानृतान्याहुरपातकानि॥१२॥
पृष्टास्तुराज्ञेप्रवदंतियेन्यथाभवंतिमिथ्यावचनान्नरेंद्रते॥ एकार्थितायांतुसमाहितायांमिथ्यावदंतंनृप
तिंहिनस्ति॥१३॥ ययातिरुवाच॥॥ राजाप्रमाणंभूतानांसविनश्येन्मृषावदन्॥ अर्थकृच्छ्रमनुप्राप्यनमिथ्या
वक्तुमुत्सहे॥१४॥ शर्मिष्ठोवाच॥ समावेतौमतौराजन्पतिःसख्याश्चयःपतिः॥ समंविवाहमित्याहुःसख्या
मेसिपतिर्वृतः॥१५॥ ययातिरुवाच॥॥ दातव्यंयाचमानस्यहितिमेव्रतमाहितं॥ त्वंचयाचसिकामंमांब्रूहिकिं
करवाणितत्॥१६॥ शर्मिष्ठोवाच॥॥ अधर्मात्त्राहिमांराजन्धर्मंचप्रतिपादय॥ त्वत्तोपत्यवतीलोकेचरेयं
धर्ममुत्तमं॥१७॥ त्रयएवाधनाराजन्भार्यादासस्तथासुतः॥ यत्तेसमधिगच्छंतियस्यतेतस्यतद्धनं॥१८॥
देवयान्याभुजिष्यास्मिवश्याचतवभार्गवी॥ साचाहंचत्वयाराजन्भरणीयाभजस्वमां॥१९॥ शौनकउवा
च॥ एवमुक्तस्तयाराजातथ्यमित्यभिजज्ञिवान्॥ पूजयामासशर्मिष्ठांधर्मंचप्रतिपादयन्॥२०॥ ससमागम्यश
र्मिष्ठांयथाकाममवाप्यच॥ अन्योन्यंचाभिसंपूज्यजग्मतुस्तौयथागतं॥२१॥ तस्मिन्समागमेसुभ्रूःशर्मिष्ठा

राम० ४८

वार्षपर्वणी॥ लेभेगर्भंप्रथमतस्तस्मान्नृपसत्तमात्॥२२॥ प्रजज्ञेचततःकालेराजन्राजीवलोचना॥ कुमारंदेव
गर्भाभमादित्यसमवर्चसं॥२३॥ इतिश्रीमत्स्यपुराणेययातिचरिते॥ शौनकउवाच॥॥ श्रुत्वाकुमारंजातंतु
तंदेवयानीशुचिस्मिता॥ चिंतयामासदुःखार्ताशर्मिष्ठांप्रतिभार्गवी॥१॥ ततोभिगम्यशर्मिष्ठांदेवयान्यब्रवीदि
दं॥ किमिदंवृजिनंसुभ्रुकृतंतेकामलुब्धया॥२॥ शर्मिष्ठोवाच॥ ऋषिःकश्चिदिहागत्यधर्मात्मावेदपारगः॥
समयातुवरःकामंप्रार्थितोधर्मसंहितं॥३॥ नाहमन्यायतःकाममाचरामिशुचिस्मिते॥ तस्मात्तदृषेर्ममापत्य
मितिसत्यंब्रवीमिते॥४॥ देवयान्युवाच॥ शोभनंभीरुसत्यंचेदथसंज्ञायतेद्विजात्॥ गोत्रनामाभिजनतःश्रो
तुमिच्छामितंद्विजं॥५॥ शर्मिष्ठोवाच॥॥ ओजसातेजसाचैवदीप्यमानंरविंयथा॥ तंदृष्ट्वाममसंप्रष्टुंशक्ति
र्नासीत्तच्छुचिस्मिते॥६॥ देवयान्युवाच॥॥ यद्येतदेवंशर्मिष्ठेनमन्युर्विद्यतेमम॥ अपत्यंयदितेलब्धंज्येष्ठाच्छ्रे
ष्ठाद्वैद्विजात्॥७॥ शौनकउवाच॥॥ अन्योन्यमेवमुक्त्वाचसंप्रहस्यचतेमिथः॥ जगामभार्गवीवेश्मतथ्य
मित्यभिजानती॥८॥ ययातिर्देवयान्यांतुपुत्रावजनयन्नृप॥ यदुंचतुर्वसुंचैवशक्रविष्णूइवापरौ॥९॥ त
स्मादेवतुराजर्षेःशर्मिष्ठावार्षपर्वणी॥ द्रुह्युंचानुंचपूरुंचत्रीन्कुमारानजीजनत्॥१०॥ ततःकालेतुकस्मिं
श्चिद्देवयानीशुचिस्मिता॥ ययातिसहिताराजन्निर्जगाममहद्वनं॥११॥ ददर्शचतदातत्रकुमारान्देव

रूपिया॥ क्रीडमानान्सुचीनस्तु दृष्ट्वानुविस्मिता चेदमब्रवीत्॥१२॥ कस्यैते दारका राजन् देवपुत्रोपमाः शुभाः॥
वर्चसा रूपतश्चैव सदृशं प्रतिभाति मे॥१३॥ शौनक उवाच॥॥ एवं दृष्ट्वा तु राजानं कुमारानन्वपृच्छत॥ किंना
मधेयं गोत्रं वा पुत्रकाः कस्य पंडिताः॥१४॥ विब्रूत मे यथातथ्यं श्रोतुमिच्छामि यत्नतः॥ ते दर्शयन्प्रदेशिन्या तमे
व च पत्नतमं॥१५॥ शर्मिष्ठां मातरं चैव तस्यास्तु च दारकाः॥ शौनक उवाच॥॥ इत्युक्त्वा सहितास्ते तु राजान
मुपचक्रमुः॥ नाभ्यनंदत तान् राजा देवयान्यास्तदांतिके॥१६॥ रुदंतस्ते तु शर्मिष्ठामभ्ययुर्बालिकास्तदा॥ दृ
ष्ट्वा तु तेषां बालानां प्रणयं पार्थिवं प्रति॥१७॥ बुध्वा च तत्वतो देवी शर्मिष्ठामिदमब्रवीत्॥१७॥ देवयान्युवाच॥॥
मदधीना सती कस्मादकार्षीर्विप्रियं मम॥ तमेवासुरधर्मं त्वमास्थिता न बिभेषि मे॥१८॥ शर्मिष्ठोवाच॥॥ यदु
क्तमृषिरित्येवं तत्सत्यं चारुहासिनि॥ न्यायतो धर्मतश्चैव चरंती न बिभेमि ते॥१९॥ यदि त्वया वृतो भर्ता वृत ए
व मया तदा॥ सखि भर्ता हि धर्मेण भर्तारं चातिशोभते॥२०॥ पूज्यासि मम मान्या च ज्येष्ठा श्रेष्ठा च ब्राह्मणी॥ त
तो हि मे पूज्यतरो राजर्षिः किं न वेत्थ तत्॥२१॥ शौनक उवाच॥॥ श्रुत्वा तस्यास्ततो वाक्यं देवयान्यब्रवीदिदं॥ रा
जन्नद्येह वत्स्यामि विप्रियं मे त्वया कृतं॥२२॥ सहसोत्पतितां श्यामां दृष्ट्वा तां साश्रुलोचनां॥ तूर्णं सकाशं का
व्यस्य प्रस्थितां व्यथितस्तया॥२३॥ अनुवव्राज संभ्रान्तः पृष्ठतः सांत्वयन्नृपः॥ न्यवर्तत न सा चैव क्रोधसंरक्तलो

चना॥२४॥ अविब्रुवंती किंचिद्राजानं साश्रुलोचना॥ अचिरादेव संप्राप्ता काव्यस्योशनसोंतिकं॥२५॥ सा
तु दृष्ट्वैव पितरमभिवाद्याग्रतः स्थिता॥ अनंतरं ययातिस्तु पूजयामास भार्गवं॥२६॥ देवयान्युवाच॥॥ अधर्मेण जितो ध
र्मः प्रवृत्तमधरोत्तरं॥ शर्मिष्ठयातिवृत्तास्मि दुहित्रा वृषपर्वणः॥२७॥ त्रयोस्यां जनिताः पुत्रा राज्ञानेन ययातिना॥
दुर्भगाया मम द्वौ तु पुत्रौ तात ब्रवीमि ते॥२८॥ धर्मज्ञ इति [illegible] विख्यात एष राजा भृगूद्वह॥ अतिक्रांतश्च मर्यादां का
व्यो तत्कथयामि ते॥२९॥ शुक्र उवाच॥ धर्मज्ञस्त्वं महाराज यो धर्ममकृथाः प्रियं॥ तस्माज्जरा त्वामचिराद्धर्ष
यिष्यति दुर्दितुर्दानवेंद्रस्य धर्म्यमेतत्कृतं मया॥३१॥ ऋतुं वै याचमानाया न ददाति पुमान्वृतः॥ भ्रूणहेत्युच्यते ब्र
ह्मन् स इह ब्रह्मवादिभिः॥३२॥ ऋतुकामां स्त्रियं यस्तु गम्यां रहसि याचितः॥ नोपैति हि स धर्मेषु भ्रूणहेत्युच्यते
बुधैः॥३३॥ इत्येतानि समीक्ष्याहं कारणानि भृगूद्वह॥ अधर्मभयसंविग्नः शर्मिष्ठामुपजग्मिवान्॥३४॥ शु
क्र उवाच॥॥ ननु अहं प्रत्यवेक्ष्यस्ते मदधीनोसि पार्थिव॥ धर्मतोपवदत्येव मिथ्याचरसि पार्थिव॥३५॥ मिथ्याच
रसि धर्मत्वं चौर्यवानसि पार्थिव॥३५॥ शौनक उवाच॥॥ क्रुद्धेनोशनसा शप्तो ययातिर्नाहुषस्तदा॥ पूर्वं वयः
परित्यज्य जरां सद्योन्वपद्यत॥३६॥ ययातिरुवाच॥॥ अतृप्तो यौवनेस्यां च देवयान्यां भृगूद्वह॥ प्रसादं कुरु मे ब्र
ह्मन् जरेयं नाविशेत मां॥३७॥ शुक्र उवाच॥॥ नाहं मृषा वदाम्येतज्जरां प्राप्तोसि भूमिप॥ जरां त्वेतां त्वमन्यस्मिन् संक्र

म०पु० मेयप्रच्छति ॥ ३८ ॥ ययातिरुवाच ॥ ॥ राज्यमात्कुरवो ब्रह्मन्नुग्रएष नाकः कीर्तिमान्सदा ॥ यो मे दद्याद्वयः पुत्रस्तद्भवान्
५० मनुमन्यतां ॥ ३९ ॥ शुक्र उवाच ॥ ॥ संक्रामयिष्यसि जरां यथेष्टं नहुषात्मज ॥ मामनुध्याय भावेन न पापमवाप्स्यसि
४० ॥ वयो दास्यति ते पुत्रो यः स राजा भविष्यति ॥ आयुष्मान्कीर्तिमांश्चैव बह्वपत्यस्तथैव च ॥ ४१ ॥ ॥ इति श्रीमत्स्य
पुराणे सोमवंशे ययातिचरिते ॥ शौनक उवाच ॥ जरां प्राप्य ययातिस्तु स्वपुरं प्राप्य चैव हि ॥ पुत्रं ज्येष्ठं वरिष्ठं च य
दुमित्यब्रवीद्वचः ॥ १ ॥ ययातिरुवाच ॥ ॥ जरा वली च मां तात पलितानि च पर्यगुः ॥ काव्यस्योशनसः शापान्न च तृ
प्तोस्मि यौवने ॥ २ ॥ त्वं यदो प्रतिपद्यस्व पाप्मानं जरया सह ॥ यौवनेन त्वदीयेन चरेयं विषयानहं ॥ ३ ॥ पूर्णे वर्षस
हस्रे तु पुनस्ते यौवनं त्वहं ॥ दत्त्वा स्वं प्रतिपत्स्यामि पाप्मानं जरया सह ॥ ४ ॥ यदुरुवाच ॥ ॥ सितश्मश्रुधरो दीनो ज
रया शिथिलीकृतः ॥ वली संततगात्रस्तु दुर्दर्शो दुर्बलः कृशः ॥ ५ ॥ अशक्तः कार्यकरणे परिभूतः स यौवनैः ॥ स
होपजीविभिश्चैव तां जरां नाभिकामये ॥ ६ ॥ संति ते बहवः पुत्रा मत्तः प्रियतरा नृप ॥ जरां ग्रहीतुं धर्मज्ञ पुत्रमन्यं
ब्रवीहि वै ॥ ७ ॥ ययातिरुवाच ॥ ॥ यस्त्वं मे हृदयाज्जातो स्वं वयो न प्रयच्छसि ॥ पाप्मनो तु ज संबंधात्तद्दुःप्रजो वै भ
विष्यसि ॥ ८ ॥ तुर्वसो प्रतिपद्यस्व पाप्मानं जरया सह ॥ यौवनेन चरेयं वै विषयांस्तव पुत्रक ॥ ९ ॥ पूर्णे वर्षसह राम
स्रे तु पुनर्दास्यामि यौवनं ॥ तपे व प्रतिपत्स्यामि पाप्मानं जरया सह ॥ १० ॥ तुर्वसुरुवाच ॥ ॥ न कामये जरां तात ५०

कामभोगप्रणाशनीं ॥ बलरूपांतकरणीं बुद्धिप्राणविनाशनीं ॥ ११ ॥ ययातिरुवाच ॥ ॥ यस्त्वं मे हृदयाज्जातो व
यः स्वं न प्रयच्छसि ॥ तस्मात्प्रजा समुच्छेदं तुर्वसो तव यास्यति ॥ १२ ॥ संकीर्णाचारधर्मेषु प्रतिनारेषु पुत्रक ॥ पिशि
ताशिषु लोकेषु नृनराजा भविष्यसि ॥ १३ ॥ गुरुदारप्रसक्तेषु तिर्यग्योनिगतेषु च ॥ म्लेच्छेषु पशुधर्मेषु पापेषु भ
विष्यसि ॥ १४ ॥ एवं तु तुर्वसुं शप्त्वा ययातिः सुतमात्मजं ॥ शर्मिष्ठायाः सुतं श्रेष्ठं द्रुह्युं वचनमब्रवीत् ॥ १५ ॥ य
यातिरुवाच ॥ ॥ द्रुह्यो त्वं प्रतिपद्यस्व रूपवर्णविनाशनीं ॥ जरां वर्षसहस्रं मे यौवनं स्वं प्रयच्छ तत् ॥ १६ ॥ पूर्णे वर्षस
हस्रे तु प्रदास्यामि यौवनं ॥ स्वं चादास्यामि भूयो हि पाप्मानं जरया सह ॥ १७ ॥ द्रुह्युरुवाच ॥ ॥ न राजं न रथं ना
श्वं जीर्णो भुंक्ते न च स्त्रियं ॥ वाग्भंगश्चास्य भवति न जरां तेन कामये ॥ १८ ॥ यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रय
च्छसि ॥ तस्मात्द्रुह्यो प्रियः कामो न ते संपत्स्यते क्वचित् ॥ १९ ॥ नाधुप्लवसंचारी यत्र नित्यं भविष्यति ॥ राज्यभो
जसग्राह्यस्त्वं तत्र प्राप्स्यसि सान्वयः ॥ २० ॥ ययातिरुवाच ॥ अनो त्वं प्रतिपद्यस्व पाप्मानं जरया सह ॥ एवं वर्षसह
स्रं तु चरेयं यौवनेन ते ॥ २१ ॥ अनुरुवाच ॥ ॥ जीर्णः शिशुवदादत्ते कालेन्नमशुचिर्यथा ॥ न जुहोति च काले ग्निं तां ज
रां नाभिकामये ॥ २२ ॥ ययातिरुवाच ॥ ॥ यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ॥ जरादोषस्त्वया प्रोक्तस्तस्मा
त्त्वं प्रतिपद्यसे ॥ २३ ॥ प्रजाश्च यौवनं प्राप्ता विनिसंसर्पवेतया ॥ अग्निप्रस्कन्दनगतास्त्वं चाप्येवं भविष्यसि ॥ २४ ॥ य

म॰पु॰
५१

ययातिरुवाच॥ पूरो त्वं प्रतिपद्यस्व पाप्मानं जरया सह॥ एवमुक्तः प्रत्युवाच पूरुः पितरमंजसा॥२५॥ पूरुरुवाच॥
यथात्थ त्वं महाराज तत्करिष्यामि ते वचः॥ प्रतिपत्स्यामि ते राजन् पाप्मानं जरया सह॥२६॥ गृहाण यौवनं मत्तः
चर कामान्यथेप्सितान्॥ जरयाहं प्रतिच्छन्नो वयोरूपधरस्तव॥२७॥ यौवनं भवतो दत्त्वा चरिष्यामि यथेच्छया
२७॥ ययातिरुवाच॥ पूरो प्रीतोऽस्मि ते वत्स वरं चेमं ददामि ते॥ सर्वकामसमृद्धा ते प्रजा राज्ये भविष्यति॥२८॥
इति श्रीमत्स्यपुराणे ययातिचरिते॥ ॥ शौनक उवाच॥ ॥ एवमुक्त्वा स राजर्षिः काव्यं स्मृत्वा महाव्रतं॥ संक्राम
यामास जरां तदा पुत्रे महात्मनि॥१॥ पौरवेणाथ वयसा ययातिर्नहुषात्मजः॥ प्रीतियुक्तो नरश्रेष्ठ चचार
विषयान्प्रियान्॥२॥ यथाकामं यथोत्साहं यथाकालं यथासुखं॥ धर्माविरुद्धान् राजेंद्रो यथार्हति स एव
हि॥३॥ देवानतर्पयद्यज्ञैः श्राद्धैरपि पितामहान्॥ दीनाननुग्रहैरिष्टैः कामैश्च द्विजसत्तमान्॥४॥ अतिथी
नन्नपानैश्च विशश्च प्रतिपालनैः॥ आनृशंस्येन शूद्रान्दस्यून्निग्रहेण च॥५॥ धर्मेण च प्रजाः सर्वा यथा
वदनुरंजयन्॥ ययातिः पालयामास साक्षादिंद्र इवापरः॥६॥ स राजा सिंहविक्रांतो युवा विषयगोचरः॥ अवि
रोधेन धर्मस्य चचार सुखमुत्तमं॥७॥ स संप्राप्य शुभान्कामांस्तृप्तः खिन्नश्च पार्थिव॥ कालं वर्षसहस्रं तु सस्मा
स्मार मनुजाधिपः॥८॥ परिचिंत्य स कालज्ञः कलाः काष्ठाश्च वीर्यवान्॥ पूर्णं मत्वा ततः कालं पूरुं पुत्रमुवाच ह॥

राम॰
५१

९॥ न तात कामः कामानामुपभोगेन शाम्यति॥ हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते॥१०॥ यत्पृथिव्यां व्रीहियवं
हिरण्यं पशवः स्त्रियः॥ नालमेकस्य तत्सर्वमिति पश्यन्न मुह्यति॥११॥ यथासुखं यथोत्साहं यथाकाममरिंदम॥
सेविता विषयाः पुत्र यौवनेन मया तव॥१२॥ पूरो प्रीतोऽस्मि भद्रं ते गृहाणेदं स्वयौवनं॥ राज्यं चैव गृहाणेदं त्वं हि
मे प्रियकृत्सुतः॥१३॥ शौनक उवाच॥ ॥ प्रतिपेदे जरां राजा ययातिर्नाहुषस्तदा॥ यौवनं प्रतिपेदे च पूरुः स्वं पु
नरात्मनः॥१४॥ राज्येऽभिषेक्तुकामं तं पूरुं पुत्रं कनीयसं॥ ब्राह्मणप्रमुखा वर्णा इदं वचनमब्रुवन्॥१५॥ कथं
शुक्रस्य दौहित्रं देवयान्याः सुतं प्रभो॥ ज्येष्ठं यदुमतिक्रम्य राज्यं पूरोः प्रदास्यसि॥१६॥ ज्येष्ठो यदुस्तव सुतस्तु
र्वसुस्तदनंतरं॥ शर्मिष्ठायाः सुतो द्रुह्युस्ततोऽनुः पूरुरेव च॥१७॥ कथं ज्येष्ठमतिक्रम्य कनीयान् राज्यमर्हति॥
एतत्संबोधयामास स्वधर्ममनुपालय॥१८॥ ययातिरुवाच॥ ब्राह्मणप्रमुखा वर्णाः सर्वे शृण्वंतु मे वचः॥ ज्ये
ष्ठं प्रति यथा राज्यं न देयं मे कथंचन॥१९॥ मम ज्येष्ठेन यदुना नियोगो नानुपालितः॥ प्रतिकूलः पितुर्यश्च न स सु
तः सतां मतः॥२०॥ मातापित्रोर्वचनकृद्धितः पथ्यश्च यः सुतः॥ स पुत्रः पुत्रवद्यश्च वर्तते पितृमातृषु॥२१॥
यदुनाहमवज्ञातस्तथा तुर्वसुनापि च॥ द्रुह्युना चानुना चैवमप्यवज्ञा कृता भृशं॥२२॥ पूरुणा मे कृतं वाक्यं
मानितं च विशेषतः॥ कनीयान्मम दायादो जरा येन धृता मम॥२३॥ मम कामः स च कृतः पूरुणा पुत्ररूपिणा॥

म॰पु॰ ५२

शुक्रेण च वरो दत्तः काम्येनोशनसा स्वयं ॥२४॥ पुत्रो यस्त्वानुवर्त्तेत स राजा पृथिवीपतिः ॥ भवंतः प्रतिजानंतु
पूरू राज्येभिषिच्यतां ॥२५॥ प्रकृतय ऊचुः ॥ यः पुत्रो गुणसंपन्नो मातापित्रोर्हितः सदा ॥ सर्वमर्हति कल्या
णं कनीयानपि स प्रभुः ॥ अर्हः पूरोरिदं राज्यं यः प्रियः प्रियकृत्तव ॥ वरदानेन शुक्रस्य न शक्यं वक्तुमुत्तरं
२७॥ शौनक उवाच ॥ ॥ पौरजानपदैस्तुष्टैरित्युक्तो नाहुषिस्तदा ॥ अभिषिच्य ततः पूरुं राज्ये स्वे सुतमात्म
जं ॥२८॥ दत्वा च पूरवे राज्यं वनवासाय दीक्षितः ॥ पुरात्स निर्ययौ राजा ब्राह्मणैस्तापसैः सह ॥२९॥ यदो
स्तु यादवा जातास्तुर्वसोर्यवनाः सुताः ॥ द्रुह्यस्य तु सुता भोजा अनोस्तु म्लेच्छजातयः ॥३०॥ पूरोस्तु पौरवो
वंशो यत्र जातोसि पार्थिव ॥ इदं वर्षसहस्राय राज्यं कारयितुं वशी ॥३१॥ ॥ इति श्रीमत्स्यपुराणे सोमवंशे
ययातिचरिते ॥ ॥ शौनक उवाच ॥ एवं स नहुषो राजा ययातिः पुत्रमीप्सितं ॥ राज्येभिषिच्य मुदितो वानप्र
स्थो भवन्मुनिः ॥१॥ उषित्वा वनवासं स ब्राह्मणैः सह संशितः ॥ फलमूलाशनो दांतो ययातिः स्वरितो ग
तः ॥२॥ स गतः सुरवासं वै न्यवसन्मुदितः सुखं ॥ कालस्य नातिमहतः शक्रेण विनिपातितः ॥३॥ न्यपतत्प्र
च्युतः स्वर्गादप्राप्तो मेदिनीतलं ॥ स्थित आसीदंतरिक्षे स तदेति श्रुतं मया ॥४॥ तत एव पुनश्चापि गतः स्वर्ग
मिति श्रुतिः ॥ राज्ञा वसुमना सार्द्धमष्टकेन च वीर्यवान् ॥५॥ प्रतर्दनेन शिबिना समेत्य किल संसदि ॥ ५॥ राम॰ ५२

शतानीक उवाच ॥ ॥ कर्मणा केन स दिवं पुनः प्राप्तो महीपतिः ॥ कथमिंद्रेण भगवन् पातितो मेदिनीतले ॥६॥ स
र्वमेतदशेषेण श्रोतुमिच्छामि तत्वतः ॥ कथ्यमानं त्वया विप्र देवर्षिगणसन्निधौ ॥७॥ देवराजसमो ह्यासीद्ययाति
ः पृथिवीपतिः ॥ वर्द्धनः कुरुवंशस्य विभावसुसमद्युतिः ॥८॥ तस्य विकीर्ण्णवंशस्य सत्यकीर्त्तेर्महात्मनः ॥ चरि
तं श्रोतुमिच्छामि दिवि चेह च सर्वशः ॥९॥ शौनक उवाच ॥ ॥ हंत ते कथयिष्यामि ययातेरुत्तमां कथां ॥ दिवि
चेह च पुण्यार्थं सर्वपापप्रमोचनीं ॥१०॥ ययातिर्नाहुषो राजा पूरुं पुत्रं कनीयसं ॥ राज्येभिषिच्य मुदितः प्रव
व्राज वने तदा ॥११॥ अंत्येषु स विनिक्षिप्य पुत्रान् यदुपुरोगमान् ॥ फलमूलाशनो राजा वने सोन्यवसच्चिरं ॥
१२॥ संजितात्मा जितक्रोधस्तर्पयन् पितृदेवताः ॥ अग्नींश्च विधिवज्जुह्वन् वानप्रस्थविधानतः ॥१३॥ अतिथी
न् पूजयन्नित्यं वन्येन हविषा भुवि ॥ शिलोंछवृत्तिमास्थाय शेषान्नकृतभोजनः ॥१४॥ पूर्णं वर्षसहस्रं वर्षाणामे
वं वृत्तिरभून्नृप ॥ अंबुभक्षः स च शरदस्त्रिंशन्नासीन्नियतवाङ्मनाः ॥१५॥ ततश्च वायुभक्षोभूत्संवत्सरमतंद्रितः ॥
पंचाग्निमध्ये च तपस्तेपे संवत्सरं पुनः ॥१६॥ एकपादः स्थितश्चासीत् षण्मासाननिलाशनः ॥ पुण्यकीर्त्तिस
ततः स्वर्गं जगामावृत्य रोदसी ॥१७॥ इति श्रीमत्स्यपुराणे सोमवंशे ययातिचरिते ॥ शौनक उवाच ॥ ॥ स्वर्गतस्तु
स राजेंद्रो न्यवसद्देवसद्मनि ॥ पूजितस्त्रिदशैः साध्यैर्मरुद्भिर्वसुभिस्तदा ॥१॥ देवलोकाद्ब्रह्मलोकं संचरन्

म०पु०
५२

मुएष रुद्रुत्तञ्जवसत्यपिवीपालोदीर्घकालमितिस्मृतिः ॥२॥ सकदाचिन्नृपश्रेष्ठो ययातिः स्वर्गमागमत॥
कर्णातेतत्रनाकेण दृष्टः सपृथिवीपतिः॥३॥ऊऋउवाच॥॥ यदाष्टरुस्तवरूपेणराजन्जरांगृहीत्वाप्रच
चारलोके॥तदाराज्यंसंप्रदायैवतस्मैत्वयाकिमुक्तः कथयेहसत्यं॥४॥ययातिरुवाच॥॥गंगायमुनयोर्म
ध्येकृत्स्नोयंविषयस्तव॥मध्येपृथिव्यास्त्वंराजाभ्रातरोतिथयस्तव॥५॥अक्रोधनःक्रोधनेभ्योविशिष्टस्त
थातितिक्षुरतितिक्षोर्विशिष्टः॥अमानुषेभ्योमानुषश्चप्रधानोविद्वांस्तथैवाविदुषःप्रधानः॥६॥आक्रो
श्यमानोनाक्रोशेन्मन्युरेवंतितिक्षतः॥आक्रोष्टारंनिर्दहतिसुकृतंचास्यविंदति॥७॥नारंतुदःस्यान्नृ
शंसवादीनहीनतःपरमभ्याददीत॥पापस्यवाचःपरउद्विजेतानतांवदेद्रुशतींपापलोक्यां॥८॥अरंतुदंप
रुषंतीक्ष्णवाचंवाकंटकैर्वितुदंतंमनुष्यान॥विद्यादलक्ष्मीकतमंजनानांमुखेनिबद्धांनिकृतिंव
हंतं॥९॥सद्भिःपुरस्तादभिपूजितःस्यात्सद्भिस्तथापृष्ठतोनिंदितःस्यात॥सदासतामतिवादंतितिक्षे
त्सतांवृत्तंपालयन्नार्यवृत्तः॥१०॥वाक्सायकावदनान्निःपतंतियैराहतःशोचतिरात्र्यहानि॥परस्यनाम
र्मसुतेःपतंतितान्पंडितोनावसृजेत्परस्य॥११॥नास्तीदृशंसंवननंत्रिषुलोकेषुकिंचन॥यथामैत्रीचभू राम·
तेषुदानंचमधुराचवाक॥१२॥तस्मात्सांत्वंसदावाच्यंनवाच्यंपरुषंक्वचित॥पूज्यान्संपूजयेद्दद्यान्नाभि ५३

याचेत्कदाचन॥१३॥१॥इतिश्रीमत्स्यपुराणेययातिचरिते॥॥इंद्रउवाच॥सर्वाणिकर्माणिसमाप्यराजन्गृ
हान्परित्यज्यवनंगतोसि॥तत्वांपृच्छामिनहुषस्यपुत्रकेनासितुल्यस्तपसाययाते॥१॥ययातिरुवाच॥॥
नाहंदेवमनुष्येषुनगंधर्वमहर्षिषु॥आत्मानंतपसातुल्यंकंचित्पश्यामिवासव॥२॥इंद्रउवाच॥॥यदावमंस्थाः
सदृशःश्रेयसश्चपापीयसश्चाविदितप्रभावः॥तस्माल्लोकास्त्वंतवंतस्तवेमेक्षीणेपुण्येपतितास्यद्यराजन॥
३॥ययातिरुवाच॥सुरर्षिगंधर्वनरावमानात्क्षयंगतामेयदिशक्रलोकाः॥इच्छेयतत्सुरलोकाद्विही
नःसतांमध्येपतितुंदेवराज॥४॥इंद्रउवाच॥॥सतांसकाशेपतितोसिराजंश्च्युतःप्रतिष्ठायत्रलब्धासि
भूयः॥एवंविदित्वातुपुनर्ययातेनतेवमान्याःसदृशाःश्रेयसश्च॥५॥शौनकउवाच॥ततःप्रहायामर
राजजुष्टान्पुण्याल्लोकान्पात्यमानंययातिं॥संप्रेक्ष्यराजर्षिवरोष्टकस्तमुवाचवैधर्मनिधानगोप्ता॥
६॥अष्टकउवाच॥॥कस्त्वंयुवावासवतुल्यरूपःस्वतेजसादीप्यमानोयथाग्निः॥पतत्युदीर्णाम्बुधरां
धकारात्खात्खेचराणांप्रवरोयथार्कः॥७॥दृष्ट्वाचत्वांसूर्यपथात्पतंतंवैश्वानरार्कद्युतिमप्रमेयं॥किं
नुस्विदेतत्पततीतिसर्वेवितर्कयंतःपरिमोहिताःस्म॥८॥दृष्ट्वाचत्वांधिष्ठितंदेवमार्गेमत्वाकविष्णुप्रति
ममनावं॥अभ्युद्गतास्त्वांवयमेवसर्वेतत्त्वंपातेतवजिज्ञासमानाः॥९॥नचापित्वांधृष्णुमःप्रष्टुमग्रेनचत्व

मस्मान्पृछसि देवयेस्मः॥ तन्नो पृछ्छासि मिस्म्हइणीयरूपं कस्त्वं वा किं निमित्तं त्वमागाः॥१०॥ भयं तु ते येतु
विषादमोहौ त्यजाशुदेवेंद्रसमानरूपं॥ त्वां वर्त्तमानं हि सतां सकाशे नालं प्रसोढुं बलहापि शक्रः॥११॥
संतः प्रतिष्ठा हि सुखच्युतानां सतां सदेवामरराजकल्पः॥ ते संगताः स्थावरजंगमेशाः प्रतिष्ठितस्त्वं य
द्धतो पुसत्सु॥१२॥ प्रभुरग्निः प्रतपने भूमिरावपने प्रभुः॥ प्रभुः सूर्यप्रकाशाय सतां चाभ्यागतः प्रभुः॥
१३॥॥ इति श्रीमत्स्यपुराणे ययातिचरिते॥॥ ययातिरुवाच॥॥ अहं ययातिर्नहुषस्य पुत्रः पूरोः पिता स
र्वभूतावमानात्॥ प्रभ्रंशितोहं सुरसिद्धलोकात्परिच्युतः प्रपताम्यल्पपुण्यः॥१॥ अहं हि पूर्वो वयसा भव
द्भ्यस्तेनाभिवादं भवतां न प्रयुंज्ये॥ यो विद्यया तपसा जन्मना वा वृद्धः स पूज्यो भवति द्विजानां॥२॥ ययाति
रुवाच॥॥ प्रतिकूलं कर्मणां पापमाहुस्तद्वर्त्तिनां प्रवणं पापलोक्यं॥ संतोसतां नानुवर्त्तंते चैतद्यथा चा
त्मैषामनुकूलवादी॥३॥ अभून्मे धनं मे विपुलं महद्वै विचेष्टमानो नाधिगंता तदस्मि एवं प्रधार्यात्महिते नि
विष्टो यो वर्त्तते स विजानाति जीवन्॥४॥ नानाभावा बहवो जीवलोके दैवाधीना नष्टचेष्टाधिकाराः॥ तत्प्रा
प्य न विहन्येत धीरो दिष्टं बलीय इति मत्वा बुध्या॥५॥ सुखं हि जंतुर्यदि वापि दुःखं दैवाधीनं वदंति चात्मबु
द्धा॥ तस्माद्दिष्टं बलवन्मन्यमानो न संज्वरेनापि हृष्येत्कदाचित॥६॥ दुःखे न तप्येन्न सुखेन हृष्येत्समेन

वर्त्तेत सदैव धीरः॥ तस्माद्दिष्टं बलवन्मन्यमानो न संज्वरेनापि हृष्येत्कदाचित॥७॥ भये न मुह्याम्यष्टकाहं कु
दाचित्संतापो मे मनसो नास्ति किंचित॥ धाता यथा मां विदधाति लोके ध्रुवं तथाहं भवितेति मत्वा॥८॥ संस्वे
दजजरायुजांडजोद्भिजाश्च सरीसृपाः कृमयोप्यप्सु मत्स्याः॥ तथाश्मानस्तृणकाष्ठं च सर्वं दिष्टक्षये स्वां
प्रकृतिं भजंते॥९॥ अनित्यतां सुखदुःखस्य बुद्ध्वा कस्मात्संतापमष्टकाहं भजेयं॥ किं कुर्यां वै किं च कृत्वा न
तप्ये तस्मात्संतापं वर्जयाम्यप्रमत्तः॥१०॥ एवं ब्रुवाणं नृपतिं महाष्टकः पुनरेवान्वपृछ्छत्॥ मातामहं सर्व
गुणोपपन्नं यत्र स्थितं स्वर्गलोके यथावत्॥११॥ अष्टक उवाच॥॥ ये ये लोकाः पार्थिवेंद्र प्रधानास्त्वया
भुक्ता यं च कालं यथा च॥ तन्मे राजन्ब्रूहि सर्वं यथावत्क्षेत्रज्ञवद्भाषसे त्वं हि धर्मं॥२॥ ययातिरुवाच॥
॥ अहं राजा भूविह सार्वभौमस्ततो लोकान्महतो चरन्वै॥ तत्रावसं वर्षसहस्रमात्रं ततो लोकं परम
भ्युपेत॥३॥ देवस्य देवस्य निवेशनेन विजित्य लोकान्प्रवसं यथेष्टं॥ संपूज्यमानस्त्रिदशैः समस्तै
स्तुल्यप्रभावद्युतिरीश्वराणां॥१४॥ तथावसन्नंदने कामरूपी संवत्सराणामयुतं शतानां॥ सहाप्स
रोभिर्विचरन्पुण्यगंधान्नगान्पुष्पितांश्चारुरूपान॥१५॥ तत्रस्थितं मां देवसुखेषु सक्तं कालेतीतेमह
ति ततोतिमात्रे॥ दूतो देवानामब्रवीदुग्ररूपो ध्वंसेत्युच्चैस्त्रिःप्लुतेन स्वरेण॥१६॥ एतावन्मे विदि

म०पु०
५५

तेराजसिंहततोऽन्तरिक्षे हं नेदनात्क्षीणपुण्यः॥ नाचोष्मौ पंचांतरिक्षे सुराणां सानुक्रोशा त्वणे च तोसानवेंड:
१७॥ अहो कष्टं क्षीणपुण्यो ययातिः पतत्यसौ पुण्यकृत्पुण्यकीर्त्तिः॥ एवं ब्रुवन् पतमानस्ततोहंस
तो मध्ये निपतेयं कथं तु॥ १८॥ तैरष्टको यत्र नृपं समीक्ष्य चेमां त्वरितमुपागतेस्मि॥ हविर्गंधैर्दर्शि
ताजन्म नृपि धर्मा यांगं प्रतिगृह्य प्रतीतः॥ १९॥ इति श्री मत्स्यपुराणे ययातिचरिते॥ ॥ अष्टक उवाच॥ स
दा वसन्नंदने कामरूपी संवत्सराणामयुतं शतानां॥ किं कारणं कार्त्तयुगप्रधान हित्वा तत् त्वं वसुधामभ्य
पद्यत॥ १॥ ययातिरुवाच॥ ॥ ज्ञातिः सुहृत्स्वजनो यो यथेह क्षीणे वित्ते मानवैस्त्यज्यते हि॥ तथा च तत्क्षी
णपुण्यं मनुष्यं त्यजंति सद्यः सेश्वरा देवसंघाः॥ २॥ अष्टक उवाच॥ ॥ कथं तत्र क्षीणपुण्या भवंति संमु
ह्यते तत्र मनोतिमात्रं॥ किं विशिष्टाः कस्य धामोपयांति तद्वै ब्रूहि क्षेत्रवित्त्वं मनो मे॥ ३॥ ययातिरुवाच॥
इमं भौमं नरकं ते पतंति लालप्यमाना नरदेव सर्वे॥ ते कंकगोमायुबलाशनार्थं क्षितौ विवृद्धिं बहुधा
व्रजंति॥ ४॥ तस्मादेतद्वर्जनीयं नरेण दुष्टं लोके गर्हणीयं च कर्म॥ आख्यातं ते मे सर्वमेवं नृप श्चेदानीं
वदतां किं वदामि॥ ५॥ अष्टक उवाच॥ ॥ यदा तु तान्वितुदंते वयांसि तथा गृध्राः शितिकंठाः पतंगाः॥ त
दा भवंति कथमाभवंति नभौमम् अन्यं नरकं शृणोमि॥ ६॥ ययातिरुवाच॥ ऊर्ध्वं देहात्कर्मणो जृंभमाणो व्य

राम.
५५
१

क्तं पृथिव्यामनुसंचरंति॥ इमं भौमं नरकं ते पतंति नावेक्षंते वर्षपूगाननेकान्॥ ७॥ षष्टिं सहस्राणि पतंति व्यो
म्नि तथा अशीतिं परिवत्सराणि॥ तान्वै तुदंते पततः प्रपातं भीमा भौमा राक्षसास्तीक्ष्णदंष्ट्राः॥ ८॥ अष्टक उवा
च॥ यदेतान्स्पतन्तस्तुदंति भीमा भौमा राक्षसास्तीक्ष्णदंष्ट्राः॥ कथं भवंति कथमाभवंति कथं भूता गर्भ
भूता भवंति॥ ९॥ ययातिरुवाच॥ ॥ अस्रं रेतः पुष्पफलानुपृक्तमन्वेति सद्यः पुरुषेण सृष्टं॥ तद्वै त
स्य रज आपद्यते स गर्भभूतः समुपैति तत्र॥ १०॥ वनस्पतींश्चौषधीश्चाविशंति अपो वायुः पृथिवी
चांतरिक्षं॥ चतुष्पदं द्विपदं चापि सर्वमेवं भूता गर्भभूता भवंति॥ ११॥ अष्टक उवाच॥ ॥ अन्यद्वपुर्वि
दधातीह गर्भमुताहो स्वित्स्वेन कामेन याति॥ आपद्यमानो नरयोनिमेतामाचक्ष्व मे संशयं पृच्छत
स्तं॥ १२॥ शरीरदेहादिसमुच्छ्रयं च चक्षुःश्रोत्रे लभते केन संज्ञां॥ एतत्तत्त्वं सर्वमाचक्ष्व पृष्टः क्षेत्रज्ञं
त्वां तात मन्याम सर्वे॥ १३॥ ययातिरुवाच॥ ॥ वायुः समुत्कर्षति गर्भयोनिमृतौ रेतः पुष्परसानुपृक्तं॥
स तत्र तन्मात्रकृताधिकारः क्रमेण संवर्द्धयतीह गर्भं॥ १४॥ स जायमानो विगृहीतगात्रः संज्ञामधिष्ठाय
ह ततो मनुष्यः॥ स श्रोत्राभ्यां वेदयतीह शब्दं सर्वं रूपं पश्यति चक्षुषा तु॥ १५॥ घ्राणेन गंधं जिह्वयाथो
रसं च त्वचा स्पर्शं मनसा वेदनां च॥ इत्यष्टकेहोपचितं हि विद्धि महात्मनः प्राणभृतः शरीरे॥ १६॥ अष्टक उ०॥

यः संस्थितः [illegible] दह्यते वा निखन्यते वापि निघृष्यते वा ॥ अभावभूतः सविनाशमेत्य कथमात्मानं चेत
यते पुरस्तात् ॥१७॥ ययातिरुवाच ॥ हित्वासोस्रून्सुप्तवन्निष्टनित्वा पुरोधाय सुकृतं दुःकृतं च ॥ अ
न्यां योनिं पुण्यपापानुसारां हित्वा देहं विशते राजसिंह ॥१८॥ पुण्यां योनिं पुण्यकृतो विशंति पापां पा
पां पापकृतो व्रजंति ॥ कीटाः पतंगाश्च भवंति पापा न मे विविक्षास्ति महानुभाव ॥१९॥ चतुष्पदा द्विपदा
श्चैव येच तथाभूता गर्भभूता भवंति ॥ आख्यातमेतन्निखिलं ते मया तु भूयः पृच्छ किं पृच्छसि राजसिंह ॥२०॥
अष्टक उवाच ॥ किंस्वित्कृत्वा लभते तात लोकान्मर्त्यः श्रेष्ठांस्तपसा विद्यया वा ॥ तन्मे तत्त्वं पृष्टः सर्वमाव
दयाशु शुभांल्लोकान्येन गच्छेत्क्रमेण ॥२१॥ ययातिरुवाच ॥ तपश्च दानं च शमो दमश्च ह्रीरार्जवं स
र्वभूतानुकंपा ॥ स्वर्गस्य लोकस्य वदंति संतो द्वाराणि सप्तैव महांति पुंसां ॥२२॥ नश्यंति मानेन तमोभि
भूताः पुंसस्सदैवेति वदंति संतः ॥ अधीयमानः पंडितं मन्यमानो यो विद्यया हंति यशः परस्य ॥२३॥
तस्यांतवंतस्तु भवंति लोका न चास्य तद्ब्रह्मफलं ददाति ॥ चत्वारि कर्माण्यभयंकराणि भयं प्रयच्छं
त्ययशः कृतानि ॥२४॥ मानाग्निहोत्रमुत मानमौनं मानेनाधीतमुत मानयज्ञः ॥ तमान्यमानो मुदमा
ददीत न संतापं प्राप्नुयाद्विमानात ॥२५॥ संतस्सतः पूजयंतीह लोके नासाधवः साधुबुद्धिं लभंते ॥ इति

दद्यादिति यजेदित्यधीयेत व्रतमेषु श्रुतं संतसुखावह्न्यरणश्च ॥२६॥ इत्येतान्यभयान्याहुस्तान्यवर्ज्यानि नित्यशः ॥
येनाश्रयं मानेयं ते पुराणं मनीषिणो नामनन्नस्तनयुक्तं ॥ तन्निःश्रेयसीरूपमेत्य परां शांतिं प्राप्नुयात्प्रेत्य
चेह ॥२७॥ इति श्रीमत्स्यपुराणे ययातिचरिते ॥ ॥ अष्टक उवाच ॥ ॥ चरन्गृहस्थः कथमेति देवं कथं भिक्षुः
कथमाचार्यकर्मा ॥ वानप्रस्थः सत्पथे संनिविष्टो बहून्यस्मिन्संप्रतिवेदयंति ॥१॥ ययातिरुवाच ॥ आहू
ताध्यायी गुरुकर्मस्वचोद्यः पूर्वोत्थायी चरमं चोपशायी ॥ मृदुर्दांतो धृतिमानप्रमत्तः स्वाध्यायशीलः सि
ध्यति ब्रह्मचारी ॥२॥ धर्मागतं प्राप्य धनं यजेत दद्यात्सदैवातिथीन्भोजयेत ॥ अनाददानश्च परैरदत्तं सैषा
गृहस्थोपनिषत्पुराणी ॥३॥ स्ववीर्यजीवी वृजिनान्निवृत्तो दाता परेभ्यो न परोपतापी ॥ तादृग्मुनिः सिद्धि
मुपैति मुख्यां वसन्नरण्ये नियताहारचेष्टः ॥४॥ अशिल्पजीवी विगृहश्च नित्यं जितेंद्रियः सर्वतो विप्रमु
क्तः ॥ अनोकसारी लघुरल्पसंचरन्देशाननेकांश्चरश्च भिक्षुः ॥५॥ रात्र्या यया वाभिरताश्च लोका भवं
ति कामाभिजिता सुखाश्च ॥ तामेव रात्रिं प्रयतेत विद्वानरण्यसंस्थो भवितुं यतात्मा ॥६॥ दशैव पूर्वान्दशरान्
परांश्च ज्ञातीनथात्मानमथैकविंशं ॥ अरण्यवासी सुकृतं दधाति मुक्त्वारण्ये स्वशरीरधातून ॥७॥
अष्टक उवाच ॥ कतितु देवमुनयो मौनानि कति चाप्युत ॥ भवंतीति तदाचक्ष्व श्रोतुमिच्छामहे वयं ॥८॥

म०पु०
५९

ययातिरुवाच॥ ॥ अरण्यं वसतो यस्य ग्रामो भवति पृष्ठतः॥ ग्रामे वा वसतोरण्यं स मुनिः स्यान्नराधिप॥ ९॥ अ
ष्टक उवाच॥ ॥ कथं स्विद्वसतोरण्ये ग्रामो भवति पृष्ठतः॥ ग्रामे वा वसतोरण्यं कथं भवति पृष्ठतः॥ १०॥
ययातिरुवाच॥ ॥ न ग्राम्यमुपयुंजीत य आरण्यो मुनिर्भवेत्॥ तथास्य वसतोरण्ये ग्रामो भवति पृष्ठतः॥ ११॥
अनग्निरनिकेतः स्यादगोत्रचरणो मुनिः॥ कौपीनाच्छादनं यावत्तावदिच्छेच्च चीवरं॥ १२॥ यावत्प्राणाभि
संधानं तावदिच्छेच्च भोजनं॥ तदास्य वसतो ग्रामेरण्यं भवति पृष्ठतः॥ १३॥ यस्तु कामान्परित्यज्य त्यक्तकर्मा जि
तेन्द्रियः॥ आतिष्ठेत मुनिर्मौनं स लोके सिद्धिमाप्नुयात्॥ १४॥ धौतदंतं कृत्तनखं सदास्नातमलंकृतं॥ अ
सितं सितकर्मस्थं कस्तं नार्चितुमर्हति॥ १५॥ तपसा कर्शितः क्षामः क्षीणमांसास्थिशोणितः॥ यदा भवति नि
र्मौनं समास्थितः॥ १६॥ अथ लोकमिमं जित्वा लोकं वा विजयते परं॥ आस्येन तु यदाहारं गोवन्मृगयते मुनिः॥
१७॥ अथास्य लोकः पूर्वो यः सोमृतत्वाय कल्पते॥ १७॥ ॥ इति श्रीमत्स्यपुराणे ययातिचरिते॥ ॥ अष्टक उवा
च॥ ॥ कतरस्त्वेतयोः पूर्वं देवानामेति सात्म्यतां॥ उभयोर्धावतो राजन्सूर्याचन्द्रमसोरिव॥ १॥ ययातिरुवा
च॥ ॥ अनिकेतं गृहस्थेषु कामवृत्तेषु संयतः॥ ग्राम एव चरन्भिक्षुस्तयोः पूर्वतरं गतः॥ २॥ अवाप्य दी
र्घमायुश्च यः प्राप्नोति विकृतिं चरेत्॥ तप्येत यदि तत्कृत्वा चरेद्वान्यत्ततस्तपः॥ ३॥ यद्वै नृशंसं तदपथ्यम

राम
५९

कृपः सेवते धर्ममनर्थबुद्धिः॥ अस्वोप्यनीशस्य तथैव राजंस्तदार्जवं स समाधिस्तदार्यं॥ ४॥ अष्टक उवाच॥
केनाद्य हूतः प्रहितोसि राजन्युवा स्रग्वी दर्शनीयः सुवर्चाः॥ कुत आगतः कतमस्यां दिशि त्वमुताहो
स्वित्पार्थिवं स्थानमस्ति॥ ५॥ ययातिरुवाच॥ इमं भौमं नरकं क्षीणपुण्यः प्रवेष्टुमुर्वीं गगनाद्विप्रकी
र्णः॥ उल्केव प्रपतिष्याम्यहं वै त्वरं समाब्राह्मणा लोकपालाः॥ ६॥ सतां सकाशे तु वृतः प्रपातस्ते सं
गता गुणवंतस्तु सर्वे॥ शक्राच्च लब्धो हि वरो मयैष पतिष्यता भूमितलं नरेन्द्र॥ ७॥ अष्टक उवाच॥ य
च्छामि त्वा मा प्रपत प्रपातं यदि लोकाः पार्थिव संति मेत्र॥ यद्यंतरिक्षे यदि वा दिवि श्रिताः क्षेत्रज्ञं त्वां तस्य ध
र्मस्य मन्ये॥ ८॥ ययातिरुवाच॥ यावत्पृथिव्यां विहितं गवाश्वं सहारण्यैः पशुभिः पक्षिभिश्च॥ तावल्लोका दि
वि ते संस्थिता वै तथा विजानीहि नरेन्द्रसिंह॥ ९॥ अष्टक उवाच॥ ॥ तांस्ते ददामि मा प्रपत प्रपातं ये मे लोका
दिवि राजेन्द्र संति॥ यद्यंतरिक्षे पशुभिः पक्षिभिश्च तावल्लोका दिवि ते संस्थिता वै॥ १०॥ तथा विजानीयदिवा
दि विश्रिता स्तान्नाक्रमस्व प्रमपि त्वमोहः॥ १०॥ ययातिरुवाच॥ नास्मद्विधो ब्राह्मणो ब्रह्मविच्च प्रतिग्रहे
वर्तते राजमुख्य॥ यथा प्रदेयं सततं द्विजेभ्यस्तथा ददे पूर्वमहं नरेन्द्र॥ ११॥ नाब्राह्मणं कृपणो राजन्नुजी
व्य यद्यपि स्याद्ब्राह्मणी वीरपत्नी॥ सोहं यदेवाकृतपूर्वं चरेयं विविदिसमानः किं नु तत्र साधुः॥ १२॥ प्रतर्द

म०पु०
५८

नउवाच॥॥पृच्छामित्वांस्पृहणीयरूपंप्रतर्दनोहंयदिमेसंतिलोकाः॥यद्यंतरिक्षेयदिवादिविश्रिताःक्षेत्रज्ञंत्वां
तस्यधर्मस्यमन्ये॥१३॥ययातिरुवाच॥॥संतिलोकाबहवस्तेनरेंद्रअप्येकैकःसप्तसप्ताप्यहानि॥मधुश्चु
तोघृतपृक्ताविशोकास्तेनांतवंतःप्रतिपालयंति॥१४॥प्रतर्दनउवाच॥॥तांस्तेददामिपतमानस्यरा
जन्येमेलोकास्तवतेवैभवंतु॥यद्यंतरिक्षेयदिवादिविश्रुतास्तानाक्रमक्षिप्रमपेतमोहः॥१५॥ययातिरु
वाच॥॥नतुल्यतेजाःसुकृतंकामयेतयोगक्षेमंपार्थिवात्पार्थिवःसन्॥दैवादेशादापदंप्राप्यविद्वांश्च
रेन्नृशंसंहिनजातुराजा॥१६॥धर्म्यंमार्गंचिंतयानोयशस्यंकुर्यान्नृपोधर्ममवेक्षमाणः॥नमद्विधोधर्मबु
द्धिःसदैवकुर्यादेवंकृपणंमांयथात्थ॥१७॥कुर्यामपूर्वंनकृतंयदन्यैर्विवित्समानःकिमुतत्रसाधु॥ब्रुवा
णमेवंनृपतिंययातिंनृपोत्तमोवसुमनाःप्रब्रवीत॥१८॥॥इतिश्रीमत्स्यपुराणेसोमवंशेययातिचरिते २८
॥॥वसुमनाउवाच॥॥पृच्छाम्यहंवसुमनारौषदश्विर्यद्यस्तिलोकोदिविमह्यंनरेंद्र॥यद्यंतरिक्षेप्रथित
महात्मन्क्षेत्रज्ञंत्वांतस्यधर्मस्यमन्ये॥१॥ययातिरुवाच॥॥यदंतरिक्षंपृथिवीदिशश्चयत्तेजसातप
तेभानुमांश्च॥लोकास्तावंतोयदिविसंस्थितावैतेनांतवंतःप्रतिपालयंति॥२॥वसुमनाउवाच॥॥तांस्ते
ददामिपतमानस्यपापयेमेलोकास्तवतेवैभवंतु॥क्रीणीष्वैनांस्तृणकेनापिराजन्प्रतिग्रहस्तेयदि

राम
५८

सम्यक्प्रदुष्टः॥३॥ययातिरुवाच॥॥नमिथ्याहंविक्रयंवैस्मरामिवृथाकृतंशिशुकाच्छंकमानः॥कु
र्यान्नकास्तावकावैभवंतु॥४॥शिबिरुवाच॥॥पृच्छामित्वांशिबिरौशीनरोहंममापिलोकायदिसंतिता
त॥यद्यंतरिक्षेयदिवादिविश्रिताःक्षेत्रज्ञंत्वांतस्यधर्मस्यमन्ये॥५॥ययातिरुवाच॥॥नत्वंवाचाहृ
दयेनापितंसंत्परीप्समानानोमाववमस्थानरेंद्र॥तेनानंतादिविलोकाःश्रितास्तेविद्युद्रूपाःस्वनवंतोमहां
तः॥६॥शिबिरुवाच॥॥तांस्त्वंलोकान्प्रतिपद्यस्वराजन्मयादत्तान्यदिनेष्टःक्रयस्ते॥नचाहंतान्प्रतिप
द्यस्वराजन्मयादत्तान्यदिनेष्टःक्रयस्ते॥नचाहंतान्प्रतिपत्स्येयदत्वायस्मिन्गत्वातत्त्वमिहास्माल्लोके
७॥ययातिरुवाच॥यथाहमिंद्रप्रतिमप्रभावस्तेचाप्यनंतानरदेवलोकाः॥तथाद्यलोकोनरमेप्सदस्ते
तस्माच्छिबेनाभिनंदामिवाचं॥८॥अष्टकउवाच॥॥नचेदेकैकशोराजल्लोकान्नःप्रतिनंदति॥सर्वे
प्रदायभवतेगंतारोनरकंवयं॥९॥ययातिरुवाच॥॥यदाहंहितद्वदध्वंसंतःसत्यादिदर्शिनः॥अ
हंतुनाभिगृह्णामियत्कृतंनमयापुरा॥१०॥अलिप्समानस्यमेयदुक्तंनतत्तथास्तीहनरेंद्रसिंह॥ तु
अस्यप्रदानस्ययदेवयुक्तंतस्यैववचानंतफलंप्रदिष्टं॥११॥अष्टकउवाच॥कस्यैतेप्रतिदृश्यंतेरथाःपं
चहिरण्मयाः॥उच्चैःसंतःप्रकाशंतेज्वलंतोग्निशिखायथा॥१२॥ययातिरुवाच॥॥भवतोममचैवे

म०पु० नरपा भांति हिरण्मयाः॥ आरुह्यैतेषु गंतव्यं भवद्भिश्च मयाष्टक॥१३॥ अष्टक उवाच॥ ॥आतिष्ठस्व रथं
५९ राजन्विक्रमस्व विहायसा॥ वयं स्थास्यामो यात्रे च यदा कालोऽभिविष्यति॥१४॥ ययातिरुवाच॥ ॥सर्वैरि
दानीं गंतव्यं सहस्वर्गजितो वयं॥ एष वो विरजः पंथा दृश्यते देवसद्मगः॥१५॥ शौनक उवाच॥ ॥तेधिरुह्य
रथं सर्वे प्रयातान्नृपतेन्नृपाः॥ आक्रामंतो दिवं भांति धर्मेणावृत्य रोदसी॥१६॥ अष्टक उवाच॥ अहं मन्ये
पूर्वमेको हि गंता सखा चेंद्रः सर्वथा मे महात्मा॥ कस्माद्देवं शिबिरौशीनरोयं एकोत्यगात्सर्ववेगेन वा
हान्॥१७॥ ययातिरुवाच॥ ॥अददाद्देवयानाय यावद्वित्तमनिंदितः॥ उशीनरस्य पुत्रोयं तस्माच्छ्रेष्ठो
हि वः शिबिः॥१८॥ दानं दमः सत्यमथो ह्यहिंसा ह्रीश्रीक्षितिश्चासमतं तदस्य॥ राजन्मेतान्यप्रमेयाणि राज्ञः
शिबेः स्थितान्यप्रतिमस्य बुद्ध्या॥१९॥ एवं वृत्तो ह्रीनिषेधो बिभर्ति तस्माच्छिबिरत्यगाद्वै रथेन॥१९॥ शौन
क उवाच॥ ॥अष्टकः पुनरेवान्वपृच्छन्मातामहं कौतुकादिंद्रकल्पं॥ पृच्छामि त्वां नृपते ब्रूहि सत्यं कुतश्च
कश्चासि कुतस्त्वमागाः॥२०॥ कृतं त्वया यद्धि न तस्य कर्ता लोके त्वदन्यो ब्राह्मणः क्षत्रियो वा॥२०॥ ययातिरु
वाच॥ ॥ययातिरस्मि नहुषस्य पुत्रः पूरोः पिता सार्वभौमस्त्विहासीत्॥ गुह्यं मंत्रं मामकेभ्यो ब्रवीमि राम
मातामहोहं भवतां प्रकाशः॥२१॥ सर्वामिमां पृथिवीं निर्जिगाय प्रबुध्यां हंसहां ब्राह्मणेभ्यः॥ मेध्यानश्वानेक ५९

शताः सुरूपांस्तदा देवाः पुण्यभाजो भवंति॥२२॥ अदामहं पृथिवीं ब्राह्मणेभ्यः पूर्णामिमामखिलां सर्वर
त्नैः॥ गोभिः सुवर्णैश्च धनैश्च मुख्यैस्तत्रासं गतशतान्यर्बुदानि॥२३॥ सत्येन मे द्यौश्च वसुंधरा च तथैव
चाग्निर्ज्वलते मानुषेषु॥ न मे वृथा व्याहृतमेव वाक्यं सत्यं हि संतः प्रतिपूजयंति॥२४॥ यदष्टक प्रब्रवी
मीह सत्यं प्रतर्दनं चौषदश्विं तथैव॥ सर्वे च देवा मुनयश्च लोकाः सत्येन पूज्या इति मे मनोगतं॥२५॥ यो नः स्व
र्गजितान्यथावृत्तं निवेदयेत॥ अनसूयुर्द्विजाग्र्येभ्यः स लभेन्नः सलोकतां॥२६॥ शौनक उवाच॥ ॥ए
वं राजन्स महात्मा ययातिः स्वैर्दौहित्रैस्तारितोमित्रसाहः॥ त्यक्त्वा महीं परमोदारकर्मा स्वर्गं गतः क
र्मभिर्व्याप्य पृथ्वीं॥२७॥ एवं मया विस्तरतो यथावदाख्यातं ते चरितं नाहुषस्य॥ वंशो यस्य प्रथि
तः कौरवेयो यस्मिन्जातस्त्वं मनुजेंद्रकल्प॥२८॥ ॥इति श्रीमत्स्यपुराणे सोमवंशे ययातिचरिते।
सूत उवाच॥ ॥इत्येतच्छौनकाद्राजा शतानीको निशम्य तत्॥ विस्मितः परया प्रीत्या पूर्णचंद्र इवा
बभौ॥१॥ पूजयामास नृपतिर्विधिवच्चाथ शौनकं॥ रत्नैर्गोभिः सुवर्णैश्च वासोभिर्विविधैस्तथा॥२॥ प्र
तिगृह्य ततः सर्वं यदाज्ञा प्रहितं धनं॥ दत्त्वा च ब्राह्मणेभ्यश्च शौनकोंतरधीयत॥३॥ ऋषय ऊचुः॥ यया
तेर्वंशमिच्छामः श्रोतुं विस्तरतोऽनघ॥ यदुप्रभृतिभिः पुत्रैर्यदा लोके प्रतिष्ठितः॥४॥ सूत उवाच॥ यदोर्वं

म०पु०
६५

म्प्रवक्ष्यामि जन्मेदृस्योत्तमतेजसः ॥ विस्तरेणानुपूर्व्याच गदतो मे निबोधत ॥५॥ यदोः पुत्रा बभूवुर्हि पंच
देवसुतोपमा ॥ महारथा महेष्वासा नामतस्तान्निबोधत ॥६॥ सहस्रजिदथो ज्येष्ठः क्रोष्टुनीलोजिको लघुः ॥ स
हस्रायस्तु दायादः शतजिन्नाम पार्थिवः ॥७॥ शतजेरपि दायादास्त्रयः परमकीर्तयः ॥ हैहयश्च हयश्चैव त
था वेणुहयश्च यः ॥८॥ हैहयस्य तु दायादो धर्मनेत्रः प्रतिश्रुतः ॥ धर्मनेत्रस्य कुंतिस्तु संहतस्तस्य चात्मजः ॥
९॥ संहतस्य तु दायादो महिष्मान्नाम पार्थिवः ॥ आसीन्महिष्मतः पुत्रो रुद्रश्रेण्यः प्रतापवान् ॥१०॥ वारा
णस्यामभूद्राजा कथितं पूर्वमेव तु ॥ रुद्रश्रेण्यस्य पुत्रस्तु दुर्दमो नाम पार्थिवः ॥११॥ दुर्दमस्य सुतो धीमान्
कनको नाम वीर्यवान् ॥ कनकस्य तु दायादाश्चत्वारो लोकविश्रुताः ॥१२॥ कृतवीर्यः कृताग्निश्च कृतधर्मा त
थैव च ॥ कृतौजाश्च चतुर्थोभूत्कृतवीर्यात्तु सोर्जुनः ॥१३॥ जातः करसहस्रेण सप्तद्वीपेश्वरो नृपः ॥ वर्षायु
तं तपस्तेपे दुश्चरं पृथिवीपतिः ॥१४॥ दत्तमाराधयामास कार्त्तवीर्योत्रिसंभवं ॥ तस्मै दत्तावरास्तेन चत्वारः
पुरुषोत्तमः ॥१५॥ पूर्वं बाहुसहस्रं तु स वव्रे राजसत्तमः ॥ अधर्मं चरमाणस्य सद्भिश्चापि निवारणं ॥१६
युद्धेन पृथिवीं जित्वा धर्मेणैवानुपालनं ॥ संग्रामे वर्त्तमानस्य वधश्चैवाधिकाद्भवेत् ॥१७॥ तेनेयं पृथिवी राम०
सर्वा सद्वीपा च सपर्वता ॥ सप्तोदधिपरिक्षिप्ता क्षात्रेण विधिना जिता ॥१८॥ यज्ञेबाहुसुवर्णैर्वैर्यजत ६५

स्तस्य धीमतः ॥ रथो ध्वजो श्च संजज्ञे इत्येवमनुशुश्रुम ॥१९॥ दशयज्ञसहस्राणि राज्ञां द्वीपेषु वै तदा ॥ नि
रर्गला निवृत्तानि श्रूयंते तस्य धीमतः ॥२०॥ सर्वे यज्ञा महाराजस्तस्यासन्भूरिदक्षिणाः ॥ सर्वे कांचनयूपा
स्ते सर्वे कांचनवेदयः ॥२१॥ सर्वे देवैः समं प्राप्तैर्विमानस्थैरलंकृताः ॥ गंधर्वैरप्सरोभिश्च नित्यमेवोपशोभि
ताः ॥२२॥ यस्य यज्ञे जगौ गाथां गंधर्वो नारदस्तदा ॥ कार्त्तवीर्यस्य राजर्षेर्महिमानं निरीक्ष्य सः ॥२३॥ नूनं न
कार्त्तवीर्यस्य गतिं यास्यंति पार्थिवाः ॥ यज्ञैर्दानैस्तपोभिश्च विक्रमेण श्रुतेन च ॥२४॥ स हि सप्तसु द्वीपेषु खड्गी
चक्री शरासनी ॥ रथी द्वीपाननुचरन्योगी पश्यति तस्करान् ॥२५॥ पंचाशीतिसहस्राणि वर्षाणां स नराधिपः ॥
स सर्वरत्नैः संपूर्णश्चक्रवर्त्ती बभूव ह ॥२६॥ स एव पशुपालोभूत्क्षेत्रपालः स एव हि ॥ स एव वृष्ट्या पर्ज
न्यो योगित्वादर्जुनोभवत् ॥२७॥ योसौ बाहुसहस्रेण ज्याघातकठिनत्वचा ॥ भाति रश्मिसहस्रेण शारद
इव भास्करः ॥२८॥ एष नागं मनुष्येषु माहिष्मत्यां महाद्युतिः ॥ कर्कोटकसुतं जित्वा पुरीं तत्र न्यवेशयत् ॥
२९॥ एष वेगं समुद्रस्य प्रावृट्काले भजेत वै ॥ क्रीडन्निव सुखोद्भिन्नः प्रतिस्रोतो महीपतिः ॥३०॥ ललना क्रीडि
ता तेन प्रतिस्रग्दाममालिनी ॥ यस्य नृपः कुरि संत्रासात् छंकिताभ्येति नर्मदा ॥३१॥ एको भुजसहस्रेण गा
गाहे स महार्णवं ॥ करोत्युद्धतवेगां तु नर्मदां प्रावृडुद्धतां ॥३२॥ तस्य बाहुसहस्रेण क्षोभ्यमाणे महोदधौ ॥

म०पु०
६१

मवंत्पालीननिश्चेष्टाः पातालस्थामहासुराः॥३३॥ क्षुब्धीकृतमहावीचीलीनमीनमहातिमिः॥ मारुताविद्धफेनौ
घमावर्त्तक्षिप्तदुःसहं॥३४॥ करोत्यालोडयन्नेव दोस्सहस्रेण सागरं॥ मंदरक्षोभचकिता अमृतोत्पादशंकिता॥
॥३५॥ तदुत्पतितवलन्मूर्धा भवंतिच महोरगाः॥ सायाह्ने कदलीखंडा निवातस्तिमिताइव॥३६॥ एवंबध्वा धनु
र्ज्यायामुत्सिक्तः पंचभिःशरैः॥ लंकाधीशं मोहयित्वा तु बलवान्रावणं बलात्॥३७॥ निर्जित्य बध्वाचानीयमा
हिष्मत्यां बबंधच॥ ततोगत्वा पुलस्त्यस्तु अर्जुनं संप्रसादयत्॥३८॥ मुमोचरक्षः पौलस्त्यं पुलस्त्येनेह सांत्वितं॥
तस्य बाहुसहस्रस्य बभूव ज्यातलस्वनः॥३९॥ युगांतांतसहस्रस्य आस्फोटादशनेरिव॥ अहोबतविधेर्वीर्यं
भार्गवोयंयदाछिनत्॥४०॥ तद्वै सहस्रं बाहूनां हेमतालवनंयथा॥ यत्रापवस्त्वसंक्रुद्धोह्यर्जुनं शप्तवा
न्प्रभुः॥४१॥ यस्माद्वनं प्रदग्धं वै विश्रुतं मम हैहय॥ तस्मात्ते दुष्करं कर्म कृतमन्यो हरिष्यति॥४२॥ अर्जुनोना
मं कौंतेयो नच राजा भविष्यति॥ छित्वाबाहून्सहस्रं ते प्रमथ्य तरसा बली॥४३॥ तपस्वी ब्राह्मणस्त्वांस वधि
ष्यति भार्गवः॥ तस्य रामस्तदात्वासीन्मृत्युः शापेन धीमतः॥४४॥ वरश्चैव तु राजर्षेः स्वयमेव वृतः पुरा॥ तस्य
पुत्रशतं त्वासीत्पंच तत्र महारथाः॥४५॥ कृतास्त्रा बलिनः शूरा धर्मात्मानो महाबलाः॥ शूरसेनश्च शूरश्च
धृष्टोक्तः कृष्ण एवच॥४६॥ जयध्वजश्च वैकर्त्ताअवंतिश्च विशांपते॥ जयध्वजस्य पुत्रस्तु तालजंघो महाबलः॥

राम
६१

४७॥ तस्य पुत्रशतान्येव तालजंघा इतिश्रुताः॥ तेषां पंचकुलाख्याता हैहयानां महात्मनां॥४८॥ वीतिहोत्राश्च
सायताभोजाश्चावंतयस्तथा॥ तुंडिकेराश्च विक्रांतास्तालजंघास्तथैव च॥४९॥ वीतिहोत्रसुतश्चापि आन
र्तोनाम वीर्यवान्॥ दुर्जयस्तस्य पुत्रस्तु बभूवामित्रकर्शनः॥५०॥ सद्वेन राम महाराजः प्रजा धर्मेण पालना॥ कार्त्त
वीर्यार्जुनो नाम राजा बाहुसहस्रवान्॥५१॥ येन सागरपर्यंता धनुषा निर्जिता मही॥ यस्तस्य कीर्त्तयेन्नामक
ल्यमुत्थाय मानवः॥५२॥ न तस्य वित्तनाशः स्यान्नष्टं च लभते पुनः॥ कार्त्तवीर्यस्य यो जन्म कथयेदिह धीम
तः॥ यथावत्स्विष्टपूतात्मा स्वर्गलोके महीयते॥५३॥ इति श्रीमत्स्यपुराणे यदौवंशो॥ ॥ ऋषय ऊचुः॥
किमर्थं तद्वनं दग्धं भार्गवस्य महात्मनः॥ कार्त्तवीर्येण विक्रम्य सूत प्रब्रूहि पृच्छतां॥१॥ रक्षितास्तु राजर्षिः प्र
जानामिति नः श्रुतं॥ स कथं रक्षिता भूत्वा अदहत्तत्तपोवनं॥२॥ सूत उवाच॥ आदित्यो द्विजरूपेण कार्त्तवीर्यमु
पस्थितः॥ तृप्तिमेकां प्रयच्छस्व आदित्योहं नरेश्वर॥३॥ राजोवाच॥ भगवन्केनते तृप्तिर्भवित्री दिवाकर॥
कीदृशं भोजनं दद्मि श्रुत्वा तु विदधाम्यहं॥४॥ आदित्य उवाच॥ तुष्टस्त्वहं शरान्देहि घृतयुक्तेष्वान्सर्वतोमुख
न॥ येन भक्षितास्तु ज्वलिष्यंति मम तेजः समन्विताः॥५॥ आविश्य मम तेजोभिः शोषयिष्यति स्थावराने॥ शुष्कान्
भस्मीकरिष्यामि ते न तृप्तिर्नराधिप॥६॥ सूत उवाच॥ ततः शरांस्तदादित्यस्त्वर्जुनाय प्रयच्छत॥ ततोददाहसं

प्राप्तान्स्थावरान्सर्वमेवच॥७॥तथाग्रामाश्रमांश्चैवघोषाणिनगराणिच॥तपोवनानिरम्याणिवनान्यु
पवनानिच॥८॥एवंसर्वंसमदहत्ततःसर्वांश्चपक्षिणः॥निर्दग्धानिरूपाभूमिःकृताघोरेणतेजसा॥९॥
एतस्मिन्नेवकालेतुआपवोजलमाश्रितः॥दशवर्षसहस्राणितत्रास्तेसमहानृषिः॥१०॥पूर्णेव्रतेमहाते
जाउदतिष्ठत्तपोधनः॥सोपश्यद्दाश्रमंदग्धंस्वर्जुनेनमहामुनिः॥११॥क्रोधाच्छशापराजर्षिंकीर्तितंवोय
थामया॥क्रोष्टोश्रृणुइहराजेन्द्रवंशमुत्तमपूरुषं॥१२॥यस्यान्वयेप्रसंभूतोविष्णुर्वृष्णिकुलोद्वहः॥क्रो
ष्टोरेवाभवत्पुत्रोवृजिवान्महायशाः॥१३॥वृजिनीवतश्चपुत्रोभूत्स्वाहोनाममहाबलः॥स्वाहपुत्रोभवद्रा
जन्रुषंगुर्वदतांवरः॥१४॥सतत्प्रसूतिमिच्छन्वैरुषंगुःसौम्यमात्मनः॥चित्रचित्ररथस्थास्तस्यतुत्रकर्म
भिरन्वितः॥१५॥अथचैत्ररथिर्वीरोजज्ञेविपुलदक्षिणः॥शशबिंदुरितिख्यातश्चक्रवर्तीबभूवह॥१६॥
अत्रानुवंशश्लोकोयंगीतस्तस्मिन्पुराभवत॥शशबिंदोस्तुपुत्राणांशतानामभवच्छतं॥१७॥धीमतांचा
भिरूपाणांभूरिद्रविणतेजसां॥तेषामतिप्रधानानांपृथुसंज्ञामहाबलाः॥१८॥पृथुश्रवाःपृथुयशाःपृथुध
र्मापृथुंजयः॥पृथुकीर्तिःपृथुमनाराजानःशशबिंदवः॥१९॥शंसंतिचपुराणज्ञाःपृथुश्रवसमुत्तमं॥अं
तरस्यसुयज्ञस्यप्रजस्यस्तनयोभवत॥२०॥उशनानुसुयज्ञस्यस्ययोरक्षतपृथिवीमिमां॥आजहाराश्वमेधा

नांशतमुत्तमधार्मिकः॥२१॥तितिक्षुरभवत्पुत्रऔशनःशत्रुतापनः॥मरुतस्तस्यतनयोराजर्षीणामनुत्त
मः॥२२॥आसीन्मरुत्ततनयोवीरःकंबलबर्हिषः॥पुत्रस्तुरुक्मकवचोविद्वान्कंबलबर्हिषः॥२३॥निहत्यरु
क्मकवचःपरान्कवचधारिणः॥धन्विनोविविधैर्बाणैरवाप्यपृथिवीमिमां॥२४॥अश्वमेधेददौराजन्ब्रा
ह्मणेभ्यस्तुदक्षिणां॥यज्ञेसरुक्मकवचःकदाचित्परवीरहा॥२५॥जज्ञिरेपंचपुत्रास्तुमहावीर्यान्धनुर्भृ
तः॥रुक्मेषुःपृथुरुक्मश्चज्यामघःपरिघोहरिः॥परिघंहरिंचैवविदेहेस्थापयत्पिता॥रुक्मेषुरभवद्रा
जापृथुरुक्मस्तदाश्रयः॥२७॥तेभ्यःप्रव्राजितोराज्यात्ज्यामघोवसदाश्रमे॥प्रशांतश्चाश्रमस्थश्चब्राह्मणे
नावबोधितः॥२८॥जगामधनुरादायदेशमन्यंध्वजीरथी॥नर्मदांनृपएकाकीकेवलंवृत्तिकामतः॥२९॥
ऋक्षवंतंगिरिंगत्वाभुक्तमन्यैरुपाविशत॥ज्यामघस्याभवद्भार्याशैब्यापरिणितासती॥३०॥अपुत्रो
प्यभवद्राजाभार्यामन्यांनविंदते॥तस्यासीद्विजयेयुद्धेतत्रकन्यामवाप्यसः॥३१॥भार्यामुवाचसंत्रास
त्स्नुषेयंकन्यासुलोचना॥भार्ययार्थितुसमानीताकथयपस्वेतिसेपटः॥३२॥नाहंप्रसूतापुत्रेणनात्यापत्न्यन
वत्रव॥स्नुषासंबंधःकस्तेनकतमेनसुतेनते॥३३॥भार्यामुवाचतत्रासस्नुषेयंतेशुचिस्मिते॥एवमुक्ता
ब्रवीदेनंकस्यचेयंस्नुषेतिच॥३४॥राजोवाच॥॥यस्तेजनिष्यतेपुत्रस्तस्यभार्याभविष्यति॥तस्मात्तपसा

म०पु०
६२

राकन्या याः संप्रसूयते॥३५॥ पुत्रं विदर्भस्तु भगाशैब्या परिणिता सती॥ राजपुत्री च विद्वांसौ स्नुषायां क्रथकै
शिकौ॥३६॥ लोमपादं तृतीयं तु पुत्रं परमधार्मिकं॥ तस्यां विदर्भोऽजनयत्शूरान् रणविशारदान्॥३७॥ लो
मपादात्मजः पुत्रो ज्ञातिस्तस्य च आत्मजः॥ कैशिकस्य विदिः पुत्रस्तस्माच्चैद्या नृपाः स्मृताः॥३८॥ क्रथो
विदर्भपुत्रस्तु कुंतिस्तस्यात्मजो भवत्॥ कुंतिस्तस्यात्मजोऽभवत्॥ कुंतेर्धृष्टः सुतो जज्ञे रणधृष्टः प्रतापवा
त्मा न्॥३९॥ धृष्टस्य पुत्रो धर्मात्मा निर्वृतः परवीरहा॥ तदिक्षो निर्वृतिः पुत्रो नाम्ना स विदूरथः॥४०॥ दशा
र्हपुत्रो व्योमा तु जीमूत उच्यते॥ जीमूतपुत्रो विमलस्तस्य भीमरथः स्मृतः॥४१॥ सुतो भीमरथस्यासीत् तस्मा
त्तो नवरथः किल॥ तस्य चासीत् दृढरथः शकुनिस्तस्य चात्मजः॥४२॥ तस्मात्करंभकारिंभं देवरातो बभूव
ह॥ देवक्षत्रोऽभवद्राजा देवरातो महायशाः॥४३॥ देवगर्भसमो जज्ञे देवनक्षत्रनंदनः॥ मधुर्नाम महाते
जा मधोः पुरवसस्तथा॥४४॥ आसीत्पुरवसः पुत्रः पुरुद्वान् पुरुषोत्तमः॥ पुत्रुजज्ञे तृदिवैदर्भ्यां भद्रसेन्यां पुरु
द्वसः॥४५॥ ऐक्ष्वाकी चाभवद्भार्या यितस्तस्या मजायत॥ सात्वतः सत्वसंयुक्तः सात्वतां कीर्तिवर्धनः॥४६॥ राम
इमां विसृष्टिं विज्ञाय ज्यामघस्य महात्मनः॥ प्रजावान् नियायोज्येराज्ञः सोमस्य धीमतः॥४७॥ सात्वतान्सत्त्व ६२

संपन्नान् कौशल्या न सुषुवे सुतान्॥ भाजिनं भजमानं तु दिव्यं देवावृधं नृपः॥४८॥ अंधकं च महाभोजं वृ
ष्णिं च यदुनंदनं॥ तेषां च सर्गाश्चत्वारो विस्तरेणैव तान् शृणु॥४९॥ भजमानस्य संसृज्याबाह्यकायां च बा
ह्यकाः॥ सृंजयस्य सुते द्वे तु बाह्यका सुतदा भवन्॥५०॥ तस्य भार्ये भगिन्यौ द्वे सुषुवाते बहून्सुतान्॥
निमिं च कृमिलं चैव वृष्णिं परपुरंजय॥५१॥ ते बाह्यकायां संसृज्या भजमानाद्विजज्ञिरे॥ जज्ञे देवावृधो
राजा बधूनां मित्रवर्धनः॥५२॥ अपुत्रस्त्वभवद्राजा चचार परमं तपः॥ पुत्रः सर्वगुणोपेतो मम भूया
दिति स्पृहेन्॥५३॥ संयोज्य मंत्रमेवाथ वर्णयाजलमस्पृशत्॥ सदायस्पर्शनात्तस्य चकार प्रियमा
पगा॥५४॥ कल्याणत्वान्नरपतेस्तस्मै सा निम्नगोत्तमा॥ चिंतयापपरीतस्मा जगामाथ विनिश्चयं॥५
५॥ नोधिगच्छाम्यहं नारीं यस्यामेवं विधः सुतः॥ जायेत स्यामपत्याहं सेवाम्यथ सहस्र प्रजा॥५६॥ अथ भू
त्वा कुमारी सा बिभ्रती परमं वपुः॥ ज्ञापयामास राजानं तामियेष महाव्रतः॥५७॥ अथ सा नवमे मासि
सुषुवे सरितां वरा॥ पुत्रं सर्वगुणोपेतं बभ्रुं देवावृधान्नृपात॥५८॥ अनुवंशे पुराणज्ञा गायंतीति परि
श्रुताः॥ गुणान् देवावृधस्याथ कीर्तयंतो महात्मनः॥५९॥ यथैवं शृणुमो दूरात्संपश्याम तथांतिकात्॥
बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समाः॥६०॥ षष्टिश्च षट् च पुरुषाः सहस्राणि च सप्ततिः॥ एतेमृते

त्वंसंप्राप्ता बभ्रोर्देवावृधान्नपात ॥ ६१॥ यज्ञदानपतिर्वीरो ब्रह्मण्यः सुदृढव्रतः ॥ रूपवान्सुमहातेजाः श्रु
तवीर्यधरस्तथा ॥ ६२॥ सुरनाम्नस्य दुहिता सुषुवे चतुरः सुतान् ॥ कुकुरं भजमानं तु सशंकं बलबर्हिषं ॥
६३॥ कुकुरोस्तु सुतो वृष्णि र्वृष्णेस्तु तनयो धृतिः ॥ कपोतरोमा तस्याथ तैत्तिरिस्तस्य चात्मजः ॥ ६४॥ तस्यासी
त्तु रगः पुत्रं सखा विद्वान्नलं किल ॥ ख्यायते तस्य नाम्ना स नंदनोदरदुंदुभिः ॥ ६५॥ तस्मिन्प्रवितते यज्ञे
ऽभिजातः पुनर्वसुः ॥ अश्वमेधे तु पुत्रार्थमाजहार नरोत्तमः ॥ ६६॥ तस्य मध्ये तिरात्रस्य सभामध्यात्समु
त्थितः ॥ अतस्तु विद्वान्कर्मज्ञो यज्वा दाता पुनर्वसुः ॥ ६७॥ तस्यातः पुत्रमिथुनं बभूवावर्जितं किल ॥ आहु
कश्चाहुकी चैव ख्यातो मतिमतां वर ॥ ६८॥ इमौ चोदाहरत्यत्र श्लोकौ प्रति तमाहुकं ॥ सोपसंगानकर्षाणि
सध्वजानि विरूथिनां ॥ ६९॥ तथ्यान्ये घघोषाणां सहस्राणि दशैव तु ॥ नासत्यवादी नातेजा नायज्वा नासह
द्ः ॥ ७०॥ नाशुचिर्नाप्यविद्वान हियो भोजेष्वभ्यजायत ॥ आहुकस्य भृतिं प्राप्ता नित्सेत कैतउच्यते ॥ ७१॥ आ
हुकस्याप्यवंतीषु स्वसारं चाहुकीं ददौ ॥ आहुकात्काश्यदुहिता द्वौ पुत्रौ संबभूवतुः ॥ ७२॥ देवकं चोग्रसे
नं च देवगर्भसमावुभौ ॥ देवकस्य सुता वीरा जज्ञिरे त्रिदशोपमाः ॥ ७३॥ देववानुपदेवश्च सुदेवो देवरक्षितः ॥
तेषां स्वसारः सप्तासन् वसुदेवाय ता ददौ ॥ ७४॥ देवकी श्रुतदेवी च यशोदा च यशोधरा ॥ श्रीदेवी सत्यदेवी

वयशोदा च यशोधरा ॥ श्रीदेवी सत्यदेवी च सुतापी चेति सप्तमी ॥ ७५॥ नवोग्रसेनस्य सुताः कंसस्तेषां तु
पूर्वजः ॥ न्यग्रोधस्तु सुनामा च कंकः शंकुश्च भूयसः ॥ ७६॥ सुतंतु राष्ट्रपालश्च बद्धमुष्टिः सुमुष्टिदः ॥ ते
षां स्वसारः पंचासन् कंसा कंसवती तथा ॥ ७७॥ सुतंतरा राष्ट्रपाली च कंका चेति वरांगना ॥ उग्रसेनसहापत्यास्
तः कुकुरोद्भवः ॥ ७८॥ भजमानस्य पुत्रोऽथ रथमुख्यो विदूरथः ॥ राजा वै देवसूरस्य विहूरस्य सुतोऽभवत् ॥
७९॥ राजाधिदेवस्य सुतौ जज्ञाते देवसंमितौ ॥ नियमव्रतप्रधानौ शोणाश्वः श्वेतवाहनौ ॥ ८०॥ शोणाश्वस्य
सुताः पंच शूरा रणविशारदाः ॥ शमी च गदशर्मा च निकृतः शक्रशत्रुजित् ॥ ८१॥ शमीपुत्रः प्रतिक्षत्रः प्र
तिक्षत्रस्य चात्मजः ॥ प्रतिक्षत्रसुतो भोजो हृदिकस्तस्य चात्मजः ॥ ८२॥ हृदिकस्याभवन्पुत्रा दश भीमपराक्र
माः ॥ कृतवर्माग्रजस्तेषां शतधन्वा च मध्यमः ॥ ८३॥ देवार्हश्चैव नाभश्च भीषणश्च महाबलः ॥ अजा
तो वनजातश्च कनीयककरंभकौ ॥ ८४॥ देवार्हस्य सुतो विद्वान् जज्ञे कंबलबर्हिषः ॥ असमंजाः सुतस्त
सतमोजास्तस्य चात्मजः ॥ ८५॥ अजातपुत्रस्य सुतो प्रजायंत समायतौ ॥ तमायपुत्रा विक्रांतास्त्रयः पर
मकीर्तयः ॥ ८६॥ सुदंष्ट्रश्च सुनाभश्च कृष्ण इत्यनुकंपिनः ॥ अंधकानामिमं वंशं कीर्तयंति च नित्यशः ॥
आत्मनो विपुलं वंशं प्रजावानजायते नरः ॥ ८७॥ ॥ इति श्रीमत्स्यपुराणे सोमवंशो ॥ ॥ सूत उवाच ॥ गांधा

री चैव माद्री च द्वे स्त्रियौ वृष्णेर्बभूवतुः॥ गांधारी जनयामास सुमित्रं मित्रनंदनं॥१॥ माद्री युधाजितं पुत्रं ततो वै
देवमीढुषं॥ अनमित्रं शिबिं चैव पंचात्र कृतलक्षणाः॥२॥ अनमित्रसुतो निघ्नो निघ्नस्यापि सुतावुभौ॥
स्यमंतकः प्रसेनस्य मणिरत्नमनुत्तमम्॥३॥ पृथिव्यां सर्वरत्नानां राजा वै सोभवन्मणिः॥ हृदि कृत्वा तु ब
हुशो वाञ्छितुमाप्रजायते॥४॥ गोविंदो न च तं लेभे शक्तोपि न जहार तं॥ कदाचिन्मृगयां यातः प्रसेनस्तेन
भूषितः॥५॥ जयशब्दं स शुश्राव बिलं शब्देन पूरितं॥ ततः प्रविश्य स बिलं प्रसेनो नवेक्षत॥६॥ प्रसे
नं च तदा ऋक्षः क्षिप्रं चापि प्रसेनजित्॥ हत्वा ऋक्षः प्रसेनं तु ततस्तं मणिमाददे॥७॥ अदृष्टस्तु हतेनस्ते
ह्यं तद्बिलमगान्नतः॥ प्रसेनेन तु हतं तत्तो गोविंदः परिशंकितः॥८॥ गोविंदेन हतो व्यक्तं प्रसेनो मणि
कारणात्॥ गोविंदस्तु गतौ रत्नमणि रत्नेन भूषितः॥९॥ तद् दृष्ट्वा संगतं सेनां गोविंदः प्रस्तुवाच॥ तस्मि
न्नेव दुराचारं शत्रुभूतं हि हन्मि पुः॥१०॥ अथ दीर्घेण कालेन मृगयानिर्गतः प्रभुः॥ यदृच्छया च गोविं
दो बिलस्याससमागतः॥११॥ तं श्रुत्वा सुमहाशब्दं स च ऋक्षं ऋक्षवाद्यपा॥ दृष्ट्वा श्रुत्वा तु गोविंदः खड्गपाणि
प्रविश्य च॥१२॥ अपश्यज्जांबवंतं तु ऋक्षराजं महाबलं॥ ततस्तूर्णं हृषीकेशो विष्णुनाममहाबलं॥
१३॥ जांबवंतं सु जग्राह क्रोधसंरक्तलोचनः॥ दृष्ट्वा चैनं तदा ऋक्षः कर्मभिर्वैष्णवैः प्रभुं॥१४॥ ततस्तुष्ट

स्तु भगवान् चक्रेणैनमताडयत्॥ चक्रप्रहारेण विज्ञो त्वत्तोहं मरणं विजो॥१५॥ कन्या प्रौढा मम सुता जन्नारिं
लाभवाप्नुयात्॥ योयं मणिः प्रसेना तुश्रा प्तो हत्वा मया विभो॥१६॥ ततः स जांबवंतस्तं मणिं प्रादाच्च विष्णवे॥
ददौ सत्राजिता येन सर्वसात्वतसंसदि॥१७॥ तेनं मिथ्यापवादेन संतप्तापतया विभो॥ ततस्तेपा दवाः सर्वे वा
सुदेवं तदा ब्रुवन्॥१८॥ अस्माकं मनसि त्वत्प्रसेनस्तु त्वया हतः॥ केकयी सो ददौ भार्या दश पुत्रायतः सु
ताः॥१९॥ समुत्पन्नाः सुताः सुभ्रूः सर्वलोकेषु विश्रुताः॥ ख्यातिं गता महासत्वा गंगकारानुपूर्वजा॥२०
अथ व्रतवती तस्मा गंगका रानुपूर्वजा॥ सुष्टुवेसा कुमायति विशाकमल लोचना॥२१॥ सत्यभामा च साध्वी
णां व्रतनी वह्दव्रता॥ तथा पद्मावती चैव तदा श्वकम्माय मादरो॥२२॥ अनमित्राच्छिनिर्जज्ञे कनिष्ठा दृष्णि
नंदनात्॥ सत्यवांस्तस्य पुत्रस्तु सात्यकिस्तस्य चात्मजः॥२३॥ सत्यवाक्युयुधानश्च शिनेनश्च प्रतापवान्॥
असंगोस्तु युधानस्य दुनिस्तस्यात्मनोऽभवत्॥२४॥ दुनेरत्वरः पुत्र इति शैब्याः प्रकीर्तिताः॥ अपश्मित्रान्व
योत्येव व्याख्यातो वृष्णिवंशजा॥२५॥ अनुपुत्रः स संयतः पृथ्वावीरो युधाजितः॥ अन्यातु तनयो वीरो स्व
भः क्षत्रपवच॥२६॥ ऋषभः काशिराजस्य सुतां भार्यामविंदत॥ जयंतस्य जयंत्यां तु पुत्रा समभवन्ततः॥२
७॥ सदायज्ञातिवीरस्य श्रुतवानतिथिप्रियः॥ अक्रूरः सुषुवे तस्मात्स दायज्ञा मतिदक्षिणः॥२८॥ रत्नाकन्या

चत्रौ ब्जस्पश्च क्रूरस्मामवा प्रवान्॥ पुत्रा बुत्यादयान्नस्यामे कादश्च महाबलान्॥२९॥ उपलेमं सदा लेमं उत्क
लं चार्यमेवस॥ सितांतरंसदा पक्षंदृान्तु घ्नं चारुमेवच॥३०॥ सुधर्मं धर्म ध्रुग्धमवियमोनीत थैवच॥ सर्वेचि
प्रतिहोताचरत्नायांजज्ञिरेसुतान्॥३१॥ अक्रूरादुग्रसेनायां सुतौ कौकुलनंदनौ॥ देववांतपदेवस्तुजज्ञा
ते देवसस्मतौ॥३२॥ अश्विन्यांचततःपुत्राः पृथुर्विपृथुरेवच॥ अश्वत्थामा चवाकुस्यसुपार्श्वकृगवेषणौ॥
३३॥ धृष्टनेमिः सुवर्माचधर्मोधर्माज्ञिरेवच॥ अनमित्रकूल्लमिश्च्रश्च्र मिष्टाश्रवणास्तया॥३४॥ इमां मि
थ्यापिशिद्रा नामीयां देवकृष्वाद योहितां॥ नालिमिध्यापि शापेन अभिशस्तासिकेनचित॥३५॥ सूतनुवाचा
इक्ष्वाकी पुवेस्सरं ख्यातमद्भुतमीदृशं॥ यो रूपाजज्ञिरेस्र्रान्नोजयापुरुषानृदृशा॥३६॥ वसुदेवोमहा
बाहुः पूर्वमानकदुंदुभिः॥ दिवन्नागस्ततोजज्ञे ततो देवा स्वयः पुनः॥३७॥ अनापृष्टिश्चानिश्चैवस्तं जय अष
मसीमकः॥ श्रुतकीर्तिः पृथा चैवश्रुतदेवी श्रुतश्रवाः॥३८॥ राजाधिदेवी चतथा पंचैतावीरवीमातरः॥
कृतस्यतुश्रुतादेवीसुप्रहंसुपुवेसुतं॥३९॥ कैकयश्श्रुतकीर्त्यांतुजज्ञेसौनरितान्नृप॥ श्रुतश्रवसिवैच
स्यसुनीथः समपद्यत॥४०॥ बर्हिज्ञितो धर्मशारीरः संबभूवारिमर्दनः॥ अपुसस्त्वेपि तृकुस्यकुंतिभोजे राम
पृथांददौ॥४१॥ एवं कुंती समाख्याता वसुदेवस्वसा पृथा॥ वसुदेवेनसादत्ता पांडोर्भार्यानिंदिता॥४२॥ ६६

पांडोरर्थेनसाजज्ञे देवपुत्रान्महारथान्॥ धर्माद्युधिष्ठिरोजज्ञे वायोर्जज्ञे वृकोदरः॥४३॥ इंद्रा धनंजयश्चै
वशक्रतुल्यपराक्रमः॥ माद्रवत्यां चजनिता वश्विभ्यामितिशुश्रुम॥४४॥ नकुलः सहदेवश्च रूपशीलगुणा
न्वितौ॥ रोहिणीपौरवीचैवरख्यातमानकदुंदुभेः॥४५॥ लेभेरामंसुतंज्येष्ठंस्तु न्नंपिंडमहाहनुं॥ चित्राक्षेत्रे
कुमार्यौतुरोहिण्यांजज्ञिरेतथा॥४६॥ देवकृषां जज्ञिरेसूरिः सुषेणः कीर्तिमानपि॥ उदासीनद्रसेनश्चरू
षिदासस्तथैवच॥४७॥ षष्ठो मद्रविदेहश्च कंसः सर्वानघातयत्॥ प्रथमायाममावार्षिकीतु न विष्यति॥
४८॥ तस्माज्जज्ञे महाबाहुः पूर्वकृष्णः प्रजापतिः॥ अनुजातभवत्कृष्मात्सुभद्राभद्रभाषिणी॥४९॥ देवकां
सुमहातेजाजज्ञेसूराजवैसरवा॥ सहदेवस्तुताम्रायांजज्ञे शौरः कुलोद्वहः॥५०॥ उपासंगधरं लेभे तन
यं देवरक्षिता॥ एकानंशा वसुमंगाकस्तामभ्यभासयत्॥५१॥ विजयंरोचमानं चवर्धमानं देवलं॥ एतेस
वेमहात्मानउपदेव्याः प्रजज्ञिरे॥५२॥ अंगावहं महात्मानंरकदेव्यामजायत॥ रेकदेव्याः स्वयंजतेनरको
नामतः॥५३॥ सप्तकं देवकीपुत्रं मदनासुषुवेसुतं॥ गवेषणं महानागं संग्रामे ष्वपराजितं॥५४॥ श्रद्धादे
व्यावृहारेतुवनेविचरता पुरा॥ वैश्यायामदधाच्छौरिः पुत्रं कौशिकमग्रजं॥५५॥ सुतानोरथराजीवक्रो
रेरासापरिग्रहे॥ मुंडश्चकपिलश्चैववसुदेवांगजो बली॥५६॥ जरानामनिषादोभूत्प्रथमः सधनुर्धनु

म०पु०
६१

धरः॥ सौनकश्च जवश्चैव महासत्वौ बभूवतुः॥५७॥ देवभागसुतश्चापि नाम्नासावुधवः स्मृतः॥ पांडितं प्रथ
मं प्राहुर्देवश्रवसमुद्भवं॥५८॥ ऐक्ष्वाकी लभता पुत्रमनाधृष्टेर्यशस्विनी॥ निर्धूतसत्त्वं शत्रुघ्नं श्राद्ध
स्तस्मादजायत॥५९॥ करूषायामपुत्राय कृष्णस्तुष्टः सुतान् ददौ॥ सुचंद्रं तु महाभागं वीर्यवंतं महाबलं॥६०
जांबवत्याः सुतावेतौ द्वौ च सत्कृतलक्षणौ॥ चारुदेष्णश्च सांबश्च वीर्यवंतौ महाबलौ॥६१॥ तंतिपालश्च तंति
श्च नंदनस्य सुतावुभौ॥ समीकपुत्राश्चत्वारो विक्रांतास्तु महाबलाः॥६२॥ विरजाश्च धनुश्चैव व्योमश्च सं
जयस्तथा॥ अनपत्यो भवत्व्योमः संयूपस्तु धनंजयौ॥६३॥ जुगुप्समानो भोजत्वं राजर्षित्वमवाप्नुयात्॥
कृष्णस्य जन्माभ्युदयं यः कीर्तयति नित्यशः॥६४॥ शृणोति मानवो नित्यं सर्वपापैः प्रमुच्यते॥६५॥ इति श्रीम
त्स्यपुराणे सोमवंशे॥॥ सूत उवाच॥ अथ देवो महादेवः पूर्वं कृष्णः प्रजापतिः॥ विहारार्थं स देवेशो मानु
षेष्विह जायते॥१॥ देवक्यां वसुदेवेन तपसा पुष्करेक्षणः॥ चतुर्बाहुस्तु संजातो दिव्यरूपश्रियोज्वलः॥२॥
श्रीवत्सलक्ष्मा देवं दृष्ट्वा दिव्यैश्च लक्षणैः॥ उवाच वसुदेवस्तं रूपं संहर वै विभो॥३॥ भीतोहं देव कंसस्य तत
स्त्वेतद्ब्रवीमिते॥ मम पुत्रा हतास्ते न ज्येष्ठास्ते भीमविक्रमाः॥४॥ वसुदेववचः श्रुत्वा रूपं संहरताच्युतः॥ रा म.
अनुज्ञाप्य ततः शौरिं नंदगोपगृहेनयत्॥५॥ दत्वेनं नंदगोपस्य रक्षतामिति चाब्रवीत्॥ अत्र वस्तु सर्वकल्याणं ६१

दवानो भविष्यति॥६॥ ऊषयकचुः॥॥ कथं वसुदेवस्तु देवकी च यशस्विनी॥ नंदगोपस्तु कस्त्वेष यशोदा च
महाव्रता॥७॥ या विष्णुं जनयामास यं च तातेत्यभाषत॥ या गर्भं जनयामास यथा चैनमवर्धयत्॥८॥
सूत उवाच॥ पुरुषः कश्यपस्त्वासीददितिस्तु प्रिया स्मृता॥ ब्रह्मणः कश्यपस्त्वंशः पृथिवी चादितिस्
तथा॥९॥ अथ कामान् महाबाहुर्देवक्याः समपूजितः॥ यस्तथा कांक्षितो नित्यमजातस्य महात्मनः॥१०
सोवतीर्णो मही देवः प्रविष्टो मानुषीं तनुं॥ मोहयन् सर्वभूतानि योगात्मा योगमायया॥११॥ नष्टे धर्मे तथा य
ज्ञे विष्णुर्वृष्णिकुले प्रभुः॥ कर्तुं धर्मस्य संस्थानमसुराणां प्रणाशनं॥१२॥ रुक्मिणी सत्यभामा च सत्या
नाग्नजिती तथा॥ सत्यभामा तथा शैब्या गांधारी लक्ष्मणा तथा॥१३॥ मित्रविंदा च कालिंदी देवी जांबव
ती तथा॥ सुशीमा च तथा माद्री कौशल्या विजया तथा॥१४॥ एवमादीनि देवीनां सहस्राणि च षोडश॥ रु
क्मिणी जनयामास पुत्रं रणविशारदं॥१५॥ चारुदेष्णं महाशूरं प्रद्युम्नं च महाबलं॥ सुचारुं भद्रदेष्णं न
भमेव च॥१६॥ परश्च चारुगुप्तश्च चारुभद्रः सुचारुकः॥ चारुहासः कनिष्ठश्च कन्या चारुमती तथा॥१७॥
जज्ञिरे सत्यभामायां भानुर्भीमरथः क्षणः॥ रोहितो दीप्तिमांश्चैव ताम्रवक्त्रो जलंधमः॥१८॥ चतस्रो जज्ञिरे ते
षां स्वसारस्तु यवीयसी॥ जांबवत्याः सुतो जज्ञे सांबः समितिशोभनः॥१९॥ मित्रवान् मित्रविंदश्च मित्रवि

म० पु०
६७

दक्षमित्रंविंदावरांगना॥मित्राकुसुनीत्यनप्रजितामःसत्राहिसा॥२०॥एवमादीनिपुत्राणांसहस्राणिनिबो
धत॥अशीतिंचसहस्राणिवासुदेवसुतास्तथा॥२१॥लक्षमेकंतथाप्रोक्तंपुत्राणांतुद्विजोत्तमा॥उपसंग
म्यतुसुतौवज्रसंक्षिप्तएवच॥२२॥नृरिरुसेनोनृरिस्थगावेषणसुतावुभौ॥प्रद्युम्नस्यतुदायादौवैदर्भ्यांबुद्धि
सत्तमः॥२३॥अनिरुद्धोरणेरुद्धोपत्तस्यमृगकेतनः॥काश्यासुपार्श्वतनयासांबात्तेनतरस्विनः॥२४॥
सत्यःप्रकृतयोदेवाःपंचवीराःप्रकीर्तिताः॥तिस्रःकोट्यःप्रवीराणांयादवानांमहात्मनां॥२५॥षष्टिश
तसहस्राणिवीर्यवंतोमहाबलाः॥देवांशाःसर्वएवेहउत्पन्नास्तेमहौजसः॥२६॥देवासुरेहतायेचअसुरा
येमहाबलाः॥इहोत्पन्नामनुष्येषुबाधंतेसर्वमानवान्॥२७॥तेषामुत्सादनार्थायउत्पन्नोयादवेकुले॥
कुलानांशतमेकंचयादवानांमहात्मनां॥२८॥सर्वमेतत्कुवेरस्ययक्षीमणिरत्नथा॥ग्रालाकिनीरदक्षै
वमिक्षोधन्वंतरिस्तथा॥२९॥आदिदेवस्तथाविष्णुरेभिःसत्तप्रदेवतैः॥किमर्थंसंजसाभूतास्तत्स्वसंभूत
यःकति॥३०॥भविष्याःकतिचैवान्येप्रादुर्भावामहात्मनः॥ब्रह्मक्षत्रेषुशांतेषुकिमर्थमिहसंभूतोविष्णुर्ह
स्संधकेश्वरः॥३१॥पुनःपुनर्मनुष्येषुतन्नःप्रब्रूहिपृच्छतां॥३१॥सूतउवाच॥यस्यदिव्यातनुर्विष्णुर्मानुषे राम
ष्विवजायते॥युगतंत्रपरावर्तेकालेप्रशिथिलेविभुः॥३२॥देवासुरविमर्देषुजायतेहरिरीश्वरः॥हिर ६७

ण्यकशिपुर्दैत्योत्रैलोक्यंप्राक्प्रशासति॥३३॥बलिनाधिष्ठितेचैवपुरालोकत्रयेक्रमात्॥सख्यमासीत्परम
कंदेवानामसुरैःसह॥३४॥युगादशसंपूर्णाल्यासीदत्याकुलंजगत्॥धर्मेधर्मस्थितस्थानेजायतेमानु
षेविह॥३५॥नतोःशापनिमित्तंतुदेवासुरकृतेतदा॥३५॥ऋषयऊचुः॥॥कथंदेवासुरकृतेव्याहारा
प्राप्तवांस्ततः॥देवासुरेयथावृत्तंतन्नःप्रब्रूहिपृच्छतां॥३६॥सूतउवाच॥॥तेषांदायनिमित्तंतेःसंग्रामा
स्तुसुदारुणाः॥वाराहाद्यादशद्वौचषंडामर्कांतिरेस्मृताः॥३७॥नामतस्तुसमासेनशृणुतेषांविवक्षितां॥
प्रथमोनारसिंहस्तुद्वितीयश्चापिवामनः॥३८॥तृतीयस्तुवराहश्चचतुर्थामृतमंथनः॥संग्रामःपंच
मश्चैवसंजातस्तारकामयः॥३९॥षष्ठोह्याडीबकाख्यस्तुसप्तमस्त्रैपुरस्तथा॥अंधकारोष्टमस्तेषांनव
मोवृत्रघातकः॥४०॥धात्रश्चदशमःप्रोक्तस्ततोहालाहलःस्मृतः॥प्रथितोद्वादशस्तेषांघोरःकोला
हलस्तथा॥४१॥हिरण्यकशिपुर्दैत्योनरसिंहेननिसूदितः॥वामनेनबलिर्बद्धस्त्रैलोक्याक्रमणेपुरा॥
४२॥हिरण्याक्षोहतोद्वंद्वेप्रतिवादेतुदैवतैः॥दंष्ट्र्यातुवराहेणसमुद्रस्तुद्विधाकृतः॥४३॥प्रह्लादो
निर्जितोयुद्धेइंद्रेणामृतमंथने॥विरोचनस्तुप्राह्लादिर्नित्यमिंद्रवधोद्यतः॥४४॥इंद्रेणैवचविक्र
म्यनिहतस्तारकामये॥असक्तुवत्सदेवेषुसोढुंसमरदैवतं॥४५॥निहतादानवाःसर्वेत्रैलो

म० पु०
६९

कोत्र्यंबकेणतु॥असुराश्चपिशाचाश्चदानवाश्चांधकेवधे॥४६॥हतादेवमनुष्यैस्तैःपितृभिश्चैवसर्वशः॥संस
क्तोदानवैर्हत्वोघोरोहालाहलेहतः॥४७॥तदाविष्णुसहायेनमहेंद्रेणनिवर्त्तितः॥ततोध्वजाममहेंद्रेणमा
याछन्नस्तुयोगवित्॥४८॥ध्वजोलक्ष्मणमाविश्यविप्रचित्तिःसहानुजः॥दैत्याश्चदानवाश्चैवसंयताःकृ
त्स्नसंयुतः॥४९॥जयकोलाहलेसर्वाःदैवैःपरिवृतोवृषः॥यत्तस्यावभृथेजित्वासंतुमेकोनुदैवतैः॥५०॥ए
तेदेवासुराहत्वाःसंग्रामाद्वादशैवतु॥देवासुरक्षयकराःप्रजानांचहितायवै॥५१॥हिरण्यकशिपूराजान्
कलिवर्षाण्युतेपुनः॥षष्टिर्वर्षसहस्राणिनियुतानिचविंशतिः॥५२॥बलेराज्याधिकारस्तुयावत्कालंबभूव
ह॥तावत्कालंतुप्रह्लादोनिवृत्तोह्यसुरैःसह॥५३॥इंद्रास्तुत्रयोविज्ञेयाअसुराणांमहौजसः॥दैत्यसंस्थामि
दंसर्वमासीद्दशयुगंपुनः॥५४॥त्रैलोक्यमदमव्यग्रंमहेंद्रेणनुपाल्यते॥असपत्नमिदंसर्वमासीद्दशयु
गंपुनः॥५५॥प्रह्लादस्यहतेतस्मिन्त्रैलोक्येकालपर्यये॥पर्यायेणतुसंप्राप्तेत्रैलोक्यंपाकशासने॥५६॥
ततोसुरान्परित्यज्यशुक्रोदेवानगच्छत॥यज्ञेदेवानथगतंदितिजाःकाव्यमाह्वयन्॥५७॥किंत्वंनोमिष
तोराज्यंत्यक्त्वायज्ञंपुनर्गतः॥स्थातुंनशक्नुमोह्यत्रप्रविशामोरसातलं॥५८॥एवमुक्तोब्रवीद्देवान्वि
षण्णान्सांत्वयन्गिरा॥माभैर्ष्टधारयिष्यामितेजसास्वेनवोसुराः॥५९॥मंत्राश्चौषधयश्चैवरसावसुच

राम
६९

यत्परं॥कृत्स्नानिमयितिष्ठंतिपादस्तेषांसुरैस्तुवै॥६०॥ततसर्ववःप्रदास्यामियुष्मदर्थेधृतंमया॥ततोदेवास्त
तांदृष्ट्वाधृतान्काव्येनधीमता॥६१॥संमंत्रयंतिदेवावैसंविग्नास्तुजिघृक्षया॥काव्योह्येषइदंसर्वंव्यावर्त्तयति
नोबलात्॥६२॥साधुगच्छामहेतूर्णंयावन्नाप्याययतिवै॥प्रसह्यहत्वाशिष्टांस्तुपातालंप्रापयामहे॥६३॥ततो
देवास्तुसंरब्धादानवानुपसृत्यह॥ततस्तेवध्यमानास्तुकाव्यमेवाभिदुद्रुवुः॥६४॥ततःकाव्यस्तुतान्दृष्ट्वातूर्णंसं
देवैरभिद्रुतान्॥रक्षांकाव्येसंहृत्यदेवास्तेप्यसुरार्दिताः॥६५॥काव्यंदृष्ट्वास्थितंदेवानिर्विशंकासुरानब्रुज
ततःकाव्यानुचिंत्याथब्रह्मणोवचनंहितं॥६६॥तानुवाचततःकाव्यःपूर्ववृत्तमनुस्मरन्॥त्रैलोक्यंवोहृतंसर्वं
मांवामनेनत्रिभिःक्रमैः॥६७॥बलिर्बद्धोहतोजंभोनिहतश्चविरोचनः॥महासुराद्वादशस्तुसंग्रामेषुसुरैर्ह
ताः॥६८॥तैस्तैरुपायैर्भूयिष्ठंनिहतावःप्रधानतः॥किंचिच्छिष्टाःस्थयूयंवैयुद्धंनास्तीतिमेमतः॥६९॥नी
तयोवोविधातव्याउपास्याःकालपर्ययं॥यास्याम्यहंमहादेवंमंत्रार्थंविजयावहं॥७०॥अप्रतीपांस्ततोमंत्रान्
देवात्प्राप्यमहेश्वरात्॥युध्यामहेपुनर्देवांस्ततःप्राप्स्यथवैजयं॥७१॥ततस्तेकृतसंवादादेवानूचुस्तदासु
राः॥न्यस्तशस्त्रावयंसर्वेनिःसंनाहारथैर्विना॥७२॥वयंतपश्चरिष्यामःसंवृतावल्कलैर्वने॥प्रह्लाद
स्यवचःश्रुत्वासत्याभिव्याहृतंततः॥७३॥ततोदेवान्यवर्तंतविज्वरामुदिताश्चते॥न्यस्तशस्त्रेषुदैत्येषुवि

म०पु० निहतास्तदा पुनः ॥७४॥ ततस्तानब्रवीत्काव्यः कंचित्कालमुपास्यथ ॥ निरुत्साहास्तपोयुक्ताः कालेकार्यार्थसा
७० धकं ॥७५॥ पितुर्ममाश्रमस्था वै मां प्रतीक्षत दानवाः ॥ तत्संदिश्यासुरान्काव्यो महादेवं प्रपद्यत ॥७६॥ शुक्र उवा
च ॥ मंत्रानिच्छाम्यहं देव ये न संति बृहस्पतौ ॥ पराभवाय देवानामसुराणां जयाय च ॥७७॥ एवमुक्तोऽब्रवीद्देवो
व्रतं त्वं चर भार्गव ॥ पूर्णं वर्षसहस्रं तु कणधूममवाक्छिराः ॥७८॥ यदि पास्यसि भद्रं ते ततो मंत्रानवाप्स्यसि ॥ त
थेति समनुज्ञाप्य शुक्रस्तु भृगुनंदनः ॥७९॥ पादौ संस्पृश्य देवस्य बाढमित्यब्रवीद्वचः ॥ व्रतं चराम्यहं देव त्व
त यादिष्टोद्य वै विभो ॥८०॥ तोनुसृष्टो देवेन कुंडधारोस्य धूमकृत् ॥ तदा तस्मिन्गते शुक्रे त्वसुराणां सुखा
य वै ॥८१॥ मंत्रार्थं तत्र वसति ब्रह्मचर्यमथेश्वरे ॥ ततस्तु धृत्वा नीतिपूर्वं तु राज्यं न्यस्ते तदासुरैः ॥८२॥ अस्मिन्नछि
द्रे तदामर्षाद्देवास्तान्समुपाद्रवन् ॥ सन्नाताः सायुधाः सर्वे बृहस्पतिपुरःसराः ॥८३॥ दृष्ट्वासुरा यामधिपा
न्प्रगृहीतायुधान्सुरान् ॥ उत्पेतुः सहसा ते वै संत्रस्तास्तान्वचोऽब्रुवन् ॥८४॥ न्यस्ते शस्त्रे भयं दत्ते आचार्ये व्रतमा
स्थिते ॥ दत्त्वा भवंतो ह्यभयं संप्राप्ता नो जिघांसया ॥८५॥ अनाचार्यास्तु वयं देवास्त्यक्तशस्त्रा व्यवस्थिताः ॥ चीरकृ
ष्णाजिनधराः भक्ष्यां तानिः परिग्रहाः ॥ रणे विजेतुं देवांश्च न शक्ष्यामः कथंचन ॥ अयुद्धेन प्रपत्स्यामः शरणं राम
काव्यमातरं ॥८७॥ यापयामः कृच्छ्रमिदं यावदभ्येति नो गुरुः ॥ निवृत्ते च तथा शुक्रे योत्स्यामो दंशिता युधा ॥ ७०

॥८८॥ एवमुक्त्वासुरास्त्वन्योन्यं शरणं काव्यमातरं ॥ प्रापद्यंत ततो भीतास्तेभ्योदादभयं तु सा ॥८९॥ न भेतव्यं न भेत
व्यं भयं त्यजत दानवाः ॥ मत्संनिधौ वर्तता वो न भीर्भवितुमर्हति ॥९०॥ तथाचाश्रुपपन्नांस्तान्दृष्ट्वा देवास्ततो
सुरान् ॥ अभिजघ्नुः प्रसह्यैतानविचार्य बलाबलं ॥९१॥ ततस्तान्बध्यमानांस्तान्देवैर्दृष्ट्वासुरांस्तदा ॥ देवी
क्रुद्धाब्रवीद्देवान्सनिद्रान्वः करोम्यहं ॥९२॥ संनिधाय सर्वांस्तान्देवानभिनिद्रांस्त्वरं तदा ॥ ततः स्तंभितदेवी
च बुद्ध्या योगयुक्ता तपोधना ॥९३॥ ततः स्तंभितं दृष्ट्वा इंद्रं देवाश्च मूककवत् ॥ प्राद्रवंत ततो भीता इंद्रं दृष्ट्वा वशी
कृतं ॥९४॥ गतेष्वसुरसंघेषु इंद्रं विष्णुरभाषत ॥ मां त्वं प्रविश भद्रं ते नयिष्ये त्वां सुरोत्तम ॥९५॥ एवमुक्तो स्त
विष्णुं प्रविवेश पुरंदरः ॥ विष्णुनारक्षितं दृष्ट्वा देवी क्रुद्धा वचोऽब्रवीत् ॥९६॥ एषा त्वा विष्णुना सार्धं दहामि मघ
वन्बलात् ॥ कथं मुच्येत सहितो विष्णुरिंद्रमभाषत ॥९७॥ इंद्रोऽब्रवीत्तं तत्त्वेनापावयौ न दहेत्प्रभो ॥ विशेषे
णाभिभूतोस्मि ततो जहि च माचिरं ॥९८॥ ततः समीक्ष्य विष्णुस्तां स्त्रीवधे कृच्छ्रमास्थितः ॥ अभिध्याय ततः शुक्र
मापद्गुत्तरणोत्तमं ॥९९॥ ततः स त्वरया युक्तः शीघ्रकारी वराद्वितः ॥ ज्ञात्वा विष्णुस्ततस्तस्याः क्रूरं देव्याश्चिकी
र्षितं ॥१००॥ क्रुद्धस्त्वमस्त्रमादाय शिरश्चिच्छेद वै भयात् ॥ तं दृष्ट्वा स्त्रीवधं घोरं चुक्रोध भगवान्प्रभुः ॥१०१॥ ततोऽभि
शप्तो भृगुणा विष्णुर्भार्यानिधेन दा ॥ यस्मात्ते जानता धर्ममवध्या स्त्री निषूदिता ॥१०२॥ तस्मात्त्वं सप्तकृत्वेह मानु

म०पु० षेषूपपत्स्यसे पततस्तेनाभिशापेन नष्टे धर्मे पुनः पुनः ॥१०३॥ लोकस्य च हितार्थाय जायंते मानुषेष्विह ॥ अनुव्याहृ
ति विसृष्टस्तदा दाराद्वारपि भवितु ॥१०४॥ समानीपततः कार्यं ततो मृत्युर्ददमब्रवीत् ॥ एषत्वां विस्पुना देविइतोसं
७१ जावयाम्यहं ॥१०५॥ यदि कृच्छ्रो मया धर्मो ज्ञायते चरितो पिवा ॥ तेन सत्येन जीवस्व यदि सत्यं ब्रवीम्यहं ॥१०
६॥ ततस्तामुष्पश्लीतामिरद्भिरासिंच्य सो ब्रवीत् ॥ ततो जिव्या हृतेनस्य देवी संजीविता तदा ॥१०७॥ ततस्तां सर्वभू
तानि दृष्ट्वा सुप्तोत्थितामिव ॥ साधु साध्विति चक्रेस्ते वचमा सर्वतो दिशं ॥१०८॥ एवं प्रत्याहृता तेन देवी सा मृत्यु
णा तदा ॥ मिषतां देवतानां हि तदद्भुतमिवाभवत् ॥१०९॥ असंभ्रांतेन मृत्युणा पत्नी संजीविता पुनः ॥ दृ
ष्ट्वा चेंद्रो नलमनतरशर्मकाव्यमनयात्पुनः ॥११०॥ प्रजागरे ततस्तस्मै भोजयंतीमिदमब्रवीत् ॥ संचित्य मघवक्रं
कं स्त्रीकन्यापाकशासनः ॥१११॥ एष काव्यो ह्यमित्राय व्रते चरति दारुणं ॥ तेनाहं व्याकुलः पुत्रि कृतो म
ति मतां वर ॥११२॥ गच्छ संभ्रावयस्वैनं श्रमापयन यनैः श्रुतैः ॥ तैस्तैर्मनोनुकूलैश्च उपचारैरतंद्रिता ॥
११३॥ काव्यमाराधयस्वैनं यथा तुष्यति ते द्विज ॥ गच्छ त्वं तस्य दत्तास्मि प्रयत्नं कुरु मत्कृते ॥११४॥ एवमु राम.
क्ता जयंती सा वाचः संगृह्य वै पितुः ॥ अगच्छद्यत्र घोरं स तप आरब्धवान् तिष्ठति ॥११५॥ तं दृष्ट्वा तु पिबंतं सा ७१
कणाधूममवाङ्मुखं ॥ चक्रेण पात्यमानं च कुंडधारेण पातनं ॥११६॥ दृष्ट्वा च तं पात्यमानं देवी काव्यमव

स्थिता ॥ स्वस्वरूपधरं दृष्ट्वा वपुषा कृत्रिमा स्थिता ॥११७॥ पितृगाय योग्यं वाक्यं सा काव्ये कृतवती तदा ॥ गीर्भिश्चै
वानुकूलाभिः स्तुवंती वल्गुभाषिणी ॥११८॥ पात्रसंवाहनैः कालेस्य च मानात्व च सुखैः ॥ व्रतचर्यानुकूला
भिरुवास बहुलाः समाः ॥११९॥ पूर्णे धूमव्रते तस्मिन् घोरे वर्षसहस्रके ॥ वरेण छंदयामास काव्यः प्रीतो
भवस्तदा ॥१२०॥ श्रीमहेश्वर उवाच ॥ एतद्व्रतं त्वया चैकेन चीर्णं नान्येन केनचित् तस्माद्वै तपसा बुध्या श्रुते
न च बलेन च ॥१२१॥ तेजसा वसुरान्सर्वांस्त्वमेकोभिभविष्यसि ॥ यच्च किंचिदपि ब्रह्मन् विद्यते भृगुनंदन
॥१२२॥ प्रतिपत्स्यसि तत्सर्वं तत्र वाच्यं च कस्यचित् ॥ सर्वाभिजाव्येते नत्वं भविष्यसि द्विजोत्तमः ॥१२३॥ एता
न् दत्वा वरांस्तस्मै भार्गवाय भवः पुनः ॥ प्रजेशत्वं धनेशत्वं अवध्यत्वं च वै तदा ॥१२४॥ एतान् ज्ञात्वा वरान् का
व्यः संप्रहृष्टतनूरुहः ॥ हर्षात्प्रादुर्बभूवास्य दिव्यं स्तोत्रं महेश्वरं ॥१२५॥ शुक्र उवाच ॥ ॥ नमोस्तु शितिकंठाय
कनिष्ठाय सुवर्चसे ॥ लेलिहानाय काल्याय वत्सराय वनस्पते ॥१२६॥ कपर्दिने कराल्याय हर्यक्षे वरदाय
च ॥ संस्तुताय सुतीर्थाय देवदेवाय रंहसे ॥१२७॥ उष्णीषिणे सुवक्त्राय सहस्राक्षाय मीढुषे ॥ वसुदाय सु
रूपाय तपसे चित्रवाससे ॥१२८॥ हृस्वाय मुक्तकेशाय सेनान्ये रोहिताय च ॥ कवये राजवृक्षाय तक्षक
क्रीडनाय च ॥१२९॥ सहस्रशिरसे चैव बभ्रुरूपाय वेधसे ॥ इरापसौम्यरूपाय श्वेताय पुरुषाय च ॥१३०

गिरीशाय नमोर्काय खलिने ज्ञाश्रयाय च॥ सुतप्ताय सुहस्ताय धन्विने भार्गवाय च॥ १३१॥ निषंगिणे च
ताराय सांख्याय पक्षपणाय च॥ ताम्राय सैव भीमाय उग्राय च शिवाय च॥ १३२॥ हिरण्याय विशिष्टाय ज्येष्ठा
य मध्यमाय च॥ वंशवे च पिंगाय पिंगलायारुणाय च॥ १३३॥ पिनाकिने च सुमते चित्राय रोहिताय च॥
मृगव्याधाय सर्वाय स्थूलाय भीषणाय च॥ १३४॥ बहुरूपाय धुर्याय त्रिनेत्रायेश्वराय च॥ कपालिने चै
वकाय एकवीराय मृत्यवे॥ १३५॥ वालोष्पते पिनाकाय मुक्तये केवलाय च॥ आरण्याय गृहस्थाय य
तये ब्रह्मचारिणे॥ १३६॥ सांख्याय चैव योगाय व्यापकाय दीक्षिताय च॥ अनाहताय सर्वाय व्यापिने ताय ना
य च॥ १३७॥ रोधसे चेकितानाय ब्रह्मिष्ठाय महर्षये॥ चतुष्पदाय मेध्याय दक्षिणे शीघ्रगाय च॥ १३८॥ त्रि
खंडिने कराकाय दंष्ट्रिणे विश्ववेधसे॥ भास्कराय प्रदीप्ताय सुदीप्ताय सुमेधसे॥ १३९॥ क्रूराय विकृताये च
भीषणाय शिवाय च॥ सौम्याय चैव मुख्याय धार्मिकाय शुभात्मने॥ १४०॥ अवध्यायामृताय चैव नित्याय शाश्व
ताय च॥ व्यापृताय विशिष्टाय भरताय च रक्षिणे॥ १४१॥ क्षेम्याय सहमानाय सत्याय चामृताय च॥ कर्त्रे
परासवे चैव शूलिने दिव्यचक्षुषे॥ १४२॥ सोमपायाज्यपायैव धूमपायोष्मपाय च॥ शुचये परिधानाय स
द्योजाताय मृत्यवे॥ १४३॥ विशिनाशाय शर्वाय मेधसे विद्युताय च॥ व्याधिताय वरिष्ठाय भरताय तरिक्षवे॥ १४४॥ राम ७२

त्रिपुरघ्नाय दीप्ताय चक्राय रोमशाय च॥ तिग्मायुधाय व्याख्याय सुसिद्धाय पुलस्तये॥ १४५॥ रोचमानाय चं
डाय स्फीताय ऋषभाय च॥ व्रतिनेशंसमानाय शुचये चोर्ध्वरेतसे॥ १४६॥ असुरघ्नाय मखघ्नाय पत्रघ्नाय रु
द्राणवे॥ मृत्युघ्नाय प्रवीनाय निर्मलाय च॥ १४७॥ राक्षोघ्नाय पशुघ्नाय विघ्नाय विमलाय च॥ विश्रांताय महा
ताय ध्यानेताय स्वर्गमाय च॥ १४८॥ कृत्स्नाय च जयायत्राय लोकानामीश्वराय च॥ अनाश्रिताय वेध्याय भूमिता
धिष्ठिताय च॥ १४९॥ हिरण्यबाहवे चैव पाशाय च समाय च॥ सुकृताय प्रमत्याय ईशानाय सुचक्षुषे॥ १५०
क्षिप्रेषवे सुधन्वाय प्रमथाय शिवाय च॥ कपिलाय पिशंगाय महादेवाय धीमते॥ १५१॥ महाकायाय दीप्ता
य रोदनाय सहाय च॥ नमोस्तु भगवंस्तुभ्यं विशोकं कृतवेधसे॥ १५२॥ अमोघाय प्रशांताय सुमोघाय व
पाय च॥ नमोस्तु तुभ्यं भगवन् विश्वेशे कृत्तिवाससे॥ १५३॥ पशूनां पतये तुभ्यं भूतानां पतये नमः॥ प्रणवाये
ऋग्यजुःसाम्ने स्वाहाय च स्वधाय च॥ १५४॥ भूतभव्यभवाये कतुभ्यं कर्मात्मने नमः॥ निर्गुणाय गुणज्ञाय
व्याकृताय कृताय च॥ १५५॥ स्वयंभुवे प्रजायैव त्र्यंबकाय समाय च॥ प्रजानां पतये चैव तुभ्यं ब्रह्मात्मने नमः॥
१५६॥ आत्मेशाय भुवरूपाय सर्वशांतिकराय च॥ सर्वभूताय भूताय तुभ्यं भूतात्मने नमः॥ १५७॥ निर्गु
णाय गुणज्ञाय व्याकृताय कृताय च॥ निरपेक्षाय मित्राय तुभ्यं सांख्यात्मने नमः॥ १५८॥ पृथिव्ये चांतरि

क्षायदिव्यायचमहायच॥ऋजुपेष्यायसिद्धायतुभ्यंलोकात्मनेनमः॥१५९॥अव्यक्तायमहांतायस्वरादेनियमा
यच॥आत्मन्वयविशेषायतुभ्यंतत्वात्मनेनमः॥१६०॥नित्यायनित्यलिंगायसूक्ष्मायचेतनायच॥हृदाप
वेनवेचैवतुभ्यंमोक्षात्मनेनमः॥१६१॥नमस्तेत्रिषुलोकेषुनमस्तेपरतस्त्रिषु॥सत्यांतेषुमहाद्येषुचतु
र्षुचनमोस्तुते॥१६२॥नामस्तोत्रेमयात्यस्मिन्यदिनोक्तंहितंभवेत्॥मरुद्भक्तइतिब्रह्मण्यएपतत्सर्वंक्षंतुम
र्हसि॥१६३॥सूतउवाच॥एवमाराध्यदेवेशमीश्वरंनीललोहितं॥बद्धातिप्रणतेतस्मैप्रांजलिर्वाग्य
तोभवेत्॥१६४॥कायस्यगात्रंसंस्पृश्यहस्तेनप्रीतिमानभव॥निकामदर्शनंदत्वातत्रैवांतरधीयत॥१६
५॥ततःसोंतर्हितेतस्मिन्देवेशेनुचरीतदा॥तिष्ठतीपार्श्वतोदृष्ट्वाजयंतीमिदमब्रवीत्॥१६६॥कस्यत्वंसु
भगेकाचदुःखितेमयिदुःखिता॥महतातपसायुक्ताकिमर्थंमांजिगीषसि॥१६७॥त्वनयासंस्तुतोभक्त्याप्र
श्रयेणदमेनच॥स्नेहेनचैवसुश्रोणिप्रीतोस्मिवरवर्णिनि॥१६८॥किमिच्छसिवरारोहेकस्तेकामःसमध्य
तां॥तत्तेसंपादयाम्यद्ययद्यपिस्यात्सुदुष्करं॥१६९॥एवमुक्तात्रवीदेनंतपसाज्ञातुमर्हसि॥चिकीर्षितं
हिब्रह्मर्षेसर्वंहिवेत्सियथातथं॥१७०॥एवमुक्तोब्रवीदेनांदृष्ट्वादिव्येनचक्षुषा॥मयास्तुतस्त्वंसुश्रोणिदश
वर्षाणिभामिनि॥१७१॥ततःस्वगृहमागम्यजयंत्याःपाणिमुद्वहत्॥तयासहावसद्देवोदशवर्षाणिभार्गवः

७२॥एवंवृणोषिकामंत्वंमयावैवल्गुभाषिणि॥एवंभवतुगच्छामोगृहान्नोमत्तगामिनि॥७३॥अदृश्यःस
र्वभूतानांमाययासंवृतःप्रभुः॥कृतार्थमागतंज्ञात्वाकाव्यंसर्वेदितेःसुताः॥१७४॥अभिजग्मुर्गृहंतस्य
मुदितास्तेदिदृक्षवः॥गतायदानपश्यंतिमाययासंवृतंगुरुं॥१७५॥लक्षणंतस्यतद्बुध्वाप्रतिजग्मुर्य
थागतं॥बृहस्पतिस्तुसंरुद्धंकाव्यंज्ञात्वावरेणतु॥१७६॥तत्प्रार्थंदशवर्षाणिजयंत्याहितकाम्यया॥
बुध्वातदंतरंसोपिदैत्यानिंद्रप्रचोदितः॥१७७॥काव्यस्यरूपमास्थायासुरान्समाह्वयत्॥तत
स्तानागतान्दृष्ट्वाबृहस्पतिरुवाच॥१७८॥स्वागतंममयाज्यानांप्राप्तोहंवोहितायवै॥अहंवोध्यापयि
ष्यामिविद्याःप्राप्तास्तुसामया॥१७९॥ततस्तेहृष्टमनसोविद्यार्थमुपपेदिरे॥पूर्णकाव्यस्ततस्तस्मिन्समये
दशवार्षिके॥१८०॥समयांतेदेवयानीतदोत्पन्नाइतिश्रुतिः॥बुध्वातदंतरंसोपिदैत्यानिंद्रप्रचोदितः॥१७
७॥काव्यस्यरूपमास्थायासुरान्समाह्वयत्॥ततस्तानागतान्दृष्ट्वाबृहस्पतिरुवाच॥१७८॥स्वागतंमम
याज्यानांप्राप्तोहंवोहितायवै॥अहंवोध्यापयिष्यामिविद्याःप्राप्तास्तुसामया॥१७९॥ततस्तेहृष्टमनसोविद्यार्थ
मुपपेदिरे॥पूर्णकाव्यस्ततस्तस्मिन्समयेदशवार्षिके॥१८०॥समयांतेदेवयानीतदोत्पन्नाइतिश्रुतिः॥
बुद्धिंचक्रेततःसोत्रयाज्यानांप्रसवेक्षणे॥१८१॥देविगच्छाम्यहंद्रष्टुंममयाज्यान्शुचिस्मिते॥विभ्रांतप्रे

सतोस्माद्धित्रिवत्स्यति तत्रो वने ॥८२॥ एवमुक्त्वाब्रवीदेनं जयन्त्यान्महाव्रत ॥ एष धर्मः सतां ब्रह्मन्नु न धर्मं बो
पयामि ते ॥ १८३॥ तान् दृष्ट्वा वासुरान् गत्वा रे नाचार्येण धीमता ॥ वंचितात्का व्यरूपेण ततः काव्योब्रवीन्म
न ॥८४॥ काव्यं मां वो विजानीध्वं तोषितो गिरिशो विभुः ॥ वंचिता एव यूयं वै सर्वे शृणुत दानवाः ॥ ८५॥ श्रुत्वा
तथा ब्रुवाणं तं संत्रस्तास्ते तथाभवन् ॥ प्रेक्षंते तावुभौ त्यत्र स्थितासीवीक्ष्य विस्मिताः ॥ १८६॥ संभ्रमं दाल्लतः
सर्वे तथाबुध्या न किंचन ॥ ततस्तु संप्रमृदे शुक्रस्तानसान ब्रवीत्तदा ॥ ८७॥ आचार्यो वै त्वहं काव्यो देवा चा
यो पमं गिराः ॥ अनुगच्छंत मां दैत्यास्त्यजतैनं बृहस्पतिं ॥ १८८॥ इत्युक्तास्त्यसुरास्तेनतावुभौ समवेक्षयन्
यथा पुरा विशेषं तु न जानंतु जयोस्तयोः ॥ ८९॥ बृहस्पतिरुवाच ॥ तान् संभ्रांतस्तपोधनः ॥ काव्योवोहं
गुरुर्दैत्या मद्रूपोयं बृहस्पतिः ॥ संमोहयति रूपेणामामकेनैव वो सुराः ॥ १९०॥ श्रुत्वा तत्स्य ततस्ते वै समेत्य
चततो ब्रुवन् ॥ अयं नो दश वर्षाणि सततं शास्ति वै प्रभुः ॥ ९१॥ एष वै गुरुरस्माकमंतरेप्सुरयं द्विजः ॥
ततस्ते दानवाः सर्वे प्रणिपत्याभिनंद्य च ॥ १९२॥ वचनं जगृहुस्तस्य चिराभ्यासे मोहिताः ॥ ऊचुस्तम
सुराः सर्वे क्रुद्धाः संरक्तलोचनाः ॥ ९३॥ अयं गुरुर्हितोस्माकं गच्छ त्वं नासि नो गुरुः ॥ भार्गवो वांगिरा वापि भ
गवाने गुरुः ॥ ९४॥ स्थिता वयं निदेशेस्य साधु त्वं गच्छ मा चिरं ॥ एवमुक्त्वा सुराः सर्वे प्रापद्यंत बृहस्पतिं ॥ ९

यदा तु प्रतिपद्येत काव्यमनोक्तं महद्धितं ॥ चुकोप भार्गवस्तेषामवलेपेन तेन तु ॥ ९६॥ बोधिता हि ता मया य
स्मान्नमां न जतदानवाः ॥ तस्मान्नष्टसंज्ञा वै पराजयमवाप्स्यथ ॥ ९७॥ इति व्याहृत्य गां काव्यो जगाम यथा
यथागतं ॥ सतांस्त्यानसुरान्ज्ञात्वा काव्येन बृहस्पतिः ॥ ९८॥ कृतार्थः स तदा हृष्टः स्वं रूपं प्रत्यपद्यत ॥ बु
ध्वा हतानसुरान् ज्ञात्वा तत्रैवांतरधीयत ॥ ९९॥ ततः प्रणष्टे तस्मिंस्तु विभ्रांता दानवा ब्रुवन् ॥ अहो धिग्वंचि
ताः स्मेति परस्परमथाब्रुवन् ॥ २००॥ पृष्ठतोभिमुखाश्चैव ताडिता गिरिशेन तु ॥ वंचिताः सोपधानेन स्वेस्वे
वस्तुनि मायया ॥ २०१॥ ततस्तु परितुष्टास्ते तमेव त्वरितायपुः ॥ प्रह्लादमग्रतः कृत्वा काव्यमस्यानुपदं पुः
२०२॥ ततः काव्यं समासाद्य उपतस्थुः पराङ्मुखाः ॥ समागतान्तु नर्हदृष्ट्वा काव्यो याज्यानुवाच ॥ २०३॥ म
या संबोधिताः काले यतो मांनाभ्यनंदथ ॥ अतस्तेनावमानेन गता यूयं पराभवं ॥ २०४॥ एवं ब्रुवाणं शुक्रं
तु बाष्पसंदिग्धया गिरा ॥ प्रह्लादस्तं ततो वोचमास्मांस्त्वं त्यज भार्गव ॥ २०५॥ त्वया दृष्टे वयं तेन देवाचार्ये
ण मोहिताः ॥ भक्तान्नर्हसि वै ज्ञातुं तपोदीर्घेण चक्षुषा ॥ २०६॥ यदि न स्त्वं न कुरुषे प्रसादं भृगुनंदन ॥ अप
ध्यातास्त्वया त्वद्य प्रविशामो रसातलं ॥ २०७॥ ज्ञात्वा काव्यो यथातत्वं कारुण्याद्नुकंपया ॥ एवं प्रसन्नुनीतो
वै ततः कोपं नियम्य सः ॥ २०८॥ उवाचैतान्न भेतव्यं न गंतव्यं रसातलं ॥ अवश्यंभाविनो ह्यर्थाः प्राप्तायेम

म०पु०
७५

यिजाग्रति॥२०॥ नत्राक्रममत्स्यपाकर्त्तुं दिष्टं हि बलवत्तरं॥ संज्ञाप्रनष्टायां बोधकाले तां प्रतिपत्स्यथ॥२१०
देवैर्जिताः सकृच्चापि पातालं प्रतिपत्स्यथ॥ प्राप्तः पर्यायकालो न इति ब्रह्मा स्म भाषत॥२११॥ मत्प्रसादाच्च
त्रैलोक्यं भुक्तं युष्माभिरूर्जितं॥ युगाख्या दश संपूर्णा देवानाक्रम्य मूर्द्धनि॥२१२॥ एतावदेव कालं वै ब्रह्मारा
ज्यमभाषत॥ राज्यं सावर्णिके तु स्यं पुनः किल भविष्यति॥१३॥ लोकानामीश्वरो भाव्यस्तव पौत्रः पुनर्बलिः॥
एवं किल मिथः प्रोक्तः पौत्रस्ते विष्णुना स्वयं॥१४॥ तदा हृष्टेषु कालेषु नास्याभवत्किल॥ यस्मात्त्ववृत्र
यच्चास्माद्दशभिरन्विताः॥२१५॥ तस्मात्त्वन्नैनमीतेन वरस्तुभ्यं स्वयंभुवा॥ देवराज्ये बलिर्भाव्य इति मामीश्वरो
ब्रवीत्॥२१६॥ तस्मान्निरुत्सुकस्त्वं वै मर्यादां तरितो सुरैः॥ न हि शक्यं मया तुभ्यं पुरस्तादिप्रभाषितुं॥२१७॥
ब्रह्मणा प्रतिषिद्धोहं भविष्यं ज्ञानता विभो॥ इमौ तु सच्छकौ मत्यं समवेतौ वृहस्पते॥१८॥ दैवतैः सह संस
र्धां सर्वान्वो धारयिष्यतः॥ इत्युक्तास्त्वसुराः सर्वे काव्येनाक्लिष्टकर्मणा॥१९॥ दृष्टास्तेन पयुः सार्द्धं प्रह्लादे
नमहा॥१९॥ दृष्टास्तेन यपुः सार्द्धं प्रह्लादेन महात्मना॥ अवश्यंभावमर्थं विश्रुत्वा शुक्रेण भाषितं॥२०॥
दंशिताः सायुधाः सर्वे ते देवान्प्रसमाह्वयन्॥ देवास्तदासुरान्दृष्ट्वा संग्रामे समुपस्थितान्॥२१॥ सर्वे संनद्ध
संभारा देवास्ते समयोधयन्॥ देवासुरे तदा तस्मिन्वर्त्तमाने त्रायतसमाः॥२२॥ अजयन्नसुरा देवांस्ततो देवा

नि

राम०
७५

षडमंत्रयन्॥ यातेनोपाह्वयामस्तांस्तद्विजेष्यामहे सुरान्॥२३॥ तदोपामंत्रयन्देवाः शंडामर्कौ तु तावुभौ॥ यज्ञे
वाक्पतौ प्रौ क्रौ त्यजतामसुरान्द्विजौ॥२४॥ आं वां ग्रहेन जेष्यावः सह जित्वा तु दानवान्॥ एवं दैत्याः पुराका
अशापेनाभिहतास्तदा॥२५॥ निरस्यमाना देवैश्च विविशुस्ते रसातलं॥ एवं निरुद्यमा देवैः कृता कृच्छ्रेण दान
वाः॥२६॥ ततः प्रभृति शापेन भृगुर्नैमित्तिके न तु॥ जज्ञे पुनः पुनर्विष्णुर्धर्मे प्रशिथिले प्रभुः॥२७॥ कुर्वन्ध
र्मस्थापनं चासुराणां प्रवासनं॥ प्रह्लादस्य तु निर्देशो न स्थास्यन्ति सुराश्रये॥२८॥ मनुष्यवध्यांस्तान्सर्वान्
ब्रह्मेति व्याहरत्प्रभुः॥ धर्मनारायणस्यांश संभूतं चाक्षुषेन्तरे॥२९॥ यज्ञं प्रावर्त्तयामास देवा वैवस्वतेन्तरे॥ प्रा
प्रादुर्भवे ततस्तस्य ब्रह्माप्यासीत्पुरोहितः॥३०॥ चतुर्थ्यां तु युगाख्यायामापन्नेष्वसुरेष्वथ॥ संभूतः समु
द्रान्तहिरण्यकशिपोर्वधे॥३१॥ द्वितीयो नरसिंहोभूद्रुद्रसुरपुरःसरः॥ बलेः संयते पुलोके युवे नायोध
प्रमी प्रति॥३२॥ तृतीयो वामनस्यार्थे धर्मेण तु पुरोधसा॥ एतास्तिस्रः स्मृतास्तस्य दिव्याः संभूतयः शुभाः॥ सु
नुष्याः सप्त ये चान्ये शापजांस्तान्निबोधत॥ त्रेतायुगे तु दशमे दत्तात्रेयो बभूव ह॥३४॥ नष्टे धर्मे चतुर्थांशो मा
र्कण्डेयपुरःसरः॥ पंचमं पंचदश्यां च त्रेतायां च बभूव ह॥३५॥ मांधाता चक्रवर्त्तित्वे जातो तत्तंकपुरःसरः॥ ए
कोनविंशे त्रेतायां सर्वक्षत्रान्तकोभवत्॥३६॥ जामदग्न्यस्तथा षष्ठो विश्वामित्रपुरःसरः॥ चतुर्विंशे युगे

रामोवसिष्ठेनपुरोधसा॥३७॥सप्तमोरावणस्यार्थेजज्ञेदशरथात्मजः॥अष्टमोद्वापरेविष्णुरष्टाविंशेपराश
रात॥३८॥वेदव्यासस्वरूपेणजातूकर्ण्यपुरस्सरः॥कर्तुंधर्मव्यवस्थानंअसुराणांप्रणाशनं॥३९॥ति
ष्यान्नवमकेजज्ञेतपसापुष्करेक्षणः॥देवक्यांवसुदेवेनद्वैपायनपुरस्सरः॥४०॥देवेसमोभाव्यसंभ
तोयाज्ञवल्क्यपुरोहितः॥सर्वांश्चिभृतांश्चिमितापाखंडांश्चैवसर्वशः॥४१॥प्रगृहीतायुधैर्विप्रैर्वृतःशतस
हस्रकैः॥निःशेषानुशराजस्तुतदाशास्तुःकरिष्यति॥४२॥ब्रह्मद्विषःसपत्नांस्तुसंहृत्यैवहतद्युषः॥
पंचविंशोत्थितःकाष्ठिश्चरितार्थःप्रसेनिक॥४३॥स्त्रवान्संसाधयित्वातुसमुत्तिष्ठंतेयथैस्वयं॥प्राहृतचक्रो
बलवान्संहारंतुकरिष्यति॥४४॥उत्सादयित्वानिखिलान्प्रायसस्तानधार्मिकान्॥अकस्मात्कोपनोमो
न्यंहनिष्यंतीहमोहिता॥४५॥क्षपयित्वेतिरितोन्योन्यंभावितापैनमोहिताः॥ततःकल्कीव्यतीतेतुतदैवांतरधी
यत॥४६॥नृपेष्वथप्रनष्टेषुप्रजानांसंप्रहाणदा॥रक्षणेविनिवृत्तेषुहत्वाचान्योन्यमाहवे॥४७॥परस्परं
चहत्वातुनिराक्रंदाःसुदुःखिताः॥पुराणिहत्वाग्रामांश्चततुल्येनिःपरिग्रहाः॥४८॥प्रनष्टश्रोपधर्माश्च
तुर्वर्ण्याश्रमास्तथा॥अह्रस्वाजनपदाःशिवशूलाश्चतुष्पथाः॥४९॥प्रमदाःकेशशूलाश्चभविष्यंतियुग
क्षये॥ह्रस्वदेहायुषश्चैवभविष्यंतिदिवौकसः॥५०॥सरित्पर्यंतवासिन्यःप्रजामूलफलाशनाः॥चीरचर्मादि

कधराःसंघोरमास्थिताः॥५१॥उत्पातदुःखसंत्रस्ताःपूर्वंकृत्वोधावृताःप्रजाः॥एवंकष्टमनुप्राप्ताःकालेसंध्यां
शकेतदा॥५२॥तथाक्षयंगमिष्यंतिमार्दकलियुगेजनाः॥क्षीणेकलियुगेतस्मिंस्ततःकृतमवर्तत॥५३॥इ
त्येतत्कथितंसम्यग्देवासुरविचेष्टितं॥यदुवंशप्रसंगेनसमासाद्वैस्ववंशजाः॥तुर्वसोस्तुप्रवक्ष्यामिद्रुरो
र्दुह्यस्यचाप्यनोः॥५४॥इतिश्रीमत्स्यपुराणेसोमवंशेयदुवंशः॥॥सूतउवाच॥॥तुर्वसोस्तुतोवार्गो
गोभानुस्तस्यचात्मजः॥दुष्यंतपौरवंचापितस्यपुत्रमकल्मषं॥१॥एवंययातिशापेनजरासंक्रमणेपुरा॥तु
र्वसोःपौरवंशेप्रविवेशपुराकिल॥२॥दुष्यंतस्यतुदायादोवरूथोनामपार्थिवः॥वरूथात्तुतपांडीरःसं
धानस्तस्यचात्मजः॥३॥रम्यायतेयस्यनाम्नासौगंधारविषयोमहान्॥आरंददेशजास्तस्यतुरंगावाजि
नांवराः॥४॥गंधारपुत्रोधर्मस्तुघृतस्तस्यात्मजोभवत॥घृताद्विदुषोजज्ञेप्रचेतास्तस्यचात्मजः॥५॥प्रचे
तसःपुत्रशतंराजानःसर्वएवते॥म्लेच्छराष्ट्राधिपाःसर्वेउदीचींदिशमास्थिताः॥६॥अनोश्चैवसुतावीराश्चयः
परमधार्मिकाः॥सभानरश्चाक्षुषश्चपरमेषुस्तथैवच॥७॥सभानरस्यपुत्रस्तुविद्वान्कोलाहलोनृपः॥
कोलाहलस्यधर्मज्ञःसंजयोनामविश्रुतः॥८॥संजयस्याभवत्पुत्रोवीरोनाम्नापुरंजयः॥जनमेजयोमहाराजपु
रंजयसुतोभवत्॥९॥जनमेजयस्यराजर्षेर्महाशालोभवत्सुतः॥आसीदिंद्रसमोराजाप्रतिष्ठितयशाभवत॥१०

महामनाःसुतस्तस्यमहाशालस्यधार्मिकः॥ म्वगायास्तुमगुःपुत्रोनरायानरएवच॥११॥ कश्यपाःकस्तुसंजातो
दर्शायाःसुव्रतोभवत्॥ वृषदर्भाःसुतश्चापिशिबिरौसीनरोनृपः॥१२॥ शिवेस्तुशिवदाःपुत्राश्चत्वारोलोकवि
श्रुताः॥ पृथुदर्भःसुवीरश्चकैकेयोभद्रकस्तथा॥१३॥ तेषांजनपदाःस्फीताःकेकयाभद्रकास्तथा॥ सौवीराश्चै
वप्राग्र्याश्चऋग्वः केकयास्तथा॥१४॥ सुव्रतस्यतथाराज्ञस्यरूपेश्चहृषलापुरी॥ नवस्यनवराष्ट्रंतुतितिक्षोश्चप्रजां
शृणु॥१५॥ तितिक्षरभवद्राजापूर्वस्यांदिशिश्रुतः॥ वृषद्रथःसुतस्तस्यतस्यसेनाभवत्सुतः॥१६॥ सेनस्यसुत
पाजज्ञेसुतःसुतपसोबलिः॥ जातोमानुषयोन्यांतुक्षीणेवंशेप्रजेच्छया॥१७॥ महायोगीतुसबलिर्बद्धोवंधेम
हात्मना॥ पुत्रानुत्पादयामासक्षेत्रजात्यंचपार्थिवान्॥१८॥ अंगंसजनयामासवंगंसुह्मंतथैवच॥ पुंड्रंक
लिंगंचतथाबालेयंक्षत्रमुच्यते॥१९॥ बालेयाब्राह्मणाश्चैवतस्यवंशकराःप्रभो॥ बलेश्चब्रह्मणादत्तोव
रःप्रीतेनधर्मवितः॥२०॥ महायोगित्वमायुश्चकल्पस्यपरिमाणकं॥ संग्रामेवाप्यजेयत्वंधर्मेचैवोत्तमा
मतिः॥२१॥ त्रैलोक्यदर्शनंचैवप्राधान्यंप्रसवेतथा॥ जयंचाप्रतिमंयुद्धेधर्मेतत्त्वार्थदर्शनं॥२२॥ चतुरोनि
यतान्वर्णान्सवैस्थापयिताप्रभुः॥ तेषांचपंचदायादावंगांगसुह्मकास्तथा॥२३॥ पुंड्राकलिंगाश्चतथाअंग
स्यतुनिबोधत॥२३॥ ऋषयऊचुः॥ कथंबलेःसुताजाताःपंचतस्यमहात्मनः॥ किंनाम्नीमहिषीतस्यजनेता

कतमोऋषिः॥२४॥ कथंचेत्यादितास्तेनतनयाःप्रब्रूहिपृच्छतां॥ माहात्म्यंचसमग्रंवैचनिखिलेनवदस्वतत्॥२५॥
सूतउवाच॥ अथोरजइतिख्यातआसीद्विद्वानृषिःपुरा॥ पत्नीवैसंमतानामबभूवास्यमहात्मनः॥२६॥ उ
शिजस्यरवीयस्यवैभ्रातुःपत्नीमकामयत्॥ बृहस्पतिर्बृहत्तेजाःसंमतामेत्यकामतः॥२७॥ उवाचसंम
तातंतुदेवरंवरवर्णिनी॥ अंतर्वत्न्यस्मितेभ्रातुर्ज्येष्ठस्यचविरम्यतां॥२८॥ अयंतुमेमहाभागगर्भःकुक्षेर्बृ
हस्पते॥ औशिजोब्रह्मातत्त्ववेत्तासोपांगंवेदमुज्झिरत्॥२९॥ अमोघरेतास्त्वंचापिनमांनजितुमर्हसि॥ तस्मि
न्नेवंगतेकालेयथावामन्यतेभवान्॥३०॥ एवमुक्तस्तयासम्यग्बृहत्तेजाबृहस्पतिः॥ कामात्मासमहा
त्मापिमनसःसोभ्यवारयत्॥३१॥ सबभूवधर्मतयासार्धंमिकामयत्॥ उत्सृजंतंतुतंरेतोवाचंगर्भोभ्यभाषत॥
३२॥ भोस्तातवाचामधिपद्वयोर्नास्तीहसंस्थितिः॥ अमोघरेतास्त्वंचापिपूर्वंचाहमिहागतः॥३३॥ सोशपत्तं
ततःक्रुद्धएवमुक्तोबृहस्पतिः॥ पुत्रंज्येष्ठंतुवैभ्रातुर्गर्भस्थंभगवानृषिः॥३४॥ यस्मात्त्वमीदृशेकालेगर्भस्थो
ऽपिनिषेधसि॥ मामेवमुक्तवांस्तस्मात्तमोदीर्घंप्रवेक्ष्यसि॥३५॥ ततोदीर्घतमानामशापादृषिरजायत॥ आ
द्योसिजोबृहत्कीर्तिर्बृहस्पतिरिवौजसा॥३६॥ ऊर्ध्वरेतास्ततःसोपिवसतेभ्रातुराश्रमे॥ सधर्मात्सौरभेयात्तु
प्रमातश्रुतवांस्ततः॥३७॥ तस्यभ्रातापितृव्योवैचकारभरणंतदा॥ तस्मिन्निवसतस्तस्ययदृच्छाचागतोवृषः

म०पु०
७९

पत्न्यार्थमागतानन्दं नंश्चिरवादसुरनीसुतः॥ जग्राहतं दीर्घतमाः शृंगयोस्तु चतुष्पदं॥३९॥ तेनासौ निगृहीत
श्चनचचालपदात्पदं॥ ततोब्रवीदृषभस्तं वैमुंचमां बलिनांवर॥४०॥ नमयाछादितस्तात वृद्धवांस्त्वत्समः
क्वचित॥ मम चान्यः समोवापिनहिमेबलसंख्यपः॥४१॥ दृषभउवाच॥ नास्माकंविद्यते तात पातकं स्तेय
मेवच॥ भक्षाभक्षं तथाचैव पेयापेयं तथैवच॥४२॥ द्विपदांबहवोत्येते धर्मतत्षगवां स्मृतः॥ कार्याका
र्यं न वागमनं च तथैवतु॥४३॥ सूतउवाच॥ गवांधर्मं तु वै श्रुत्वा संभ्रांतस्तु विसृज्यतं॥ शाकुत्याल्पपानदाना
नुगोपतिं संप्रसादयन॥४४॥ प्रसादितेगतेतस्मिन गोधर्मं निश्चितः प्रभुः॥ मनसैव समादध्यौ तन्निष्ठस्त
त्ररोहितः॥४५॥ ततोपवीयसः पत्नी गोतमस्याभ्यपद्यत॥ निर्भर्त्स्य चैनं रुध्वा च बाहुभ्यां संप्रगत्यचा॥४
६॥ नाय्यमर्षंतु तं तात महात्मानमुवाचह॥ विपर्ययं तु तं ज्ञात्वा तामाहात्म्यान्मसुवाचसा॥४७॥ विपर्ययंतु तं
ज्ञात्वा अनड्वानिव निवर्तसे॥ गम्यागम्यं न जानीषे गोधर्मात्याप्रयतस्तु खं॥४८॥ दुर्वृत्तं तां त्यजाम्यद्य गत्वा त्वं स्वे
न कर्मणा॥ काष्ठेसमुद्रे प्रक्षिप्य गंगांभसि समुत्सृजन॥४९॥ यस्मात्वं मत्रोष्ठ रूसमत्रांमोदुरधिष्ठितः॥ तमु
ह्यमानं वेगेन स्वोतसा भ्यासमभ्यगात॥५०॥ जग्राहतं सधर्मात्मा बलिर्वैरोचनिस्तदा॥ अतः पुरे तु गोपेनं न
क्षमोजेभ्यः तर्पयन॥५१॥ प्रीतस्यैव वरेणेन छादयामासवैबलिं॥ तस्माद्वसवरं वव्रे पुत्रार्थेदानवर्षभः॥५२

राम
७९

संतानार्थं महाभागभार्यायां रममोनुद॥ पुत्रान्धर्मार्थतत्त्वज्ञानुत्पादयितुमर्हसि॥५३॥ एवमुक्तः सदेवर्षिस्तथा
स्त्वितिउक्तवान्प्रभुः॥ सतस्मै राजा स्वांभार्यां सुदेष्णां प्राहिणोत॥ अंधं वृद्धं च तं ज्ञात्वा न सा देवी जगाम ह॥ स्व
कां धात्रेयिकां तस्मै अंधाय प्राहिणोत्तदा॥५५॥ तस्यां काक्षीवदादींश्च शूद्रयोन्यामृषिर्वशी॥ जनयामास ध
र्मात्मा शूद्रानिसेवमादिमान॥५६॥ उवाच तं बली राजा दृष्ट्वा काक्षीवदादिकान॥५६॥ राजोवाच॥ प्रवीणान्
षि धर्मस्य ईश्वरात्मत्वावादिनः॥ विद्वान्स्त्वक्ष धर्माणां बुद्धिमान्ब्रह्मविमानहं तेमानब्रवीत॥५७॥ ममैव इति
होवाचतं दीर्घतमसं बलिः॥ नेत्युवाच मुनिस्तं वै ममैवमितिचाब्रवीत॥५८॥ उत्पन्नाः शूद्रयोनौ तु भवच्छंदो
सुरोत्तमः॥ अंधं वृद्धं च मां ज्ञात्वा सुदेष्णा महिषी तव॥५९॥ प्राहिणोदवमानान्मां शूद्रीं धात्रेयिकां नृप॥ ततः
प्रसादयामास बलिस्तमृषिसत्तमं॥६०॥ बलिः सुदेष्णां तां भार्यां भर्त्सयामास दानवः॥ पुनश्चैवाम लंकृत्य
ऋषये प्रत्यपादयत॥६१॥ तां सदीर्घतमा देवीं सर्वइकतवतीं तदा॥ तत्सूसायाप दमास्ता द्वदेवी परिहरत्नरा॥६२
नाभुवाच ततः सोथ पत्नेपरिह तभुजे॥ विनापापंकुमारं तु भजनिष्यसिपवर्जं॥६३॥ सुदेष्णोवाच॥ नार्हसि
त्वं महाभाग पुत्रं मे दातुमीदृशं॥ तोषितश्च यथा राज्ञा प्रसादं कुरु मे प्रभो॥६४॥ दीर्घतमा उवाच॥ तवोच्चा
रोदेकोषनान्यथा भविता शुभे॥ नैव दास्याभिपुत्रत्वे प्रोन्नो वैदास्यते फलं॥६५॥ तस्मात्पादं विनाशैव योन्य मानो ५

मं०पु०
७९

नविष्यति॥तस्माद्दीर्घतमांगेषुकुक्षौस्पृष्ट्वेदमब्रवीत्॥६६॥प्राशितेतुपदध्येषुनासापश्यश्चविस्मिते॥तेन
तिष्ठंतुतेगर्भेहृत्स्थमास्थामिवेंदुराट्॥६७॥नविष्यंतिकुमारास्तेपंचवैवसुतोपमाः॥तेजस्विनःसुहंताश्च
यज्वानोधार्मिकाश्चते॥६८॥सूतउवाच॥॥तद्देशस्तुसुदेष्णायाःज्येष्ठःपुत्रोभ्यजायत॥अंगस्तस्याकलिं
गश्चपुंड्रःसुह्मस्तथैवच॥६९॥वंगराजश्चपंचैतेबलेःपुत्राश्चक्षेत्रजाः॥इत्येतेदीर्घतमसाबलेर्दत्ताःसुतास्त
था॥७०॥प्रतिष्टामागतास्तस्यब्रह्मण्यंकारयन्नतः॥ततोमानुषयोनौसौमजनयामासवैप्रजाः॥७१॥तत
स्तंदीर्घतमसंसुरभीवाक्यमब्रवीत्॥विचार्ययस्मात्तगोधर्माःप्रमाणंकृतवान्मे॥७२॥मन्नामानन्यया
स्मासुतेनप्रीतोस्मितेनघ॥तस्मात्तुसंतमोदीर्घमाघ्रायापनुदामिते॥७३॥सद्यस्त्वाघ्रातमात्रस्तुत्यजितोमुनि
सत्तमः॥आयुष्मांश्चवपुष्मांश्चचक्षुष्मांश्चततोभवत्॥७४॥गोभ्यादत्तेतमसिवैगोतमस्तुततोभवत्॥का
क्षीवांस्तुततोगत्वासहपित्रागिरिव्रजं॥७५॥दृष्ट्वास्तस्थापितुःसोवैउपविश्यचिरंतपः॥ततःकालेनमह
तातपसाभावितस्तुसः॥७६॥विधूयमात्मनःकायंब्राह्मण्यंप्राप्तवान्विभुः॥ततोब्रवीत्पितातंवैपुत्र
वानस्म्यहंत्वया॥७७॥सत्पुत्रेणतुधर्मज्ञकृतार्थोहंयशस्विना॥युक्तात्मानततःसोवैप्राप्तवान्ब्रह्मणः राम.
क्षयं॥७८॥ब्राह्मण्यंप्राप्यकाक्षीवान्सहस्रमसृजत्सुतान्॥कौष्मांडागौतमाश्चैवस्मृताःकाक्षीवतःसुताः ७९

७९॥इत्येषादीर्घतमसोबलेर्वैरोचनस्यच॥समागमोवःकथितःसंततिश्चोभयोस्तथा॥८०॥बलिस्तानभिषि
च्येहपंचपुत्रानकल्मषान्॥कृतार्थःसोपिधर्मात्मायोगमायावृतःस्वयं॥८१॥अदृश्यःसर्वभूतानांकालापेक्षःस
वैप्रभुः॥तत्रांगस्यतुदायादोराजासीद्दधिवाहनः॥८२॥दधिवाहनपुत्रस्तुराजादिविरथःस्मृतः॥आलोम
दतिविख्यातस्तस्यशांतासुताभवत्॥८३॥अथदाशरथिर्वीरश्चतुरंगोमहायशाः॥ऋक्ष्यशृंगप्रसादेनज
तेस्यकुलवर्धनः॥८४॥चतुरंगस्यपुत्रस्तुपृथुलाक्षइतिस्मृतः॥पृथुलाक्षसुतश्चापिचंपनामाबभूवह॥
८५॥पंचस्यतुपुरीचंपापूर्वंयामालिनीत्यभूत्॥पूर्णभद्रप्रसादेनहर्यंगोस्यसुतोभवत्॥८६॥जज्ञेविभांडका
च्चास्यवारणःशत्रुवारणः॥अवतारयामासमहीमंत्रैर्वाहनमुत्तमं॥८७॥हर्यंगस्यतुदायादोजातोभद्र
रथःकिल॥अथभद्ररथस्यासीद्बृहत्कर्मजनेश्वरः॥८८॥बृहद्भानुःसुतस्तस्यतस्माज्जज्ञेमहान्नृप॥बृहद्भानुस्तु
राजेंद्रोजनयामासवैसुतं॥८९॥नाम्नाजयद्रथंनामतस्माद्दृढरथोनृपः॥आसीद्दृढरथाच्चैवविश्वजिज्जन
मेजयः॥दायादस्तस्यचांगोवैतस्मात्कर्णोभवन्नृपः॥कर्णस्यवृषसेनस्तुपृथुसेनस्तदात्मजः॥९१॥एतेंगस्या
त्मजाःसर्वेराजानःकीर्तितामया॥विस्तरेणानुपूर्व्याचपूरोस्तुशृणुतद्द्विजाः॥९२॥ऋषयऊचुः॥॥कथंभू
तात्मजःसूतकथमंगस्यचात्मजः॥एतदिच्छामहेश्रोतुमत्यंतंकुशलोह्यसि॥९३॥सूतउवाच॥॥बृहद्भा

म०पु०
८०

तु:सुतोजज्ञेराज्ञानाम्नाबृहन्मना:॥तस्यपत्नीद्वयंत्वासीछैब्यस्यतनयेउभे॥१४॥ज्ञोयदेवीचसत्याचतयो
र्वंशंचमेशृणु॥जयद्रथंतुराजानंयशोदेवीत्यजीजनत्॥१५॥साबृहन्मनस:सत्याविजयंनामविश्रुतं।
विजयस्यबृहत्पुत्रस्तस्यपुत्रोबृहद्रथ:॥१६॥बृहद्रथस्यपुत्रस्तुसत्यकर्ममहामना:॥सत्यकर्मणोपा
यस्तुतस्याधिरथ:स्मृत:॥१७॥यःकर्णंप्रतिजग्राहतेनकर्णस्तुसूतज:॥एतद्व:सर्वमाख्यातंकर्णंप्रतिय
थोदितं॥१८॥॥इतिश्रीमत्स्यपुराणेसोमवंशे॥॥सूतउवाच॥॥पूरो:पुत्रोमहातेजाराजासीज्जनमेज
य:॥प्राचीत्वत:सुतस्तस्ययःप्राचीमकरोद्दिशं॥१॥प्राचीवतस्यतनयोमनस्युश्चतथाभवत्॥राजापीता
युधोनाममनस्योरभवत्सुत:॥२॥दायादस्तस्यचाप्यासीधुंधुनाममहीपति:॥धुंधोर्बहुविध:पुत्र:संपा
तिस्तस्यचात्मज:॥३॥संपातेस्तुअहंवर्चाभद्राश्वस्तस्यचात्मज:॥भद्राश्वस्यघृताच्यांतुदशाप्सरससूनवं॥
रवेयुश्चकृषेयुश्चकक्षेयु:स्वसनेयुक:॥घृतेयुश्चापिनेयुश्चस्थलेयुश्चैवसप्तम:॥५॥धर्मेयु:सन्नतेयुश्च
पुण्येयुश्चेतितेजसा॥कृषेयुर्ज्वलिनानामभार्याचैतक्षकात्मजा॥६॥तस्यांसजनयामासअंतिनारंमहीपतिं।
अंतिनारोमनस्यांतुपुत्राञ्जज्ञेपरान्शुभान्॥७॥अमूर्त्तंवरसंवीरंत्रिहनंचैवधार्मिकं॥गौरीकन्यातृतीया
चमांधातुर्जननीशुभा॥८॥इतिमातुर्यमस्यासीत्कन्यायांजनन्सुतान्॥ब्रह्मवादपरिक्रांता:सुरवदानिलना

राम
८०

त्यमूत्॥९॥उपदानवीसुतांल्लेभेचतुरस्त्वलिलात्मजान्॥कृषंतमथदुष्यंतंप्रवीरमनघंतथा॥१०॥चक्रवर्ती
ततोजज्ञेदुष्यंतात्समितिंजय:॥शाकुंतलायांभरतोयस्यनाम्नातुभारता:॥११॥दौष्यंतिंप्रतिराजानंवागुवा
चाशरीरिणी।माताभस्त्रापितु:पुत्रोयेनजात:सएवस:॥१२॥भरस्वपुत्रंदुष्यंतमावमंस्था:शाकुंतलां॥रे
तोधाल्नयतेपुत्र:परेतंचयमक्षयात्॥१३॥त्वंचास्यधातागर्भस्यसत्यमाहशाकुंतला॥भरतस्यविनष्टेषु
तनयेषुपुराकिल॥१४॥पुत्राणांमातृकात्कोपात्सुमहत्संक्षय:॥ततोमरुद्भिरानीयपुत्र:सबृहस्पते:॥
१५॥संक्रामितोभरद्वाजोमरुद्भिर्भरतस्यतु॥१५॥कृषयऊचु:॥भरतभरद्वाज:पुत्राणंमारुतै:कथं॥संक्रा
मितोमहातेजास्तन्नोब्रूहियथातथं॥१६॥सूतउवाच॥॥पत्न्यामपत्यसत्तायांउशिजस्यस्थितोभुवि॥भ्रातु
र्भार्यांसदृष्ट्वातुबृहस्पतिरुवाचह॥१७॥उपतिष्ठस्वलंकृत्यमैथुनायचमांशुभे॥एवमुक्ताब्रवीदेनंमंतर्वत्नी
ह्यहंविभो॥१८॥गर्भ:परिणतश्चायंब्रह्मव्याहरतेगिरा॥अमोघरेतास्त्वंचापिधर्मंचैवंविगर्हितं॥१९॥एवमु
क्तोब्रवीदेनांस्वयमेवबृहस्पति:॥नोपदिष्टोविनयस्तयामेवरवर्णिनि॥२०॥कर्षमाण:प्रसह्यैनांमैथुना
योपचक्रमे॥ततोबृहस्पतिंगर्भोधर्षमाणमुवाचह॥२१॥सन्निविष्टोह्यहंपूर्वमिहनामबृहस्पते॥अमोघरे
ताश्चभवान्नावकाशोद्वयो:॥२२॥एवमुक्त:सगर्भेणकुपित:प्रत्युवाचरुह॥यस्मात्त्वमीदृशेकालेसर्वभूते

म०पु०
८१

प्सितेसति॥२३॥अभिषूयसियस्मात्त्वंतमोदीर्घंप्रविक्ष्यसि॥ततःकामंसंनिवर्त्यतस्मान्नंदंवृहस्पतेः॥२४॥
उदतस्यपतन्भूमौनिवृत्तंशिशुकोभवत्॥सद्योजातंकुमारंतुदृष्ट्वातंसुमनाब्रवीत्॥२५॥गमिष्यामिगृहंस्वं
वैभरस्वैनंवृहस्पते॥एवमुक्त्वागतासातुगतायांसोपितात्यजे॥२६॥मातापितृभ्यांत्यक्तंतुदृष्ट्वातंमारुताः
शिशुं॥जगृहुस्तंभरद्वाजंमरुतःकृपयान्विताः॥२७॥तस्मिन्कालेतुभरतोवहुभिःक्रतुभिर्विभुः॥पुत्रनैमि
त्तिकैर्यज्ञैरयजत्पुत्रलिप्सया॥२८॥यदासयजमानस्तुपुत्रंनासादयत्प्रभुः॥ततःक्रतुंमरुत्सोमंपुत्रार्थी
समुपाहरत्॥२९॥तेनतेमरुतस्तस्यमरुत्सोमेनतुष्टुवुः॥उपनिन्युर्भरद्वाजंपुत्रार्थंभरतायवै॥३०॥दा
यादोंगिरसःसूनुरौरसस्तुवृहस्पतेः॥संक्रामितोभरद्वाजोमरुद्भिर्भरतंप्रति॥३१॥भरतस्तुभरद्वाजंपुत्रंप्रा
प्यततोब्रवीत्॥आदावात्महितायत्वंकृतार्थोहंत्वयाविभो॥३२॥पूर्वंतुवितथेतस्मिन्कृतेवैपुत्रजन्मनि॥
ततोजातेत्युवितथेभरतस्य॥३३॥ततस्तुवितथोनामभरद्वाजोनृपोभवत्॥तस्मादपिभरद्वाजाब्राह्मणाः
क्षत्रियाभुवि॥३४॥द्व्यामुष्यायणकौलीनाःस्मृतास्तेद्विविधेनच॥ततोजातेह्यवितथेभरतश्चदिवंययौ॥
३५॥भरद्वाजादिवंयातुत्वभिषिच्यसुतंऋषिः॥दायादोवितथस्यासीत्भुवमन्युर्महायशाः॥३६॥महाभूतो
पमाःपुत्राश्चत्वारोभुवमन्यवः॥मतस्क्षत्रोमहावीर्यगर्गश्चवीर्यवान्॥३७॥नरस्यसंकृतिःपुत्रस्तस्यपु

राम.
८१

त्रोमहायशाः॥गुरुधीरंतिदेवश्चसत्कृत्यांतावुभौस्मृतौ॥३८॥गर्गस्यचैवदायादाःशिनिर्विद्वान–
स्मृतास्तेह्यस्ततोगार्ग्याःक्षत्रोपेताद्विजातयः॥३९॥आदार्यैतनयास्त्वेवधीमानासीदुरुक्षवः॥त॥
याविशालातुसुपुत्रेपुत्रकत्रयं॥४०॥त्र्यरुणंपुष्करिंचैवकविंचैवमहायशाः॥पुरुक्षवाःस्मृताह्येतेसर्वे
ब्राह्मणतांगताः॥४१॥काव्यानांतुवरात्येतेत्रयःप्रोक्तामहर्षयः॥गर्गाःसंकृतयःकाव्याःक्षत्रोपेताद्विजा
तयः॥४२॥अजमीढोद्विमीढश्चपुरुमीढस्तथैवच॥अजमीढस्यपत्न्यस्तुतिस्रःकुरुकुलोद्वहाः॥४३॥
नीलिनीधूमिनीचैवकेशिनीचैवविश्रुताः॥सभूतोगिरसंदक्षंवृहत्क्षत्रस्यवक्षितिः॥४४॥वृहत्क्षत्रस्यदा
यादोहस्तीनामावभूवह॥तेनेदंनिर्मितंपूर्वंपुरंतत्गजसाह्वयं॥४५॥हस्तिनश्चापिदायादास्त्रयःपरम
कीर्तयः॥४५॥अजमीढउवाच॥सतासुजनयामासपुत्रान्वैदेववर्चसः॥तपसोंतेसुमहतोजाताद्वृद्धस्य
धार्मिकाः॥४६॥भरद्वाजप्रसादेनविस्तरंतेषुमेशृणु॥अजमीढस्यकेशिन्यांकण्वःसमभवत्किल॥४७॥
मेधातिथिःसुतस्तस्यतस्मात्काण्वायनाद्विजाः॥अजमीढस्यधूमिन्यांजज्ञेवृहदनुर्नृपः॥४८॥वृहदनोर्वृ
हतश्चवृहतस्यवृहन्मनाः॥वृहन्मनस्थतनयोवृहद्धनुरितिस्मृतः॥४९॥वृहद्धनोर्वृहद्दिशुःपुत्रस्तस्य
वृहद्धनुर्नृपः॥अन्यनस्थतनयोवृहद्रुवुरितिस्मृतः॥४९॥वृहद्धनोर्वृहद्दिशुःपुत्रस्तस्यवृहद्धनुर्नृपः॥अ

म०पु० श्वजित्तनयस्तस्यसेनजित्तस्यचात्मजः॥५०॥अथसेनजितःपुत्राश्चत्वारोलोकविश्रुताः॥रुचिराश्वश्चकाव्यश्च
राजादृढरथस्तथा॥५१॥वत्सश्चावर्त्तकोराजायस्यतेपरिवत्सकाः॥रुचिराश्वस्यदायादःपृथुसेनोमहाय
६२ शाः॥५२॥पृथुसेनस्यपौरस्तुपौरान्नीपोपजज्ञिवान्॥नीपस्यैकशतंत्वासीत्पुत्राणाममितौजसां॥५३॥
नीपाइतिसमाख्याताराजानःसर्वएवते॥तेषांवंशकरःश्रीमान्नीपानांकीर्त्तिवर्द्धनः॥५४॥काव्यश्चसम
रोनामसचेषुसमरोत्तवत्॥जज्ञेसर्वगुणोपेतोविभ्राजस्तस्यचात्मजः॥५५॥विभ्राजस्यतुदायादस्त्वणु
होनामवीर्यवान्॥बभूवशुकजामाताकृत्वीभर्त्तामहायशाः॥५६॥अणुहस्यदायादोब्रह्मदत्तोमहीप
तिः॥युगदत्तंसुतस्तस्यविष्वक्सेनोमहायशाः॥५७॥विभ्राजःपुनराजातःसकृतोनेहकर्मणा॥विष्व
क्सेनस्यपुत्रस्तुउदक्सेनोबभूवह॥५८॥भल्लाटस्तस्यपुत्रस्तुतस्यास्ताज्जनमेजयः॥उग्रायुधेनतस्या
र्थेसर्वेनीपाःप्रणाशिताः॥५९॥ऋषयऊचुः॥उग्रायुधःकस्यसुतःकस्यवंशेसकथ्यते॥किमर्थंस्र
तेनीपाःसर्वेतेनप्रणाशिताः॥६०॥सूतउवाच॥॥अजमीढस्यनमित्यांविद्वान्जज्ञेयवीनरः॥धृतिमां
स्तस्यपुत्रस्तुतस्यसत्यधृतिःस्मृतः॥६१॥अथसत्यधृतेःपुत्रोदृढनेमिःप्रतापवान्॥दृढनेमेःसुतश्चापि राम
सुधर्मानाममपार्थिवः॥६२॥आसीत्सुधर्मतनयःसार्वभौमःप्रतापवान्॥सार्वभौमेतिविख्यातःपृथिव्यामे ६२

करोद्विभुः॥६३॥तस्यान्वयेयमहतिमहापौरवनंदनः॥महापौरवपुत्रस्तुराजरुक्मरथःस्मृतः॥६४॥
अथरुक्मरथस्यासीत्सुपार्श्वोनामपार्थिवः॥सुपार्श्वतनयश्चापिसुमतिर्नामधार्मिकः॥६५॥सुमतेरपिध
र्मात्माराजासंनतिमानपि॥तस्यासीत्संनतिस्तत्रकृतोनामसुतोमहान्॥६६॥हिरण्यनाभिनःशिष्यःकौशिस
स्यमहात्मनः॥चतुर्विंशतिधातेनप्रोक्तास्तासामसंहिताः॥६७॥स्मृतास्तेप्राच्यसामानःकृतानामेहमा
नगाः॥कार्तिरुग्रायुधःसोपिमहापौरववर्द्धनः॥६८॥बभूवयेनविक्रम्यपृथुकस्यपितामहः॥नीलो
नाममहाराजापंचालाधिपतिर्वशी॥६९॥उग्रायुधस्यदायादःक्षेमोनाममहायशाः॥क्षेमःसुनीथस्तंज
ज्ञेसुनीथस्यनृपंजयः॥७०॥नृपंजयाच्चविरथइत्येतेपौरवाःस्मृताः॥७१॥॥इतिश्रीमत्स्यपुराणेमनुमत्स्य
संवादे॥॥सूतउवाच॥अजमीढस्यनील्यांनीलःसमभवत्सुतः॥नीलस्यतपसोग्रेणसुशांतिरुपपद्यत॥
१॥पुरुजानुःसुशांतेस्तुपृथुस्तुपुरुजानुजः॥भद्राश्वंपृथुदायादोभद्राश्वतनयान्शृणु॥२॥मुद्गलश्चजय
श्चैववाराहश्चष्टपुस्तथा॥यवीयानक्रिमिक्रांतःकपिलश्चैवपंचमः॥३॥पंचानामेवपंचालानेतान्जनपदा
न्विदुः॥पंचालरक्षिणोत्येतेदेशानामितिनःश्रुतं॥४॥मुद्गलस्यापिमौद्गल्याःक्षत्रोपेताद्विजातयः॥एते
ह्यंगिरसःपक्षेसंस्थिताःकण्वमुद्गलाः॥५॥मुद्गलस्यसुतोजज्ञेब्रह्मिष्ठःसुमहायशाः॥इंद्रसेनान्वयस्तस्यवं

म०पु०
८४

मःस्वसुतासुस्तनोजवव॥३४॥अक्रोधनोयुतायोश्चतस्माद्देवातिथिःस्मृतः॥देवातिथेस्तुदायादोरक्षएव
भूवह॥३५॥भीमसेनस्ततोरक्षाद्दिलीपस्तस्यचात्मजः॥दिलीपस्यप्रतीपस्तुतस्यपुत्रास्त्रयःस्मृताः॥३६॥
देवापिःशान्तनुश्चैवबाह्लीकश्चैवतेत्रयः॥बाह्लीकस्यतुदायादाःसप्तबाह्लीश्वरानृपाः॥३७॥देवापि
स्तुअपध्यातःप्रजाभिरभवन्मुनिः॥३८॥ऋषयऊचुः॥प्रजाभिस्तुकिमर्थंवैह्यपध्यातोनृपात्मजः॥को
दोषोराजपुत्रस्यप्रजाभिःसमुपाहृतः॥३९॥सूतउवाच॥किलासीद्राजपुत्रस्तुकुष्ठीतंनाभ्यपूजयन्॥
कार्यंवैतत्रदेवानांस्तत्रप्रतिद्विजोत्तमाः॥३०॥भविष्यंकीर्तयिष्यामिशान्तनोस्तन्निबोधत॥शान्तनुस्त्वभ
वद्राजाविद्वांस्तोवैमहाभिषक्॥४०॥इमंचोदाहरत्यत्रश्लोकंप्रतिमहाभिषक्॥यंयंकरेणस्पृशतिजी
र्णंरोगिणमेवच॥४१॥पुनर्युवासभवतितस्मात्तंशान्तनुंविदुः॥एतदस्यशान्तनुत्वंप्रजाभिरभिकीर्त्यते॥
४२॥ततोवृण्वतभार्यार्थेशान्तनुर्जाह्नवींनृपः॥तस्यांदेवव्रतंनामकुमारमजनयद्विभुः॥४३॥काली
विचित्रवीर्यंतुदासेयीजनयत्सुतं॥शान्तनोर्दयितंपुत्रंशान्तात्मानमकल्मषं॥४४॥कृष्णद्वैपायनश्चैव
क्षेत्रेवैचित्रवीर्यके॥धृतराष्ट्रंचपाण्डुंचविदुरंचाप्यजीजनत्॥४५॥धृतराष्ट्रस्तुगान्धार्यांपुत्राणांजनयच्छतं
तेषांदुर्योधनोज्येष्ठःसर्वक्षत्रस्यसप्रभुः॥४६॥माद्रीकुंतीतथोभेचपाण्डोर्भार्येबभूवतुः॥देवदत्ताःसुताः

राम
८४

पंचपाण्डोरथेप्रजज्ञिरे॥४७॥धर्माद्युधिष्ठिरोराजामारुताच्चवृकोदरः॥इन्द्रादर्जुननामानंजनयामास
वैपृथा॥४८॥माद्रीसुतौतौनकुलःसहदेवकनीयसः॥नासत्याभ्यामजनयत्साविन्यापैतदाद्विजाः॥४
९॥द्रौपद्यजनयत्पञ्चप्रतिविन्ध्यंयुधिष्ठिरात्॥श्रुतसेनंभीमसेनात्श्रुतिकीर्तिंधनंजयात्॥५०॥चतुर्थंश्रु
तकर्माणंसहदेवादजायत॥नकुलाच्चशतानीकंद्रौपदेयाश्चकीर्तिताः॥५१॥तेभ्योऽपरेपाण्डवेयाःषडेवा
न्येमहारथाः॥हैडंबोभीमसेनस्यपुत्रोजज्ञेघटोत्कचः॥५२॥काशीबलधराभीमाजज्ञेवैसर्वगंसुतं॥सुहो
त्रंतनयंमाद्रीसहदेवादसूयत॥५३॥करेणुमत्यांचैद्यायांनिरमित्रस्तुनाकुलः॥सुभद्रायांरथीपार्थस्त्वभि
मन्युमजीजनत्॥५४॥यौधेयंदेवकीचैवपुत्रंजज्ञेयुधिष्ठिरात्॥अभिमन्योःपरीक्षित्तुपुत्रःपरपुरंजयः
॥५५॥जनमेजयःपरीक्षितःपुत्रःपरमधार्मिकः॥ब्राह्मणंकल्पयामासमरत्वाजसनेयकं॥५६॥
सवैशंपायनेनैवसप्तःकिलमहर्षिणा॥नस्थास्यतीहदुर्बुद्धेतवैतद्वचनंभुवि॥५७॥यावत्स्थास्यसित्वंलोकेतं
तावद्देवप्रवत्स्यति॥क्षत्रस्यविजयंज्ञात्वाततःप्रभृतिसर्वशः॥५८॥अभिगम्यस्थितश्चैवंनृपंचजनमे
जयं॥ततःप्रभृतिशापेनक्षत्रियस्यतुयाजिनः॥५९॥क्षत्रस्ययाजिनःकश्चित्शापात्तस्यमहात्मनः॥पौ
र्णमासेनहविषाइष्ट्वातस्मिन्प्रजापतिं॥६०॥तंवैशंपायनेनैवप्रविशन्वारितस्ततः॥परीक्षितःसुतोपोवैपौ

रवोजनमेजयः॥६१॥द्विरश्वमेधमाहृत्यमहावाजसनेयकः॥प्रवर्त्तयित्वातत्सर्वंऋषिवाजसनेयकः॥६२॥वि
वादेब्राह्मणैःसार्द्धमभिशप्तोवनंययौ॥जनमेजयाच्छतानीकस्तस्माज्जज्ञेसवीर्यवान्॥६३॥जनमेजयाच्छता
नीकंपुत्रंराज्येभिषिक्तवान्॥अथाश्वमेधेनततःशतानीकस्यवीर्यवान्॥६४॥जज्ञेधिसीमःकृष्णाख्यःसो
प्रतेयोमहारथः॥तस्मिन्शासतिराज्यंतुयुष्माभिरिदमाहृतं॥६५॥दुरापोदीर्घमात्रेवैत्रीणिवर्षाणिपु
ष्करं॥वर्षद्वयंकुरुक्षेत्रेदृषद्वत्यांद्विजोत्तमः॥६६॥ऋषयऊचुः॥भविष्यंश्रोतुमिच्छामःप्रजानांलोमह
र्षण॥पुराकिलयदेतद्वैव्यतीतंकीर्त्तितंत्वया॥६७॥येषुवैस्थास्यतिक्षत्रंउत्पत्स्यंतेनृपाश्चये॥तेषामायुः
प्रमाणंचनामतश्चैवतान्नृपान्॥६८॥कालंयुगप्रमाणंतुयुगदोषंयुगक्षयं॥सुखंदुःखंयुगस्यास्य
धर्माधर्मविचेष्टितं॥६९॥एतत्सर्वंप्रसंख्यायपृच्छतांब्रूहिनःप्रभो॥६९॥सूतउवाच॥॥यथामेकीर्त्तितं
पूर्वंव्यासेनाक्लिष्टकर्मणा॥भाव्यंकलियुगेचैवतथामन्वंतराणिच॥७०॥अनागतानिसर्वाणितथातोमे
निबोधत॥अतऊर्ध्वंप्रवक्ष्यामिभाविनोयेनृपास्तथा॥७१॥ऐक्ष्वाकवान्वयेचैवपौरवेचान्वयेतथा॥येषु
संस्थास्यतेतच्चऐक्ष्वाकुकुलंशुभं॥७२॥तान्सर्वान्कीर्त्तयिष्यामिभविष्याकथितान्नृपान्॥तेभ्योप
रेपियेत्वन्येउत्पत्स्यंतेनृपाःपुनः॥७३॥क्षत्रियाःपारशवाःशूद्रास्तथान्येयेवहिश्वराः॥अंध्राःशकाःपुलिंद

श्चचूलिकायवनास्तथा॥७४॥कैवर्त्ताभीरशवरायेचान्येम्लेच्छसंभवाः॥वर्षाग्रतःप्रवक्ष्यामिभविष्यान्
कथितान्नृपान्॥अधिसीमःकृष्णपुत्रोनिचक्रोभवितानृपः॥गंगयापहृतेतस्मिन्नगरेनागसाह्वये॥७६॥
नचक्रोनगरंत्यक्त्वाकौशांब्यांतुनिवत्स्यति॥भविष्याष्टौसुतास्तस्यमहाबलपराक्रमाः॥७७॥भूरिर्ज्येष्ठः
सुतस्तस्यततश्चित्ररथःस्मृतः॥शुचिद्रथश्चित्ररथाद्वृष्टिमांश्चशुचिद्रथात्॥७८॥वृष्टिमतःसुषेणस्तुभवि
ष्यतिपुनर्नृपः॥तस्मात्सुषेणाद्भवितासुनीथोनामपार्थिवः॥७९॥नृपात्सुनीथाद्भवितानृचक्रःसुमहायशाः॥
नृचक्रस्यतुदायादोभविष्यतिनसंशयः॥८०॥सुखीनलवशाश्चापितस्मात्राजापरिप्लुवः॥परिप्लुवसुतश्चापि
भवितापुत्रयोनृपः॥८१॥मेधावीतस्यदायादोभविष्यतिनसंशयः॥मेधाविनःसुतश्चापिभविष्यतिपुरंजयः
॥८२॥कुरुर्भाव्यःसुतस्तस्यतिग्मात्मातस्यचात्मजः॥तिग्माद्बृहद्रथोभाव्योवसुधामाबृहद्रथात्॥८३॥वसुधामा
शतानीकोभविष्यदयनस्तथा॥भविष्यतत्सोदयनाद्धीरोराजामहीनरः॥८४॥महीनरात्मजश्चैवदंडपाणिर्भ
विष्यति॥दंडपाणेर्निरामित्रोनिरामित्रात्तुक्षेमकः॥८५॥अत्रानुवंशश्लोकोयंगीतोविप्रैःपुरातनैः॥ब्रह्मक्ष
त्रस्ययोयोनिर्वंशोदेवर्षिसंज्ञितः॥क्षेमकंप्राप्यराजानंसंस्थास्यतिवैकलौ॥८६॥इत्येषःपौरवोवंशोयथा
वदनुकीर्त्तितः॥धीमतःपांडुपुत्रस्यअर्जुनस्यमहात्मनः॥८७॥॥इतिश्रीमत्स्यपुराणेसोमवंशानुकीर्त्तनंनाम

न्नं॥ ॥ऋषयऊचुः॥ ॥येत्पासुर्द्विजातीनामग्नयःसूतसर्वदा॥तानिदानींसमाचक्ष्वकद्दृशंगंचानुपूर्वशः॥१॥
सूतउवाच॥ ॥योसावग्निरभीमानिःस्मृतःस्वायंभुवेंतरे॥ब्रह्मणोमानसःपुत्रस्तस्मात्स्वाहाव्यजीजनत्॥
२॥पावकंपवमानंचशुचिरग्निश्चयःस्मृतः॥निर्मथ्यःपवमानोग्निर्वैद्युतःपावकात्मजः॥३॥शुचिरग्निः
स्मृतःसौरःस्थानाख्यश्चैवतेस्मृताः॥पवमानात्मजोह्यग्निर्हव्यवाहःसउच्यते॥४॥पावकिःसहरक्षस्तु
हव्यवाहमुखःशुचेः॥देवानांहव्यवाहोग्निःप्रथमोब्रह्मणःसुतः॥५॥सहरक्षासुराणांतुत्रयाणांतुत्रयो
ग्नयः॥एतेषांपुत्रपौत्रास्तुचत्वारिंशत्तथैवच॥६॥प्रवक्ष्येनामतस्तान्वैप्रविभागेनतान्पृथक्॥पावनो
लौकिकोह्यग्निःप्रथमोब्रह्मणश्चयः॥७॥ब्रह्मौदनाग्निस्तत्पुत्रोभरतोनामविश्रुतः॥वैश्वानरोहव्यवा
होह्यपांगर्भंचसमानसः॥८॥सप्तष्टोथर्वणिःपुत्रोमथितःपुष्करोदधिः॥योथवालौकिकोह्यग्निर्दक्षिणा
ग्निःसवैस्मृतः॥९॥भृगोःप्रजातोवचनाद्दक्षिणाथर्वणःस्मृतः॥तस्माद्दलौकिकोह्यग्निःसाधःसोथर्वणःस्मृ
तः॥१०॥अथयःप्रवमनस्तुनिर्द्दिष्टोनःसउच्यते॥सवैगार्हपत्योग्निःप्रथमोब्रह्मणःसुतः॥११॥ततःसभ्याव
सथ्यावशंसस्यास्तौतावुभौ॥ततःषोडशनद्यस्तुचकमेहव्यवाहनः॥१२॥यःखल्वाहवनीयोग्निरस्त्रीमानद्वि
जःस्मृतः॥कावेरींकृष्णवेणींचनर्मदांयमुनांतथा॥१३॥गोदावरींवितस्तांचचंद्रभागामिरावतीं॥विपाशांकौ

शिकींचैवशतद्रूंसरयूंतथा॥१४॥सीतांमनस्विनींचैवह्रादिनींतथा॥तासुषोडशधात्मानंप्रविभज्यपृथक्पृ
पक॥१५॥तयापिविहरंस्तासुधिष्ण्येनेवबभूवह॥स्वाभिधानस्तथाधिष्ण्यानामस्त्स्वात्याश्चवैस्रवः॥१६॥धि
निवृत्तेचकृतगोदोहमंगलं॥२०॥ कृतस्नानायतंपट्टंब्राह्मणायनिवेदयेत्॥ अनेनविधिनायस्तुग्रहस्नानंसमा
चरेत्॥२१॥ नतस्यग्रहपीडास्यान्नचबंधुजनक्षयः॥ परमांसिद्धिमाप्नोतिपुनरावृत्तिदुर्लभां॥२२॥ सूर्यग्रहे

राम० १०८

सूर्यनामसदामंत्रेषुकीर्त्तयेत्॥ अधिकापद्मरागाःस्युःकपिलांचसुशोभनां॥२३॥ प्रयच्छेद्वसुसंपन्नोचंद्र
सूर्योपरागयोः॥ यइदंशृणुयान्नित्यंश्रावयेद्वापिमानवः॥ सर्वपापविनिर्मुक्तःशक्रलोकेमहीयते॥२४॥
इतिश्रीमत्स्यपुराणेमनुमत्स्यसंवादेचंद्रादित्योपरागस्नानं॥ ॥नारदउवाच॥ ॥किमुद्वेगाद्भुतंह्येतमलक्ष्मी
ःकेनहन्यते॥ मृतवत्सानिषेकादिकार्येषुचकिमिष्यते॥१॥ श्रीभगवानुवाच॥ ॥पुराकृतानिपापानिफलंति
स्मतपोधन॥ रोगदौर्गत्यरूपेणतथैवेष्टवधेनच॥२॥ तद्विघातायवक्ष्यामिसदाकल्याणकारकं॥ सप्तमीस्न
पनंनामजनपीडाविनाशनं॥३॥ बालानांमरणंयत्रक्षीरपानांप्रदृश्यते॥ तद्वद्वृद्धातुराणांचयौवनेचापिव
र्तिनां॥४॥ शांतयेतत्रवक्ष्यामिमृतवत्सादिकेचयत्॥ एतदेवाद्भुतोद्वेगचित्तभ्रमविनाशनं॥५॥ भविष्यतिचवा
राहेयत्रकल्पस्तपोधन॥ वैवस्वतश्चतत्रापियदातुमनुरुत्तमः॥६॥ भविष्यतिचतत्रैवपंचविंशतिमंयदा।
कृतंनामयुगंतत्रहैहयान्वयवर्द्धनः॥७॥ भविताभूपतिर्वीर्यःकृतवीर्यःप्रतापवान्॥ ससप्तद्वीपमखि
लंपालयिष्यतिभूतलं॥८॥ यावद्वर्षसहस्राणिसप्ततिःसप्तनारद॥ जातमात्रंचतस्यापियावत्पुत्रशतंतदा॥९॥
च्यवनस्यतुशापेनविनाशमुपयास्यति॥ सहस्रबाहुश्चयदाभवितातस्यवैसुतः॥१०॥ कुरंगनयनःश्रीमान्सं
भूतोभपलक्षणैः॥ कृतवीर्यस्तदाराध्यसहस्रांशुंदिवाकरं॥११॥ उपवासैर्व्रतैर्दिव्यैर्वेदसूक्तैश्चनारद॥ पुत्र

म०पु० स्पजीवनायालामतत्स्नानमवाप्स्यति॥१२॥कृतवीर्येण वै दृष्टइदं वक्ष्यति भास्करः॥अशेषं दुष्टशमनं सर्वकल्मष
१०९ नाशनं॥१३॥श्रीसूर्य उवाच॥॥अनेनैव स्नानमहता पुत्रस्तव नराधिप॥भविष्यति चिरंजीवी किंतु कल्मषना
शनं॥१४॥सप्तमीस्नपनं वक्ष्ये सर्वलोकहिताय वै॥जातस्य मृतवत्सायाः सप्तमे मासि नारद॥१५॥अथवाप्य
क्तसप्तम्यामेतत्सर्वं प्रशस्यते॥ग्रहताराबलं लब्ध्वा कृत्वा ब्राह्मणवाचनं॥१६॥बालस्य जन्मनक्षत्रं वर्जयि
दा त्वा तिथिं बुधः॥तद्वद्धातुरसांश्च कृत्स्नं स्यादितरेषु च॥१७॥गोमयेनुलिप्तायां भूमावेकाग्निवन्नदा॥तंदुलै
च रक्तशालेयैश्चरुं गोक्षीरसंयुतं॥१८॥निर्वपेत्सूर्यरुद्राभ्यां तन्मंत्राभ्यां विधानतः॥कीर्तयेत्सूर्यदैवत्यं सप्त
र्चं च घृताकृतीः॥१९॥जुहुयाद्रुद्रसूक्तेन तावद्रुद्राय नारद॥होतव्याः समिधश्चात्र तथैवार्कपलाशयोः
२०॥यवकृष्णतिलैर्होमः कर्तव्योष्टशतं पुनः॥व्याहृतीभिः सदा त्वेतत्प्रत्येकाष्टशतं पुनः॥२१॥कृत्वा स्ना
नं च कर्तव्यं मंगलज्ञेन धीमता॥विप्रेण चैव विदुषा विधिवद्दत्तपाणिना॥२२॥स्थापयित्वा च चतुरः कुं
भान्कोणेषु मंडलेन नातः॥पंचपल्लवपुन्नमध्ये दध्यक्षतविभूषितान्॥२३॥स्थापयेदव्रणं कुंभं सप्तर्चेणा
भिमंत्रितं॥सौरेण तीर्थतोयेन पूर्णं रत्नसमन्वितं॥२४॥सर्वान्सर्वौषधैर्युक्तान्पंचगव्यजलान्विता राम
न्॥पंचरत्नफलैः पुष्पैर्वासोभिः परिवेष्टयेत्॥२५॥गजाश्वरथ्यावल्मीकसंगमात्ह्रदगोकुलात्॥संस्थाद्वां १०९

मृदमादाय सर्वेषु वै विनिक्षिपेत्॥२६॥चतुर्ष्वपि च कुंभेषु रत्नगर्भेषु मध्यमं॥गृहीत्वा ब्राह्मणस्तत्र सौर
मंत्रानुदीरयेत्॥२७॥नारीभिः सप्तसंख्याभिः सपुत्राभिर्यथात्र च॥पूजिताभिर्यथाशक्त्या माल्यवस्त्रवि
भूषणैः॥२८॥सविप्राभिश्च कर्तव्यं मृतवत्साभिषेचनं॥दीर्घायुरस्तु बालोयं जीवत्पुत्रा च भामिनी॥
२९॥आदित्यचंद्रमासार्द्धं ग्रहनक्षत्रमंडलैः॥सशक्राः लोकपालाश्च ब्रह्मविष्णुमहेश्वराः॥३०॥एते चान्ये
च देवौघाः सदा पांतु कुमारकं॥मा शनिर्वा कृतनुपेञ्चि बालग्रहाः क्वचित्॥३१॥पीडां कुर्वंतु बालस्य
मा मातुर्जनकस्य वै॥ततः श्वेतांबरधरा कुमारपतिसंयुता॥३२॥सप्तकं पूजयेत्स्त्रीणां आचार्यं भा
र्यया सह॥कांचनीं च ततः कृत्वा ताम्रपात्रोपरिस्थितां॥३३॥प्रतिमां धर्मराजस्य गुरवे विनिवेदयेत्
॥वस्त्रकांचनरत्नौघैर्भक्ष्यैः सघृतपायसैः॥३४॥पूजयेत्ब्राह्मणांतद्वद्वित्तशाठ्यविवर्जितः॥भुक्त्वा
च गुरुणा देयस्त्वायमित्रसंततिः॥३५॥दीर्घायुरस्तु बालोयं यावद्वर्षशतं सुखी॥यत्किंचिदस्य दुरि
तं तत्क्षिप्तं वडवानले॥३६॥ब्रह्मारुद्रो वसुः स्कंदो विष्णुः शक्रो हुताशनः॥रक्षंतु सर्वदुष्टेभ्यो वर
दाः संतु सर्वदा॥३७॥एवमादीनि वाक्यानि वदंतं पूजयेत्गुरुं॥शक्तितः कपिलां दद्यात् प्रणिपत्य
विसर्जयेत्॥३८॥गुरुं च पुत्रसहिता प्रणम्य रविं नाकरौ॥कृतकृत्यं तदा श्रीयादादित्याय नमोस्तु

म॰पु॰
११०

ति॥३९॥इदमेवाद्भुतोद्वेगदुःस्वप्नेषुप्रशस्यते॥कर्तुंजन्मादिनक्षत्रंहित्वासंपूजयेत्सदा॥४०॥शोत्स्यर्थेभ्युक्रस
न्नम्पामेतत्कुर्वन्नासीदति॥सचानेनविधानेनदीर्घायुरत्रवल्लभः॥४१॥संवत्सराणांप्रयुतंशास्तासक्षिति
मंडले॥पुण्यंपवित्रमायुष्यंसप्तमीस्नपनंरवेः॥४२॥कथयित्वाद्विजश्रेष्ठस्तत्रैवांतरधीयत॥एतत्तेसर्व
माख्यातंसप्तमीस्नानमुत्तमं॥४३॥सर्वदुष्टोपशमनंबालानांपरमंहितं॥आरोग्यंभास्करादिच्छेत्
धनमिच्छेद्धुताशनात्॥४४॥ईश्वराज्ज्ञानमिच्छेत्तुमोक्षमिच्छेज्जनार्दनात्॥४६॥एतन्महापातकना
शनंस्यात्परंहितंबालविवर्द्धनंच॥शृणोतियश्चैवमनन्यचेतास्तस्यापिसिद्धिंमुनयोवदंति॥४५॥॥
इतिश्रीमत्स्यपुराणेसप्तमीस्नपनंनाम॥॥श्रीमत्स्यउवाच॥॥पुरारथंतरेकल्पेपरिप्रष्टोमहात्म प
ना॥मंदरस्थोमहादेवःपिनाकीब्रह्मणास्वयं॥१॥ब्रह्मोवाच॥कथमारोग्यमैश्वर्यमनंतममरेश्वर॥
स्वल्पेनतपसादेवभवेन्मोक्षोथवानघ॥२॥किमज्ञातमहादेवत्वत्प्रसादादधोक्षज॥स्वल्पकेनापि
तपसामहत्फलमिहोच्यतां॥३॥श्रीमत्स्यउवाच॥॥एवंपृष्टःसविश्वात्माब्रह्मणालोकभावनः॥उ
मापतिरुवाचेदंमनसःप्रीतिकारकं॥४॥ईश्वरउवाच॥॥अस्माद्रथंतरात्कल्पात्त्रयोविंशःपुनर्य राम॰
दा॥वराहोभविताकल्पस्तस्यमन्वंतरेष्टमे॥५॥वैवस्वताख्येसंजातेसप्तलोककृत्॥द्वापराख्ययुगंत ११०

द्भिसप्ताविंशतिमंजयुः॥६॥तस्यांतेसमहादेवोवासुदेवोजनार्दनः॥भारावतारणार्थायत्रिधाविष्णुर्भविष्य
ति॥७॥द्वैपायनऋषिस्तत्रकौहिणेयोथकेशवः॥कंसादिदर्पमथनःकेशवःक्लेशनाशनः॥८॥पुरी
द्वारावतीनामसांप्रतंयाकुशस्थली॥दिव्यानुभावसंयुक्तामधिवासायशार्ङ्गिणः॥९॥त्वष्टाममसमाज्ञया
तद्वत्करिष्यतिजगत्पते॥कुरुभिर्देवगंधर्वैरभिःकैटभार्दनः॥१०॥प्रष्टव्यासुपुराणासुधर्मसंबंधिनीषु
च॥कथांतेभीमसेनेनपरिपृष्टःप्रतापवान्॥११॥त्वयापृष्टस्यधर्मस्यरहस्यास्यतुमेदकृत्॥भवितास
तदाप्रसुनकन्नचैववृकोदरः॥१२॥प्रवर्त्तकोस्यधर्मस्यपांडुपुत्रोमहाबलः॥यस्यतीक्ष्णोवृकोनामजठरे
हव्यवाहनः॥१३॥मयादत्तःसधर्मार्थिस्तेनचासौवृकोदरः॥मतिमान्दानशीलश्चनागायुतबलोमहान्
१४॥धार्मिकस्याप्यशक्तस्यतीव्राग्नित्वादुपोषणे॥इदंव्रतमशेषाणांव्रतानामधिकंयतः॥१५॥कथयिष्य
तिविश्वात्मावासुदेवोजगद्गुरुः॥अशेषयज्ञफलदंचशेषाघविनाशनं॥१६॥अशेषदुष्टशमनंअशेष
सुरपूजितं॥पवित्राणांपवित्रंचमंगलानांचमंगलं॥१७॥भविष्यंचभविष्याणांपुराणानांपुरातनं॥१७॥श्री
वासुदेवउवाच॥॥यद्यष्टमीचतुर्दश्योर्द्वादशीषुचभारत॥अन्येष्वपिदिनर्क्षेषुनशक्तस्त्वमुपोषितुं॥१८॥
ततःपुण्यामिमांभीमतिथिंपापनाशिनीं॥उपोष्यविधिनानेनगच्छविष्णोःपरंपदं॥१९॥माघमासस्यदश

मीयदास्त्रुक्त्रा न वेन्नदा ॥ घृतेनाभ्यंजनं कृत्वा तिलस्नानं समाचरेत् ॥ २० ॥ तथैव विष्णुमभ्यर्च्य नमो नारायणेति च ॥ कृ
ष्णस्य पादौ संपूज्य शिरः सर्वात्मनेति च ॥ २१ ॥ वैकुंठायेति वैकुंठं उरः श्रीवत्सधारिणे ॥ शंखिने चक्रिणे तद्व
दिने वरदाय वै ॥ २२ ॥ सर्वं नारायणस्यैवं संपूज्या बाहवः क्रमात् ॥ दामोदरायेत्युदरं मेढ्रं पंचशराय वै ॥ २३ ॥ ऊ
रू सौभाग्यनाथाय जानुनी भूतधारिणे ॥ नमो नीलाय वै जंघे पादौ विश्वसृजे नमः ॥ २४ ॥ नमो देव्यै नमः
शांत्यै नमो लक्ष्म्यै नमः श्रियै ॥ नमः पुष्ट्यै नमस्तुष्ट्यै दृष्ट्यै हृष्ट्यै नमो नमः ॥ २५ ॥ नमो विहंगनाथाय वायुवेग
य पक्षिणे ॥ विषप्रमाथिने नित्यं गरुडं चाभिपूजयेत् ॥ २६ ॥ एवं संपूज्य गोविंदमुमापतिविनायकौ ॥ गं
धैर्माल्यैस्तथा धूपैर्भक्ष्यैर्नानाविधैरपि ॥ २७ ॥ गव्येन पयसा सिद्धां कृशरामथवाप्यतः ॥ सर्पिषा सह भुक्त्वा
च त्वाशतपदं बुधः ॥ न्यग्रोधं दंतकाष्ठं च अथवा खादिरं बुधः ॥ गृहीत्वा धावयेद्दंतानाचांतः प्राग्मुदङ्मु
खः ॥ २९ ॥ ब्रूयात्सायं ततो कृत्वा संध्याम स्तमिते रवौ ॥ नमो नारायणायेति त्वामहं शरणागतः ॥ ३० ॥ ए
कादश्यां निराहारो समभ्यर्च्य च केशवं ॥ रात्रिं च सकलां स्थित्वा स्नानं च पयसा ततः ॥ ३१ ॥ सर्पिषा वापि द
हनं कृत्वा ब्राह्मणपुंगवैः ॥ सहैव पुंडरीकाक्ष द्वादश्यां क्षीरभोजनं ॥ ३२ ॥ करिष्यामि जितात्माहं निर्विघ्नेन
स्तु देव मे ॥ एवमुक्त्वा स्वपेद्भूमाविति हासकथां पुनः ॥ ३३ ॥ श्रुत्वा प्रभाते संस्नाते नदीं गत्वा विशांपते ॥ राम १११

स्नानं कृत्वा मृदा तद्वत्पाषंडानभिवर्जयेत् ॥ ३४ ॥ चतुर्हस्तां शुभां कुर्याद्वेदीमरत्निच्छ्रितं ॥ चतुर्हस्तप्रमा
णं च विन्यसेत्तत्र तोरणं ॥ प्रणम्य कलशं तत्र माषमात्रेण संयुतं ॥ छिद्रेण जलसंपूर्णमधः कृष्णाजिन
स्थितः ॥ ३६ ॥ तस्य धारां च शिरसा धारयेत्सकलां निशां ॥ धाराभिर्भूरिभिर्भूरि फलं वेदविदो विदुः ॥ ३७
यस्मात्तस्मात्कुरुश्रेष्ठ धाराधायातुरक्षितः ॥ तथैव विष्णोः शिरसि क्षीरधारां प्रपातयेत् ॥ ३८ ॥ अरत्नि
मात्रं कुंडं च कुर्यात्तत्रिमेखलं ॥ योनिवक्त्रं ततः कृत्वा ब्राह्मणैर्यवसर्पिषा ॥ ३९ ॥ तिलांश्च विष्णुदेवत्यैर्मं
त्रैरेकाग्निवत्तदा ॥ कृत्वा च वैष्णवं सम्यक्चरुं क्षीरसंयुतं ॥ ४० ॥ निष्पावार्धप्रमाणां वै धारामाज्यस्य पा
तयेत् ॥ जलकुंभान्महावीर स्थापयित्वा त्रयोदश ॥ ४१ ॥ भक्ष्यैर्नानाविधैर्युक्तान्सितवस्त्रैरलंकृता
न् ॥ युक्तानौदुंबरैः पात्रैः पंचरत्नसमन्वितान् ॥ ४२ ॥ चतुर्भिर्ब्राह्मणैर्होमस्तत्र कार्य उदङ्मुखैः ॥ ऋग्जापश्च
तुर्भिश्च यजुर्वेदपरायणैः ॥ ४३ ॥ वैष्णवानि च सामानि चतुरः सामवेदिनः ॥ अरिष्टवर्गसहितानजितपरिपा
वयेत् ॥ ४४ ॥ एवं द्वादश तान्विप्रान्वस्त्रमाल्यानुलेपनैः ॥ पूजयेदंगुलीयैश्च कटकैर्हेमसूत्रकैः ॥ ४५ ॥
वासोभिः शयनीयैश्च वित्तशाठ्यविवर्जितः ॥ एवं क्षपां वियात्याथ गीतमंगलनिःस्वनैः ॥ ४६ ॥ उपाध्यायश्च
पुनर्द्विगुणं सर्वमेव तु ॥ ततः प्रभाते विमले समुत्थाय त्रयोदश ॥ ४७ ॥ गावो दद्यात्कुरुश्रेष्ठ सौवर्णशृंगसं

पुताः॥ पयस्विनीं शीलवतीं कांस्यदोहसमन्वितां॥ ४८॥ रूप्यखुरां सवत्सां च चंदनेनाभिषेचितां॥ तांस्तु
तिषां ततो भक्त्या भक्ष्यभोज्यालतर्पितान्॥ ४९॥ कृत्वा वै ब्राह्मणान् सर्वान् रत्नैर्नानाविधैस्तथा॥ भुक्त्वा चास्म
रलवणमात्मना च विसर्जयेत्॥ ५०॥ अनुगम्य पदान्यष्टौ पुत्रभार्यासमन्वितः॥ प्रीयतामत्र देवेशः केशवः शिवः
क्लेशनाशनः॥ ५१॥ शिवस्य हृदये विष्णुर्विष्णोश्च हृदये शिवः॥ यथांतरं न पश्यामि तथा मे स्वस्ति चायुषः॥ ५
२॥ एवमुच्चार्य तान् कुंभान् गाश्चैव शयनानि च॥ वासांसि चैव सर्वेषां गृहाणि प्रापयेत् बुधः॥ ५३॥ द्विमा
वे बहुशय्यानामेकामपि सुसंस्कृतां॥ शय्यां दद्यात् द्विजातीनां सर्वोपस्करसंयुतां॥ ५४॥ इतिहासपुराणा
नि वाचयित्वा तिवाहयेत्॥ तद्दिनं नरशार्दूल यदिच्छेद्विपुलां श्रियं॥ ५५॥ तस्मात्त्वं सत्त्वमालंब्य भीमसेन
विमत्सरः॥ कुरु व्रतमिदं सम्यक् स्नेहाद्गुह्यमपीरितं॥ ५६॥ त्वया कृतमिदं भीम त्वन्नाम्ना कं भविष्यति॥
सा भीमद्वादशी ह्येषा सर्वपापहरा शुभा॥ ५७॥ या तु कल्याणिनी नाम पुराकल्पेषु पठ्यते॥ ५७॥ त्वमादिक
र्त्तासि सौकरेस्मिन् कल्पे महावीर वरप्रधाने॥ योस्याः स्मरेत्कीर्तनमप्यशेषं विनष्टपापस्त्रिदशाधिपः स्या
त्॥ ५८॥ कृत्वा च पापस्मरसामधन्या वेश्या कृतानघ भवांतरेषु॥ आभीरकन्यातिकुतूहलेन सैवोर्वशी
संप्रति नाकपृष्ठे॥ ५९॥ जाताप्यसौ वैश्यकुलोद्भवापि पुलोमकन्या पुरुहूतपत्नी॥ तत्रापि तस्याः परिचारि

केयं मम प्रिया संप्रति सत्यभामा॥ ६०॥ स्नातः पुरा मंडलमेष तद्वत्तेजोमयं वेदशरीरमाप॥ अस्यां च क
ल्याणितिथौ विवस्वान् सहस्रधारेण सहस्ररश्मिः॥ ६१॥ इममेव व्रतं महेंद्रमुख्यैर्वसुभिर्देवसुरारि
भिस्तथैव॥ फलमस्य न शक्यतेभिवक्तुं यदि जिह्वायुतकोटयो मुखे स्युः॥ ६२॥ कलिकलुषविदारिणी
मनंतामिति कथयति यादवेंद्रसूनुः॥ अपि नरकगतान् पितॄन् शेषानलमुद्धर्तुमिहैव यः करोति॥
६३॥ य इदमघविदारणं शृणोति परिपठतीह नरोपकारहेतोः॥ व्रतमिह विहितं त्वया नरेंद्र स पत
ति नैव संसृताब्धिमध्ये॥ ६४॥ कल्याणिनी नाम पुरा बभूव या द्वादशी माघदिनेन पूज्या॥ सा पांडुपुत्रेण
कृता भविष्यत्यनंतपुण्या भय भीमपूर्वा॥ ६५॥ इति श्रीमत्स्यपुराणे भविष्यव्रतोपदेशो भीमद्वादशीना
म॥ श्रीब्रह्मोवाच॥ वर्णाश्रमाणां प्रभवः पुराणेषु मया श्रुतं॥ सदाचारस्य भगवन् धर्मशास्त्रविनि
श्चयं॥ १॥ पत्यस्त्रीणां सदाचारं श्रोतुमिच्छामि तत्त्वतः॥ पतिव्रतानां देवेश चरितं परिकीर्तय॥ २॥ श्रीईश्व
र उवाच॥ यस्मिन्नेव युगे मुख्ये सहस्राणि तु षोडश॥ वासुदेवस्य नारीणां भविष्यंत्यंबुजोद्भव॥ ३॥ ता
भिर्वसंतसमये कोकिलालिकुलाकुले॥ पुष्पितोपवनोत्फुल्लकह्लारसरसच्छदे॥ ४॥ निर्झरापानगोष्ठीषु
प्रसक्ताभिरलंकृतः॥ कुरंगनयनः श्रीमान् मुष्णती कृतशेखरः॥ ५॥ गच्छन् समीपमार्गेण सांबः परपुरंजय॥

साक्षात्कंदर्परूपेणसर्वाभरणभूषितः॥६॥अनंगरसतप्ताभिःसाभिरात्मवेक्षितः॥भवद्भोमन्मथस्तासां
भविष्यतियदात्मनि॥७॥तदावेक्ष्यजगन्नाथःसवितोध्यानचक्षुषा॥शापंवक्ष्यतिताःसर्वाबोहरिष्यंतिदस्य
वः॥८॥मत्परोक्षंयतःकामाबाल्यादीदृग्विधंकृतं॥ततःप्रसादितोदेवस्त्विदंवक्ष्यतिसांत्वितः॥९॥ताभिः
शापाभिभूताभिर्भगवान्भूतभावनः॥उत्तारंतुतंक्षसत्तेसमुद्रंब्राह्मणप्रियः॥१०॥उपदेक्ष्यतयात्मा
नमाविकमाणिकारकं॥भवतीनाम्नृषिर्दाल्भ्योयन्त्रतंकथयिष्यति॥११॥इत्युक्त्वाताःपरित्यज्यगते
द्वारवतीश्वरे॥ततःकालेनमहतानारावतरणेकृते॥१२॥निहत्तेमौशलेतद्वत्केशवेदिव्यतांगते॥
शून्येयदुकुलेसर्वेचौरैरपिजितेर्जने॥१३॥हतासुकृष्णपत्नीषुदासभोग्यासुचाबुदे॥तिष्ठंती
षुचतुर्मुखः॥१४॥आगमिष्यतियोगात्मादाल्भ्योनाममहातपाः॥तास्तुसायेणसंपूज्यप्रणिपत्य
पुनःपुनः॥१५॥लालप्यमानाबहुशोबाष्पपर्याकुलेक्षणाः॥स्मरंत्योविविधान्भोगान्दिव्यमाल्यानु
लेपनात्॥१६॥भर्तारंजगतामीशमनंतमपराजितं॥दिव्यानुभावांचपुरींनानारत्नगृहाणिच॥१७॥
द्वारकावासिनःसर्वान्देवरूपकुमारकान्॥प्रश्नमेतत्करिष्यंतिमुनेरभिमुखाःस्थिताः॥१८॥स्त्रिय
ऊचुः॥दस्युभिर्भगवन्सर्वाःपरिभुक्तावयंबलात्॥स्वधर्मच्यवतेस्माकंतस्मात्त्वंशरणंभव॥१९॥आ

राम
११३

दिष्टोसिपुराब्रह्मन्केशवेनचधीमता॥कस्माद्दासेनसंयोगंप्राप्तवेश्यात्वमागताः॥२०॥वेश्यानामपियोधर्मस्त
न्नोब्रूहितपोधन॥२०॥दाल्भ्यउवाच॥जलक्रीडाविहारेषुपुरासरसिमानसे॥भवतीनांचसर्वासांनारदो
भ्यासमागतः॥२१॥कृताशानसुताःसर्वाभिर्वंत्योप्सरसःपुरा॥अप्रणम्यावलेपेनपरिपृष्टःसयोगवित्॥२
कथंनारायणोस्माकंभर्तास्यादितिपादिशाः॥तस्माद्वरप्रदानेचशापश्चायमभूत्पुरा॥२३॥तस्माद्वरप्र
दानेनमधुमाधवमासयोः॥सुवर्णोपस्करःसर्वाद्विजरूपायकृष्णपक्षतः॥२४॥भर्तानारायणोनूनंभवि
ष्यत्यन्यजन्मनि॥यदकृत्वाप्रणामंमेरूपसौभाग्यमत्सरात्॥२५॥परिपृष्टोस्मितेनाशुवियोगोवोभविष्य
ति॥चौरैरपहृताःसर्वावेश्यात्वंसमवाप्स्यथ॥२६॥ताएवंनारदशापात्केशवस्यचधीमतः॥वेश्यात्व
मागताःसर्वाभिर्वत्यःकाममोहिताः॥२७॥इदानीमपियद्वक्ष्येतत्शृणुध्वंवरांगनाः॥पुरादेवासुरेयुद्धेह
तेषुशतशःसुरैः॥२८॥दानवासुरदैत्येषुराक्षसेषुततस्ततः॥तेषांशतसहस्राणिशतान्यपिचयोषि
तां॥२९॥परिणीतानियानिस्युर्बलाद्दानानियानिवै॥तानिसर्वाणिदेवेशभोवाचवदतांवरः॥३०॥वे
श्याधर्मेणवर्तध्वंअधुनाममपमंदिरे॥भक्तिमत्योवरारोहास्तथादेवकुलेषुच॥३१॥राजानःस्वामिनस्तुभ्यं
स्तकंचापितत्समं॥भविष्यतिचसौभाग्यंसर्वासामपिशाश्वतः॥३२॥यःकश्चित्कामावायगृहमेष्यति

म०पु० व:सदा॥निस्वच्छमन्नैवोपचर्यःसततदाम्बत्रदांभिकात॥३३॥देवतानांपवित्राणांपुरुषेद्विसमुपस्थिते॥गो
११४ भूहिरण्यधान्यानिप्रदेयानिचशक्तितः॥३४॥ब्राह्मणेभ्योवरारोहाःकार्याणिविविधानिच॥यश्चाप्यन्यद्व
तंसम्यगुपदेक्ष्यामितत्वतः॥३५॥अविचारेणसर्वाभिरनुष्ठेयंचतत्पुनःसंसारोत्तारणायालमेतद्विदवि
दोविदुः॥३६॥यदाऽश्लेषदिनेहस्तपुष्येवाथपुनर्वसुः॥नवेत्सर्वौषधिस्नानेसत्यंनारीसमाचरेत॥३७॥त
दापंचशरस्थापिसन्निधानमुपेष्यति॥अर्चयेत्पुंडरीकाक्षंअनंगस्यानुकीर्तनैः॥३८॥कामायपादौ
संपूज्ययदुत्थामोहकारिणा॥उत्कंठायेतिवैकुंठमास्यमानंदकारिणे॥३९॥वामांगेपुष्पचापायदक्षि
णांगरतिपतेनमः॥मानसायेतिवैमौलिंवैहोलायेतिमूर्धजं॥४०॥सर्वात्मनेशिरस्तद्वदेवदेवस्यपूज
येत॥मीनकेतवकंदर्पनिधयेकटिंप्रीतिमतेनमः॥४१॥नाभिंसौख्यसमुद्रायवामायचतथोदरं॥हृदयंहृ
दयेशायस्तनावाह्लादकारिणे॥४२॥नमःशिवायशांतायपाशांकुशधरायच॥गदिनेपीतवस्त्रायशंख
चक्रधरायच॥४३॥नमोनारायणायेतिकामदेवात्मनेनमः॥सर्वशांत्यैनमःप्रीत्यैनमोरत्यैनमःश्रियै॥४
४॥नमःपुष्ट्यैनमस्तुष्ट्यैनमःसर्वार्थसिद्धये॥एवंसंपूज्यदेवेशमनंगात्मकमीश्वरं॥४५॥गंधमाल्यैस्तथा राम
धूपैर्नैवेद्येनचकामिनी॥ततआहूयधर्मज्ञंब्राह्मणंवेदपारगं॥४६॥अव्यंगावयवंपूज्यगंधपुष्पार्च ११५

नार्दिभिः॥शालेयतंडुलप्रस्थंघृतपात्रेणसंयुतं॥४७॥तस्मैविप्रायसादद्यान्माधवःप्रीयतामिति॥यथेष्टा
हारयुक्तेषुतमेवद्विजसत्तमं॥४८॥रत्यर्थंकामदेवोयमितिचित्तेचधारयेत॥यद्यदिच्छतिविप्रेंद्रस्तत्त
त्कुर्याद्विलासिनी॥४९॥सर्वभावेनचात्मानमर्पयेत्स्मितभाषिणी॥एवमादित्यवारेणसर्वमेतत्समाचरेत॥
५०॥तंडुलप्रस्थदानंचयावन्मासास्त्रयोदश॥ततस्त्रयोदशेमासिसंप्राप्तेतस्यभामिनी॥५१॥विप्रस्यो
पस्करैर्युक्तांशय्यांदद्याद्विचक्षणे॥सोपधानकविश्रामांस्वास्तरणावरणांशुभां॥५२॥प्रदीपोपानहच्छत्रपा
दुकासनसंयुतां॥सपत्नीकमलंकृत्यहेमसूत्रांगुलीयकैः॥सूक्ष्मवस्त्रैःसकटकैर्गंधमाल्यानुलेपनैः॥का
मदेवंसपत्नीकंगुडकुंभोपरिस्थितं॥५४॥ताम्रपात्रासनगतंहैमनेत्रपटावृतं॥सकांस्यभाजनोपेतमिक्षु
दंडसमन्वितं॥५५॥दद्यादेतेनमंत्रेणतथैकांगांपयस्विनीं॥यथांतरंनपश्यामिकामकेशवयोःसदा॥५६॥
प तथैवसर्वकामाप्तिरस्तुविष्णोःसमागमः॥यथानकमलादेहात्प्रयातितवकेशव॥५७॥तथाममापिदेवे
शशरीरंस्वाकुरुप्रभो॥तथाचकांचनंदेवंप्रतिगृह्यद्विजोत्तम॥५८॥तर्प्पयेत्तंयथाकामंप्रोषितस्तंसमा
चरेत॥तदनुज्ञयारूपवान्यावदस्यागमोभवेत॥५९॥आत्मनोपिपदाविघ्नंगमस्थितकरंमहतादेववा
मानुषंवास्पृहुपचारेणवाततः॥६०॥सवारानष्टपंचाशद्द्वादशमासमापयेत॥एतद्विकथितंसर्वंभवती

नोविशेषतः॥६२॥अधर्मोयंततोनस्यादिहपानामिहसर्वदा॥पुरुहूतेनयत्प्रोक्तंदानवीषुपुरामया॥६२॥तदि
दंसांप्रतंसर्वंभवतीष्वपियुज्यते॥सर्वपापप्रशमनमनंतफलदायिकं॥६३॥कल्याणिनांचकथितंतत्कु
रुध्वंवरांगनाः॥करोतियाशेषमखंडमेतत्कल्याणिनीमाधवलोकसंस्था॥६४॥सापूजितादेवगणैरशे
षैरानंदकृत्स्थानमुपैतिविष्णोः॥६४॥श्रीभगवानुवाच॥॥एवंतपोधनःसोप्यशिधायचैवंतदाचतासांप्र
तिवांगनानां॥स्वस्थानमेष्यतिसमस्तमिदंव्रतंकरिष्यंतिचदेवयोनेः॥६५॥॥इतिश्रीमत्स्यपुराणेमनु
मत्स्यसंवादेअनंगदानव्रतंनाम॥श्रीब्रह्मोवाच॥॥भगवन्पुरुषस्येहस्त्रियाश्चविरहादिकं॥शोकव्या
धितमंघोरंतन्नवेद्येनतद्वद॥१॥श्रीभगवानुवाच॥॥श्रावणस्यद्वितीयायांकृष्णायांमधुसूदनः॥क्षी
राब्धौसलक्ष्मीकःसदावसतिकेशवः॥२॥तस्मात्संपूज्यगोविंदंसर्वान्कामान्समश्नुते॥गोभूहिरण्य
दानानिसप्तकल्पशतायुतं॥३॥अशून्यशयनानामद्वितीयासंप्रकीर्तिता॥तस्यांसंपूजयेद्विष्णुमेभिर्मं
त्रैर्विधानतः॥४॥श्रीवत्सधारिन्श्रीकांतश्रीधामश्रीपतेनमः॥गार्हस्थ्यंमाप्रणाशंमेयातुधर्मार्थकि
मदं॥५॥अग्नयोमाप्रणश्यंतुदेवतापुरुषोत्तम॥पितरोमाप्रणश्यंतुमास्तुदंपत्यभेदना॥६॥लक्ष्म्यावियु राम:
ज्यतेनैवकदाचिच्चयथाभवान॥कलत्रसंबंधोदेवमामेवियुज्यतां॥७॥लक्ष्मानशून्यंवरदयथातेशयनं ११५

सदा॥शय्याममाप्यशून्यास्तुतथैवमधुसूदन॥८॥गीतवादित्रनिर्घोषंदेवदेवस्यकीर्तनं॥घंटाभवेदशक्तस्य
सर्वाद्यमपीपतः॥९॥एवंसंपूज्यगोविंदमश्नीयात्तैलवर्जितं॥नक्तमक्षारलवणंयावद्यामचतुष्टयं॥१०॥त
तःप्रभातेसंजातेलक्ष्मीपतिसमन्वितं॥दीपान्नभाजनैर्युक्तांशय्यांदद्यात्सुलक्षणां॥११॥पादुकोपानहछत्र
चामरासनसंयुतां॥अभीष्टोपस्करैर्युक्तांशुक्लपुष्पांबरावृतां॥१२॥सोपधानसमायुक्तांफलैर्नानाविधैस्तथा
तथाभरणधान्यैश्चयथाशक्तिसमन्वितां॥१३॥अव्यंगायचविप्रायवैष्णवायकुटुंबिने॥दातव्यावेदविदुषेन
वेनापतितायचा॥१४॥तत्रोपवेश्यदंपत्यमलंकृत्यविधानतः॥पत्न्यास्तुभोजनंदद्याद्भक्ष्यसमन्वितं॥१५॥
ब्राह्मणस्यापिसौवर्णमुपहारसमन्वितां॥प्रतिमांदेवदेवस्यसोदकुंभांनिवेदयेत॥१६॥एवंयस्तुपुमान्कु
र्यात्अशून्यशयनंहरेः॥वित्तशाठ्येनरहितोनारायणपरायणः॥१७॥नतस्यपत्न्याविरहःकदाचिदपिजा
यते॥नारीवाविधवाब्रह्मनयावच्चंद्रार्कतारकं॥१८॥नविरूपोनशोकार्तोदंपतीभवतःक्वचित॥नपुनःपु
त्ररत्नानिक्षयंयांतिपितामह॥१९॥सप्तकल्पसहस्राणिसप्तकल्पशतानिच॥कुर्वन्नशून्यशयनंविष्णुलो
केमहीयते॥२०॥॥इतिश्रीमत्स्यपुराणेमनुमत्स्यसंवादेअशून्यशयनद्वितीयाव्रतंनाम॥॥ईश्वरउवाच॥
शृणुचान्यन्नविद्यारूपसंपद्विधायकं॥भविष्यतियुगेतस्मिन्द्वापरांतेपितामह॥२१॥पिप्पलादस्यसंवादयु

धिष्ठिरपुरो महत्॥ वसंतं नैमिषारण्ये पिप्पलादं महामुनिं॥२॥ अभिगम्य तदा चैनं प्रश्नमेकं करिष्यति॥ युधिष्ठि
रो धर्मपुत्रो धर्मयुक्तस्तपोधनं॥३॥ युधिष्ठिर उवाच॥॥ कथमारोग्यमैश्वर्यमविधर्मेमतिस्तथा॥ अंगि
नाशिवे जक्रिर्वैस्त वैतान्यतेकथं॥४॥ ईश्वर उवाच॥॥ तस्योत्तरमिदं ब्रह्मन् पिप्पलादस्य धीमतः॥ श्रृणुध
य दुक्ष्यति सधर्मपुत्राय धार्मिकः॥५॥ पिप्पलाद उवाच॥॥ साधु पृष्टं त्वया राजन्निदानीं कथयामि ते॥ अंगार
व्रतमित्येतत्सर्वं विस्माभितेनप॥६॥ अत्राप्युदाहरंतीममितिहासं पुरातनं॥ विरोचनस्य संवादं भार्गवस्य च
धीमतः॥७॥ प्रह्लादस्य सुतं दृष्ट्वा द्विरष्टप्रतिवत्सरं॥ रूपेणाप्रतिमं कांत्या सोहसद् भृगुनंदनः॥८॥ साधु साधु म
हाबाहो विरोचन शिवं तव॥ तत्तथा हसितं तस्य पप्रच्छ स्वरसूदनः॥९॥ ब्रह्मन्किमर्थमेतत्ते हास्यमाकस्मिकं
कृतं॥ माधु साध्विति मामेवमुत्तरं संवदस्व मे॥१०॥ तमेवंवादिनं शुक्र उवाच वदतां वरः॥ विस्मयाद्व्रतमाहात्म्या
द्धास मे तत्कृतं मया॥११॥ पुरा दक्षविनाशाय कुपितस्य तु शूलिनः॥ अपतद्भीमवक्त्रस्य स्वेदबिंदुर्ललाटजः॥
१२॥ भित्वा सप्तपातालान् दहत्सप्तसागरान्॥ अनेकवक्त्रनयनो ज्वलज्ज्वलनभीषणः॥१३॥ वीरभद्र इति
ख्यातः करपादायुतैर्युतः॥ कृत्वासौ यज्ञमथनं पुनर्भूतल संभवः॥१४॥ त्रिजगन्निर्दहन्भूयः शिवेन विनिवा
रितः॥ कृतं त्वया वीरभद्र दक्षयज्ञविनाशनं॥१५॥ इदानीमलमेतेन लोकदाहेन कर्मणा॥ शांतिप्रदाता सर्वेषां

ग्रहाणां प्रथमो भव॥१६॥ प्रेक्षिष्यंते जनाः पूजां करिष्यंति तवान्मम॥ अंगारक इति ख्यातिं गमिष्यति धराम
ज॥१७॥ देवलोके द्वितीयं च तव रूपं भविष्यति॥ ये च त्वां पूजयिष्यंति चतुर्थ्यां त्वद्दिने तथा॥१८॥ रूपमारोग्यमै
श्वर्यं तेषु त्वं भविष्यति॥ एवमुक्तस्तदा शंभुं तिमगमत्कामरूपधृक्॥१९॥ सजातस्तत्क्षणाद्राजन् ग्रहत्वम
गमत्पुनः॥ स कदाचिद्भवांस्तस्य पूजां चारिकमुत्तमं॥२०॥ दृष्टवान् क्रियमाणां च शूद्रत्वेन व्यवस्थितः॥ ते
न त्वं रूपवान् जातः सुरशत्रु कुलोद्वह॥२१॥ विविधा च रुचिर्जाता यस्मात्तव विदूरगा॥ विरोचन इति प्राहु
स्तदा त्वां देवमानवाः॥२२॥ शूद्रेण क्रियमाणस्य व्रतवद्दर्शनात्॥ ईदृशी रूपसंपत्तिर्दृष्ट्वा विस्मितवानहं॥
२३॥ साधु साध्विति तेनोक्तमहो माहात्म्यमुत्तमं॥ पश्यतो पि भवद्रूपमैश्वर्यं किमु कुर्वतः॥२४॥ यस्मात्त्वं भू
धरणीसुतस्य विबुध्यमानेन नृपादिदानीं॥ ख्यातो कित्ते नस्सुरारिगणे सिभूतिरेषा भवस्यतिजाता॥२५॥ पि
प्पलाद उवाच॥ ॥ इत्युक्तवचनं श्रुत्वा भार्गवस्य महात्मनः॥ प्रह्लादनंदनो धीरः पुनः पप्रच्छ विस्मितः॥२६
विरोचन उवाच॥ मम वंस व्रतं सम्यक् श्रोतुमिच्छामि तत्वतः॥ दीयमानं तु यद्दानं कथयाहृष्टं भवांतरे॥२७॥
माहात्म्यं च विधिं तस्य यथावद्वक्तुमर्हसि॥ इति तद्वचनं श्रुत्वा काव्यः प्रोवाच विस्तरात्॥२८॥ शुक्र उवाच॥॥
चतुर्थ्यंगारकदिने यदा भवति दानव॥ मृदा स्नानं तदा कुर्यात्पद्मरागविभूषितः॥२९॥ अग्निर्मूर्द्धा दिवो मंत्रंज

पनस्नानमुदङ्मुखः॥ भूसुतं हृदि स्मरन्मौनमासीनो रोगविवर्जितः॥३०॥ अथास्तमित आदित्ये गोमये
नानुलेपयेत्॥ प्रांगणं पुष्पमालाभिरक्षताभिः समंततः॥३१॥ अत्र मध्ये अग्निशिखे त्यस्रं कुंकुमेना
ष्टपत्रकं॥ कुंकुमस्याप्यभावे तु रक्तचंदनमिष्यते॥३२॥ चत्वारः करकाः कार्याभिक्ष्यत्तोज्यसम
न्विताः॥ तंदुलैरक्तरक्तानीपैः पद्मरागैश्च संयुताः॥३३॥ चतुःकोणेषु तान्न्यस्य फलानि विविधानि च॥ गं
धमाल्यादिकं सर्वं तथैव विनिवेदयेत्॥३४॥ सुवर्णशृंगीं कपिलामथार्च्य रूप्यैः खुरैः कांस्यदोहां सवत्सां
।धुरंधरं रक्तमतीव सौम्यं धान्यानि सप्तांबरसंयुतानि॥३५॥ अंगुष्ठमात्रं पुरुषं तथैव सौवर्णमित्यायत
बाहुदंडं॥ चतुर्भुजं हेममये निविष्टं पात्रे गुडस्योपरि चारुयुक्तं॥३६॥ सामस्वरज्ञाय जितेंद्रियाय पात्रा
यशीलाय च यमेयुताय॥ दातव्यमेतत्सकलं द्विजाय कुटुंबिने नैव तु दांभिकाय॥३७॥ भूमिपुत्र महाभाग
स्वेदोद्भव पिनाकिनः॥ रूपार्थी त्वां प्रपन्नोस्मि गृहाणार्घं नमोस्तु ते॥३८॥ मंत्रेणानेन दत्त्वार्घं रक्तचंदनवा
रिणा॥ ततोर्चयेद्विप्रवरं रक्तमाल्यांबरादिभिः॥३९॥ दद्यान्मंत्रेण तेनैव गां मंगोमिथुनान्वितं॥ शय्यां च श
क्तितो दद्यात्सर्वोपस्करसंयुतां॥४०॥ यद्यदिष्टतमं लोके यच्चास्यादयितं गृहे॥ तत्तद्गुणवते देयं तदेवाक्ष
यमिच्छता॥४१॥ प्रदक्षिणं ततः कृत्वा विसर्ज्य द्विजपुंगवं॥ नक्तमक्षारलवणमश्नीयात् घृतसंयुतं॥४२॥

भक्तपायसकं पुनः कुर्यादेवमंगारकाष्टकं॥ चतुरो वाथ वातस्य यत्तुल्यं तद्वदामि ते॥४३॥ रूपसौभाग्यसंप
न्नः पुनर्जन्मनि जन्मनि॥ विष्णौ वाथ शिवे भक्तः सप्तद्वीपाधिपो भवेत्॥४४॥ सप्तकल्पसहस्राणि रुद्रलोके म
हीयते॥ तस्मात्त्वमपि दैत्येंद्र व्रतमेतत्समाचर॥४५॥ इत्येवमुक्त्वा भृगुनंदनोपि जगाम दैत्यश्च चकार सर्वं॥
त्वं चापि राजन्कुरु सर्वमेतद्यतोक्षयं वेदविदो वदंति॥४६॥ श्रीईश्वर उवाच॥ ॥ तथेति संपूज्य च पिप्पला
दं वाक्यं चकाराद्भुतवीर्यकर्मा॥ शृणोति यश्चैनमनन्यचेतास्तस्यापि सिद्धिं भगवान्विधत्ते॥४७॥ ॥ इति म
त्स्यपुराणे अंगारकव्रतं॥ ॥ पिप्पलाद उवाच॥ ॥ अथातः शृणु भूपाल प्रतिशुक्रं प्रशांतये॥ यात्रारंभाव
साने च तथा शुक्रोदये त्विह॥१॥ राजते वाथ सौवर्णे कांस्यपात्रेथवा पुनः॥ शुक्लपुष्पांबुजयुते सिततंदुलपू
रितः॥२॥ निधाय राजतं शुक्लं शुचिशुक्लफलान्वितं॥ मंत्रेणानेन तत्सर्वं सामगाय निवेदयेत्॥३॥ नमस्ते स
र्वलोकेश नमस्ते भृगुनंदन॥ कवे सर्वार्थसिध्यर्थं गृहाणार्घं नमोस्तु ते॥४॥ एवं मस्योदये कुर्वन्यात्रादिषु
य भार्गव॥ सर्वान्कामानवाप्नोति विष्णुलोके महीयते॥५॥ यावच्छुक्रस्य नक्तं तावत्पूजा सौमालिकैः शुभैः
वटकैः पूरिकाभिश्च गोधूमैश्चणकैरपि॥६॥ तावन्नवान्नं नाश्नीयात्स्त्रीभिः कामाप्तसिद्धये॥ तथा चास्य ते
पूजां प्रवक्ष्यामि युधिष्ठिर॥७॥ सुवर्णपात्रे सौवर्णमिममरेज्यापुरोहितं॥ पीतपुष्पांबरयुतं कृत्वा स्नानं तु सर्षपैः॥८

म०पु०

११८

पत्नानुगमत्स्यभंगेन पंचगव्यजलेन च॥पीतांगरागवसनो घृतहोमं तु कारयेत्॥९॥प्रणम्य भगवान्सार्द्धं ब्रा
ह्मणाय निवेदयेत्॥नमस्तेंगिरसोनाय वाक्पतेथ बृहस्पते॥१०॥क्रूरग्रहैः पीडितानामसुलभताय नमो नमः॥
संक्रांतावस्य कौंतेय यात्रयाभ्युदये शुच॥११॥कुर्वन्बृहस्पतेः पूजां सर्वान्कामानसमश्नुते॥१२॥॥इति श्री
मत्स्यपुराणे मनुमत्स्यसंवादे शुक्रगुरुपूजाविधिः॥॥नारदउवाच॥॥भगवन्भवसंसारसागरोत्तारकार
क॥किंचिद्व्रतं समाचक्ष्व स्वर्गारोग्यसुखप्रदं॥१॥श्रीईश्वरउवाच॥॥सौरधर्मं प्रवक्ष्यामि नाम्ना कल्या
णसप्तमी॥विशोकसप्तमीतद्वत्फलाढ्यो पापनाशनं॥२॥शर्करासप्तमी पुण्यं तथा कमलसप्तमी॥
मंदारसप्तमी तद्वत्सप्तमीं॥३॥सर्वाश्चनंतफलदाः सर्वा देवर्षिपूजिताः॥विधानमासां वक्ष्यामि यथाव
दनुपूर्वशः॥४॥प्रातर्गव्येन पयसा स्नात्वा नमस्यां समाचरेत्॥ततः शुक्लांबरः पद्ममक्षतैर्विकल्पयेत्॥
५॥प्राग्मुखोष्टदलं मध्ये तद्वद्वृत्तां च कर्णिकां॥पुष्पाक्षतैर्दिक्षु देवेशं विन्यसेत्सर्वतः क्रमात्॥६॥पूर्वेण तपना
येतिमार्तंडायेति वै ततः॥याम्ये दिवाकरायेति विधात्रे इति नैरृते॥७॥पश्चिमे वरुणायेति भास्करायेति चानि
ले॥सौम्ये विकर्तनायेति रवये चाष्टमे दले॥८॥आदावंते च मध्ये च नमोस्तु परमात्मने॥मंत्रैरिति समभ्य
र्च्य नमस्कारं नदीपितैः॥९॥शुक्लवस्त्रैः फलैर्दिव्यैर्धूपमाल्यानुलेपनैः॥स्थंडिले पूजयेद्भक्त्या गुडेन

राम.

११८

लवणेन च॥१०॥ततो व्याहृतिमंत्रेण विसृज्य द्विजपुंगवान्॥शक्तितः पूजयेद्भक्त्या गुडक्षीरघृतादिभिः॥११
तिलपात्रं हिरण्यं च ब्राह्मणाय निवेदयेत्॥१॥एवं नियमकृत्सुप्त्वा प्रातरुत्थाय मानवः॥१२॥कृतस्नानजपो वि
प्रैः सहैव घृतपायसं॥उत्का च वेदविदुषो नेडालव्रतवर्जिते॥१३॥घृतपात्रं सकनकं सोदकुंभं निवेद
येत्॥प्रीयतामत्र भगवान्परमात्मा दिवाकरः॥१४॥अनेन विधिना सर्वं मासि मासि समाचरेत्॥ततश्च
योदशे मासि गा वै दद्यात्त्रयोदश॥१५॥वस्त्रालंकारसंयुक्ताः सुवर्णास्याः पयस्विनीः॥एकामपि प्रदद्या
द्वित्तहीनो विमत्सरः॥१६॥न वित्तशाठ्यं कुर्वीत यतो मोहात्पतत्यधः॥अनेन विधिना यस्तु कुर्यात्कल्या
णसप्तमीं॥१७॥सर्वपापविनिर्मुक्तः सूर्यलोके महीयते॥आयुरारोग्यमैश्वर्यमनंतमिह जायते॥१८॥
सर्वपापहरा नित्यं सर्वदैवतपूजिता॥सर्वदुष्टोपशमनी सदा कल्याणसप्तमी॥१९॥इयमानंदफल
दा यस्तु कल्याणसप्तमीं॥शृणोति पठते चेह सोपि पापैः प्रमुच्यते॥२०॥॥इति श्रीमत्स्यपुराणे मनुम
त्स्यसंवादे कल्याणसप्तमीव्रतं नाम॥॥श्रीईश्वरउवाच॥॥विशोकसप्तमीं तद्वद्वक्ष्यामि मुनिपुंगव॥या
मुपोष्य नरः शोकं न कदाचिदिहाप्नुयात्॥१॥माघे कृष्णतिलैः स्नात्वा सप्तम्यां शुक्लपक्षतः॥कृताहारः कृ
शरया दंतधावनपूर्वकं॥२॥उपवासव्रतं कृत्वा ब्रह्मचारी भवेन्निशि॥ततः प्रभाते उत्थाय कृतस्नानजपः

श्रुतिः॥३॥ कृत्वा च काञ्चनं पद्ममर्कायेति च पूजयेत्॥ करवीरेण रक्तेन रक्तवस्त्रयुगेन च॥४॥ यथा विशो
कं भुवनं त्वयैवादित्य सर्वदा॥ तथा विशोकता मे स्यात्त्वद्भक्तिः प्रतिजन्म च॥५॥ एवं संपूज्य षष्ठ्यां तु भक्त्या
संपूजयेद्द्विजान्॥ सुप्त्वा संप्राश्य गोमूत्रमुत्थाय कृतनैत्यिकः॥६॥ संपूज्य विप्रानन्नेन गुडपात्रसमन्वि
तं॥ तद्वस्त्रयुग्मं च सौवर्णं ब्राह्मणाय निवेदयेत्॥७॥ अतैललवणं भुक्त्वा सप्तम्यां मौनसंयुतः॥ ततः पुरा
णश्रवणं कर्तव्यं भूतिमिच्छता॥८॥ अनेन विधिना सर्वमुभयोरपि पक्षयोः॥ कृत्वा यावत्पुनर्माघशुक्ल
पक्षस्य सप्तमी॥९॥ व्रतांते कलशं दद्यात्सुवर्णकमलान्वितं॥ शय्यां सोपस्करां दद्यात्कपिलां तु पयस्वि
नीं॥१०॥ अनेन विधिना यस्तु वित्तशाठ्यविवर्जितः॥ यं यं प्रार्थयते कामं तं तं प्राप्नोति पुष्कलं॥११॥ नि:
कामः कुरुते यस्तु परं ब्रह्म स गच्छति॥ यः पठेच्छृणुयाद्वापि विशोकाख्यां च सप्तमीं॥ सोपीन्द्रलोकमा
प्नोति न दुःखी जायते क्वचित्॥१२॥ इति श्रीमत्स्यपुराणे मनुमत्स्यसंवादे विशोकसप्तमीव्रतं समाप्तं॥
॥श्रीईश्वर उवाच॥ ॥अन्यामपि प्रवक्ष्यामि नाम्ना तु फलसप्तमीं॥ यामुपोष्य नरः पापाद्विमुक्तः स्वर्ग
भाग्भवेत्॥१॥ मार्गशीर्षे शुभे मासि पंचम्यां नियतव्रतः॥ षष्ठीमुपोष्य कमलं कारयित्वा तु कांचनं॥२॥
शर्करया समं दद्यात् ब्राह्मणाय कुटुंबिने॥ रूपं कांचनकं कृत्वा फलस्यैकस्य धर्मवित्॥३॥ दद्याद्विकालवे

लायां भानुर्मे प्रीयतामिति॥ भक्त्या तु विप्रान्संपूज्य सप्तम्यां क्षीरभोजनं॥४॥ कृत्वा त्वेकफलत्यागं या
वत्स्यात्कृष्णपंचमी॥ तामुपोष्यैव विधिवदनेनैव क्रमेण तु॥५॥ तद्वद्धेमफलं दत्वा सुवर्णकमलान्वितं॥
शर्करापात्रसंयुक्तं वस्त्रमाल्यसमन्वितं॥६॥ संवत्सरं त्वनेनैव विधिनोभयसप्तमीं॥ उपोष्य दद्यात्क्रम
शः सूर्यमंत्रमुदीरयेत्॥७॥ भानुरर्को रविर्ब्रह्मा सूर्यः शक्रो हरिः शिवः॥ श्रीमान्विभावसुस्त्वष्टा वरुणः
प्रीयतामिति॥८॥ प्रतिमासं च सप्तम्यामेकैकं नाम कीर्तयेत्॥ प्रतिपक्षं फलत्यागमेतत्कुर्वन्समाचरेत्॥
९॥ व्रतांते विप्रमिथुनं पूजयेद्वस्त्रभूषणैः॥ शर्कराकलशं दद्याद्धेमपद्मफलान्वितं॥१०॥ यथा न विफ
लाः कामास्त्वद्भक्तानां सदा रवे॥ तथानंतफलावाप्तिरस्तु मे सप्तजन्मनि॥११॥ इमामनंतफलदां यः कु
र्यात्फलसप्तमीं॥ सर्वपापविशुद्धात्मा सूर्यलोके महीयते॥१२॥ सुरापानादिकं किंचिद्यदत्रामुत्र वा कृतं॥
तत्सर्वं नाशमायाति यः कुर्यात्फलसप्तमीं॥१३॥ कुर्वाणः सप्तमीं चेमां सततं रोगवर्जितः॥ भूतभव्यांश्च
पुरुषांस्तारयेदेकविंशतिं॥ यः शृणोति पठेद्वापि सोपि कल्याणभाग्भवेत्॥१४॥ इति श्रीमत्स्यपुराणे म
नुमत्स्यसंवादे फलसप्तमीव्रतं नाम॥ ॥शर्करासप्तमीं वक्ष्ये तद्वत्कल्मषनाशनीं॥ आयुरारोग्यमैश्वर्यं य
यानंतं प्रजायते॥१॥ माधवस्य सिते पक्षे सप्तम्यां नियतव्रतः॥ प्रातः स्नात्वा तिलैः शुक्लैः शुभ्रमाल्यानुले

पनः॥२॥सुवर्णेनसमायुक्तंमंत्रेणानेनपूजयेत्॥विश्वदेवमयोयस्मात्त्वंवेदेषुचपठ्यसे॥३॥त्वमेवामृतसर्व
स्वमतःशांतिंप्रयछमे॥पंचगव्यंततःपीत्वास्वपेत्तत्पार्श्वतःक्षितौ॥४॥सौरंसूक्तंस्मरन्नासीत्पुराणश्रवणेन
वा॥अहोरात्रेगतेपश्चात्सप्तम्यांकृतनैत्यिकः॥५॥तत्सर्वंवेदविदुषेब्राह्मणायनिवेदयेत्॥भोजयेच्छक्तितो
विप्रान्शर्कराघृतपायसैः॥६॥भुंजीतातैललवणंस्वयमप्यथवाग्यतः॥अनेनविधिनासर्वंमासिमासि
समाचरेत्॥७॥संवत्सरांतेशयनंशर्करामलकान्वितं॥सर्वोपस्करसंयुक्तंतथैकांगांपयस्विनीं॥८॥ग
हंचशक्तिमान्दद्यात्समस्तोपस्करान्वितं॥सहस्रेणापिनिष्काणांकृत्वादद्याच्छतेनवा॥९॥दशभिर्वात्रि
भिर्वापिनिष्केणैकेनवापुनः॥यच्चस्वशक्तितोदद्यात्पूर्ववत्स्वस्तिवाचनं॥१०॥नवित्तशाठ्यंकुर्वीतकु
र्वन्दोषमवाप्नुयात्॥अमृतंपिबतोवक्त्रात्सूर्यस्यामृतबिंदवः॥११॥निपेतुर्येतदाधोवैशालिमुद्गेक्षवः
स्मृताः॥शर्करापरतस्मात्तस्मादिक्षुसारामृतोपमा॥१२॥इष्टारवेरतःपुण्याशर्कराहव्यकव्ययोः॥शर्करा
सप्तमीचेयंवाजिमेधफलप्रदा॥१३॥सर्वदुष्टप्रशमनीपुत्रपौत्रविवर्धिनी॥यःकुर्यात्परयाभक्त्यासवैस
द्गतिमाप्नुयात्॥१४॥कल्पमेकंवसेत्स्वर्गेततोयातिपरंपदं॥इदमपिचशृणोतियःस्मरेद्वापठेतिसपा
तिसुरेश्वरस्यलोकं॥मतिमपिचददातिसोपिदेवैरमरवधूजनमालयापिपूज्यः॥१५॥॥इतिश्रीमत्स्यपुरा

णेशिवनारदसंवादेशर्करासप्तमी॥॥श्रीईश्वरउवाच॥॥अतःपरंप्रवक्ष्यामितद्वत्कमलसप्तमीं॥प
स्याःसंकीर्तनादेवतुष्यतीहदिवाकरः॥१॥वसंतामलसप्तम्यांस्नातःसनगौरसर्षपैः॥तिलपात्रेचसौवर्णं
विधायकमलंशुभं॥२॥वस्त्रयुग्मावृतंकृत्वागंधपुष्पैःसमर्चयेत्॥नमःकमलहस्तायनमस्तेविश्वधारि
णे॥३॥दिवाकरनमस्तुभ्यंप्रभाकरनमोस्तुते॥ततोविकालवेलायामुदकुंभसमन्वितं॥४॥विप्रायदद्यात्सं
पूज्यवस्त्रमाल्यविभूषणैः॥शक्त्याचकपिलांदद्यादलंकृत्यविधानतः॥५॥अहोरात्रेगतेपश्चात्सप्तम्यां
भोजयेद्द्विजान्॥यथाशक्त्याथभुंजीतविमांसंतैलवर्जितं॥अनेनविधिनाशुक्लसप्तम्यांमासिमासिवै
सर्वंसमाचरेद्भक्त्याविप्रशाठ्यविवर्जितः॥७॥व्रतांतेशयनंदद्यात्सुवर्णकमलान्वितं॥गांचदद्यात्स्व
शक्त्यातुसुवर्णाढ्यांपयस्विनीं॥८॥भाजनासनदीपादीन्दद्यादिष्टानुपस्करान्॥अनेनविधिनायस्तु
कुर्यात्कमलसप्तमीं॥९॥लक्ष्मीमनंतामभ्येतिसउलोकेमहीपते॥कल्पेकल्पेततोलोकान्सप्तगत्वाप्य
कृष्यपकु॥१०॥अप्सरोभिःपरिवृतस्ततोयातिपरांगतिं॥११॥एतद्व्रतंयःशृणुयात्समग्रंपठेच्चभक्त्याथमति
ददाति॥सोप्यत्रलक्ष्मीमचलामवाप्यगंधर्वविद्याधरलोकभाक्स्यात्॥१२॥इतिश्रीमत्स्यपुराणेमनुम
त्स्यसंवादेकमलसप्तमीव्रतं॥॥श्रीईश्वरउवाच॥॥अथातःसंप्रवक्ष्यामिसर्वपापप्रणाशनीं॥सर्वका

मप्नरोगुरुणोनाम्नामंदारसप्तमी॥१॥माघस्यामलपक्षेतुपंचम्यांलघुभुङ्नरः॥दंतकाष्ठंततःकृत्वाषष्ठीमुप
वसेद्बुधः॥२॥विप्रान्संपूजयित्वातुमंदारंप्राशयेन्निशि॥ततःप्रभातउत्थायकृत्वास्नानंपुनर्द्विजान्॥३॥
भोजयेद्शक्तितःकृत्वामंदारकुसुमाष्टकं॥सौवर्णंपुरुषंतद्वत्पद्महस्तंसुशोभनं॥४॥पद्मंकृष्णतिलैः
कृत्वाताम्रपात्रेष्टपत्रकं॥हैमंमंदारकुसुमैर्नमस्कारायेतिपूर्वतः॥५॥नमस्कारेणतद्वच्चसूर्यायेत्यनलेद
ले॥दक्षिणेतद्वदर्कायेतिपार्यमणेतिनैर्ऋते॥६॥पश्चिमेवेदधाम्नेचवायव्येचंडभानवे॥पूष्णेत्युत्तरतःपू
ज्यमानंदायेत्यतःपरं॥७॥कर्णिकायांचपुरुषंस्थाप्यसर्वात्मनेतिच॥शुक्लवस्त्रैःसमावेष्ट्यभक्ष्यैर्माल्यफ
लादिभिः॥८॥एवमभ्यर्च्यतत्सर्वंदद्याद्वेदविदेपुनः॥भुंजीततैलवणंवाग्यतःप्राङ्मुखोगृही॥९॥अ
नेनविधिनासर्वंसप्तम्यांमासिच॥कुर्यात्संवत्सरंयावद्वित्तशाठ्यविवर्जितः॥१०॥एतदेवव्रतांतेतुनि
धायकलशोपरि॥गोभिर्विभवतःसार्द्धंदातव्यंभूतिमिच्छता॥११॥नमोमंदारनाथायमंदारभवनाय
च॥त्वंरवेतारयस्वास्मानस्मात्संसारसागरात्॥१२॥अनेनविधिनायस्तुकुर्यान्मंदारसप्तमीं॥अपा
पःससुखीमर्त्यःकल्पंचदिविमोदते॥१३॥इमामघौघपटलीभीषणध्वांतदीपिकां॥गच्छन्प्रगृह्यसंसा
रससर्वांतस्खलेन्नरः॥१४॥मंदारसप्तमीमेनामीप्सितार्थफलप्रदां॥यःपठेत्शृणुयाद्वापिसर्वपापैःप्र

मुच्यते॥१५॥॥इतिश्रीमत्स्यपुराणेशिवनारदसंवादेमंदारसप्तमीव्रतं॥श्रीभगवानुवाच॥॥अथान्या
मपिवक्ष्यामिशोभनांशुभसप्तमीं॥यामुपोष्यनरोरोगान्प्राप्यदुःखात्प्रमुच्यते॥१॥पुण्येचाश्वयुजेमासि
कृतस्नानजपःशुचिः॥वाचयित्वाततोविप्रानारभेच्छुभसप्तमीं॥२॥कपिलांपूजयेद्भक्त्यागंधमाल्यानुले
पनैः॥नमामिसूर्यसंभूतामशेषभुवनालयां॥३॥त्वामहंशुभकल्याणशरीरांसर्वसिद्धये॥अथकृत्वाति
लप्रस्थंताम्रपात्रेणसंयुतं॥४॥कांचनंवृषभंतद्वद्वस्त्रमाल्यगुडान्वितं॥फलैर्नानाविधैर्भक्ष्याघृतपा
यससंयुतैः॥५॥दद्याद्विकालवेलायामर्यमाप्रीयतामिति॥पंचगव्यंतुसंप्राश्यस्वपेद्भूमावमत्सरः॥६॥
ततःप्रभातेसंजातेभक्त्यासंतर्पयेद्द्विजान्॥अनेनविधिनादद्यान्मासिमासिसदानरः॥७॥वाससीवृष
भंहैमंतद्वद्गोचर्मभवेत्॥संवत्सरांतेशयनमिक्षुदंडगुणान्वितं॥८॥सोपधानकविश्रामंभाजनासन
संयुतं॥ताम्रपात्रेतिलप्रस्थंसौवर्णंवृषभंतथा॥९॥दद्याद्वेदविदेसर्वंविश्वात्माप्रीयतामिति॥अनेनविधि
नाविद्वान्कुर्याद्यःशुभसप्तमीं॥१०॥तस्यश्रीर्विपुलाकीर्तिर्भवेज्जन्मनिजन्मनि॥अप्सरोगणगंधर्वैःपू
ज्यमानःसुरालये॥११॥वसेत्गणाधिपोभूत्वायावदाहूतसंप्लवं॥कल्पादावभवत्पूर्वंसप्तद्वीपाधिपोन
वेत्॥१२॥ब्रह्महत्यासहस्रस्यभ्रूणहत्याशतस्यच॥नाशायालमिमांपुण्यामपगतिशुभसप्तमीं॥१३॥इ

म०पु० १२२

मोपभेद्यः श्रृणुयात्सुरूत्रंपश्येत्प्रसंगात्स्वपिदीयमानं॥ सोप्यत्रसर्वाघविमुक्तदेहः आप्नोतिविद्याधरनायकत्वं॥
२४॥ यावत्समाः सप्तनरः करोतियः सप्तमींसर्वविधानयुक्तां॥ समस्तलोकाधिपतिः क्रमेणभूत्वापरंयाति
पदंमुरारेः॥२५॥॥ इतिश्रीमत्स्यपुराणेमनुमत्स्यसंवादेशुभसप्तमीव्रतं॥ मनुरुवाच॥॥ किमभीष्टवियोग
शोकसंघादलमुद्धर्तुमुपोषणंव्रतंवा॥ विभवोद्भवकारिभूतलेस्मिन्भवभंगेतरपिसूदनंचपुंसः॥१॥ श्री
मत्स्यउवाच॥॥ परिपृष्टमिदंजगत्प्रियंतेविबुधानामपिदुर्लभंमहत्त्वात्॥ तवभक्तिमतस्तथापिवक्ष्येव्रत
मिंद्रासुरमानवेषुगुह्यं॥२॥ पुण्यमाश्वयुजेमासिविशोकद्वादशीव्रतं॥ दशम्यांलघुभुग्विद्वानारभेन्नि
यमेनतु॥३॥ उदङ्मुखःप्राङ्मुखोवादंतधावनपूर्वकं॥ एकादश्यांनिराहारःसमभ्यर्च्यतुकेशवं॥४॥
श्रियंचाभ्यर्च्यविधिवत्भोक्ष्यामित्यपरेहनि॥ एवंनियमकृत्सुप्त्वाप्रातरुत्थायमानवः॥५॥ स्नानंस
र्वौषधैः कुर्यात्पंचगव्यजलेनतु॥ शुक्लमाल्यांबरस्तद्वत्पूजयेच्छ्रीशमुत्पलैः॥६॥ विशोकायप
नमः पादौजंघेचवरदायवै॥ श्रीशायपूजाजानुनीतद्वदूरूचजलशायिने॥७॥ कंदर्पायनमोगुह्यं
माधवायनमःकटिं॥ दामोदरायेत्युदरंपार्श्वेचविपुलायवै॥८॥ नाभिंचपद्मनाभायहृदयंमधुहा
यवै॥ श्रीरामायविभोर्वक्षः करौमधुजितेनमः॥९॥ चक्रिणेवामबाहुंतुदक्षिणेगदिनेनमः॥ वैकुंठा

राम १२२

यनमः कंठंमास्यंयज्ञमुखायवै॥१०॥ नासामशोकनिधयेवासुदेवायचक्रिणे॥ ललाटंवामनायेति
किरीटंविश्वरूपिणे॥११॥ नमः सर्वात्मनेतद्वच्छिरइत्यभिपूजयेत्॥ एवंसंपूज्यगोविंदंफलैरर्घ्यानुलेपनैः॥
१२॥ ततस्तुमंडपंकृत्वास्थंडिलंकारयेन्मृदा॥ चतुरस्रंसमंताच्चरत्निमात्रमुदक्प्लवं॥१३॥ श्लक्ष्णंहृद्यंचपरि
तोवप्रत्रयसमावृतं॥ अंगुलेनोच्छ्रितावप्रास्तद्विस्तारस्तुद्व्यंगुलः॥१४॥ स्थंडिलस्योपरिष्टाच्चभित्तिरष्टांगु
लाभवेत्॥ नदीवालुकयासूर्पेलक्ष्म्याः प्रतिकृतिंन्यसेत्॥१५॥ स्थंडिलेसूर्पमारोप्यलक्ष्मीमित्यर्चयेन्न
प॥ नमोदेव्यैनमःशांत्यैनमोलक्ष्म्यैनमःश्रियै॥१६॥ नमःपुष्ट्यैनमस्तुष्ट्यैवृष्ट्यैनमोनमः॥ विशोकादुःख
नाशायविशोकावरदास्तुमे॥१७॥ विशोकास्तुसंततयेविशोकासर्वसिद्धये॥ ततःशुक्लांबरैः सूर्पंवेष्ट्य
संपूजयेत्फलैः॥१८॥ वस्त्रैर्नानाविधैस्तद्वत्सुवर्णकमलेनच॥ रजनीषुचसर्वासुपिबेद्दर्भोदकंबुधः॥ हृष्टो
१९॥ ततस्तुगीतनृत्यादिकारयेत्सकलांनिशां॥ यामत्रयेव्यतीतेचसुप्त्वाउत्थायमानवः॥२०॥ अभिगम्य
चविप्राणांमिथुनानितदार्चयेत्॥ शक्तितस्त्रीणिवैकंवावस्त्रमाल्यानुलेपनैः॥२१॥ शयनानिचपूज्या
निनमोस्तुजलशायिने॥ ततस्तुगीतवाद्यांतेरात्रौजागरणेकृते॥२२॥ प्रभातेचततःस्नानंकृत्वादंपत्य
मर्चयेत्॥ भोजनंचयथाशक्त्याविनशाठ्यविवर्जितः॥२३॥ उक्ताश्रुत्वापुराणानितद्दिनंचातिवाहयेत्॥

अनेनविधिनासर्वंमासिमासिसमाचरेत् ॥२४॥ व्रतांतेशयनंदद्यात्गुडधेनुसमन्वितं ॥ सोपधानकविश्रा
मंस्वास्तरावरणंशुभं ॥२५॥ यथानलक्ष्मीर्देवेशत्वांपरित्यज्यगच्छति ॥ तथासुरूपमारोग्यमशोकंचास्तु
मेसदा ॥२६॥ यथादेवेनरहितानलक्ष्मीर्जायतेक्वचित् ॥ तथाविशोकतामेस्तुभक्तिरग्र्याचकेशव ॥२७॥
मंत्रेणानेनशयनंगुडधेनुसमन्वितं ॥ शूर्पंचलक्ष्म्यासहितंदातव्यंभूतिमिच्छता ॥२८॥ उत्पलंकरवी
रंचबाणमम्लानकुंकुमं ॥ केतकीसिंदुवारंचचंपकंगंधपाटला ॥२९॥ कदंबंकुब्जकंजातीशस्ता
न्येतानिसर्वदा ॥३०॥ इतिश्रीमत्स्यपुराणेमनुमत्स्यसंवादेविशोकद्वादशीव्रतंनाम ॥ ॥ मनुरुवा
च ॥ ॥ गुडधेनुविधानंमेसमाचक्ष्वजगत्पते ॥ किंरूपंकेनमंत्रेणदातव्यंतदिहोच्यते ॥१॥ श्रीमत्स्यउ
वाच ॥ ॥ गुडधेनुविधानस्ययद्रूपमिहयत्फलं ॥ तदिदानींप्रवक्ष्यामिसर्वपापविनाशनं ॥२॥ कृष्णाजि
नंचतुर्हस्तंप्राग्ग्रीवंविन्यसेद्भुवि ॥ गोमयेनानुलिप्तेतुदर्भानास्तीर्यसर्वतः ॥३॥ लघ्वेणकाजिनंत
द्वत्वत्सस्यपरिकल्पयेत् ॥ प्राङ्मुखींकल्पयेद्धेनुमुदक्पादांसवत्सकां ॥४॥ उत्तमागुडधेनुःस्यात्सदाभा
रचतुष्टया ॥ वत्सभारेणकुर्वीतभाराभ्यांमध्यमास्मृता ॥५॥ अर्धभारेणवत्सःस्यात्कनिष्ठाभारकेणच ।
चतुर्थांशेनवत्सःस्याद्गृहवित्तानुसारतः ॥६॥ धेनुवत्सौकृतावेतौसितसूक्ष्मांबरावृतौ ॥ शुक्तिकर्णाविक्षु

पादौशुचिमुक्ताफलेक्षणौ ॥७॥ सितसूत्रशिराजालौसितकंबलकंबलौ ॥ ताम्रगडुकपृष्ठौतुसितचाम
ररोमजौ ॥८॥ विद्रुमभ्रूयुगोपेतौनवनीतस्तनावुभौ ॥ क्षौमपुच्छौकांस्यदोहाविंद्रनीलकतारकौ ॥९॥
सुवर्णशृंगाभरणौराजतखुरसंयुतौ ॥ नानाफलसमायुक्तौघ्राणगंधकरंडकौ ॥१०॥ इत्येवंरचयि
त्वातौधूपदीपैरथार्चयेत् ॥ यालक्ष्मीःसर्वभूतानांयाचदेवेष्ववस्थिता ॥११॥ धेनुरूपेणसादेवीममशां
तिंप्रयच्छतु ॥ देहस्थायाचरुद्राणीशंकरस्यचयाप्रिया ॥१२॥ धेनुरूपेणसादेवीममशांतिंप्रयच्छतु ॥
विष्णोर्वक्षसियालक्ष्मीःस्वाहायाचविभावसोः ॥१३॥ चंद्रार्कशक्रताराणामनुरूपाचयाश्रिया ॥ च
तुर्मुखस्ययालक्ष्मीर्लक्ष्मीर्धनदस्यच ॥१४॥ लक्ष्मीर्यालोकपालानांसाधेनुर्वरदास्तुमे ॥ स्वधायापि
तृमुख्यानांस्वाहायज्ञभुजांतथा ॥१५॥ धेनुरूपेणसादेवीममपापंव्यपोहतु ॥ सर्वपापहरादेवितस्मा
च्छांतिंप्रयच्छमे ॥१६॥ एवमामंत्रितांधेनुंब्राह्मणायनिवेदयेत् ॥ विधानमेतद्धेनूनांसर्वासामपिपठ्यते ।
१७॥ यास्ताःपापविनाशाय्यःपठ्यंतेनवधेनवः ॥ तासांस्वरूपंवक्ष्यामिनामानिचनराधिप ॥१८॥ प्रथमा
गुडधेनुःस्यात्घृतधेनुस्तथापरा ॥ तिलधेनुस्तृतीयाचचतुर्थीजलसंज्ञिता ॥१९॥ क्षीरधेनुश्चविख्या
तामधुधेनुस्तथापरा ॥ सप्तमीशर्कराधेनुर्दधिधेनुस्तथाष्टमी ॥२०॥ रत्नधेनुश्चनवमीदशमीस्यात्स्वरूपतः ॥

म०पु०
१२४

कुंभाः स्युर्गुडधेनूनां स्तराशोनुराशयः ॥२१॥ सुवर्णधेनुमप्यत्र केचिदिच्छंति मानवाः ॥ नवनीतेन रत्नैश्च
तथान्येतु महर्षयः ॥२२॥ एतदेव विधानं स्यात्त एवोपस्कराः स्मृताः ॥ मंत्रावाहनसंयुक्ताः सदापर्वणि
पर्वणि ॥२३॥ यथाश्रद्धा प्रदातव्या भुक्तिमुक्तिफलप्रदः ॥ गुडधेनुप्रसंगेन सर्वास्तावन्मयोदिताः ॥२४
अनेन यत्नफलदाः सर्वपापहराः शुभाः ॥ व्रतानामुत्तमं यस्माद्विशोकद्वादशीव्रतं ॥२५॥ तदंगत्वेन चै
वात्र गुडधेनुः प्रशस्यते ॥ अयनेषु च पुण्येषु व्यतीपाते यथा पुनः ॥२६॥ गुडधेन्वादयो देयाः स्वर्गोपरागपर्व
सु ॥ विशोकद्वादशी चैषा पुण्या पापहरा शुभा ॥२७॥ यामुपोष्य नरो याति तद्विष्णोः परमं पदं ॥ इहलोके
च सौभाग्यमायुरारोग्यमेव च ॥२८॥ वैष्णवं पदमाप्नोति मरणे संस्मरन्हरिं ॥ नवार्बुदसहस्राणि दश
चाष्टौ च धर्मवित् ॥२९॥ न शोकदुःखदौर्गत्यं तस्य संजायते नृप ॥ नारी वा कुरुते या तु विशोकद्वादशी
व्रतं ॥३०॥ नृत्यगीतपरा नित्यं सापि तत्फलमाप्नुयात् ॥ तस्मादग्रे हरिर्नित्यमनंतसंगीतं च वादनं ॥३१॥ क
र्त्तव्यं भूतिकामेन भक्त्या तु परया नृप ॥३२॥ इति पठति य इत्थं यः शृणोतीह सम्यग्मधुमुरनरकारेरर्चनं
यश्च पश्येत् ॥ मतिमपि च जनानां यो ददातीह लोके वसति स विबुधैः पूज्यते कल्पमेकं ॥३३॥ ॥ इति श्री
मत्स्यपुराणे मनुमत्स्यसंवादे गुडधेनुविधानं नाम ॥ ॥ नारद उवाच ॥ ॥ भगवन्श्रोतुमिच्छामि दानमा

राम०
१२४

हात्म्यमुत्तमं ॥ यदक्षयं परे लोके देवर्षिगणपूजितं ॥१॥ उमापतिरुवाच ॥ ॥ मेरोः प्रदानं वक्ष्यामि दशधा
मुनिपुंगव ॥ यत्प्रदानान्नरो लोकानाप्नोति सुरपूजितान् ॥२॥ पुराणेषु च वेदेषु यज्ञेष्वायतनेषु च ॥ न
तत्फलमधीतेषु कृतेष्विह यदश्नुते ॥३॥ तस्माद्विधानं वक्ष्यामि पर्वतानामनुक्रमात् ॥ प्रथमो धान्यशैलः
स्यात् द्वितीयो लवणाचलः ॥४॥ गुडाचलस्तृतीयस्तु चतुर्थो हेमपर्वतः ॥ पंचमस्तिलशैलः स्यात्ष
ष्ठः कर्पासपर्वतः ॥५॥ सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः ॥ राजतो नवमस्तद्वद्दशमः शर्कराचलः ॥
६॥ वक्ष्ये विधानमेतेषां यथावदनुपूर्वशः ॥ अयने विषुवे पुण्ये व्यतीपाते दिनक्षये ॥७॥ शुक्लपक्षे तृती
यायामुपरागे शशिक्षये ॥ विवाहोत्सवयज्ञेषु द्वादश्यामथवा पुनः ॥८॥ शुक्लायां पंचदश्यां वा पुण्य
र्क्षे वा विधानतः ॥ धान्यशैलादयो देया यथाशास्त्रं विधानतः ॥९॥ गोमयेनानुलिप्तायां भूमावास्तीर्य वा कु
शान् ॥ तन्मध्ये पर्वतं कुर्याद्विष्कंभपर्वतान्वितं ॥१०॥ धान्यद्रोणसहस्रेण भवेद्गिरिरिहोत्तमः ॥ पंचशतैर्म
ध्यमः स्यात्कनिष्ठः स्यात्त्रिभिः शतैः ॥११॥ मेरुर्महाव्रीहिमयस्तु मध्ये सुवर्णवृक्षत्रयसंयुतः स्यात् ॥ पूर्वेण मु
क्ताफलवज्रयुक्तो याम्येन गोमेदकपुष्परागैः ॥१२॥ पश्चाच्च गारुत्मतनीलरत्नैः सौम्येन वैडूर्यसरोजरागैः ॥
श्रीखंडखंडैरभितः प्रवालैर्लतान्वितः शुक्तिशिलातलः स्यात् ॥१३॥ ब्रह्माथ विष्णुर्भगवान्मुरारिर्दिवाकरो

म०पु०
१८०
२२५

प्यच्च हिरण्मयः स्यात् ॥ मूर्धन्यवस्थानममत्सरेण कार्यं त्वनेकश्च पुनर्द्विजाद्यैः ॥१४॥ चत्वारि शृंगाणि च राजतानि
नितंबभागेषु पिराजतः स्यात् ॥ तथेक्षुवंशाहृतकंदरस्तु घृतोदकः प्रस्रवणश्च दिक्षु ॥१५॥ शुक्लांबराद्यं
बुधरावली एपास्तूर्वेत्तापीतानि च दक्षिणेन ॥ वासांसि पश्चादथ कर्बुराणि रक्तानि चैवोत्तरतोयदाली ॥१६॥
रूप्यान्महेंद्रप्रमुखांस्तथाष्टौ संस्थाप्य लोकाधिपतीन् क्रमेण ॥ नानाफलालीव समंततः स्यान्मनोरमा
माल्यविलेपने च ॥१७॥ वितानमस्योपरि पंचवर्णमम्लानपुष्पाभरणं सितं च ॥ इत्थं निवेश्यामलशैलमग्र्य
मेरोः सुविष्कंभगिरीन् क्रमेण ॥१८॥ तुरीयभागेन चतुर्दिशं च संस्थापयेत्पुष्पविलेपनाद्यान् ॥ पूर्वेण
मंदरमनेकफलैश्च युक्तं युक्तं गणैः कनकरूपकदंबचिह्नं ॥१९॥ कामेन कांचनमयेन विराजमानं कारये
कुसुमवस्त्रविलेपनाढ्यं ॥ क्षीरारुणोदसरसाप्यवनेन चैवं रूप्येण शक्लघटितेन विराजमानं ॥२०॥ सौ
म्येन गंधमदनोत्र निवेशनीयो गोधूमसंचयमयः कलधौतजंबूः ॥ हैमेन यक्षपतिना घृतमानसेन वस्त्रै
श्च राजतवनेन च संयुतः स्यात् ॥२१॥ तस्मात् त्रिलाचलमनेकसुगंधपुष्पे सौवर्णपिप्पलहिरण्मयहंस
युक्तं ॥ आकारयेद्रजतपुष्पवनेन तद्वद्वस्त्रान्वितं दधिसितोदसरस्तथाग्रे ॥२२॥ संस्थाप्य तं विपुलशैल
मथोत्तरेण शैलं सुपार्श्वमपि कांस्यमयं सुवस्त्रं ॥ पुष्पैश्च हेमवटपादपशेखरं तमाकारयेत्कनकधे

राम·
२२५

नुविराजमानं ॥२३॥ माक्षीकभद्रसरसा च वनेन तद्वद्रूप्येण भास्करवितानयुतं विधाय ॥ होमश्चतुर्भिरथ वे
दपुराणविद्भिर्दांतैरनिंद्यचरिताकृतिभिर्द्विजेंद्रैः ॥२४॥ पूर्वेण हस्तमितमत्र विधाय कुंडं कार्यस्तिलैर्य
वघृतेन समित्कुशैश्च ॥ रात्रौ च जागरमनुद्धतगीततूर्यैरावाहनं च कथयामि शिलोच्चयानां ॥२५॥ त्वं स
र्वदेवगणधामनिधे विरुद्धमस्मद्गृहेष्वमरपर्वत नाशयाशु ॥ क्षेमं विधत्स्व कुरु शांतिमनुत्तमां च
संपूजितः परमभक्तिमता मया हि ॥२६॥ त्वमेव भगवानीशो ब्रह्मा विष्णुर्दिवाकरः ॥ मूर्तामूर्त
मयं बीजमतः पाहि सनातन ॥२७॥ यस्मात्त्वं लोकपालानां विश्वमूर्तेश्च मंदिरं ॥ रुद्रादित्यवसू
नां तस्माच्छांतिं प्रयच्छ मे ॥२८॥ यस्मादशून्यममरैर्नारीभिश्च शिरस्तव ॥ तस्मान्मामुद्धराशेषदुःखसंसार
सागरात् ॥२९॥ एवमभ्यर्च्य तं मेरुं मंदरं चापि पूजयेत् ॥ यस्माच्चैत्ररथेन त्वं भद्राश्ववर्षेण च ॥३०॥ शोभ
से मंदर क्षिप्रमतस्तुष्टिकरो भव ॥ यस्माच्चूडामणिर्जंबूद्वीपे त्वं गंधमादन ॥३१॥ गंधर्ववनशोभावान
तः कीर्तिर्दृढास्तु मे ॥ यस्मात्त्वं केतुमालेन वैभ्राजेन वनेन च ॥३२॥ हिरण्मयश्वशिखरस्तस्मात्पुष्टिर्दृढा
स्तु मे ॥ एवमामंत्र्य तान्सर्वान् प्रभाते विमले पुनः ॥३३॥ स्नात्वा यथा गुरवे दद्यान्मध्यमं पर्वतोत्तमं ॥ विष्कं
भपर्वतान् दद्यादृत्विग्भ्यः क्रमशो मुने ॥३४॥ गाश्च दद्याच्चतुर्विंशानो वादशाच नारद ॥ शक्तितः सप्त

चैवाष्टौ पंच दद्याद्शक्तिमान् ॥३५॥ एकां च गुरवे दद्यात्कपिलां च पयस्विनीं ॥ पर्वतानामशेषाणामेष एव
विधिः स्मृतः ॥३६॥ सा चैव पूजनं मंत्रास्त एवोपस्कराः स्मृताः ॥ ग्रहाणां लोकपालानां ब्रह्मादीनां च
सर्वदा ॥३७॥ स्वमंत्रेणैव सर्वेषु होमः शैलेषु पठ्यते ॥ उपवासी भवेन्नित्यमशक्तौ नक्तमिष्यते ॥३८
विधानं सर्वशैलानां क्रमशः शृणु नारद ॥ दानकालेषु ये मंत्राः पर्वतेषु च यत्फलं ॥३९॥ अन्नं ब्रह्म यतः
प्रोक्तमन्ने प्राणाः प्रकीर्तिताः ॥ अन्नाद्भवंति भूतानि जगदन्नेन वर्तते ॥४०॥ अन्नमेव यतो लक्ष्मीरन्नमे
व जनार्दनः ॥ धान्यपर्वतरूपेण पाहि तस्मान्नगोत्तम ॥४१॥ अनेन विधिना यस्तु दद्याद्धान्यमयं गि
रिं ॥ मन्वंतरशतं साग्रं देवलोके महीयते ॥४२॥ अप्सरोगणगंधर्वैराकीर्णेन विराजते ॥ विमानेन दि
वः पृष्ठे आपतेत्ऋषिसेवितं ॥ कर्मक्षये राजराज्यमाप्नोतीह न संशयः ॥४३॥ ॥ इति श्रीमत्स्यपुराणे म
नुमत्स्यसंवादे धान्यपर्वतमाहात्म्यं ॥ ॥ ईश्वर उवाच ॥ ॥ अथातः संप्रवक्ष्यामि लवणाचलमुत्तमं ॥ यत्प्र
दानान्नरो लोकानाप्नोति शिवसंयुतान् ॥१॥ उत्तमः षोडशद्रोणः कर्तव्यो लवणाचलः ॥ मध्यमः स्यात्त
दर्द्धेन चतुर्भिरधमः स्मृतः ॥२॥ वित्तहीनो यथाशक्त्या द्रोणादूर्ध्वं तु कारयेत् ॥ चतुर्थांशेन विष्कंभपर्व
तान्कारयेत्पृथक् ॥३॥ विधानं पूर्ववत्कुर्याद्ब्रह्मादीनां च सर्वदा ॥ तद्वद्धेममयान्सर्वान्लोकपाला

न्निवेशयेत् ॥४॥ सरांसि कामदेवादीन्तद्वदत्रापि कारयेत् ॥ कुर्याज्जागरणं चापि दानमंत्रान्निबोधत ॥
५॥ सौभाग्यरससंभूतो यतोयं लवणो रसः ॥ तद्दानकर्तृकत्वेन त्वं मां पाहि नगोत्तम ॥६॥ यस्मादन्नरसाः
सर्वे नोत्कटा लवणं विना ॥ प्रियं च शिवयोर्नित्यं तस्माच्छांतिं प्रयच्छ मे ॥७॥ विष्णुदेहसमुद्भूत यस्मादारोग्य
वर्द्धन ॥ तस्मात्पर्वतरूपेण पाहि संसारसागरात् ॥८॥ अनेन विधिना यस्तु दद्याल्लवणपर्वतं ॥ उमालो
के वसेत्कल्पं ततो याति परां गतिं ॥९॥ ॥ इति श्रीमत्स्यपुराणे मनुमत्स्यसंवादे लवणाचलदानं ॥ ॥ श्री
ईश्वर उवाच ॥ ॥ अतः परं प्रवक्ष्यामि गुडपर्वतमुत्तमं ॥ यत्प्रदानान्नरः स्वर्गमाप्नोति सुरपूजितं ॥१॥
उत्तमो दशभिर्भारैर्मध्यमः पंचभिर्मतः ॥ त्रिभिर्भारैः कनिष्ठः स्यात्तदर्द्धेनाल्पवित्तवान् ॥२॥ तद्वदामंत्र
णं पूजां हेमवृक्षसुरार्चनं ॥ विष्कंभपर्वतांस्तद्वत्सरांसि वनदेवताः ॥३॥ होमं जागरणं तद्वल्लोकपालाधिवा
सनं ॥ धान्यपर्वतवत्कुर्यादिमं मंत्रमुदीरयेत् ॥४॥ यथा देवेषु विश्वात्मा प्रवरोयं जनार्दनः ॥ सामवेदस्तु वेदा
नां महादेवस्तु योगिनां ॥५॥ प्रणवः सर्वमंत्राणां नारीणां पार्वती तथा ॥ तथा रसानां प्रवरः सदैवेक्षुरसो म
तः ॥६॥ मम तस्मात्परां लक्ष्मीं गुडपर्वत देहि वै ॥ यस्मात्सौभाग्यदायिन्या भ्राता त्वं गुडपर्वत ॥७॥ निवासश्चा
पि पार्वत्यास्तस्माच्छांतिं प्रयच्छ मे ॥ अनेन विधिना यस्तु दद्याद्गुडमयं गिरिं ॥८॥ पूज्यमानः सगंधर्वैर्गौरीलो

केमहीयते॥ ततः कल्पशतांते तु सप्तद्वीपाधिपो भवेत्॥ आयुरारोग्यसंपन्नः शत्रुभिश्चापराजितः॥९॥
इति श्रीमत्स्यपुराणे मनुमत्स्यसंवादे गुडपर्वतदानमाहात्म्यं॥ ॥श्रीईश्वर उवाच॥ ॥अथ पापहरं वक्ष्ये सु
वर्णाचलमुत्तमं॥ यस्य प्रसादाद्भवनं वैरंच्यमपि तिमानवः॥१॥ उत्तमः पलसाहस्रो मध्यमः पंचभिः शतैः॥
तदर्द्धेनाधमस्तद्वदल्पवित्तोपि शक्तितः॥२॥ दद्यादेकपलादूर्ध्वं यथाशक्त्यापि विमत्सरः॥ धान्यपर्वतवत्सर्वं
विदध्यान्मुनिपुंगव॥३॥ विष्कंभशैलांस्तद्वच्च ऋत्विग्भ्यः प्रतिपादयेत्॥ नमस्ते ब्रह्मबीजाय ब्रह्मगर्भा
यते नमः॥४॥ यस्मादनंतफलदस्तस्मात्पाहि शिलोच्चय॥ यस्मादग्नेरपत्यं त्वं यस्मात्पुण्यं जगत्पते॥५॥
हेमपर्वतरूपेण तस्मात्पाहि नगोत्तम॥ अनेन विधिना यस्तु दद्यात्कनकपर्वतं॥६॥ स याति परमं ब्रह्मलो
कमानंदकारकं॥ तत्र कल्पशतं तिष्ठेत्ततो याति परं पदं॥७॥ ॥इति श्रीमत्स्यपुराणे मनुमत्स्यसंवादे क
नकपर्वतमाहात्म्यं॥ ॥ईश्वर उवाच॥ ॥अतः परं प्रवक्ष्यामि तिलशैलविधानतः॥ यत्प्रदानान्नरो या
ति विष्णुलोकमनुत्तमं॥१॥ उत्तमो दशभिर्द्रोणैर्मध्यमः पंचभिर्मतः॥ त्रिभिः कनिष्ठो विप्रेंद्र तिलशैलः
प्रकीर्तितः॥२॥ पूर्ववच्चापरान्सर्वान्विष्कंभानभितो गिरिं॥ दानमंत्रान्प्रवक्ष्यामि यथावन्मुनिपुंगव॥ राम॰
३॥ यस्मान्मधुवधे विष्णोर्देहस्वेदसमुद्भवाः॥ तिलाः कुशाश्च माषाश्च तस्माच्छं नो भवत्विह॥४॥ हव्ये क १२७

व्ये च यस्माच्च तिला एवेभिरक्षणात्॥ भव उद्धर शैलेंद्र तिलाचल नमोस्तु ते॥५॥ इत्यामंत्र्य च यो दद्यात्तिलाच
लमनुत्तमं॥ स वैष्णवं पदं याति पुनरावृत्तिदुर्लभं॥६॥ दीर्घायुष्ट्वं समाप्नोति पुत्रपौत्रैश्च वर्द्धते॥ पितृभि
र्देवगंधर्वैः पूज्यमानो दिवं व्रजेत्॥७॥ ॥इति श्रीमत्स्यपुराणे तिलपर्वतमाहात्म्यं॥ ॥ईश्वर उवाच॥ ॥
कर्पासपर्वतस्तद्वद्विंशद्भारैरिहोत्तमः॥ दशभिर्मध्यमः प्रोक्तः पंचभिस्त्वधमः स्मृतः॥१॥ भारेणाल्पधनो द
द्याद्वित्तशाठ्यविवर्जितः॥ धान्यपर्वतवत्सर्वमासाद्य मुनिसत्तम॥२॥ प्रभातायां तु शर्वर्यां दद्यादिदमुदी
रयेत्॥ त्वमेवावरणं यस्माल्लोकानामिह सर्वदा॥३॥ कर्पासाद्रे नमस्तुभ्यमघौघध्वंसनो भव॥ इति कर्पा
सशैलेंद्रं यो दद्याच्छर्वसन्निधौ॥४॥ रुद्रलोके वसेत्कल्पं ततो राजा भवेदिह॥५॥ ॥इति श्रीमत्स्यपुराणे
कर्पासाद्रिमाहात्म्यं॥ ॥ईश्वर उवाच॥ ॥अतः परं प्रवक्ष्यामि घृताचलमनुत्तमं॥ तेजोमृतमयं दिव्यं महापा
तकनाशनं॥१॥ विंशत्या घृतकुंभानामुत्तमः स्याद्घृताचलः॥ दशभिर्मध्यमः प्रोक्तः पंचभिस्त्वधमः
स्मृतः॥२॥ अल्पवित्तोपि यः कुर्यात्द्वाभ्यामिह विधानतः॥ विष्कंभपर्वतांस्तद्वच्चतुर्भागेन कल्पयेत्॥३॥
तो शालितंडुलपात्राणि घटोपरि निवेशयेत्॥ कारयेत्संहतानुच्चान्यथाशोभं विधानतः॥४॥ वेष्टयेत् शुक्ल
वासोभिरिक्षुदंडफलादिकैः॥ धान्यपर्वतवत्सर्वं विधानमिह पठ्यते॥५॥ अधिवासनपूर्वं च तद्धोमं सु

म॰पु॰ १२८

राचनं॥प्रभातायां तु तत्सर्वं गुरवे तन्निवेदयेत्॥६॥विष्कंभपर्वतास्तद्वदृतिष्य:शांतमानसः॥संयोगात्
मुत्पन्नं यस्मादमृततेजसः॥७॥तस्मात्घृतार्चिर्विश्वात्मा प्रीयतामत्र शंकरः॥तस्मात्तेजोमयं ब्रह्म घृतं
तदृच्यवस्थितं॥८॥घृतं तपर्वतरूपेण तस्मात्त्वं पाहि नोतिशं॥अनेन विधिना दद्यात् घृताचलमनुत्त
मं॥९॥महापातकयुक्तोपि लोकमाप्नोति शांकरं॥हंससारसयुक्तेन किंकिणीजालमालिना॥१०॥
विमानेनाप्सरोभिश्च सिद्धविद्याधरैर्वृतः॥विहरेत्पितृभिः सार्द्धं यावदाभूतसंप्लवं॥११॥ ॥इतिश्रीम
त्स्यपुराणे घृताचलमाहात्म्यं॥ ॥ईश्वर उवाच॥ ॥अतः परं प्रवक्ष्यामि रत्नाचलमनुत्तमं॥मुक्ताफल
सहस्रेण पर्वतः स्यादनुत्तमः॥१॥मध्यमः पंचशतिकस्त्रिशतेनाधमः स्मृतः॥चतुर्थांशेन विष्कंभ
पर्वताः स्युस्समंततः॥२॥पूर्वेण वज्रगोमेदैर्दक्षिणेनेंद्रनीलकैः॥पद्मरागयुतः कार्यो विद्भिर्गंधमा
दनः॥३॥वैडूर्यविद्रुमैः पश्चात्संमिश्रो विपुलाचलः॥पद्मरागैः ससौपर्णैरुत्तरेणापि विन्यसेत्॥४॥धा
न्यपर्वतवत्सर्वमत्रापि परिकल्पयेत्॥तद्वदावाहनं कुर्यात् वृक्षान्देवांश्च कांचनान्॥५॥पूजयेद्गंधपु
ष्पाद्यैः प्रभाते तु गतमत्सरः॥पूर्ववद्गुरुऋत्विग्भ्यो नाममंत्रानुदीरयेत्॥६॥यथा देवगणाः सर्वे सर्वरत्ने राम
ष्ववस्थिताः॥त्वं च रत्नमयो नित्यं नमस्तेस्तु सदाचल॥७॥यस्मात्रत्नप्रदानेन तुष्टिं प्रकुरुते हरिः॥सदा १२८

नेन तुष्टिं प्रकुरुते हरिः॥सदा रत्नप्रदानेन तस्मान्नः पाहि सर्वत॥८॥अनेन विधिना यस्तु दद्याद्रत्न
मयं गिरिं॥स याति विष्णुसालोक्यममरेश्वरपूजितः॥९॥यावत्कल्पशतं साग्रं वसेदिह नराधिप॥रू
पारोग्यगुणोपेतः सप्तद्वीपाधिपो भवेत्॥१०॥ब्रह्महत्यादिकं पापं यदत्रामुत्र वा कृतं॥तत्सर्वं नाश
मायाति गिरिर्वज्रहतो यथा॥११॥ ॥इति श्रीमत्स्यपुराणे रत्नाचलमाहात्म्यं॥ ॥ईश्वर उवाच॥ ॥अ
तः परं प्रवक्ष्यामि रूप्याचलमनुत्तमं॥यत्प्रदानान्नरो याति सोमलोकं द्विजोत्तम॥१॥दशभिः पलस
हस्रैरुत्तमो रजताचलः॥पंचभिर्मध्यमः प्रोक्तस्तदर्द्धेनाधमः स्मृतः॥२॥अशक्तो विंशतेरूर्ध्वं कारये
च्छक्तितः सदा॥विष्कंभपर्वतांस्तद्वत्तुर्यांशेन कल्पयेत्॥३॥पूर्ववद्राजतान्कुर्यान्मंदरादीन्विधान
तः॥कलधौतमयांस्तद्वल्लोकेशान्नर्चयेद्बुधः॥४॥ब्रह्मविष्ण्वर्कवान्कार्यो नितंबोत्र हिरण्मयः॥राजतं
स्यात्तदन्येषां पर्वतानां तु कांचनं॥५॥शेषं तु पूर्ववत्कुर्याद्धोमयागगणादिकं॥दद्यात्ततः प्रभाते तु गुर
वे रूप्यपर्वतं॥६॥विष्कंभशैलान्त्विग्भ्यः पूज्या वस्त्रविभूषणैः॥इमं मंत्रं पठन्दद्याद्दर्भपाणिर्विमत्सरः॥
७॥पितृणां वल्लभो यस्माद्धरीन्द्राणां शिवस्य च॥पाहि राजत तस्मात्त्वं शोकसंसारसागरात्॥८॥इत्थं नि
वेश्य यो दद्याद्रजताचलमुत्तमं॥गवामयुतसाहस्रं फलं प्राप्नोति मानवः॥९॥सोमलोके स गंधर्वैः किंनराप्स
म

रसंगणैः॥पूज्यमानोवसेद्दिव्यान्यावदाहूतसंप्लवं॥१०॥ ॥इतिश्रीमत्स्यपुराणेरजताचलमाहात्म्यंना
म॥ ॥श्रीईश्वरउवाच॥ ॥अथातःसंप्रवक्ष्यामिशर्कराचलमुत्तमं॥यस्यप्रदानाद्विष्णुरुद्रास्तुष्यंतिस
र्वदा॥१॥अष्टभिःशर्कराभारैरुत्तमःस्यान्महाचलः॥चतुर्भिर्मध्यमःप्रोक्तोभाराभ्यामधमःस्मृतः॥२॥
एतद्वृक्षत्रयंमूर्ध्निसर्वेष्वपिनियोजयेत॥हरिचंदनसंतानौपूर्वपश्चिमभागयोः॥३॥निवेश्यास्सर्वशै
लेषुविशेषाच्छर्कराचले॥मंदरेकामदेवस्तुप्रत्यग्वक्त्रःसदाभवेत्॥४॥गंधमादनशृंगेतुधनदः
स्यादुदङ्मुखः॥प्राङ्मुखोवेदमूर्तिस्तुहंसःस्याद्विपुलाचले॥५॥हैमीसुपार्श्वेसुरभीदक्षिणाभिमु
खीभवेत्॥धान्यपर्वतवत्सर्वमावाहनविधानकं॥६॥कृत्वातुगुरवेदद्यान्मध्यमेपर्वतोत्तमं॥ऋत्वि
ग्भ्यश्चतुरःशैलानिमान्मंत्रानुदीरयेत॥७॥सौभाग्यामृतसारोयंपर्वतःशर्करायुतः॥तस्मादानंद
कारीत्वंभवशैलेंद्रसर्वदा॥८॥अमृतंपिबतांयेतुनिपेतुर्भुविशीकराः॥देवानांतत्समुत्थोयंपाहिनः
शर्कराचल॥९॥मनोभवधनुर्मध्यादुद्भूतःशर्कराचलः॥तन्मयोसिमहाशैलपाहिसंसारसागरात्॥
१०॥योदद्याच्छर्कराशैलमनेनविधिनानरः॥सर्वपापविनिर्मुक्तःप्रयातिशिवमंदिरं॥११॥चंद्रतारार्क
संकाशमधिरुह्यानुजीविभिः॥सहैवयानमातिष्ठेत्तंतुविष्णुप्रचोदितः॥१२॥ततःकल्पशतांतेतुसप्तद्वी

पाधिपोभवेत्॥आयुरारोग्यसंपन्नोयावज्जन्मार्बुदत्रयं॥१३॥भोजनंशक्तितःकुर्यात्सर्वशैलेष्वमत्सरः॥स
र्वत्रक्षारलवणमश्नीयात्तदनुज्ञया॥१४॥पर्वतोपस्करान्सर्वान्प्रापयेद्ब्राह्मणालयं॥आसीत्पुराबृहत्क
ल्पेधर्ममूर्तिर्जनाधिपः॥१५॥सुहृच्छक्रस्यनिहतायेनदैत्याःसहस्रशः॥सोमसूर्यादयोयस्यतेजसावि
गतप्रभाः॥१६॥भवंतिशतशोयेनशत्रवश्चपराजिताः॥यथेच्छारूपधारीचमनुष्येष्वपराजितः॥१७॥तस्य
भानुमतीनामभार्यात्रैलोक्यसुंदरी॥दशनारीसहस्राणांमध्येश्रीरिवराजते॥१८॥नृपकोटिसहस्रेण
नकदाचित्तुमुच्यते॥कदाचिदास्थानगतःपप्रच्छसपुरोधसं॥१९॥विस्मयेनाहृतोराजावसिष्ठमृषिस
त्तमं॥भगवन्केनधर्मेणममलक्ष्मीरनुत्तमा॥२०॥कस्माच्चविपुलंतेजोमच्छरीरेद्विजोत्तम॥२०॥वसिष्ठ
उवाच॥पुरालीलावतीनामवेश्याशिवपरायणा॥तयादत्तश्चतुर्दश्यांगुरवेलवणाचलः॥२१॥हेमवृ
क्षामरैःसार्द्धंयथावद्विधिपूर्वकं॥शूद्रःसुवर्णकारश्चनाम्नासौशौंडकोभवत्तदा॥२२॥भृत्योलीलावतीगेहे
तेनहैमाविनिर्मिता॥तरवःसुरमुख्याश्चश्रद्धायुक्तेनपार्थिव॥२३॥अतिरूपेणसंपन्नाघटित्वाचविना
भृतिं॥धर्मकार्यमितिज्ञात्वानगृहीतिकपंचने॥२४॥२४॥उज्ज्वालिताश्चतत्पत्न्यासौवर्णामरपादपाः
लीलावत्यागृहेपार्श्वेपरिचार्यचपार्थिव॥२५॥कृतातास्यामनागक्षेनगुरुशुश्रूषणादिकं॥साचलीला

म॰ पु॰ वतीवेश्यापाकालेनमहतापिच॥२५॥ सर्वपापविनिर्मुक्ताजगाम शिवमंदिरं॥ योसौसुवर्णकारस्तु हरिमो
१३० प्पतिसत्ववान्॥२७॥ नमूल्यमादाद्वेश्यातः सत्वपानिहसाम्प्रतं॥ सप्तद्वीपपतिर्जातः सूर्यायुतसमप्र
भः॥२८॥ यार्पासुवर्णकारस्यतरवोहेमनिर्मिता॥ सम्यगुज्ज्वालितावेश्यासेयंजातानुमतीतव॥२९॥
उज्ज्वालनादुज्ज्वलरूपमस्याः संजातमस्मिन्भुवनाधिपत्यं॥ यस्मात्कृतंतत्परिकलितानैरनुवृत्ता
न्यालवणाचलस्य॥३०॥ तस्माद्बलोकेष्वपराजितेत्वमारोग्यसौभाग्ययुताचलक्ष्मीः॥ तस्मात्त्वमप्यत्र
विधानपूर्वंधान्याचलादीन्दशधाकुरुष्व॥३१॥ तथेतिसत्कृत्यसधर्ममूर्तिर्वचोवसिष्ठस्यददौचस
लो र्वं॥ धान्याचलादीन्नगतश्चमुरारेर्लोकंजगामामरपूज्यनाथ॥३२॥ पठेद्यइदिमानात्मधनोविभक्त्या मा
स्मरेत्समनुष्येरपिदीयमानान्॥ शृणोतिभक्त्याप्यमतिंददातिविकल्मषः सोपिदिवंप्रयाति॥३३॥ दुःस्व
प्नंप्रशममुपैतिपठ्यमानैः शैलेंद्रैर्भवभयभेदनैर्मनुष्यः॥ यः कुर्यात्किलमुनिपुंगवेहसम्यक्शं
तात्मासकलगिरींद्रसंप्रदानं॥३४॥ इतिश्रीमत्स्यपुराणेशिवनारदसंवादेपर्वतदानमाहात्म्यं॥
सूतउवाच॥ वैशंपायनमासीनमपृच्छच्छौनकः पुरा॥ सर्वकामाप्तयेनित्यं कथंशांतिकपौष्टिकं॥ राम
१॥ वैशंपायनउवाच॥ श्रीकामःशांतिकामोवाग्रहयज्ञंसमारभेत॥ वृष्ट्यायुःपुष्टिकामोवातथैवा १३०
ष्टृ

भिचरन्पुनः॥२॥ येनब्रह्मन्विधानेनतन्मेनिगदतःशृणु॥ सर्वशास्त्राण्यनुक्रम्यसंक्षिप्यग्रंथविस्तरं॥३॥
ग्रहशांतिंप्रवक्ष्यामिपुराणश्रुतिचोदितां॥ पुण्येह्निविप्रकथितेकृत्वाब्राह्मणवाचनं॥४॥ ग्रहान्ग्रहाधिदे
वांश्चस्थाप्यहोमंसमारभेत॥ ग्रहयज्ञस्त्रिधाप्रोक्तः पुराणश्रुतिकोविदैः॥५॥ प्रथमायुतहोमः स्याल्लक्षहो
मस्ततःपरं॥ तृतीयःकोटिहोमस्तुसर्वकामफलप्रदः॥६॥ अयुतेनाहुतीनांचनवग्रहमखःस्मृतः॥ तस्य
तस्यविधिंवक्ष्येपुराणश्रुतिभाषितं॥७॥ गर्तस्योत्तरपूर्वेणवितस्तिद्वयविस्तृतां॥ वप्रद्वयावृतांवेदिंवितस्ति
स्तुच्छ्रयसंमितां॥८॥ संस्थापनायदेवानांचतुरस्रामुदक्प्लवां॥ अग्निप्रणयनंकृत्वातस्यामावाहयेत्सुरा
१ न्॥ देवतानांततःस्थाप्याविंशतिर्द्वादशाधिका॥ सूर्यःसोमस्तथाभौमोबुधजीवसितार्कजाः॥१०॥ राहुःके
तुरितिप्रोक्ताग्रहालोकहितावहाः॥ मध्येतुभास्करंविद्याल्लोहितंदक्षिणेनतु॥११॥ उत्तरेणगुरुंविद्याद्बु
धंपूर्वोत्तरेणतु॥ पूर्वेणभार्गवंविद्यात्सोमंदक्षिणपूर्वके॥१२॥ पश्चिमेनशनिंविद्याद्राहुंपश्चिमद
क्षिणे॥ पश्चिमोत्तरतःकेतुंस्थापयेच्छुक्लतंदुलैः॥१३॥ भास्करस्येश्वरंविद्यादुमांचशशिनस्तथा॥ स्कंद
मंगारकस्यापिबुधस्यचतथाहरिं॥१४॥ ब्रह्माणंचगुरोर्विद्याच्छुक्रस्यापिशचीपतिं॥ शनैश्चरस्यतुय
मंराहोःकालंतथैवच॥१५॥ केतूनांचित्रगुप्तंतुसर्वेषामधिदेवता॥ अग्निरापःक्षितिर्विष्णुरिंद्रऐंद्रीचदेवता

म॰पु॰
१३१

अग्निरापः क्षितिर्विष्णुरिंद्रऐंद्री च देवता ॥१६॥ प्रजापतिश्च सर्पाश्च ब्रह्मा प्रत्यधिदेवता ॥ विनायकं तथा
दुर्गां वायुराकाशमेव च ॥१७॥ आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ ॥ संस्मरेत्क्रममादित्यं श्रृंगा
रकसमन्वितं ॥१८॥ सोमशुक्रौ तथा श्वेतौ बुधजीवौ च पिंगलौ ॥ मंदराहू तथा कृष्णौ धूम्रं केतुगणं
विदुः ॥१९॥ ग्रहवर्णानि देयानि वासांसि कुसुमानि च ॥ धूपामोदस्तु सुरभिः फलपुष्पसमन्विताः
२०॥ गुडोदनं रवेर्दद्यात्सोमाय घृतपायसं ॥ मस्तरांश्च कुजे दद्यात्क्षीरान्नं सोमसूनवे ॥२१॥ दध्यो
दनं तु जीवाय शुक्राय तु घृतोदनं ॥ शनैश्चराय कृशरां माषान्नं मांसं च राहवे ॥२२॥ चित्रोदनं तु के
तुभ्यः सर्वान्भक्षैरथार्चयेत् ॥ प्रागुत्तरेण तस्माच्च दध्यक्षतविभूषितं ॥२३॥ चूतपल्लवसंछन्नं फ
लवस्त्रयुगान्वितं ॥ पंचरत्नसमायुक्तं पंचभंगजलान्वितं ॥ स्थापयेदव्रणं कुंभं वरुणं तत्र विन्यसेत् ॥
२४॥ गंगाद्याः सरितः सर्वाः समुद्रांस्सरांसि च ॥ गजाश्वरथवल्मीकसंगमान्हृदगोकुलात् ॥२५॥ मृ
दमानीय विप्रेंद्र सर्वौषधिजलान्वितं ॥ स्नानार्थं विन्यसेत्तत्र यजमानस्य धर्मवित् ॥२६॥ प्रागुत्तरेण
तस्माच्च दध्यक्षतविभूषितं ॥ आसमुद्राश्च सरितः सरांसि च महानदाः ॥२७॥ आयांतु यजमानस्य
दुरितक्षयकारकाः ॥ एवमावाहयेदेतानमरान्मुनिसत्तम ॥२८॥ होमं समारभेत्सर्पिर्यवव्रीहिति

गो
वि
राम.
१३१

तिलादिना ॥ आर्कः पालाशखदिरो अपामार्गोपिप्पलः ॥२९॥ उदुंबरः शमी दूर्वाकुशाश्च समिधः क्रमात् ॥ ए
कैकस्यात्वष्टशतमष्टाविंशतिरेव च ॥३०॥ होतव्या मधुसर्पिर्भ्यां दध्ना चैव समन्विताः ॥ प्रादेशमात्रा अशिखा
अपलाशिन्यः ॥३१॥ समिधः कल्पयेत्प्राज्ञः सर्वकर्मसु सर्वदा ॥ देवानामपि सर्वेषामुपांशु परमार्थवित् ॥
३२॥ स्वेन स्वेनैव मंत्रेण होतव्याः समिधः पृथक् ॥ होतव्यं च घृताज्येन चरुभक्ष्यादिकं पुनः ॥३३॥ मंत्रैर्द
शाहुतीर्हुत्वा होमं व्याहृतिभिस्ततः ॥ उदङ्मुखाः प्राङ्मुखो वा कुर्युर्ब्राह्मणपुंगवाः ॥३४॥ मंत्रवेत्ता शुक
र्म्याश्च रवेः प्रतिदैवतं ॥ हुत्वा चतांश्च रूपस्पक्रमात् होमं समाचरेत् ॥३५॥ आकृष्णेनेति सूर्याय हो
मः कार्यो द्विजन्मना ॥ आप्यायस्वेति सोमाय मंत्रेणानुजुहुयात्पुनः ॥३६॥ अग्निर्मूर्धा दिवो मंत्र इति भौमा
य कीर्तितं ॥ अग्ने विवस्वदुषस इति सोमसुताय वै ॥३७॥ बृहस्पते परि दीया रथेनेति गुरोर्मतः ॥ शु
क्रं ते अन्यदिति च शुक्रस्यापि निगद्यते ॥३८॥ शनैश्चराय तु पुनः शन्नो देवीति होमयेत् ॥ कयानश्चि
त्र आभुवदिति राहोरुदाहृता ॥३९॥ केतुं कृण्वन्निति ब्रूयात्केतूनामपि शांतये ॥ आवो राजेति
रुद्रस्य बलिहोमं समाचरेत् ॥४०॥ आपो हि ष्ठेत्युमायास्तु स्योनेति स्वामिनस्तथा ॥ विष्णो रिदं विष्णुरि
ति त्वमित्वेति स्वयंभवः ॥४१॥ इंद्रमिद्देवतायेंद्राय जुहुयात्पुनः ॥ तथा यमस्य चायं गौरिति होमः प्र

म॰पु॰
१३२

कीर्त्तितः॥४२॥नमेपृथिव्यंतरिक्षमितिवेदेषुपठ्यते॥सहस्रशीर्षापुरुषइतिविष्णोरुदाहृतः॥४३॥इंद्रायें
दोमरुत्वंतइत्यैंद्रस्यत्राम्यते॥उन्नानपर्णेसुभगेइतिव्याःसमाचरेत्॥४४॥प्रजापतेःपुनर्होमःप्रजाप
तइतिस्मृतः॥नमोस्तुसर्वेभ्यइतिसर्पाणांमंत्रउच्यते॥४५॥एषब्रह्मायकर्त्तिगृण्यइतिब्रह्मण्युदाहृतः॥वि
नायकस्यवानूनइतिमंत्रोबुधैःस्मृतः॥४६॥जातवेदसेसुनवामइतिदुर्गामंत्रउच्यते॥आदित्रयस्यरे
तसश्चाकाशस्यउदाहृतः॥४७॥प्रणेत्रीषुमहीनांचयोमंत्रःप्रकीर्तितः॥एषोउषाश्चहवेंतस्विनोर्मं
त्रउदाहृतः॥४८॥पूर्णमृकुतिस्यमूर्धानिदिवइत्यभिपातयेत्॥अथाभिषेकमंत्रेणवाद्यमंगलगीत
कैः॥४९॥पूर्णकुंभेनतेनैवहोमांतेप्रागुदङ्मुखैः॥अव्यंगावयवैर्ब्रह्मन्हेमस्रग्दामभूषितैः॥५०॥
यजमानस्यकर्त्तव्यंचतुर्भिःस्नपनंद्विजैः॥सुरास्त्वामभिषिंचंतुब्रह्मविष्णुमहेश्वराः॥५१॥वासुदेवोजग
न्नाथस्तथासंकर्षणोविभुः॥प्रद्युम्नोथानिरुद्धश्चभवंतुविजयायते॥५२॥आखंडलोग्निर्भगवान्यमो
वैनैर्ऋतिस्तथा॥वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः॥५३॥ब्रह्मणासहिताश्चैतेदिक्पालाःपांतुवः
सदा॥कीर्त्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः॥५४॥बुद्धिर्लज्जावपुःशांतिर्मायानिद्राचभावना॥
एतास्त्वामभिषिंचंतुतुष्टिःकांतिःक्षमातथा॥५५॥आदित्यश्चंद्रमाभौमोबुधोजीवःसितोर्कजः॥ग्रहा

राम॰
१३२

स्त्वामभिषिंचंतुराहुःकेतुश्चतर्पिताः॥५६॥देवदानवगंधर्वायक्षराक्षसपन्नगाः॥ऋषयोमुनयोगावोदेव
मातरएवच॥५७॥देवपत्न्योद्रुमानागादैत्याश्चाप्सरसांगणाः॥अस्त्राणिसर्वशस्त्राणिराजानोवाहना
निच॥५८॥औषधानिचरत्नानिकालस्यावयवाश्चये॥सरितःसागराःशैलास्तीर्थानिजलदानवाः॥५
९॥एतेत्वामभिषिंचंतुसर्वकामार्थसिद्धये॥ततःशुक्लांबरधरःशुक्लगंधानुलेपनः॥६०॥सर्वौषधैःसर्व
गंधैःस्नापितोद्विजपुंगवैः॥यजमानःसपत्नीकऋत्विजःसुसमाहितः॥६१॥दक्षिणाभिःप्रयत्नेनपूजे
येत्॥तविस्मयः॥सूर्यायकपिलाधेनुंशंखंदद्यात्तथेंदवे॥६२॥रक्तधुरंधरंदद्यात्भौमायकद्रुदाधिकं।
बुधायजातरूपंतुगुरवेपीतवाससी॥६३॥श्वेताश्वंदैत्यगुरवेकृष्णांगामिनसूनवे॥आयसंराहवेदद्यात्के
तुभ्यश्छागमुत्तमं॥६४॥सुवर्णेनसमाःकार्यायजमानेनदक्षिणा॥सर्वेषामथवागावोदातव्याहेमभूषि
ताः॥६५॥सुवर्णमथवादद्याद्गुरुर्वायेनतुष्यति॥स्वमंत्रेणैवदातव्याःसर्वःसर्वत्रदक्षिणा॥६६॥कपिले
सर्वधेनूनांपूजनीयास्तिरोहिणि॥तीर्थदेवमयीयस्मात्ततःशांतिंप्रयच्छमे॥६७॥पुण्यस्त्वंशंखपुण्या
नांमंगल्यानांचमंगलं॥विष्णुनाविधृतश्चासिततःशांतिंप्रयच्छमे॥६८॥धर्मस्त्वंवृषरूपेणजगदानंद
कारक॥अष्टमूर्त्तेरधिष्ठानमतःशांतिंप्रयच्छमे॥६९॥हिरण्यगर्भस्त्वंहेमबीजंविभावसोः॥अनंतपु

एयफलदमतः शांतिं प्रयच्छमे॥७०॥पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभं॥प्रदानात्तस्य मे विष्णुरतः शां
तिं प्रयच्छतु॥७१॥विष्णुस्त्वमश्वरूपेण यस्मादमृतसंभवः॥चंद्रार्कवाहनं नित्यमतः शांतिं प्रयच्छमे॥७२॥
यस्मात्त्वं पृथिवी सर्वा धेनुः केशवसन्निभा॥सर्वपापहरा नित्यमतः शांतिं प्रयच्छमे॥७३॥यस्मादाय
सकर्माणि त्वदधीनानि सर्वदा॥लांगलाद्यायुधादीनि तस्माच्छांतिं प्रयच्छमे॥७४॥यस्मात्त्वं सर्वयज्ञाना
मंगत्वेन व्यवस्थितः॥अतो विभावसो नित्यं मम शांतिं कुरु प्रभो॥७५॥गवामंगेषु तिष्ठंति भुवनानि च
तुर्दश॥यस्मात्तस्मात् श्रियो मे स्युरिह लोके परत्र च॥७६॥यस्मादशून्यं शयनं केशवस्य शिवस्य च॥श
य्या ममाप्यशून्यास्तु दत्ता जन्मनि जन्मनि॥७७॥यथा रत्नेषु सर्वेषु सर्वे देवा व्यवस्थिताः॥तथा शांतिं प्र
यच्छंतु रत्नदानेन मे सुराः॥७८॥यथा भूमिप्रदानस्य कलां नार्हंति षोडशीं॥दानान्यन्यानि मे शांतिर्भूमि
दानाद्भवत्विह॥७९॥एवं संपूजयेद्भक्त्या वित्तशाठ्येन वर्जितः॥वस्त्रकांचनरत्नौघैर्धूपमाल्यानुले
पनैः॥८०॥अनेन विधिना यस्तु ग्रहपूजां समाचरेत्॥सर्वान् कामानवाप्नोति प्रेत्य स्वर्गे महीयते॥८१
यस्तु पीडाकरो नित्यमल्पवित्तस्य वा ग्रहः॥तं च यत्नेन संपूज्य शेषानप्यर्चयेन्नरः॥८२॥ग्रहा गावो नरेंद्राश्च
ब्राह्मणाश्च विशेषतः॥पूजिताः प्रतिपूज्यंते निर्दहंत्यवमानिताः॥८३॥तस्मान्न दक्षिणाहीनं कर्तव्यं भू

तिमिच्छता॥संपूर्णया दक्षिणया यस्मादेकोपि तुष्यति॥सदैवायुतहोमोयं लक्षहोमो मम तः स्मृ॥८४॥॥इति
श्रीमत्स्यपुराणे अयुतहोमविधिः॥ ॥वैशंपायन उवाच॥ ॥सर्वकामाप्तये यस्माल्लक्षहोमं विदुर्बुधाः॥पि
तृणां वल्लभं साक्षाद्भुक्तिमुक्तिफलप्रदं॥१॥ग्रहताराबलं लब्ध्वा कृत्वा ब्राह्मणवाचनं॥ग्रहस्योत्तरपूर्वेण
मंडपं कारयेद्बुधः॥२॥रुद्रायतनभूमौ वा चतुरस्रमुदङ्मुखं॥दशहस्तमथाष्टौ वा हस्तान्कुर्यात्क्रियाय
द्विधानतः॥३॥प्रागुदक्प्लवनां भूमिं कारयेद्यत्नतो नरः॥प्रागुत्तरं समासाद्य प्रदेशं मंडपस्य तु॥४॥शो
भनं कारयेत्कुंडं हस्तमात्रं प्रशस्यते॥चतुरस्रं समंतात्तु योनिवक्त्रं समेखलं॥५॥चतुरंगुलविस्तारो मेख
लात्रय उच्छ्रिता॥प्रागुदक्प्लवनाकाया सर्वतः समविस्तृता॥६॥शांत्यर्थं सर्वलोकानां नवग्रहमखः स्मृ
तः॥मानहीनाधिकं कुंडमनेकभयदं भवेत्॥यस्मात्तस्मात्सुसंपूर्णं शांतिकुंडं विधीयते॥यस्माद्दशगु
णः प्रोक्तो लक्षहोमः स्वयंभुवा॥८॥आहुतीभिः प्रयत्नेन दक्षिणाभिस्तथैव च॥द्विहस्तविस्तृतं तद्वच्चतुर्ह
स्तायतं पुनः॥९॥लक्षहोमे भवेत्कुंडं योनिवक्त्रं समेखलं॥तस्य चोत्तरपूर्वेण वितस्तित्रयसंमिते॥१०॥प्रागु
दक्प्लवनं तद्वच्चतुरस्रं समंततः॥विष्कंभोत्त्युच्छ्रितः स्थंडिले विष्ककमंगुला॥११॥संस्थापनाय देवानां वप्र
त्रयसमावृता॥द्व्यंगुलोच्छ्रितो वप्रः प्रथमः समुदाहृतः॥१२॥अंगुलोच्छ्रयसंयुक्तं वप्रद्वयमथोपरि॥

ऽंगुलश्चैव विस्तारः सर्वेषां कथ्यते बुधैः ॥१३॥ दशांगुलोच्छ्रिता भित्तिः स्थंडिलं स्यात्तथोपरि ॥ तस्मिन्नावाह
येद्देवान् पूर्ववत्पुष्पतंदुले ॥१४॥ आदित्यादिसुराः सर्वे साधिप्रत्यधिदेवता ॥ स्थापनीया मुनिश्रेष्ठा
नांतरेणैव सन्मुखाः ॥१५॥ गरुत्मानधिकस्तत्र संपूज्यः श्रियमिच्छता ॥ साम ध्वनिशरीरस्त्वं वाहनं पर
मेष्ठिनः ॥१६॥ विषपापहरो नित्यमतः शांतिं प्रयच्छ मे ॥ पूर्ववत्कुंभमामंत्र्य ततस्तु होमं समाचरेत् ॥१७॥
सहस्राणां शतं कृत्वा समित्संख्याधिकं पुनः ॥ घृतकुंभवसोर्धारां पातयेदनलोपरि ॥१८॥ औदुंबरीम
थो स्रुचं ऋज्वीं कोटरवर्जितां ॥ बाहुमात्रां स्रुचं कृत्वा ततस्तंभद्वयोपरि ॥१९॥ घृतधारां ततः सम्यगग्नेरु
परि पातयेत् ॥ श्रावयेत्सूक्तमाग्नेयं वैष्णवं रौद्रमैंदवं ॥२०॥ महावैश्वानरं साम ज्येष्ठसाम च वाचये
त् ॥ स्नानं च यजमानस्य पूर्ववत्स्वस्तिवाचनं ॥२१॥ दातव्या यजमानेन पूर्ववद्दक्षिणा पृथक् ॥ काम
क्रोधविहीनेन ऋत्विग्भ्यः शांतचेतसा ॥२२॥ नवग्रहमखे विप्रा याज्याश्चत्वारो वेदवादिनः ॥ अथवा ऋत्विजो
ऽन्तो द्वावेव श्रुतिकोविदौ ॥२३॥ कार्या व्ययुतहोमे तु न सज्जेत विस्तरं ॥ तद्वद्दश वाष्टौ वा लक्षहोमे तु ऋ
त्विजः ॥२४॥ कर्तव्याः शक्तितस्तस्य चत्वारो वाथ वा विमत्सराः ॥ नवग्रहमखात्सर्वं लक्षहोमे दशोत्तरं ॥२५॥ न
स्माद्दद्यान्मुनिश्रेष्ठ भूषणान्यपि शक्तितः ॥ न कुर्याद्दक्षिणाहीनं वित्तशाठ्येन मानवः ॥२६॥ ददल्लोभमो

हात्तु कुलक्षयमवाप्नुते ॥ अन्नदानं यथाशक्ति कर्तव्यं भूमितिच्छता ॥२७॥ अन्नहीनः कृतो यस्मात् दुर्भिक्ष
यसदा भवेत् ॥ अन्नहीनो दहेद्राष्ट्रं मंत्रहीनस्तु ऋत्विजः ॥२८॥ यजमानमदाक्षिण्यं नास्ति यज्ञसमो रि
पुः ॥ अतिचास्य धनं कुर्याल्लक्षहोमं तरः क्वचित् ॥२९॥ तस्मात्पीडाकरो नित्यं यएवमनवृतिग्रहः ॥ नमे
वपूजये द्रूपा वे वा त्रीन्वा यथाविधि ॥३०॥ एकमप्यर्चयेद्भक्त्या ब्राह्मणं वेदपारगं ॥ दक्षिणाभिः प्रय
त्नेन बहून्यप्यविन्नवान् ॥३१॥ लक्षहोमस्तु कर्तव्यो यदा वित्तं भवेद्गृहे ॥ यमः सर्वानवाप्नोति कुर्व
न्कामानविधामतः ॥३२॥ पूज्यते शिवलोके च वस्वादित्यमरुद्गणैः ॥ यावत्कल्पशतान्यष्टौ अथ
मानमवाप्नुयात् ॥३३॥ सकामो यस्त्विमं कुर्याल्लक्षहोमं यथाविधि ॥ स तं काममवाप्नोति पदमानंत्यम
श्नुते ॥३४॥ पुत्रार्थी लभते पुत्रान् धनार्थी लभते धनं ॥ भार्यार्थी शोभनां भार्यां कुमारी च शुभं पतिं ॥३
५॥ भ्रष्टराज्यस्तथा राज्यं श्रीकामः श्रियमाप्नुयात् ॥ यं यं कामयते कामं स वै भवति पुष्कलः ॥३६॥ निः
कामः कुरुते यस्तु स परं गच्छति पदं ॥ अस्माच्छतगुणः प्रोक्तः कोटिहोमः स्वयंभुवा ॥३७॥ आहुतीभिः
प्रयत्नेभिर्दक्षिणाभिः फलेन च ॥ पूर्ववद्ग्रहदेवानामावाहनविसर्जनं ॥३८॥ आहुतीभिः प्रयत्नेभि
र्दक्षिणाभिः फलेन च ॥ पूर्ववद्ग्रहदेवानामावाहनविसर्जनं ॥३९॥ होममंत्रास्त एवोक्ताः स्नाने दा

म०पु०
१३५

नेतथैव च॥ कुंडमंडपवेदीनां विशेषोत्र निबोध मे॥ ३९॥ कोटिहोमे चतुर्हस्तं चतुरस्रं च सर्वशः॥ योनिवक्त्रद्व
यीपेतं तदष्टाकुक्षि मेखलाः॥ ४०॥ षडंगुलात्युच्छ्रिता कार्या प्रथमा मेखला बुधैः॥ चतुरंगुलात्युच्छ्रिता तद्वत
द्वितीया परिकीर्तिता॥ ४१॥ उच्छ्रायविस्तराभ्यां च तृतीया चतुरंगुला॥ द्व्यंगुलश्चैव विस्तारः पूर्वमेव प्रशस्य
ते॥ ४२॥ वितस्तिमात्रा योनिः स्यात्षट्सप्तांगुलविस्तृता॥ कूर्मपृष्ठोन्नता मध्ये पार्श्वयोश्चांगुलोच्छ्रिता॥
४३॥ गजोष्ठसदृशी तद्वदायता छिद्रसंयुता॥ एतत्सर्वेषु कुंडेषु योनिलक्षणमुच्यते॥ ४४॥ मेखलोप
रि सर्वत्र अश्वत्थदलसन्निभं॥ वेदी च कोटिहोमे स्याद्वितस्तीनां चतुष्टयं॥ ४५॥ चतुरस्रा समंतात्तु त्रिभिर्व
प्रैश्च समाहिता॥ वप्रप्रमाणं तद्वदुत्तरे स्थापयेद्बुधः॥ ४६॥ अष्टौ ते होमकाः कार्या वृद्वेदांगवेदिनः॥ एवं द्वा
दश विप्राः स्युर्वस्त्रमाल्यानुलेपनैः॥ ४७॥ पूर्ववत्पूजयेद्भक्त्या सर्वाभरणभूषणैः॥ रात्रिसूक्तं च रौद्रं च
पावमानं सुमंगलं॥ ४८॥ पूर्वतो बह्वृचः शांतिं पठन्नास्ते उदङ्मुखः॥ शाक्रं रौद्रं च सौम्यं च कूष्मांडं शांति
मेव च॥ ४९॥ पाठयेद्दक्षिणद्वारि यजुर्वेदिनमुत्तमं॥ सुवर्णं नित्य वैराजं आग्नेयं रुद्रसंहिता॥ ५०॥ ज्येष्ठ
सामं तथा शांतिं छंदोगः पश्चिमे जपेत्॥ शांतिसूक्तं च सौरं च तथा संवरणं शुभं॥ ५१॥ पौष्टिकं स महा
राज्यमुत्तरेणाप्यथर्ववित्॥ पंचभिर्वापि होमः कार्योत्र पूर्ववत्॥ ५२॥ स्नाने दाने च मंत्राः स्युस्तएव मुनिसत्त

राम॰
१३५

म॥ वसोर्धाराविधानं च लक्षहोमाद्विशिष्यते॥ ५३॥ पश्चानेन विधिना यस्तु कोटिहोमं समाचरेत्॥ सर्वान्का
मानवाप्नोति ततो विष्णुपदं व्रजेत्॥ ५४॥ यः पठेच्छृणुयाद्वापि ग्रहयज्ञत्रयं नरः॥ सर्वपापविशुद्धात्मा
पदमिंद्रस्य गच्छति॥ ५५॥ अश्वमेधसहस्राणि दश चाष्टौ च धर्मवित्॥ कृत्वा यत्फलमाप्नोति कोटिहोमा
त्तदश्नुते॥ ५६॥ ब्रह्महत्यासहस्राणि अपापहत्यार्बुदानि च॥ कोटिहोमेन नश्यंति यथावच्छिवभाषितं॥
५७॥ वश्यकर्माभिचारादि तथैवोच्चाटनादिकं॥ नवग्रहमखं कृत्वा ततः कार्यं समारभेत्॥ ५८॥ अन्यथा
फलदं पुंसां न काम्यं जायते क्वचित्॥ तस्मादयुतहोमस्य विधानं पूर्वमाचरेत्॥ ५९॥ वृत्तं चोटने कुंडं तथा
वश्यकर्मणि॥ त्रिमेखलं चैकवक्त्रमरत्निविस्तरेण च॥ ६०॥ पलाशसमिधः शस्ता मधुगोरोचनान्विताः
चंदनागुरुणा तद्वत्कुंकुमेनाभिषेचिताः॥ ६१॥ होमयेत्तन्मधुसर्पिर्भ्यां बिल्वानि कमलानि च॥ सहस्रा
णि दशैवोक्तं सर्वदैवस्वयंभुवा॥ ६२॥ वश्यकर्मणि बिल्वानां पद्मानां चैककर्मवित्॥ सुमित्रियातश्चा
पञ्चौषधपत्तिर्होमयेत्॥ ६३॥ नवान्नस्थापनं कार्यं न च कुंभाभिषेचनं॥ स्नानं सर्वौषधैः कृत्वा शुक्ल
मास्यावरोगही॥ ६४॥ कंगस्त्रैः सकटकैर्विप्रान्समभिपूजयेत्॥ सूक्ष्मवस्त्राणि देयानि शुक्लागारः
सकांचनाः॥ ६५॥ अथ स्नाने वशीकुर्यात्सर्वशत्रुबलान्यपि॥ अमित्राण्यपि मित्राणि होमोपपापना

ज्ञानः॥६॥विद्वेषणाभिचारेषु त्रिकोणं कुंडमिष्यते॥द्विमेखलं कोणमुखं हस्तमात्रं च सर्वशः॥होमं कुर्युस्त
तो विप्रा रक्तमाल्यानुलेपनाः॥निवीतलोहितोष्णीषा लोहिताम्बरधारिणः॥६८॥नववासससरक्ताः ध्वज
पंने सुसमाहिताः॥समिधो वामहस्तेन श्येनास्थिलवसंयुताः॥६९॥होतव्या मुक्तकेशैस्तु ध्यायद्भिरशि
वं रिपोः॥दुर्मित्रियस्तस्मै संतु तथा ऊं फडनीति च॥७०॥सेनाभिचारमंत्रेणाकुरं सन्नुभिमंत्रितं॥प्रति
रूपं रिपोः कृत्वा क्षुरेण प्रतिकल्पयन्॥७१॥रिपोरूपस्य सकलान्यथैवाग्नौ विनिक्षिपेत्॥ग्रहयज्ञवि
धानांते सदैवाभिवसुनः॥७२॥विद्वेषणं तथा कुर्वन्नेतदेव समाचरेत्॥इहैव फलदं पुंसामेतन्नामु
त्रशोभनं॥७३॥तस्माच्छांतिकमेवात्र कर्त्तव्यं भूतिमिच्छता॥ग्रहयज्ञत्रयं कुर्याद्यस्तु कामेन मानवः॥
७४॥स विष्णोः पदमाप्नोति पुनरावृत्तिदुर्लभं॥य इदं शृणुयान्नित्यं पठेद्वापि समाहितः॥७५॥न त
स्य ग्रहपीडा स्यान्न च वै धुजनक्षयः॥ग्रहयज्ञत्रयं गेहे लिखितं यत्र तिष्ठति॥न पीडा तत्र बालानां न रो
गा न च बंधनं॥अशेषयज्ञफलदं निःशेषाघौघनाशनं॥७७॥कोटिहोमं विदुः प्राज्ञा भुक्तिमुक्तिफल
प्रदं॥लक्षहोमयतः प्राज्ञैरश्वमेधसमं स्मृतः॥७८॥प्राज्ञैरश्वमेधं बुधाद्दशगुणं हसमस्तघ्नं नवग्रह
मखः स्मृतः॥७९॥इति कथितमिदानीमुत्तमं वानंदहेतोः सकलकलुषहारी देवयज्ञाभिषेकः॥परि

पवतिय इत्थं यः शृणोति प्रसंगादभिभवति स शत्रून्नायुरारोग्ययुक्तः॥८०॥॥इति श्रीमत्स्यपुराणे म
नुमत्स्यसंवादे वैशांपायनीये शांतिविधानं॥॥श्रीईश्वर उवाच॥॥पद्मासनः पद्मकरः पद्मगर्भसमद्यु
तिः॥सप्ताश्वः सप्तरज्जुश्च द्विभुजः स्यात् दिवाकरः॥१॥श्वेतः श्वेताम्बरधरः श्वेताश्वः श्वेतभूषणः॥गदापा
णिर्द्विबाहुश्च कर्त्तव्यो वरदः शशी॥२॥रक्तमाल्यांबरधरः शक्तिशूलगदाधरः॥चतुर्भुजश्चैव गमो
वरदः स्याद्धरासुतः॥३॥पीतमाल्यांबरधरः कर्णिकारदलद्युतिः॥खड्गचर्मगदापाणिः सिंहस्थो व
रदो बुधः॥४॥देवदैत्यगुरूतद्वत्पीतश्वेतौ चतुर्भुजौ॥दंडिनौ वरदौ कार्यौ साक्षसूत्रकमंडलू॥५
इंद्रनीलद्युतिः शूली वरदो गृध्रवाहनः॥बाणबाणासनधरः कर्त्तव्योर्कसुतस्तथा॥६॥करालवदन
खड्गधर्मशूलधरस्तथा॥नीलः सिंहासनस्थश्च राहुरत्र प्रशस्यते॥७॥धूम्रा द्विबाहवः सर्वे गदिनो
विकृताननाः॥गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः॥८॥सर्वे किरीटिनः कार्या लोकहितावहाः॥
ध्यंगुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं सदा॥९॥॥इति श्रीमत्स्यपुराणे ग्रहस्वरूपानुकीर्त्तनं॥॥ना
रद उवाच॥॥भगवन् लब्धेशंत यान्यपि यद्व्रतं॥भुक्तिमुक्तिफलायातं तत्सुनर्वक्तुमर्हसि॥१॥
वमुक्तो ब्रवीच्छंभुरयं वाग्मयपारगः॥मत्स्यमत्स्यपसा ब्रह्मन् पुराणश्रुतिविस्तरे॥२॥धर्मोयंविष्णुरू

पेण विश्वरूपेण नंदीनाम गणाधिपः॥ धर्मांश्चैश्वरान्सर्वक्ष्यत्यतः परं तिनारद॥३॥ मत्स्य उवाच॥॥
इत्युक्त्वा देवदेवेशस्तत्रैवांतरधीयत॥ नारदोपि च शुश्रूषुरपृच्छन्नंदिकेश्वरं॥४॥ आदिष्टस्त्वं शिवेनेह
वद माहेश्वरं व्रतं॥ ५॥ श्रीनंदिकेश्वर उवाच॥॥ शृणु मुने विहितो ब्रह्मन्वक्ष्ये माहेश्वरं व्रतं॥ त्रिषु लोके
षु विख्यातं नाम्ना शिवचतुर्दशी॥५॥ मार्गशीर्षे त्रयोदश्यां सितायामेकभोजनं॥ प्रार्थयेद्देवदेवेश त्वाम
हं शरणंगतः॥६॥ चतुर्दश्यां निराहारः सम्यगभ्यर्च्य शंकरं॥ सुवर्णवृषभं दत्वा भोक्ष्यामि च परेहनि॥७
एवं नियमकृत्तु स्वात्वा रूपायमानवः॥ कृतस्नानजपः पश्चादुमया सह शंकरं॥८॥ पूजयेत्कमलैः शु
क्लैर्गंधमाल्यानुलेपनैः॥ पादौ नमः शिवायेति शिरः सर्वात्मने नमः॥९॥ ललाटं तु त्रिनेत्राय नेत्राणि
हरयेनमः॥ मुखमिंदुमुखायेति श्रीकंठायेति कंधरां॥१०॥ सद्योजाताय कर्णौ तु वामदेवाय वै भुजौ॥
अघोरहृदयायेति हृदये चापि पूजयेत्॥११॥ स्तनौ तत्पुरुषायेति तथेशानाय चोदरं॥ पार्श्वे चानंतध
र्मायिज्ञानभूताय वै कटिं॥१२॥ ऊरू चानंतवैराग्यसिंहायेत्यभिपूजयेत्॥ अनंतैश्वर्यनाथाय जानुनी च
प्रार्चयेद्बुधः॥१३॥ प्रधानाय नमो जंघे गुल्फौ व्योमात्मने नमः॥ व्योमकेशात्मरूपाय केशान्पृष्ठं पिनाकधृक्।
१४॥ ततो विप्रान्नैकांश्च तर्पयेद्भक्तितः शुभान्॥ एष दाज्यं च संभारपस्वपेद्भूमावुदग्मुखः॥१५॥ पंचदश्यां

ततः पूज्य विप्रान्भुंजीत वाग्यतः॥ तद्वत्कृष्णचतुर्दश्यामेतत्सर्वं समाचरेत्॥१६॥ चतुर्दशीषु सर्वासु कुर्यात्पू
र्वविदर्चनं॥ ये तु मासा विशिष्टाः स्युस्तान्निबोध क्रमादिह॥१७॥ मार्गशीर्षादिमासेषु क्रमादेतदुदीरयेत्॥ शं
करायनमस्तेस्तु नमस्ते करवीरक॥१८॥ त्र्यंबकाय नमस्तेस्तु महेश्वरमतः परं॥ नमस्तेस्तु महादेव स्था
णवे च ततः परं॥१९॥ त्र्यंबकाय नमस्ते शं नवे पुनः॥ नमस्ते परमानंद नमः सोमार्द्धधारिणे॥२०॥ नमो भ
वाय भीमाय त्वामहं शरणं गतः॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं॥२१॥ पंचगव्यं ततो बिल्वं
कर्पूरं चागरुं यवाः॥ तिलाः कृष्णाविधिवत्प्राशनं क्रमशः स्मृतं॥२२॥ प्रतिमासं चतुर्दश्यामेकैकं प्रा
शनं स्मृतं॥ मंदारमालतीभिश्च तथा धत्तूरकैरपि॥२३॥ सिंदुवारैरशोकैश्च मल्लिकाभिश्च पाटलैः॥
अर्कपुष्पैः कदंबैश्च शतपत्रैस्तथोत्पलैः॥२४॥ एकैकेन चतुर्दश्यामर्चयेत्पार्वतीपतिं॥ पुनश्च कार्ति
के मासि संप्राप्ते तर्पयेद्द्विजान्॥२५॥ अन्नैर्नानाविधैर्भक्ष्यैर्वस्त्रमाल्यविभूषणैः॥ कृत्वा नीलवृषोत्स
र्गं श्रुत्युक्तविधिना नरः॥२६॥ उमामहेश्वरं हैमं वृषभं च गवा सह॥ मुक्ताफलाष्टकयुतं सितनेत्रपटा
वृते॥२७॥ सर्वोपस्करसंयुक्तां शय्यां दद्यात्सतूलिकां॥ ताम्रपात्रोपरि पुनः शालितंदुलसंयुतां॥२८॥
स्थाप्य विप्राय शांताय वेदव्रतपराय च॥ ज्येष्ठे सामविदे देयं न च कुर्वीत नैकचित्॥२९॥ सुवर्णशृंगोविधे

ददाद्दाचार्ये तल्लैवेदिति॥ अव्यंगांगायसौम्यायसदाकल्याणवादिने॥३७॥सपत्नीकायसंपूज्यमाल्यव
स्त्रादिभूषणैः॥गुरौसतिगुरौदेयंतदभावेद्विजातये॥३८॥नवित्तशाठ्यंकुर्वीतकुर्वन्दोषात्पतत्यधः॥
अनेनविधिनायस्तुकुर्यात्शिवचतुर्दशीं॥३९॥सोश्वमेधसहस्रस्यफलंप्राप्नोतिमानवः॥ब्रह्मह
त्यादिकंकिंचिद्यदत्रामुत्रवाकृतं॥४०॥पितृभिर्भ्रातृभिर्वापितत्सर्वंनाशमाप्नुयात्॥४१॥दीर्घायुरा
रोग्यकुटुंबवृद्धिरत्राक्षयामुत्रचतुर्भुजत्वं॥गणाधिपत्वंदिविकल्पकोटिशतान्युषित्वापदमेति
शंभोः॥४२॥नबृहस्पतिरप्यनंतमस्याःफलमिंद्रोनपितामहोपिवक्तुं॥नचसिद्धगणोप्यलंनचाहंय
दिजिह्वायुतकोटयोपिवक्त्रे॥४३॥भवत्यमरवल्लभःप्रगतियःस्मरेद्वासदाप्रणम्यपिविमत्सरःसक
लपापुनिर्मोचिनी॥४४॥इमांशिवचतुर्दशीममरकामिनीकोटयःस्तुवंतितमनिंदितंकिमुसमाचरेद्यःस
दा॥४५॥यावायनाकुरुतेनुभक्त्यामत्रारिमादृष्ट्यपुरूत्सुतान्वा॥सापिप्रसादात्परमेश्वरस्यपरंपदंया
तिपिनाकपाणेः॥४६॥॥इतिश्रीमत्स्यपुराणेमनुमत्स्यसंवादेशिवचतुर्दशीव्रतं॥॥श्रीनंदिकेश्वरउ
वाच॥॥फलत्यागस्यमाहात्म्यंयद्भवेच्छृणुनारद॥यदक्षय्यंपारलोकेसर्वकामफलप्रदं॥१॥मार्गशी
र्षेशुभेमासितृतीयायांमुनेव्रतं॥द्वादश्यामथवाष्टम्यांचतुर्दश्यामथापिवा॥२॥आरभेच्छुक्लपक्षस्यकृ

त्वाब्राह्मणवाचनं॥अन्येष्वपितुमासेषुपुण्येषुमुनिसत्तम॥३॥सदक्षिणंपायसेनपूजयेच्छक्तितोद्विजान्॥
अष्टादशानांधान्यानामफलसमूलकं॥४॥वर्जयेदब्दमेकंतुऋतेऔषधधारणं॥सवृषंकांचनंरुद्रंधर्म
राजंचकारयेत्॥५॥कूष्मांडंमातुलिंगंचवृंताकंपनसंतथा॥आम्राम्रातकपित्थानिकलिंगमेर्वारुकं॥६
श्रीफलाश्वत्थबदरंजंबीरंकदलीफलं॥कर्द्दमंदाडिमंशास्त्राकालधौतानिषोडश॥७॥मूलकामलकी
जंबूतिंतिडीकरमर्द्दकं॥कंकोलेलाकजंबीरकरीरकटनंगमी॥८॥उदुंबरनालिकेरंद्राक्षाथबृहतीद्वयं॥
रूप्याणिमाणिकारयेत्खलुत्याफलानीमानिषोडश॥९॥नाश्नंतालफलंकुर्यात्अगस्तिफलमेवच॥पिंडा
रकाश्मर्यफलंतथासूरणकंदकं॥१०॥रक्तालुकाकंदकंचकेतक्याश्रीकविर्भटं॥तिलवल्लीफलंतद्व
त्कूष्मांडालमलीजंफलं॥११॥ग्रामनिःपावमधुककदेंगुदपटोलकं॥तान्यापिषोडशौतानिकारयेच्छक्ति
मान्नरः॥१२॥उदकुंभद्वयंकुर्याद्धान्योपरिसहस्रकं॥ततश्चकारयेच्छय्यांशाय्योपरिसवाससं॥१३॥
भक्ष्यपानत्रयोपेतंयमरुद्रवृषान्वितं॥धेन्वासहैवशांतायविप्रायाथकुटुंबिने॥१४॥सपत्नीकायसं
पूज्यपुण्येह्निविनिवेदयेत्॥यथाफलेषुसर्वेषुवसंत्यमरकोटयः॥१५॥यथासर्वफलत्यागव्रताद्भक्तिः
शिवेस्तुमे॥यथाशिवस्यधर्मश्चससदानंतफलप्रदौ॥१६॥तद्युक्तफलदानेनतौस्यातांमेवरप्रदौ॥यथा

फलान्यनंतानिशिवनक्तेषु सर्वदा॥१७॥तथानंतफलावाप्तिरस्तु जन्मनि॥यथानंदनपरपाशिशिवविस्वकर्प
प्रजात॥१८॥तथाममास्तुविश्वात्मा शंकरः शंकरः सदा॥इतिदत्वाचतत्सर्वमिलं कृत्यविसृषर्णेः॥१९॥
शाकाघ्वृछयनं दद्यात्सर्वोपस्करसंयुतं॥अशक्तःफलान्येवयथोक्तानि विधानतः॥तयोदकुंभसंयुक्तौ
द्विविधमौचकांचनौ विप्रायदत्वाभुंजीतवाग्यतःफलवर्जितं॥३१॥अन्यान्यपियथाशक्त्याभोजयेद्व
द्विजोत्तमान्॥एतद्भागवतानांतुशैववैष्णवपि मीजेनमस्तुर॥अगच्छायाहिवरदनमस्तेज्योतिषांपते॥१२
अर्घं दत्वाविसर्ज्यार्थनिशितेलविवर्जितं॥भुंजीतवत्सरांतेतुकांचनंकमलोत्तरं॥१३॥पुरुषंचूपया
शक्त्याकारयेत्द्विभुजंतथा॥सुवर्णशृंगीकपिलांमहार्घ्यांरूप्यैःखुरैःकांस्यदोहांसवत्सां॥पूर्वाह्णेगुड
स्यापरिताम्रपात्रेनिधायपुष्यपद्मंपुरुषंचदद्यात्॥१४॥संपूज्यरक्तांबरमाल्यधूपैर्द्विजंचरक्तैरथवापिंग
शैः॥प्रक्षालयित्वापुरुषंसपद्मंदनेकव्रतदानकाय॥१५॥सामर्ग्यजुर्धर्मनिधेविधायजवाब्धिपोताय
जगत्सवित्रे॥१५॥इत्यनेनविधिनासमाचरेदब्दमेकमिहयस्तुमानवः॥सोधिरोहतिविनष्टकल्मषःपू
वधाममधुतवासरावलिः॥१६॥कर्मसंक्षयमवाप्यभूपतिःशोकदुःखभयरोगवर्जितः॥द्वीपसप्तकप
तिःपुनःपुनर्धर्ममूर्तिरमितौजसायुतः॥१७॥साचभर्त्तृगुरुदेवतत्परावेदमूर्तिरिनभक्तिमाचरेत्॥सा

पिलोकममरेशपूजितायातिनारदयेनविज्वराः॥१८॥यःपठेदपिशृणोतिवापुनःपन्यमानमथवानुमो
दते॥सोपिशक्रभवनस्थितोमरैःपूज्यतेवसतिचाक्षयंदिवि॥१९॥इतिश्रीमत्स्यपुराणेनंदिनारदसं
वादे आदित्यवारनक्तमाहात्म्य॥ ॥श्रीनंदिनउवाच॥ ॥अथान्यदपिवक्ष्यामिसंक्रांतुद्यापनेफलं॥य
दक्षयंपरेलोकेसर्वकामफलप्रदं॥१॥विषुवेऽयनेचापिसंक्रांतिव्रतमाचरेत्॥पूर्वेद्युरेकभक्तेनदंतधा
वनपूर्वकं॥२॥संक्रांतिवासरेप्रातस्तिलैःस्नानंविधीयते॥रविसंक्रमणेभूमौचंदनेनाष्टपत्रकं॥३॥पद्मंस
कर्णिकंकुर्यात्तस्मिन्नावाहयेद्रविं॥कर्णिकायांन्यसेत्सूर्यमादित्यंपूर्वतस्ततः॥४॥नमस्तोष्णार्चिषेयाम्ये
नमोऋग्मंडलायच॥नमःसवित्रेवारुणायवायव्येतपनेनमः॥५॥मार्तंडमुत्तरेविष्णुमीशानेविन्यसेत्सदा
गंधमाल्यफलैर्भक्ष्यैःस्थंडिलेपूजयेन्नतः॥६॥द्विजायसोदकुंभंचघृतपात्रंहिरण्मयं॥कमलंचयथाशक्त्या
कारयित्वानिवेदयेत्॥७॥चंदनोदकपुष्पैश्चदेवायार्घ्यंन्यसेद्भुवि॥विश्वायविश्वरूपायविश्वधाम्नेस्वयंभु
वे॥८॥नमोनंतनमोधात्रेऋक्सामयजुषांपते॥अनेनविधिनासर्वंमासिमासिसमाचरेत्॥९॥वत्सरांतेत
याकुर्यात्सर्वंद्वादशधानरः॥१०॥संवत्सरांतेघृतपायसेनसंतर्प्यवह्निंद्विजपुंगवांश्च॥कुंभान्पुनर्द्वादश
धेनुयुक्तान्सरत्नहैरण्मयपद्मयुक्तान्॥पयस्विनीःशीलवतीश्चदद्याद्धेमास्यरूप्यखुरवस्त्रयुक्ताः॥गावोद्व

म॰पु॰ १४०

वा सप्तसकांस्यदोहा मास्यांबरखा चतुरी पशक्त्या ॥११॥ द्वि धान्ययुक्तां कपिलां यथैकां निवेदयेत ब्राह्मण
पुंगवाय ॥ हैमीं च दद्यात्स्थपि वीं सरौ गां ज्ञाकार्यरूप्यामथवा च ताम्रे ॥१२॥ पैष्टी मशक्तोपि तिलैर्विधाय
सौवर्णस्य पैणा समंग्र दद्यात ॥ न वित्तशाठ्यं पुरुषो हि कुर्वन्न धोयाति न संशयोत्र ॥१३॥ यावन्महेंद्रप्रमुखा
नगेंद्राः पृथ्वी च सप्ताब्धियुते इति ष्टेत ॥ तावत्स गंधर्वगणैरशेषैस्संपूज्यते नारद नाकपृष्ठे ॥१४॥ ततस्तु क
मक्षयमाप्य सप्तद्वीपाधिपः स्यात्कुलशीलयुक्तः ॥ स्पृष्टेर्मुखे व्यंगतपुः प्रसार्यप्रभूतपुत्रान्वयवंदितांघ्रि
:॥१५॥ इति पठति शृणोति वाथ शक्त्या विधिरखिलं पवि संक्रमे पुपुण्यं ॥ मतिमपि च ददाति सोपि देवैरमर
पतेर्भवि ते मपूजिते च ॥१६॥॥ इति श्री मत्स्यपुराणे नंदिनारदसंवादे संक्रांत्युद्यापनो नाम ॥॥ श्रीनंदिकेश्व
र उवाच ॥॥ शृणु नारद वक्ष्यामि विष्णोर्व्रतमनुत्तमं ॥ विभूति द्वादशी नाम सर्वदेवनमस्कृतः ॥१॥ कार्त्तिकि
चैव वैशाखे मार्गशीर्षे पफाल्गुने ॥ आषाढे वा दशम्यां तु शुक्लायां लघुभुग्नरः ॥२॥ कृत्वा सायंतनी संध्यां गृ
ह्णीयान्नियमं बुधः ॥ एकादश्यां निराहारः समभ्यर्च्य जनार्दनं ॥३॥ द्वादश्यां द्विजसंयुक्तः करिष्ये भोजनं
विभो ॥ तदविघ्नेन मे यातु सफलं स्याच्च केशव ॥४॥ नमो नारायणायेति वाच्यं स्वपता निशि ॥ ततः प्रभाते उ राम॰ १४०
त्थाय स्नात्वा विप्रः शुचिस्तंत जपेत ॥५॥ पूजयेत्पुंडरीकाक्षं शुक्लमाल्यानुलेपनैः ॥ विभूतये नमः पादौ विशोकाय च

जानुनी ॥६॥ नमः शिवायेत्यूरू च विश्वमूर्त्ते नमः कटिं ॥ कंदर्पाय नमो मेढ्रं फलं नारायणाय च ॥७॥ दामोदरायेत्यु
दरं वाय च स्तनौ ॥ माधवायेत्युरो विष्णोः कंठं वैकुंठिने नमः ॥८॥ श्रीधराय मुखं केशान् केशवायेति नारद ॥ प
ष्ठं शार्ङ्गधरायेति श्रवणौ धनदाय च ॥९॥ स्वनाम्ना शंखचक्रासिगदाजलजपाणये ॥ शिरः सर्वात्मने ब्रह्मन्
नम इत्यपि पूजयेत ॥१०॥ मत्स्यमुत्पलसंयुक्तं हैमं कृत्वा तु शक्तिना ॥ उदकुंभसमायुक्तमग्रतः स्थापयेद्बुधः
॥११॥ गुडपात्रं तिलैर्युक्तं सितवस्त्राभिवेष्टितं ॥ कृत्वा जागरणं कुर्यादितिहासकथादिभिः ॥१२॥ प्रभातायां तु श
र्वर्यां ब्राह्मणाय कुटुंबिने ॥ सकांचनोत्पलं देवं सोदकुंभं निवेदयेत ॥१३॥ यथा न मुच्यसे विष्णो सदा सर्वविभू
तिभिः ॥ तथा मामुद्धराशेष दुःखसंसारकर्दमात ॥१४॥ दशावताररूपेण प्रतिमा संकरान्मुने ॥ दत्वात्रेयं च
पायासमुत्पलेपममन्वितं ॥१५॥ दद्यादेवं समा यावत्पाखंडानभिवर्जयेत ॥ समाप्यैवं यथाशक्ति द्वादशी
नरः ॥१६॥ संवत्सरांते लवणपर्वतेन समन्वितां ॥ शय्यां दद्यात्मुनिश्रेष्ठ गुरवे धेनुसंयुतां ॥१७॥ ग्रामं च श
क्तिमान् दद्यात् क्षेत्रं च पुरवरान्वितं ॥ गुरुं संपूज्य विधिवद्वस्त्रालंकारभूषणैः ॥१८॥ अस्मानपि यथाशक्त्या भो
जयित्वा द्विजोत्तमान् ॥ तर्पयेद्भूरिदानेन रत्नाद्यैर्धनसंचयैः ॥१९॥ अल्पवित्तो यथाशक्त्या स्तोकं स्तोकं समाच
रेत ॥ पञ्चाप्यतीव निःस्वः स्याच्छक्तिमान्नसाधवं प्रति ॥२०॥ पुष्पार्चनविधानेन स कुर्याद्वत्सरद्वयं ॥ अनेन वि

म०पु० धिनायस्तुविभूतिद्वादशीव्रतं॥२१॥कुर्वन्नृपापविनिर्मुक्तःपितॄणांतारयेच्छतं॥जंतुषांशतसाहस्रंसरावं
१४२ फलभाग्भवेत्॥नचव्याधिर्भवेत्तस्यनदारिद्र्यंनबंधनं॥वैष्णवोवायदीवोवाभवेज्जन्मनि॥२३॥यावद्यु
गसहस्राणांशतमष्टोत्तरंभवेत॥पुरारथंतरेकल्पेराजासीत्पुष्पवाहनः॥२४॥नाम्नालोकेषुविख्यातस्ते न
जसासूर्यसन्निभः॥तपसातस्यतुष्टेनचतुर्वक्त्रेणनारद॥२५॥कांचनंकमलंदत्तंयथाकामगमंमुने॥लो
कैःसमस्तैर्नगरवासिभिःसहितोनृपः॥२६॥द्वीपानिसुरलोकंचयथेष्टंव्यचरत्तदा॥कल्पादौसप्तमंद्वी
पंतस्यपुष्करवासिना॥२७॥लोकेनपूजितंयस्मात्पुष्करद्वीपमुच्यते॥देवब्राह्मणदत्तंचयद्यानमस्ययत्तो
बुजं॥२८॥पुष्पवाहनमित्याहुस्तस्मात्तंदेवदानवाः॥२८॥नसाध्यमंस्यास्तिजगत्त्रयेपिब्रह्मांबुजस्यस्युत स्थ
पोनुभावात्॥पत्नीचतस्याप्रतिमामुनींद्रनारीसहस्रैरभितोभिनंद्या॥२९॥नाम्नाचलीलावतीनामख्या
ता सापार्वतीवेष्टतमाभवस्य॥तस्यात्मजानामयुतंबभूवधर्मात्मनामग्र्यधनुर्धराणां॥३०॥तदात्मनः
सर्वमवेक्ष्यराजामुहुर्मुहुर्विस्मयमाससार॥सोभ्यागतंवीक्ष्यमुनिप्रवीरंप्राचेतसंवाक्यमिदंबभाषे॥३१॥रा
जोवाच॥कस्माद्विभूतिरचलाममलमरमर्त्यपूज्याताततीतपाचविजितामरसुंदरीयं॥भार्याममात्मजतप राम॰
सापरितोषितेनदत्तंतथांबुजगृहंचमुनींद्रधात्रा॥३२॥यस्मिन्प्रविष्टमपिकोटिशतंचपापंसामान्यकुंजर १४२

रथौघजनाद्भुतानां॥नोलक्ष्यकगतमंबरमध्यइंदुस्ताराणैरिववृतःपरितःस्फुरद्भिः॥३३॥तस्मात्किम
न्यजननीजठरोद्भवेनधर्मादिकंकृतमशेषफलाप्तिहेतुः॥भगवन्मयापिविहितंचतपानयापिमज्जायं
यातदखिलंकथयप्रचेतः॥३४॥मुनिरुवाच॥भवजन्मांतरितंसमीक्ष्यपुण्यंपृथ्वीपतेभवतमहतहेतुवृत्तं।
तन्माभवतुलब्धकुलेपिघोरेजातस्त्वमप्यनुदिनंकिलपापकारी॥३५॥वपुरप्यभूत्तवपुनःपुरुषांगसंधि
दुर्गंधिसत्वनुजगामरणंसमंतात्॥नचतेसुहृन्नसुहृन्नसुतेवंधुजनोनतावनाहयजनानजननीचतदा
भिन्नास्या॥३६॥अन्नदनाद्भिरतीवरौद्राकदाचिदाहारविनिर्मितमस्मिन्॥क्षुत्पीडितेनापतदानकिंचि
दात्रादिकंधान्यफलादिकंच॥३७॥अथाभिदृष्टमुहदंबुजाक्षंसवरोवरंपंचपरीक्षितेघ॥पश्चात्मयादाय
ततोवहन्निगतःपुरंवेदिशनामधेयं॥३८॥तन्मूल्यलाभायपुरःसमस्तंभ्रांतेनदाशेषमहत्तदासीत्॥क्रो
तानकश्चित्कमलेपुजातःश्रांतोपक्षुत्तृट्परिपीडितस्य॥३९॥उपविष्टस्त्वमेकस्मिन्सभायोजिवनांगणे॥
श्रयमंगलवशाद्दृस्चलयारावोमहान्स्मृतः॥४०॥सत्वार्यस्तत्रगतवान्यत्रासौमंगलध्वनिः॥तत्रमंडपमध्यस्था
विस्तीर्णरत्नविलोहिना॥४१॥वेश्यानंगवतीनामविभूतिद्वादशीव्रतं॥समाप्तोमाघमासस्यलवणाचलमुत्तमं।
४२॥निवेदयंतीगुरवेत्र्यप्यांकोपस्कारान्वितं॥अजंकृत्वाहृषीकेशोसोवर्ष्मभिरपादपं॥४३॥तांतुहृष्टात

स्नाभ्यां इदं च परिकीर्तितं ॥ किमेभिः कृमलैः कार्यं वरं विष्णुरलंकृतः ॥ ४४ ॥ इति भक्तिस्तदा जाता दंपत्योस्तु नरेश्व
र ॥ तत्प्रसंगात्समभ्यर्च्य केशवं लवणाचलं ॥ ४५ ॥ शय्यां च पुष्पप्रकारैः पूजितां च स्वसद्मगाः ॥ अथानंगव
ती तुष्टा तयोर्दिनत्रातत्रयं ॥ ४६ ॥ नगृहीतं तत्सामोदकुसत्वाच्च वनात् ॥ अनंगवत्या च पुनस्तयोरन्नं
चतुर्विधं ॥ ४७ ॥ आनीयमाह तं चान्नं भुज्यतामिति भूपते ॥ ताभ्यां तु तदपि त्यक्तं प्रोक्ष्यावः श्वो वरानने ॥
४८ ॥ प्रसंगादुपवासेन नवाद्यस्तु खमावयोः ॥ जन्मप्रभृति पापिष्ठौ कुकर्मौ च हद व्रते ॥ ४९ ॥ तत्प्रसंगात्त
योर्मध्ये धर्मलेशोस्तु तेप्रजो ॥ इति जागरणं ताभ्यां तत्प्रसंगादनुष्ठितं ॥ ५० ॥ प्रभाते च तया दत्ता शय्याम
लवणाचलं ॥ ग्रामाश्च गुरवे भक्त्या विप्रेभ्यो द्वादशैव तु ॥ ५१ ॥ वस्त्रालंकारसंयुक्ता गावश्च कनकान्विताः ॥
भोजनं च सुहृन्मित्रदीनांधान्कृपणैः समं ॥ ५२ ॥ तच्च लुब्धकदंपत्यं पूजयित्वा विसर्जितं ॥ स भवान्लु
ब्धको जातः सपत्नीको नरेश्वर ॥ ५३ ॥ पुष्करमवरात्तस्मात्केशवस्य च सपूजनात् ॥ विनष्टाशेषपापस्य
तव पुष्कर मंदिरे ॥ ५४ ॥ तव सत्वस्य माहात्म्यादन्येन तपसा नृप ॥ यथा कामगमं यानं लोकनाथश्चतुर्मु
खः ॥ ५५ ॥ संतुष्टस्तु वराजेंद्र ब्रह्मरूपी जनार्दनः ॥ साप्यनंगवती वेश्या कामदेवस्य सांप्रतं ॥ ५६ ॥ पत्नीस्तु
पत्नी संजाता तस्याः प्रीतिरिति श्रुता ॥ लोकेशानी वजननी सकलामरपूजिता ॥ ५७ ॥ तस्मादुत्सृज्य राजेंद्र पुष्क

रेतन्महीतले ॥ गंगातटं समाश्रित्य विभूति द्वादशी व्रतं ॥ ५८ ॥ कुरु राजेंद्र निर्वाणमवश्यं समवाप्स्यसि ॥ ५९ ॥
श्रीनंद्युवाच ॥ ॥ इत्युक्त्वा समभून्निर्ब्रह्मा तत्रैवांतरधीयत ॥ राजा यथोक्तं च पुनरकरोत्पुष्पवाहनः ॥ ५९ ॥ इद
मा चरतो ब्रह्मन्नखंड व्रतमाचरेत् ॥ यथा कथंचित्कालेन द्वादशा द्वादशीमुने ॥ ६० ॥ कर्तव्या शक्तितो देया वि
प्रेभ्यो दक्षिणा नघ ॥ न वित्तशाठ्यं कुर्वीत भक्त्या तुष्यति केशवः ॥ ६१ ॥ इति कलुषविदारणं जनानामपि पृ
ती हरपोवाथ नक्ता ॥ मतिमपि च ददाति देवलोके वसति स कोटिशतानि वत्सराणां ॥ ६२ ॥ ॥ इति श्रीमत्स्य
पुराणे नंदिनारदसंवादे विभूति द्वादशी व्रतं ॥ ॥ श्रीनंद्युवाच ॥ ॥ अथातः संप्रवक्ष्यामि व्रतषष्टिमनुत्तमं ॥ रु
द्रेणाभिहितां दिव्यां महापातकनाशनीं ॥ १ ॥ नक्तमब्दं चरित्वा तु गत्वा सार्द्धकुटुंबिने ॥ हैमं चक्रं त्रिशूलं च
दद्याद्विप्राय वाससी ॥ २ ॥ शिवरूप नतो स्मीति शिवलोके च मोदते ॥ एतद्देवव्रतं नाम महापातकनाशनं ॥
३ ॥ यस्त्वेकभक्तेन समं क्षिपेद्वृषम मन्वितां ॥ धेनुं तिलमयीं दद्यात्स पदं याति शांकरं ॥ ४ ॥ एतद्रुद्रव्रतं ना
म पापशोकविनाशनं ॥ यस्तु नीलोत्पलं हैमं शर्करापात्रसंयुतं ॥ ५ ॥ एकांतरितनक्ताशी समांते वृषसंयु
तं ॥ स वैष्णवं पदं याति लीलाव्रतमिदं स्मृतं ॥ ६ ॥ आषाढादि चतुर्मासमभ्यंगं वर्जयेन्नरः ॥ भोजनोपस्क
रं दद्यात्स याति भवनं हरेः ॥ ७ ॥ जनप्रीतिकरं नॄणां प्रीतिव्रतमिहोच्यते ॥ वर्जयित्वा मधौ यस्तु दधिक्षीर

रघ तैक्षवं॥८॥ दद्याद्वस्त्राणि सूक्ष्माणि रसपात्रेण संयुतं॥ संपूज्य विप्रमिथुनं गौरी मे प्रीयतामिति॥९॥ एतत्सौ
रीव्रतं नाम नवानीलोत्कदायकं॥ पुष्पादौ वैत्रपोदर्पं कृत्वा नक्तमथो पुनः॥१०॥ अशोककांचनं दत्वा इक्षु
युक्तं दशांगुलं॥ विप्राय वस्त्रसंयुक्तं प्रद्युम्नः प्रीयतामिति॥११॥ कल्पं विष्णुपदे स्थित्वा विशोकः स्यात्पुनर्नरः॥
एतत्कामव्रतं नाम सदाशोकविनाशनं॥१२॥ आषाढादिव्रवायस्तु वर्जयेन्नकर्त्तनं॥ वार्त्ताकिं च चतुर्मासिं मधु
सर्पिर्गुडान्वितं॥१३॥ कार्त्तिक्यां तत्पुनर्हैमं ब्राह्मणाय निवेदयेत्॥ स रुद्रलोकमाप्नोति शिवव्रतमिदं स्मृ
तं॥१४॥ वर्जयेद्यस्तु पुष्पाणि हेमंतशिशिरावृतौ॥ पुष्पत्रयं च फाल्गुन्यां कृत्वा शक्त्या तु कांचनं॥१५॥
दद्याद्विकालवेलायां प्रीयेतां शिवकेशवौ॥ दत्वा परं पदं याति सौम्यव्रतमिदं स्मृतं॥१६॥ फाल्गुन्यादितृतीया
यां लवणं यस्तु वर्जयेत्॥ समाप्ते शयनं दद्यात् गृहं चोपस्करान्वितं॥१७॥ संपूज्य विप्रमिथुनं भवानी प्री
यतामिति॥ गौरीलोके वसेत्कल्पं सौभाग्यव्रतमुच्यते॥१८॥ संध्यामौनं नरः कुर्यात्समाप्ते घृतकुंभकं॥
वस्त्रयुग्मं तिलान्घंटां ब्राह्मणाय निवेदयेत्॥१९॥ सारस्वतं पदं याति पुनरावृत्तिदुर्लभं॥ एतत्सारस्व
तं नाम रूपविद्याप्रदायकं॥२०॥ लक्ष्मीमभ्यर्च्य पंचम्यामुपवासी भवेन्नरः॥ समाप्ते हैमकमलं दद्या
द्धेनुसमन्वितं॥२१॥ स वैष्णवं पदं याति लक्ष्मीवान्सप्तजन्मनि॥ एतत्संपद्व्रतं नाम सदा पापविनाशनं॥

२२॥ कृत्वोपलेपनं शंभोरग्रतः केशवस्य च॥ यावदब्दं पुनर्दद्याद्धेनुं जलघटान्वितां॥२३॥ जन्मायुतं स राजा स्यात्त
तः शिवपुरं व्रजेत्॥ एतत्सर्वव्रतं नाम सर्वकामप्रदायकं॥२४॥ अश्वत्थं भास्करं गंगां प्रणम्यैकत्र वाग्यतः॥
एकनक्तव्रतं कुर्यादब्दमेकं विमत्सरः॥२५॥ व्रतांते विप्रमिथुनं पूज्यं धेनुत्रयान्वितं॥ वृक्षं हिरण्मयं दद्यात्सो
ऽश्वमेधफलं भवेत्॥२६॥ एतत्कीर्त्तिव्रतं नाम भूतिकीर्त्तिफलप्रदं॥ घृतेन स्नापनं कृत्वा शंभोर्वा केशवस्य च॥२७॥
अक्षताभिः सपुष्पाभिः कृत्वा गोमयमंडलं॥ तिलधेनुसमोपेतं समाप्ते हेमपंकजं॥२८॥ शुद्धमष्टांगुलं दद्यात्
शिवलोके महीयते॥ सामगायनतश्चैवका मधुव्रतमुच्यते॥२९॥ नवम्यामेकभक्तं तु कृत्वा कन्याश्च शक्ति
तः॥ भोजयित्वा समं दद्याद्धेनुं कंचुकवाससी॥३०॥ हैमं सिंहं च विप्राय दत्वा शिवपदं व्रजेत्॥ जनार्बुदं सरू
पः स्याच्छत्रुभिश्चापराजितः॥३१॥ एतद्वीरव्रतं नाम नारीणां च सुखप्रदं॥ यावत्समं भवेद्यस्तु पंचदर्पापयो
व्रतं॥३२॥ समांते श्राद्धकृद्दद्यात् गावः पंच पयस्विनीः॥ वासांसि च पिशंगानि जलकुंभयुतानि च॥३३॥ सया
ति वैष्णवं लोकं पितॄणां तारयेच्छतं॥ कल्पांते राजः स्यात्सितव्रतमिदं स्मृतं॥३४॥ चैत्रादिचतुरो मासान्ज
लं दद्यादयाचितं॥ व्रतांते मणिकं दद्याद्रत्नवस्त्रसमन्वितं॥३५॥ तिलपात्रं हिरण्यं च ब्रह्मलोके महीयते॥
कल्पांते नृपतिर्नमानेंद्रव्रतमुच्यते॥३६॥ पंचामृतेन स्नपनं कृत्वा संवत्सरं विभोः॥ वत्सरांते पुनर्द

म० पु० द्याधेनुं पंचाम्ह तेन हि ॥ विप्राय दद्याच्छंखं च स पदं याति शोकरं ॥ राजा भवति कल्पांते धृतिव्रतमिदं स्मृतं ॥ ३८ ॥ वर्ज्ज
१४४ यित्वा पुमान्मांसमब्दांते गोप्रदो भवेत् ॥ तद्धेम मृगं दद्यात्सोश्वमेधफलं लभेत् ॥ ३९ ॥ अहिंसाव्रतमित्युक्तं कल्पां
ते भूपतिर्भवेत् ॥ माघमास्युषसि स्नानं कृत्वा दंपत्यमर्चयेत् ॥ ४० ॥ भोजयित्वा यथाशक्त्या माल्यवस्त्रविभूषणैः ।
सूर्यलोके वसेत्कल्पं सूर्यव्रतमिदं स्मृतं ॥ ४१ ॥ आषाढादिचतुर्मासं प्रातः स्नायी भवेन्नरः ॥ विप्रेषु भोजनं दद्या
त्कार्त्तिक्यां गोप्रदो भवेत् ॥ ४२ ॥ स वैष्णवं पदं याति विष्णुव्रतमिदं स्मृतं ॥ अयनादयनं यावद्वर्ज्जयेत्पुष्पसर्पिषी ॥
४३ ॥ तदंते पुष्पमल्लानि घृतधेन्वा सहैव तु ॥ दद्याच्छिवपदं गच्छेद्विप्राय घृतपायसं ॥ ४४ ॥ एतच्छीलव्रतं नाम
शीलारोग्यफलप्रदं ॥ संध्यादीपप्रदो यस्तु समंते तैलवर्ज्जयेत् ॥ ४५ ॥ समांते वापि कां दद्याच्चक्रमूले च कां
चने ॥ वस्त्रयुग्मं च विप्राय तेजस्वी च स चेदिह ॥ ४६ ॥ रुद्रलोकमवाप्नोति दीपव्रतमिदं स्मृतं ॥ कार्त्तिकीका
र्त्तिकादिर्यः प्राश्य गोमूत्रयावकं ॥ ४७ ॥ नक्तं चरेदष्टमेकमब्दांते गोप्रदो भवेत् ॥ गौरीलोके वसेत्कल्पं ततो
राजा भवेदिह ॥ ४८ ॥ एतद्रुद्रव्रतं नाम सदा कल्याणकारकं ॥ वर्ज्जयेत्चैत्रमासे च यश्च गंधानुलेपनं ॥
४९ ॥ छत्रं गां च कृत्वा दत्वा विप्राय सितवाससी ॥ वारुणं पदमाप्नोति दीप्तिव्रतमिदं स्मृतं ॥ ५० ॥ वैशाखे पु रा म०
ष्पलवणं वर्ज्जयित्वा तु गोप्रदः ॥ भूत्वा विष्णुपदे कल्पं स्थित्वा राजा भवेदिह ॥ ५१ ॥ एतत्कांतिव्रतं नाम कांति १४४

कार्त्तिफलप्रदं ॥ ब्रह्मांडं कांचनं कृत्वा तिलराशिसमन्वितं ॥ ५२ ॥ त्र्यहं तिलप्रदो भूत्वा वह्निं संतर्प्य च द्विजं ॥ संपूज्य विप्र
दंपत्यं माल्यवस्त्रविभूषणैः ॥ ५३ ॥ शक्तितस्त्रिपलादूर्ध्वं विश्वात्मा प्रीयतामिति ॥ पुण्येऽह्नि विप्राय नं ब्रह्म नूया
त्स पुनर्भवं ॥ ५४ ॥ एतद्ब्रह्मपदं शांते निर्वाणपददायकं ॥ यश्चोभयमुखीं दद्यात्प्रभूतकनकान्वितां ॥ ५५ ॥
दिनं पयोव्रतं तिष्ठेत्स याति परमं पदं ॥ एतद्धेनुव्रतं नाम पुनरावृत्तिदुर्लभं ॥ ५६ ॥ त्र्यहं पयोव्रतः स्थित्वा
कांचनं कल्पपादपं ॥ पलादूर्ध्वं यथाशक्त्या तंदुलस्य पसंयुतं ॥ ५७ ॥ दत्वा ब्रह्मपदं याति कल्पव्रतमिदं स्मृ
तं ॥ मासोपवासी यो दद्याद्धेनुं विप्राय शोभनां ॥ ५८ ॥ स वैष्णवं पदं याति भीमव्रतमिदं स्मृतं ॥ दद्याद्विंशपलादू
र्ध्वं महीं कृत्वा कांचनीं ॥ ५९ ॥ दिनं पयोव्रतस्तिष्ठेत् रुद्रलोके महीयते ॥ धराव्रतमिदं प्रोक्तं सप्तकल्पशता
नुगं ॥ ६० ॥ माघमासेऽथ चैत्रे वा गुडधेनुप्रदो भवेत् ॥ गुडव्रतस्तृतीयायां गौरीलोके महीयते ॥ ६१ ॥ महाव्रत
मिदं नाम परमानंदकारकं ॥ पक्षोपवासी यो दद्याद्विप्राय कपिलाद्वयं ॥ ६२ ॥ स ब्रह्मलोकमाप्नोति देवासुरसु
पूजितं ॥ कल्पांते स च राजा स्यात्प्रभाव्रतमिदं स्मृतं ॥ ६३ ॥ वत्सरं त्वेकभक्ताशी सभक्ष्यजलकुंभदः ॥ शिवलोके
वसेत्कल्पं प्राप्तिव्रतमिदं स्मृतं ॥ ६४ ॥ नक्ताशी चाष्टमीषु स्याद्वत्सरांते च धेनुदः ॥ पौरंदरं याति सुगतिव्रत
मुच्यते ॥ ६५ ॥ विप्रायेंधनदो यस्तु वर्षादि चतुरस्त्वहन ॥ घृतधेनुप्रदोंते च स परं ब्रह्म गच्छति ॥ ६६ ॥ वैश्वानर

म॰पु॰
१४५

व्रतंनामसर्वपापप्रणाशनं॥एकादशंपांचनक्ताशीपक्षकविनिवेदयेत॥६७॥समांतेवैष्णवंहैमंसविष्णोःपद
माप्नुयात॥एतत्कल्पव्रतंनामकल्पांतेराज्यभाग्भवेत॥६८॥पायसाशीसमांतेतुदद्याद्विप्रायगोयुगं॥ल
क्ष्मीलोकेवसेत्कल्पमेतद्देवीव्रतंस्मृतं॥६९॥सप्तम्यांनक्तभुक्दद्यात्समांतेगांपयस्विनीं॥सूर्यलोकमवा
प्नोतिभानुव्रतमिदंस्मृतं॥७०॥चतुर्थ्यांनक्तभुक्दद्यादब्दांतेहेमवारणं॥व्रतंवैनायकंनामशिवलोक
फलप्रदं॥७१॥महाफलानियस्त्यक्त्वाचतुर्मासंद्विजातये॥हैमानिकार्तिकेदद्यात्गोयुगेनसमंनरः॥७२॥
एतत्फलव्रतंनामविष्णुलोकफलप्रदं॥यादशाद्दशीर्यस्तुसमाप्योपोषणेनच॥७३॥गोवस्त्रकांचनैर्वि
प्रान्पूजयेच्छक्तितोनरः॥परमंपदमाप्नोतिविष्णुव्रतमिदंस्मृतं॥७४॥कार्तिक्यांपोषोत्सर्गंकृत्वानक्तंसमा
चरेत॥शैवंपदमवाप्नोतिवृषव्रतमिदंस्मृतं॥७५॥कृच्छ्रांतेगोप्रदःकुर्याद्भोजनंशक्तितःपदं॥विप्राणांशांक
रंयातिप्राजापत्यमिदंस्मृतं॥७६॥चतुर्दश्यांतुनक्ताशीसमांतेगोधनप्रदः॥शैवंपदमवाप्नोतित्रैयंबकमि
दंव्रतं॥७७॥सप्तरात्रोषितोदद्यात्घृतकुंभंद्विजातये॥घृतव्रतमिदंप्राहुर्ब्रह्मलोकफलप्रदं॥७८॥आका
शशायीसमादद्याद्धेनुमंतेपयस्विनीं॥शक्रलोकेवसेन्नित्यमिंद्रव्रतमिदंस्मृतं॥७९॥अनग्निपक्वमश्नाति रामः
तृतीयायांतुयोनरः॥गांदद्याच्छिवमभ्येतिपरमात्मनिवर्जितं॥८०॥इहलोकानंदंकृत्वाश्रियोव्रतमिदंस्मृतं॥ १४५

हैमंपलद्वयाद्धूर्ध्वंरथमश्वयुगान्वितं॥८१॥ददत्कृतोपवासःस्यात्दिविकल्पशतंवसेत॥कल्पांतेराजरा
जःस्यादश्वव्रतमिदंस्मृतं॥८२॥तद्वधेमरथंदद्यात्करिभ्यांसयुतंनरः॥सत्यलोकेवसेत्कल्पंसहस्रमथभूप
तिः॥८३॥नवेद्युपोषितोभूत्वाकरिव्रतमिदंस्मृतं॥उपवासंपरित्यज्यसमांतेगोप्रदोभवेत॥८४॥यक्षाधि
पत्यमाप्नोतिवरुणव्रतमुच्यते॥निशिकृत्वाजलेवासंप्रभातेगोप्रदोभवेत॥८५॥वारुणंलोकमाप्नोतिव
रुणव्रतमुच्यते॥चांद्रायणंचयःकुर्याद्धैमचंद्रंनिपोजयेत॥८६॥चंद्रव्रतमिदंप्रोक्तंचंद्रलोकफलप्रदं॥
ज्येष्ठेपंचतपाःसायंहेमधेनुप्रदोनरः॥८७॥यात्यष्टमीचतुर्दश्योरुद्रव्रतमिदंस्मृतं॥सकृद्भुरकक्ष्कृत्वा
तृतीयायांशिवालये॥८८॥समांतेधेनुदोपातिभवानीव्रतमुच्यते॥माघेनिशार्द्रवासाःस्यात्सप्तम्यांगोप्र
दोभवेत॥८९॥दिविकल्पमुषित्वेहराजास्यात्पवनंव्रतं॥त्रिरात्रोपोषितोदद्यात्फाल्गुन्यांभवनंशुभं॥
९०॥आदित्यलोकमाप्नोतिधामव्रतमिदंस्मृतं॥त्रिसंध्यंपूज्यदंपत्यमुपवासीविभूषकैः॥९१॥अग्रंग
वःसमाप्नोतिमोक्षमिंद्रव्रतादिह॥दत्वासितद्वितीयायामिंदोर्लवणभाजनं॥९२॥समांतेगोप्रदोपातिवि
प्रायशिवमंदिरं॥कल्पांतेराजराजःस्यात्सोमव्रतमिदंस्मृतं॥९३॥प्रतिपक्षैकभक्ताशीसमाप्तेकपिलाप्र
दः॥वैश्वानरपदंयातिशिवव्रतमिदंस्मृतं॥९४॥दशम्यामेकभक्ताशीसमांतेदशधेनुदः॥एतद्विष्वव्रतं

नाममहापातकनाशनं॥९५॥यःपठेच्छृणुयाद्वापिव्रतषष्टिमनुत्तमं॥मन्वंतरशतंसोपिगंधर्वाधिपतिर्भवेत्॥९६॥
षष्टिव्रतंनारदपुण्यमेतन्नवोदितंविश्वजनीनमन्यत्॥श्रोतुंतवेच्छातदुदीरयामिप्रियेषुकिंवाकथनीयमस्ति॥
९७॥ ॥इतिश्रीमत्स्यपुराणेनंदिनारसंवादेषष्टिव्रतंनाम॥ ॥श्रीनंदिउवाच॥ ॥नैमर्त्यंनवशुद्धिश्चविनास्ना
नंनविद्यते॥तस्मान्मनोविशुध्यर्थंस्नानमादौविधीयते॥१॥अनुधृतैरुधृतैर्वाजलैःस्नानंसमाचरेत्॥ती
र्थंप्रकल्पयेद्विद्वान्मूलमंत्रेणमंत्रवित्॥२॥नमोनारायणायेतिमूलमंत्रउदहृतः॥दर्भपाणिस्तुवि
धिनाआचांतःप्रयतःशुचिः॥३॥चतुर्हस्तसमायुक्तंचतुरस्रंसमंततः॥प्रकल्प्यावाहयेत्गंगामेभिर्मंत्रैर्वि
चक्षणः॥४॥विष्णोःपादप्रसूतासिवैष्णवीविष्णुदेवता॥त्राहिनस्त्वेनसस्तस्मादाजन्ममरणांतिकात्॥५॥
तिस्रःकोट्योर्द्धकोटीचतीर्थानांवायुरब्रवीत्॥दिविभूम्यंतरिक्षेचतानितेसंतिजाह्नवि॥६॥नंदिनीत्येवते
नामदेवेषुनलिनीतिच॥दक्षापृथ्वीचविहगाविश्वकायामृताशिवा॥७॥विद्याधरीसुप्रशांतातथालोक
प्रसादिनी॥क्षमाचजाह्नवीचैवशांताशांतिप्रदायिनी॥८॥एतानिपुण्यनामानिस्नानकालेप्रकीर्त्तयेत्॥
भवेत्संनिहितातत्रगंगात्रिपथगामिनी॥९॥सप्तवाराभिजप्तेनकरसंपुटयोजितं॥मूर्ध्निकुर्याज्जलंभूय राम १४६
स्त्रिचतुःपंचसप्तकं॥१०॥स्नानंकुर्यान्मृदातद्वदामंत्र्यतुविधानतः॥अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुं

धरे॥११॥मृत्तिकेहरतेपापंयन्मयापूर्वसंचितं॥उद्धृतासिवराहेणकृष्णेनशतबाहुना॥१२॥नमस्तेसर्वलो
कानांप्रभवारणिसुव्रते॥एवंस्नात्वाततःपश्चादाचम्यचम्यचविधानतः॥१३॥उत्थायवाससीशुक्लेशुद्धे
तुपरिधारयेत्॥तदास्तर्पणंकुर्यात्त्रैलोक्याप्यायनायवै॥१४॥देवायक्षास्तथानागागंधर्वाप्सरसोसुराः॥
क्रूराःसर्पाःसुपर्णाश्चतरवोरेजंभकाःखगाः॥१५॥वाय्वाधाराजलधाराश्चतथैवाकाशगामिनः॥निराधाराश्चये
जीवापेतधर्मरतास्तथा॥१६॥तेषामाप्यायनायैतद्दीयतेसलिलंमया॥कृतोपवीतीदेवेभ्योनिवीतीचभवेत्त
तः॥१७॥मनुष्यांस्तर्पयेद्भक्त्याब्रह्मपुत्रानृषींस्तथा॥सनकश्चसनंदश्चतृतीयश्चसनातनः॥कपिलश्चासुरि श्व
श्चैववोढुःपंचशिखस्तथा॥सर्वेतेतृप्तिमायांतुमद्दत्तेनांबुनासदा॥१९॥मरीचिमत्र्यंगिरसंपुलस्त्यंपुल
हंक्रतुं॥प्रचेतसंवसिष्ठंचभृगुंनारदमेवच॥२०॥देवब्रह्मऋषीन्सर्वांस्तर्पयेदक्षतोदकैः॥अपसव्यंत
तःकृत्वासव्यंजान्वाच्यभूतले॥२१॥अग्निष्वात्तास्तथासौम्याहविष्मंतस्तथोष्मपाः॥सुकालिनोबर्हि
षदस्तथान्येआज्यपाःपुनः॥२२॥संतर्प्याःपितरोभक्त्यासतिलोदकचंदनैः॥यमायधर्मराजायमृत्यवेचां
तकायच॥२३॥वैवस्वतायकालायसर्वभूतक्षयायच॥औदुंबरायदध्नायनीलायपरमेष्ठिने॥२४॥वृ
कोदरायचित्रायचित्रगुप्तायवैनमः॥दर्भपाणिस्तुविधिनापितॄन्स्वांस्तर्पयेत्ततः॥२५॥पित्रादीन्नामगो
न

म०पु०
१४७

न्नेणतथामातामहानपि॥ सेतर्प्यविधिनानेनयाइमंमंत्रमुदीरयेत्॥२६॥ येबांधवाबांधवायेयेन्यजन्मनबांध
वाः॥तेतृप्तिमखिलायांतुयश्चास्मत्तोभिवांछति॥२७॥ततश्चाचम्यविधिवदालिखेत्पद्ममग्रतः॥अक्षताभिः
सपुष्पाभिःसजलारुण्यचंदनं॥२८॥अर्घंदद्यात्प्रयत्नेनसूर्यनामानिकीर्तयन्॥नमस्तेविष्णुरूपायन
मोविष्णुमुखायवै॥२९॥सहस्ररश्मयेनित्यंनमस्तेसर्वतेजसे॥नमस्तेशिवसर्वेशनमस्तेसर्ववत्सल॥३०
जगत्स्वामिन्नमस्तेस्तुदिव्यचंदनभूषित॥नमस्तेसर्वलोकेशजगत्सर्वंप्रबोध्यसे॥३१॥सुकृतंदुःकृतं
चैवसर्वंपश्यसिसर्वगः॥सत्यदेवनमस्तुभ्यंप्रसादममभास्कर॥३२॥दिवाकरनमस्तेस्तुप्रभाकरनमोस्तु
ते॥एवंसूर्यंनमस्कृत्यत्रिःकृत्वाचप्रदक्षिणं॥द्विजंगांकांचनंस्पृष्ट्वाततोविष्णुपदंव्रजेत्॥३३॥ ॥इतिश्रीम
त्स्यपुराणेनंदिनारदसंवादेस्नानविधिः॥श्रीनंदिरुवाच॥अतःपरंप्रवक्ष्यामिप्रयागस्योपवर्णनं॥मा
र्कंडेयेनकथितंयत्पुरापांडुसूनवे॥१॥भारतेतुयदावृत्तेप्राप्तराज्येपृथासुते॥एतस्मिन्नंतरेराजाकुंती
पुत्रोयुधिष्ठिरः॥२॥भ्रातृशोकेनसंतप्तश्चिंतयानःपुनःपुनः॥आसीत्सुयोधनोराजाएकादशचमू
पतिः॥३॥अस्मान्संताप्यबहुशःसर्वेतेनिधनंगताः॥वासुदेवंसमाश्रित्यपंचशेषास्तुपांडवाः॥४॥
हत्वाभीष्मंचद्रोणंचकर्णंचैवमहाबलं॥दुर्योधनंचराजानंपुत्रभ्रातृसमन्वितं॥५॥राजानोनिहताःस

राम
१४७

र्वेयेचान्येशूरमानिनः॥किंनोराज्येनगोविंदकिंभोगैर्जीवितेनवा॥६॥धिक्कष्टमितिसंचिंत्यराजावैक्लव्य
मागतः॥निर्विचेष्टोनिरुत्साहःकिंचित्तिष्ठत्यधोमुखः॥७॥लब्धसंज्ञोयदाराजाचिंतयन्सपुनःपुनः॥
कामेगतिर्नियोगोवानियमंतीर्थमेववा॥८॥येनाहंशीघ्रमामुंचेमहापातककिल्बिषात्॥यत्रस्थित्वा
नरोयातिविष्णुलोकमनुत्तमं॥९॥कथंपृच्छामिवैकृष्णंयेनेदंकारितोस्म्यहं॥धृतराष्ट्रंकथंपृच्छेयस्यपुत्रश
तंहतं॥१०॥एवंवैक्लव्यमापन्नोधर्मराजोयुधिष्ठिरः॥रुदंतिपांडवाःसर्वेभ्रातृशोकपरिप्लुताः॥११॥येच
तत्रमहात्मानःसमेताःपांडवाःस्थिताः॥कौंतीचद्रौपदीचैवयेचतत्रसमागताः॥१२॥भूमौनिपतिताःसु
र्वेरुदंतश्चसमंततः॥वाराणस्यांचमार्कंडस्तेनज्ञातोयुधिष्ठिरः॥१३॥यथावैक्लव्यमापन्नोरुदमानस्तुदुःखि
तः॥अचिरेणैवकालेनमार्कंडेयोमहातपाः॥१४॥सप्राप्तोहास्तिनपुरंराजद्वारेसतिष्ठति॥द्वारपालोपितंदृ
ष्ट्वाराज्ञःकथितवान्द्रुतं॥१५॥त्वांद्रष्टुकामोमार्कंडोद्वारितिष्ठतिवैमुनिः॥त्वरितोधर्मपुत्रस्तुद्वारमागादतः
परं॥१६॥युधिष्ठिरउवाच॥स्वागतंतेमहाभागस्वागतंतेमहामुने॥अद्यमेसफलंजन्मअद्यमेतारितंकुलं
१७॥श्रीनंदिरुवाच॥॥सिंहासनउपस्थाप्यपादशौचार्चनादिभिः॥युधिष्ठिरोमहात्मावैपूजयामासतंमुनिं॥
१९॥ततःसतुष्टोमार्कंडःपूजितश्चाहतंनृपं॥आख्याहित्वरितंराजन्किमर्थंरुदितंत्वया॥२०॥किमर्थंविक्ल

म०पु० १४९

वीभूतः कायधाते किमप्रियं॥२०॥ युधिष्ठिर उवाच॥॥ अस्माकं चैव यद्वृत्तं राज्यस्यार्थे महामुने॥ सर्वमेतद्विदि
त्वा तु चिंता वशमुपागतः॥२१॥॥ श्रीमार्कंडेय उवाच॥॥ शृणु राजन्महाबाहो क्षत्रधर्मव्यवस्थितिं॥ नै
वद्दृष्टं रणे पापं युध्यमानस्य धीमतः॥२२॥ किं पुना राज्यधर्मेण क्षत्रियस्य विशेषतः॥ तू देवहृदये कृत्वा
तस्मात्पापं न चिंतयेत्॥२३॥ ततो युधिष्ठिरो राजा प्रणम्य शिरसा मुनिं॥ प्रणम्य विनयोपेतः सर्वपातकना
शनं॥२४॥॥ युधिष्ठिर उवाच॥॥ इच्छामि त्वां महाप्राज्ञ नित्यं त्वां कृत्स्नदर्शनं॥ कथयस्व समासेन येन
मुच्येत किल्बिषात्॥२५॥ श्रीमार्कंडेय उवाच॥॥ शृणु राजन्महाबाहो सर्वपातकनाशनं॥ प्रयागगम
नं श्रेष्ठं नराणां पुण्यकर्मणां॥२६॥॥ इति श्रीमत्स्यपुराणे नंदिनारदसंवादे प्रयागमाहात्म्ये॥॥ युधि
ष्ठिर उवाच॥॥ भगवन्श्रोतुमिच्छामि पुराकल्पे यथास्थितं॥ ब्रह्मणा देवमुख्येन यथावत्कथयिष्यति॥१॥
कथयिष्यामि ते वत्स यच्छ्रेष्ठं तत्र यत्फलं॥ पुरा हि सर्वविप्राणां कथ्यमानं मया श्रुतं॥२॥ आ प्रयागे प्रतिष्ठाना
दा पुराद्वासुकेर्ह्रदात्॥ कंबलाश्वतरौ नागौ नागश्च बहुमूलकः॥३॥ एतत्प्रजापतेः क्षेत्रं त्रिषु लोकेषु विश्रु
तं॥ तत्र स्नाता दिवं यांति ये मृतास्ते पुनर्भवं॥४॥ ततो ब्रह्मादयो देवा रक्षां कुर्वंति संगताः॥ अन्ये च बहवस्ती
र्थाः सर्वपापहराः शुभाः॥५॥ न शक्ताः कथितुं राजन्बहुवर्षशतैरपि॥ संक्षेपेण प्रवक्ष्यामि प्रयागस्य तु

राम १४९

कीर्तनं॥६॥ षष्टिर्धनुः सहस्राणि यानि रक्षंति जाह्नवीं॥ यमुना रक्षति सदा सविता सप्तिवाहनः॥७॥ प्रयागे तु
विशेषेण सदा रक्षति वासवः॥ मंडलं रक्षति हरिर्दैवतैः सह संगतः॥८॥ तं वटं रक्षति सदा शूलपाणिर्महेश्वरः॥
स्थानं रक्षंति वै देवाः सर्वपापहरं शुभं॥९॥ स्वधर्मेण वृतो लोको नैव गच्छति तत्पदं॥ स्वल्पमल्पतरं पापं यदा तस्या
न्नराधिप॥१०॥ प्रयागं स्मरमाणस्य सर्वमायाति संक्षयं॥ दर्शनात्तस्य तीर्थस्य नामसंकीर्तनादपि॥११॥ मृत्ति
कालंभनाद्वापि नरः पापाद्विमुच्यते॥ पंचकुंडानि राजेंद्र तेषां मध्ये तु जाह्नवी॥१२॥ प्रयागस्य प्रवेशे तु पापं न
श्यति तत्क्षणात्॥ योजनानां सहस्रेषु गंगायाः स्मरणान्नरः॥१३॥ गंगायमुनयोर्मध्ये स्नातो मुच्येत किल्बिषा
त्॥ मनसा चिंतयन्कामानवाप्नोति सुपुष्कलान्॥१४॥ ततो गत्वा प्रयागं तु सर्वदेवाभिरक्षितं॥ ब्रह्मचारी च संस्ना
तं पितॄन्देवांश्च तर्पयेत्॥१५॥ ईप्सितांल्लभते कामान्यत्र यत्राभिजायते॥ तपनस्य सुता देवी त्रिषु लोकेषु वि
श्रुता॥१६॥ समागता महाभागा यमुना तत्र निम्नगा॥ तत्र सन्निहितो नित्यं साक्षाद्देवो महेश्वरः॥१७॥ दुःप्राप्यमा
नुषैः पुण्यं प्रयागे तु युधिष्ठिर॥ देवदानवगंधर्वा ऋषयः सिद्धचारणाः॥ तदुपस्पृश्य राजेंद्र स्वर्गलोके तु पास
ते॥१८॥॥ इति श्रीमत्स्यपुराणे नंदिनारदसंवादे प्रयागमाहात्म्ये॥॥ श्रीमार्कंडेय उवाच॥॥ शृणु राजन्प्रयाग
स्य माहात्म्यं पुनरेव तु॥ यत्श्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः॥१॥ आनर्तानां हि दरिद्राणां निश्चितं यद्वसा

यितं॥स्थानमुक्तं प्रयागं तु नारमेयं तु कदाचन॥२॥व्याधितो यदि वा दीनः क्रुद्धो वापि भवेन्नरः॥गंगायमुनयोर्म
ध्ये यस्तु प्राणान्परित्यजेत्॥३॥दीप्तकांचनवर्णाभैर्विमानैः सूर्यसन्निभैः॥गंधर्वाप्सरसां मध्ये स्वर्गे क्रीडति
मानवः॥४॥ईप्सितांल्लभते कामान्वदंति मुनिपुंगवाः॥सर्वरत्नमयैर्दिव्यैर्नानाध्वजसमाकुलैः॥५॥वरांग
नासमाकीर्णैर्मोदंते शुभलक्षणे॥गीतवादित्रनिर्घोषैः प्रसुप्तः प्रतिबुध्यते॥६॥यावन्न स्मरते जन्म ता
वत्स्वर्गे महीयते॥ततः स्वर्गात्परिभ्रष्टः क्षीणकर्मा दिवस्तुतः॥७॥हिरण्यरत्नसंपूर्णे समृद्धे जायते कुले॥
तदेव स्मरते तीर्थं स्मरणात्तत्र गच्छति॥८॥देशस्थो यदि वारण्ये विदेशे वाथवा गृहे॥प्रयागं स्मरमाणोपि य
स्तु प्राणान्परित्यजेत्॥९॥ब्रह्मलोकमवाप्नोति वदंति ऋषिपुंगवाः॥सर्वकामफला ह्यक्षा मही यत्र हि
रण्मया॥१०॥ऋषयो मुनयः सिद्धास्तत्र लोके स गच्छति॥स्त्रीसहस्राकुले रम्ये मंदाकिन्यास्तटे शुभे॥११॥मोदते ऋ
षिभिः सार्द्धं सुकृतेनेह कर्मणा॥सिद्धचारणगंधर्वैः पूज्यते दिवि दैवतैः॥१२॥ततः स्वर्गात्परिभ्रष्टो जंबूद्वीपपति
र्भवेत्॥ततः शुभानि कर्माणि चिंतयानः पुनः पुनः॥१३॥गुणवान्वित्तसंपन्नो भवतीह न संशयः॥कर्मणा
मनसा वाचा धर्मसत्यप्रतिष्ठितः॥१४॥गंगायमुनयोर्मध्ये यस्तु ग्रामं प्रयच्छति॥सुवर्णमपि मणिमुक्तां वा
यदि चान्यत्प्रतिष्ठितं॥१५॥स्वकार्ये परकार्ये वा देवताभ्यर्चनेपि वा॥फलं तस्य तत्तीर्थं यावत्पुण्यमाप्नुयात्

१६॥एवं तीर्थे न गृह्णीयात्पुण्येष्वायतनेषु च॥निमित्तेषु च सर्वेषु अप्रमत्तो भवेद्द्विजः॥१७॥कपिलां पाटलावर्णां
यस्तु धेनुं प्रयच्छति॥स्वर्णशृंगीं रूप्यखुरां कांस्यदोहां पयस्विनीं॥१८॥प्रयागे श्रोत्रियं संतं ग्राहयित्वा यथावि
धि॥शुक्लांबरधरं शांतं धर्मज्ञं वेदपारगं॥१९॥सा मम गाय प्रदातव्या गंगायमुनसंगमे॥वासांसि च महार्हाणि र
त्नानि विविधानि च॥२०॥यावद्रोमाणि तस्या गोः संति गात्रेषु सत्तम॥तावद्वर्षसहस्राणि स्वर्गलोके महीयते॥२१॥
यत्रासौ लभते जन्म सा गौस्तत्रापि जायते॥नच पश्यति तं घोरं नरकं कर्मणा॥२२॥उत्तरान्स कुरून्प्राप्य मोद
ते कालमक्षयं॥शतसहस्रो स्याद्द्यादेकां पयस्विनीं॥२३॥पुत्रान्दारांस्तथा भृत्यान्गौरेका प्रतिता
रयेत्॥तस्मात्सर्वेषु दानेषु गोदानं तु विशिष्यते॥२४॥दुर्गमे पततो घोरे महापातकसंभवे॥गौरेव रक्षां
कुरुते तस्माद्देया द्विजोत्तमे॥२५॥॥इति श्रीमत्स्यपुराणे नंदिनारदसंवादे प्रयागमाहात्म्यं॥॥युधिष्ठिर उवा
च॥यथा यथा प्रयागस्य माहात्म्यं कथितं त्वया॥यथा तथा प्रभुश्चेह सर्वपापैर्न संशयः॥१॥भगवन्केन
विधिना कर्तव्यो धर्मनिश्चयः॥प्रयागे यो विधिः प्रोक्तस्तन्मे ब्रूहि महामुने॥२॥श्रीमार्कंडेय उवाच॥॥कथयि
ष्यामि ते राजंस्तीर्थयात्राविधिक्रमं॥आर्षेण विधिना नेन यथा दृष्टं यथा श्रुतं॥३॥प्रयागतीर्थयात्रार्थी यः प्र
याति नरः क्वचित्॥बलीवर्दं समारूढः शृणु तस्यापि यत्फलं॥४॥नरके वसते घोरे गवां क्रोधो हि दारुणः॥सलि

म०पु०
१५०

लंचनगच्छतिपितरस्तस्यदेहिनः॥५॥यस्तुपुत्रांस्तथाबालान्स्थापयेत्पाययेत्तथा॥यथात्मनस्तथासर्वांस्तितो
विप्रेषुदापयेत्॥६॥ऐश्वर्यलोभमोहाद्वा गच्छेद्यानेनयोनरः॥पःफलंतस्यतत्सर्वंतस्माद्यानंविवर्जयेत्॥७॥
गंगायमुनयोर्मध्येयस्तुकन्यांप्रयच्छति॥आर्षेणैवविवाहेनयथाविभवसंभवं॥८॥नसपश्यतितंघोरंन
रकंतेनकर्मणा॥उत्तरान्सकुरून्गत्वामोदंतेलोकमक्षयं॥९॥पुत्रान्दारांश्चलभतेधार्मिकान्रूपसं
युतान्॥तत्रदानंप्रकर्तव्यंयथाविभवसंभवं॥१०॥तेनतीर्थफलंचैववर्द्धतेनात्रसंशयः॥स्वर्गेतिष्ठतिरा
जेंद्रयावदाभूतसंप्लवं॥११॥वटमूलेसमासाद्ययस्तुप्राणान्विमुंचति॥सर्वलोकानतिक्रम्यरुद्रलोकंस
गच्छति॥१२॥तत्रतेद्वादशादित्यास्तपंतेरुद्रसंस्थिताः॥निर्दहंतिजगत्सर्वंवटमूलंनदह्यते॥१३॥नष्टचंद्रा
र्कभुवनंयदाचैकार्णवंजगत्॥स्वपतेतत्रवैविष्णुर्यजमानः पुनः॥१४॥देवदानवगंधर्वाऋषयःसिद्ध पुनः
चारणाः॥लोकपालाश्चसाध्याश्चपितरोकसम्मताः॥१५॥सनत्कुमारप्रमुखास्तथैवपरमर्षयः॥अंगि
रःप्रमुखाश्चैवतथाब्रह्मर्षयोपरे॥१६॥यक्षानागाःसुपर्णाश्चसिद्धाश्चक्रधराश्चये॥सागराःसरितःशै
लानागाविद्याधराश्चये॥१७॥हरिश्चभगवानास्तेप्रजापतिपुरस्कृतः॥गंगायमुनयोर्मध्येपृथिव्याजघनं राम.
स्मृतं॥१८॥प्रयागंराजशार्दूलत्रिषुलोकेषुभारत॥श्रवणात्तस्यतीर्थस्यनामसंकीर्तनादपि॥१९॥मृत्तिका १५०

ध

लंभनाद्वापिनरःपापाद्विमुच्यते॥तत्राभिषेकंयःकुर्यात्संगमेसंशितव्रतः॥२०॥तुल्यंफलमवाप्नोतिरा
जसूयाश्वमेधयोः॥नदेववचनात्तात नलोकवचनात्तथा॥२१॥मतिरुत्क्रमणीयातेप्रयागगमनंप्रति॥द
शतीर्थसहस्राणिषष्टिकोट्यस्तथापराः॥२२॥तेषांसान्निध्यमत्रैवसततंकुरुनंदन॥यागतिर्योगयुक्तस्य
सत्त्वस्थस्यमनीषिणः॥२३॥सागतिस्त्यजतःप्राणान्गंगायमुनसंगमे॥नतेजीवंतिलोकेस्मिन्यत्रतत्रयु
धिष्ठिर॥२४॥येप्रयागेनसंप्राप्तास्त्रिषुलोकेषुवंचिताः॥एवंदृष्ट्वातुतत्तीर्थंप्रयागंपरमंपदं॥२५॥मुच्यते
सर्वपापेभ्यःशशांकइवराहुणा॥कंबलाश्वतरौनागौविपुलेयमुनातटे॥२६॥तत्रस्नात्वाचपीत्वाचसर्वपा
पैःप्रमुच्यते॥तत्रगत्वाचसंस्थानंमहादेवस्यधीमतः॥नरस्तारयतेसर्वान्दशपूर्वान्दशापरान्॥कृत्वा
भिषेकंतुनरःसोश्वमेधफलंलभेत्॥२८॥स्वर्गलोकमवाप्नोतियावदाभूतसंप्लवं॥पूर्वपार्श्वेतुगंगाया
स्त्रिषुलोकेषुभारत॥२९॥कूपंचैवतुसामुद्रंप्रतिष्ठानंचविश्रुतं॥ब्रह्मचारीजितक्रोधस्त्रिरात्रंयदितिष्ठति॥
३०॥सर्वपापविशुद्धात्मासोश्वमेधफलंलभेत्॥उत्तरेणप्रतिष्ठानाद्भागीरथ्यास्तुपूर्वतः॥३१॥हंसप्र
पतनंनामतीर्थंत्रैलोक्यविश्रुतं॥अश्वमेधफलंतस्मिन्स्नातमात्रेणभारत॥३२॥यावच्चंद्रश्चसूर्यश्चतावत्स्व
र्गेमहीयते॥उर्वशीरमणेविपुलेहंसपांडुरे॥३३॥परित्यजतियःप्राणान्शृणुतस्यापियत्फलं॥षष्टिवर्ष

सहस्राणि षष्टिवर्षशतानि च॥३४॥ सेव्यते पितृभिः सार्द्धं स्वर्गलोके नराधिप॥ उर्वशीं च सदा पश्येत् स्वर्ग
लोके नरोत्तम॥३५॥ पूज्यते सततं तत्र ऋषिगंधर्वकिन्नरैः॥ ततः स्वर्गात्परिभ्रष्टः क्षीणकर्मा दिवश्च्युतः॥३६
उर्वशीसदृशीनां तु कन्यानां लभते शतं॥ मध्ये नारीसहस्राणां बह्वीनां च पतिर्भवेत्॥३७॥ दशग्रामसहस्रा
णां भोक्ता भवति भूमिप॥ कांचीनूपुरशब्देन सुप्तोसौ प्रतिबुध्यते॥३८॥ भुक्त्वा तु विपुलान् भोगांस्तत्ती
र्थं स्मरते पुनः॥ अथ संध्यावटे रम्ये ब्रह्मचारी जितेंद्रियः॥३९॥ उपासीत शुचिः संध्यां ब्रह्मलोकमवाप्नुया
त्॥ कोटितीर्थं समाश्रित्य यस्तु प्राणान्परित्यजेत्॥४०॥ कोटिवर्षसहस्राणां स्वर्गलोके महीयते॥ ततः स्वर्ग
त्परिभ्रष्टः क्षीणकर्मा दिवश्च्युतः॥४१॥ सुवर्णमणिमुक्ताढ्ये कुले जायेत रूपवान्॥ ततो भोगवतीं स्नात्वा
वासुकेस्तत्र रेणुतु॥४२॥ दशाश्वमेधकं तीर्थं नाम तत्रापरं भवेत्॥ कृताभिषेकस्तु नरः सोश्वमेधफलं ल
भेत्॥४३॥ धनाढ्यो रूपवान् दक्षो दाता भवति धार्मिकः॥ चतुर्वेदेषु यत्पुण्यं यत्पुण्यं सत्यवादिषु॥४४॥ अ
हिंसायां तु यो धर्मो गमनादेव तत्फलं॥ कुरुक्षेत्रसमा गंगा यत्र तत्रावगाहिता॥४५॥ कुरुक्षेत्राद्दशगुणा कालिं
द्या यत्र संगता॥ यत्र गंगा महाभागा बहुतीर्था तपोधना॥४६॥ सिद्धक्षेत्रं हि तत्ज्ञेयं नात्र कार्या विचारणा॥ राम० १५१
क्षितौ तारयते मर्त्यान् नागांस्तारयते प्यधः॥४७॥ दिवि तारयते देवांस्तेन त्रिपथगा स्मृता॥ यावदस्थीनि गंगायां

तिष्ठंति हि शरीरिणां॥४८॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते॥ तीर्थानां परमं तीर्थं नदीनां तु महानदी
४९॥ मोक्षदा सर्वभूतानां महापातकिनामपि॥ सर्वत्र सुलभा गंगा त्रिषु स्थानेषु दुर्लभा॥५०॥ गंगाद्वारे प्रयागे
च गंगासागरसंगमे॥ तत्र स्नात्वा दिवं यांति ये मृतास्ते पुनर्भवं॥५१॥ सर्वेषामेव भूतानां पापोपहतचेतसां॥ ग
तिमन्विष्यमाणानां नास्ति गंगासमा गतिः॥५२॥ पवित्राणां पवित्रं च मंगलानां च मंगलं॥ महेश्वरशिरोभ्र
ष्टा सर्वपापहरा शुभा॥५३॥ इति श्रीनंदिनारदसंवादे प्रयागमाहात्म्यं॥ ॥श्रीमार्कंडेय उवाच॥ शृणु राज
न् प्रयागस्य माहात्म्यं पुनरेव तु॥ यत् श्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः॥१॥ मानसं नाम तीर्थं तु गंगाया
उत्तरे तटे॥ त्रिरात्रोपोषितो भूत्वा सर्वकामानवाप्नुयात्॥२॥ एतत्फलं परिप्राप्य तत्तीर्थं स्मरते पुनः॥ अ
कामो वा गंगायां विपद्यते॥३॥ मृतस्तु लभते स्वर्गं नरकं तु न पश्यति॥ ततः स्वर्गात्परिभ्रष्टः क्षीणकर्मा दिवश्च्यु
तः॥४॥ सुवर्णमणिमुक्ताढ्ये कुले महति जायते॥ षष्टितीर्थसहस्राणि स्वर्गलोके महीयते॥५॥ ततः स्वर्गात्परि
भ्रष्टो जंबूद्वीपपतिर्भवेत्॥ स भुक्त्वा विपुलान् भोगान् तत्तीर्थं लभते नरः॥६॥ जलप्रवेशं यः कुर्यात् संगमे लो
कविश्रुते॥ राहुग्रस्ते तथा सोमे विमुक्तः सर्वकिल्बिषैः॥७॥ सोमलोकमवाप्नोति सोमेन सह मोदते॥ षष्टिवर्षस
हस्राणि स्वर्गलोके महीयते॥८॥ स्वर्गे च शक्रलोके स्मिन् ऋषिगंधर्वसेविते॥ परिभ्रष्टस्तु राजेंद्रः समृद्धे जायते कु

म०पु०
१५२

ते॥९॥अधःशिरास्तु यो योज्वालामूर्ध्वपादः पिबेन्नरः शतं वर्षसहस्राणि स्वर्गलोके महीयते॥१०॥परिभ्रष्ट
स्तु राजेंद्र अग्निहोत्री भवेन्नरः॥चुकात्तु विपुलान् भोगांस्तत्तीर्थं भजते पुनः॥११॥यामुनेचोत्तरे कूले प्रयागस्य
तु दक्षिणे॥कणप्रमोचनं तीर्थं प्रयाणपरमं स्मृतं॥१२॥एकरात्रोषितः स्नात्वा ऋणैः सर्वैः प्रमुच्यते॥स्वर्गलो
कमवाप्नोति अनृणी च सदा भवेत्॥१३॥॥इति श्रीमत्स्यपुराणे नंदिनारदसंवादे प्रयागमाहात्म्यं॥॥युधिष्ठि
र उवाच॥॥एतत्श्रुतं प्रयागस्य पत्त्यपापरिकीर्त्तितं॥विशुद्धं मेद्य हृदयं प्रयागस्य तु कीर्तनात्॥१॥अनाश
कफलं ब्रूहि भगवंस्तत्र कीदृशं॥यं च लोकमवाप्नोति विमुक्तः सर्वकिल्बिषैः॥२॥श्रीमार्कंडेय उवाच॥॥शृ
णु राजन्प्रवक्ष्यामि अनाशकफलं त्विदं॥प्राप्नोति पुरुषो धीमान् श्रद्दधानो जितेंद्रियः॥३॥अहीनांगोप्यरो
गश्च पंचेंद्रियसमन्वितः॥अश्वमेधफलं तस्य गच्छतस्तु पदे पदे॥४॥कुलानि तारयेद्राजन्दश पूर्वान्दशापरा
न्॥मुच्यते सर्वपापेभ्यो गच्छेत्तु परमं पदं॥५॥॥युधिष्ठिर उवाच॥॥महाभागे हि धर्मज्ञ यस्त्वं वदसि मे प्रभो॥
अल्पेनैव प्रयत्नेन बहु न धर्म निवाप्नुयात्॥६॥अश्वमेधैस्तु बहुभिः प्राप्यते सुकृतैरिह॥इमं मे संशयं ब्रूहि पु
रं कीर्तय हल्ल हि मे॥७॥॥श्रीमार्कंडेय उवाच॥॥शृणु राजन्महावीर यदुक्तं पद्मयोनिना॥ऋषीणां सन्निधौ पू
र्वं कथ्यमानं मया श्रुतं॥८॥पंचयोजनविस्तीर्णं प्रयागस्य तु मंडलं॥प्रवेशात्तस्य तद्भूमौ सोश्वमेधफलं लभेत॥८

राम
१५२

पंचयोजनविस्तीर्णं प्रयागस्य तु मंडलं॥प्रवेशात्तस्य तद्भूमौ सोश्वमेधफलं लभेत॥९॥व्यतीतान्पुरुषान्सर्वा
न्भविष्यांश्च तु दृशां॥नरस्तारयते सर्वान्नियस्तु प्राणान्परित्यजेत्॥१०॥एवं कृत्वा तु राजेंद्र सदा सेवापरो भवेत्॥
अश्रद्दधानाः पुरुषाः पापोपहतचेतसः॥११॥न प्राप्नुवंति तत्स्थानं प्रयागं देवरक्षितं॥युधिष्ठिर उवाच॥॥स्ने
हाद्वा द्रव्यलोभाद्वा ये तु कामवशं गताः॥कथं तीर्थफलं तेषां कथं पुण्यफलं भवेत्॥१२॥विक्रयः सर्वभांडानां का
र्याकार्यमजानतः॥प्रयागे का गतिस्तस्य तन्मे ब्रूहि महामते॥१३॥श्रीमार्कंडेय उवाच॥॥शृणु राजन्महागु
त्यं सर्वपापप्रणाशनं॥मासमेकं तु यः स्नायात्प्रयागे नियतेंद्रियः॥१४॥मुच्यते सर्वपापेभ्यो यथा दिष्टं स्वयंभु
वा॥अशुचिप्रयतोभूत्वा हिंसकः श्रद्धयान्वितः॥१५॥मुच्यते सर्वपापेभ्यः स गच्छेत्परमं पदं॥विस्रंभघातना
यो तु प्रयागे शृणु यत्फलं॥१६॥त्रिकालमेव स्नायीत आहारं भैक्ष्यमाचरेत॥त्रिभिर्मासैः प्रमुच्येत प्रयागे तु न संश
यः॥१७॥अज्ञानेन तु यस्येह तीर्थयात्रादिकं भवेत॥सर्वकामसमृद्धस्तु स्वर्गलोके महीयते॥१८॥स्थानं च लभ
ते नित्यं धनधान्यसमाकुले॥एवं ज्ञानेन संपूर्णः सदा भवति भोगवान्॥१९॥तारिताः पितरस्तेन नरकात्प्रपि
तामहाः॥धर्मं तु सारितत्वत्तं पृच्छतस्ते पुनः पुनः॥त्वत्त्रिया पार्थ समाख्यातं यथा मेतत्सनातने॥२०॥युधिष्ठिर
उवाच॥॥अद्य मे सफलं जन्म दिष्ट्या मे तारितं कुलं॥प्रीतोस्म्यनुगृहीतोस्मि दर्शनादेव ते मुने॥२१॥त्वद्दर्शना

नातु धर्मात्मन्मुक्तोहं वा यत्किल्बिषात्॥ इदानीं वेदद्यात्मानं गंगावनगतकिल्बिषं॥२२॥ ॥श्रीमार्कंडेय उवाच॥॥ दि
ष्ट्याते सफलं जन्म दिष्ट्या तेतारितं कुलं॥ कीर्तनाद्वर्द्धते पुण्यं श्रुत्वा पापं प्रणश्यति॥२३॥ युधिष्ठिर उवाच॥
यमुनायां च किं पुण्यं किं फलं तु महामुने॥ एतन्मे सर्वमाख्याहि यथादृष्टं यथाश्रुतं॥२४॥ श्रीमार्कंडेय उवाच॥
तपनस्य सुता देवी त्रिषु लोकेषु विश्रुता॥ समाख्याता महाभागा यमुना तत्र निम्नगा॥२५॥ येनैव निःसृता
गंगा तेनैव यमुना गता॥ योजनानां सहस्रेषु कीर्तनात्पापनाशिनी॥२६॥ तत्र स्नात्वा च पीत्वा च यमुनायां यु
धिष्ठिर॥ कीर्तनाल्लभते पुण्यं दृष्ट्वा भद्राणि पश्यति॥२७॥ अवगाह्य च पीत्वा च पुनात्यासप्तमं कुलं॥ प्राणांस्त्य
जति यस्तत्र स याति परमां गतिं॥२८॥ अग्नितीर्थमिति ख्यातं यमुना दक्षिणे तटे॥ उत्तरे तु प्रवक्ष्यामि आदि
त्यस्य महात्मनः॥२९॥ तीर्थं निरंजनं नाम यत्र देवाः सवासवाः॥ उपासते सदा संध्यां त्रिकालं तु युधिष्ठिर॥
३०॥ देवास्ते वंति तत्तीर्थं ये चान्ये विबुधा जनाः॥ श्रद्धानपरो भूत्वा कुरु तीर्थाभिषेचनं॥३१॥ अन्ये च बहवस्ती
र्थाः सर्वपापहराः स्मृताः॥ तेषु स्नात्वा दिवं यांति ये मृतास्ते पुनर्भवं॥३२॥ गंगायमुनयोश्चैव तुल्ये तुल्यफले स्मृ
ते॥ केवलं ज्येष्ठभावेन गंगा सर्वत्र पूज्यते॥३३॥ एवं कुरुष्व कौंतेय सर्वतीर्थाभिषेचनं॥ यावज्जीवकृतं पापं
तत्क्षणादेव नश्यति॥३४॥ यस्त्विमं कल्य उत्थाय पठते च शृणोति च॥ मुच्यते सर्वपापेभ्यः स्वर्गलोकं स

गच्छति॥३५॥ ॥इति श्रीमत्स्यपुराणे नंदिनारदसंवादे प्रयागमाहात्म्यं॥ ॥युधिष्ठिर उवाच॥ ॥श्रुतं च ब्रह्मणा प्रो
क्तं पुराणे ब्रह्मसंभवे॥ तीर्थानां तु सहस्राणि शतानि नियुतानि च॥१॥ सर्वपुण्यपवित्राणि गतिश्च परमा स्मृता॥
पृथिव्यां नैमिषं पुण्यं अंतरिक्षे च पुष्करं॥२॥ त्रयाणामपि लोकानां कुरुक्षेत्रं विशिष्यते॥ सर्वाणि तानि संत्यज्य
कथमेकं प्रशंससि॥३॥ एतन्मे संशयं ब्रूहि यथादृष्टं यथाश्रुतं॥३॥ ॥श्रीमार्कंडेय उवाच॥॥ अश्रद्धेयं न कर्त्त
व्यं प्रत्यक्षमपि यद्भवेत्॥ नरस्याश्रद्दधानस्य पापोपहतचेतसः॥४॥ अश्रद्दधानो नशुचिर्दुर्मतिस्त्यक्तमं
गलः॥ एते पातकिनः सर्वे तेनेदं भाषितं तया॥५॥ शृणु प्रयागमाहात्म्यं यथादृष्टं यथाश्रुतं॥ प्रत्यक्षं च प
रोक्षं च यथा याथात्थ्यं भविष्यति॥६॥ यथैवान्यद्ब्रह्दृष्टं च यथादृष्टं यथाश्रुतं॥ शास्त्रं प्रमाणं कृत्वा तु मुच्यते
योगमात्मनः॥७॥ क्लिश्यते चापरस्तत्र नैव योगमवाप्नुयात्॥ जन्मांतरसहस्रेभ्यो योगं लभति मानवः॥
८॥ यया योगसहस्रेण योगो लभ्येत मानवैः॥ यस्तु सर्वाणि रत्नानि ब्राह्मणेभ्यः प्रयच्छति॥९॥ तेन दा
नेन दत्तेन योगो लभ्येत मानवैः॥ प्रयागे तु मृतस्येदं सर्वं भवति नान्यथा॥१०॥ प्रधानहेतुं वक्ष्यामि श्र
द्दधानो सि जारत॥ यथा सर्वेषु भूतेषु सर्वत्रैव च दृश्यते॥११॥ ब्रह्मणे वास्ति यत्किंचिद्ब्राह्ममिति चो
च्यते॥ एवं सर्वेषु लोकेषु ब्रह्म सर्वेषु पूज्यते॥१२॥ तथा सर्वेषु भूतेषु प्रयागं पूज्यते नृपैः॥ पूज्यते तीर्थ

राजश्च सत्यमेव युधिष्ठिर ॥१३॥ ब्रह्मापि स्मरते नित्यं प्रयागं तीर्थमुत्तमं ॥ तीर्थराजमनुप्राप्य न चान्यत्किंचिदर्ह
ति ॥१४॥ को हि देवत्वमासाद्य मनुष्यत्वं चिकीर्षति ॥ अनेनैवोपमानेन त्वं यास्यसि युधिष्ठिर ॥१५॥ यथा पुण्य
तमं नास्ति तथैकैवेप्सितं त्वया ॥१५॥ युधिष्ठिर उवाच ॥ ॥ श्रुतं चेदं त्वया प्रोक्तं विस्मितोहं पुनः पुनः ॥ कथं
योगेन तत्रास्ति स्वर्गवासं तु कर्मणा ॥१६॥ दाता वै लभते भोगान्गां च यत्कर्मणः फलं ॥ तानि कर्माणि
पृच्छामि सुनेयैः प्राप्यते मही ॥१७॥ श्रीमार्कंडेय उवाच ॥ ॥ शृणु राजन्महाबाहो यथोक्तकरणं महीं ॥ ग
मनिं ब्राह्मणं रास्वं कांचनं सलिलं स्त्रियं ॥१८॥ मातरं पितरं चैव ये निंदंति नराधमाः ॥ न ते यान्त्यूर्ध्वगम
नमेवमाह प्रजापतिः ॥१९॥ एवं योगस्य संप्राप्तिस्थानं परमदुर्लभं ॥ गच्छंति नरके घोरे ये नराः पापक
र्मिणः ॥२०॥ हस्त्यश्वं गामनड्वाहं मणिमुक्तादि कांचनं ॥ परोक्षं हरते यस्तु दानं नैव प्रयच्छति ॥२१॥ न ते
गच्छंति वै स्वर्गं दातारो यत्र भोगिनः ॥ अनेककर्मणा युक्तः पच्यते नरके धमः ॥२२॥ एवं योगं च धर्मं च दा
तारं च युधिष्ठिर ॥ यच्च सत्यमसत्यं वा अस्ति नास्तीति यत्फलं ॥ निरुक्तं तु प्रवक्ष्यामि यथाह स्वयमंतुच्छमान्
॥२३॥ ॥ इति श्रीमत्स्यपुराणे मनुमत्स्यसंवादे प्रयागमाहात्म्ये ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ शृणु राजन्प्रय
गस्य माहात्म्यं पुनरेव तु ॥ नैमिषं पुष्करं चैव गोतीर्थं सिंधुसागरं ॥१॥ गया च चैत्रकं चैव गंगासागरमेव च ॥

एते चान्ये च बहवो ये च पुण्याः शिलोच्चयाः ॥२॥ दश तीर्थसहस्राणि त्रिंशत्कोट्यस्तथापराः ॥ प्रयागे संस्थिता
नित्यं एवमाहुर्मनीषिणः ॥३॥ त्रीणि चाप्यग्निकुंडानि येषां मध्ये च जाह्नवी ॥ प्रयागादभिनिःक्रांता सर्वदे
वनमस्कृता ॥४॥ तपनस्य सुता देवी त्रिषु लोकेषु विश्रुता ॥ यमुना गंगया सार्द्धं संगता लोकपावनी ॥५॥ गं
गायमुनयोर्मध्ये पृथिव्यां जघनं स्मृतं ॥ प्रयागं राजशार्दूल कलां नार्हति षोडशीं ॥६॥ तिस्रः कोट्योर्द्धकोटी
च तीर्थानां वायुरब्रवीत् ॥ दिवि भुव्यंतरिक्षे च तत्सर्वं जाह्नवी स्मृता ॥७॥ प्रयागं समधिष्ठानं कंबलाश्वतरौ प्र
भूर्भोगवत्यथ या चैषा वेदिरेषा प्रजापते ॥८॥ तत्र वेदाश्च यज्ञाश्च मूर्त्तिमंतो युधिष्ठिर ॥ प्रजापतिमुपासं
ते ऋषयश्च तपोधनाः ॥९॥ यजंते क्रतुभिर्देवास्तथा चक्रधरा नृपाः ॥ ततः पुण्यतमं नास्ति त्रिषु लोकेषु
भारत ॥१०॥ प्रभावं सर्वतीर्थेभ्यः प्रभवत्यधिकं विभो ॥ सिद्धक्षेत्रं च विज्ञेयं गंगातीरसमन्वितं ॥११॥ इद
मन्यं विजानीयात्का भूर्नामात्मजस्य च ॥ सुहृद्दस्य जपेत्क्षेत्रे शिष्यस्यानुमतस्य च ॥१२॥ इदं धन्यमिदं स्व
र्ग्यमिदं सेव्यमिदं सुखं ॥ इदं पुण्यमिदं कीर्त्यं पावनं धर्ममुत्तमं ॥१३॥ महर्षीणामिदं गुह्यं सर्वपापप्रणा
शनं ॥ अधीत्य च द्विजोप्येतन्निर्मलः स्वर्गमाप्नुयात् ॥१४॥ यस्त्विमं शृणुयान्नित्यं तीर्थं पुण्यं सदा शु
चिः ॥ जातिस्मरत्वं लभते नाकपृष्ठे च मोदते ॥१५॥ प्राप्यंते तानि तीर्थानि सद्भिः शिष्टानुशिष्टिभिः ॥

र्व

स्नाहितीर्थेषुकौरव्यनचचक्रगतिर्भवेत्॥१६॥त्वयाचसम्यक्पृष्टेनकथितानिमयाविभो॥तारिताःपितरःसर्वेति
थैवचपितामहाः॥१७॥प्रयागस्यतुसर्वेतिकलांनार्हंतिषोडशीं॥एवंज्ञानंचयोगंचतीर्थंचैवयुधिष्ठिर॥१
८॥बहुक्लेशेनयुज्यंतेनतेयांतिपरांगतिं॥त्रिकालंचंजपन्ज्ञानंस्वर्गलोकंगमिष्यति॥१९॥॥इतिश्रीमत्स्य
पुराणेप्रयागमाहात्म्ये॥॥युधिष्ठिरउवाच॥॥कथंसर्वमिदंप्रोक्तंप्रयागस्यमहामुने॥एतन्नःसर्वमाख्या
हियथाहिममतारयेत्॥१॥श्रीमार्कंडेयउवाच॥॥शृणुराजन्महाबाहोप्रोक्तंसर्वमिदंजगत्॥ब्रह्मावि
ष्णुस्तथासोमोदेवताप्रभुरव्ययः॥२॥ब्रह्मासृजतिभूतानिस्थावरंजंगमंचयत्॥तान्येतानिपरेलोके
विष्णुःसंवर्द्धतिप्रजाः॥३॥कल्पांतेतत्समग्रंहिरुद्रःसंहरतेजगत्॥तदाहरतिचाप्येतन्नकदाचिद्विन
श्यति॥४॥ईश्वरःसर्वभूतानांयःपश्यतिसपश्यति॥अत्रैतान्सेवतिष्ठंतितेयांतिपरमांगतिं॥५॥॥युधिष्ठि
रउवाच॥॥आख्याहिमेयथातथ्यंयथेयांतिष्ठतेश्रुति॥केनवाकारणेनैवतिष्ठंतेलोकसत्तमाः॥श्रीमार्कंडे
यउवाच॥॥प्रयागेवसतेयेनब्रह्माविष्णुर्महेश्वरः॥कारणंतत्प्रवक्ष्यामिशृणुत्वेतद्युधिष्ठिर॥७॥पंचयो
जनविस्तीर्णंप्रयागस्यतुमंडलं॥तिष्ठंतिरक्षणार्थायपापकर्मनिवारणात्॥८॥यस्मिन्नजुह्वत्पापंन
स्वर्गंचनपश्यति॥एवंब्रह्माचविष्णुश्चप्रयागेनित्यमीश्वरः॥९॥उत्तरेणप्रतिष्ठानाछद्मनाब्रह्मातिष्ठतिम

हेश्वरोवटोभूत्वातिष्ठतियावदाभूतसंप्लवं॥१०॥येचान्येबहवस्तीर्थेवतिष्ठंतिचयुधिष्ठिर॥पृथिवीतलमुद्धृत्य
स्थितंतद्दैवतात्रयं॥११॥प्रजापतिरिदंक्षेत्रंप्रयागमितिविश्रुतं॥एतत्तुपुण्यंपवित्रंचप्रयागंवैयुधिष्ठिर॥स्व
राज्यंकुरुराजेंद्रभ्रातृभिःसहितोनघ॥१२॥॥इतिश्रीमत्स्यपुराणेप्रयागमाहात्म्ये॥॥श्रीनंदिउवाच॥॥
भ्रातृभिःसहितःसर्वैर्द्रौपद्यासहभार्यया॥ब्राह्मणेभ्योनमस्कृत्यगुरुदेवानप्रतर्पयच॥१॥वासुदेवोपि
तत्रैवक्षणेनाभ्यागतस्तदा॥पांडवैःसहितैःसर्वैःपूज्यमानःसमाधवः॥२॥कृष्णोपसहितैःसर्वैरभ्यषिंच
युधिष्ठिरं॥एतस्मिन्नंतरेचैवमार्कंडेयोमहामुनिः॥३॥ततःस्वस्तीतिप्रोक्त्वातुक्षणाद्दाश्रममभ्यगात्॥यु
धिष्ठिरोपिधर्मात्माभ्रातृभिःसहितोवसन्॥४॥महादानंततोदत्वाधर्मस्थोनुयुधिष्ठिरः॥यस्त्विदंकल्यमुत्था
यमाहात्म्यंपठतेनरः॥५॥मुच्यतेसर्वपापेभ्योरुद्रलोकंसगच्छति॥५॥श्रीवासुदेवउवाच॥॥ममवाक्यंच
कर्तव्यंत्वयास्नेहात्युधिष्ठिर॥नित्यंजपस्वजुहुष्वप्रयागेविगतज्वरः॥६॥प्रयागंस्मरवैनित्यंतस्मात्त्वं
वैयुधिष्ठिर॥स्वयंप्राप्स्यसिराजेंद्रस्वर्गलोकंनसंशयः॥७॥प्रयागमनुगच्छेद्वावसतोवापियोनरः॥सर्वपा
पविमुक्तात्मारुद्रलोकेमहीयते॥८॥प्रतिग्रहादुपावृत्तःसंतुष्टोयेनकेनचित्॥अहंकारविमुक्तात्मासती
र्थफलमश्नुते॥९॥ऋषिभिःकृतवप्रोक्तादेवैश्चापियथाक्रमं॥नहिशक्तपादरिद्रेणपयसाकर्तुंमहीपते॥१०॥

म०पु० वहूपकरणामत्ताबानासंसारविस्तरा॥प्राप्यं तेपार्थिवैरेनेसमृद्धैर्वानिरैः कचित॥११॥अकोपनश्चराजेंद्रसत्यव
१५६ दीदृढव्रतः॥आत्मोपमश्चभूतेषुसतीर्थफलमश्नुते॥१२॥यैदरिद्रैरपिविधिः शक्यः प्राप्तुंयुधिष्ठिर॥तुल्योय
ज्ञफलैः पुण्यैस्तंनिबोधवदामिते॥१३॥ऋषीणांपरमंगुह्यंइदंभरतसत्तम॥तीर्थानुगमनंपुण्यंयज्ञेभ्यो
पिविशिष्यते॥१४॥दशतीर्थसहस्राणित्रिंशत्कोट्यस्तथापराः॥माघमासेगमिष्यंतिगंगायांभरतर्षभ
१५॥स्वस्थोभवमहाराजभुंक्ष्वराज्यमकंटकं॥पुनर्द्रक्ष्यसिराजेंद्रयजमानंविशेषतः॥१६॥श्रीनंदिरुवा
च॥॥इत्युक्त्वासमहात्मागोमार्कंडेयोमहातपाः॥युधिष्ठिरस्यनृपतेस्तत्रैवांतरधीयत॥१७॥ततस्तत्रस
मालाप्यगात्राणिसगणोनृपः॥यथोक्तेनविधानेनपरांनिर्वृतिमागतः॥१८॥तथात्वमपिदेवर्षेप्रयागाभि
मुखोभव॥अभिषेकंतुकृत्वाद्यकृत्योभविष्यति॥१९॥सूतउवाच॥॥एवमुक्त्वायनंदीशस्तत्रैवांतरधीय
त॥नारदोपिजगामाशुप्रयागाभिमुखस्तदा॥२०॥तत्रस्नात्वाचजप्त्वाचविधिदृष्टेनकर्मणा॥दानंदत्वाद्वि
जाग्र्येभ्योगतःस्वभवनंततः॥२१॥॥इतिश्रीमत्स्यपुराणेनंदिनारदसंवादेप्रयागमाहात्म्यं॥॥ऋषयऊचुः॥
कतिद्वीपाःसमुद्राश्चपर्वताश्चकतिप्रभो॥कियंतिचैववर्षाणितेषुनद्यश्चकाःस्मृताः॥१॥महाभूतप्रमाणं राम.
चलोकालोकस्तथैवच॥पर्ययःपरिमाणंचगतिश्चंद्रार्कयोस्तथा॥२॥एतत्प्रब्रूहिनःसर्वंविस्तरेणयथा १५६

र्थतः॥त्वदुक्तादेवसकलंश्रोतुमिच्छामहेवयं॥३॥सूतउवाच॥॥द्वीपभेदसहस्राणिसप्तस्वंतर्गतानिच॥न
शक्यंतेक्रमेणेववक्तुंवैसकलंजगत॥४॥सप्तैवसंप्रवक्ष्यामिचंद्रादित्यग्रहैःसह॥तेषांमनुष्यास्तर्केणप्रमा
णानिप्रचक्षते॥५॥अचिंत्याःखलुयेभावास्तांस्तुतर्केणसाधयेत॥प्रकृतिभ्यःपरंयच्चतदचिंत्यस्यलक्षणं॥६
सप्तवर्षंप्रवक्ष्यामिजंबूद्वीपंयथाविधं॥विस्तारमंडलंयच्चयोजनैस्तन्निबोधत॥७॥योजनानांसहस्राणि
शतंद्वीपस्यविस्तरं॥नानाजनपदाकीर्णंपुरैश्चविविधैःशुभैः॥८॥सिद्धचारणसंकीर्णंपर्वतैरुपशोभितं॥
सर्वधातुपिनद्धैस्तैःशिलाजालसमुद्गतैः॥९॥पर्वतप्रभवाभिस्तुनदीभिस्तुसमंततः॥प्रागायतामहापार्श्वाःषडिमे
वर्षपर्वताः॥१०॥अवगाढाह्युभयतःसमुद्रौपूर्वपश्चिमौ॥हिमप्रायश्चहिमवान्हेमकूटश्चहेमवान॥११॥पर्वति
सुमुखश्चापिनिषधपर्वतोमहान॥चातुर्वर्ण्यःससौवर्णोमेरुश्चोल्बमयःस्मृतः॥चतुर्विंशसहस्राणिविस्ती
र्णःसचतुर्दिशं॥वृत्तमेकृतिप्रमाणंश्चचतुरस्रःसमाहितः॥१३॥नानावर्णैःसमपार्श्वैःप्रजापतिगुणान्वितः॥ना
भीबंधनसंभूतोब्रह्मणोअव्यक्तजन्मनः॥१४॥पूर्वतःश्वेतवर्णस्त्वाद्ब्राह्मण्यंतेनतस्यवै॥पीतश्चदक्षिणेनासौ
तेनवैश्यत्वमिष्यते॥१५॥भृंगपत्रनिभश्चैवपश्चिमेनसमन्वितः॥तेनास्यशूद्रतानाम्सिद्धामेसेनामार्थकर्म
तः॥पार्श्वमुत्तरंतस्यरक्तवर्णंस्वभावतः॥तेनास्यक्षत्रभावःस्यादितिवर्णाःप्रकीर्तिताः॥१७॥नीलं

श्ववैदूर्यमयः श्वेतपीतो हिरण्मयः॥ मयूरबर्हवर्णस्तु शातकौम्भः सुशृंगवान्॥१९॥ एते पर्वतराजानः सिद्धचारणसे
विताः॥ तेषामंतरविष्कंभो नवसाहस्र उच्यते॥२०॥ मध्ये इलावृतं नाम महामेरोः समंततः॥ चतुर्विंशसहस्रा
णि विस्तीर्णो योजनैः समः॥२०॥ मध्ये तस्य महामेरुर्विधूम इव पावकः॥ वेद्यर्द्धं दक्षिणे मेरोरुत्तरार्द्धं तथोत्त
रे॥२१॥ वर्षाणि यानि सप्तात्र तेषां वै सप्त पर्वताः॥ द्वे द्वे सहस्रे विस्तीर्णा योजनैर्दक्षिणोत्तरे॥२२॥ जंबूद्वीपस्य
विस्तारस्तेषामायाम उच्यते॥ नीलश्च निषधश्चैव वनान्याहीनाश्च ये परे॥२३॥ श्वेतश्च हेमकूटश्च हिमवान् शृंगवांश्च
य॥ जंबूद्वीपप्रमाणेन ऋषभः परिकीर्त्यते॥२४॥ तस्मात् द्वादशभागेन हेमकूटोपि हीयते॥ हिमवद्विंशभागेन
तस्मात् एव महीयते॥२५॥ अष्टाशीतिसहस्राणि हेमकूटो महागिरिः॥ अशीतिर्हिमवान् शैल आयतः पूर्वप
श्चिमे॥२६॥ द्वीपस्य मंडलीभावात् ह्रासवृद्धिः प्रकीर्त्यते॥ वर्षाणां पर्वतानां च यथा भेदस्तथोत्तरं॥२७॥ तेषाम
ध्ये जनपदास्तानि वर्षाणि सप्त वै॥ प्रपातविषमैस्तैस्तु पर्वतैरावृतानि तु॥२८॥ सप्रतानि नदीभेदैरगम्यानि प
रस्परं॥ वसंति तेषु सत्वानि नानाजातानि सर्वशः॥२९॥ इमं हैमवतं वर्षं भारतं नाम विश्रुतं॥ हेमकूटं परं त
स्मान्नाम्ना किंपुरुषं स्मृतं॥३०॥ हेमकूटाच्च निषधं हरिवर्षं तदुच्यते॥ हरिवर्षात्परं चापि मेरोस्तत् इलावृतं॥ राम॰
३१॥ इलावृतात्परं नीलं रम्यकं नाम विश्रुतं॥ रम्यकादपरं श्वेतं विख्यातं तद्धिरण्मयकं॥३२॥ हिरण्मयकात्परं चै १५७

व शृंगमाकं कुरु स्मृतं॥ धेनुः संस्थेति विज्ञेये द्वे वर्षे दक्षिणोत्तरे॥३३॥ दीर्घाणि तस्य चत्वारि मध्यमं तदिलावृ
तं॥ पूर्वतो निषधस्येदं वेद्यर्द्धं दक्षिणं स्मृतं॥३४॥ परं इलावृतं पश्चाद्वेद्यर्द्धं तु तदुत्तरं॥ उत्तरायतो महान् शैलो
माल्यवान्नाम पर्वतः॥३५॥ द्वात्रिंशता सहस्रेण प्रतीच्यामनुगानुगा॥ माल्यवान् वै सहस्रैक आनीलनिषधा
वपि॥३६॥ द्वात्रिंशत्त्वेवमप्युक्तः पर्वतो गंधमादनः॥ विपुलश्च सुपार्श्वश्च सर्वरत्नविभूषितः॥३७॥ परिमंड
लस्तन्मध्ये मेरुः कनकपर्वतः॥ चातुर्वर्ण्यः समो वर्णैश्चतुरस्रः समुच्छ्रितः॥३८॥ नानावर्णस्त मस्तेषु पूर्वं
तेश्वेत उच्यते॥ पीतं तु दक्षिणं तस्य शृंगपात्र नितं परं॥३९॥ उत्तरं तस्य रक्तं वै इति वर्णसमन्वितः॥ भुवनैरा
वृतः सर्वैर्जातरूपपरिस्कृतैः॥३४०॥ तत्र देवगणाश्चैव गंधर्वासुरराक्षसाः॥ शैलराजे प्रमोदंते सर्वतोप्स
रसां गणैः॥४१॥ स्मा तु मेरुः परिवृतो भुवनैर्भूतभावनैः॥ यस्येमे चतुरो देशा नानानाश्वेषु संस्थिताः॥४२
भद्राश्वो भारतश्चैव केतुमालश्च पश्चिमे॥ उत्तराश्चैव कुरवः कृतपुण्यप्रतिश्रयाः॥४३॥ विष्कंभपर्वतस्तद्वन्मं
दरो गंधमादनः॥ विपुलश्च सुपार्श्वश्च सर्वरत्नविभूषिताः॥४४॥ अरुणोदं मानसं वै सितोदं भद्रसंज्ञितं॥
तेषामुपरि चत्वारि सरांसि च वनानि च॥४५॥ तथा नंदकदकं देवसुमंदरे गंधमादने॥ जंबूवृक्ष
रूपाश्वत्थो विपुलोथ वरः परः॥४६॥ गंधमाधमादनपार्श्वे तु पश्चिमे वरगंडिकः॥ द्वात्रिंशच्च सहस्राणि यो

म०पु० १५८

जनैः सर्वतः समः ॥४७॥ तत्र ते श्वेतकमणिकेतुमालापरिक्रताः ॥ तत्र कालानलाः सर्वे महासत्वा महाबला
लाः ॥४८॥ स्त्रियश्चोत्पलवर्णाभाः सुंदर्यः प्रियदर्शनाः ॥ तत्र दिव्यो महावृक्षः पनराः पत्रभासुरः ॥४९॥
तस्य पीत्वा फलरसं संजीवंति समायुतं ॥ माल्यवंतश्च पार्श्वे तु पूर्वे पूर्वा तु गंडिका ॥५०॥ द्वात्रिंशाच्च सहस्रा
णि तत्रापि शातमुच्यते ॥ नक्रश्च तत्र विते ये नित्यं मुदितमानसः ॥५१॥ भद्रंसाववनं तत्र कालाम्रश्च म
हाद्रुमः ॥ तत्र ते पुरुषाः श्वेता महोत्साहा महाबलाः ॥५२॥ स्त्रियः कुमुदवर्णाभाः सुंदर्यः प्रियदर्शनाः ॥
चंद्रप्रभाश्चंद्रवर्णाः पूर्णचंद्रनिभाननाः ॥५३॥ चंद्रशीतलगात्राश्च स्त्रियोत्पुलकाधिकाः ॥ दशवर्षस
हस्राणि आयुस्तेषामनामयं ॥५४॥ ताश्चतस्य रसं पीत्वा सर्वेति स्थिरयौवनाः ॥५५॥ ॥ सूत उवाच ॥ ॥६
त्सुक्तवान् षीनब्रह्मा वर्षाणि च विशेषतः ॥ पूर्वं मम मानुग्रहेण ऋषयः किं वस्यामि च ॥५५॥ एतत्स्वु
त्वा वचस्तेतु ऋषयः शंसितव्रताः ॥ जातकौतूहलाः सर्वे प्रत्यूचुस्ते मुदान्विताः ॥५६॥ ऋषय ऊचुः ॥ ॥
पूर्वापरौ समाख्यातौ पोदेशौ तौ त्वया मुने ॥ उत्तराणां च वर्षाणां पर्वतानां च सर्वशः ॥५७॥ आख्याहि
नो यथातथ्यं ये च पर्वतवासिनः ॥ एवमुक्तस्तु ऋषिभिर्निःशेषस्तस्याख्यातवान्स्तुनः ॥५८॥ सूत उवाच ॥ ॥
शृणुध्वं जातिवर्षाणि पूर्वोक्तानि च यैमया ॥ दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु ॥५९॥ वर्षं किंम

राम· १५८

पुरुषं नाम नन्यजानंति वै प्रजाः ॥ रतिप्रधाना विषया जायंते तत्र मानवाः ॥६०॥ शुक्लाभिजनसंपन्नाः सर्वेति
प्रियदर्शनाः ॥ तत्रापि सुमहानद्वृक्षोन्यग्रोधो रोहिणो महान् ॥६१॥ तस्यापि ते फलरसं पिबंतो वर्तयंति
वै ॥ दशवर्षसहस्राणि दशवर्षशतानि च ॥६२॥ जीवंति ते महाभागाः सदाहृष्टा नरोत्तमाः ॥ उत्तरस्य तु
श्वेतस्य पार्श्वे शृंगस्य दक्षिणे ॥६३॥ वर्षं हिरण्मयं नाम तत्र हैरण्मयी नदी ॥ महाबला महासत्वा नित्यं मुदि
तमानसाः ॥६४॥ शुक्लाभिजनसंपन्नाः सर्वेति प्रियदर्शनाः ॥ एकादशसहस्राणि वर्षाणां तेन रोत्तमाः
६५॥ आयुःप्रमाणं जीवंति शतानि दश पंच च ॥ तस्मिन्वर्षे महावृक्षो लकुचः पत्रसंश्रयः ॥६६॥ तस्यपी
त्वा फलरसं तत्र जीवंति मानवाः ॥ शृंगसाह्वस्य शृंगाणि त्रीणि चैव महांति वै ॥६७॥ एकं मणिमयं तत्र
कं तु कनकान्वितं ॥ सर्वरत्नमयं चैकं भुवनैरुपशोभितं ॥६८॥ उत्तरे चास्य शृंगस्य समुद्रांते च दक्षिणे ॥
कुरवस्तत्र तद्वर्षं पुण्यं सिद्धनिषेवितं ॥६९॥ तत्र वृक्षा मधुफला दिव्यामृतजलापगाः ॥ वस्त्राणि च प्रसूयं
ते फलान्याभरणानि च ॥७०॥ सर्वकामप्रदातारः केचिद्वृक्षा मनोरमाः ॥ अपरे पक्षीरिणो नाम वृक्षास्त
त्र मनोरमाः ॥७१॥ मेक्षरंति सदा क्षीरं षड्रसं चामृतोपमं ॥ सर्वा मणिमयी भूमिः सूक्ष्मा कांचनवालुकाः
७२॥ सर्वत्र सुखसंस्पर्शा निःशब्दाः पवनाः सुखाः ॥ देवलोकच्युतास्तत्र जायंते मानवाः ॥७३॥ शुक्लाभि

म॰पु॰
१५९

जनसंपन्नाजायंतेस्थितयौवनाः॥मिथुनानिप्रजायंतेस्त्रियश्चाप्सरसोपमाः॥७४॥तेपांतेक्षीरिणांक्षीरंपिबंतेत्व
मृतोपमं॥समंचजायतेस्थानेसमंचैवविवर्द्धते॥७५॥समंचतेजोरूपंचसमांचैवम्रियंतिवै॥एकैकमनुर
क्ताश्चचक्रवाकाइवध्रुवं॥७६॥अनामयाविशोकाश्चनित्यंमुदितमानसाः॥दशवर्षसहस्राणिदशवर्ष
शतानिच॥७७॥जीवंतेतेमहासत्वानचान्याश्चीप्रवर्त्तते॥७८॥सूतउवाच॥ ॥एवमेवनिसर्गोवैवर्षाणांभा
रतेयुगे॥दृष्टःपरतरःसूक्ष्मःकिंभूयःकथयामिवः॥७९॥आख्यातास्तेवमृषयःसूतपुत्रेणधीमता॥उ
त्तरंश्रवणेभूयःपप्रच्छुःसूतनंदनं॥८०॥ इतिश्रीमत्स्यपुराणेभुवनकोशेवर्षवर्णने॥ऋषयऊचुः॥ ॥
यदिदंभारतंवर्षंतस्मिन्स्वायंभुवादयः॥चतुर्दशैवमनवःप्रजाःसर्गेससर्जिरे॥१॥एतत्वेदितुमिच्छा
मःसकाशात्तवसूतज॥उत्तरश्रवणंभूयःप्रब्रूहिवदतांवर॥२॥एतच्छ्रुत्वाऋषीणांतुप्राब्रोचल्लोम
हर्षणिः॥पौराणिकस्तदासूतऋषीणांभावितात्मनां॥३॥बुध्याविचार्यबहुधाविमृश्यचपुनःपुनः
एतदेवकथयामासउत्तरश्रवणंतथा॥४॥सूतउवाच॥ ॥अथाहंवर्णयिष्यामिवर्षेस्मिन्भारतेप्रजा
भरणात्तुप्रजानांवैपुनर्भारतमुच्यते॥५॥निरुक्तवचनैश्चैववर्षंतद्भारतंस्मृतं॥यतःस्वर्गश्चमोक्षश्चम राम॰
ध्यमश्चइतःस्मृतः॥६॥नखल्वन्यत्रमर्त्यानांभूमिःकर्मविधौस्मृता॥भारतस्यास्यवर्षस्यनवभेदान्नि १५९

बोधत॥७॥इंद्रद्वीपकशेरुश्चताम्रवर्णोगभस्तिमान्॥नागद्वीपस्तथासौम्योगंधर्वस्त्वथवारुणः॥८॥भरतो
नवमस्तेषांद्वीपःसागरसंवृतः॥योजनानांसहस्रंतुद्वीपोयंदक्षिणोत्तरः॥९॥आधस्तुसुकुमारातोगंगा
याःप्रवहावधिः॥तिर्यगूर्ध्वंतुविस्तीर्णःसहस्राणिदशैवतु॥१०॥द्वीपोह्युपनिविष्टोयंम्लेच्छास्त्वन्येषुस
र्वशः॥यवनाश्चकिराताश्चतथातेपूर्वपश्चिमे॥११॥ब्राह्मणाःक्षत्रियावैश्याःमध्येशूद्राश्चभागशः॥इज्या
युधवणिज्याभिर्वर्त्तयंतोव्यवस्थिताः॥१२॥तेषांव्यवहारोयंवर्ततेनतुपरस्परं॥धर्मार्थकामसंयुक्तोवर्णानां
तुस्वकर्मसु॥१३॥संकल्पपंचमानांतुआश्रमाणांयथाविधिः॥इहस्वर्गापवर्गार्थंप्रवृत्तिरितिमानुषे॥१४
यस्त्वयंमानवोद्वीपस्तिर्यग्यामःप्रकीर्त्तितः॥यएनंजनयेत्कृत्स्नंससम्राडितिकीर्त्तितः॥१५॥अयंलोकस्तुते
सम्राडंतरिक्षजितांस्मृतः॥सस्वराण्मतोलोकःपुनर्वक्ष्यामिविस्तरात्॥१६॥सप्तवास्मिन्महापर्ववि
श्रुताःकुलपर्वताः॥महेंद्रोमलयःसह्यःशुक्तिमानृक्षवानपि॥१७॥विंध्यश्चपारियात्रश्चसप्तैतेकुल
पर्वताः॥तेषांसहस्रशश्चान्येचपर्वतास्तुसमीपतः॥१८॥अभिज्ञातास्ततश्चान्येविषमाश्चित्रमानवः॥अ
न्येतेभ्यःपरिज्ञाताह्रस्वाःपर्वोतिनः॥१९॥तेर्विमिश्राजनपदाआर्याम्लेच्छाश्चसर्वशः॥पिबंतिबहुलान्
द्योगासिंधुसरस्वती॥२०॥शतद्रूश्चंद्रभागांचयमुनांसरयूमपि॥इरावतीवितस्तांचविशालांदेविकांकु

ष्टं॥२१॥गोमतीं धूतपापां च महोदां च दृषद्वतीं॥कौशिकीं तु तृतीयां तु निश्चारां गंडकीं तथा॥२२॥वक्षुर्लोहितमि
त्येताद्धिममास्त्रोतिमाः स्मृताः॥वेदस्मृतिं वेदवतीं वृत्रघ्नीं सिंधुमेव च॥२३॥पर्णाशां तमर्दां चैव कावेरीमहतो
तथा॥परेच धन्वती रूपां विदुषां वेणवत्यपि॥२४॥सिप्रामवंतीं कौंतीं च पारियात्राश्रिताः स्मृताः॥शोणं महा
नदं चैव नंदिनीं सुकृतांक्षमां॥२५॥मंदाकिनीं दशार्णां च चित्रकूटां तथैव च॥तमसां पिप्पलां श्रोणीं तथा चित्रो
पलामपि॥२६॥विमलां चंचलां चैव तथा च धूतवाहिनीं॥शुक्तिमतीं शुनीं लज्जां सुकुटीं हृदिकामपि॥२७॥अक्षवं
तः प्रसूतास्ता नद्यो मलजलाः शुभाः॥तापीं पयोष्णीं निर्विंध्यां सिप्रां च ऋषभां नदीं॥२८॥वेणां वैतरणीं चैव वि
श्वमालां तु सुकृतां॥तोयां चैव महागौरीं दुर्गमां तु शिलां तथा॥२९॥विंध्यपादप्रसूतास्ताः सर्वाः शीतजलाः शुभाः॥
गोदावरीं कृष्णवेणां भीमरथ्यां तु मंडलां॥३०॥तुंगभद्रां सुप्रयोगां सबाह्यां वेदिरेव च॥दक्षिणापथनद्यस्ताः स
ह्यपादाद्विनिःसृताः॥३१॥कृतमालां ताम्रपर्णीं पुष्कलां त्युत्पलावतीं॥मलयोद्भूतनद्यस्ताः सर्वाः शीतजलाः शु
भाः॥३२॥त्रिसामा ऋषिकुल्या च इक्षुला त्रिदिवा चला॥ताम्रपर्णी तथा शूली शरावा विमला तथा॥३३॥महेंद्रत
नयाः सर्वाः प्रख्याताः शुभगामिनीः॥कासिकास्तु कुमारी च मंदवाहिनी॥३४॥ऋपा च पयामिनी चैव शुक्तिमंता
त्मजास्तु ताः॥सर्वाः पुण्यजलाः पुण्याः समुद्राश्च समुद्रगाः॥३५॥विश्वस्य मातरः सर्वाः सर्वपापहराः शुभाः॥

तासां नद्युपनद्यश्च शतशोऽथ सहस्रशः॥३६॥तास्विमे कुरुपांचालाः शाल्वाश्चैव सजांगलाः॥शूरसेना भद्रकारा
बोधाः सहपटच्चराः॥३७॥मत्स्याः किराताः कुल्याश्च कुंतयः काशिकोशलाः॥आवंताश्चानुलिंगाश्च मूकाश्चैवा
धकैः सह॥मध्यदेशा जनपदाः प्रायसः परिकीर्तिताः॥सह्यस्यानंतरे चैते तत्र गोदावरी नदी॥३९॥पृथिव्याम
पि कृत्स्नायां स प्रदेशो मनोरमः॥बाह्लीका वाटधानाश्च आभीराः कालतोयकाः॥४०॥परांधाश्चैव शूद्राश्च प
ल्लवाश्चात्तखंडिकाः॥गांधारा यवनाश्चैव सिंधुसौवीरमद्रकाः॥४१॥शतद्रवः पुलिंदाश्च पारेता हारमूर्त्तिकाः
रामठाः कंठहाराश्च कैकेयाः दशनामिकाः॥४२॥क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च॥अत्रयोऽपभरद्वा
जाः प्रयस्थलकसेरकाः॥४३॥लंपाकाः स्थलगीणाश्च सैनिकाः सहजांगलैः॥एते देशा उदीच्यास्तु प्राच्यान् दे
शान्निबोधत॥४४॥अंगा वंगा मद्गुरका अंतर्गिरि बहिर्गिरी॥ततः प्रवंगमा तंगा यमका मल्लवर्णिका॥४५॥
सुह्योत्तराः प्रविजया मार्गवागेयमालवाः॥प्राग्ज्योतिषाश्च पौंड्राश्च वैदेहास्ताम्रलिप्तकाः॥४६॥माल्वा मागध
गोनंदाः प्राच्या जनपदाः स्मृताः॥तेषां परे जनपदा दक्षिणापथवासिनः॥४७॥पांड्याश्च केरलाश्चैव चोल्याः कुल्या
गुल्यास्तथैव च॥सेतिकाः सूतिकाश्चैव कुपथा वाजिवासिकाः॥४८॥नवराष्ट्रा माहिषिकाः कपिलाश्चैव सर्व
शाः॥कांडारा माहिषिकाश्च त्रैवर्ष्याः शाबराः स्मृताः॥४९॥पुलिंदा विंध्यपुलिका वैदर्भा दंडकैः सह॥कुलीरा
ध्या

श्वसरालाश्चरूपसास्तापसैः सह ॥५०॥ तथातरुनिकायैश्च सर्वकिराश्चरास्तथा ॥ वासिकाश्चैव ये चान्ये ये चैवांतर
नर्मदा ॥५१॥ भारुकच्छाः समाहेयाः सहसारस्वतैस्तथा ॥ काछीकाश्चैव सौराष्ट्रा आनंदाश्चर्बुदैः सह ॥५२॥ इत्ये
ते अपरांतास्तु शृणुते विंध्यवासिनः ॥ मालवाश्च करूषाश्च मेकलाश्चोत्कलैः सह ॥५३॥ आडामा षादशार्णाश्च
भोजाः किंकिंधकैः सह ॥ अरुषाः शौंडिकेराश्च वीतिहोत्रा अवंतय ॥५४॥ एते जनपदाः ख्याता विंध्यपृष्ठनिवा
सिनः ॥ अतो देशान्प्रवक्ष्यामि पर्वताश्रयिणश्च ये ॥५५॥ निराहाराः सर्वगाश्च कुपथास्तंगणाः खसः ॥ कुथ
प्रावरणाश्चैव ऊर्णा दर्वाः समुद्गकाः ॥५६॥ त्रिगर्त्ता मंडलाश्चैव किराताश्चामरैः सह ॥ चत्वारि भारते वर्षे यु
गानि मुनयोब्रुवन् ॥५७॥ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगं ॥ तेषां निसर्गं वक्ष्यामि उपरिष्टाच्च कृत्स्न
शः ॥५८॥ सूत उवाच ॥ एतत् श्रुत्वा तु ऋषय उत्तरं पुनरेव ते ॥ शुश्रूषवस्तमूचुस्ते प्रकामाल्लोमहर्षणं ॥
५९॥ ऋषय ऊचुः ॥ जंबूद्वीपस्य विस्तारं तथा नो वद द्विजोत्तम ॥ द्वीपानां वासिनां तेषां वृक्षाणां च प्रब्रवीहि
नः ॥६०॥ सूत उवाच ॥ शुश्रूषवो त्र यद्विप्रास्तच्छृणुध्वमतंद्रिताः ॥ जंबूखंडः किंपुरुषे सुमहानंदनोप
मः ॥६१॥ दशवर्षसहस्राणि स्थितिः किंपुरुषे स्मृता ॥ जायंते मानवास्तत्र सुतप्तकनकप्रभाः ॥६२॥ वर्षे किं
पुरुषे पुण्ये प्लक्षो मधुवहः स्मृतः ॥ तस्य किंपुरुषाः सर्वे पिबंते रसमुत्तमं ॥६२॥ अनामया ह्यशोकाश्च नि

संमुदितमानसाः ॥ सुवर्णवर्णाश्च नराः स्त्रियश्चाप्सरसां गमाः ॥६३॥ ततः परं किंपुरुषाद्धरिवर्षं प्रचक्षते ॥ म
हारजतसंकाशा जायंते तत्र मानवाः ॥६४॥ देवलोकच्युताः सर्वे महारजतवाससः ॥ त्रयोदशसहस्राणि वर्षाणां
ते नरोत्तमाः ॥६५॥ आयुःप्रमाणं जीवंति ये तु वर्षे इलावृते ॥ मेरोस्तु दक्षिणे पार्श्वे निषधस्योत्तरेण तु ॥६६॥
सुदर्शनो नाम महान् जंबूवृक्षः सनातनः ॥ नित्यं पुष्पफलोपेतः सिद्धचारणसेवितः ॥६७॥ तस्य नाम्ना समा
ख्यातो जंबूद्वीपो वनस्पतिः ॥ योजनानां सहस्रं च शतधा तु महान्मुनः ॥६८॥ उत्सेधो वृक्षराजस्य दिवमा
वृत्य तिष्ठति ॥ तस्य जंबूरसं फलं पीत्वा न जरा बाधते पि तान् ॥६९॥ न क्षुधा न क्लमो वापि न दुःखं च तथावि
धं ॥ तत्र जंबूनदं नाम कनकं देवभूषणं ॥७०॥ इंद्रगोपप्रतीकाशं जायते वा स्वयं च यत् ॥ सर्वेषां वर्षवृक्षा
णां शुभः फलरसस्तु सः ॥७१॥ स्कंधं तु कांचनं शुभ्रं जायते देवभूषणं ॥ तेषां मूत्रं पुरीषं वा दिक्षु दृष्टासु
च सर्वदा ॥७२॥ ईश्वरानुग्रहाद्भूमिर्मृषितां ग्रसते तु तान् ॥ रक्षःपिशाचयक्षाश्च सर्वे हैमवतास्तु ते ॥
७३॥ हेमकूटे तु गंधर्वा विज्ञेयाः साप्सरोगणाः ॥ सर्वे नागा निषेवंते शेषवासुकितक्षकाः ॥७४॥ महामेरो
स्त्रयस्त्रिंशत् क्रीडंते यज्ञियाः सुराः ॥ नीलवैडूर्ययुक्ते स्मिन्सिद्धा ब्रह्मर्षयो वसन् ॥७५॥ दैत्यानां दानवानां
च श्वेतः पर्वत उच्यते ॥ श्रृंगवान्पर्वतश्रेष्ठः पितॄणां प्रतिसंचरः ॥७६॥ इत्येतानि मयोक्तानि नव वर्षा

हिमवतः श्रेष्ठं चंद्रकीचिविराजितां ॥६॥ अमृतस्वादुसलिलां तापसैरुपशोभितां ॥ स्वर्गारोहणनिःश्रेणीं
सर्वकल्मषनाशिनीं ॥७॥ अगम्यां समुद्रमहिषीं महर्षिगणसेवितां ॥ सर्वलोकस्य चौत्सुक्यकारिणीं सुम
नोहरां ॥८॥ गोकुलाकुलतीरां तां रम्यां शैवालवर्जितां ॥ हंससारससंघुष्टां जलजैरुपशोभितां ॥९॥ आ
वर्त्तनाभिगंभीरां द्वीपोरुजघनस्थलीं ॥ नीलनीरजनेत्रां तामुत्फुल्लकमलाननां ॥१०॥ हिमाभफेनवसनां च
क्रवाकाधरांबरां ॥ बलाकापंक्तिदशनां चलमत्स्यावलीभ्रुवं ॥११॥ स्वजलोद्धूतमातंगरम्यकुंभपयोध
रां ॥ हंससूत्ररसंघुष्टां मृणालवलयावलीं ॥१२॥ तस्यारूपमदोन्मत्ता गंधर्वानुगतास्तथा ॥ मध्याह्नस
मये राजन् संक्रीडंत्यप्सरोगणाः ॥१३॥ तामप्सरोविनिर्मुक्तां वहंतीं कुंकुमप्रभां ॥ स्वतीरद्रुमसंभूतना
नावर्णसुगंधिनीं ॥१४॥ तरंगागतसंक्रांतसूर्यमंडलदुर्दृशां ॥ सुरेभजनिताघातकूलद्वयविभूषितां ॥
१५॥ शाक्रेभगंडस्थसलिलैर्देवस्त्रीकुचचंदनैः ॥ संयुतं सलिलं तस्याः षट्पदैरुपसंचितं ॥१६॥ तस्यास्तीरभ
वा वृक्षाः सुगंधकुसुमांचिताः ॥ भयापकृष्टसंभ्रांतभ्रमरस्वनिताकुलाः ॥१७॥ यस्यास्तीरे रतिं यांति सदा
कामवशावशाः ॥ तपोधनाः सकश्यपस्तथा देवाः सहाप्सराः ॥१८॥ जलं नेयत्र सिक्तांगा देवेभ्यः प्रतिमानितां ॥
स्त्रियश्चनाकिवकुलाः पद्मेंदुप्रतिमाननाः ॥१९॥ या बिभर्त्ति सदा तोयं देवसंघैरपीडितं ॥ पुलिंदैर्मृगसंघैश्च

व्याघ्रवृंदैरपीडितं ॥२०॥ सतामरसपानीयां सतारगमनामलां ॥ सतां पश्यन् पयोराजा सतामीप्सितकाम
दां ॥२१॥ तस्यास्तीररुहैः कांतैः पूर्णचंद्रांशुसन्निभैः ॥ राजते विधृताकारैरम्यैस्तीरं महद्रुमैः ॥२२॥ यासरा
विविधैर्विप्रैर्देवैस्या विनिषिध्यते ॥२२॥ या च सदा सकलौघविनाशं भक्तजनस्य करोति सविरेण ॥ यानुगता
सरितां हि कदंबैर्यानुगता सनतं हिमहीनैः ॥२३॥ या च सुतानि चपातिमनुष्यान्याच युतास ततं हिमसंघैः
युक्ता च केसरिगणैः करिभिर्वेष्टिता बुभिः ॥ समालब्धजलैः शृंगैः क्वचिच्चापि समुच्छ्रितैः ॥२४॥ नित्यार्क
तापविषमैरगम्यैर्मनसाप्युत ॥ देवदारुमहावृक्षगजशाखानिरंतरैः ॥२५॥ संतानयुक्तसलिलापि सुवर्ण
युक्ता सूर्यांशुतापपरिहृष्टकदंबमाला ॥ शीतांबुतुल्ययशसा ददृशे नृपेण ॥२६॥ ॥ इति श्रीमत्स्यपुराणे
भुवनकोशे ॥ ॥ सूत उवाच ॥ ॥ आलोकयन्नदीं पुण्यां तत्समीरहृतश्रमः ॥ स गच्छन्नेव ददृशे हिमवंतं महा
गिरिं ॥१॥ खमुल्लिखद्भिर्बहुभिर्वृतं शृंगैः सुपांडुरैः ॥ पक्षिणामप्यसंचारैर्वल्मीसिद्धगतिं शुभां ॥२॥ नदीप्र
वाहसंजातमहाशब्दैः समंततः ॥ असंभृतान्यशब्दं तं शीततोयमनोरमं ॥३॥ देवदारुवनैर्नीलैः कृताधो
वससैनं शुभं ॥ प्रेंखोन्नरीयकं शैलं ददृशे स नराधिपः ॥४॥ श्वेतमेघकृतोष्णीषं चंद्रार्कमुकुटं क्वचित् ॥ हि
मानुलिप्तसर्वांगं क्वचिद्धातुविमिश्रितं ॥५॥ चंदनेनानुलिप्तांगं दत्तपंचांगुलं तथा ॥ शीतप्रदं निदाघेपि शिला

विकटसंकटं॥६॥ सालकैरपसरसां मुदितं चरणैः क्वचित्॥ आपानभूमौ गतैर्गंधर्वाप्सरसां क्वचित्॥
७॥ स्पष्टस्त्र्यंशुभिः क्वापि क्वचिद्व्रततमसा वृतं॥ दरीमुखैः क्वचिन्नामैः पिबंतं सलिलं महत्॥ ८॥ क्वचिद्विद्या
धरगणैः क्रीडद्भिरुपशोभितं॥ उपनीतं तथा सुरव्यैः किन्नराणां गणैः क्वचित्॥ ९॥ पुष्पैः संतानकादीनां
दिव्यैस्तमुपशोभितं॥ मुक्तोज्झिताभिः शिष्याभिः कुसुमानां तथा क्वचित्॥ १०॥ मृदिताः समाकीर्णं गंधर्वा
णां मनोरमं॥ निरुद्धपवनैर्देशैर्नलिन्या हृलमंडितैः॥ ११॥ क्वचिच्च कुसुमैर्युक्तमन्यं तरुचिरंशुभं॥ म
गैर्यथानुचरितं दंतिभिन्नमहाद्रुमं॥ १२॥ यत्रमिंदतिनादेन त्रस्तानां भैरवं रवं॥ हृष्यते नच संभ्रांतगजा
नामाकुलं कुलं॥ १३॥ तपद्भिः सा पसेयस्य कुंजदेशोपलंकृतः॥ रत्नैर्यस्य समुत्पन्नैस्त्रैलोक्यं चाप्य
लंकृतं॥ १४॥ अहीनद्वारण्यं नित्यं सहीनजनसेवितं॥ अहीनः पश्यति गिरिं अहीनं रत्नसंपदा॥ १५॥ अ
ल्पेन तपसा यत्र सिद्धिं प्राप्स्यंति तापसाः॥ यत्र दर्शनमात्रेण सर्वकिल्बिषनाशनाः॥ १६॥ महाप्रपातसं
पातप्रपातावेगतांबुभिः॥ वायुनीतैः सदात्यर्थं कृतदेशं क्वचित्क्वचित्॥ १७॥ समालब्धजलैः शृंगैः
क्वचिच्चापि समुच्छ्रितैः॥ नित्यार्कतापविषमैर्गम्यैर्मनसा वृतं॥ १८॥ देवदारुमहावृक्षजगझणरवाभि
रतरैः॥ वंशास्तंबवनाकरैः प्रदेशैरुपशोभितं॥ १९॥ सिंहतुंडमहाशृंगं प्रपातिशातनिर्वरं॥ शाल्मली

नुविषमं हिमसंरुद्धकंदरं॥ २०॥ दृष्टैवतां चारुनितंबभूमिं महाचलेऽस्मिन् सतु मद्रराजः॥ बभ्राम तत्रैव मु
दा समेतः स्थानं तथा किंचिदथाससाद॥ २१॥ ॥ इति श्रीमत्स्यपुराणे भुवनकोशे हिमवद्वर्णनं नाम॥ ॥
सूत उवाच॥ ॥ सतस्य पर्वतेंद्रस्य प्रदेशं सुमनोहरं॥ अगम्यं मानुषैरन्यैर्दैवयोगादुपागतः॥ १॥ ऐरावती स
रिच्छ्रेष्ठा यस्माद्देशाद्विनिर्गता॥ मेघरूपा मंचनं देशं द्रुमखंडैरतेकाशाः॥ २॥ शालैस्तालैस्तमालैश्च कर्णि
कारैः सशाल्मलैः॥ न्यग्रोधैश्च तथाश्वत्थैर्हरिद्रैः शिंशिपाद्रुमैः॥ ३॥ श्लेष्मांतकैरामलकैर्हरीतकविभी
तकैः॥ भुजैः समुंजकैर्वाणैर्वृक्षैः सप्तच्छदद्रुमैः॥ ४॥ महानिंबैस्तथा निंबैर्निर्गुंडीभिरिद्रुमैः॥ देवदारुमहा
वृक्षैस्तथा कालेयकद्रुमैः॥ ५॥ पद्मकैश्चंदनैर्बिल्वैः कपित्थैरक्तचंदनैः॥ वाताम रिष्टकाक्षीरैरश्वकर्णै
स्तथार्जुनैः॥ ६॥ हस्तिकर्णैः सुमनसैः कोविदारैः सुपुष्पितैः॥ प्राचीनामलकैश्चापि धनकैः समराडकैः॥
७॥ खर्जूरैर्नालिकेरैश्च प्रयातामातकैंगुदैः॥ ततुमालैर्धवैर्भव्यैः काश्मीरैः पर्तिभिस्तथा॥ ८॥ जातीफ
लैः पूगफलैः कफलैर्लवलीफलैः॥ मंदारैः कोविदारैश्च किंशुकैः कुसुमांशुकैः॥ ९॥ जयासैः सामिपर्णि
सैर्वेतसैरंबुवेतसैः॥ रक्ताति रंगनारंगैर्हिंगुभिः सप्रियंगुभिः॥ १०॥ रक्ताशोकैस्तथाशोकैराचकैः कविरा
चकैः॥ मुचकुंदैस्तथाकुंदैराषरुषपरुषकैः॥ ११॥ किरातैः किंकिरातैश्च केतकैश्च सकेतकैः॥ स्रोतांजनै

श्च सुकलिंगनिकोटकैः ॥१२॥ सुकर्णिनातवसनैर्द्रुमश्रेष्ठैस्तथासनैः ॥ मन्मथस्य तथाकारैः सहकारैर्मनोह
रैः ॥१३॥ प्रीतयूथिकया पार्श्वे पीतयूथिकया तथा ॥ जात्या चंपकजात्या च तुंबरैरुदुंबरैः ॥१४॥ मोचचोचैस
लकुचैस्तिलावल्गुकशामलैः ॥ तथा सुपुष्पचरणैर्वरूपैः कामवल्लभैः ॥१५॥ पुष्पांकुरैश्च बकुलैः पारिभ
द्रकरिद्रकैः ॥ धाराकदंबैः कुटजैः कदंबैर्गिरिकूटजैः ॥१६॥ आक्रांतमूर्धककुभैः ककुभैः कमनीयकैः ॥
कर्कंधुबदरैर्नीपैर्दीपैरिव चतोज्वलैः ॥१७॥ रक्तैः पालीवनैर्दीपैर्दाडिमैश्चंपकद्रुमैः ॥ बंधूकै रसबंधूकै
कुंजकानां तु जातिभिः ॥१८॥ कुसुमैः पाटलाभिश्च मल्लिकाकरवीरकैः ॥ कुरुबकैर्हिमवरैर्जंबूभिर्मदुजं
बुभिः ॥१९॥ बीजपूरैः सकपूरैर्गुरुभिश्चागुरुद्रुमैः ॥ बिंबैश्चाप्रतिबिंबैश्च संतानकवितानकैः ॥२०॥ तथा
गुग्गुलहस्तैश्च हिंतालधववर्षकैः ॥ तृणपूलैः करवीरैः शाकैश्च मदनैस्तथा ॥ पीलुभिर्धातुकीभिश्च चिर
बिल्वैः समाकुलैः ॥ तिंतिडीकैस्तथारोधैर्बिडंगैः क्षीरिकाद्रुमैः ॥२२॥ अश्मंतकैस्तथा कोविदारैर्जंबीरैश्चाति
चद्रुमैः ॥ भल्लातकैरिंद्रनागैर्वल्मीकैः सिंदुवारकैः ॥२३॥ नागकेसरहस्तैश्च सुकेसरमनोहरैः ॥ रुद्राक्षैर्द्राक्ष
लंबतैः सजीमैः पत्रजीवकैः ॥२४॥ कंकोलैर्लालवंगैश्च त्वक्द्रुमैः पारिवेतसैः ॥ प्रतानैः पिप्पलीनां च नागवल्ल्या
श्च नागरा ॥२५॥ मरीचस्य तथा गुच्छैर्नवमालिकया तथा ॥ माधवीकामंडपैश्च सुरम्यै रतिमुक्तकमंडपैः ॥२६॥ त्रपु

षैर्वारुकाणां च प्रतानैः सफलैः शुभैः ॥ कूष्मांडानां प्रतानैश्च अलाबूनां तथा क्वचित् ॥२७॥ चिर्भटस्य प्रतानैश्च पटोलैः
करवेल्लकैः ॥ कर्कोटिकवितानैश्च वार्ताकैर्बृहतीफलैः ॥२८॥ कंटकैर्मूलकैर्मूलशाकैस्तु विविधैस्तथा ॥ कंदैर्विदार्यास्तथा
रुरुटैः स्वादुसंयुतैः ॥२९॥ सभिंडारिविरूसा राजतक्त्वनबंधुकैः ॥ सुवर्चलाभिः सर्वाभिः सर्षपाभिस्तथैव च ॥३०॥ काकोलीक्षी
रकाकोलीछत्रपात्रातिछत्रया ॥ काममहीसह… शशिकंदलकांडलैः ॥३१॥ तथाक्षीरिकाशाकेन कालशाकेन वा
प्यथ ॥ विविधान्यैस्तथाधान्यैः सर्वैर्निरवशेषतः ॥३२॥ औषधीभिर्विचित्राभिर्वर्षमानाभिरेव च ॥ आयुष्याभिर्यशस्या
भिर्वपापाश्च नराधिप ॥३३॥ जरामृत्युभयघ्नानि क्षुद्भयघ्नाभिरेव च ॥ सौभाग्यजननीभिश्च हृद्याभिश्चाप्यनेकशः ॥३
४॥ तत्रैव वेणुलताभिश्च तथा कीचकवेणुभिः ॥ काशैः शरकाण्डैर्मुरागुल्मैस्तथैव च ॥३५॥ कुशगुल्मैस्तथारम्यैर्गु
ल्मैश्चेक्षोर्मनोरमैः ॥ कर्पासिजंबूवर्ण्यश्चि दुर्लभैन श्रमेण च ॥३६॥ तथा च कदलीखंडैर्मनोहारिभिरुत्तमैः ॥ तथाम
रकतप्रख्यैः प्रदेशैः शाद्वलान्वितैः ॥३७॥ इरापुष्पसमायुक्तैः कुंकुमस्य च नागशः ॥ भृंगराजविषामांसीग्रंथिकं तु
सुरागदैः ॥३८॥ सुवर्णपुष्पातथान्यैर्भिनानापुष्पैस्तथापरैः ॥ जंबीरिकाभूतयाकैः सरमैः ककुभैस्तथा ॥३९॥ शृंग
बेराजमोदाभिः कुहेककपिवालुकैः ॥ जलजैश्च तथावर्णैर्नानावर्णैः सुगंधिभिः ॥४०॥ उदयादित्यसंकाशैः पूरित्वं
द्रनिभैस्तथा ॥ तपनीयसवर्णैश्च अतसीपुष्पसन्निभैः ॥४१॥ शुकपत्रनिभैश्चान्यैः स्थलपात्रैश्च भागशः ॥ पंचवर्णैः
समाकीर्णैर्बहुवर्णैस्तथैव च ॥४२॥ कुंदेंदीवराहितनुदैः कुसुमैश्चेंद्रसन्निभैः ॥ तथा बर्हिशिखाकारैर्गजवक्त्रोत्पलैः

पु०मं०खं० श्रमैः॥४३॥नीलोत्पलैः सकर्पूरैर्गुंजातककसेरुकैः॥श्रृंगाटकमृणालैश्च नरटैराक्षसोत्पलैः॥४४॥जलजैः स्थलजै
१६६ र्मूलैः फलैः पुष्पैर्विशेषतः॥विविधैश्चैव नीवारैर्मुनिभोज्यैर्नराधिप॥४५॥तद्धान्यं न तच्छस्यं न तच्छाकं न तत्फलं॥
न तन्मूलं न तत्कंदं न तत्पुष्पं नराधिप॥४६॥नाकलौ को ऽत्र वेदिभ्यो नरलोको ऽपि वंचयत्॥अनपोत्थं वनोत्थं च तत्रय
त्रास्ति पार्थिव॥४७॥सदा पुष्पफलं सर्वमजप्यमित योगतः॥मृडेश्वरः सहदेशोतपसो ऽपि योगताः॥४८॥दहशो
चतथा तत्र नानारूपान्पतत्रिणः॥मयूरान् शतपत्रांश्च काककंकांश्च कोकिलान्॥४९॥बकान्कादंबकान्हंसा
न्कोयष्टीन्खंजरीटकान्॥कुक्कुटान्काष्ठकूटांश्च खड्गांगाह्नुब्धकांस्तथा॥५०॥गोध्वेडकांस्तथा कुंजान्धार्त
राष्ट्रान्शुकान्बकान्॥धानुकांश्च क्रवाकांश्च कंदुकान्टिट्टिमान्मदान्॥५१॥पुत्रप्रियान्लोहपृष्ठान्गोचमगि
रिवर्त्तकान्॥पारापतांश्च कमलान्सारिकाजीवजीवकान्॥५२॥लाववर्त्तकचत्रनिरकवत्सभपभकान्॥ताम्रचू
डान्स्वर्णचूडान्कुक्कुटान्काष्ठकुक्कुकान्॥५३॥कपिंजलान्कलविंकांस्तथा कुंकुमचूडकान्॥भृंगराजान्सार
पारान्काष्ठकुंभकान्॥५४॥स्फुलिंगान्डिंडिमानवान्॥५४॥मंजुलीतकदात्यूहान्पाथान्यत्रानसवांगुजान्॥भा
रद्वाजांस्तथा चाषान्सुपर्णान्जुलीयकान्॥५५॥एतांश्चान्यांश्च सुबहून्पक्षिसंघान्मनोहरान्॥श्वापदान्विविधाका रा०
रान्मृगांश्चैव महामृगान्॥५६॥व्याघ्रान्केसरिणः सिंहान्द्वीपिनः शरभान्वृकान्॥ऋक्षांस्तरिक्षूंश्च वरूनगोलांगू १६[illegible]
लान्सवानरान्॥५७॥न्यङ्कलीमान्सकादंबान्मार्जारान्वायुवेगिनः॥मूषकान्कुललान्काचान्विसिंहान्

द्वीपिनः सरभान्वृकान्॥५८॥तथा मतांश्च मातंगान्महिषान्गवयान्वृकान्॥चामरांश्च मरांश्चैव तथा गौरखरान्
पि॥५९॥उरुत्रांस्तथा मेषान्सारंगान्यकुक्कुटान्॥तरक्षून्शशकान्क्षान्तक्षपकान्कुरान्मृगान्॥६०॥नी
लांश्चैव महानीलान्करालान्मृगमातृकान्॥मदंष्ट्रारामसरनान्क्रौंचकारकसंवरान्॥६१॥करालान्कृत
मालांश्च काचपुच्छांश्च तोरयान्॥दंष्ट्रान्खड्गान्वराहांश्च तुरंगान्खरगर्दभान्॥६२॥एतानन्यानपि स्यमत्रे
शे विरुद्धांश्च परस्परं॥अविरुद्धान्वने तस्मिन्निष्ठाग्निपरमां पपौ॥६३॥लब्ध्वा तत्राश्रमपदं पुण्यमत्रेः पु
रा नृपः॥तत्प्रसादात्क्षुधामुक्तं स्थावरे जंगमे स्पृथा॥६४॥हिंसंति हि न चान्यो न्यं हिंसकास्तु मरस्परं॥कव्यादाः
प्राणिनस्तत्र सर्वे क्षीरपलाशकाः॥६५॥निर्मितास्तत्र मात्सर्यं अत्रिणा तु महात्मना॥शोजान्वितं बदे शो घुत
त्रावसत्त्वयं नृपः॥६६॥पयः क्षरंति ते दिव्यममृतस्वादुसन्निभं॥केचिन्नागमहिष्यश्च केचिद्राजाश्च सर्व
शः॥६७॥शिलाः सर्वत्र संस्पर्शाद्ध्याचान्यत्र वा बहिः॥स पत्रयन्परमां प्रीतिमवाप वसुधाधिपः॥६८॥स
रांसि तत्र दिव्यानि नद्यश्च विमलोदकाः॥प्रणालिकानि चोष्णानि तत्रानि च नागदाः॥६९॥कंदराणि च ते ऽत्र
स्य सुसेव्यानि पदे पदे॥हिमपातो न तत्रास्ति समंतात्पंचयोजनं॥७०॥उपसर्कासु वै तस्य शिखरे सुनिबिध
ते॥तत्रास्ति राजञ्छिखरं पर्वतेंद्रस्य पांडुरं॥७१॥हिमपातं घना पत्रकुर्वंति सहिताः सदा॥तत्रास्ति चापरं शृं

गंयत्रतोयघनाघनाः॥७२॥नित्यमेवाभिवर्षंति शिलाभिः शिखरं खरं॥तदाश्रममनोहारियत्रकामधराध
राः॥७३॥सुरमुख्यापयोगिता छायिनांसफलाः फलाः॥सदोपगीतममरसुरस्त्रीसेविताः सुराः॥७४॥
सर्वपापक्षयकरं शैलस्यैवमहारकं॥वानरैः क्रीडमानैश्च देशोहेशाल्मलाधिपः॥हिमपुंजाः कृतात्र
चंद्रबिंबसमप्रभाः॥तदाश्रमंसमंताच्चहिमसंरुद्धकंदरैः॥७६॥शैलवाटैः परिहृतमगम्यंमनुजैः स
दा॥ह्यवराधितमावोसौ महाराजः पुरूरवाः॥७७॥तदाश्रमपदंप्राप्तो देवदेवप्रसादतः॥तदाश्रमंश्रमहरम
नंमनोहरंमनोहरैः कुसुमव्रातैरलंकृतं॥कृतंस्वयंरुचिरमपात्रिणासुजंघ्रुभावहंसतुदृष्ट्वोपमन्नराट्
७८॥॥इति श्रीमत्स्यपुराणे भुवनकोशे॥॥सूत उवाच॥॥तत्रयौ तौ महाशृंगौ महावर्ष्मौ महाद्रिमौ॥ततौ
यंतु तयोर्मध्ये शृंगमन्यतमुत्तमं॥नित्यंतत्रशिलाजालंसदाभ्रंनवर्जितं॥तस्याधस्ता वृक्षगणादिशाग्रा
गेच्चपश्चिमे॥२॥जातीजतापरिक्षिप्तं विचरंचारुदर्शनं॥ दृष्ट्वैव कौतुकाविष्टस्तंविवेशमहीपतिः॥३॥न
त्वमत्रमतिक्रम्यसुमनानरणोज्वलं॥समुच्छ्रितमपश्यत्तं तंगंभीरंपरिवर्तुलं॥४॥नतत्रसूर्यस्यपति
नविराजतिचंद्रमाः॥तथापिदिविशेनाद्रिप्रकाशंतदहर्निशं॥५॥क्रोशत्रयाधिकंपरीमाणंसरसाच्चवि
राजितं॥समंतात्सरसस्तस्यशोभमातुवेदिका॥६॥सौवर्णैराजते वृक्षैर्विद्रुमैरुपशोभिता॥नानाम

णिद्युकुसुमैः सुमनानरणोज्वलैः॥७॥तस्मिन्सरसिपद्मानिपद्मरागछदानितु॥वज्रकेसरजालानिसु
गंधानितथायुतं॥८॥पत्रैर्मरकतैर्नीलैर्वैडूर्यस्यमहीपते॥कर्णिकाश्चतथातेषांजातरूपस्यपार्थिव॥९॥
तस्मिन्सरसिपाभूमिर्नानावज्रसमाकुला॥नानारत्नैरुपचिताजलजानांसमाश्रया॥१०॥कपर्दिकानांशुक्ती
नांशंखानांचमहीपते॥मकराणांचमत्स्यानांचंडानांकच्छपैःसह॥११॥तत्रमरकतखंडानिवज्राणिचसम
स्तः॥पद्मरागेंद्रनीलानिमहानीलानिपार्थिव॥१२॥पुष्परागाणिसर्वाणितथाकर्केटकानिच॥तुच्छकस्य
तुरंभूडमितथाशेषस्यचागमः॥१३॥राजावर्तस्यमुख्यरुचिरास्तस्यचाप्यपा॥सूर्येंदुकांतयोश्चैवनीलो
वर्ण्मंतकस्यच॥१४॥ज्योतीरसस्यरम्यस्यसमकस्यचजागवाः॥पुरोरगवलाक्षाणांस्फाटिकस्यतथै
वच॥१५॥गोमेदपित्तकानांचधूलीमरकतस्यच॥वैडूर्यसौगंधिकयोस्तथाराजमणेर्नृप॥१६॥संगम्य
चैवमुख्यस्यतथाब्रह्ममणेरपि॥मुक्ताफलानांमुख्यानांताराविग्रहधारिणा॥१७॥सुखोसंवैवनत्रौयं
स्नानाच्छीतविनाशनं॥वैडूर्यस्यशिलामध्येसरसस्तस्यशोभना॥१८॥प्रमाणेचतथासाचक्रेचराजनधनुः
शते॥चतुरस्रातथारम्यातेपसानिर्मितात्रिणा॥१९॥विजह्वारसमोदेशोपत्रयत्रहिरण्मयः॥प्रदेशाः सतु
राजेंद्रदीपेतस्मिन्मनोहरे॥२०॥तथापुष्करिणीरम्यातस्मिन्राजन्शिलातले॥सुशीलामलपानीया

म०पु०
१६९

जलजैश्च विवर्जिता:॥२१॥ आकाशप्रतिमा राजंस्तत्तुरस्या मनोहरा॥ तस्यास्तु दुरकं स्वादु लघुशीतं सुगंधि च॥२२॥
न क्षणोति तथा कंठं कुक्षिं नापूरयत्यपि॥ तृप्तिं विधत्ते परमां शरीरे च महत्सुखं॥२३॥ मध्ये तस्यास्तु सुकृतं प्रसा
दे तपसान्विपा॥ रुक्मसेतुप्रवेशं ततस्सर्वरत्नमयं शुभं॥२४॥ शतयोगकरविस्तसंकाशं प्रासादं राजतं द्वितं॥ रम्य
वैडूर्यसोपानं विद्रुमामलसारकं॥२५॥ इंद्रनीलमहास्तंभे मरकतासक्तवेदिकं॥ वज्रांशुजालैः स्फुरितं रम्यं
दृष्टिमनोहरं॥२६॥ प्रासादे तत्र भगवान् देवदेवो जनार्दनः॥ भोगिभोगावलीसुप्तः सर्वालंकारभूषितः॥२७
जानुराकुंचितस्त्वेको देवदेवस्य चक्रिणः॥ फणींद्रसंनिविष्टांघ्रिर्द्वितीयाश्च तथान्यया॥२८॥ लक्ष्म्या मासक्तह
स्तस्तु शेषभोगप्रशायिनः॥ फणींद्रभोगसंन्यस्तबाहुदंडोपशोभितः॥२९॥ अंगुलीयप्रविन्यस्तदेवशीर्षप
रं भुजं॥ एकं वै देवदेवस्य द्वितीयं तु प्रसारितं॥३०॥ समाकुंचितमन्यच्च मणिबंधेन शोभितं॥ किंचिदाकुं
चितं चैव नाभिदेशकरस्थितं॥३१॥ तृतीयं तु भुजं तस्य चतुर्थं तु तथा शृणु॥ आन्नसंतानकुसुमं घ्राणदे
शानुसर्पितं॥३२॥ लक्ष्म्या संवाह्यमानांघ्रिं पद्मपत्रनिभैः करैः॥ संतानमालामुकुटहारकेयूरभूषितं॥
३३॥ भूषितं तथा देवमंगदैरंगुलीयकैः॥ फणींद्रफणविन्यस्तचारुरत्नशिखोज्ज्वलं॥३४॥ अज्ञानवस्त्र — राम:
चरितं प्रतिष्ठितमयाशिरण॥ सिद्धानुप्रजं संततं संततं कुसुमान्वितं॥ दिव्यगंधानुलिप्तांगं दिव्यधूपेन धूपि — १६६

तं॥ सुरसैः सफलैर्हृद्यैः सिद्धैरुपहृतैः सदा॥३६॥ शोभितोत्तमपार्श्वं तं देवमुत्पलशीर्षकं॥ ततः सम्मुखमु
दीक्ष्य ववंदे स नराधिपः॥३७॥ जानुभ्यां शिरसा चैव गत्वा भूमितलं तदा॥ नाम्नां सहस्रेण तथा तुष्टाव मधु
सूदनं॥३८॥ प्रदक्षिणमथो चक्रे सउत्थाय पुनः पुनः॥ रम्यमायतने हृष्टा तत्रोवासाश्रमे पुनः॥३९॥ जला
द्बहिर्गुहां कांचिदाश्रित्य सुमनोहरां॥ तपश्चकार तत्रैव पूजयन्मधुसूदनं॥४०॥ नानाविधैस्तथा पुष्पैः
फलमूलैः सगोरसैः॥ नित्यत्रिषवणस्नायी वह्निपूजापरायणः॥४१॥ देववापीजलैः कुर्वन्सततं प्राणधा
रणं॥ सर्वाहारपरित्यागं कृत्वा स मनुजेश्वरः॥४२॥ अंतस्तंत गुहाशायिकांतेनपतिपार्थिवः॥ एकाहार
क्रियश्चापि केवलं तोयपो नृप॥४३॥ न तस्य ग्लानिमायाति शरीरं च तदद्भुतं॥४३॥ एवं स राजा तपसि प्रस
क्तः संपूजयन् देववरं सदैव॥ तत्राश्रमे कालमुवास किंचित्स्वर्गोपमे दुःखमविंदमानः॥४४॥॥ इति श्रीम
त्स्यपुराणे भुवनकोशो॥ सूत उवाच॥ तत्राश्रमपदे रम्ये नित्यकाहारपरिच्छदा॥ क्रीडावृहारंगंधर्वैः पत्यप्स
रसां सह॥१॥ कृत्वा पुष्पोच्चयं गुर्वीं गंधयित्वा तथा स्रजं॥ जग्मेनि वेघदेवायगंधर्वस्य स्तदादरौ॥२॥
पुष्पोच्चयप्रसक्तानां क्रीडंतीनां यथासुखं॥ वेश्यानां विविधाकारान्ययरूपमपि न पश्यति॥३॥ काचित्सुष्पो
च्चये सक्ता लताजालेन वेष्टिता॥ सखीजनेन संत्यक्ता कांतेनाति समुच्छ्रिता॥४॥ काचित्कमलगंधाढ्या निःश्वा

सपवनाहतैः॥ मधुपैराकुलमुखी कांतेन परिमोक्षिता॥५॥ मकरंदसमाक्रांतनयना काचिदंगना॥ कांतनिः
श्वाससवातेन नीरजस्कृतेक्षणा॥६॥ काचिदुच्चीयपुष्पाणि दाराः कांतस्य भामिनी॥ कांतसंग्रथितैः पुष्पै
राराजत्कृतशेखरा॥७॥ उच्चीय स्वयमुद्गुम्फ्य रमण्याहितशेखरा॥ कृतकृत्यमथात्मानं मेने मन्मथवर्द्ध
ना॥८॥ अस्यस्मिन्गहने कुंजे विशेषकुसुमालता॥ काचिदेवं रहो नीत्वा रमणेन रिरंसुना॥९॥ कां
तसेनामितलताकुसुमानि विचिन्वती॥ सर्वाभ्यः काचिदात्मानं मेने सर्वगुणाधिकं॥१०॥ काचित्स्वरूपति
रूपालं नलिनीपुष्पकूटकं॥ क्रीडमाना समं गंधर्वैरसमानामनोरमा॥११॥ काचिदाताडयत्कांत
मुदकेन शुचिस्मिता॥ ताड्यमाना यकांतेन प्रीतिं काचिदुपापये॥१२॥ कांतं चताडयामास जातखेदाव
रांगना॥ अद्यपतद्वरारोहा सा सलाम्य पयोधरा॥१३॥ कांतसंताडनाद्धृष्टकेशपाशानिबंधना॥ केश
कलमुखी नातिमधुपैरिवपद्मिनी॥१४॥ स्वचक्षुस्सदृशैः पुष्पैस्संछन्ने नलिनीवने॥ छन्ना काचिच्चिरा
ल्लब्धा कांतेनान्विष्ययत्नतः॥१५॥ स्नाता शीतापदेशेन काचित्प्राहांगनावशं॥ रमणालिंगनं चक्रे मनोनि
लुषितं चिरं॥१६॥ जलार्द्रवसनं सूक्ष्ममंगजीनं सुविस्मिता॥ धारयंती जनं चक्रे काचिन्नवसमन्मथं॥१७
रुक्मात्मगुणैः काचित्कांतेनाकृष्यतां नसि॥ बुद्ध्यत्वाग्रामपतितं रमणं प्राह सखि रं॥१८॥ काचित्तत्राम

खीदन्नजानुदेशेन स्वांतरे॥ संत्रोतत्कांतरमणा मग्ना काचिज्जलाचिरं॥१९॥ काचित्स्त्रीकृतादित्या कुंभान्नजल
कारिणी॥ शिलातलगता तत्र दृष्टकामान्नचक्षुषा॥२०॥ कृतमात्स्यं विलुलितं सक्रांतं कुचकुंकुमं॥ रत्यकांच
न कांत्या नमभवन्नत्सरोजलं॥२१॥ सुस्नातदेवगंधर्वदिव्यरागागणेन च॥ पूज्यमानं च हृद्देशे तत्रदेवं जना
ईनं॥२२॥ काचिन्नद्दहशोराजालतागृहगताः स्त्रियः॥ मंडयंती स्वगात्राणि कांतसंन्यस्तमानसाः॥२३॥ काचि
दादर्शनिमग्नकराहतिमुखोद्धतं॥ स्वएवतीकांतवचनं श्रुतिकं च तथा बभौ॥२४॥ काचित्सत्वरितादृत्वान्नृप
णानां विपर्ययं॥ कुर्वाणा नैव बुबुधे मन्मथाविष्टमानसा॥२५॥ वायुछिन्नानि सुरभिकुसुमाकरमंडिता॥
काचित्सिंचंती दृढशोभ्रदेशे नीलशाद्वले॥२६॥ पाययामास रमणं प्रियं काचिद्वरांगना॥ काचित्सपीवरारो
हाकांतपाणिसमर्पितं॥२७॥ काचित्स्वनेत्रचपलनीलोत्पलयुतं पयः॥ पीत्वा पप्रच्छ रमणं क्वगतोतममो
त्पले॥२८॥ तथैव नीतेते नूनमित्युक्ता रमणेन सा॥ तथा पप्रच्छ रमणं क्वगतोतम मोत्पले॥२९॥ तथैव
नीतेते नूनमित्युक्ता रमणेन सा॥ तथाविदित्वा मुग्धबाला बभूव व्रीडिता चिरं॥२९॥ काचित्कांतार्पितं सुभ्रूः कां
तवशेषितं॥ सविशेषरसोपानं पपौ मद्यमवर्धनं॥३०॥ आपानगोष्ठीषु तथा तासां स नरपुंगवः॥ शुश्राव
विविधं गीतं तंत्रीस्वरविमिश्रितं॥३१॥ प्रदोषसमये तांश्च देवदेवं जनार्दनं॥ राजन्सदोपनृत्यंति नानावाद्य

म०पु० पुरस्सरा॥३२॥यामममात्रेगतोरात्रौवेनिर्गत्यगुहामुखात्॥आवसंतियुताकांतैःपरर्द्धिचरितांगुहां॥३३॥ना
१७० नागंधान्वितलतांनानागंधसुगंधिनीं॥नानाविचित्रछायतांकुसुमोत्करमंडितां॥३४॥एवमप्सरसांपुत्रपुन्
क्रीडितातिचसर्वतः॥तपस्येपेमहाराजकेशवार्पितमानसः॥३५॥तंमृत्खुर्नृपतिंगत्वागंधर्वाप्सरसांगणाः
राजन्स्वर्गोपिमंदेवाभिमंप्राप्तोस्यरिंदमः॥३६॥वयंहितेमुदास्यामोमनसःकांक्षितान्वरान्॥तानादायगृ
हंगच्छतिष्ठेहपदिवापुनः॥३७॥राजोवाच॥॥अमोघदर्शनाःसर्वेभवंतस्त्वमितौजसः॥वरंवितरनाद्येनप्रसा
दंमधुसूदनात्॥३८॥एवमस्त्विसयोक्तस्तैःसतुराजपुरूरवाः॥तत्रोवाससुखीमासंपूजयानोजनार्द्दनं॥
३९॥प्रियएवसदेवासीत्गंधर्वाप्सरसांतपः॥तुतोषसपतीराज्ञस्तस्यालौल्येनकर्मणा॥४०॥मासस्यसप्तेसन्
पःप्रविष्टस्तदाश्वमंरत्नसहस्रचित्रं॥तोपायातस्तत्रउवाससमासंयावत्क्षितितोनपफाल्गुनस्य॥४१॥फाल्गुना
मलपक्षांतेराजास्वप्नेपुरूरवाः॥नसौवदेवदेवस्यश्रुश्रावगदितंश्रुतं॥४२॥राज्ञामस्यांव्यतीतायांअत्रिणात्वं
समेष्यसि॥तेनराजन्समागम्यकृतकृत्योभविष्यसि॥४३॥स्वप्नमेवंसराजर्षिर्दृष्ट्वादेवेनकविकस्य॥प्रत्यूष
कालेविधिवत्स्नातःप्रायोजितेंद्रियः॥४४॥कृतकृत्योपपाकामंपूजयित्वाजनार्दनं॥सर्वंतुदेवदेवस्यस्नम्यवेद राम
यतधार्मिकाः॥४५॥ततःश्रुश्रावद्वचनंदेवतानांसमीरितं॥एवमेवमहीपालनात्रकार्याविचारणा॥४६॥ए १७० १७०

वंप्रसादंसंप्राप्यदेवाज्जनार्दनात्॥कृतदेवार्चनोराजातयाकृतऊताञ्जनः॥सवन्किमानवापाश्चवरदाने
नकेशवात्॥४७॥॥इतिश्रीमत्स्यपुराणेभुवनकोशेतपःफलं॥॥सूतउवाच॥॥तस्यश्रमस्योत्तरतस्त्रिपु
रारिनिषेवितः॥नानानारत्नमयैःश्रृंगैःकल्पद्रुमसमन्वितः॥१॥मध्येहिमवतःपृष्ठेकैलासोनामपर्वतः॥तस्मि
न्निवसतिश्रीमान्कुवेरःसहगुह्यकैः॥२॥अप्सरानुगतोराजामोदतेत्यलकाधिपः॥कैलासपादसंभूतंपु
ण्यंशीतजलंशुभं॥३॥मंदारपुष्परजसापूरितंदेवसन्निभं॥तस्मात्प्रभवतेदिव्यानदीमंदाकिनीशुभा॥४॥
दिव्यंचचंदनंतत्रतस्यास्तीरेमहद्वनं॥प्रागुत्तरेणकैलासंदिव्यसौगंधिकंगिरिं॥५॥सर्वधातुमयंदिव्यंसु
वेलंपर्वतंप्रति॥चंद्रप्रभोनामगिरिःशुभ्रोरत्नसंनिभः॥६॥तत्समीपेसरोदिव्यमच्छोदंनामविश्रुतं॥
तस्मात्प्रवहतेदिव्यानदीमंदाकिनी॥७॥तस्यास्तीरेवनंदिव्यंमहच्चैत्ररथंशुभं॥तस्मिन्गिरौनिवसतिम
णिभद्रःसहानुगः॥८॥यक्षसेनापतिःक्रूरोगुह्यकैःपरिवारितः॥पुण्यामंदाकिनीनामनदीस्वच्छोदका
शुभा॥९॥महामंडलमध्येतुप्रविष्टातुमहोदधिं॥कैलासदक्षिणेप्राच्यंशिवंसर्वौषधीगिरिं॥१०॥मनःशि
लामयंदिव्यंसुवेलंपर्वतंप्रति॥लोहितोहेमश्रृंगस्तुगिरिःसूर्यप्रभोमहान्॥११॥तस्योपांतेमहद्दिव्यंलोहि
तंसुमहत्सरः॥तस्मात्प्रभवतेपुण्योलौहित्यश्चमदोमहान्॥१२॥दिव्यारण्यंविशोकंचतस्यास्तीरेमहद्वनं॥

तस्मिन्गिरौनिवसतियक्षोमणिधरोवशी॥१३॥सौम्यैःसुधार्मिकैश्चैवगुह्यकैःपरिवारितः॥कैलासा
त्पश्चिमोदीच्यांककुद्मानौषधीगिरिः॥१४॥ककुद्मतिचरुद्रस्यउत्पत्तिश्चककुद्मिनः॥तदंजनंत्रैक
कुदंशैलंत्रिककुदंप्रति॥१५॥सर्वधातुमयस्तत्रसुमहान्वैद्युतोगिरिः॥तस्यपादेमहद्दिव्यंमानसं
सिद्धसेवितं॥१६॥तस्मात्प्रभवतेपुण्यासरयूर्लोकपावनी॥तस्यास्तीरेवनंदिव्यंवैभ्राजंनामविश्रुतं
१७॥कुबेरानुचरस्तस्मिन्प्रहेतितनयोवशी॥ब्रह्मधानोनिवसतिराक्षसोनंतविक्रमः॥१८॥कैला
सात्पश्चिमाशायांदिव्यःसर्वौषधीगिरिः॥अरुणःपर्वतश्रेष्ठोरुक्मधातुविभूषितः॥१९॥भवस्य
दयितःश्रीमान्पर्वतोहेमसंनिभः॥शातकौम्भमयैर्दिव्यैःशिलाजालैःसमाचितः॥२०॥शतसंख्यै
स्तपनीयैःशृंगैर्दिवमिवालिखन्॥मुंजवान्सुमहद्दिव्योदुर्गशैलोमहाचितः॥२१॥तस्मिन्गिरौनिवसतिगि
रिशोधूम्रलोहितः॥तस्यपादात्प्रभवतिशैलोदंनामतत्सरः॥२२॥तस्मात्प्रभवतेपुण्यानदीशैलोदकाशु
ना॥सादक्षसीतयोर्मध्येप्रविष्टापश्चिमोदधिं॥२३॥अस्त्युत्तरेणकैलासाच्छिवंसर्वौषधीगिरिं॥गौरंतुप
र्वतश्रेष्ठंहरितालमयंप्रति॥२४॥हिरण्यशृंगःसुमहान्दिव्यौषधिमयोगिरिः॥तस्यपादेमहद्दिव्यंसरः
कांचनवालुकं॥२५॥रम्यंबिंदुसरोनामयत्रराजाभगीरथः॥गंगार्थेसतुराजर्षिरुवासबहुलाःसमाः॥

२६॥दिवंयास्यंतिमेपूर्वेगंगातोयाप्लुताःस्थिताः॥तत्रत्रिपथगादेवीप्रथमंतुप्रतिष्ठिता॥२७॥सोमपादात्प्र
सृतासासप्तधाप्रविभज्यते॥यूपामणिमयास्तत्रविताना श्चहिरण्मयाः॥२८॥तत्रेष्ट्वाक्रतुभिःसिद्धःश
क्रःसुरगणैःसह॥दिव्यच्छायापथस्तत्रनक्षत्राणांतुमंडलं॥२९॥दृष्टपतेनासुरोराज्ञोदेवीत्रिपथ
गातुसा॥अंतरिक्षंदिवंचैवभावयित्वादिवंगता॥३०॥भवोत्तमांगेपतितासंरुद्धायोगमायया॥तस्याधे
बिंदवःकेचित्क्रुद्धायाःपतिताभुवि॥३१॥कृतंतैर्बिंदुसरस्ततोबिंदुसरःस्मृतं॥ततस्तस्यानिरुद्धायाभवे
नसहसारुषा॥३२॥ज्ञात्वातस्यत्वभिप्रायंक्रूरंदेव्याश्चिकीर्षितं॥भित्वाविशामिपातालंस्रोतसागृह्य
शंकरं॥३३॥अथावलेपःसंज्ञातस्तस्याःकुरुसुशंकरः॥तिरोभावयितुंबुद्धिरासीदंगेषुतांनदीं॥३
४॥एतस्मिन्नेवकालेतुदृष्ट्वाराजानमग्रतः॥धमनीसंततंक्षीणंक्षुधाव्याकुलितेंद्रियं॥३५॥अनेनतो
षितश्चाहंनद्यर्थेपूर्वमेवतु॥बुध्वास्यवरदानंतुततःकोपंन्ययच्छत॥३६॥ब्रह्मणोवचनंश्रुत्वायदुक्तं
धारयन्नदं॥ततोविसर्जयामाससंरुद्धांस्वेनतेजसा॥३७॥नदींभागीरथस्यार्थेतपसोग्रेणतोषितः॥
ततोविसर्जयामाससप्तस्रोतांसिगंगया॥३८॥त्रीणिप्राचीमभिमुखंप्रतीचींत्रीण्येवतु॥स्रोतांसि
त्रिपथायास्तुसंप्लाव्यंतसप्तधा॥३९॥नलिनीह्लादिनीचैवपावनीचैवप्राच्यगा॥सीताचक्षुश्चसिंधुश्च

म०पु०
१७२

तिस्त्रस्तावैप्रतीच्यगाः॥४०॥सप्तमीत्वन्वगात्तासांदक्षिणेनभगीरथं॥तस्माद्भागीरथीसावैप्रविष्टादक्षिणो
दधिं॥४१॥सप्तचैताःप्लावयंतिवर्षंतिहिमसाह्वयं॥प्रसूताःसप्तनद्यस्तुशुभाबिंदुसरोद्भवाः॥तान्देशा
न्प्लावयंतिस्मम्लेछप्रायांश्चसर्वशः॥सह्योलाकुकुरान्ध्रान्बर्बरान्यवनान्खशकान्॥४३॥एतानुज्ज
नपदांश्चक्षुःप्लावयित्वोदधिंययौ॥दारदान्जंगुडांश्चैववंगांधारान्नौरसान्कुरून्॥४४॥शिवपौरानि
न्द्रकुरूंस्तस्याःशीतान्मितेजसः॥सैंधवान्नुर्वराननुवनिकुपथान्भीमरोरकान्॥४५॥मुनोमुखांश्चोर्ध्वमरूं
सिंधुरेतान्निषेवते॥गंधर्वान्किंनरान्यक्षान्रक्षोविद्याधरोरगान्॥४६॥कलापग्रामकांश्चैवतथाकिं
पुरुषान्वसान्॥किरातांश्चपुलिंदांश्चकुरून्वैभरतानपि॥४७॥पंचालान्कौशिकान्मत्स्यान्मागृ
धांगांस्तथैवच॥ब्रह्मोत्तरामवंगांश्चताम्रलिप्तांस्तथैवच॥४८॥एतान्जनपदानार्यान्गंगाभावयते
शुभा॥ततःप्रतिहताविंध्यप्रविष्टादक्षिणोदधिं॥४९॥ततस्तुह्लादिनीपुण्याप्राचीनाभिमुखाययौ॥
प्लावयन्त्युपकांश्चैवनिषादानपिचसर्वशः॥५०॥धीवरानृषिकांश्चैवतथानीलमुखानपि॥केकरानेक
कर्णांश्चकिरातानपिचैवहि॥५१॥कालिंगदातिकांश्चैवकुक्षिकान्स्वर्गभूमिकान्॥सामंडलेसमुद्र राम
स्यतीरेभूत्वाचतुर्दश॥५२॥ततस्तुमालिनीनामप्राचीमेवदिशंययौ॥कुपथान्प्लावयंतीसाइंद्रद्युम्नस १७२

सरांस्यपि॥५३॥तथाखरपथान्देशान्वेत्रशंकुपथानपि॥मध्येतोजानकबरमोष्ट्रप्रावरणान्ययौ॥५४॥इंद्रद्वीप
समुद्रांतेप्रविष्टालवणोदधिं॥ततस्तुपावनीप्रापाल्याचीमाशांजवेनतु॥५५॥तोमरान्प्लावयतीहंस
मार्गान्समूहकान्॥पूर्वान्देशांश्चसेवंतीभित्वासाबहुधागिरिं॥५६॥कर्णप्रावरणांश्चाप्यगतासाश्वमु
खानपि॥सिक्तापर्वतंमेरुंसागत्वाविद्याधरानपि॥५७॥नेमिमंडलकोष्टंतुसाप्रविष्टामहत्सरः॥तासांनद्यु
पनद्योन्याःशतशोथसहस्रशः॥५८॥उपागच्छंतितान्नद्योयतोवर्षतिवासवः॥तीरेवंशौकसारायाःसुर
भिनामतद्वनं॥५९॥हिरण्यशृंगोवसतिविद्वान्कौवेरकोवशी॥यज्ञादपेतःसुमहानमितौजाःसुविक्रमः॥
६०॥तत्रागस्त्यैःपरिवृतोविद्वद्भिर्ब्रह्मराक्षसैः॥कुवेरानुचराह्येतेचत्वारस्तमाश्रिताः॥६१॥एवमेवतुविज्ञेया
सिद्धिःपर्वतवासिनां॥परस्परेणद्विगुणाधर्मतःकामतोर्थतः॥६२॥हेमकूटस्यपृष्टेतुसर्पाणांतत्सरःस्मृतं॥
सरस्वतीप्रभवतितस्माज्ज्योतिष्मतीचया॥६३॥अवगाढेह्युभयतःसमुद्रःपूर्वपश्चिमे॥सरोविष्णुपदंना
मनिषधेपर्वतोत्तमे॥६४॥यस्माद्दयंप्रभवतिगंधर्वानुकुलाचते॥मेरोःपार्श्वात्प्रभवतिह्रदश्चन्द्रप्रभोमहा
न्॥६५॥जंबूश्चैवनदीपुण्यायस्यांजांबूनदंस्मृतं॥पयोदस्तुह्रदोनीलःसशुभःपुंडरीकवान्॥६६॥पुंड
रीकपयोदाचतस्माद्वेसंप्रसूयते॥सरसस्तुसरस्त्वेतत्स्मृतमुत्तरमानसं॥६७॥वितस्तामृगकांताचतस्माद्वेसं

प्रसूयतां॥ ह्रदाः कुरुषु विख्याताः पद्ममीनकुलाः॥६८॥ नाम्ना ना वैजयमाँ वै सादश्शोदधिसन्निभाः॥ तेभ्यः सो
धी च मध्वी च देवद्यौः संप्रसूयतां॥६९॥ किंपुरुषाद्यानि यान्यष्टौ तेषु देवो न वर्षति॥ उद्भिदास्तु दकान्यत्र प्रभ
वंति सरिद्वराः॥७०॥ ऋषभो बलाहकश्चैव चक्रो मैनाक एव च॥ विनिविष्टाः प्रतिदिशं निम्नगा लवणांभसि॥७
१॥ चंद्रकांतस्तथा द्रोणः सुमहांश्च शिलोच्चयः॥ उदगायतो दीर्घतु अवगाढा महोदधिं॥७२॥ चक्रो बधिरक
श्चैव तथा नारद पर्वतौ॥ प्रतीचीमायतास्तेवै प्रविष्टास्ते महोदधिं॥७३॥ जीमूतो द्रावणश्चैव मैनाकश्चैव पर्वतः
आयतास्ते महाशैलाः समुद्रं दक्षिणं प्रति॥७४॥ चक्रमैनाकयोर्मध्ये विदिशं दक्षिणापथे॥ तत्र संवर्तको
नामसोग्निः पिबति तज्जलं॥७५॥ अग्निः समुद्रवासस्तु और्वसिवडवामुखः॥ इत्येते पर्वताविष्टाश्चत्वारो ल
वणोदधिं॥७६॥ छिद्यमानेषु पत्रेषु पुरा इंद्रस्य वै भयात्॥ तेषां तु दृश्यते चंद्रे शुक्ले कूर्मसमाकृतिः॥७७॥
ते नारतस्य वर्षस्य ते हापेन वक्रान्विताः॥ इहोदितास्याहरपते चान्येत्वनन्तरचोदिताः॥७८॥ उत्तरोत्तरमेतेषां
वर्षमुद्रिच्यते गुणैः॥ आरोग्यायुः प्रमाणाभ्यां धर्मतः कामतोर्थतः॥७९॥ समन्वितानि भूतानि तेषु नाग
त्राः॥ वसंति नानाजातीनि तेषु सर्वेषु तानि वै॥८०॥ इत्येते धारयन्तीमं पृथ्वी जगदिदं स्थिताः॥८१॥ इति राम॰ १७३
श्रीमत्स्यपुराणे भुवनकोशे जंबूद्वीपवर्णनं॥ सूत उवाच॥॥ शाकद्वीपस्य वक्ष्यामि यथावदिह निश्चयः

यथ्यमानेनिबोधध्वं शाकद्वीपं द्विजोत्तमाः॥१॥ जंबूद्वीपस्य विस्ताराद्द्विगुणस्तस्य विस्तरः॥ विस्तारात्त्रिगुण
श्चापि परियाहः समंततः॥२॥ तेनावृताः समुद्रोयं द्वितीपो लवणोदकः॥ यत्र पुण्या जनपदाश्चिराश्च म्रियते
जनः॥३॥ कुत एव चतुर्दुर्भिक्षं क्षमा तेजा युते ष्विह॥ तत्रापि पर्वताः शुभ्राः सप्तैव मणिभूषिताः॥४॥ शाकद्वी
पादिषु तेषु सप्तनगास्तु षु॥ ऋज्वायताः प्रतिदिशं द्वीपविस्तरमानतः॥५॥ रत्नाकरा द्विमेना मानः शोभयंतो
महाचिताः॥ समोदिताः प्रतिदिशं निविष्टा वर्षपर्वताः॥६॥ उभयत्रावगाढौ च लवणक्षीरसागरौ॥ शाकद्वी
पेषु वक्ष्यामि सप्त दिव्यान् महाचितान्॥७॥ देवर्षिगंधर्वयुतः प्रथमो मेरुरुच्यते॥ प्रागायतः स सौवर्ण उदयोना
म पर्वतः॥८॥ तत्र मेघास्तु दृश्यंते प्रभवंति च यांति च॥ तस्यापरेण सुमहान् जलधारो महागिरिः॥९॥ सैव चं
द्रः समाख्यातः सर्वौषधी समन्वितः॥ तस्मान्नित्यमुपादत्ते वासवः परमं जलं॥१०॥ नारदो नाम सैवा को दु
र्गशैलो महाचितः॥ तत्राचलौ समुत्पन्नौ पूर्वनारद पर्वतौ॥११॥ तस्यापरेण सुमहान् श्यामो नाम महागि
रिः॥ अतः श्यामत्वमापन्नाः प्रजाः पूर्वमिमाः किल॥१२॥ स एव दुंदुभिर्नाम श्यामः पर्वतसत्तमः॥ शब्दमृ
त्युः पुरा तस्मिन् दुंदुभिस्ताडितः सुरैः॥१३॥ रत्नमालांतरमयः शाल्मलश्चांतराह्वकः॥ तस्यापरेण रज
तो महानस्तगिरिः स्मृतः॥१४॥ सोपि सोमकइत्युक्तो देवै यत्रामृतं पुरा॥ संहृतं च हृतं चैव मातुरर्थे गरुत्म

ना॥१५॥अस्यापरे चांतिकेयः सुमन्नाम्नैव संस्मृतः॥हिरण्याक्षो वराहेण तस्मिन्नद्रौ निषूदितः॥१६॥आंबिकेया
त्सरोरम्यः सर्वौषधिनिषेवितः॥विभ्राजस्तु समाख्यातः स्फाटिकैस्तु समाचितः॥१७॥यस्माद्विभ्राजते वह्नि
र्विभ्राजस्तेन स स्मृतः॥सोपीडकेशावेतुक्रोपतो वायुः प्रपातुतः॥१८॥तेषां वर्षाणि वक्ष्यामि पर्वतानां द्विजो
त्तमाः॥शृणुध्वं नामतस्तानि यथावदनुपूर्वशः॥१९॥द्विनामान्येव वर्षाणि यथैव गिरयस्तथा॥उदयस्यो
दयं वर्षं जलधारेति विश्रुतं॥२०॥नाम्नायतनयं नाम वर्षं तत्प्रथमं स्मृतं॥तदेव शैशिरं नाम वर्षं संपरिकी
र्तितं॥२१॥रैवतस्य च कौमारं तदेव च सुखोदयं॥सुपाम पर्वत वर्षं तदनीचकमिति स्मृतं॥२२॥आनंदक
मिति प्रोक्तं तदेव मुनिभिः श्रुतं॥तदेव ध्रुवमित्युक्तं वर्षं विभ्राजसंज्ञिकं॥२३॥द्वीपस्य परीणाहं च ह्रस्वदी
र्घत्वमेव च॥जंबूद्वीपेन संख्याता तस्य मध्ये वनस्पतिः॥२४॥शाकोनाम महावृक्षः प्रजास्तस्य सहानुगाः
एतेषु देवगंधर्वाः सिद्धाश्च सहचारणैः॥२५॥विहरंति समत्वेन दृश्यमाना स्वतैः सह॥तत्र पुण्या जनपदाश्च
तुर्वर्णसमन्विताः॥२६॥तेषु नद्यश्च सप्तैव प्रतिवर्षं समुद्गताः॥द्विनाम्न्यश्चैव ताः सर्वा गंगा सप्तविधाः स्मृताः
२७॥प्रथमा तु कुमारीति गंगा शिवजलाशुभा॥अनुतप्ता च नाम्नैषा तंदी से परिकीर्तिता॥२८॥सुकुमा
री तपःसिद्धा द्वितीया नामतः सती॥नंदा च पावनी चैव तृतीया परिकीर्तिता॥२९॥शिबिका च चतुर्थी स्यात्त्रि

विविधा च पुनः स्मृता॥इक्षुश्च पंचमी ज्ञेया तथैव च पुनः कुहूः॥३०॥वैरूपका चामृता चैव षष्ठी संपरिकीर्ति
ता॥सुकृता च गभस्ती च सप्तमी परिकीर्तिता॥३१॥एताः सप्त महाभागाः प्रतिवर्षं तिवासवः॥तासां तु ना
मधेयानि परिमाणं तथैव च॥३२॥न शक्यं परिसंख्यातुं पुण्यास्ताः सरिदुत्तमाः॥ताः पिबंति महाहृष्टान्वी
जनपदास्तु ते॥३३॥एतेषां नद्यः प्रोक्ताः प्रमोदायंति वैशिवाः॥आनंदाश्च सुखाश्चैव क्षेमकाश्च नतैः सह॥
३४॥वर्णाश्रमाचारयुता देशास्ते सप्त विश्रुताः॥आरोग्या बलिनश्चैव सर्वे मरणवर्जिताः॥३५॥अवस
र्पिणी न तेष्वस्ति तथैवोत्सर्पिणी पुनः॥न तत्रास्ति युगावस्था चतुर्युगकृता क्वचित्॥३६॥त्रेतायुगसमः का
लस्तथा तत्र प्रवर्त्तते॥शाकद्वीपादिषु त्वेषु पंचस्वेतेषु सर्वशः॥३७॥देशस्य तु विचारेण कालः स्वाभावि
कः स्मृतः॥न तेषु संकरः कश्चित् वर्णाश्रमकृतः क्वचित्॥३८॥धर्मस्य चाव्यभीचारादेकांतं सुखिताः प्र
जाः॥न तेषु माया लोभो वा ईर्ष्यासूया भयं कुतः॥३९॥विपर्ययो न तेष्वस्ति नदंको न च दांडिकाः॥स्वधर्मे
ण च धर्मज्ञास्ते रक्षंति परस्परं॥४०॥परिमंडलस्तु सुमहान् द्वीपो वै कुशसंज्ञिकः॥नदीजलैः प्रविछिन्नैः
सर्वतश्चात्र संनिभैः॥४१॥सर्वधातुविचित्रैश्च मणिविद्रुमभूषितैः॥अन्यैश्च विविधाकारैरम्यैर्जनपदैस्त
था॥४२॥वृक्षैः पुष्पफलोपेतैः सर्वतो धनधान्यवान्॥नित्यं पुष्पफलोपेतः सर्वरत्नसमाचितः॥४३॥आ

वृतः पशुभिः सर्वैर्ग्राम्यारण्यैश्च सर्वशः ॥ आवृतः पशुभिः सर्वैर्ग्राम्यारण्यैश्च सर्वतः ॥ आनुपूर्व्यासमा
सेन कुशद्वीपं निबोधत ॥ ४४ ॥ अपृततीयं वक्ष्यामि कुशद्वीपं तु कृत्स्नशः ॥ कुशद्वीपेन क्षीरोदः सर्वतो
परिवारितः ॥ ४५ ॥ शाकद्वीपस्य विस्ताराद्विगुणेन समन्वितः ॥ तत्रापि पर्वताः सर्वे विज्ञेया रत्नयोनयः ॥
४६ ॥ रत्नाकरास्तथा नद्यस्तेषां नामानि मे शृणु ॥ द्विनामानश्च ते सर्वे शाकद्वीपे यथा तथा ॥ ४७ ॥ प्रथ
मः सूर्यसंकाशः कुमुदो नाम पर्वतः ॥ विद्रुमोच्चय इत्युक्तः स एव च महीधरः ॥ ४८ ॥ सर्वधातुमयैः शृंगै
र्द्वीपमावृत्य सर्वशः ॥ बलाहकस्तृतीयस्तु जात्यंजनमयो गिरिः ॥ ४९ ॥ द्युतिमान्नामतः प्रोक्तः स एव च
महीधरः ॥ चतुर्थः पर्वतो द्रोणो यत्रौषध्यो महागिरौ ॥ ५० ॥ विशल्यकरणी चैव मृतसंजीवनी तथा ॥ पु
ष्पवान्नामसौ वाक्तः सर्वतस्तु समाचितः ॥ ५१ ॥ कंकस्तु पंचमस्तेषां पर्वतो नाम सारवान् ॥ कुशेशय इति प्रो
क्तः पुनः स पृथिवीधरः ॥ ५२ ॥ दिव्यपुष्पफलोपेतो दिव्यवीरुत्समन्वितः ॥ षष्ठस्तु पर्वतस्तत्र महिषो मे
घसन्निभः ॥ ५३ ॥ स एव तु पुनः प्रोक्तो हरिरित्यभिविश्रुतः ॥ तस्मिन्सोग्निर्निवसति महिषो नाम योप्सुजः
५४ ॥ सप्तमः पर्वतस्तत्र ककुद्मान्स समाख्यते ॥ मंदरः सैव विज्ञेयः सर्वधातुमयः शुभः ॥ ५५ ॥ मंदइत्ये
ष यो धातुरपामर्थे प्रकाशकः ॥ अपां विदारणाच्चैव मंदरः स निगद्यते ॥ ५६ ॥ तत्र रत्नान्यनेकानि स्वयं र

क्षति वासवः ॥ प्रजापतिरुपादाय प्रजाभ्यो विविदं धत्स्वयं ॥ ५७ ॥ तेषामंतरविष्कंभो द्विगुणः समुदाहृतः ॥ इ
त्येते पर्वताः सप्त कुशद्वीपे प्रभाषिताः ॥ ५८ ॥ तेषां वर्षाणि वक्ष्यामि सप्तैव तु विभागशः ॥ कमुद्वती स्मृत
श्चैव उन्नतश्चैव स स्मृतः ॥ ५९ ॥ उन्नतस्य परिज्ञेयं वर्षं लोहितसंज्ञितं ॥ कंकस्यापि ककुन्नाम धृतिमांश्चैव न
घश्चैव निबोधत ॥ ६० ॥ तत्रापि नद्यः सप्तैव प्रतिवर्षं हिताः स्मृताः ॥ कनामवसस्ताः सर्वाः पुण्यजलाः स्मृताः ॥
६१ ॥ धूतपाप्मा नदी तासां योनिश्चैव पुनः स्मृता ॥ शीता द्वितीया विज्ञेया सा चैव हि निन्यस्मृता ॥ ६२ ॥ पवित्र
त्रितया ज्ञेया वितृष्णापि चया पुनः ॥ चतुर्थी ह्रादिनी प्रोक्ता चंद्रमा इति च स्मृता ॥ ६३ ॥ विद्युच्च पंचमी प्रोक्ता शु
क्रा चैव प्रभाष्यते ॥ खंडा षष्ठी तु विज्ञेया पुनश्चैव विभावरी ॥ ६४ ॥ महती सप्तमी प्रोक्ता पुनश्चैषा धृतिः स्मृ
ता ॥ अन्यास्ताभ्यः परिज्ञाताः शतशोथ सहस्रशः ॥ ६५ ॥ अभिगछंति वा नद्यो यतो वर्षति वासवः ॥ इत्येष स
न्निवेशोयं कुशद्वीपस्य वर्णितः ॥ ६६ ॥ शाकद्वीपस्य विस्तारः प्रोक्तस्तस्य सनातनः ॥ कुशद्वीपः समुद्रेण घृ
तमंडोदकेन तु ॥ ६७ ॥ सर्वतस्तु महान्द्वीपश्चंद्रवत्परिवेष्टितः ॥ विस्तारान्मंडलाच्चैव क्षीरोदद्विगुणो म
तः ॥ ६८ ॥ ततः परं प्रवक्ष्यामि क्रौंचद्वीपं यथातथा ॥ कुशद्वीपस्य विस्तारात् द्विगुणास्तु परः स्मृतः ॥ ६९ ॥ घृ
तोदकसमुद्रेण क्रौंचद्वीपोभिवेष्टितः ॥ चक्रायति प्रमाणेन वृतो वृत्तेन सर्वशः ॥ तस्मिन्द्वीपे नराः श्रेष्ठान्य

रोगविवर्जिताः॥ क्रौंचात्परेपावरकः पावरादंधकारकाः॥७१॥ दंधकारात्परेवापि देवाहन्नामपर्वतः॥ देवाहतात्परे
णापि देवनो गिरिरुच्यते॥७२॥ देवनात्परतश्चापि गोविंदो नामपर्वतः॥ गोविंदात्परतश्चापि पुंडरीको महागिरि
ः॥७३॥ एतेरत्नमयाः सप्तक्रौंचद्वीपस्य पर्वताः॥ परस्परस्य द्विगुणो विष्कंभो वर्षपर्वतः॥७४॥ वर्षाणि तस्य
वक्ष्यामि नामतस्तु निबोधत॥ क्रौंचस्य कुशलो देशो वामनस्य मनोनुगः॥७५॥ मनोनुगात्परे चोष्णः स्मृतिपो
पि स उच्यते॥ उष्णात्परे पावरकाः पावरादंधकारकः॥७६॥ अंधकारकदेशात्तु मुनिदेशस्तथा परः॥ मुनिदे
शात्परे वापि प्रोच्यते चंदनिष्टितः॥७७॥ सिद्धचारणसंकीर्णो गौरः प्रियः शुभिर्जनैः॥ स्मृतास्तत्रैव नद्यस्तु प्र
ति वर्षगताः शुभाः॥७८॥ गौरी कुमुद्वती चैव संध्या रात्रिर्मनोजवा॥ ख्याती च पुंडरीका च गंगा सप्तविधा स्मृ
ता॥७९॥ तासां सहस्रशश्चान्या नद्यः पार्श्वसमीपगाः॥ अभिगच्छंति ता नद्यो बहुलाश्च बहूदकाः॥८०॥ ते
षां निसर्गादेशानां आनुपूर्व्या सहस्रशः॥ न शक्यो विस्तराद्वक्तुमपि वर्षशतैरपि॥८१॥ नोपसर्गः प्रजानां तु
संहारोपस्थितेषु वै॥ अत ऊर्ध्वं प्रवक्ष्यामि शाल्मलस्य निबोधत॥८२॥ शाल्मलो द्विगुणो द्वीपः क्रौंचद्वी
पस्य विस्तरात्॥ परिवार्य समुद्रं तु दधिमंदकस्थितः॥८३॥ तत्र पुण्या जनपदाः चिराच्च म्रियते जनः॥ कुत
एव तु दुर्भिक्षं क्षमातेजोयुताहि ते॥८४॥ प्रथमः सूर्यसंकाशः सुमनो नाम पर्वतः॥ पीतश्च मध्यमश्चा

सीत्तः कुंभमयो गिरिः॥८५॥ नाम्ना सर्वसुखो नाम दिव्यौषधिसमन्वितः॥ तृतीयश्चैव सौवर्णः शृंगपत्रपि
रोगिरिः॥८६॥ सुमना रोहितो नाम दिव्यो गिरिवरो महान्॥ सुमनाः कुशदेशः सुखोदर्कः सुखोदयः॥८७
तै रोहितस्तु द्वितीयस्तु रोहिणी नाम विश्रुतः॥ तत्र रत्नान्यनेकानि स्वयं रक्षति वासवः॥८८॥ प्रजापतिमुपादा
य प्रसन्नो विदधस्त्वयं॥ नतत्र नद्यो वर्षवाशीतोष्णं न च तद्विधं॥८९॥ वर्णाश्रमाणां वार्ता वा त्रिषु द्वीपेषु
विद्यते॥ न गृहं न च दंड्योस्ति ईर्ष्यासूया भयं तथा॥९०॥ उद्भिद्वान्युदकान्यत्र गिरिप्रस्रवणानि च॥ भोजनं षड्र
सं तत्र तेषां स्वयमुपस्थितं॥९१॥ अधर्मोत्तमं न तेष्वस्ति न लोभो न परिग्रहः॥ आरोग्यबलवत्सश्च एकांतसुखि
ताः प्रजाः॥९२॥ त्रिंशद्वर्षसहस्राणि मानसी सिद्धिमास्थिताः॥ सुखमायुश्च रूपं च धर्मैश्वर्यं तथैव च॥९३॥
शाल्मलाद्येषु विज्ञेयं द्वीतेषु त्रिषु सर्वशः॥ व्याख्यातः शाल्मलाद्यानां द्वीपानां तु विधिः शुभः॥९४॥ परिमंड
लस्तु द्वीपश्च क्रमवृत्तरिवेष्टितः॥ सुरोदेन समुद्रेण द्विगुणेन समन्वितः॥९५॥ इति श्रीमत्स्यपुराणे भुव
नकोशे द्वीपवर्णनं॥ सूत उवाच॥ गोमेदकं तु वक्ष्यामि षष्ठं द्वीपं तपोघनाः॥ सुरोदकसमुद्रस्तु गोमे
देन समावृतः॥१॥ शाल्मलस्यापि विस्ताराद्द्विगुणस्तस्य विस्तरः॥ तस्मिन्द्वीपे तु विज्ञेयौ पर्वतौ द्वौ स
माहितौ॥२॥ प्रथमः सुमनानामजात्यंजनमयो गिरिः॥ द्वितीयः सुमहो नामसर्वौषधिसमन्विः॥३॥ शा

नकौंचमयः श्रीमान्विशेषः सुमहाचितः॥ इक्षुरससमुद्रेणवृतोगोमेदकश्चसः॥ पथेनतुसमुद्रेणसुरोदातद्वि
गुणेनतु॥ धातुकीकुमुदश्चैवहव्यपुत्रौसुविश्रुतौ॥५॥ सोमगंप्रथमंवर्षंधातुकीखंडउच्यते॥ धातुक्या
स्तुस्मृतंतद्वैप्रथमंप्रथमस्यतु॥६॥ गोमेदंपरस्मृतंवर्षंनाम्नासर्वसुखंततः॥ कुमुदस्यद्वितीयस्यद्वितीयं
कुमुदंततः॥७॥ एतौद्वौपर्वतौज्ञेयौवृत्तौसर्वसमुच्छ्रितौ॥ पूर्वेणतस्यद्वीपस्यसुमनाःसर्वतःस्थितः॥८॥
प्रागपश्चायतैःपादैरासमुद्रादितिस्थितिः॥ पश्चार्द्धेकुमुदस्तस्यएवमेवस्थितस्तुवै॥९॥ एतैःपर्वतपा
दैस्तुसदेशोवैद्विधाकृतः॥ दक्षिणार्द्धेतुद्वीपस्यधातुकीखंडउच्यते॥१०॥ कुमुदंतत्तरंतस्यद्वितीयंवर्ष
पर्वतं॥ एतौजनपदौद्वौतुगोमेदस्यचविस्तृतौ॥११॥ पुष्करेणतुद्वीपेनवृतश्चेक्षुरसोदकः॥ समुद्रेण
महाभागोगोमेदद्विगुणेनच॥१२॥ पुष्करेपर्वतःश्रीमांश्चित्रसानुर्महागिरिः॥ कूटैश्चित्रैर्मणिमयैः
शिलाजालसमुद्भवैः॥१३॥ द्वीपस्यैवतुपूर्वार्द्धेचित्रसानुःस्थितोमहान्॥ परिमंडलसहस्राणिविस्ती
र्णःपंचविंशति॥१४॥ ऊर्ध्वंतिस्तुचतुर्विंशयोजनानांमहाचलः॥ द्वीपार्धस्यपरिक्षिप्तःपश्चिमोमान
सोगिरिः॥१५॥ स्थितोवेलासमीपेतुपूर्वचंद्रइवोदितः॥ योजनानांसहस्राणिसार्द्धपंचाशदुच्छ्रितः॥
१६॥ तस्यपुत्रोमहावीतःपश्चिमार्द्धस्यरक्षिता॥ पूर्वार्द्धेपर्वतस्यापिद्विधादेशस्तुसंस्मृतः॥१७॥ स्वादूद

केनोदधिनापुष्करःपरिवारितः॥ विस्तारान्मंडलाच्चैवगोमेदंद्विगुणेनतु॥१८॥ दशवर्षसहस्राणितेषुजीवंति
मानवाः॥ विपर्ययोनतेष्वस्तिएतत्स्वाभाविकंस्मृतं॥१९॥ आरोग्यंसुखबाहुल्यंमानसीसिद्धिमास्थिता॥ सु
खमायुश्चरूपंचत्रिषुद्वीपेषुसर्वशः॥२०॥ अधमोत्तमौनतेष्वास्तांतुल्यास्तेवीर्यरूपतः॥ नतत्रवध्यवध
कौनेर्ष्यासूयाभयंतथा॥२१॥ नलोभोनचदंभोवानचाल्पपरिग्रहः॥ सत्यानृतेनतेष्वास्तांधर्माधर्मौत
थैवच॥२२॥ वर्णाश्रमाणांवार्तावापाशुपाल्यवणिक्कृषिः॥ त्रयीविद्यादंडनीतिःशुश्रूषादंडएवच॥२३॥
नतत्रवर्षंनद्योवाशीतोष्णंनैवविद्यते॥ उद्भिदान्युदकानिस्युर्गिरिप्रस्रवणानिच॥२४॥ तुल्योत्तरकुरूणांतु
कालस्तत्रतुसर्वदा॥ सर्वर्तुसुखकालोसौजराक्लेशविवर्जितः॥२५॥ सर्गस्तुधातुकीखंडेमहावीतेतथै
वच॥ एवंद्वीपाःसमुद्रैस्तुसप्तसप्तभिरावृताः॥२६॥ द्वीपस्यानंतरोयस्तुसमुद्रस्तत्समस्तुवै॥ एवंद्वीप
समुद्राणांवृद्धिर्ज्ञेयापरस्परं॥२७॥ अपांचैवसमुद्रेकात्समुद्रइतिसंज्ञितः॥ ऋषवृसत्यौवर्षेषुप्रजाय
स्यचतुर्विधा॥२८॥ औषधिरेत्येवरमणेवर्षत्वंतेनतेषुच॥ उदयतीदौपूर्वेचिस्तुसमुद्रःपूर्यतेसदा॥२९॥ प्र
क्षीयमाणेबहुलेक्षीयतेतमतेचवै॥ आपूर्यमाणोह्युदधिरात्मनैवाभिपूर्यते॥३०॥ ततोवैक्षीयमाणस्तु
स्वात्मनेवह्यपक्षये॥ उदयात्सपसांयोगात्पुसासौपायघास्वयं॥३१॥ तपासतुसमुद्रोपिवर्धतेशशिनो

म०पु० १७८

दये॥ अन्यूनानातिरिक्तास्ता वर्द्धंत्यापो ह्रसंति च॥३२॥ उदयास्तमिते षिंदोः पक्षयोः शुक्लकृष्णयोः॥ क्षयवृ
द्धी समुद्रस्य शशिवृद्धिक्षयौ तथा॥३३॥ दशोत्तराणि पंचाहुरंगुलीनां शतानि च॥ अपां वृद्धिक्षयौ दृष्टः स
मुद्राणां तु पर्वसु॥३४॥ द्विरापत्वात्स्मृतो द्वीपो दधनाच्चोदधिः स्मृतः॥ अपर्वाणस्तु गिरयः सर्वबंधात्पर्व
ताः॥३५॥ शाकद्वीपे तु वै शाकः पर्वतस्तेन चोच्यते॥ कुशद्वीपे कुशस्तंबो मध्ये जनपदस्य तु॥३६॥ क्रौंचद्वी
पे गिरेः क्रौंचस्तस्य नाम्नास उच्यते॥ शाल्मलिः शाल्मलिद्वीपे पूज्यते स महाद्रुमः॥३७॥ गोमेदके तु गोमेदः प
र्वतस्तेन चोच्यते॥ न्यग्रोधः पुष्करद्वीपे तत्र चैव नमः स्मृतः॥३८॥ पूज्यते स महादेवो ब्रह्मणोऽव्यक्तजन्मनः॥ त
स्मिन्स वसति ब्रह्मा साध्यैः सार्द्धं प्रजापतिः॥३९॥ तत्र देवा उपासंते त्रयस्त्रिंशन्महर्षिभिः॥ स तत्र पूज्यते दे
वो देवैर्महर्षिसत्तमाः॥४०॥ जंबूद्वीपात्प्रवर्त्तंते रत्नानि विविधानि च॥ द्वीपेषु शाल्मलाद्येषु उक्तवर्षेषु वै
तत॥४१॥ गोपायते प्रजास्तत्र सर्वैः सह जपंडितः॥ योजनं चाप्रपत्नेन सदा स्वयमुपस्थिते॥४२॥ षड्रसं
तन्महावीर्यं तत्र ते भुंजते जनाः॥ परेण पुष्करस्याथ आवृत्यावस्थितो महीं॥४३॥ स्वादूदकः समुद्रस्तु समंता
त्परिवेष्टते॥ स्वादूदकस्य परितः शैलोस्य परिमंडलः॥४४॥ प्रकाशश्चाप्रकाशश्च लोकालोकः स उच्यते॥ आ
लोकस्तस्य चार्वाक् निरालोकस्ततः परं॥४५॥ लोकविस्तारमात्रं तु पृथिव्यर्द्धं तु बाह्यतः॥ प्रतिच्छन्नं समंतात्तु

राम० १७८

उदकेनावृतं महत्॥४६॥ भूमेर्दशगुणाश्चापः समंतात्पालयंति गां॥ अपां दशगुणश्चाग्निः सर्वतो धारयत्यपः
॥४७॥ अग्नेर्दशगुणो वायुर्धारयन् ज्योतिरास्थितः॥ तिर्यक्क्रममंडलो वायुर्भूतान्याविश्य धारयेत्॥४८॥ महन्नतो
त्यावृतं तेव अव्यक्तेन तु धार्यते॥ एवं परस्परोत्पन्ना धार्यंति च परस्परं॥ यस्मात्प्रविष्टास्त्वन्योन्यं तस्मात्ते स्थिरतां गताः
॥ संख्यां प्रत्यविशेषांश्च विशेषान्योन्यवेशनात्॥ पृथ्व्यादयस्तु वायवंताः परिच्छिन्नास्तु तत्रते॥ भूतेभ्यः परतस्तेभ्योत्व
लोकः सर्वतः स्मृतः॥५१॥ तथा ह्यलोक आकाशे परिच्छिन्नानि सर्वशः॥ ये ते महति पात्राणि तथैवांतर्गतानि
च॥५२॥ भवंत्यन्योन्यहीनानि परस्परसमाश्रयात्॥ तथा ह्यलोक आकाशे तदा स्वंतर्गता गताः॥५३॥ कृ
त्स्नान्येतानि तत्वानि अन्योन्यस्याधिकानि तु॥ यावदेतानि तत्वानि तावदुत्पत्तिरुच्यते॥५४॥ जंतूनपि हि संस्कारो
भूतेष्वंतर्गतस्तु वै॥ प्रत्याख्यायेह भूतानां कार्यैत्वाद्वि न विद्यते॥५५॥ तस्मात्परिमिता भेदाः स्मृताः कार्यात्मका
स्तु वै॥ ते कारणात्मकाश्चैव स्तु नैदा महदादयः॥५६॥ इत्येव सन्निवेशोयं पृथिव्याक्रांत भागशः॥ सप्तद्वीपस
मुद्राणां याथातथ्येन वै मया॥५७॥ विस्तारान्मंडलाच्चैव प्रसंख्यानेन चैव हि॥ विश्वरूपं प्रधानस्य परिमाणैक
देशकं॥५८॥ एतावत्संनिवेशस्तु मया सम्यक्प्रभाषितः॥ एतावदेव श्रोतव्यं संनिवेशस्य पार्थिवं॥ अत ऊ
र्ध्वं प्रवक्ष्यामि सूर्याचंद्रमसोर्गतिं॥५९॥ ॥ इति श्रीमत्स्यपुराणे भुवनकोशे सप्तद्वीपाख्यानं॥ ॥ सूतउवा०॥

सूर्याचंद्रमसावेतौ भ्राजेते यावदेव तु ॥ सप्तद्वीपसमुद्राणां द्वीपानां चापि विस्तरः ॥१॥ विस्तरार्द्धं पृथिव्यास्तु भवेद
न्यत्र बाह्यतः ॥ पर्याप्तिपरिमाणं च चंद्रादित्यौ प्रकाशतः ॥२॥ पर्याप्तपरिमाणात्तु बुधैस्तुल्यं दिवि स्मृतं ॥ त्रीणि
लोकानि मान्यस्मात्सूर्यो पात्यवलेवितः ॥३॥ अविरात्तु प्रकाशेन त्ववनात्स रविः स्मृतः ॥ भूयोनयः प्रवक्ष्या
मि प्रमाणं योजनैः पुनः ॥४॥ सप्तद्वीपसमुद्राया भ्रमणं चंद्रसूर्ययोः ॥ महत्वात्वं महानत्र शब्दो यस्मिन्नर्थे नि
पात्यते ॥५॥ अस्य भारतवर्षस्य विष्कंभं तुल्यविस्तृतं ॥ मंडलं भास्करस्याथ योजनैस्तन्निबोधत ॥६॥ नवयोज
नसाहस्रो विस्तारो मंडलस्य तु ॥ विस्तारात्त्रिगुणश्चापि परिणाहोत्र मंडले ॥७॥ विष्कंभान्मंडलाच्चैव भास्करा
त्द्विगुणः शशी ॥ अतः पृथिव्या वक्ष्यामि प्रमाणं योजनैः पुनः ॥८॥ सप्तद्वीपसमुद्राया विस्तारो मंडलस्य तु ॥
इत्येतदिह संख्यातं पुराणे परिमाणतः ॥९॥ तद्वक्ष्यामि प्रसंगाय सांप्रतं चाभिमानिभिः ॥ अभिमानिनोत्य
तीता ये तुल्यास्ते सांप्रतैस्त्विह ॥१०॥ देवा दैवैरतीतास्तु रूपैर्नामभिरेव च ॥ तस्मादिहैं सांप्रतैर्देवैर्वक्ष्यामि व
सुधातलं ॥११॥ दिव्यस्य सन्निवेशो वै सांप्रैरेव कृत्स्नशः ॥ शतार्द्धकोटिविस्तारा पृथिवी कृत्स्नशः स्मृ
ता ॥१२॥ तस्याश्चार्द्धप्रमाणेन मेरोश्चैवोत्तरोत्तरं ॥ पृथिव्या मध्यविस्तारा योजनाग्रं तु वै पुनः ॥१३॥ मेरोर्म
ध्ये प्रतिदिशं कोटिरेका तु सा स्मृता ॥ तथा शतसहस्राणामेकोननवतिं पुनः ॥१४॥ पंचाशच्च सहस्राणि पृ

थिव्यर्द्धस्य विस्तरः ॥ पृथिव्या विस्तरं कृत्स्नं योजनैस्तन्निबोधत ॥१५॥ तिस्रः कोट्यस्तु विस्तारात्संख्याता सु
चतुर्दिशं ॥ तथा शतसहस्राणि एकोनाशीतिरुच्यते ॥१६॥ सप्तद्वीपसमुद्रायाः पृथिव्याः स तु विस्तरः ॥
विस्तारात्त्रिगुणश्चैव पृथिव्यंतरमंडलं ॥१७॥ गणितं योजनानां तु कोट्यस्त्वेकादश स्मृताः ॥ तथा शतसह
स्राणि सप्तत्रिंशाधिकानि तु ॥१८॥ इत्येतद्वै प्रसंख्यातं पृथिव्यंतरमंडलं ॥ तारकासन्निवेशस्य दिवि यावत्तु
मंडलं ॥१९॥ पर्यासे सन्निवेशस्य भूमेर्यावत्तु मंडलं ॥ पर्यासपरिमाणं तु भूमेस्तुल्यं दिवः स्मृतं ॥२०॥ मेरोः
प्राच्यां दिशायां तु मानसोत्तरमूर्धनि ॥ वस्वौकसारा माहेंद्री पुण्या हेमपरिष्कृता ॥२१॥ दक्षिणेन पुनर्मेरो
र्मानसस्य तु पृष्ठतः ॥ वैवस्वतो निवसति यमः संयमने पुरे ॥२२॥ प्रतीच्यां तु पुनर्मेरोर्मानसस्यैव मूर्धनि ॥ सु
ख्या माहेंद्रपुण्यापि सोमस्यापि विभावरी ॥२३॥ मानसोत्तरपृष्ठे तु लोकपालाश्चतुर्दिशं ॥ स्थिता धर्मव्यवस्था
र्थं लोकसंरक्षणाय च ॥२४॥ लोकपालोपरिष्टात्तु सर्वतो दक्षिणायने ॥ काष्ठागतस्य सूर्यस्य गतिं तन्निबो
धत ॥२५॥ दक्षिणोपक्रमः सूर्यः क्षिप्तेषुरिव सर्पति ॥ ज्योतिषां चक्रमादाय सततं परिगच्छति ॥२६॥ मध्यम
श्चामरावत्यां यदा भवति भास्करः ॥ वैवस्वते संयमने उद्यत्सूर्यः प्रदृश्यते ॥२७॥ सुखायामर्धरात्रस्तु विभाव
र्यास्तमेति च ॥ वैवस्वते संयमने मध्याह्ने तु रविर्यदा ॥२८॥ सुखायामथ वारुण्यामुत्तिष्ठन् स तु दृश्यते ॥ वि

गावपामिद्दराज्ञेमाहेंद्यामस्तमेतिच॥२९॥सुखायामथवारुण्यामध्याह्नेतुरविर्यदा॥विभावर्यांसोमपुर्यामुत्तिष्ठ
तिविभावसौ॥३०॥रात्र्यर्द्धंचामरावत्यामस्तमेतियमस्यच॥सोमपुर्यांविभावर्यांमध्याह्नेचार्यमायदि॥३१॥म
हेंद्रस्यामरावत्यामुत्तिष्ठतिदिवाकरः॥अर्द्धरात्रंसंयमनेवारुण्यामस्तमेतिच॥३२॥सशीघ्रमेवपर्येतिभा
नुरालातचक्रवत्॥भ्रमन्वैभ्रममाणानिऋक्षाणिचरतेरविः॥३३॥एवंचतुर्षुपार्श्वेषुदक्षिणांतेषुसर्पति॥
उदयास्तमयेवासावुत्तिष्ठतिपुनःपुनः॥३४॥पूर्वाह्नेचापराह्नेचद्वौद्वौदेवालयौतुसः॥तपत्येकंचमध्या
ह्नेतामिरेवच॥३५॥उदितोवर्द्धमानाभिर्मध्याह्नेतपतेरविः॥अतःपरंह्रसंतीभिर्गोभिरस्तंसगच्छति॥३६
उदयास्तमयाभ्यांतुस्मृतेपूर्वापरेतुते॥यावत्पुरस्तात्तपतितावत्पृष्ठेतुपार्श्वयोः॥३७॥यत्रोदयस्तुदृश्ये
तत्तेषांसउदयःस्मृतः॥प्रणाशंगच्छतेयत्रतेषामस्तःसउच्यते॥३८॥सर्वेषामुत्तरेमेरुर्लोकालोकस्तुदक्षि
णे॥विदूरभावादर्कस्यभूमेर्लेखागतस्यच॥३९॥ह्रियंतेरश्मयोयस्मात्तेनरात्रौनदृश्यते॥ऊर्द्ध्वंशतसहस्रां
शुःस्थितस्तत्रप्रदृश्यते॥४०॥एवंपुष्करमध्येनयदाभवतिभास्करः॥त्रिंशद्भागंचमेदिन्यामुहूर्तेन
सगच्छति॥४१॥योजनानांसहस्रस्यइमांसंख्यांनिबोधत॥ऊर्ध्वंशतसहस्राणामेकत्रिंशच्चसास्मृता॥
४२॥पंचाशच्चसहस्राणितथान्यद्यधिकानिच॥मौहूर्तिकीगतिर्ह्येषासूर्यस्यतुविधीयते॥४३॥एतेनक्र

मयोगेनयदाकाष्ठांतुदक्षिणां॥परिगच्छतिसूर्योसौमसंकाष्ठामुदग्दिने॥४४॥मध्येनपुष्करस्याथभ्रमते
दक्षिणायने॥मानसोत्तरमेरोस्तुअंतरंत्रिगुणंतुतत्॥४५॥सर्वतोदक्षिणायांतुकाष्ठांतन्निबोधत॥नवको
द्यःप्रसंख्यातायोजनैःपरिमंडलं॥४६॥तथाशतसहस्राणिचत्वारिंशच्चपंचच॥अहोरात्रात्पतंगस्यग
तिरेषाविधीयते॥४७॥दक्षिणादिनिवृत्तोसौविषुवत्स्थोयदारविः॥क्षीरोदस्यसमुद्रस्योत्तरतोपिदिश
श्चरन्॥४८॥मंडलंविषुवेचापियोजनैस्तन्निबोधत॥तिस्रःकोट्यस्तुसंपूर्णाविषुवच्चापिमंडलं॥४९॥त
थाशतसहस्राणिविंशत्येकाधिकापुनः॥श्रावणेचोत्तरांकाष्ठांचित्रभानुर्यदाभवेत्॥५०॥गोमेदस्यपर
द्वीपेउत्तरांचदिशंचरन्॥उत्तरायाःप्रमाणंतुकाष्ठायामंडलस्यतु॥५१॥दक्षिणोत्तरमध्यानिविंद्याद्यथा
क्रमं॥स्थानंजरद्गवंमध्येतथैरावतमुत्तरं॥५२॥वैश्वानरंदक्षिणतोनिर्दिष्टमिहतत्त्वतः॥नागवीथ्युत्तरा
वीथीअजवीथ्यास्तुदक्षिणे॥५३॥उभेआषाढमूलेतुअजवीथ्यादयस्त्रयः॥अभिजित्सर्वतःस्वातिर्ना
गवीथ्युत्तरास्त्रयः॥५४॥अश्विनीकृत्तिकायाम्यानागवीथ्यास्त्रयःस्मृताः॥रोहिण्यार्द्रामृगशिरोनाग
वीथिरितिस्मृता॥५५॥पुष्याश्लेषापुनर्वस्वोवीथ्यावैरावतीस्मृता॥तिस्रस्तुवीथयोह्येताउत्तरोमार्ग
उच्यते॥५६॥पूर्वोत्तरफाल्गुन्यौमघाचैवार्षभीभवेत्॥पूर्वोत्तराप्रोष्ठपदेगोवीथीरेवतीस्मृता॥५७॥

म॰पु॰
१८१

श्रवणंचधनिष्ठाचवारुणंचजरद्गवं॥एतास्तुवीथयस्तिस्रोमध्यमोमार्गउच्यते॥५८॥हस्तश्चित्रातथास्वातिर्ना
गवीथीरितिस्मृता॥विशाखाज्येष्ठामैत्रंचमृगवीथीतियोच्यते॥५९॥मूलंपूर्वोत्तराषाढावीथीवैश्वानरीभ
वेत्॥स्मृतास्तिस्रस्तुवीथ्यस्तामार्गेवैदक्षिणेपुनः॥६०॥काष्ठयोरंतरंत्वेतद्योजनानांप्रकीर्तितं॥काष्ठयोर्ले
खयोश्चैवअयनेदक्षिणोत्तरे॥६१॥तेवक्ष्यामिप्रसंख्याययोजनैस्तुनिबोधत॥एकैकमंतरंतद्दुक्तान्येतानि
सप्ततिः॥६२॥सहस्रेणातिरिक्ताचततोन्यापंचविंशतिः॥लेखयोःकाष्ठयोश्चैवबाह्याभ्यंतरेसपर्येतिभुव
तेमंडलानितु॥६३॥प्रमाणंमंडलस्यापियोजनानांनिबोधत॥योजनानांसहस्राणिदशचाष्टौततःस्मृतः॥६
४॥अधिकान्यष्टपंचाशद्योजनानितुवैपुनः॥विष्कंभोमंडलस्यैवतिर्यक्सतुविधीयते॥६५॥अहस्तुचरतोना
भेःसूर्येविमंडलंक्रमात्॥कुलालचक्रपर्यंतोयथाचंद्रोरविस्तथा॥६६॥दक्षिणेचक्रवत्सूर्यस्तथाशीघ्रंनि
वर्त्तते॥तस्मात्प्रकृष्टांभूमिंतुकालेनाल्पेनगच्छति॥६७॥सूर्योद्वादशभिःशीघ्रंमुहूर्तैर्दक्षिणायने॥त्र
योदशार्द्धमृक्षाणांमध्येचातुरमंडलं॥६८॥मुहूर्तैस्तानिऋक्षाणिनक्तमष्टादशैश्चरन्॥कुलालचक्रमध्य
स्थोयदामंदंप्रसर्पति॥६९॥उदग्यानेतथासूर्यःसर्पतेमंदविक्रमः॥तस्माद्दीर्घेणकालेनभूमिंसोल्पांप्रस
र्पति॥७०॥सूर्योष्टादशभिरह्नोमुहूर्तैरुदगायने॥त्रयोदशानांमध्येतुऋक्षाणांचरतेरविः॥७१॥मुहूर्तै

राम॰
१८१

स्तानिऋक्षाणिरात्रौद्वादशभिश्चरन्॥ततोमंदतरंताभ्यांचक्रंतुभ्रमतेततः॥७२॥मृत्पिंडइवमध्यस्थोभ्र
मतेसौध्रुवस्तथा॥मुहूर्तैस्त्रिंशतातावदहोरात्रंध्रुवोभ्रमत्॥७३॥उभयोःकाष्ठयोर्मध्येभ्रमतेसौध्रुवस्त
था॥मुहूर्तैस्त्रिंशतातावद्दलोनितु॥उत्तरक्रमणात्तस्यदिवामंदमतिःस्मृता॥७४॥तस्यैवतुपुनर्नक्तंसौ
शीघ्रासूर्यस्यवैगतिः॥दक्षिणक्रमणेचापिदिवाशीघ्रंविधीयते॥७५॥गतिःसूर्यस्यवैनक्तंमंदाचापिपुनः
स्मृता॥एवंगतिविशेषेणविभजन्रात्र्यहानितु॥७६॥अथवीथ्यांदक्षिणायांलोकालोकस्यचोत्तरं॥लोक
संतानतोह्येषवैश्वानरपथाद्बहिः॥७७॥व्युष्टायातुप्रभासौरीपुष्करान्संप्रवर्त्तते॥पार्श्वेभ्योबाह्यतस्ता
वल्लोकालोकश्चपर्वतः॥७८॥योजनानांसहस्राणिदशोर्ध्वंचोच्छ्रितोगिरिः॥प्रकाशश्चाप्रकाशश्चपर्वतःप
रिमंडलः॥७९॥नक्षत्रचंद्रसूर्याश्चग्रहास्तारागणैःसह॥अभ्यंतरेप्रकाशंतेलोकालोकस्यवैगिरेः॥८०॥ए
तावानेवलोकस्तुनिरालोकस्ततःपरं॥लोकआलोकनेधातुर्निरालोकस्त्वलोकता॥८१॥लोकालोकौतुसं
धत्तेतस्मात्सूर्यःपरिभ्रमन्॥तस्मात्संध्येतितामाहुरुषाव्युष्टायदंतरं॥८३॥उषारात्रिःस्मृताविप्रैर्व्युष्ट
श्चापिअहःस्मृतं॥त्रिंशत्कलांमुहूर्तंतुअहस्तेदशपंचच॥८४॥ह्रासोवृद्धिरहर्भागैर्दिवसानांयथातुवै॥
संध्यामुहूर्तमात्रायांह्रासवृद्धीतुतेस्मृते॥८५॥लेखाप्रभृत्यथादित्येत्रिमुहूर्त्तजितेतिवै॥प्रातःस्मृतस्तपाक

लोमागमोमाक्ष्यः सपंचतु॥८६॥तस्मात्प्रातर्गतात्कालान्मुहूर्ताः संगवस्त्रयः॥मध्याह्नस्त्रीन्मुहूर्तास्तु तस्मात्का
लादनंतरं॥८७॥तस्मान्मध्यंदिनात्कालादपराह्न इति स्मृतः॥त्रय एव मुहूर्तास्तु काल एष स्मृतो बुधैः॥८
८॥अपराह्णे व्यतीताच्च कालः सायं स उच्यते॥दशपंचमुहूर्तास्तु अह्नो मुहूर्तास्त्रय एव तु॥८९॥दशपंच
मुहूर्तं वै अहस्तु विषुवे स्मृतं॥वर्द्धते ह्रसते चैव अयने दक्षिणोत्तरे॥९०॥अहस्तु ग्रसते रात्रिं रात्रिस्तु ग्र
सते त्वहः॥शरद्वसंतयोर्मध्ये विषुवे तु विधीयते॥९१॥आलोकांतः स्मृतो लोकाल्लोकालोक उच्यते॥लोकपा
लाः स्थितास्तत्र लोकालोकस्य मध्यतः॥९२॥चत्वारस्ते महात्मानस्तिष्ठंत्याभूतसंप्लवात्॥सुधामा चैव वैराजक
र्दमश्च प्रजापतिः॥९३॥हिरण्यरोमा पर्जन्यः केतुमान्राजसश्च सः॥निर्द्वंद्वा निरभिमाना निस्तंद्रा निःपरिग्रहाः
॥९४॥लोकपालाः स्थितास्ते ते लोकालोके चतुर्दिशं॥उत्तरं यदगस्त्यस्य स्प्रशृंगं देवनिषेवितं॥९५॥पितृयानः स्मृतः पं
था वैश्वानरपथाद्बहिः॥तत्रासते प्रजाकामा ऋषयो येऽग्निहोत्रिणः॥९६॥लोकस्य संतानकराः पितृयाने प
थि स्थिताः॥भूतारंभकृतं कर्म आशिषश्च विशांपते॥९७॥प्रारभंते लोककामास्तेषां पंथाः स दक्षिणः॥चलि
तं ते पुनर्धर्मं स्थापयंति युगे युगे॥९८॥संतप्तास्तपसा चैव मर्यादाभिः श्रुतेन च॥जायमानास्तु पूर्वे वै पश्चिमा
नां गृहेषु ते॥९९॥पश्चिमाश्चैव पूर्वेषां जायंते निधनेष्विह॥एवमावर्तमानास्ते वर्त्तंत्याभूतसंप्लवं॥१००॥अ

ष्टाशीतिसहस्राणि ऋषीणां गृहमेधिनां॥विशांतु दक्षिणं मार्गमाश्रित्याहूतसंप्लवं॥१०१॥क्रियावतां प्रसंख्यैका
वैश्मस्थानानि भेजिरे॥लोकसंव्यवहारार्थं भूतानां प्रकृतेन च॥१०२॥इच्छाद्वेषप्रवृत्त्यैव मैथुनोपगमाच्च वै॥
तथा कामकृतेनेः हसेवनाद्विषयस्य च॥१०३॥इत्येतैः कारणैः सिद्धाः श्मशानानीह भेजिरे॥प्रजैषिणः स
प्तर्षयो द्वापरेष्विह जज्ञिरे॥१०४॥संततिं ते जुगुप्संते तस्मान्मृत्युर्जितस्तु वै॥अष्टाशीतिसहस्राणि तेषामप्यू
र्ध्वरेतसां॥१०५॥उदक्पंथानमर्यमणं श्रिता आभूतसंप्लवात्॥तेषां प्रयोगाल्लोकस्य मिथुनस्य च वर्जनात्॥१०६
इच्छाद्वेषनिवृत्त्या च भूतारंभविवर्जनात्॥इत्येतैः कारणैः शुद्धैस्तेऽमृतत्वं च भेजिरे॥१०७॥आभूतसंप्लव
स्थानममृतत्वं विभाव्यते॥त्रैलोक्यस्थितिकालो हि न पुनर्मारगामिनां॥१०८॥ब्रूणहत्याश्वमेधौ च पाप
पुण्यनिश्चोपरं॥आभूतसंप्लवांते तु संक्षीयंते तो ध्वरेतसां॥१०९॥ऊर्ध्वोत्तरमृषिभ्यस्तु ध्रुवो यत्र तु संस्थि
तः॥एतद्विष्णुपदं व्योम्नि तत्तायं व्योम्नि भास्करं॥११०॥यत्र गत्वा न शोचंति तद्विष्णोः परमं पदं॥धर्मध्रुवस्य
तिष्ठंति ये तु लोकस्य कांक्षिणः॥१११॥॥इति श्रीमत्स्यपुराणे भुवनकोशो॥॥सूत उवाच॥॥ए
वं श्रुत्वा कथां दिव्यां अब्रवील्लोमहर्षणः॥सूर्याचंद्रमसोश्चारं ग्रहाणां चैव सर्वशः॥१॥॥ऋषय ऊ
चुः॥॥भ्रमंति कथमेतानि ज्योतींषि रविमंडले॥अव्यूहेनैव सर्वाणि तथा वा संकरेण च॥२॥कश्चि

म०पु०
१८३

भ्रामयतेतान्निभ्रमेतियदिवास्वयं॥एतद्वेदितुमिच्छामस्तन्नोनिगदसत्तम॥३॥सूतउवाच॥॥भूतसंमोहनं
ह्येतद्ब्रुवतोमेनिबोधत॥प्रत्यक्षमपिदृश्यंतंसंमोहयतिवैप्रजाः॥४॥योसौचतुर्दशर्क्षेषुशिशुमारेव्यव
स्थितः॥उत्तानपादपुत्रोसौमेढीभूतोध्रुवोदिवि॥५॥सेपभ्रमन्भ्रामयतेचंद्रादित्यौग्रहैःसह॥भ्रमंतमनु
पर्यंतिनक्षत्राणिचचक्रवत॥६॥ध्रुवस्यमनसावर्षौभ्रमतोज्योतिषांगणः॥वातानीकमयैर्बंधैर्ध्रुवेबद्धःप्र
सर्पति॥७॥तेषांभेदश्चयोगश्चकालवारास्तथैवच॥अस्तोदयास्तथास्तातमयनेदक्षिणोत्तरे॥८॥विषु
वद्ग्रहवर्णश्चसर्वमेवध्रुवेरितं॥जीमूतानामतेमेघायदेभ्योजीवसंभवः॥९॥द्वितीयमावहन्वायुमेघा
स्तेत्वभिसंश्रिताः॥इतोयोजनमात्राच्चअध्यर्धविकृतादपि॥१०॥वृष्टिसर्गस्तथातेषांधारासारप्रकी
र्तितः॥पुष्करावर्तकानामयेमेघाःपक्षसंभवाः॥११॥शक्रेणपक्षाश्छिन्नावैपर्वतानांमहौजसां॥काम
गानांसमृद्धानांभूतानांनाशमिच्छतां॥१२॥पुष्करानामतेपक्षाबृहंतस्तोयधारिणः॥पुष्करावर्तकाना
मकारणेनेहशब्दिताः॥१३॥नामरूपधराश्चैवमहाघोरस्वराश्चते॥कल्पांतवृष्टिस्रष्टारःकल्पांताग्निनि
यामकाः॥१४॥वायाधारावहंतेवैसास्तुताःकल्पसाधकाः॥यान्यस्यांकल्पभिन्नस्यप्राकृतस्याभवंस्तदा राम· १८३
१५॥यस्मिन्ब्रह्मासमुत्पन्नश्चतुर्वक्त्रःस्वयंप्रभुः॥तान्येवांडकपालानिसर्वेमेघाःप्रकीर्तिताः॥१६॥तेषामा

प्यायनंधूमःसर्वेषामविशेषतः॥तेषांश्रेष्ठश्चपर्जन्यश्चत्वारश्चैवदिग्गजाः॥१७॥गजानांपर्वतानांचमेघा
नांभोगिभिःसह॥कुलमेकंपृथग्भूतंजातिरेकाजलंस्मृतं॥१८॥पर्जन्योदिग्गजाश्चैवहेमंतेशीतसंभ
वं॥तेधारवर्षंवर्षंतिहिमात्यन्नविवृद्धये॥१९॥षष्ठःपरिवहोनामवायुस्तेषांपरायणः॥योसौबिभर्तिभ
गवान्गंगामाकाशगोचरां॥२०॥दिव्यामृतजलांपुण्यांत्रिपथस्योपरिश्रुतां॥तस्याविस्पंदितंतोयंदिग
जाःपृथुभिःकरैः॥२१॥शीकरंसंप्रमुंचामिनीहारइतिसस्मृतः॥दक्षिणेनगिरिर्योसौहेमकूटइतिस्मृ
तः॥२२॥उदग्घिमवतःशैलंत्तरेचाप्यदक्षिणे॥पुंड्रंनाम्नासमाख्यातंसम्यक्रृष्टिविवृद्धये॥२३॥मा
घ्यास्याप्लावनंचैवसर्वमेतत्प्रकीर्तितं॥भूयएवतुवृष्टीनांस्वष्टासमुपदिश्यये॥२४॥वर्षघर्महिमंरा
त्रिसंध्यंचैवदिनंतथा॥शुभाशुभफलान्नीहध्रुवात्सर्वंप्रवर्तते॥२५॥ध्रुवेणावेष्टितश्चैवसूर्योपोगत्व
र्षति॥सर्वभूतशरीरेषुत्वापोह्यनुश्रिताश्चयाः॥२६॥नद्यमानेषुतेष्वेवजंगमस्थावरेषुवै॥धूम
भूतास्तुतात्यपोनिःक्रामंतीहसर्वशः॥२७॥तेनचाभ्राणिजायंतेस्थानमभ्रमयंस्मृतं॥तेजोभिःसर्वलोके
भ्योयादत्तेरश्मिभिर्जलं॥२८॥समुद्राद्वायुसंयोगाद्वहत्यापोगभस्तयः॥ततस्तुऋतुकालेनपरिवर्तन्दि
वाकरः॥२९॥नियच्छत्यपोमेघेभ्यःशुक्लाःशुक्लैस्तुरश्मिभिः॥अभ्रस्थाःप्रपतंत्यापोवायुनासमुदीरिताः॥

॥३०॥ततोवर्षतिषण्मासान्सर्वभूतविवृद्धये॥वायव्यस्तनितंचैवविद्युतस्त्वग्निजाःस्मृताः॥३१॥मेहनाच्चमिहेर्धा
तामेघत्वंव्यंजयंतिच॥नभ्रश्यंतेततोयस्मात्तस्मादभ्राणिवैस्थितिः॥३२॥यष्टासौवृष्टिसर्गस्तुध्रुवेणाधिष्ठि
तोरविः॥ध्रुवेणाधिष्ठितोवायुर्वृष्टिंसंहरतेपुनः॥३३॥ग्रहान्निःसृतसर्वाननुचरंतेऋक्षमंडलं॥चारस्यां
तेशांसर्वंध्रुवेणसमधिष्ठितः॥३४॥अतःसूर्यरथस्यापिसन्निवेशःप्रचक्षते॥स्थितेनह्येकचक्रेणपं
चारेणत्रिनाभिना॥३५॥हिरण्मयेनानघुनाअष्टचक्रैकनेमिना॥चक्रेणभास्वतासूर्यःस्यंदनेनप्रस
र्पिणा॥३६॥दशयोजनसाहस्रोविस्तारायामउच्यते॥द्विगुणश्चररथोपस्थादीषादंकप्रमाणतः॥३७
संततस्यब्रह्मणास्टरोरथोल्यर्थविशेनतु॥असंगःकांचनोदिव्योयुक्तःपर्वतगेर्हयैः॥३८॥छंदोभिर्वाजि
रूपैस्तैर्यथाचक्रंसमास्थितैः॥वारुणस्यरथस्येहलक्षणैःसदृशंतुतत्॥३९॥तेनासौचरतिव्योम्निभास्वा
ननुदिनंदिवि॥अथैतानितुसूर्यस्यप्रत्यगानिनैरथस्यतु॥४०॥संवत्सरस्यावयवैःकल्पितानियथाक्रमं॥
अहनातिस्तुपूर्वस्यएकचक्रस्यवैस्मृतः॥४१॥आराःसंवत्सरास्तस्यनेमयऋतवःस्मृताः॥रात्रिंचकुर्योधुर्म
श्चध्वजऊर्ध्वव्यवस्थितः॥४२॥युगाक्षकोटीतेतस्यअर्थकामावुभौस्मृतौ॥सप्ताश्वरूपाश्छंदांसिवहंतेवा
युरंहसः॥४३॥गायत्रीचैवत्रिष्टुप्चजगत्यनुष्टुभ्तथा॥पंक्तिश्चबृहतीचैवउष्णिगेवतुसप्तमः॥४४॥

चक्रमक्षेनिबद्धंतुध्रुवेचाक्षःसमर्पितः॥सहचक्रोभ्रमत्यक्षःसहाक्षोभ्रमतिध्रुवे॥४५॥अक्षसाहो
चचक्रेणभ्रमतेसौध्रुवेरितः॥एवमर्थवशात्तस्यसंनिवेशोरथस्यतु॥४६॥तथासंयोगभावेनसिद्धोवैभास्क
रोरथः॥तेनासौतरणिर्देवोनभसःसर्पतेदिवं॥४७॥युगाक्षकोटीतेतस्यदक्षिणेसंहतस्यतु॥भ्रमतोभ्र
मतोरश्मीनेचक्रयुगयोस्तुवै॥४८॥मंडलानिभ्रमंतस्यखेचरस्यरथस्यच॥कुलालचक्रवन्मंडलंसर्वतो
खिलं॥४९॥युगाक्षकोटीतेतस्यवातोर्मीस्यंदनस्यतु॥५०॥संक्रामतेध्रुवमहोमंडलेसर्वतोदिशं॥५०॥भ्र
मतेस्तस्यरश्मीतेमंडलेतूर्ध्वंतरायणे॥वर्द्धतेदक्षिणेचाभ्रंभ्रमतेतरलानितु॥५१॥युगाक्षकोटीसंबद्धौ
द्वेरश्मीस्यंदनस्यते॥ध्रुवेणप्रगृहीतौतौतपनोनयतोरविं॥५२॥आकृष्यतेयदातेतुध्रुवेणसमधिष्ठिते॥तदा
सोभ्यंतरेसूर्योभ्रमतेमंडलानितु॥५३॥अशीतिमंडलशतंकाष्ठयोरुभयोरंतरं॥ध्रुवेणमुच्यमानेनपुनरार
श्मियुगेनतु॥५४॥तथैवबाह्यतःसूर्योभ्रमतेमंडलानितु॥उद्वेष्टयन्सवेगेनमंडलानितुगच्छति॥५५
॥इतिमत्स्यपुराणेभुवनकोशः॥ ॥सूतउवाच॥ ॥सरथोधिष्ठितोदेवैर्मासिमासियथाक्रमं॥ततोवहत्य
थादित्यंबहुभिर्ऋषिभिःसह॥१॥गंधर्वैरप्सरोभिश्चसर्पग्रामणिराक्षसैः॥एतेवसंतिवैसूर्येमासौ
द्वौद्वौक्रमेणच॥२॥धातार्यमापुलस्त्यश्चपुलहश्चप्रजापतिः॥उरगोवासुकिश्चैवसंकर्णीरथश्चतावुभौ॥३॥

रक्षोहेतिप्रहेतिश्च यातुधानावुभौस्मृतौ॥मधुमाधवयोर्स्तेषगणोवसतिभास्करे॥४॥वसेज्ज्येष्ठेति यो
मासोमित्रश्च वरुणश्च वै॥ऋषिरत्रिर्वसिष्ठश्च नागौतक्षकरंभकौ॥५॥मेनकासहजन्याचगंधर्वौ
चहाहाहूहू॥रथंतरस्त्वग्रामण्यौरथकृच्चैवतावुभौ॥६॥पौरुषेयोवधनाश्चैवयातुधानौतुतौस्मृतौ॥
एतेवसंतिवैसूर्येमासयोःशुचिशुक्रयोः॥७॥ततःसूर्येपुनश्चान्यानिवसंतिस्मदेवताः॥इंद्रश्चैवविवस्वां
श्चांगिराभृगुरेवच॥८॥एलापत्रस्तथासर्पःशंखपालश्चपन्नगः॥विश्वावसूग्रसेनौचप्रातश्चैवरथ
स्सह॥९॥प्रम्लोचाप्सराश्चैवतुम्लोचंतीचुच्यते॥यातुधानस्तथाहेतिव्याघ्रस्सैवतुतावुभौ॥१०॥न
भस्यनभसोरेतौवसतश्चदिवाकरे॥मासौद्वौदेवताःसूर्येवसंतिचशरद्रुतौ॥११॥पर्जन्यश्चैवपूषाच
भरद्वाजःसगौतम॥चित्रसेनगंधर्वस्तथावसुरुचिश्चयः॥१२॥विश्वाचीचघृताचीचउभेतेपुण्यलक्षणे॥
वापयोरावतश्चैवविश्रुतश्चधनंजयः॥१३॥सेनजिच्चसुषेणश्चसेनानीर्ग्रामणीस्तथा॥वातोवातश्चद्वावे
तौयातुधानावुभौस्मृतौ॥१४॥वसंस्त्वनेयंवैसूर्येमासयोश्चेषऊर्जयोः॥हेमंतिकौचद्वौमासौनिवहंतिदि
वाकरे॥१५॥अंशोभगश्चद्वावेतौकश्यपश्चक्रतुश्चतौ॥महेश्चैवसहस्सेचवसंस्तेतेदिवाकरे॥१६॥विद्यु
त्स्फूर्जश्चतावुग्रौयातुधानावुभौस्मृतौ॥ततःशिशिरयोश्चापिमासयोर्निवसंतिते॥१७॥त्वष्टाविष्णुर्जमदग्निर्वि

श्वामित्रस्तथैवच॥काद्रवेयौतथानागौकंबलाश्वतरावुभौ॥१८॥गंधर्वौधृतराष्ट्रश्चसूर्यवर्चाःस्मृता
वुभौ॥तिलोत्तमाप्सराश्चैवदेवीरंभामनोरमा॥१९॥ग्रामणीऋतजिच्चैवसत्यजिच्चमहाबलः॥ब्रह्मोपेत
श्चैवरक्षोयज्ञोपेतस्तथैवच॥२०॥एतेवैनिवसंतिस्मद्वौद्वौमासौदिवाकरे॥स्थानाभिमानिनोह्येतेगणा
द्वादशसप्तकाः॥२१॥सूर्यमाप्याययंत्येतेतेजसातेजउत्तमं॥ग्रथितैश्चवचोभिश्चस्तुवंतिऋषयोरविं॥२२
गंधर्वाप्सरसश्चैवगीतनृत्यैरुपासते॥विद्याग्रामणिनोयक्षाःकुर्वत्याभिषुसंग्रहं॥२३॥सर्पाःसर्पंति
वैसूर्येयातुधानानुयांतिच॥वालिखिल्यानयंत्यस्तंपरिवार्योदयाद्रविं॥२४॥एतेषामेवदेवानांयथावीर्यं
यथातपः॥यथायोगंयथाधर्मंयथातत्त्वंयथाबलं॥२५॥यथातपत्यसौसूर्यस्तेषामिहसतेजसा॥भूता
नामशुभंसर्वंव्यपोहंतिस्वतेजसा॥२६॥मायावानांशुभैरेतैःक्षीयतेदुरितंतुवै॥दुरितंशुभचाराणांव्यपो
हंतिक्वचित्क्वचित्॥२७॥एतेसहैवसूर्येणभ्रमंतेसानुगादिवि॥तपंतश्चयजंतश्चह्लादयंतश्चवैप्रजाः॥
२८॥गोपायंतिस्मभूतानिइहतेत्यनुकंपया॥स्थानाभिमानिनामेतत्स्थानंमन्वंतरेषुवै॥२९॥ग्रीष्मेहिमेव
वर्षासुचमुंचमानोघर्मंहिमंचवर्षंचनिशादिनंच॥गच्छत्यसावनुदिनंपरिगच्छरश्मीन्देवान्पितॄंश्च
मनुजांश्चसतर्पयन्वै॥३०॥शुक्लेचसूर्यंतिमहक्रमेणकालक्षयेचैवसुराःपिबंति॥तामेनसत्त्वामृतम

स्यस्तु षं कुक्षस्तरश्मीत्सुरिरक्षितं तु॥३१॥ सर्वेस्मृतं तत्स्मितर: पिबंति देवाश्च सौम्याश्च तथैव काव्या:॥ सूर्येण गो
पाभिर्हि विवर्धिताभिरद्भि: पुनश्चैव कृतं नयवैहरं॥३२॥ करावुत्सज धारिणेपस्तमुच्छिताभि॥ वृष्टाभिदृष्टा
भिरथौषधीभिर्मृत्यास्तथान्नेन क्षुधं जयंति॥ तृप्तिश्चाप्यमृतेनार्द्धमासं सुराणां मासेन च धाभि: स्वधया पितृणां॥
३३॥ अन्नेन जीवंत्यनिशं मनुष्या: सूर्याश्रयं तद्धि बिभर्त्ति गोभि:॥३३॥ इत्येष एकचक्रेण सूर्यस्तूर्णं प्रसर्पति॥
तत्रैतैरक्रमैरश्वै: सर्पते सो दिनक्षये॥३४॥ हरिर्हरिद्भिर्ह्रियते तुरंगमै: पिबंत्यथापो हरिभि: सहस्रधा॥ पु
न: प्रमुंचंत्यपनाश्च पोहरिं समुत्यमानो हरिभिस्तुरंगमै:॥३५॥ अहोरात्रं रथेनासावेकचक्रेण वै भ्रमत॥
सप्तद्वीपसमुद्रांस्तु सप्तभि: सप्तभिर्हुतं॥३६॥ छंदोरूपैश्च तैरश्वैर्यतश्चक्रं तत: स्थितै:॥ कामरूपै: सकृ
द्युक्तै: कामगैस्तैर्मनोजवै:॥३७॥ हरितैरव्ययै: पिंगैरीश्वरैर्ब्रह्मवादिभि:॥ वात्यते नंतरं चैव मंडलं दिवस: क्र
मात॥३८॥ कल्पादौ संयुक्ता अश्व वहंत्या हूत संप्लवं॥ आवृतो वालिखिल्यैश्च भ्रमते रात्र्यहानि तु॥३९॥ ग्रथितै:
स्ववचोभिश्च स्तूयमानो महर्षिभि:॥ सेव्यते गीतनृत्यैश्च गंधर्वाप्सरसां गणै:॥४०॥ पतंगै: पतगैरश्वैर्भ्राम्यमा
णो दिवस्पति:॥ वीथ्याश्रयाणि चरति नक्षत्राणि तथा शशी॥४१॥ ह्रासवृद्धी तथैवास्य रश्मय: सूर्यवत्स्मृता:॥ त्रि
चक्रोभयतोश्वश्च विज्ञेय: शशिनो रथ:॥४२॥ अपांगर्भसमुत्पन्नो रथ: सोमस्य सारथि:॥ सुतारैस्त्रिभिश्चक्रै

र्हयोत्तमै:॥४३॥ दशभिस्तुरगैर्दिव्यैरसंगैस्तन्मनोजवै:॥ सकृद्युक्ते रथे तस्मिन्वहंतिस्म युगक्षयं॥४४॥ संग्रही
ता रथे तस्मिन् श्वेतश्चक्षु:श्रवास्तु वै॥ अश्वास्तमेकवर्णास्ते वहंते शंखवर्चस:॥४५॥ अजश्च त्रिपथश्चैव वृषो
वाजी नरो हय:॥ अंशुमान्सप्तधातुश्च हंसो व्योम मृगस्तथा॥४६॥ इत्येते नामभिश्चैव दश चंद्रमसो हया:॥ ए
वं चंद्रमसं देवं वहंतिस्म युगक्षयं॥४७॥ देवै: परिवृत: सोम: पितृभि: सह गच्छति॥ सोमस्य शुक्लपक्षादौ भास्क
रे परत: स्थिते॥४८॥ आपूर्यते परोभाग: सोमस्य तु अह: क्रमात॥ सुषुम्नाप्यायमानस्य शुक्ले वर्द्धंति वै क
ला:॥४९॥ तस्मात् ह्रसंति वै कृष्णे शुक्ले ह्याप्याययंति च॥ इत्येवं सूर्यवीर्येण चंद्रस्याप्यायते तनु:॥५०॥ पौ
र्णमास्यां प्रदृश्येत शुक्ल: संपूर्णमंडल:॥ एवमाप्यायते सोम: शुक्लपक्षे त्वह: क्रमात॥५१॥ ततो द्वितीयाप्रभृ
ति बहुलस्य चतुर्दशी॥ अपां सारमयस्येंदोरसमात्रात्मकस्य च॥५२॥ पिबंत्यंबुमयं देवा मधु सौम्यं तथामृ
तं॥ संभृतं त्वर्द्धमासेन अमृतं सूर्यतेजसा॥५३॥ भक्षार्थमागतं सोमं पौर्णमास्यामुपासते॥ एकरात्रं सुरैस्सा
र्द्धं पितृभिर्ऋषिभि: सह॥५४॥ त्रयस्त्रिंशत्सहस्राणि देवा: सोमं पिबंति वै॥ इत्येवं पीयमानस्य कृष्णे वर्द्धंति
ता: कला:॥५५॥ क्षीयंते च तत: शुक्ला: कृष्णा आप्याययंति च॥ एवं दिनक्रमात्पीते देवैश्चापि निशाकरे॥५६॥
ततोपराह्णे पितरो जघन्ये दिवसे पुन:॥ पिबंति द्विकालं शिष्टास्तास्तु कलास्तु या:॥५७॥ विनिष्पंतामावास्यां

भस्तिम्यस्तदामृतं॥ अर्द्धमासेसमाश्रौ तुपीतागछंतितेमृतं॥५८॥ सौम्या बर्हिषश्चैव अग्निष्वात्ता स्त्रयेस्मृताः॥ का
व्याश्चैवतुयेप्रोक्ताः पितरः सर्वएवते॥५९॥ संवत्सरास्तुकाव्याः पंचाब्दायेद्विजाः स्मृताः॥ सौम्यास्तुऋतवोज्ञेया
सौम्याबर्हिषदस्तथा॥६०॥ अग्निष्वात्तासर्षिभवापितृसर्गोयमद्विजाः॥ पितृभिःपीयमानायांपंचदश्यांतुवैक
ला॥६१॥ यावन्नक्षीयतेतस्याभागःपंचदशस्तुसः॥ अमावास्यांतथातस्यअंतरापूर्यतेपरः॥६२॥ वृद्धिक्ष
यौवैपक्षादौषोडश्यांशशिनःस्मृतौ॥ एवंसूर्यनिमित्तैषाक्षयवृद्धीनिशाकरे॥६३॥ ताराग्रहाणांवक्ष्यामिस्वर्भा
नोस्तुरथःपुनः॥ अथतेजोमयःशुभ्रःसोमपुत्रस्यवैरथः॥६४॥ युक्तोहयैःपिशंगैस्तुदशभिर्वातसंभवैः॥ श्वे
तपिशंगःसारंगोनीलःश्यामोविलोहितः॥६५॥ श्वितश्चहरितश्चैवपृषतःपृष्णिरेवच॥ दशभिस्तैर्महाभागैरक्लां
गैर्वातरंहसैः॥६६॥ ततोभौमरथश्चापिअष्टांगःकांचनःस्मृतः॥ अष्टभिर्लोहितैरश्वैःसध्वजैरग्निसंभवैः॥६७
सर्पतेवैकुमारोसौऋतुवक्रानुवक्रगः॥ अतस्त्वांगिरसोविद्वान्देवाचार्योबृहस्पतिः॥६८॥ गौराश्वेन
तुरौक्मेणस्यंदनेनविसर्पति॥ युक्तेनाष्टभिरश्वैश्चसध्वजैरग्निसंभवैः॥६९॥ अब्दंवसतियोराशौसदिव्यंतेन
गच्छति॥ युक्तेनाष्टभिरश्वैश्चसध्वजैरग्निसंभवैः॥७०॥ रथेनक्षिप्रवेगेननागवस्तेनगच्छति॥ ततःशनैश्चरोप्यश्वै
ःसबलैर्वातरंहसैः॥७१॥ कार्ष्णायसंसमारुह्यस्यंदनंयातिसौरानिः॥ आदित्यान्निजयोराहुःसोमंगच्छतिपर्वसु॥७२

ततःकेतुमतोस्त्वश्वाअष्टांगावातरंहसा॥ पलालधूमवर्णाभावज्रश्यामाःसुदारुणाः॥७३॥ एतेवाहाग्रहाणांवै
मयाप्रोक्तारथैःसह॥ सर्वेध्रुवनिबद्धास्तेनिबद्धावातरश्मिभिः॥७४॥ एतेवैभ्रममाणास्तुयथायोगंवहंतिते।
वायव्याभिरदृश्याभिःप्रबद्धावातरश्मिभिः॥७५॥ परिभ्रमंतितद्बद्धाश्चंद्रसूर्यग्रहादिवि॥ यावंतोध्रुवपर्येतिध्रु
वंवैज्योतिषांगणः॥७६॥ यथानद्युदकेनौस्तुउदकेनसहोह्यते॥ तथादेवगृहाणिस्युरुह्यतेवातरंहसा॥७७
तस्माद्येतत्रदृश्यंतेव्योम्निदेवगृहादिवि॥ यावंतश्चैवताराःस्युस्तावंतोयमरीचयः॥७८॥ सर्वाध्रुवनिबद्धास्ता
भ्रमंत्योभ्रामयंतितं॥ तथाभ्रमंतिज्योतींषिवातचित्राणिसर्वशः॥७९॥ अलातचक्रवद्यांतिवातचक्रेरितानित्य
।यस्मात्प्रवहतेतानिप्रवहस्तेनसस्मृतः॥८०॥ एवंध्रुवेनियुक्तोसौभ्रमतिज्योतिषांगणः॥ एषतारामयोज्ञेयः
शिशुमारोध्रुवोदिवि॥८१॥ यदह्नाकुरुतेपापंदृष्ट्वानिशिविमुंचति॥ शिशुमारशरीरस्थायावंतस्तारकास्तुताः।
८२॥ वर्षाणिदृष्ट्वाजीवेततावदेवाधिकानितु॥ शिशुमाराकृतिंज्ञात्वाप्रविभागेनसर्वशः॥८३॥ उत्तानपाद
स्तथाविज्ञेयःसोत्तरेहनुः॥ यज्ञोधरस्तुविज्ञेयोधर्मोमूर्धानमाश्रितः॥८४॥ हृदिनारायणःसाध्याअश्विनौ
पूर्वपादयोः॥ वरुणश्चार्यमाचैवपश्चिमौतस्यसक्थिनी॥८५॥ शिश्नःसंवत्सरोज्ञेयोमित्रश्चापानमाश्रितः॥ पु
च्छेग्निश्चमहेंद्रश्चमरीचिःकश्यपोध्रुवः॥८६॥ एषतारामयस्तंभोनास्तिमेमिनवोदयात॥ नक्षत्रचंद्रसूर्याश्च

ग्रहास्ताराग णैः सह ॥८७॥ तन्मुखाः सर्वे च कल्पता दिवि स्थिताः ॥ ध्रुवेणाधिष्ठिताश्चैव ध्रुवमेव प्रदक्षिणं ॥८८॥ परि
यांति सुरश्रेष्ठा मेढीभूतं ध्रुवं दिवि ॥ अग्नीध्रकाश्यपानां तु तेषां स परमो ध्रुवः ॥८९॥ एक एव भ्रमत्येष मेरोरंतरमू
र्धनि ॥ ज्योतिषां चक्रमादाय आकर्षन्सम धोमुखः ॥९०॥ मेरुमालोकयन्नेव प्रतिपाति प्रदक्षिणं ॥९१॥ इ
ति श्रीमत्स्यपुराणे ध्रुवप्रशंसा ॥ ॥ ऋषय ऊचुः ॥ ॥ यदेतद्भवता प्रोक्तं गृहाणीत्यपति श्रुतं ॥ कथं देवगृहा
णि सुः पुनर्ज्योतींषि वर्णय ॥१॥ सूत उवाच ॥ ॥ एतत्सर्वं प्रवक्ष्यामि सूर्याचंद्रमसोर्गतिं ॥ यथा देवगृहाणि सुः
सूर्याचंद्रमसोस्तथा ॥२॥ अग्नेर्व्युष्टेः रजन्यां वै ब्रह्मणाव्यक्तयोनिना ॥ अव्याकृतमिदं त्वासीन्नैशेन तमसावृतं ॥
३॥ चतुर्भूतं वशिष्टेस्मिन्ब्रह्मणा समधिष्ठिते ॥ स्वयंभूर्भगवांस्तत्र लोकतत्वार्थसाधकः ॥४॥ खद्योतरूपी वि
चरन्नाविर्भावं विचिंतयन् ॥ ज्ञात्वा गिरिं तु काल्यादावयः पृथ्वीं च संश्रितं ॥५॥ संहृत्य प्रकाशार्थं त्रिधात्मानो स
भवत्पुनः ॥ पावकोयस्तु लोकेस्मिन्पार्थिवः सोग्निरुच्यते ॥६॥ यश्चासौ तपते सूर्ये शुचिरग्निस्तु स स्मृतः ॥ वैद्यु
तो जठरः सौम्यो वैद्युतश्चाप्पनिंदितिः ॥७॥ तेजोभिश्चाप्पते कश्चित्कश्चिद्देवाप्यनिंधनः ॥ काष्ठेंधनस्तु निर्मथ्य
सोग्निः शाम्यति पाकः ॥८॥ अर्चिष्मान्पवनो भिस्तुनिः प्रभा सोप्पलक्षः ॥ यश्चासौ मंडले शुक्ला निरुष्मा नाप्रकाशते ॥ राम॰
९॥ प्रभा सौरी तु पादेन अस्तं याति दिवाकरे ॥ अग्निमाविश्यते रात्रौ तस्मात्सूर्यः प्रकाशते ॥१०॥ उदिते तु पुनः सू १८८

र्ये रात्रिराविशते त्वपः ॥ तस्मात्ताम्राभवंत्यापो दिवारात्रिप्रवेशनात् ॥११॥ अस्तंगते पुनः सूर्ये अहो वै प्रविशत्य
पः ॥ तस्माच्छुक्लं पुनः शुक्ला आपो दृश्यंत नास्तुराः ॥१२॥ एतेन क्रमयोगेन भूम्यर्द्धे दक्षिणोत्तरे ॥ उदयास्तमये
त्वत्र अहो विशत्यपः ॥१३॥ यश्चासौ तपते सूर्यः पिबते सोपि रश्मिभिः ॥ सहस्रपादस्त्वेषोग्निर्वृतः कुंभनिभ
स्तु सः ॥१४॥ आदत्ते स तु नालीनां सहस्रेण समंततः ॥ आपो नदीसमुद्रेभ्यो ह्रदकूपेभ्य एव च ॥१५॥ तस्य रश्मि
सहस्रं तु शीतवर्षोष्णनिःस्रवः ॥ तासां चतुःशता नाड्यो वर्षंति चित्रमूर्त्तयः ॥१६॥ चंदनाश्चैव मेध्याश्च कांतकाश्चै
तकास्तथा ॥ अमृताजीवनाः सर्वा रश्मयो वृष्टिसर्जनाः ॥१७॥ हिमोद्वाश्च ता न्योन्यं रश्मयस्त्रिशतः स्मृताः ॥
चंद्रताराग्रहाः सर्वे पीता भानोर्गभस्तयः ॥१८॥ एना मेध्या स्तथा ह्लादिन्यो हिमसर्जनाः ॥ शुक्लाश्च कुकु
भाश्चैव गावो विश्वभृतश्च याः ॥१९॥ शुक्लास्ता नामतः सर्वास्त्रिंशता व मसर्जनाः ॥ समं बिभर्त्ति ताः सर्वा मनुष्या
न्देवतान्पितृन् ॥२०॥ मनुष्यानोषधिभिर्हि स्वधया च पितृनपि ॥ अमृतेन सुरान्सर्वान्स्त्रीसंतत्याभितर्पयि
त ॥२१॥ वसंते चैव ग्रीष्मे च शतानोः संतपते त्रिभिः ॥ वर्षास्तु शारदि चैव चतुर्भिः संप्रवर्षति ॥२२॥ हेमंते शिशिरे चै
व हिमोत्सर्गस्त्रिभिः पुनः ॥ औषधीषु बलं धत्ते स्वधया तु स्वधां पुनः ॥२३॥ सूर्यो मरत्वममृते त्रयस्त्रिषु नियच्छति ॥
एवं रश्मिसहस्रं तु सौरं लोकार्थसाधनं ॥२४॥ भिद्यते ऋतुमासाद्य सहस्रं बहुधा पुनः ॥ इत्येवं मंडलं शुक्लं भास्व

म० पु० रं लोकसंज्ञितं ॥२५॥ नक्षत्रग्रहसोमानां प्रतिष्ठा योनिरेव च ॥ चंद्रऋक्षग्रहाः सर्वे विज्ञेयाः सूर्यसंभवाः ॥२६॥ सुषु
म्णा सूर्यरश्मिर्या क्षीणं शशिनमेधते ॥ हरिकेशः पुरस्तात्तु यः स नक्षत्रयोनिकृत् ॥२७॥ दक्षिणे विश्वकर्मा तु
१८९ रश्मिराप्याययते बुधं ॥ विश्वावसुश्च पश्चात्तु शुक्रयोनिश्च स स्मृतः ॥२८॥ शनैश्चरं पुनश्चापि रश्मिराप्याययत्तु
न राट् ॥ सौम्यं ते यतस्तानि तस्मान्नक्षत्रता स्मृता ॥३०॥ क्षेत्राण्येतानि वै सूर्यमापतंति गभस्तिभिः ॥ तेषामादत्त
क्षेत्राणि सूर्यो नक्षत्रता ततः ॥३१॥ अस्माद्गोकादमुं लोकं तीर्यानां सुकृतात्मना ॥ तारणात्तारका ह्येताः शुक्ल
त्वाच्चैव तारकाः ॥३२॥ दिव्यानां पार्थिवानां च नैशानां चैव सर्वशः ॥ तपसस्तेजसो योगादादित्य इति गद्यते ॥
३३॥ स्रवते स्पंदनाच्चैव धातुरेष निगद्यते ॥ स्रवणात्तेजसो यातिते नासौ सविता स्मृतः ॥३४॥ बह्वर्थश्चंद्र
इत्येष प्रधाने धातुरुच्यते ॥ शुक्लत्वे त्यमृतत्वे च शीतत्वे ह्लादितेपि च ॥३५॥ सूर्याचंद्रमसो दिव्ये मंडले भास्व
रे खगे ॥ जलतेजोमये शुक्ले वृत्तकुंभनिभे शुभे ॥३६॥ विशंति कर्मदेवास्तु स्थानान्येतानि सर्वशः ॥ मन्वंतरेषु
सर्वेषु ऋक्षसूर्यग्रहाश्रयात् ॥३७॥ तानि देवग्रहाणि स्युः स्थानाख्यानि भवंति हि ॥ सौरं सूर्यो विशत्स्थानं सौ राम०
म्यं सोम एव च ॥३८॥ शौक्रं शुक्रो विशत्स्थानं षोडशार्चं प्रभास्करं ॥ बृहस्पतिर्बृहत्त्वं च लोहितं चापि लोहितः ॥३९ १८९
शानैश्चरो विशत्स्थानं देवः शनैश्चरं तथा ॥ बुधोपि विबुधस्थानं स्वर्भानुः स्वर्भानुरेव च ॥४०॥ नक्षत्राणि च सर्वा

ण्नक्षत्राणि विशंति वै ॥ ज्योतिषां सुकृतामेति ज्ञेया देवगृहास्तु वै ॥४१॥ स्थानान्येतानि तिष्ठंति यावदाभू
तसंप्लवं ॥ मन्वंतरेषु सर्वेषु देवस्थानानि तानि वै ॥४२॥ अभिमानेन तिष्ठंति तानि देवाः पुनः पुनः ॥ अतीता
स्तु महातीतैर्भाव्या भाव्यैः सुरैः सह ॥४३॥ वर्तंते वर्तमानैश्च सुरैः सार्द्धं तु स्थानिनः ॥ सूर्यो देवो विवस्वांश्च
त्वष्टमस्त्वदितेः सुतः ॥४४॥ द्युतिमान् धर्मपुत्रस्तु सोमो देवो वसुः स्मृतः ॥ शुक्रो दैत्यस्तु विज्ञेयो भार्गवोऽसु
रयाजकः ॥४५॥ बृहस्पतिर्बृहत्तेजा देवाचार्योंगिरःसुतः ॥ बुधो मनोहरश्चैव ऋषिपुत्रस्तु स स्मृतः ॥४६
शानैश्चरो विरूपश्च संज्ञापुत्रो विवस्वतः ॥ अग्निर्विकेश्यां जज्ञे तु सुधासो राग्निर्धिपः ॥४७॥ सेनना क्षत्रक्षे
त्रेषु दाक्षायण्यः सुताः स्मृताः ॥ स्वर्भानुः सिंहिकापुत्रो भूतसंतोधनासुरः ॥४८॥ चंद्रार्कग्रहनक्षत्रेष्वभि
मानी प्रकीर्तितः ॥ स्थानान्येतानि चोक्तानि स्थानिन्यश्चैव देवताः ॥४९॥ शुक्लमग्निसमं दिव्यं सहस्रांशोर्वि
वस्वतः ॥ सहस्रांशोधिषणस्थानं तमस्यं तैजसं तथा ॥५०॥ आप्यं श्वेतं मनोज्ञस्य स नवरश्मिगृहे स्थितं ॥ शु
क्रः षोडशरश्मिस्तु यस्तु देवो ह्यपां स्वयं ॥५१॥ लोहितो नवरश्मिस्तु स्थानं नाप्यं तु तस्य तु ॥ हरिद्रामं द्वादशरश्मी
कं हरिनाम्नं तु वेधसं ॥५२॥ अष्टरश्मिकुमारं तु कृष्णं बृहस्पचाप्यमयं ॥ स्वर्भानोस्तामसं स्थानं भूतसंता
पनालयं ॥५३॥ शुक्लास्तामा सुराः सूराश्चसुरास्तु हिरण्मयः ॥ तारणात्तारका ह्येताः शुक्लत्वाच्चैव तारकाः ॥५४॥

म॰पु॰ १९०

नवयोजनसाहस्रो विष्कंभः सवितुः स्मृतः ॥ मंडलं त्रिगुणं चास्य विस्तारो भास्करस्य तु ॥५५॥ द्विगुणः सूर्य
विस्तारात् विस्तारात् शशिनः स्मृतः ॥ विस्तारमंडलं चास्य वैपुल्याच्छशिनः स्मृतं ॥५६॥ सर्वोपरि निसृष्टानि
मंडलानि तु तारकाः ॥ योजनार्द्धप्रमाणानि तान्योन्यानि गुण्यानि तु ॥५७॥ तुल्यो भूत्वा तु स्वर्भानुस्तदधस्तात्प्र
सर्पति ॥ उद्धृत्य पार्थिवीं छायां निर्मलां मंडलाकृतिं ॥५८॥ ब्रह्मणा विहितं स्थानं तृतीयं तु तमोमयं ॥ आ
दित्यात्स च निःक्रम्य सोमं गच्छति पर्वसु ॥५९॥ आदित्यमेति सोमाच्च पुनः सोमेषु पर्वसु ॥ स्वर्भानुं नुद
ते यस्मात् स्वर्भानुरिति स स्मृतः ॥६०॥ चंद्रतः षोडशो भागो भार्गवस्य विधीयते ॥ विष्कंभान्मंडलाच्चै
व योजनानां तु स स्मृतः ॥६१॥ भार्गवात्पादहीनस्तु विज्ञेयो वै बृहस्पतिः ॥ बृहस्पतेः पादहीनौ व
क्रसौरावुभौ स्मृतौ ॥६२॥ विस्तारमंडलाभ्यां तु पादहीनस्तु यो बुधः ॥ तारा नक्षत्ररूपाणि वपुष्मंती
ह यानि वै ॥६३॥ बुधेन समरूपाणि विस्तारान्मंडलाच्च वै ॥ तारा नक्षत्ररूपाणि हीनानि तु परस्परं
॥६४॥ शतानि पंच चत्वारि त्रीणि द्वे चैकमेव च ॥ सर्वोपरि निसृष्टानि मंडलानि तु तारकाः ॥६५॥ योजनार्द्धप्र
माणानि तेभ्यो ह्रस्वं न विद्यते ॥ उपरिष्टात्त्रयस्तेषां ग्रहा ये क्रूरसात्त्विकाः ॥६६॥ सौरिश्चांगिरसो वक्रो विज्ञेया
मंदचारिणः ॥ तेभ्योऽधस्तात्तु चत्वारः पुनश्चान्ये महाग्रहाः ॥६७॥ सोमः सूर्यो बुधश्चैव भार्गवश्चेति शीघ्र

राम॰ १९०

गाः ॥ यावंति चैव ऋक्षाणि कोट्यस्तावंति तारकाः ॥६८॥ सर्वेषां तु ग्रहाणां वै सूर्योऽधस्तात्प्रसर्पति ॥ विस्तीर्णं
मंडलं कृत्वा तस्योर्ध्वं चरते शशी ॥६९॥ नक्षत्रमंडलं चापि सोमादूर्ध्वं प्रसर्पति ॥ नक्षत्रेभ्यो बुधश्चोर्ध्वं बुधादू
र्ध्वं तु भार्गवः ॥७०॥ वक्रस्तु भार्गवादूर्ध्वं वक्रादूर्ध्वं बृहस्पतिः ॥ तस्माच्छनैश्चरश्चोर्ध्वं देवाचार्योपरिस्थितः ॥
७१॥ शनैश्चरात्तथाचोर्ध्वं ज्ञेयं सप्तर्षिमंडलं ॥ सप्तर्षिभ्यो ध्रुवश्चोर्ध्वं मासकं त्रिदिवं ध्रुवे ॥७२॥ द्विगुणेषु सह
स्रेषु योजनानां शतेषु च ॥ ग्रहांतरमथैकैकमूर्ध्वं नक्षत्रमंडलात् ॥७३॥ ताराग्रहांतराणि स्युरुपर्युपरि धि
ष्ठिताः ॥ ग्रहाश्च चंद्रसूर्यौ तु दिवि दिव्येन तेजसा ॥७४॥ नक्षत्रेषु च युज्यंते गच्छंतो नियतं क्रमात् ॥ चंद्रार्कग्र
हनक्षत्रा नीचोच्चमृदुमास्थिताः ॥७५॥ समागमे च भेदे च पश्यंति युगपत्प्रजाः ॥ परस्परस्थिता ह्येवं युज्यं
ते च परस्परं ॥७६॥ असंकरेण विज्ञेयास्तेषां योगास्तु वै बुधैः ॥ इत्येवं संनिवेशो वै पृथिव्यां ज्योतिषस्य
च ॥७७॥ द्वीपानामुदधीनां च पर्वतानां तथैव च ॥ वर्षाणां च नदीनां च ये च तेषु वसंति ते ॥७८॥ इत्येषोऽर्कव
शेनैव संनिवेशस्तु ज्योतिषां ॥ अधस्तादुत्तमो मन्ये संक्षिप्तस्तु यथा ध्रुवः ॥७९॥ सर्वतो भुवि विस्तीर्णो वृत्ताका
रइवोच्छ्रितः ॥ लोकसंव्यवहारार्थमीश्वरेण विनिर्मितः ॥८०॥ कल्पादौ बुद्धिपूर्वं तु स्थापितोऽसौ स्वयंभुवा ॥
इत्येष संनिवेशोऽधःसर्वस्य ज्योतिरात्मकः ॥८१॥ वैश्वरूपं प्रधानस्य परिणामोऽस्य यः स्मृतः ॥ तेषां शक्यं न सं

म०पु०
१९१

रुद्रात्तु यथा तत्वेन केनचित्॥ गतागतं मनुष्येण ज्योतिषां मांसचक्षुषा॥८२॥ इति श्रीमत्स्यपुराणे देवस्नहवर्णनो
नाम॥ ऋषय ऊचुः॥ कथं जगाम भगवान् पुरारित्वं महेश्वरः॥ ददाह च कथं देवस्तन्नो विस्तरतो वद॥१॥
दह्यमानस्तथा यं सर्वे बहुमानात्पुनः पुनः॥ त्रैपुरं तद्यथा दुर्गं मयमायाविनिर्मितं॥ देवेनैकेषुणा दग्धं तथा
नो वद मानद॥२॥ सूत उवाच॥ शृणुध्वं त्रिपुरं देवो यथा दारितवान् भवः॥ मयो नाम महामायो माया
नां जनको सुरः॥३॥ निर्जितः स तु संग्रामे तताप परमं तपः॥ तपस्यंतं तु तं विप्रा दैत्यौ घाणासुनुग्रहात्॥४॥
तस्यैवं कुर्वतस्तद्वि तपते पतुः परमं तपः॥ विद्युन्माली च बलवान् तारकाख्यश्च वीर्यवान्॥५॥ मयतेजस
माक्रांतौ तेपतुर्मयपार्श्वगौ॥ लोका इव यथा मूर्त्तास्त्रयस्त्रय इवाग्नयः॥६॥ लोकत्रयं तापयंतो तेपुर्दा
दितिजा प्रजाः॥ हेमंते जलशय्यां च सुग्रीष्मे पंचतपास्तथा॥७॥ वर्षासु च तथाकाशे क्षिपयंतस्ततः प्रियाः॥ स
वनात्फलमूलानि पुष्पाणि च जलानि च॥८॥ अम्बुदारचिताहाराः पंकेनाचितवल्कलाः॥ अमलाः पंकस
मलाविमलाविमलेषु च॥९॥ निर्मांसास्त्वततो जाताः कृशा धमनिसंतताः॥ तेषां तपःप्रभावेन आवजोवित
यंयुथा॥१०॥ निःप्रभं तु जगत्सर्वमिदमेवाभिभावितं॥ दह्यमानेषु लोकेषु तैस्त्रिभिर्दानवाग्निभिः॥११॥ तेषां
मध्ये जगन्नाथः प्रादुर्भूतः पितामहः॥ ततः सहस्रकन्यारिः सह संसहसागतं॥१२॥ स्वकं पितामहं दैत्या नेव

रा०म०
१९१

तुष्टुतुरेव च॥ अथ तान् दानवान् ब्रह्मा तपनप्रभान्॥१३॥ उवाच हर्षपूर्णास्यो हर्षपूर्णमुखो ब्रतानन्॥ वर
दोहं हि वो वत्सास्तपसा तोषित आगतः॥१४॥ त्रियंतां मिप्सितं यच्च तेन विचारं तदुच्यतां॥ इत्येवमुच्यमानास्ते
प्रयतं प्रपितामहं॥१५॥ विश्वकर्ममयः प्राह प्रहर्षोत्फुल्ललोचनः॥ देव दैत्याः पुरा देवैः संग्रामे तारकामये
१६॥ निर्जिताश्च हताश्चैव निस्त्रिंशैरायुधैरपि॥ देवैः सहानुबंधाश्च वाध्यते भयवेष्टिताः॥१७॥ द्वारतांनैवजा
नीयुः सर्वथा शरणार्थिनः॥ सोहं तपःप्रभावेन तव भक्त्या तथैव च॥१८॥ इच्छामि कर्तुं तत्दुर्गं देवैरपि दुर्
गमं॥ तस्मिंश्च त्रिपुरे दुर्गे मित्कृते स्कृतिनांवरः॥१९॥ भूम्यानां जलजानां च शापानां मुनितेजसां॥ देवप्रहर
णानां च देवानां च प्रजापते॥२०॥ अलंघनीयं भवतु त्रिपुरं यदि ते प्रियं॥ विश्वकर्मा इति चोक्तः स तदा ब्रह्मि वि
कर्मणा॥२१॥ उवाच प्रहसन् वाक्यं मयं दैत्यगणाधिपं॥ सर्वामरत्वं नैवास्ति असदृत्तस्य दानवाः॥२२॥
तस्मात्दुर्गविधानं हि क्षणादपि विधीयतां॥ पितामहवचः श्रुत्वा ततः दैवं दानवो मयः॥२३॥ प्रांजलिः पुनर
प्याह ब्रह्माणं ब्रह्मसंभवः॥ यत्र देकेषुणा दुर्गं सकृन्मुक्तेन निर्हितं॥२४॥ सर्वसमं युगे हन्या स वधं रो रा०म०
षतो भवेत्॥ एवमस्त्विति वाप्युक्त्वा मयं देवः पितामहः॥२५॥ स्वप्ने लब्धो यथार्थे हि स्त्रैवादर्शनं ययौ
गते पितामहे दैत्या गता मयरविप्रभाः॥२६॥ वरदानाद्धि रंजुस्ते तपसा च महाबलाः॥ समयस्तु महाबुद्धि

म०पु०
१९२

दनिवोवृषसत्तम॥२७॥दुर्गंच्च वसितः कर्तुंइतिचिंतयतेतदा॥कथंनामभवेदुर्गंतन्मयात्रिपुरंकृतं॥२८॥
वत्स्यातेतत्पुरंदिव्यंगत्वावासोन्यसंशयः॥तथाचैकेषुपातेनतत्पुरंनैवहन्यते॥२९॥दैवैस्तथाविधातव्यंमाया
मितिविचारणं॥विस्तारोयोजनशतमेकैकस्यपुरस्यतु॥३०॥कार्यस्तेषांचविष्कंभएकैकंशतयोजनं॥पुष्ययो
गेननिर्माणंपुराणांचभविष्यति॥पुष्ययोगेनचदिविसमेष्यंपरस्परं॥पुष्ययुक्तेनयुक्तानियस्तान्यासादयिष्य
ति॥पुराण्येकप्रहारेणसतानिनिहनिष्यति॥आयसंतुक्षितितलेराजतंतुनभस्तले॥३३॥राजतस्योपरि
ष्टात्तुसौवर्णंभवितापुरं॥एवंत्रिभिःपुरैर्युक्तंत्रिपुरंतद्भविष्यति॥३४॥शतयोजनविस्तारैरंतरैस्तदु
रासदं॥३४॥सहालकैर्यंत्रशतघ्नीभिश्चसचक्रहलोपलकंपनैश्च॥द्वारैर्महासंदरमेरुकल्पैःप्राका
रशीर्षैःसुविराजमाने॥३५॥सतारकाक्षेणमयेनगुप्तंरक्षंचगुप्तंतडिमालिनापि॥कोवैरिहंतुंत्रिपुरंस
मर्थोमुक्त्वात्रिनेत्रंभगवंतमेकं॥३६॥॥इतिश्रीमत्स्यपुराणेत्रिपुरोपाख्याने॥॥सूतउवाच॥॥इतिचिंतय
तोदैत्योदिव्योपायप्रज्ञावजं॥चकारत्रिपुरंदुर्गंमिनसंचारचारितं॥१॥प्राकारेणेनमार्गेणइहचात्रचगो
पुरं॥राजमार्गइतश्चापिविपुलोभवितामितिम॥२॥रथ्योपरथासत्कारइहचात्रचचत्वरं॥इहंदमंतःपु राम
रस्थानंरुद्रापतनमेवच॥३॥सावटानितडागानिभ्रमव्याप्यसरांसिच॥आरामाश्चमुमाश्चात्रउद्यान १९२

१
न्यत्रचात्रच॥४॥उपनिर्गमोदानवानांभवत्वत्रमनोहरः॥इत्येवंमानसंतत्रकल्पयत्पुरकर्मवित्॥५॥म
येनतत्पुरंसृष्टंत्रिपुरंत्वितिनःश्रुतं॥कार्ष्णायसमयंयत्तुमयेनविहितंपुरं॥६॥तारकाख्योधिपस्तत्रकृत
स्थानाधिपोवसन्॥ततःपूर्णेंदुसंकाशंराजतेनिर्मितंपुरं॥७॥विद्युन्मालीप्रभुस्तत्रविद्युन्मालीवचांबु
दः॥सुवर्णविकृतंयच्चमयेनविहितंपुरं॥८॥स्वयमेवमयस्तत्रगतस्तदधिपःप्रभुः॥तारकस्यपुरंतत्रश
तयोजनमंतरं॥९॥विद्युन्मालीपुरंचापिशतयोजनकेंतरे॥मेरुपर्वतसंकाशंमयस्यापिपुरंमहत्॥१०
पुष्यसंयोगमात्रेणकालेनसमयःपुरा॥कृतवांस्त्रिपुरंदैत्यस्त्रिनेत्रःपुष्यकंयथा॥११॥येननमयोपा
तिप्रकुर्वाणःपुरंपुरात्॥प्रतस्थेतत्रतत्रैववाहणपामालधिःस्वयं॥१२॥रुक्मरूप्यायसानांचशतशो
थसहस्रशः॥यत्नाकृतिशोभंतेपुराण्यमरविद्विषां॥१३॥प्रासादशतजुष्टानिकूटागारोत्कटानिच॥स
र्वेषांकामगानिस्युस्सर्वलोकातिगानिच॥सोद्यानवापीकूपानिसपद्मसरोवंतिच॥अशोकवनभूतानि
कोकिलाभिरुतानिच॥१५॥चंद्रशालाभ्विचंद्रशालोन्नगानिच॥सप्ताष्टदशभौमानिसकृतानिमयेनच॥
१६॥बृहत्स्वर्णपताकाभिस्रग्दाममालेकृतानिच॥किंकिणीजालशब्दानिगंधवंतिमहांतिच॥१७॥सुसंयुक्तो
पलिप्तानिपुष्पनैवेद्यवंतिच॥साज्यधूमोधकाराणिसंपूर्णकलशानिच॥१८॥गगनावरणेभांतिइंसपंक्ति

म॰पु॰
१९३

निनानिच॥पंक्तीकृतानिराजंतेगृहाणित्रिपुरेपुरे॥१९॥मुक्ताकलापैर्लंबद्भिर्हसंतीवत्रारश्मियं॥मल्लिकाजा
तिपुष्पाद्यैर्गंधधूपाधिपावासिते॥२०॥पादपैर्द्रुमखैर्नित्यंसमैःसत्पुरुषैरिव॥हेमराजतलोहाद्यामपिर
त्नांजनानिच॥२१॥प्राकारास्त्रिपुरेतस्मिन्गिरिप्राकारसंनिभाः॥एकैकस्मिन्पुरेतस्मिन्गोपुराणांश
तंशतं॥२२॥सप्तलोकध्वजवतीह्यपतेगिरिश्रृंगवत्॥नूपुरारावरम्याणित्रिपुरेतस्तुपाणिपि॥२३॥स्वर्ग
तिरिक्तश्रीकाणितत्रकृत्सापुराणिच॥आरामैश्चविहारैश्चतडागावटपल्वलैः॥२४॥सरोभिश्चसरिद्भिश्च
वनैश्चोपवनैरपि॥दिव्याभोज्योपभोग्यानिनानारत्नयुतानिच॥२५॥पुष्पोत्करैश्चसुभगास्त्रिपुरस्योपनि
गमाः॥परिखाशतगंभीराःकृतामायाविचारणैः॥२६॥निशाम्यतद्दुर्गविधानमुत्तमंकृतंमयेनाद्भुत
वीर्यकर्मणा॥दितेःसुतादेवताराजवैरिणःसहस्रशःप्राविशुरनंतविक्रमाः॥२७॥तदासुरैर्दर्पितवैरिम
र्दनैःशैलकरींद्रसन्निभैः॥बभूवपूर्णंत्रिपुरंतथापुरंयथावरंनूरिजसैर्जलप्रदैः॥२८॥ ॥इतिश्रीमत्स्य
पुराणेत्रिपुरोपाख्याने॥ ॥सूतउवाच॥ ॥निर्मितेत्रिपुरेदुर्गेमयेनासुरशिल्पिना॥तद्दुर्गंदुर्गतांप्रापब
द्ध्वैरैःसुरासुरैः॥१॥सकलत्राःसपुत्राश्चशस्त्रवंतोंतकोपमाः॥मयादिष्टानिविविशुर्गृहाणिहृदिता
श्चते॥२॥सिंहावनमिवानेकेमकराइवसागरं॥रोगाश्चवंतिपारुष्यैःशरीरमिवसंहतौ॥आपद्बहुलिभिर

राम
१९३

प्यसौसत्पुरंदेवतारिभिः॥त्रिपुरंसंकुलंजातंदैत्यकोटीगताकुलं॥४॥सुतलादपिनिष्पत्यपातालादानवा
लयात्॥उपतस्थुःपयोदाभायेचदिश्युपजीविनः॥५॥योयंप्रार्थयतेकामंसंप्राप्तस्त्रिपुराश्रयात्॥तस्म
तस्समयस्तत्रमाययाविदधातिसः॥६॥सचंद्रेषुप्रदोषेषुसांबुजेषुसरस्सुच॥आरामेषुमनूतेषुतपोवन
वनेषुच॥७॥व्यंगाश्चंदनदिग्धांगामातंगासमदाइव॥पुष्टाभरणवास्त्राश्चमृष्टस्रगनुलेपनाः॥८॥प्रिया
भिःप्रियकामाभिर्हविभ्रावृप्रसूतिभिः॥नारीभिःसततंरेमुर्मुदिताश्चैवदानवाः॥९॥मयेननिर्मितस्थानेमोह
मानामहासुराः॥अर्थेधर्मेचकामेचनिदधुस्तेमतिंस्वयं॥१०॥तेषांत्रिपुरयुक्तानांत्रिपुरेत्रिदशारियां॥
व्रजतिस्मसुखंकालःस्वर्गस्थानेयथातथा॥११॥अश्रूषंतेपितन्पुत्राःपत्न्यश्चापिपतींस्तथा॥विमुक्तक
लहाश्चापिप्रीतयःप्रचुराभवन्॥१२॥नाधर्मस्त्रिपुरेस्थानेलभतेवीर्यवानपि॥अर्चयंस्तेदितेःपुत्रास्त्रिपुराय
तनेहरं॥१३॥पुण्याहशब्दानुच्चेरुराशीर्वादांश्चवेदगान्॥स्वनूपुररवोन्मिश्रान्वेणुवीणामुखाण्पि॥१४
हारश्चवरनारीणांमहान्कालोप्यजायत॥मोहालक्ष्मीरसूयाचतद्वबुभुक्षेतथैवच॥१५॥कलिश्चकलह
श्चैवत्रिपुरंविविशुःसह॥संध्याकालेप्रविष्टास्तेत्रिपुरंचपुरालयं॥१६॥समसंध्यासंसुसंघोरारात्रीरापिय
यानयाः॥सर्वत्रविश्रांतसुमयेनत्रिपुरंनराः॥१७॥सप्रभयावहाहष्टाअविनष्टपंतदानवाः॥उदितेचसह

स्तांश्चौश्च मनसा साकरेरवौ॥१९॥मयःसदामांविबभौभास्करांश्यामिवांबुदः॥मेरुकूटनिभेरम्येआसनेस्व
स्तिमंडिते॥२०॥आसीनाःकांचनगिरेःशृंगेतोयमुचोयथा॥पार्श्वयोस्तारकाख्यश्चविद्युन्मालीचदानवः
२०॥उपविष्टौमयस्यास्तेहस्तिनःकलभाविव॥ततःसुरारयःशेषाःशेषकोपारव्याजिरे॥२१॥उपविष्टाद
ढंदृष्ट्वादेवानांदेवशत्रवः॥तथासनेषुसर्वेषुसुखासनगतेषुच॥२२॥मयोमायाविजनकइत्युवाचस
दानवान्॥खेचराःखेचराकाशगामीनोदाक्षायणीसुताः॥२३॥निशामयध्वंयःस्वप्नोमयादृष्टोभयावहः
चतस्रःप्रमदास्तत्रयोमध्यानियावहाः॥२४॥कोपानलादीप्तमुखाःप्रविष्टास्त्रिपुरंहिनः॥प्रविश्यरुषि
तास्तेचपुराण्यतुलविक्रमाः॥२५॥प्रविष्टास्मशरीराणिभूत्वाबहुशरीरिणः॥नगरंत्रिपुरंचेदंतमसाम
वस्थितं॥२६॥सगृहंसहयुष्माभिःसागरांभसिमज्जितं॥उलूकंरुचिरानारीमारूढाखरंतथा॥२७॥स
हस्त्रोजिह्वंसंतीचचुंबतेप्रमदायथा॥पुरुषःसिंदुतिलकश्चतुरंघ्रिस्त्रिलोचनः॥२८॥येनसाप्रमदानुन्ना
श्चहंचैवप्रबोधिता॥ईदृशीप्रमदादृष्टामयाचातिभयावहा॥२९॥एषईदृशकःस्वप्नोमयावैदिति
नंदनाः॥दृष्टःकष्टंहिकष्टोयमसुखोनोभविष्यति॥३०॥यदिवोहंक्षुमोराजायदिदंवेत्थरेहितं॥नि
बोधध्वंसुमनसोनचास्तूयितुमर्हथ॥३१॥कामंचेर्ष्यांचकोपंचअसूयांसविहायच॥सत्येधर्मेचध

र्मेचमुनिवादेचतिष्ठति॥३२॥शांतयश्चप्रयुज्यंतांपूज्यतांचमहेश्वरः॥यदिसामान्यःस्वप्नःस्याद्देवंत्युपरमो
भवेत्॥३३॥कुप्यतेनोध्रुवंरुद्रोदेवस्त्रिलोचनः॥अभविष्याणिदृश्यंतेयतोनस्त्रिपुरेसुराः॥३४॥कलहं
वर्जयंतश्चआर्जवंतस्तथाजयं॥स्वप्नोदयंप्रतीक्षध्वंकालोदकमथापिच॥३५॥श्रुत्वादाक्षायणीपुत्रा
इत्येवंमयभाषितं॥क्रोधेर्ष्याविहितापुक्ताहृश्यंतेचविनाशकाः॥३६॥विनाशमनुपत्स्यंतिश्लक्ष्णाख्या
पितासुराः॥द्विषंतिब्राह्मणानुप्राप्तान्नाद्रर्चयंतिचदेवताः॥३७॥गुरुंश्चैवावमन्यंतेनाभिभाषंतिपूजिताः
अकस्मात्त्रासुनयनाजापतंचसमुत्सुकाः॥३८॥दधिसक्तून्पयश्चैवकपित्थानिचरात्रिषु॥भक्षयंतेशते
चउच्छिष्टाःसंहृतास्तथा॥३९॥मूत्रंकृत्वोपस्पृशंतिअकृत्वापादशौचनं॥संविशंतिचशय्यासुशौचाचारवि
वर्जिताः॥४०॥संकुचंतिभयाच्चैवमार्जाराणांयथाखुकाः॥भार्यांगत्वानश्चर्धंतिरहोवृत्तिषुनिर्घृणाः॥४१
तथाचैवरथवनंश्चशोकंवचनंतथा॥धाराश्चोकंचवराश्चोकंसर्वत्रुकमयापिवा॥४२॥स्वर्गंचदेवतावासंप्र
वदेवैवशतुगाः॥विध्वंसयंतिसंक्रुद्धास्तपोधनवनानिच॥४३॥विध्वस्तदेवायतनाश्रमंचसजगद्देवध्वज
यूपकेतु॥जगद्धन्वामरराजजुष्टेरभिद्रुतंसर्वमिवारविंदैः॥४४॥॥इतिश्रीमत्स्यपुराणेत्रिपुरोपाख्यानेदुः
स्वप्नदर्शनोनाम॥॥सूतउवाच॥॥अशीलेषुप्रदानवेषुदुरात्मसु॥लोकेषूत्साद्यमानेषुतपोधनवनेषु

म०पु० च॥१॥सिंहनादेव्योमगानांनिलीनेषुचजंतुषु॥त्रैलोक्येभयसंमूढेतमोंधत्वमुपागते॥२॥आदित्यावसवः साध्याः
१९५ पितरोमरुतांगणाः॥भीताःशरणमाजग्मुर्ब्रह्माणंप्रपितामहं॥३॥तेतंस्वर्णोत्पलासीनंब्रह्माणंसमुपागताः
नेमुरूचुश्चसहितापंचास्यंचतुराननं॥४॥वरगुप्तास्त्वमेतेचदानवास्त्रिपुरालयाः॥बाधंतेस्मान्यथाप्रेष्या
ननुशाधिसनेनघ॥५॥मेघागमेयथाहंसामृगाःसिंहभयादिव॥दानवानांभयात्रस्ताद्रुमामःपितामह॥६
पुत्राणांनामधेयानिकलत्राणितथापिच॥दानवैर्भ्राम्यमाणानांविस्मृतानिततोनघ॥७॥देववेश्मप्रभंगाश्च
आश्रमभ्रंसनानिव॥दानवैर्लोभिमोहांधैर्हियतेचभ्रमंतिच॥८॥यदिनत्रायसेलोकंदानवैर्विद्रुतंद्रुतं॥वर्षे
णानेननिर्देवंनिर्मनुष्यांश्चमंजगत्॥९॥इत्युक्तंत्रिदशैरुक्तःपद्मयोनिःपितामहः॥प्रोवाचत्रिदशान्सेंद्रा
न्विंद्रुतुत्स्वामनःप्रभुः॥१०॥मयस्यैषवरोदत्तोमयामतिमतांवराः॥तस्माद्वाराश्चसंप्राप्तोयुःपुरोक्तोमयासु
राः॥११॥तत्त्वतेषामधिष्ठानंत्रिपुरंत्रिदशर्षभाः॥एकेषुपातमोक्षेणहंतव्यंतेहविस्त्रिः॥१२॥भवतांतस्य
नोत्साहंकिमप्यत्रसुरर्षभाः॥यस्तुचैकप्रहारेणपुरंहन्यात्सदानवं॥१३॥त्रिपुरंनास्यवीर्यणिशक्यंहंतुंश
रेणतु॥एवंमुक्त्वाप्रहादेवंमहेशानंप्रजापतिं॥१४॥तेयूयंयदिमन्यध्वंक्रतुविध्वंसकंहरं॥याचेमसहि राम०
तादेवंत्रिपुरंसहनिष्यति॥१५॥कृतःपुराणांविष्कंभोयोजनानांशतं॥यथानेकप्रहारेणहन्यादेवंमयेनतु १९५

१६॥पुष्पयोगेनयुक्तानितानिचैकंक्षणेनतु॥ततोदेवैश्चसब्रह्मोक्तोयाचामइतिदुःखितैः॥१७॥पितामहश्चतैः
सर्वैर्भवसंसदिमागता॥तेभवंभूतभव्येशंगिरिशंशूलपाणिनं॥१८॥पश्यंतिसोमयासार्धंनंदिनाचमहा
त्मना॥अग्निमद्विमध्यंदेवंमग्निकुंडनिभेक्षणं॥१९॥तमादित्यसहस्राभंञ्जनिवस्त्रविभूषितं॥चंद्रावयव
लक्ष्माणंचंद्रसौम्यनराननं॥२०॥आगम्यतमजंदेवमव्ययंनीललोहितं॥अस्तुवन्वरदंशंभुंगोपतिंपा
र्वतीपतिं॥२१॥देवाऊचुः॥नमोभवायशर्वायरुद्रायवरदायच॥पशूनांपतयेनित्यमुग्रायचकपर्दि
ने॥२२॥महादेवायभीमायत्र्यंबकायचशांतये॥ईशानायभवस्वायनमस्त्वंधकघातिने॥२३॥नीलग्री
वायदेवायवेधसास्तुते॥कुमारशत्रुविघ्नायकुमारजननायच॥२४॥विलोहितायधूम्रायधरायकथना
यच॥नित्यनीलशिखंडायशूलिनेदिव्यशायिने॥२५॥उरगायत्रिनेत्रायहिरण्यायवसुरेतसे॥अचिंत्याया
बिकापतेसर्वदेवस्तुतायच॥२६॥वृषध्वजायमुंडायजटिनेब्रह्मचारिणे॥तप्यमानायसलिलेब्रह्मण्या
यजयायच॥२७॥विश्वात्मनेविश्वसृजेविश्वमावृत्यतिष्ठते॥नमोस्तुदिव्यरूपायप्रभूतप्रभवेसदा॥२८॥
इतिश्रीमत्स्यपुराणेत्रिपुरादाहेश्वरस्तुतिः॥॥सूतउवाच॥॥ब्रह्माद्यैःस्तूयमानस्तुदेवैर्देवोवृषोहरः॥प्रजाप
तिमुवाचेदंदेवानांशुभयंमहत्॥१॥भोदेवाःस्वागतंवोस्तुब्रूतयत्तोमतोगतं॥यावदेवप्रयच्छामिनास्त्यदेयं

महादेवः॥२॥युष्माकमपमानश्चोवैकृतेदास्यतिवांछितं॥चरामिहिमवत्तुंगंयच्चापिपरमंतपः॥३॥विद्विष्टा
वोमहिद्विष्टाःकष्टंकष्टपराक्रमः॥तेषामनयमुत्पन्नंयुष्माकंनवएवच॥४॥एवमुदेनप्रेम्णासब्रह्मकाः२ रो
सुराः॥रुद्रमाक्रम्यमहात्मानंनागाहृतःसर्वएवतं॥५॥भगवंस्तैस्तपस्तेरौद्रपराक्रमैः॥असुरैर्बध्यमाना
स्मोवयंवःशरणंगताः॥६॥मयोनाममदितेःपुत्रस्त्रिनेत्रकलहप्रियः॥त्रिपुरंयेनतद्दुर्गंकृतंपांडुरगोपुरं।
७॥तदाश्रित्यपुरंदुर्गंदानवाश्चातिनिर्भयाः॥बाधंतेस्मान्महादेवप्रेष्यंतस्वामिनोयथा॥८॥उद्यानानि
वनस्थानिनंदनानिचयानिच॥वाराश्चाप्सरसःसर्वारंभाद्यादनुजैर्हृताः॥९॥इंद्रस्यवाह्याश्चगजाःकु
मुदांजनवामनाः॥ऐरावणाद्ययोवाह्यादेवतानांमहेश्वर॥१०॥येचैवंद्ररथमुख्याश्चाहरयोपहृता
ःसुरैः॥जातास्तुदानवानांतेरथयोग्यास्तुरंगमाः॥११॥येरथायेगजायेश्चायाःस्त्रियोवसुयञ्चनः॥तन्नो
व्यपहृतंदैत्यैःसंशयोजीवितेपुनः॥१२॥त्रिनेत्रएवमुक्तस्तुदेवैरिंद्रपुरोगमैः॥उवाचदेवान्देवेशोवर
दोवृषवाहनः॥१३॥व्यपगच्छतुवोदेवाःसहदानवजंभयं॥तदहंत्रिपुरंधक्ष्येक्रियतांयद्ब्रवीमितत्।
१४॥यदीछथमयादग्धंत्रिपुरंदानवंमहत्॥रथमौपयिकंमह्यंसज्जयध्वंकिमास्यते॥१५॥दिग्वाससा राम॰ १९६
तथोक्तास्तेसपितामहकाःसुराः॥तथेत्युक्त्वामहादेवंचक्रुस्तेरथमुत्तमं॥१६॥धरांकूबरकौतुस्येजंघे

त

पार्श्वविरावुभौ॥अधिष्ठानंशिरोमेरुमक्षोमंदरमेवच॥१७॥चक्षुश्चंद्रंचसूर्यंचचक्रेकांचनराजिते॥कृष्ण
पक्षंचशुक्लंचपक्षद्वयमपीश्वरे॥१८॥रथनेमिद्वयंचक्रुमेधाब्रह्मपुरःसरः॥आदिद्वयंप्रक्षयंत्रंयंत्रमंता
श्चदेवताः॥१९॥कंबलाश्वतराभ्यांचनागाभ्यांसमवेष्टनं॥सभार्गवोगिरोबुद्धंसांगारकशनैश्चरं॥२०॥
वरूथंगगनंचक्रुश्चारुरूपंरथस्यते॥कृतद्विजिह्वनयनात्रिवेणुंशातकौशिकं॥२१॥मणिमुक्तेंद्रनीलाक्का
कृतंहष्टमुखैःसुरैः॥गंगासिंधुःशतद्रूचचंद्रभागासरस्वती॥२२॥वितस्ताचविपाशाचयमुनागंडकी
था॥सरस्वतीदेविकाचतथाचसरयूरपि॥२३॥एताःसरिद्वराःसर्वाःश्चमुसंज्ञाकृतारथे॥धार्त्तराष्ट्राश्च
येनागायेचवैरूपात्मकाःकृताः॥२४॥वासुकेःकुलजायेचयेचैरावतवंशजाः॥तेसर्पादर्पसंपन्नास्तरुस्माः
सागोणाः॥२५॥अवतस्थुःशराणभूत्वानानाजातिमुखाननाः॥सुरसासरमाकद्रूर्विनताःशुचिरेवचा॥२६॥
तृषाबुभुक्षासर्वोग्रामृत्युःसर्वसमस्तथा॥ब्रह्मवध्याचगोवध्याबालवध्याःप्रजाभयाः॥२७॥गदामूत्वा
चशक्तयाश्चतदादेवरथेस्थिताः॥युगंकृतयुगंचात्रचातुर्होत्रप्रयोगकं॥२८॥चतुर्वर्णाश्चसलिलाबभूवुर्मृष्ट
कुंडलाः॥तद्युगंयुगसंकाशंरथशीर्षेप्रतिष्ठितं॥२९॥धृतराष्ट्रेणनागेनबद्धंविषवतामहत्॥ऋग्वेदःसामवेद
श्चयजुर्वेदस्तथापरः॥३०॥३१॥वेदाश्चत्वारएवैतेचत्वारस्तुरंगमाः॥अन्नदानपुरोगाणियानिदानानिकानिचि

त्सुर

ता॥३१॥तान्यासन्वाजिनांतेषांभूषणानिसहस्रशः॥पद्मश्चैवंतक्षकश्चकर्कोटकधनंजयौ॥३२॥नागाबभौविरो
चेतेहयानांवाबंधनाः॥हुंकारप्रभवाःस्तोनामंत्रयज्ञक्रतुक्रियाः॥३३॥उपद्रवाःप्रतीहाराःपशुबंधेष्टयस्त
था॥यज्ञोपवाहान्येतानितस्मिल्लोकरथेचते॥३४॥मणिमुक्ताप्रवालानिभूषणानिसहस्रशः॥प्रतोदोंका
रएवासीन्नदंगेचवषट्कृतं॥३५॥अवगाढपताकास्तुबभूवुःपवनेरिताः॥ऋतुभिश्चिवितन्द्रिर्धनुःसंवत्स
रोभवत्॥३६॥सगजेत्रिपुरंयेनदग्धवान्सत्रिलोचनः॥अजराज्याभवन्नापिसात्विकाधनुषोदृढा॥३७॥
कालेहिभगवान्रुद्रस्तंचसंवत्सरंविदुः॥तस्मादुमाकालरात्रिर्धनुषोज्याजराभवत्॥३८॥सगर्भिसइषुर्वि
ष्णुःसोमाग्निस्त्रिदैवतमदोभवत्॥आननंत्वग्निरस्याभवच्छल्यंसोमस्तमोनुदः॥३९॥तेजसःसमवायोथइषो
स्तेजोरथांगधृक्॥तस्मिंश्चवीरेकुंडेयतासुकिर्नागपार्थिव॥४०॥तेनसंहरणार्थंविमुमोचातिविषोविषं॥
कृत्वादेवारथंचापिदिव्यंदिव्यप्रभावतः॥४१॥लोकाधिपतिमभ्येत्यइदंवचनमब्रुवन्॥संस्कृतोयंरथोस्मा
भिस्तववरानवशत्रुजित्॥४२॥इदमस्तुपरित्रातुंदेवाःसेंद्रपुरोगमाः॥तंमेरुशिखराकारंत्रैलोक्यरथमुत्तमं॥ राम०
४३॥प्रशस्यदेवान्साधितिरथंपश्यतिशंकरः॥मुजहद्व्यारथंसाधुसाध्वित्युक्त्वामुहुर्मुहुः॥४४॥उवाच १९७
सेंद्रानमरानमराधिपतिस्ततः॥यादृशोयंरथःक्लृप्तोयुष्माभिर्ममसत्तमाः॥४५॥ईदृशोरथसंपत्त्यैयंतासंप्र

विधीयतां॥इत्युक्त्वादेवदेवेनदेवाविद्धाइवेषुभिः॥४६॥अवापुर्महतींचिंतांकथंकार्यमितिब्रुवन्॥महा
देवस्यदेवोन्यःकोनामसदृशोभवेत्॥४७॥मुक्त्वाचक्रायुधंदेवंसोप्यस्येषुंसमाश्रितः॥धुरिर्युक्ताइवोक्षा
णोघटंतइवपर्वतैः॥४८॥निःश्वसंतःसुराःसर्वेकथमेतदितिब्रुवन्॥देवेषाहदेवदेवोलोकनाथस्यधूर्ग
तः॥४९॥अहंसारथिरित्युक्त्वाजग्राहाश्वांस्ततोग्रजः॥ततोदेवैःसगंधर्वैःसिंहनादोमहान्कृतः॥५०॥देवःक्रे
लायवेदांस्तानभीशुग्रहमान्हयान्॥उक्तहारपितदेनातान्सुपुत्रइवदुःखितान्॥५१॥ततःसिंहरवोभू
योबभूवरथभैरवः॥जयशब्दश्चदेवानांसंबभूवाम्बितोपमः॥तदोंकारमयंरत्नप्रतोदंवरदःप्रभुः॥स्वयं
भुःप्रययौवाहान्तेनुमेऽप्ययथातथं॥५३॥ग्रसमानाइवाकाशंमुष्णंतइवमेदिनीं॥मुखेभ्यःससृजुःपारा
नुद्गिरंतइवाशुगाः॥५४॥स्वयंभुवानोद्यमानोनोदितेनकपर्दिना॥व्रजंतितेथवाजवनाःक्षयकालइवानिल
॥५५॥ध्वजादुच्छ्रियनिर्माणंध्वजयष्टिमनुत्तमां॥आक्रम्यनंदीवृषभस्तस्मिन्नष्टिमिवेच्छया॥५६॥अर्थर्वाः
गिरसोदेवौदंडहस्तौरविप्रभौ॥रथचक्रौतुरक्षेतांरुद्रस्यप्रियकांक्षिणौ॥५७॥शेषश्चभगवान्नागोनंतो
नंतकारिणा॥शरहस्तोरथंयातिशयनंब्रह्मणोयथा॥५८॥यमस्तूर्णंसमास्थायमहिषंचातिदारुणं॥द्रविणा
धिपतिर्व्यालंसुराणामधिपोद्विपं॥५९॥मयूरंशतचंद्रंचकूजंतंकिन्नरंयथा॥कुमारोस्थायवरदोजुगोपसर

म०पु०
१९८

यंपितुः॥६०॥नंदीश्वरस्त्वभगवानुत्थसमादायपदीप्तिमान्॥दृष्टतस्यापिपार्थीवलोकस्यक्षयकृद्यथा॥६१॥प्र
मथाश्चाग्निवर्णाभाःसाग्निज्वालाश्चाचलाः॥अनुजग्मुस्ततःसर्वेनिर्ययुर्महार्णवं॥६२॥भृगुर्नरस्ताजवसिष्ठगो
तमाःक्रतुःपुलस्त्यःपुलहस्तपोधनाः॥मरीचिरत्रिर्भगवानथांगिराःपराशरागस्त्यमुखामहर्षयः॥६३॥हरम
जितमजेयतुष्टुवुर्वन्दिनविशेषविचित्रभूषणैः॥त्रिपुरंरथस्थकांचनाचलोव्रजतिसपक्षइवामघवित्वनः।
६४॥॥इतिश्रीमत्स्यपुराणेत्रिपुरदाहेरथप्रयाणंनाम॥॥सूतउवाच॥॥पूज्यमानेरथेतस्मिन्लोकैर्देव
महेश्वरैः॥प्रमाथेषुनदत्सुप्रप्रवदत्सुचसाधिभिः॥१॥एश्वरेश्वरघोषेणनर्दमानेमहावृषे॥जपत्सुवि
प्रेषुतथागच्छत्सुतुरगेषुच॥२॥रणदानात्समुत्सृष्यमहर्षिर्नारदप्रभुः॥कौत्स्यांचांगोपमस्तत्रत्रिपुरंपुरमा
गतः॥३॥औत्पातिकंतुदैत्यानांत्रिपुरेवर्द्धतेध्रुवं॥नारदस्तत्रभगवान्प्रादुर्भूतस्तपोधनः॥४॥आगतंज्व
लनाभासंसमेतादनुदानवाः॥उत्तस्थुर्नारदंदृष्ट्वात्राभिवादेनवादिनः॥५॥तमर्घेणचपाद्येनमधुपर्केणचे
श्वराः॥नारदंपूजयामासुर्ब्रह्माणमिववासवः॥६॥सतस्यपूजांपूजार्हःप्रतिगृह्यतपोधनः॥नारदंसुखमा
सीनंकांचनेपरमासने॥७॥मयासुसुखमासीनेनारदेनारदोऽवदे॥यथार्हदानवैःसार्द्धमासीनोदानवाधि
पः॥८॥आसीनंनारदंप्रेक्ष्यमयस्त्वथमहासुरः॥अब्रवीद्वचनंतुष्टोहृष्टरोमाननेक्षणः॥९॥औत्पातिकं

राम
१९८

तथास्माकंयथातात्सस्यकस्यचित्॥वर्ततेवर्त्तमानस्तुवदत्वंहिचनारद॥१०॥दृश्यंतेभयदाःस्वप्नाभज्यंतेचध्व
जाःपरं॥विनाचवायुनाकेतुःपततेचतथाभुवि॥११॥अट्टालकाश्चनश्यंतेसपताकाःसगोपुराः॥हिंसहिं
सेतिश्रूयंतेगिरश्चभयदाःपुरे॥१२॥नाहंबिभेमिदेवानांसेन्द्राणामपिनारद॥मुक्त्वैकंवरदंस्थाणुंभुक्ता
भयकरंहरं॥१३॥भगवन्नास्त्यविदितंउत्पातेषुतवानघ॥अनागतमतीतंचभवान्जानातितत्वतः॥१४॥
तदेतन्नोभयस्थानमुत्पाताभिनिवेदितं॥कथयस्वमुनिश्रेष्ठप्रयत्नेनतुमानद॥१५॥इत्युक्तोनारदस्तेनम
येनमयवर्जितः॥१५॥नारदउवाच॥॥शृणुदानवतत्वेनभवंत्युत्पातकायथा॥धर्मेतिधातुर्महात्म्येम
तिचैवोपपद्यते॥१६॥धारणेचमाहात्म्येचधर्मएषोभिरुच्यते॥सदृष्टप्रापकोधर्मआचार्यैरुपदिश्यते॥
१७॥उत्पथान्मार्गमागच्छेन्मार्गेणचविमार्गतिं॥विनाशस्तस्यनिर्देशइतिवेदविदोविदुः॥१८॥सत्वधर्मर
पारूढःसहैतेर्मयदानवैः॥अपकारिषुदेवानांकुरुषेसुसहायतां॥१९॥तदेतान्येवमायोतिउत्पातवे
दितानिचा॥वेनाशिकानिहृश्यंतेदानवानांतथैवच॥२०॥एषरुद्रःसमास्थायमहालोकमयंरथं॥आया
तित्रिपुरंहंतुंमत्वासत्सुरानपि॥२१॥सत्वंमहौजसंनित्यंप्रपद्यस्वमहेश्वरं॥यास्यसेसहपुत्रेणदानवैःस
हमानदः॥२२॥इत्येवमावेद्यभयंनारदोपस्थितंमहत्॥दानवानांपुनर्देवोदेवोराशपदमागतः॥२३॥नारदे

तुखुनौपातेमयोदानवनायककः॥शूरःसमंतइत्येवंदानवानाहदानवः॥२४॥निष्कंवलंघनीयानिम
विष्यंतिपुराणिच॥नभौमगस्तयाशूरादेवादिविजिताहवाः॥२५॥तेप्रयत्नेनवायश्चविदार्याश्चैवसाय
के॥इतिदनुतनयान्मयस्सयोक्त्वासुरगणकारणेवचांसि॥युधिनिजमनसाविषण्णमानस्तदपिपुरं
सहसाविवेशराजा॥२६॥अथपुरजनविश्रुतस्वभावैर्विमलिघ्नपदिगंवरस्तुगर्भिः॥शरणमुपजगा
मदेवदेवंयममदनोधककृत्रदेहघाते॥२७॥मयमभयदेपदैविणंप्रपन्नंसकलविबोधवतीयवत्नने
त्रः॥तदभिमतमदात्तदापिनाकीसचकिलनिर्भयएवदानवोभूत्॥२८॥॥इतिश्रीमत्स्यपुराणेत्रि
पुरदाहेनारदागमनोनाम॥ ॥सूतउवाच॥एततोरथोवेदवलेनारदोभ्यागमत्पुनः॥आगत्यचै
वत्रिपुरात्सभायामास्थितःस्वयं॥१॥इलावर्त्तमितिख्यातेतद्वर्षेविस्मयायच॥तत्रपद्मोवलेदन्तोव
लियन्त्रावसपतः॥२॥देवानांजन्मभूयश्चित्रिषुलोकेषुविश्रुता॥विवाहाःक्रतवश्चैवजातकर्मक्रि
याश्चया॥३॥देवानांयत्रहृतानिकन्यादानानियानिच॥रेमेनित्यंभवस्तत्रसहायैःपार्षदैर्हृतिः॥४॥
लोकपालाःसदायत्रतस्थुर्मेरुगिरिर्यथा॥मधुपिंगलनेत्रास्तुचंद्रावयवभूषणः॥५॥देवानामधिपः
प्राइगणपांश्चमहेश्वरः॥वायवेतदरिणांतेत्रिपुरंपरिहस्पते॥६॥विमानैश्चपताकाभिर्ध्वजैश्चसम

लंकृतं॥इतिचित्रमिदंख्यातंवह्निवह्निषमोपमं॥७॥एतेजनगिरिप्रख्याःसकुंडलकिरीटिनः॥प्राकारा
एतेजनगिरिप्रख्याःसकुंडलकिरीटिनः॥प्राकाराणांपुरेद्वारेकक्षांतेदानवाःस्थिताः॥८॥इमेचनीपदाना
स्तुदनुजाविकृताननाः॥निर्गच्छंतिपुराद्दैत्याःसायुधाविजयैषिणः॥९॥सतंसुरशतैःसार्द्धंसमहायव
रायुधः॥सदैवमामकैर्भृत्यैर्व्यापादयमहासुरान्॥१०॥अहंतुरथवर्येणनिश्चलोवलवस्थितः॥पुरःपुर
स्परंध्यायीस्यासाभिव्योमगोधूताः॥११॥यदातुपुष्ययोगेनएकत्वंयास्यतेपुरं॥तदेतस्तिर्दहिष्यामिशरेणै
केनवासव॥१२॥इत्युक्तोवैभगवतारुद्रेणेंद्रःसुरेश्वरः॥ययौतत्त्रिपुरंयेतुंतेनमैत्त्येनसंहतः॥१३॥प्रकीर्ण
रथभीमेस्तैःसदेवैःपार्षदैर्गणैः॥कृतसिंहरवोपेतैरुरुछद्भिरिवांबुदैः॥१४॥तेननादेनत्रिपुराद्दानवा
युद्धलालसाः॥चेलुस्तस्तुर्दुदुवुश्चदानवागमनेवरान्॥१५॥अन्येपयोधराराबाःपयोधरसमाबभुः॥स
सिंहनादंवाचित्रंनादयामासुरुद्धताः॥१६॥देवानांसिंहनादश्चसर्वतूर्यरवोमहान्॥ग्रस्तोभूदैत्यनादै
श्चचंद्रस्तोयधरैरिव॥१७॥चंद्रोदयात्समुद्भूतःकूर्मिमासइवाशिवः॥त्रिपुरंप्रानवत्तद्भीमरूपंमहासुरैः॥
१८॥प्राकारेचपुरेतद्वत्गोपुरेषुपिवापरे॥अट्टालकात्समारुह्यकेचिद्वलितवादिनः॥१९॥स्वर्णमालाध
राशूराःप्रनासितकरांबराः॥केचिन्नदंतिदनुजाःसोयंवंतद्वांबुदाः॥२०॥इतश्चेतश्चधावंतःकेचिदुद्धतव

म०पु० २००

ससः॥ किमेतदिति पप्रच्छुरन्योन्यं गृहनिःसृताः॥२१॥ किमेतन्नैव जानामि ज्ञानमंतर्हितं हि मे॥ ज्ञास्यामो नं
तरस्येति कालोस्ति विरवो नवान्॥२२॥ काप्येषो पृथिवीसार सिंहास्वरथमास्थितः॥ तिष्ठते त्रिपुरंत्यस्य दे
हं व्याधिरिवोत्थितः॥२३॥ क एषोत्स्व सुराख्योस्तु कार्चिंतां संभ्रमे सति॥ एहि वायुधमादायकमेरछाम
विष्पति॥२४॥ इतीतिस्मो माविज्ञा जन्नरोत्नरनाषिपाः॥ आसाद्य देवान् पृच्छेति दानवास्त्रिपुरालयाः॥२५॥ ता
रकाख्यपुरे दैत्यास्तारकाख्यतरेस्सुराः॥ निर्गताः कुपितास्तूर्णं बिलादिव महोरगाः॥२६॥ निधर्वितस्तु
ते दैत्याः प्रमथाधिपयूथपैः॥ दर्पितानां ततश्चैषा दग्धाश्च दर्पिताग्निना॥२७॥ रूपाणि जज्वलुः कोपा
दग्निनामिव धूयतां॥ ततो हृहंति चापानि भीमनादानि सर्वशः॥२८॥ निःक्रम्य रघुरन्योन्यं इषुभिः प्राण
भोजनैः॥ मार्जारमृगजीमास्यान् पापदान् विकृताननान्॥२९॥ हृष्टा हृष्टाः समन्तुश्चैव दानवा रूपसंपदा॥ बाहु
भिः परिघाकारैः कृष्णपाधनुषाशरा॥३०॥ अस्मान्निर्वृः प्रवेक्ष्यंते तडागानां च पक्षिणः॥ मृताः स्वर्गतया स
ध्वंह निष्कामो निवर्त्यतां॥३१॥ इत्येवं परुषाण्युक्त्वा दानवाः पार्षदर्षभाः॥ विदुः समयास्त्वीष्यैः सुपर्णा इवां
बुदन्॥३२॥ प्रमथा अपि सिंहाख्याः सिंहविक्रांतविक्रमाः॥ गंडशैलशिलावृक्षैर्बिभिदुर्दैत्यदानवान्॥३३॥ राम० २००
अंबुदे राकुलं गोत्रे तो पाकुलमिवांबुदैः दानवाकुलमत्यर्थं तत्पुरं सकलं बभौ॥३४॥ विकृष्टचापा दैत्येन्द्राः

सृजंति शरदुर्दिनं॥ इंद्रचापकृतोरस्का जलदा इव दुर्दिने॥३५॥ इषुभिस्ताड्यमानास्ते भूयो भूयो गणेश्वराः॥
चक्रतुश्च दनियासिवर्णधातुमिवाचलाः॥३६॥ तथा वृक्षशिलाखड्गः स्मलपहृपरस्वधैः॥ चूर्ण्यंते निहता दैत्ये
ईस्वदीर्घमहास्वनैः॥३७॥ तारकाख्यो जयत्येष इति दैत्या व्यघोषयन्॥ जयतीन्द्रश्च इत्येवं महाबलगणेश्वराः॥
३८॥ वारिता हारिता बाणैर्येधास्तस्मिन् बले नयान्॥ निःस्वनंतोंबुसमये जलगंभीरवांतुदाः॥३९॥ करैश्छिन्नैः शि
रोभिश्च ध्वजैश्छत्रैश्च पांडुरैः॥ पुरुषभिर्मयवती मांसशोणितपूरिता॥४०॥ योगिवो घुत्य सदस्याता लमात्रावरा
युधैः॥ हृष्टा हतापतांस्तु वृंदानवाः प्रमथास्तथा॥४१॥ सिद्धाश्चाप्सरसश्चैव चारणाश्च नभोगताः॥ हृष्टप्रहार
भूयिष्ठाः साधुसाध्विति चुक्रुशुः॥४२॥ अनाहताश्च विजति देवदुंदुभयस्तथा॥ नदंतो मेघशब्देन सरभा इव शो ३
षिताः॥४३॥ मयूरवा इव चादित्ये सुरासिंधुपरा इव॥ विशंति कुवद्वदना वल्मीकानिव पन्नगाः॥४४॥ ता
रकाख्यपुरे तस्मिन्नसुराः सुरशात्रवः॥ विद्युन्माली मयश्चैव तत्र जातौ सहानुगौ॥४५॥ ताभ्यां नीयतमानास्ते
दानवाभ्यां गणेश्वरः॥ त्रासिता निहताश्चैव नयास्वस्तुम्बकृणे॥४६॥ विद्युन्माली सदैत्येंद्रो गिरीन्द्रसदृशद्युतिः॥
आदाय च परिघं घोरं ताडयामास दानवः॥४७॥ स नंदी दानवेंद्रेण परिघेणा हृढाहतः॥ भ्रमते मधुनाप्यस्य पुरा
नायपोपथा॥४८॥ नंदीश्वरे हते तेन गणपाम्पातविक्रमाः॥ दुद्रुवुर्जातसरंभा विद्युन्मालीं महासुरं॥४९

घंटाकर्णः शंकुकर्णो महाकालस्य पार्षदः ॥ ततश्च सायकैः सर्वान्गणपान्गणसत्तमान् ॥ ५०॥ तूर्यो न्
पस्त्रिभिश्चापि गणेश्वरमहत्तरान् ॥ भित्वा रणे राजासौ नमस्यं बुधरो यथा ॥ ५१॥ तस्य नर्द्दितशब्देन नंदी
दिनकरप्रभः ॥ संज्ञां प्राप्य ततः सोपि विद्युन्मालिनमाद्रवन् ॥ ५२॥ रुद्रदत्तं तदादीप्तं दीप्तानलसमप्रभं ॥ वज्रं
वज्रनिभांगस्य दानवस्य ससर्ज्ज हि ॥ ५३॥ तन्नंदिभुजनिर्मुक्तं मुक्ताफलविभूषितं ॥ पपात वक्षसि तदा वज्रं दैत्य
स्य भीषणं ॥ ५४॥ स सज्जं निहतो दैत्यो वज्रसंनहनोपमं ॥ पपात वज्राभिहतः शक्रेणाद्रिरिवाहतः ॥ ५५॥ दै
त्येश्वरं विनिहतं नंदिना कुलनंदिना ॥ चुक्रुशुर्दानवाः प्रेक्ष्य दुद्रुवुश्च गणाधिपं ॥ ५६॥ दुःखामर्षितरोषास्ते वि
द्युन्मालिनि पातिते ॥ द्रुमशैलमहावृष्टिं तोयदाः ससृजुर्यथा ॥ ५७॥ ते पीड्यमाना गुरुभिर्गिरिभिश्च गणेश्वराः ॥
कर्तव्यं कर्म न विदुः किंचिद्धर्मधार्मिका इव ॥ ५८॥ ततोसुरवरः श्रीमांस्तारकाख्यः प्रतापवान् ॥ स तरूणां गि
रीणां वै तुल्यरूपधरो बभौ ॥ ५९॥ भिन्नोत्तमांगा गणपा भिन्नमस्तककानना ॥ विरेजुर्भुजगा मंत्रैर्वर्यैर्महा
याय पातथा ॥ ६०॥ मयेन मायावीर्येण वध्यमाना गणेश्वराः ॥ न मंत्रं बहु राश्चालं पंजरे शकुयो यथा ॥ ६१॥
स वासुरवरः श्रीमांस्तारकाख्यः प्रतापवान् ॥ ददाह च बलं सर्वं शुष्कं धनमिवानलः ॥ ६२॥ तारकाख्यं तेन का
यं शरवर्षैस्तथा गणाः ॥ मयेन मानविहितास्तारकाख्येण चेषुभिः ॥ ६३॥ गणेशा विधूरा लतो जीर्णमूलाय

या दुमाः ॥ सूर्यः स तपते नाग्निर्ग्रहा न ॥ सरमानरपादांश्च स्वपत्यच मवेवचा ॥ ६४॥ मयोमायाबलेनैतत्यातयत्नेश
शत्रुषु ॥ स तारकाख्येन मयेन मायया संमोह्यमानान्विवशान्गणेश्वरान् ॥ नाशकुवंस्ते मनसापि चेष्टितुं य
थेंद्रियाः प्रभुनिनापि संजिता ॥ ६६॥ दिवाकराग्न्यामिरिकुंजरोरगो हरिर्यथा व्याघ्रक्षतरक्तक्षसैः ॥ विबुध्य
माना स्तमसा विमोहिता समुद्रमध्ये ष्विव गाधकांक्षिणः ॥ ६७॥ संमर्द्यमानेषु सुरेतरेषु प्रमथ्यमानेषु सुरेत
रेषु प्रमथ्यमानेषु गणेश्वरेषु ॥ ततः सुराणां प्रवराभिरक्षितुं रिपोर्बलं च विष्णुः सहायुधाः ॥ ६८॥ यमोग
मास्त्रो वरुणश्च भास्करस्तथा कुमारोमरकोटिसंवृतः ॥ स्वयं च शक्रः सितनागवाहनः कुलीशपाणिर्वर
लोकपुंगवः ॥ ६९॥ स चोडुनाथः समुतो निशाकरः स चांतरस्थः क्षपतिर्महाद्युतिः ॥ बलेरिपूणां प्रवराभि
रक्षितारिपोर्बलं संविविधुर्मदोद्धता ॥ ७०॥ यथा वनं दर्पितकुंजराधिपा ययानेगः सांबुधरं दिवाकरः ॥
यथा च सिंहैर्विजने षु गोकुलं ॥ तथा बलं तत्त्रिदशैरभिद्रुतं ॥ ७१॥ कृतप्रहारांस्तदरीश्च दानवास्ततस्त्व न
ज्यं तरणेन पार्षदाः ॥ स्वज्योतिषा ज्योतिरिवोष्मवान्हरिर्विधानयामास यथासनस्स ॥ ७२॥ स्वज्योतिषा ते
न सदंश्च दग्धं ननाशत्रु संत्रिदशाधिपेन ॥ ततप्रकृष्टं तपसः प्रभावैरं भ्रेणजीतो न च वज्रपाणिः ॥ ७३॥ शस्त्रा
च शस्त्रा चमयूरकेतु दंडेन चंडेन च धर्मराजः ॥ पाशेन चाग्रेण च वारिगोप्ता स्वलेन कालेन च यक्षराजः ॥ ७४॥ वी

र्येणातेजस्वितयास्तु केशगदेवाश्च सर्वे धृतिवीर्ययुक्ताः॥ गणेश्वरास्ते सुरसन्निकाशाः पूर्णाक्रतिसिक्ता इव रविप्रका
शाः॥७५॥ उत्सादयंतो दनुपुत्रवृक्षान्यथैव चंडाशनयः पतंत्यः॥ मयं तु देवान्यरिरक्षितारं वारात्मजं देववरं
कुमारं॥७६॥ शरेणभित्वा तपसा रसित्वा सतारकाख्यासुरमालमाथे॥ एवं स कृत्वा प्रविशामवीरपुरं हि दै
त्यैः प्रथमेनयुक्तं॥७७॥ विश्राम स्वर्गस्वरमप्यवाप्य पुनः सरेषामरणं सपत्नैः॥ वयं हि शास्त्र क्षतविक्षता
गा विशीर्णशस्त्रास्त्र ध्वजवर्मवाहाः॥७८॥ जयैषिणस्ते जितकाशिनश्च सुरासुरालोकनराधिपाश्च॥ मयस्तु
त्वा दिवि तारकाख्यो वचोभिकांक्षत जोपसाक्षः॥७९॥ विवेश तत्संत्रिपुरं सदैव दितेः सुतैर्युद्धघृतप्रहर्षैः॥
ततः सशंखानकभेरीभीमं ससैन्यनादेहससैन्यमाल्लतौ॥८०॥ मयानुगं घोरसभीमगह्वरं यथाद्रिमाद्रेग
जसिंहनादितं॥८१॥ इति श्रीमत्स्यपुराणे त्रिपुरोपाख्याने श्रवहारकृतं नाम॥ ॥ सूत उवाच॥ ॥ मयोवहा
रं कृत्वा चमायावी दानवर्षभः॥ विवेश तत्संत्रिपुरमम्भोनीलमिवांबरं॥१॥ स दीर्घमुष्णानिःश्वस्य दानवानीस्य
मध्यगान्॥ दध्यौ लोकक्षयेप्राप्ते कालं कालइवापरः॥२॥ इंद्रोपिविस्मयतेयस्य स्थितो युद्धे स्म राध्रतः॥ सचा
पिनिधनं प्राप्तो विद्युन्माली मयशाः॥ दुर्गं वैत्रिपुरस्यास्य न समं विद्यते पुरं॥ तस्याप्ययोनयः प्राप्तो न दुर्गमापहा
रि॥४॥ कालस्यैव वशे सर्वं दुर्गं दुर्गतरं च यत्॥ कालेकृद्धे कथं कालात्राणं तोद्य भविष्यति॥५॥ लोकेषु त्रिपु

यत्किं चित्तेतोनिर्याम वंदुषु॥ का उस्य तदृशां सर्वं इतिपौतामहावधिः॥६॥ अस्मिन्कः प्रभवोद्योगोत्यसंधार्य
मितात्मनि॥ लंघतेकः समर्थः स्यादहते देवं महेश्वरं॥७॥ त्रिजेमिनेंद्रेण यमेवरुणेन च वित्तपे॥ स्वामिचेषांतु
देवानां दुर्ययः स महेश्वरः॥८॥ ऐश्वर्यस्य फलं यस्य प्रभुत्वस्य च यत्फलं॥ तदद्य दर्शयिष्यामि यावद्बुधम
हं गतः॥९॥ वापित्वमृततोयस्य पूर्णाः स्वक्षामिता महं॥ जीविष्यति तदा दैत्याः संजीवनवरौषधेः॥१०
इति संचित्य बलवान्मयो मायाविनिर्मितां॥ मायया सस्रजे वापिं रंजामिव पितामहः॥११॥ द्वियोजनायतां
दीर्घां पूर्णां योजनविस्तृतां॥ आरोहणं सक्रमवतीं चित्ररूपां कथामिव॥१२॥ चंद्रनिर्यासकल्पस्य श्वभ्रस्य
न्दतगंधिनः॥ पूर्णां परमतोयस्य गुणपूर्णामिवांगनां॥१३॥ उत्पलैः कुमुदैः पद्मैर्वृतां कादंबकैस्तथा॥ चं
द्रभास्करवर्णाभैर्नृमरानरयौर्वृतां॥१४॥ खगैर्मधुरवाचालैश्चारुचामीकरप्रभैः॥ कामेषिभिरिवाकीर्णां
जीवानामरणीमिव॥१५॥ तां वापीं सृज्य समयोगं गामिवहेश्वरः॥ तस्यां प्रक्षेपयामास विद्युन्मालिनमाद्य
तः॥१६॥ स वाप्यां सज्जितो दैत्यो देवशत्रुर्महाबलः॥ उत्तस्थावि धनैरिद्धसद्योऽहुत इवानलः॥१७॥ मयस्य
चांजलिं कृत्वा तारकाख्योभिवादितः॥ प्रविद्युन्माली तिवचनं मयमुत्थाप्य चाब्रवीत्॥१८॥ कनंदी सह रुद्रेण
हृतः प्रमथजंबुकैः॥ युध्यमाना विनिःपीड्यादयादेहेषु कापिनः॥१९॥ अंता स्मैव तु रुद्रस्य नवामः नगती

स्तव:॥ तैर्वाविनिहिता: सर्वेवयंयुद्धेमयानुगा:॥२०॥ विद्युन्माली निशम्यैतन्मयोवचनमूर्जितं॥ तंपरिष्वज्यसा
श्लक्ष्ण इदमाहासुर:॥२१॥ विद्युन्माली नमे राज्यं श्लाभिप्रेतं न जीवितं॥ त्वया विनामहाबाहो कोनमेऽद्यमहासुर:।
२२॥ मद्धान्मृतमयी वापी एषा मां या निरीश्वर:॥ प्रियादानवदैत्यानां इहतानां देवतं रणं॥२३॥ दिष्ट्यालं दैत्य
पश्यामि यमलोकादिहागतं॥ दुर्गतात्मनपश्यस्त्वा गोज्योनिवमहानधिं॥२४॥ दृष्ट्वा दृष्ट्वावतो वापि माय
यापाव विनिर्मितां॥ हृष्टनाक्षोऽन्नदैत्येय इदंवचनमब्रवीत्॥२५॥ दानवा युध्यतेदानींप्रमथै: सहनिर्भ
या:॥ मयेन विहिता वापी हता नःसंजीवयिष्यति॥२६॥ तत: क्षुब्धांबुदरवा भेरी सा तु भयंकरी॥ वाद्यमाना
तु प्राणाद्योर्गैरेवेति पुन:पुन:॥२७॥ श्रुत्वा भेरीरवं घोरं मेघारसितसन्निभं॥ व्यपतन्नसुरास्तस्मिंस्त्रिपुरा
युधलालसा:॥२८॥ लोहराजतसौवर्णै: कटकैर्मणिराजितै:॥ आमुक्तकुंडलैर्हारैस्तै: सर्वै: कवचाक
टै:॥२९॥ धूम्रापतेत्पुरिरम्याज्वलंतइवपावका:॥ आयुधानि समादाय प्रासितोहृढविक्रमा:॥३०॥ नद
माना इव नदा गर्जंत इव तोयदा:॥ करीछायाइवगजा: सिंहाइवचनिर्भया:॥ ह्रदाइवचगंभीरास्सूर्याइ
वप्रतापिता:॥ यमाइवच दैत्येंद्रास्त्रासयंतेः परं बभु:॥३२॥ प्रमथा मोसोल्लाहा गरुडोत्पातपातिन:॥ पु
युत्सवोविधावंति दानवान्दानवारय:॥३३॥ नंदीश्वरेण प्रमथास्तारकाख्येन दानवा:॥ चक्रु: कलिं सहेत्यु

ध्यं चोद्यमाना बलेन च॥३४॥ तोमरैश्चन्द्रशोकशै: शूलैश्चानलपिंगलै:॥ बाणैस्तु हस्तविमुक्तैस्तैश्च जघ्नु: पर
स्परं॥३५॥ तारानां सज्यमानानामरीणां च निपात्यतां॥ रूपाण्यासन्महोल्कानां पततीनामिवांबरात्॥३६
शक्तिनिर्भिन्नहृदयानि र्याहतिपातिता:॥ निरयेष्विवनिमग्ना: कुर्जंति प्रमथासुरा:॥३७॥ हेमकुंड
लयुक्तानि किरीटोत्कटवंति च॥ शिरांस्युर्व्यां पतंतिस्म गिरिकूटान्ययाप्यये॥३८॥ परस्वधै: पट्टिशैश्चरव
ड्गै: परश्वभिस्तथा॥ छिन्नाकरिकराकाराणि पेतुर्भुजा धरातले॥३९॥ गर्जंति सहसा हृष्टा: प्रमथाभीमतर्जना:॥
साधयंति परे सिद्धा युद्धं गांधर्वमद्भुतं॥४०॥ प्रमथा नासितुलवदानवा नापि दर्पिता:॥ इति चोद्धीरयन्वाचं वा
रणारणमुषता॥४१॥ परिघैराहता: केचिद्दानवैरुपाकरानुगा:॥ रमंते रुधिरं वक्त्रै: स्वर्णधातुरिवाचला:
४२॥ प्रमथैरपि नाराचैरसुरा: सुरशत्रव:॥ द्रुमैश्च गिरिशृंगैश्च नाटमेवाहवे हता:॥४३॥ सूदितान्सूदिता
न्दैत्यान् अन्ये दानवपुंगवा:॥ उत्क्षिप्येचिक्षिपुर्वाप्यामय दानवनादिता:॥४४॥ ते चापि तास्करैर्देहै: स
गलोक इवामरा:॥ उत्तस्थुर्वापिपासाद्यतद्रूपाजरणांबरा:॥४५॥ अथ केदानवा: प्राप्य वापीं प्रक्षेपणा
दाम्रत्॥ आस्फोट्य सिंहवन्नादं कृत्वा धावंस्मदारुणा:॥४६॥ दानवान्प्रमथानेतान्प्रसर्पत किमासते॥ ह
तानपि हि नो वापि द्रुमरुजीदयिष्यति॥४७॥ एवं श्रुत्वाशंकुकर्णसितो ग्रहइसन्निभ:॥ द्रुमतोत्तुष्यदेवेंद्रा

इदंवचनमब्रवीत्॥४८॥सूदिताःसूदितादेवाःप्रमथैरसुरात्मभिः॥उत्तिष्ठंतिपुनर्भीमाःसस्याइवजलोक्षिताः॥
४९॥अस्मिन्किलपुरेवापीपूर्णामृतरसांभसा॥निदानापत्त्रिनिःशंकाःक्षिप्ताजीवंतिदानवाः॥५०॥इतिवि
ज्ञाप्यदेवेशंशंकुकर्णोमहेश्वरं॥दानवानादलेभ्रष्टोकोपारव्यास्तमुदारुणाः॥५१॥तारकाख्यस्तुभीमाक्षो
तारकाक्षइवांबुदः॥अभ्यधावत्सुसंक्रुद्धोमहादेवरथंप्रति॥५२॥त्रिपुरेतुमहद्दुष्टैर्भेरीझांरवरवोपमं॥
दानवानिःस्रिताद्दृष्ट्वादेवदेवबलोयतः॥५३॥तेत्त्वरितःस्तोदेवास्तारकाख्येणसंयुगे॥सचक्षोभमग
णोस्यपंनूस्यपितामहः॥५४॥ताभ्यांदेववरिष्टाभ्यांक्रान्वितःशरयोत्तमः॥अनायतनमासाद्यसीदतेयु
णवान्यथा॥५५॥धातुक्षयादिवेंद्रियइवग्रीष्मेवाल्पमिवोदकं॥शैथिल्यंप्रातिसरथःस्नेहोविप्रकृतोयथा
५६॥शरादथबलादेवःक्लमःसीदत्सुस्यंदने॥उज्जहारमहाप्राणस्त्रैलोक्यंरथरूपिणं॥५७॥रथादपिचनिः
पत्यपीतवासाजनार्दनः॥वृषरूपंमहत्कृत्वारथंजग्राहदुर्जनं॥५८॥त्रैलोक्यसविषाणाभ्यांरथमेवमहारथः
प्रगृह्योद्वहतेसर्वंकुलंकुलवदस्तथा॥५९॥तारकाख्योपदैत्येसोगिरींद्रइवपक्षवान्॥अभ्यद्रवत्तदादेवं
ब्रह्माणंप्रभुमीश्वरं॥६०॥सतारकाख्याभिहतःप्रतोदन्यस्यकूवरे॥विजृंभ्यालंमुकुर्बह्मास्वासंवक्त्रात्ससु राम०
ज्झिरन्॥६१॥तत्रदैत्यैर्महानादैर्दानवैरपिभैरवः॥तारकाख्यस्यपूजार्थंकृतोजलधरोपमः॥६२॥रथचरण २०४

करोप्यवापपुष्पेन्द्रक्षनवपुष्टषनेन्द्रपुत्रपूज्यः॥दितितनयबलंचविमर्षसर्वंत्रिपुरपुरंप्रविवेशकेशवोपि॥६३॥
सजलजलदराजितांसमस्तांकुमुदकुसुमवरोत्पलफुल्लकुल्यां॥सुरगुरुरपिबत्सपोद्यमानामखिलमिवार्ण
वमग्निरौर्वसंभवोहि॥६४॥वापीपित्वासुरेंद्राणांपीतवासाजनार्दनः॥नर्दमानोमहामेघःप्रविवेशशरंततः
६५॥ततोऽसुराश्चीमगणेश्वरैर्हताःप्रहारसंवर्धितशोणितापगाः॥पराङ्मुखाभीममुखैःकृतेरणेययाम
याभहितितलदैत्यैरसैः॥६६॥सतारकास्तडिमालीरेवमयेनसार्धंप्रमथैरभिद्रुतः॥पुरंपरावृत्यतुतत्सराहिता
यथाशरीरंपवनाद्ययोगताः॥६७॥गणेश्वराःसुघृतदर्पशासिनोमहेंद्रनंदीश्वरषण्मुखायुधाः॥विनेदु
सज्जिजहसुरश्वदुर्मदाजयेमचैन्द्रादिदिगीश्वरैःसह॥६८॥॥इतिश्रीमत्स्यपुराणेत्रिपुरदाहेऽमृतवापि
पानं॥॥सूतउवाच॥॥प्रमथैःसंगरेभग्नास्त्रैपुरास्तेमयादयः॥पुरंप्रविविशुर्भीताःप्रमथैर्भग्नगोपुरं॥
१॥शीर्णदंष्ट्राययानागाभग्नशृंगायथावृषाः॥मतमायायथादैत्यादेवेषुविकृताननाः॥२॥बभूवुस्तेवि
मनसःकथंकार्यमितिब्रुवन्॥अपतानूर्ध्वनमनसस्तदातासरसाननान्॥३॥उवाचस्सुरारिर्दैत्यानूप
रमाधिपतिर्मयः॥कृत्वाघोराणियुद्धानिप्रथमैःसहसामरैः॥४॥तोषयित्वासुरान्युद्धेप्रमथानमरैःसह॥
यूयंपलायमंदैःपश्चाद्वज्रापीडिताः॥५॥प्रविश्यनगरंत्रासात्मयैःशृंगमर्दिताः॥अप्रियंक्रियतेव्यक्तं

देवैनास्त्रसंत्रायः॥६॥यत्रनानामहानागाःप्रविशंतिगिरेर्वनं॥अहोहिकालस्यबलंअहोकालोहिदुर्जयः॥७॥
यत्रेदृशस्यदुर्गस्यउपरोधोपमाप्यत॥मयेविवदमानेतुनर्दमानइवांबुदैः॥८॥बभूवुर्निःप्रभादैत्याग्र
हाइंदूदयेयथा॥वापीपालास्ततोभ्येत्यनत्रःकालइवांबुदाः॥९॥मयमाहुर्यमप्रख्यंसांजलिप्रग्रहाःस्थिताः
यासामृतरसागूढावापीविनिर्मितात्वया॥१०॥साप्येवासुरनागेंद्रपीताकेनापिसत्वता॥समाकुलोत्पलवना
सामीनाकुलपंकजा॥११॥सावापिसोम्रतंहृष्टाम्रतसंज्ञाइवांगना॥वापीपालवचःश्रुत्वामयोसौदानवप्र
भुः॥१२॥कष्टमेत्यसकृत्वोच्चैर्दितिजानिदमब्रवीत्॥मयामायाबलकृतावापीत्वीताइयंयदि॥१३॥विन
ष्टाःस्मनसंदेहस्त्रिपुरंदानवागतं॥निहतानिहतानदैत्यानष्टाजीवयतिदेवतैः॥१४॥पीताचयदिसावा
पीविष्णुनापीतवाससा॥कोन्योमन्मायपायुक्तांवापीमम्रततोयनं॥१५॥पास्यतेविष्णुमजितंवर्जयित्वाग
दाधरं॥सयुद्धत्वमपिवानोनत्वस्तविदितंभुवि॥१६॥यत्रमंदरकौशल्यंविबुधैश्चबुधैनुच॥समोयंस्त्रि
रोदेशोविष्णुमोनक्षमाबलः॥१७॥नचयत्ररथंकृत्वाबाधंतेस्मानमरूजनाः॥तेयूयंयदिमन्यध्वंसागरोपरि
वेष्टिताः॥१८॥ग्रमथानांमहावेगंसहामःश्वसनोपमं॥एतेषांचसमारंभास्तस्मिन्सागरसत्रवे॥१९॥निरु
त्साहाभविष्यंतिएतद्युद्धमनाहताः॥युध्यतांनिघ्नतांशत्रुन्नचोविष्यतां॥२०॥सगरोंबरसंकाशःत्रासपनो
— — भ

भविष्यति॥इत्युक्त्वासमयोदैत्योदैत्यानामधिपस्तदा॥२१॥त्रिपुरेणापयोत्तूर्णंसागरंसिंधुवल्लभं॥सागरेश्व
रसंकाशमुत्पपातपरावरं॥२२॥अथतस्युःपुराण्येवगोपुराभरणेनच॥अपक्रांतेतुत्रिपुरेत्रिपुरारिस्त्रि
लोचनः॥२३॥पितामहमुवाचेदंवेदवादविशारदं॥पितामहदृढंभीताभगवानदानवाहिते॥२४॥विदुर्जसा
गरंतेतुदानवाःसपुरोहिताः॥यतएवंहितेपाश्चत्रिपुरेणतुदानवाः॥२५॥ततएवहितांस्तत्रसंप्रापयस्त्वपि
तामह॥सिंहनादंततःकृत्वादेवादेवरथंमहत्॥२६॥अरयोवायवुईशाःसायुधाःपश्चिमोदधिं॥ततोम
रामरत्युरूपरिवार्यभवंहरं॥२७॥नईयंतोययुस्तत्रसागरंदानवालयं॥२७॥अथचारूपताकभूषितंप
टहाडंवरशंखनादितं॥त्रिपुरमभिसमीक्ष्यदेवताविविधबलाःप्रनुदुपथावनाः॥२८॥असुरपुरघुरु
घपिदारुणेजलधरइवमृदंगह्वरः॥दनुतनयनिनादामिश्रिताःप्रतिनिधिमस्तुमिताएवोपमं॥२९॥
त्रयभुवनपतिगतिस्सुराणांमगपदुपस्थविमूढलुब्धबुद्धिः॥त्रिदशगणपतिरुवाचशार्कंत्रिपुरगतंस
इसानिरीक्ष्यशत्रुं॥३०॥त्रिदशगणपतिर्निशम्यपेतत्त्रिपुरंकेतनदानवोपरिष्टात्॥यमवरुणकुबे
रषण्मुखैस्त्वसहगणपैरसहस्थितावुदेव॥३१॥विदितपरबलाभिघातसुकंपयदुदधिगताश्वपरंपरेत
नखुः॥रथमधिरुह्यततोभवःसमर्थोदधिमथितुंत्रिपुरंपुनर्निहंतुं॥३२॥इतिपरिगणपानदिनेसन्न्

म०पु०
२०६

जात्यवतस्पुर्ल्पवणार्णवोपरिष्टात्॥अजितवत्त्रिपुरंस दानवेंद्रंशरवर्षैर्मुशलैश्च वज्रमिश्रैः॥३३॥अह
मपिरथवर्यमास्थिमास्थितस्तसुरवरवर्यमनेन वेयपदृष्टत॥असुरवधार्थसुद्यतानांप्रतिनिदधामि
सुखायतेरनघ॥३४॥इतिमववक्चनप्रकोवादितोहशशातनेत्रवपुःसमुद्यतः॥त्रिपुरपुरजिघांसया
हरिःप्रविकसितांबुजलोचनोपययौ॥३५॥ ॥इतिश्रीमत्स्यपुराणेत्रिपुरदाहेत्रिपुरकमयोनाम॥ ॥सू
तउवाच॥ ॥मघवांस्तुनिहंतुंतानसुरांश्चमहेश्वरः॥लोकपालायमुःसर्वेगणपाणाश्चसंघशः॥
१॥ईश्वरेणोदिताःसर्वेतत्येतुस्त्रांबरेतदा॥खगतास्तुविरेजुस्तेपक्षवंतइवाचलाः॥२॥प्रययुस्तत्पु
रंहंतुंशरीरव्याधयोपथा॥शंडाडंबरनिर्घोषैःपवैःपटैरपि॥३॥नादयंतःपुरेदेवाहद्वास्त्रिपुरवा
सिभिः॥हरःप्राप्तइतिवोत्काचविनस्तेमहासुराः॥३॥आजग्मुःपरमंक्षोभमत्यपेयिसागराः॥
आकाशेपिपमप्रायेतेषांदेहेनिकृंतनं॥४॥प्रहंडयुद्धमतुलंमहारकृतनिस्वनं॥निष्पयंत
इवादित्यंप्रज्वलंतइवाग्नयः॥५॥श्वसंतइवनागेंद्राभ्रमंतइवपक्षिणः॥गिरींद्राइवकंपंतोगर्जंतइवतोयदाः
६॥क्रंदंतइवशार्दूलाःप्रवांतइववायवः॥विहतोर्मितरंगाढ्याःक्षुभ्यंतइवसागराः॥७॥प्रमथाश्चमहाशूरा
दानवाश्चमहाबलाः॥युयुधुर्निश्चिताभूत्वावज्राइवमहाबलैः॥८॥कार्मुकानांविकृष्टानांबभूवुर्दारुणा

राम
२०६

रवाः॥कल्पांतकालमेघानांयथाविपतिवायुना॥९॥आक्रुष्टानयमानैषीःस्ययोस्सिमतोत्थिता॥महाशब्दि
तोस्मिषणाहिदर्शयिपौरुषं॥१०॥रहायाछिंधिभिंधितिरव्यादमारयचूर्णय॥इत्यन्योन्यंचःकृत्वाप्रयुयुधु
र्मसादनं॥११॥खड्गापवर्जिताःकेचित्छिन्नाःपरस्वधैःकेचित्॥केचिन्मुद्गरभिन्नांगाःकेचिद्बाणभिराहताः॥
१२॥पट्टिशैःसूदिताःकेचित्केचित्शूलविदारिताः॥दानवासुशरैर्भिन्नाःसबाणाइवपर्वताः॥१३॥निपते
त्सर्णवजलेभीमनक्रतिमिंगिले॥असुभिःस्तुनिवक्रांगैःपतमानैःसुरेतरैः॥१४॥संबभूवार्णवेशब्दःसजलो
बुदनिःस्वनः॥तेनशब्देनमकरानक्राश्चितिमितिमिंगिलाः॥१५॥मत्तालोहितगंधेनक्षोभयंतोमहार्णवं॥प
रस्परेणकलहंकुर्वाणाभीमभूतयः॥१६॥भ्रमंतेनक्षयंतश्चदानवानांचलोहितं॥सरथान्सायुधान्सा
श्वान्सवस्त्रान्नरणांवरान्॥१७॥जग्रसुस्तिमयोदैत्यान्जलवंधजलेवनान्॥युद्धंसुरासुराणांचप्रमथा
नांचवर्तति॥१८॥त्र्यंबरेणसिच्चतयायुद्धंचतुर्दिक्षुलेशराः॥१९॥यथाभ्रमंतिप्रमथाःसदैत्यास्तोथाभ्रमंते
तितपःसनक्राः॥तथैवछिंदंतिपरस्परंतुतथैवक्रंदंतिविभिन्नदेहाः॥२०॥रणानलेरंगमरेस्त्ववृद्धिःसुरासु
रैर्नक्रतिमिंगिलैश्च॥ततोमुहूर्तेनससमुद्रदेशःसरक्ततोयश्चसमुद्रवीययः॥२०॥स्थितेमहांतेध
रपर्वताभंद्वारंमहांतंत्रिपुरस्यशक्रः॥निक्षिप्यतस्थौमहताबलेनयुक्तःसुरौघोमहताबलेन॥२१॥तथा

म०पु० २०७

तरेसंतनुजोहरस्यबालार्कजांबुनदतुल्यवर्स्मः॥स्कंदःपुरेद्वारमथारुरोहबालोदयस्त्वंगंप्रपतन्निवा
र्कः॥२२॥यमस्त्ववित्ताधिपतिश्चदेवःसोमोप्ययोयास्तुवरायुधश्च॥देवारिणस्तस्यपुरस्यद्वारंमयस्तिमंप
श्चिमतोनिरुद्धं॥२३॥दक्षानिरुद्धस्तपतापुतन्ःसमास्वतादेवरथेनदेवः॥तद्दक्षिणंद्वारपुरस्यरुद्धावतावा
तस्थेभगवांस्त्रिनेत्रः॥२४॥तुंगानिवेश्मानिसगोपुराणिसर्वस्यमर्त्तिकेलासशिमिप्रमाणि॥प्रह्लादरूपाःमय
माचरुमान्योतीषिमेघाइवसानमवर्षाः॥२५॥उत्पाद्यचोत्पाद्यगृहाणितेषांशशैनमालासमनादिकानि॥
प्रक्षिप्यचोधाप्यसमुद्रमध्येकालांबुनादाःश्रमथाविनेदुः॥२६॥रक्षानिवासोकवनैर्युतानित्रणशोकसंमानि
सकोकिलानि॥गृहाणिहेतावरितास्तुतेतिभ्रांतेतिकांतिर्निद्रियेतवापि॥२७॥उत्पाद्यमानेषुगृहेषुकार्यः
श्चनायशिष्टाधिविधानचक्रुः॥कलत्रपुत्रक्षयप्राणनाशेतास्मिन्पुरेदुर्धर्षेप्रवृत्ते॥२८॥महासुराःसागरतुल्य
वेगागणेश्वराःकोपहताःपरेयुः॥परस्परैस्तत्रशिलोबलैश्चत्रिशूलकरोत्तमकंपनैश्च॥२९॥शष्टैबभूवा
मरदानवानांयुगांतकालेष्विवसागराणां॥शरीरपक्षक्षपणंसुघोरंयुद्धंप्रवृत्तंदृढवैरदावं॥३०॥अम्भो
न्यमुद्दिश्यवितर्दनांचप्रधावतांचैवनिजघ्नतांच॥शरीरजस्संक्षतजंवमंतःकोपोपरक्ताबहुधानदंतः॥३१
गणेश्वरास्तेसुरपुंगवाश्चयुध्यंतिशब्दंमहदुन्नदंतः॥मार्गाःपुरेलोहितकर्दममालाःस्वर्स्फेटकाःस्फा

राम० २०७

टिकमिश्रचित्राः॥३२॥कृतामुखस्तेनमुखेनतुंगंछिन्नोत्तमांगाश्चकराःकरालाः॥कोपाहृताक्षःसतुतार
कारव्यःसंकेतवृक्षासमीतीतलीनः॥३३॥तस्मिन्क्षणेद्वारवरंरक्षरुद्धंभवेनाद्भुतविक्रमेण॥ततत्स्माका
रगतांश्चभूतान्भविताद्भुमुद्धतवीर्यसत्वः॥३४॥प्रहारतत्रेन्द्रियगर्वदर्पःपुराद्विनिःक्रम्यतरातघोरं॥ततः
सदैत्योत्तमपर्वताग्र्योर्यथागमानागरवाभिमत्तः॥३५॥निधावतोरुद्ररथंजिघृक्षुर्यथाएविःसपतिशंतमी
मं॥शेषःसुधन्वागिरिशश्चदेवश्चतुर्मुखोयःसरथोनरस्थः॥३६॥सतारकाख्यानिगतागताजोक्षोभंयथा
वायुवशाःसमुद्राः॥शेषानुगात्सोपिपितामहेशाश्चोप्युग्रमायाःसरथोवरस्थः॥३७॥विभेदसंधाष्टवला
धिपत्नःकृज्जन्मदीर्शाश्चकरोभिघातान्॥एवंतुरुद्वविदतुरंगमस्यपृष्ठेपदंन्यसदृषस्यचैकं॥३८॥तस्थैा
कःसोद्यतबाणचापःपुरस्सतद्योगसमीक्षवाणः॥३९॥तदन्तपर्वदन्यासाद्दिदस्यदृषभस्यच॥पतस्तनाश्चदन्ता
श्चपीडितस्यत्रिशूलिना॥४०॥ततःप्रभृतिचास्थानेतेनादंताववतोस्तथा॥गूढाःसमभवंवैस्तेनदृषपत
मुपागताः॥४१॥तारकाख्यास्तुभीमाक्षोरौद्रःक्रोतरेक्षणः॥मंदिरांतिकेसुसंरुद्धोनंदिनाकुल
नंदिना॥४२॥परस्वधेनतीक्ष्णेनसनंदीदानवेश्वरः॥तस्यपामासवैतक्षाचंदनंदिगंधवृन्दा॥४२॥प
रस्वधहतःशूरोस्त्रदितःसच्छेदोयया॥डुमावरक्तकुसुत्कृष्यतारकाख्यगणेश्वर॥४३॥यज्ञोपवीतमा

म०पु० २०६

धायविछेदचनतायच॥ततःसिंहरवोघोरःशंखशब्दश्चभैरवः॥३६॥गणेश्वरैःकृतस्तत्रतारकाख्येनिसूदि
ते॥श्रमारसितंश्रुत्वावादित्रंशातमेवच॥३९॥पार्श्वस्थंतुमहापार्श्वंविद्युन्मालिंमयोब्रवीत्॥४०॥ब्रूव
दनवतांकिमेषशाष्ठोनर्दतांमुखरपिभिन्नसागरामः॥वदवचनंतडिन्मालिकिंकिमेनजयनंदंतिपारं
येसारतोजीवेंद्राः॥४६॥इतिमयवचनोकुशार्दितःसंस्तडिन्मालीरविरेवमंडमाली॥रणशीरसिसमा
गतासुराणांविजगदसमरातिमर्दितोतिहर्षा॥४७॥यमवरुणमहेंद्रवीर्यस्तवयत्समोनिधिरेषता
रकाख्यः॥सकलसमरशीर्षप्रवर्तीमायुधियःपुरंततिहिसनिरास्मारकाख्योगणेंद्रः॥४८॥मृदितमु
पनिशाश्चतारकाख्यरविरिवदीप्तानलनीषणायतास्या॥हर्षिततनुरुहनैत्रलोमसत्वाःप्रमथास्तो
यमुचोयथानदंति॥४९॥इतिसुहृदांवचनंनिशम्यततेतडिन्मालामयःसुवर्णमाली॥रणशिरसिस्थितां
जनाचलाभोजगदववाक्यमिदंसविद्युन्माली॥५०॥विद्युन्मालेततःकालेशाधितंत्वयवहेलितं॥करोमि
विक्रमेणेतत्पुरंव्यसनवर्जितं॥५१॥विद्युन्मालीततःक्रुद्धोमयश्चत्रिपुरेश्वरः॥प्रमथाजग्मुरादिशः
सहितास्तेमहासुरैः॥५२॥येनयेनततोविद्युन्मालीवानीमयश्चसः॥तेनतेनपरंसैन्यंप्रमथैःप्रहृतो
कृतं॥५३॥अथयमवरुणकुबेरस्कंदगणघोषैःपणवडिंडिमज्यास्वनप्रघोषैः॥सकलबलपुरेःस्वसंप्रण

राम २०६

देन्नविमरिहज्यतदासुराश्चतस्थुः॥५४॥संपूज्यमोदवुजेर्महात्मभिःसहस्ररश्मिप्रतिमैस्तदाविलु॥अभि
ष्टुतःसत्पुरतेस्तपोधनैर्यस्तेयोस्थंगाम्निगतोदिवाकरः॥५५॥ ॥इतिश्रीमत्स्येत्रिपुरदाहेतारकाख्यवधः॥
सूतउवाच॥॥तारकाख्येहतेयुद्धेशाग्रंप्रमथान्मयः॥उवाचदानवान्भूयोभूयःसंस्तमयाहतान्॥१॥
गोःसुरेंद्रानामसर्वेविबोधध्वंप्रभाषितं॥तत्कर्तव्यंमयावैवपुष्माभिश्चमहाधनैः॥पुष्यसमेष्यतेकाले
चंद्रचेंद्रानिनास्तना॥यत्रिकंत्रिपुरंसर्वंबाणमेकंनविष्यते॥३॥कुरुध्वंनिर्नयाःकालेकोकिलावासनेनमा॥
सकालःपुष्ययोगःस्यात्पुरस्यचमयाकृतः॥४॥कालेतस्मिन्पुरेयत्संसंजावयतिसंहतिं॥सापकंकारये
त्रूर्लबिलेनैकेषुणासुराः॥५॥यावत्मगोबलेयश्चयावद्वोवैरितःपुरा॥तेनुकृत्वाहयश्चैवपालयध्वमिदंपु
रं॥६॥माहेश्वरंरथंत्येकंस्तवप्राणेननीषणं॥विपुरवीकुर्वताळक्ष्यंयथानोत्सजतेशरं॥७॥ततएवंकृतेस्माभि
स्त्रिपुरस्याभिरक्षणे॥प्रतिक्षिप्यंतिदिवराणन्पुष्ययोगंदिवौकसः॥८॥निशम्यतांमयस्येदंदानवास्त्रिपुराल
या॥मुक्तसिंहरवंकृत्वामयमुत्सर्वमोपमाः॥९॥प्रयत्नेनवयंसर्वेकुमस्तिवसुनाषितं॥तयाकुर्मोयथारुद्रो
मनोस्तातीश्वरेश्वर॥१०॥अद्ययास्यामसंग्रामंतद्वुन्मस्याजिघांसवः॥कथयंतिदितेःपुत्राःकृष्टाभिन्नांतनूरु
हान्॥११॥कल्पंस्थास्यतिवाखस्यत्रिपुरंचसुतंध्रुवं॥अद्यानंतवान्नवितानारायणपदत्रयं॥१२॥वयंनधर्मं

म०पु०
२०९

ड्रास्यामोयस्मिन्योक्ष्यतिनोभवाव॥अदेवतमदैत्यंवालोकंद्रक्ष्यंतिमानवा:॥१३॥इतिशंभुस्तहद्दृष्टास्सेपुरांतेवि
बुधारय:॥प्रदोषेमुदिताभूत्वाचेरुर्मन्मथचारुतां॥१४॥मुक्तामुक्तोदमध्यांतउदयाप्रमहामणि:॥तेषांउत्सा
र्यशिगवाक्षेषुंदोभवतिशांबरे॥१५॥सुरंकुलंचकृतोहंसोयथासरसिदृश्यते॥सिंहोयथाचोपविष्टोवैहर्म्यशिख
रेमहान्॥१६॥विष्णोर्यथाचविस्तीर्णहृदिरत्नवरयसंस्थित:॥तत्वाचगगनेनभसिचंद्रोत्रिनयनोद्भव:॥१७॥भ्रा
जतेभ्राजयल्लोकान्सृजन्स्त्रोरसंबलान्॥उदीतांशात्रुंदितेचंद्रेयासास्ताषुसोपुरेसुरा:॥१८॥चंद्रांशुभिर्दीप्यतेतद
नुदीपैस्सुदीपितै:॥प्रदोषजालितांश्चकुर्गृहानालानमेवच॥१९॥रथ्यासुराजमार्गेषुप्रासादेषुगृहेषुच॥दी
पश्चंपकपुष्पाभामास्तेहिप्रदीपिता:॥२०॥गृहेषुज्ञेषुदीपास्तेस्नेहपूर्णा:प्रदीपिता:॥गृहाणिवस्तुमंसे
षांसर्वरत्नमयानिच॥२१॥ज्वलंतोदीपयन्दीपांश्चंद्रोदयइवग्रहा:॥ध्वैरुशशिभिर्वध्यमानंदनुदितैस्सुदीपि
तै:॥२२॥उपद्रववरवेरवेकूलेपीड्यतेत्रिपुरेतप:॥२३॥तस्मिन्पुरेवैतरुणाप्रदोषेचंद्रादिहासेतरुणा॥प्रदोषे
रत्यर्थिनोवैमनुजा:पुरेषुसहांगनाभिश्चचिरंविमृग्यु:॥२४॥विनोदितायेकुरुमध्वजस्यपंचैषवर्त्तिमकरध्व
जस्य॥तत्राम्बुधास्वरपुंगवेषुसांगोगना:स्वादुसुताबभूवु:॥२५॥कलप्रलापेषुचदानवानांवीणाप्रतावेषु
चमूर्छितेषु॥सत्राप्रतापेषुचदानवानांसचापबाणोमदनोममंथे॥२६॥तमांसिनैशानिहृतानिइत्यज्योत्स्ना

राम०
२०९

निदानेनजगद्दितश्च॥खेरोहिणीतांचप्रियांसमेत्यचंद्रप्रभातिकुरुतेसमीपं॥२६॥स्थित्वैववद्यचित्यतिपा
दमूलेकाचिद्रस्त्रीस्वकपोलमूले॥विशेषितंचारुतरंकरोतितेनाननंस्वंसकमलंकरोति॥२७॥दृष्ट्वावै न
नेमंडलदर्पणस्थंमहाप्रभासेमुखजेतिजेति॥मुक्तास्मतावरांगीरमणेरिताचतेनैवभावेनरतीवममा
प॥२८॥रोमांचितैर्गात्रिवरैर्युवत्योवरतानुरागाद्रमणेनचान्या॥स्वलंकृतायांतिमदाभिभूताक्षिपाय
याघमदिनावसाने॥२९॥प्रेपियतेचातिरसानुविद्धाविमृग्यतेन्याचप्रियंप्रसन्ना॥काचित्प्रियस्यानिवरा
प्रयत्नात्तस्मेसमल्लापेषुचसंप्रसन्न:॥३०॥गात्रीपर्युक्तेहरिचंदनेश्चपंकांकिंक्षीरधारासुरात्तां॥अन्यो न
न्यरूपारुचिराबभूवुर्वर्त्तेमृतस्येवसवर्त्तकुंजा:॥३१॥क्षताधराक्षाद्भुतदोषरक्ताल्लजंतिदैत्यादयिता:सुर
पां क्ता:॥तंत्रिप्रलापात्रिपुरेषुरक्ता:स्त्रीप्रलापेषुपुनर्विरक्ता:॥३२॥कश्चित्प्रहस्तंमधुराभिधानंकामस्यबाणै:
सुकृतंनिधानं॥आपानभूमिषुसुखप्रदेयंदिते:सुतानांसमवापगेयं॥३३॥प्रवृत्ततन्वध्वजशोधयंति
केचित्प्रयातोत्रचसाधयंति॥केचित्प्रयासेप्रतिवाचयंतिसुबुध्यसुबुध्यचरामयंति॥३४॥भूतभन्ततप्रस
वार्थगंध:स्रवेगितोवैत्रिपुरेसुगंध:॥अमुमुरीनूपुरमेखलानांप्रियागृढादयितोपगूढा॥३५॥कान्तित्प
रूढागरुहापिनारीसवर्णबाष्पांकुरपल्लवातां॥नवांबुसिक्ताइवभूमिरासीत्तदाशशांकपादैरुपशोभितेषु॥३६

प्रासादमार्गेषु वरांगनानां माधुर्यभूता भरणा महांतः ॥ स्वनावभूवुर्मदनेषु तुल्याः पातेन भेदं दयिताति
वेलं ॥३७॥ कपोलमाजिघ्रति किं प्रमेदे आरोह मे श्रोणिमिवाङ्गलापि ॥ पीनोन्नताकांचनमेखलाद्वारपास्तु
चंद्रोदयन्नासितासु ॥३८॥ नरेंद्रमार्गेषु च विस्तृतेषु दैत्यांगनायूथगता विभांति ॥ नारायणाचंद्रमसो हि वा
ते घंटाट्टहासेषु सचामरेषु ॥३९॥ पेयासु चान्या मदलोलनेत्रा वानसला पर्यंतेकलसंप्रहासाः ॥ प्रबोचकांची
गुणरुष्टनादा अस्नानमालालनितांगनानां ॥४०॥ पर्यायएधनि चहर्षितानां श्रूयंति वाचः कलधौत
कल्या ॥ वापीषु चान्ये कलहंसशब्दाः कांचिकलापाश्चसहांगहाराः ॥४१॥ प्रेषाम्मुतत्रास कृतस्वभावा
च्छ ईतितास्तामसुरांगनानां ॥ प्रियालपाम न्मथमार्गणानां वित्रांबुराश्चोकृतकेशपाशाः ॥४२॥ संदो
ल्यमानाः स्रग्धतो सुराणां सुचारुवेषा नकेणेरुपेताः ॥ ता रागणे दैत्यरिवसासचंद्रा संदोलना लंबितछि
न्नसूत्रा ॥४३॥ कांचिकलापद्युतिरत्नवर्णा दोला न्यसिश्चित्रितैरेव नांति ॥ चंद्रस्य पार्श्वोपगते वचित्रस
चंद्रकेशोपवने प्रदोषे ॥४४॥ रुतेषु वेतेषु च कोकिलानां शारम्य यंत्रप्रपुरे सुराणां ॥ पक्षीयमाणो मदनश्च
चारदैत्यांगनानां च सुचारुवेषु ॥४५॥ इति तत्र पुरे मरद्विषामपदिष्टप्रश्चिमकौमुदीमुदायीत ॥ रुचिरस्थि
ततरांभविष्णतांवैनवतुरगैः कृतसंक्षयासुराणां ॥४६॥ ज्योत्स्नामहासवमनप्रचुरं विसृज्य चंद्रोद्यकुंदमुकुल

रहारवर्णः ॥ भोगक्षयेधनपतिवनरोविवर्णः छायाव्ययं महदुपेत्य न चाति चंद्रः ॥४७॥ चंद्रप्रभामणिमार
पिताभिभूयनिहस्तसकांचनरथागसमानवंबः ॥ खिलोपाङ्किमुकुटेषु कुरेषसूर्योभातोवरेतमिरियवदंत
रिक्षे ॥४८॥ ॥ इति मत्स्यपुराणे त्रिपुरदाहे ॥ ॥ सूत उवाच ॥ ॥ उदितेषु सहस्रांशौ मेरुमासाकुरे रवौ ॥ नदद्दे
वकुलंकृत्स्नयुगांतइव सागरः ॥१॥ सहस्रनयनो देवस्त्वावच्छक्रः पुरंदरः ॥ सवित्तदः सवरुणस्त्रिपुरं प्रय
यौ हरः ॥ तेनानाविधरूपाश्च प्रमयातिप्रमाथिनः ॥ पृथुः सिंहरवैर्घोरैर्वादित्रनिनदैरपि ॥३॥ ततो वादि
त्रवादित्रैरातपत्रैर्महाध्वजैः ॥ बभूव सबलं दिव्यं वनं प्रचलितं यथा ॥४॥ तदापतंतं संप्रेक्ष्य रौद्रं रुद्रबलं
महत् ॥ संक्षोभोदानवेंद्राणां समुद्रप्रतिमं बभौ ॥५॥ ते पासपट्टीकांछक्तीउघम्युचपरस्वधान् ॥ सार
गाणि च वज्राणि गुरूणि मुशलानि च ॥६॥ प्रगृह्याकोपरक्ताक्षाः सपक्षा इव पर्वताः ॥ निजघ्नुः पर्वतप्र
ख्या घना इव तपात्यये ॥७॥ विद्युन्मालिनमस्ते वै समयादितिनंदनाः ॥ वंदमानाः समासेदुर्देवं देवाः सुरा
रयः ॥८॥ मत्स्ये कृतबुद्धीनां जयावेष्टसुजन्मनां ॥ अचलानां चमूस्त्वासीदेवलो वज्रवासिवा ॥९॥ विग
र्जितइवांभोदश्चांबोदसहैः शरत्विसः ॥ प्रयुक्तायुक्तसकलाः परस्परकृतागसः ॥१०॥ धूमायंतिज्वलंति स्म
आयुधैश्चद्रवर्चसैः ॥ कोपात्कायुक्तलुब्धाकुहूयंते परस्परं ॥११॥ वज्राहताः पतंत्येते बाणैरन्ये विदारिताः ॥

च्छन्नेविदारिताश्चक्रैः पतंति स्म धरातले ॥१२॥ छिन्नस्रग्दाम हाराश्च प्रभ्रष्टांबरभूषणाः ॥ निमिनक्रगणेश्चैव पतंति
प्रमथासुराः ॥१३॥ खड्गानां मुद्गलानां च तोमरप्रासवाजिनां ॥ वज्रशूलासिनाराचानां पट्टिशानां च सर्वशः ॥१४॥ गि
रिशृंगोपरोपणां च प्रेरितानां प्रपातिभिः ॥ स्वजनां दानवानां च सघर्मानां रविलिप्सां ॥१५॥ आयुधानां महानोघ
ःसागरोयं पतत्यसौ ॥ प्रक्षिणयोगैस्तैस्तत्र सुरासुरकरेरितैः ॥१६॥ आयुधैस्तु नक्राणां क्रियते संक्षयो महा
न् ॥ क्षुद्राणां गजयोर्युद्धे यथा भवति संक्षयः ॥१७॥ देवासुरगणेस्तद्वन्निमिनक्रक्षयो यथा ॥ विद्युन्माली
च वेगेन विद्युन्माली चांबुदः ॥१८॥ विद्युन्माली घनोन्मादो नंदीश्वरमभिद्रवत् ॥ ततो नामाधिवदनस्तदनंत
दतां वरः ॥१९॥ उवाच पुरुषी लानां दानवा बुध्निनिः स्वनः ॥ युद्धकांक्षी च बलवान् कुपितः मर्कटाननः ॥ आयुदि
त्वमधुना जीवन्मुच्यसे नंदिकेश्वर ॥ न विद्युन्मालिना नंदनवाल्पि युद्धदानवाः ॥२१॥ तमेवं वादिनां दैत्यं नं
दीशः स्तपतां वरः ॥ उवाच प्रहसंस्तत्र वाचि लंकारवद्वचः ॥२२॥ दानवं कर्मकामानां नैषोवसरइत्यु
त ॥ शक्तोहं तु किमात्मानं जातिदोषाच्छ्लहसि ॥२३॥ यदितावन्मया पूर्वं हतोसि पुरुषो यथा ॥ इदानीं वा
कथं नामहंस्य कुतु दूषणं ॥२४॥ पारं तरये दोर्भ्यां पातये द्यो दिवाकरं ॥ सोपि मां चक्षुषा नैव चक्षुर्भामिति
वीक्षितुं ॥२५॥ इत्येवं मंत्रयंस्तं न हंति हन्निनंबले ॥ बिनेदे केपुणा दैत्यं करेणेव इवांबुदः ॥२६॥ विसिप्तः

समरस्तस्य पपौ रुधिरमुत्तमं ॥ सूर्यस्ताव वृश्च भावेन यथा एणं वजलेतथा ॥२७॥ सैतेन सुदृढारेण संप्रदाय
तिरोषितः ॥ हस्तेन वृक्षमुत्पाट्य चिक्षेप गजराडिव ॥२८॥ कोनोसिपन्नः सतरुः शीस पुष्पो मदारवः ॥ वि
त्मालिशरैश्छिन्नः पपात पतगेशवत् ॥२९॥ वृक्षमालो वृतं छिन्नं दानवनवरेषुभिः ॥ रोषमहारवस्तीव्र
नंदीश्वरस्तु ग्रहः ॥३०॥ सोप्यस्य करमाराव वरविमर्द्धक रेप्रभुं ॥ दुराव हं तं मुकुर महिषगजराडिव ॥३१॥
तमापततं वेगेन वेगवान्प्रसभं बलात् ॥ विद्युन्माली शरस्तैः पूरमायोसनंदिने ॥३२॥ स्त्रारकंटकितैर्गा
त्रैः शैलादित्योतिरिच्यते ॥ अरेगत्य पुरंतस्य महतः प्रजयौ जवान् ॥३३॥ विलंबिताश्वो विशिरो भ्रमित
श्वरणोरथः ॥ पपात स तु निशापे नमोदित्योर्करथो यथा ॥३४॥ अंतरान्निगतिश्चैवमापयासदितेः सुतः ॥ श्री
जघान तदा शक्त्याशैलादिसमवस्थितं ॥३५॥ तामेव तु समतिक्रम्य शक्तिं शोणितभूषितां ॥ विद्युन्मालिस
मुद्दिश्य चिक्षेप प्रमथाग्रणी ॥३६॥ तया भिन्नस्ततस्तु क्राणो विभिन्नहृदयस्तु सः ॥ विद्युन्माली गतो भूमौ वज्राह
तइवाचलः ॥३७॥ विद्युन्मालिनि निहते सिद्धचारणकिंनराः ॥ साधुसाध्विति चोत्क्राते पूजयंत उमापतिं ॥३८॥
नंदिनादितो दैत्यैविद्युन्मालो द्रुतं मयः ॥ ददाह प्रमथानीकं वनमग्निरिवोद्धतः ॥३९॥ शूलाति दारितोरस्का गद ८
चूर्णितमस्तकाः ॥ इषुभिर्गाढविद्धाश्च पतंति प्रमथा वे ॥४०॥ अथ वज्रधरोपमो घपः सचनंदीशापडान

वोग्रहः॥ मयमसुरवीरसंत्रतंमत्राशस्त्रवरैर्हनारयः॥४१॥ नागंतु नागाधिपतेः सतामयोविदार्येषुव
रैर्न्नतुल्यं॥ यमंचवित्ताधिपतिंचमित्वा रराजसत्रांबुदवन्नदानं॥४२॥ ततः शरैर्मथगणेश्वदानवाद्दाह
ताश्चोत्तमवेगविक्रमाः॥ महेशंनुविद्धास्त्रिपुरंप्रवेशितायथात्रिकश्चक्रधरेण संयुगे॥४३॥ ततस्तु शंखा
नकभेरिमर्दलाः ससिंहनादादनुपुत्रभृंगदाः॥ कपर्दिसैन्यप्रबलुः समंततोविपाल्यबाणाशनिवस
संनिभाः॥४४॥ अदैत्यपुराणवेपुष्पयोगोबभूवह॥ बभूवचापिसंयुक्तंपूर्योयेनपुरीत्रयं॥४५॥ ततो
बाणंत्रिधादेवस्त्रिदैवतमयंहरः॥ मुमोचत्रिपुरेतूर्णंत्रिनेत्रस्त्रिपुराधिपाः॥४६॥ तेनमुक्तेनबाणेनबा
णपुष्पसमप्रभं॥ आकाशंसमिंकांशं कृतंसूर्येणरंजितं॥४७॥ मुक्त्वात्रिदैवतमयंपुरित्रिदशाः शरं॥ त्र
धिग्धिग्मामितिचक्रंदइष्टकष्टमितिब्रुवन्॥४८॥ वैद्युर्यदेवजेहृष्टाशैलादिर्गजिवत्तगतः॥ किंकिमेन्विति
पप्रच्छुः शूलपाणिंमहेश्वरं॥४९॥ ततः शशांकतिलकः कपर्दीपरमार्त्तवत॥ उवाचवेदिनंव्यक्तंसमय
विनंक्ष्यतिः॥५०॥ अपनेदीश्वरस्तस्मिन्नो मारुतवद्बली॥ शरस्त्रिपुरमायेतित्रिपुरंप्रविवेशसः॥५१
ससमप्रेक्ष्यगणपः प्राहकांचनसन्निभः॥ विनाशास्त्रिपुरस्यास्यप्राप्तोमयः सुदारुणः॥५२॥ अनेनैवशु राम.
हेयालामपक्रवीम्यहं॥ श्रुत्वातन्नदिवचनंदमक्कोमहेश्वरे॥५३॥ तेनैवशरहस्तुरव्येनत्रिपुरादपसर्पि २१२

तः॥ सोपिपुपत्रपुदवडिलातुनगरत्रयं॥५४॥ त्रिधाऽवकृतात्राश्चसोमोनारायणास्तथा॥ शरतेजः
दूरितानिपराणिद्विजपुंगवाः॥५५॥ दुःपुत्रदोहत्यंतेकुलान्यूर्ध्वंयिपातया॥ मेरुकैलाशकल्पानिमंदरा
ग्रनिभानिच॥५६॥ सकपाटगवाक्षाणिवलभीशोभनानिच॥ सप्रसादानिरम्याणिकूटागारोत्कटानि
च॥५७॥ सजलानिसमक्षाणिसविलोकतकानिच॥ बहुध्वजपताकानिस्वस्वरूप्यमयानिच॥५८॥ गृह
णितस्मिन्त्रिपुरेदानवानामपन्नवत्॥ दह्यंतेदहनाग्नानिददाहैवंसहस्रशः॥५९॥ प्रासादाग्रेषुरम्येषु
वनेषूपवनेषुच॥ वातायतस्थिताः वासोघ्याकाशेषुतलेषुच॥६०॥ रमणेरूपगूढाश्चरमंत्योरमणैःसह॥
दह्यंतेदानवेंद्राणामग्निनादयिताः स्त्रियः॥६१॥ काचित्प्रियंपरिघज्यघ्नशास्तागंतुमत्यतः॥ पुरःप्रि
यस्यपंचत्वंगताविवदमेक्षयं॥६२॥ उपसर्पततरुणातेविसर्पितकृताशने॥ उवाचवातपत्राक्षीसासाक्षीच
कृतांजलिः॥६३॥ हव्यवाहनमायाहिंपरस्पररतापुनः॥ धर्मसाक्षित्रिलोकस्यनमांद्रष्टुमिहार्हसि॥६४
शकापुत्रमुपादायबालकंदानवांगना॥ निपतत्स्वर्णविकत्ते सिंजमानविभूषणा॥६५॥ तातापुत्रेतिमाते
तिमातुलेतिचविज्वलन॥ चक्रंदुस्त्रिपुरेनार्यः पावकज्वलवेपिताः॥६६॥ यथादहतिशीतांशुस्ताबुजंजलजा
करं॥ तथास्त्रीवक्त्रपद्मानिददाहत्रिपुरेनलः॥६७॥ तुषारदाहः कमलाकराणांयथादहत्यंबुजकामिनी

त्रातं॥ तथैवसोग्निस्त्रिपुरांगनानां ददाह वक्त्रेक्षणपंकजानि॥६९॥ आराग्नितापात्समभिद्रुतानां तत्रांगनानाम्मतिको
मलानां॥ बभूव कांचीगुणनूपुराणामाक्रंदितानां च यथा यथा यिमीश्रः॥६८॥ दग्धार्द्धचंद्राणि सतोरणानि विद्रेश्री
द्रुम्याणि सवेदिकानि॥ वनानि दग्धानि गृहाणि तत्र पतंति रक्षार्थमिवाग्निवेगे॥७०॥ गृहैः पतद्भिर्ज्वलितैर्नाम जा
टेरामाः समुद्रे सलिलं प्रतप्तं॥ कुपुत्रदोषैः प्रपतद्भिरुर्व्यां यथा कुलं याति धतन्नितस्य॥७१॥ गृहप्रतापैः क
थितं समंतात्तदासुरेंद्रस्य च तोयमुद्दीप्तवेगे॥ वित्रासयामास समीनक्रांस्तिमिंगिलांस्तत्क्वथितास्तथान्यान्
७२॥ सगोपुरो मंदरपादकल्पः प्राकारवर्यस्त्रिपुरे च गोवा॥ तैरिव सा वर्षेन वानैः पापात तस्यां च जनयन्समुद्रे॥
७३॥ सहस्रशृंगैर्भवनैर्यदासीत्सहस्रशृंगः सइवाचलेंद्रः॥ नामो वशो यत्रिपुरं प्रजज्ञे कृतान्तनाहारबलि
प्रयुक्तं॥७३॥ प्रदह्यमानेन पुरेण तेन जगत्सपातालदिवं प्रतप्तं॥ दुःखं महत्प्राप्य जलावमग्नं यस्मिन्महात्मा
धनरो मयस्य॥७५॥ तदेवेशो वचः श्रुत्वा इंद्रो वज्रधरस्तथा॥ इच्छा प्रतजुहं चापि मयं च दितिनंदनं॥७६॥ अमे
ध्य इति हंतव्य येच समाहृतं॥ जनिष्यते मयगृहं नित्यमेव यथानलः॥७७॥ यस्य यस्य तु देवस्य जविष्यति परा
वधः॥ रक्ष्यंति त्रिपुरं रौद्रं तत्रैकं नाशिकाजनाः॥७८॥ तदेतद्याप्यगृहमय स्यामपवर्जितं॥ ऋषय ऊचुः॥
भगवन्समयो येन गृहे णपलायितः॥ तस्य नो गतिमाख्याहि मयस्य तमसोऽर्णवात्॥७९॥॥ सूत उवाच॥॥

दग्धपते दग्धपते यत्र ध्रुवस्तत्र मया स्ततः॥ देवद्विषस्समय स्थापितन्मयः खिन्नमानसः॥८०॥ तत्र स तो स्य लो
केस्मिंस्त्राणार्थे वैकरिष्यति॥ तत्रास्य देवताः संति अपनोर्स्मासुरोत्तमाः॥८१॥ तत्र शक्रस्ततो हंतु यस्य
त्रिपुरमुत्तमं॥ एवं स दृष्ट्वा गृहं तत्र मयं चैव गृहार्थिनं॥८२॥ विरराम सहस्राक्षः पूजयामास चेश्वरं॥ तं पूज
मानं त्रिदशैः समीक्ष्य गणैर्गणेशाधिपतिं तु मुख्यं॥ वर्षाद्दिवस्तु जहसुश्च देवा जगुश्च नित्तुः सुविषक्त हस्ताः॥
८३॥ पितामहश्चावहृतं मोमहेशं प्रगृह्य चापं प्रविमृज्य भूतान्॥ रथात्स्वसंपत्य हरे षु दग्धं क्षिप्तं पुरं तन्मक
रालये च॥८४॥ यइमं रुद्रविजयं पठते विजयावहं॥ विजयं तस्य कृत्येषु ददाति वृषभध्वजः॥८५॥ पि
तृणां चापि श्राद्धेषु य इदं श्रावयिष्यति॥ येनांततरं न वेत्स्यति सर्वयत्नसुरेश्वराः॥८६॥ इदं स्वस्त्ययनं पुण्य
मिदं पुण्यतमं महत्॥ इदं श्रुत्वा पवित्ता च यांति रुद्रसलोकतां॥८७॥ ॥इति श्रीमत्स्यपुराणे त्रिपुरवधः
समाप्तः॥ सूत उवाच॥॥ तस्य चाहं प्रवक्ष्यामि प्रभावं विस्तारेण तु॥ ऋषय ऊचुः॥॥ कथं गच्छत्समावास्यां
मासि मासि दिवं नृपः॥ ऐडः पुरूरवाः सूत तर्पयेत कथं पितॄन्॥१॥ एतदिच्छामहे श्रोतुं प्रभावं तस्य धीमतः॥
सूत उवाच॥॥ एतदेव तु पृच्छ पुनः सम धुस्सूदनं॥ सूर्यपुत्रायनो वा च यथा तन्मे निबोधत॥२॥॥ मत्स्य उ
वाच॥॥ तस्य वोहं प्रवक्ष्यामि प्रभावं विस्तरेण तु॥ ऐडस्य दिवि संयोगं सोमेन सह धीमता॥३॥ सोमाच्चैवामृत

प्राप्तिः पितॄणां तर्पणं तथा ॥ सोम्या बर्हिषदः काव्या अग्निष्वात्तास्तथैव च ॥४॥ यदा तु चंद्रः सूर्यश्च नक्षत्राणां
समागतौ ॥ अमावास्यां निवसत एकस्मिन्नथ मंडले ॥५॥ तदा स गच्छति द्रष्टुं दिवाकरनिशाकरौ ॥ अमावा
स्यामभावास्यां मातामहपितामहौ ॥६॥ अभिवाद्य तु तौ तत्र कालापेक्षस्तिष्ठति ॥ प्रचस्कंद ततः सो
ममर्चयित्वा परिश्रमं ॥७॥ ऐडः पुरूरवा विद्वान्मासि श्राद्धचिकीर्षया ॥ ततः स दिवि सोमं वै ह्युपास्ते च पितॄ
न्पि ॥८॥ द्विलवं कुहुमात्रं च ता उभौ तु विनिधाय सः ॥ सिनीवालीप्रमाणेन कुहूमात्रमुपासते ॥९॥ कु
हूमात्रतवो देशं ज्ञात्वा कुहूमुपासते ॥ तमुपास्य सुदा सोऽयं सामो लक्षः प्रतीक्षते ॥१०॥ सुधामृतं तु
सोमाद्वै वसंतमासतत्पये ॥ दशाभिः पंचभिश्चैव सुधामृतपरिस्रवैः ॥११॥ कृष्णपक्षभुजां प्रीतिर्दृश्य
ते परमांशुभिः ॥ सद्यो निःक्षरता नि सोमेन मधुना तु सः ॥१२॥ विप्रपात्रेषु दत्तेन पित्र्येण विधिना तु वै ॥ सु
धामृतेन सौम्येन तर्पयामास वै पितॄन् ॥१३॥ सौम्या बर्हिषदः काव्या अग्निष्वात्तास्तथैव च ॥ ऋतुरग्निः
स्मृतो विप्रैः स तु संवत्सरः स्मृतः ॥१४॥ जज्ञिरे ऋतवस्तस्मात् ऋतुभ्यो ह्यार्तवोऽभवन् ॥ पितरो ह्यार्तवा मासा वै
विज्ञेया ऋतुसूनवः ॥१५॥ पितामहास्तु ऋतवो मासा वैत्य ह्यसूनवः ॥ प्रपितामहाः स्मृता देवाः पंचाब्दा ब्र
ह्मणः सुताः ॥१६॥ सौम्या बर्हिषदश्चैव अग्निष्वात्ताश्च ते त्रिधा ॥ गृहस्था ये ह यज्वानो हविर्यज्ञार्तवस्तु ये ॥१७॥

काव्या तं

स्मृता बर्हिषदस्ते वै पुराणे निश्चयं गताः ॥ गृहमेधिनस्तु यज्वानं ह्यग्निष्वात्तार्तवः स्मृताः ॥१८॥ अष्टकाप
तयः कामाः पंचाब्दास्ते निबोधत ॥ तेषु संवत्सरो ह्यग्निः सूर्यस्तु परिवत्सरः ॥१९॥ सोमस्त्वीद्वत्सरश्चैव
वायुश्चैवानुवत्सरः ॥ रुद्रस्तु वत्सरं षां पंचाब्दा ये युगात्मगाः ॥२०॥ कालेनाप्यायितिश्चैव वर्चंद्रमाः स्रवतेसु
धां ॥ एते स्मृता देवा रुद्राः सोमपाश्चोष्मपाश्च ये ॥२१॥ तांस्तेन तर्पयामास यावदासीत् पुरूरवाः ॥ य
स्मात्प्रस्रवते सोमो मासि मासि विशेषतः ॥२२॥ ततः सुधामृतं तद्वै पितॄणां सोमपायिनां ॥ एतत्तदमृतं सो
मः सुमधु चैव ह ॥२३॥ ततः पीतक्षयं सोमं सूर्योऽसावेकरश्मिना ॥ आप्याययते सुषुम्नेन सोमं तं सोमपा
यिनां ॥२४॥ निःशेषं वै कला पूर्वं युगपद्यापुरा ॥ सुषुम्णाप्यायमानस्य भागं भागमहः क्रमात् ॥२५॥
कलाः क्षीयंति कृष्णास्ताः शुक्लाश्चाप्याययंति च ॥ एवं सूर्यवीर्येण चंद्रस्याप्यायिता तनुः ॥२६॥ पौ
र्णमास्यां स दृश्येत शुक्लः संपूर्णमंडलः ॥ एवमाप्यायितः सोमः शुक्लपक्षे अहः क्रमात् ॥२७॥ देवैः पीतक्षयं
सोमं पुराप्याययते रविः ॥ पीतं चंद्रशाहे तु रश्मिनैकेन भास्करः ॥२८॥ आप्याययेत् सुषुम्णेन भागं भाग महः
क्रमात् ॥ सुषुम्णाप्याप्यमानस्य शुक्ला वर्द्धंति ताः कलाः ॥२९॥ तस्मात् ह्रसंति वै कृष्णाः शुक्लाश्चाप्या
ययंति च ॥ एवमाप्यातेसोमः क्षीयते च पुनः पुनः ॥३०॥ समृद्धे देवसोमस्य पक्षयोः शुक्लकृष्णयोः ॥

रस्ते धि ध्येता पं तं

एतेषपितृमान्सोमःस्मृतस्त्रिवृत्सरात्मकः॥३१॥कौततःपंचदशैःसार्द्धंसुधामृतपरिस्रवैः॥अतःपरंप्रव
क्ष्यामिपर्वणामन्वयश्रयः॥३२॥यथाग्रसनद्विजिःपर्वाणिश्राद्धतानिक्षुवेणुनां॥तथामासपर्वाणिशुक्लकृ
ष्णास्तुवैस्मृताः॥३३॥पौर्णमासाद्योनेदोग्रन्वयःपन्वयस्तुयाः॥अर्द्धमासस्यपर्वाणिद्वितीयाप्रभृती
निच॥३४॥अग्न्याधानक्रियास्तस्मात्क्रियंतेपर्वसंधिषु॥तस्मात्तुपर्वणोद्यादौप्रतिपद्यादिसंधिषु॥
३५॥सायाह्नेअनुमत्यायाद्वौलवौकालउच्यते॥लवौद्वावेवराकायाःकालोज्ञेयोपराह्णिकः॥३६॥प्र
कृतिःकृष्णपक्षस्यकालेभीतेपराह्णिकं॥सायाह्नेप्रतिपन्नेचसकालःपौर्णमासिकः॥३७॥व्यतीपातस्थि
तेसूर्येलेखाऊर्द्ध्वंयुगांतरे॥युगांतरोदितेचैवचंद्रलेखोपरिस्थिते॥३८॥पूर्णमासाव्यतीपातेयदापश्य
रस्परं॥तौतुव्यतीपातद्यावद्यस्मिन्कालेव्यतिस्थितौ॥३९॥तत्कालंसूर्यस्तुदृश्यपदृष्ट्वासंख्यातुमर्हसि॥
सचैवयतक्रियाकालःस्पृष्टःकालोभिधीयते॥४०॥पूर्णेन्दुःपूर्णपक्षेतुरात्रिसंधिषुपूर्णिमा॥तस्मा
दाप्यायतेनक्तंपौर्णमास्यांनिशाकरः॥४१॥यदान्यान्यव्यतीपातेपूर्णमांप्रेक्ष्यतेदिवा॥चंद्रादित्यावपराह्णे
तुपूर्णत्वात्पूर्णिमास्मृता॥४२॥यस्मात्तमनुमन्यंतेपितरोदैवतैःसह॥तस्मादनुमतिर्नामपूर्णिमाप्रथमा
स्मृता॥४३॥अत्यर्थंराजतेयस्मात्पौर्णमास्यांनिशाकरः॥रंजनाच्चैवचंद्रस्याराकेतिकवयोविदुः॥४४॥

अमावसेताम्रक्षेतुयदाचंद्रदिवाकरौ॥एतकांपंचदशीरात्रिरमावास्याततःस्मृता॥४५॥उद्विग्नतामामावास्यांय
दादर्शसमागतौ॥अन्योन्यंचंद्रसूर्यौचदर्शनाद्दर्शउच्यते॥४६॥द्वौद्वौलवावमावास्यांसकालःपर्वसंधि
षु॥व्यक्षरःकुहूमात्रश्चपर्वकालस्तदास्मृतः॥४७॥नष्टचंद्रात्वमावास्यामध्याह्नप्रभृतीदिवा॥सार्द्धंतुरात्र्यच
सूर्यप्राप्तेतुचंद्रमाः॥४८॥सूर्येणसहसोऽत्यच्छनृतप्रातस्तनात्तुवै॥समागम्यलवौद्वौतुमध्याह्नान्निपतेद्र
विः॥४९॥प्रतिपच्छुक्लपक्षस्यचंद्रमाःसूर्यमंडलात्॥निर्मुच्यमानयामध्येतयोर्मंडलयोस्तुवै॥५०॥प्राक्त
दाहुतकालेदर्शःस्युरुवषट्कृताः॥एतदृतुमुखंज्ञेयंअमावास्यस्यपर्वणः॥५१॥दिवापर्वत्वमावास्या
क्षीणेंदावचलेतुवै॥तस्माद्दिवात्वमावास्यागृह्यतेयोदिवाकरः॥५२॥कुहूरितिकोकिलेनोक्तंयस्मात्काल
समाप्यते॥ततःकालस्मितात्येषाअमावास्याकुहूःस्मृता॥५३॥सिनीवालीप्रमाणात्तुक्षीणशेषकनि
शाकरः॥अमावास्यांविशत्यर्कंसिनीवालीततःस्मृता॥५४॥अनुमतिश्चराकाचसिनीवालीकुहूस्तथा॥
एतासांद्विलवःकालःकुहूमात्राकुहूःस्मृता॥५५॥इत्येषपर्वसंधीनांकालोवैद्विलवःस्मृतः॥पर्वणांप
र्वकालस्तुसत्तुल्योवैवषट्क्रियाः॥५६॥चंद्रसूर्यव्यतीपातेसमेवैपूर्णिमेउभे॥प्रतिपत्प्रतिपन्नस्तुप
र्वकालोद्विमात्रिकः॥५७॥कालःकुहूसिनीवाल्योःसमुद्रोद्विलवःस्मृतः॥अर्कनिर्मंडलेसोमेपर्वका

म०पु०
२१६

लः कलासमः॥५८॥यस्मादाप्यायते सोमः पंचदश्यां तु पूर्णिमा॥दशभिः पंचभिश्चैव कलाभिर्दिवि संक्रमा
त्॥५९॥तस्मात्संचदशो सोमे कला वै नास्ति षोडशी॥तस्मात्सोमस्य वै प्रोक्तः पंचदश्याम पांक्षयः॥६०॥इत्ये
ते पितरो देवाः सोमपाः सोमवर्द्धनाः॥आर्त्तवाः पितरो यान्ति देवस्तान्भावयंति ह॥६१॥अतः परं प्रवक्ष्यामि
पितॄन्श्राद्धभुजस्तु वै॥तेषां गतिं च सत्वं च प्राप्तिं श्राद्धस्य चैव हि॥६२॥न मृतानां गतिः शक्या ज्ञातुं वा पुनरागतिः।
तपसापि प्रसिद्धेन किं पुनर्मांसचक्षुषा॥६३॥अनु देवाः पितॄनत्र ये ते पितरो लौकिकाः स्मृताः॥तेषां ते धर्मसर्या
दास्मृता सा पो द्युगा द्विजैः॥६४॥यदिवाश्रमधर्माणां प्रस्थाने तु व्यवस्थिताः॥अन्ते चाप्यनुप्रसीदंतः श्राद्धयुक्ते
षु कर्मसु॥६५॥ब्रह्मचर्येण तपसा यज्ञेन प्रजया च वै॥श्राद्धेन विद्यया चैव अन्नदानेन सप्तधा॥६६॥कर्मस्वे
तेषु ये शक्ता वर्त्तत्या देहपातनात्॥देवैस्ते पितृभिः सार्द्धमूष्मपैः सोमपैस्तथा॥६७॥स्वर्गता दिवि मोदंते पितृव
न्तानुपासते॥प्रजावतां प्रसिद्धेषा उक्ता श्राद्धकृतां च वै॥६८॥तेषां निवापदत्तानि तत्कुलीनैस्तु बांधवैः॥मा
सश्राद्धं हि भुंजानास्तृप्यं ते सोमलौकिकाः॥६९॥एते मनुष्याः पितरो मासश्राद्धभुजस्तु वै॥तेभ्योपरे ये च चा
न्ये संकीर्णधर्मयोनिषु॥७०॥भ्रष्टाश्चाश्रमधर्मेषु स्वधास्वाहाविवर्ज्जिताः॥भिन्ने देहे दुरापन्नाः प्रेतभू
ता यमक्षये॥७१॥स्वकर्माण्यनुशोचंति यातनास्थानमागताः॥दीर्घाश्चैवातिशुष्काश्च स्मश्रुलाश्च विव

राम०
२१६

सनाः॥७२॥क्षुत्पिपासाभिभूतास्ते विद्रवंति ततस्ततः॥सरित्सरस्तडाकानि पुष्करिण्यश्च सर्वशः॥७३॥परान्नाम
भिकांक्षंतः काल्यमाना इतस्ततः॥स्थानेषु याच्यमानांस्तु यातनास्थेषु चैव ह॥७४॥शाल्मल्यां वैतरण्यां च कुम्भी
पाके करंभवालुके॥असिपत्रवने चैव पात्यमानाः स्वकर्मभिः॥७५॥तत्र स्थानांतु तेषां वै दुःखितानामशायिनां॥ते
षां लोकांतरस्थानां बांधवैर्नामगोत्रतः॥७६॥भूमावसव्यं दर्भेषु दत्ताः पिंडास्त्रयस्तु वै॥प्राप्तास्तु तर्पयंते वै प्रेतस्था
नेष्वधिष्ठितान्॥७७॥अप्राप्ता यातनास्थानं प्रभ्रष्टा ये च पंचधा॥पश्चाद्ये स्थावरान्ते वै भूतानीकेऽशकर्मभिः।
७८॥नानारूपासु जायंते तिर्यग्योनासु मूर्तिषु॥यदाहाराभवंत्येतासु तास्विह योनिषु॥७९॥तस्मिन्तस्मिन्
तदाहाराञ्छ्राद्धदत्तं तु प्रीणयेत्॥काले न्यायागतं पात्रे विधिना प्रतिपादितं॥८०॥प्राप्नोत्यन्नं सदा दत्तं जंतुर्यत्रा
वतिष्ठति॥यथा गोषु प्रनष्टासु वत्सो विंदति मातरं॥८१॥तद्वच्छ्राद्धेषु दृष्टांतं मंत्रः प्रापयते तु सः॥एवं ह्यविकलं
श्राद्धमन्नं मनुरब्रवीत्॥८२॥सनत्कुमारः प्रोवाच पश्यन्दिव्येन चक्षुषा॥गतागतज्ञः प्रेतानां प्राप्तिं श्राद्धस्य
चैव हि॥८३॥कृष्णपक्षस्त्वहस्तेषां शुक्लः स्वप्नाय शर्वरी॥इत्येते पितरो देवा देवाश्च पितरश्च वै॥८४॥अ
न्योन्यपितरो ह्येते मनुष्याः पितरश्च ये॥पिता पितामहश्चैव तथैव प्रपितामहाः॥८५॥इत्येष विषयः प्रोक्तः
पितॄणां सोमपायिनां॥एतत्पितृमहत्वं हि पुराणे निश्चयं गतं॥८६॥इत्येष सोमसूर्याभ्यामैडस्य समासतः।

स्वधाभिः स्वधया चैव पितृणां चैव तर्पणे ॥८७॥ पर्वणां चैव यः कालो यातनास्थानमेव च ॥ समासात्कीर्तितस्तुभ्यं
सर्ग एष सनातनः ॥८८॥ वैरूप्येयेन सर्वस्मिन्कथितं त्वेकदेशिकं ॥ अशक्यं परिसंख्यातुं श्रद्धेयं भूतिमिच्छता ॥८
९॥ स्वायंभुवस्य एष सर्गो मयेरितः ॥ विस्तरेणानुपूर्व्या च भूयः प्रसंख्यामि वः ॥९०॥ इति श्रीमत्स्यपुराणे
श्राद्धकीर्तनं ॥ ॥ ऋषय ऊचुः ॥ ॥ चतुर्युगानि यानि स्युः पूर्वे स्वायंभुवेंतरे ॥ तेषां निसर्गसंख्यां च श्रोतुमिच्छा
मि विस्तरात् ॥१॥ ॥ सूत उवाच ॥ ॥ पृथिवीद्युप्रसंगेन न मया समुदाहृतं ॥ तेषां चतुर्युगं त्वेतत्तद्वक्ष्यामि निबो
धत ॥२॥ प्रसंख्यायेह संख्यादि विस्तराच्चैव कृत्स्नशः ॥ लौकिकेन प्रमाणेन निष्पाद्य दंडमानुषं ॥३॥ तेनापी
ह प्रसंख्याय वा वक्ष्यामि चतुर्युगं ॥ निमेषतुल्यकालानि मात्रा लघ्वक्षराणि च ॥४॥ काष्ठा निमेषा दश पंच चै
व त्रिंशच्च काष्ठा गणयेत्कलां तु ॥ त्रिंशत्कलाश्चैव भवेन्मुहूर्तस्तैस्त्रिंशता रात्र्यहनी समेते ॥५॥ अहोरात्रं विच
जते सूर्यो मानुषलौकिके ॥ रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणामहः ॥६॥ पित्र्ये रात्र्यहनी मासः प्रविभा
गस्तयोः पुनः ॥ कृष्णपक्षस्त्वहस्तेषां शुक्लः स्वप्नाय शर्वरी ॥७॥ त्रिंशद्ये मानुषा मासाः पित्र्यो मासः स उच्यते ॥
शतानि त्रीणि मासानां षष्ट्या वात्मकानु ॥८॥ पित्र्यः संवत्सरो ह्येष मानुषेण विभाव्यते ॥ मानुषेणैव मासेन व
र्षाणि यच्छतं भवेत् ॥९॥ पितृणां तानि वर्षाणि संख्यातानि तु त्रीणि वै ॥ दश चैवाधिका मासाः पितृसंख्येह कीर्ति

ता ॥१०॥ लौकिकेन प्रमाणेन अब्दो यो मानुषः स्मृतः ॥ त्रीणि वर्षशतान्येवं षष्टिवर्षास्तथैव च ॥११॥ एतद्दिव्य
महोरात्रमिति येषा वैदिकी श्रुतिः ॥ दिव्ये रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः ॥१२॥ अहस्तु उत्तरं तेषां रात्रिय
द्दक्षिणायनं ॥ एते रात्र्यहनी दिव्ये प्रसंख्याते तयोः पुनः ॥१३॥ त्रिंशद्यानि तु वर्षाणि दिव्यो मासस्तु संस्मृतः ॥
मानुषाणां शतं यस्तु दिव्या मासास्त्रयस्तु ते ॥१४॥ तथैव चाह्नः संख्यातो दिव्य एष विधिः स्मृतः ॥ त्रीणि वर्ष
शतान्येवं षष्टिवर्षाणि यैव च ॥१५॥ दिव्यः संवत्सरो ह्येष मानुषेण प्रकीर्तितः ॥ त्रीणि वर्षसहस्राणि मानुषेण प्र
माणतः ॥१६॥ त्रिंशदन्यानि वर्षाणि स्मृतः सप्तर्षिवत्सरः ॥ नवत्यानि सहस्राणि वर्षाणि मानुषाणि तु ॥१७॥ व
र्षाणि नवतिश्चैव संवत्सरस्य स स्मृतः ॥ षट्त्रिंशच्च सहस्राणि वर्षाणां मानुषाणि तु ॥१८॥ वर्षाणां तच्छतं ज्ञे
यं दिव्यो विधिः परिस्मृतः ॥ त्रीणि वर्षसहस्राणि वर्षाणां मानुषाणि तु ॥१९॥ षष्टिवर्षसहस्राणि संख्यातानि
तु संख्यया ॥ दिव्यं वर्षसहस्रं तु प्राहुः संख्याविदो जनाः ॥२०॥ इत्येतदृषिभिर्गीतं दिव्यया संख्यया द्विजाः ॥ दि
व्येनैव प्रमाणेन युगसंख्या प्रकल्पिता ॥२१॥ चत्वारि भारते वर्षे युगानि ऋषयो ब्रुवन् ॥ कृतं त्रेता द्वापरं च कलि
श्चैव चतुर्युगं ॥२२॥ पूर्वं कृतयुगं नाम ततस्त्रेता विधीयते ॥ द्वापरं च कलिश्चैव युगानि परिकल्पयेत् ॥२३
चत्वार्याहुः सहस्राणि वर्षाणां तत्कृतं युगं ॥ तस्य तावच्छती संध्या संध्यांशश्च तथाविधः ॥२४॥ इतरेषु ससं

म०पु०
२१७

ध्यांसेषु च त्रिषु॥ एकापाये प्रवर्तंते सहस्राणि शतानि च॥२५॥ त्रेता त्रीणि सहस्राणि युगसंख्याविदो विदुः॥ त
स्यापि त्रिशती संध्या संध्यांशश्च समः स्मृतः॥२६॥ द्वे सहस्रे द्वापरं च संध्यांशाश्च चतुःशतैः॥ सहस्रमेकं वर्षाणां दि
व्यं चैव प्रकीर्तितं॥२७॥ द्विशते च तथा संध्ये संध्यांशे च मनीषिभिः॥ एषा द्वादशसाहस्री युगसंख्या प्रकीर्तिता
२८॥ कृतं त्रेता द्वापरं च कलिश्चेति चतुष्टयं॥ तत्र संवत्सराः सृष्टा मानुषास्तान्निबोधत॥२९॥ चत्वारिंशत्तथा
त्रीणि कृतयुगम प्रोच्यते॥ विंशतिश्च सहस्राणि कालोत्येष चतुर्युगः॥३०॥ इत्यक्केनेह वक्ष्यामि युगानि
तु निबोधत॥ नियुतानि दश द्वे च पंच चैवात्र संख्यया॥३१॥ अष्टाविंशत्सहस्राणि कृतं युगमिहोच्यते॥ प्रयुतं तु
तथा पूर्णं द्वे चान्ये नियुते पुनः॥३२॥ षड्विंशच्च सहस्राणि काल एष चतुर्युगः॥ इत्यक्केनेह वक्ष्यामि युगा
नि तु निबोधत॥३३॥ नियुतानि दश द्वे च संख्यातानीव संख्यया॥ त्रेतायुगस्य संख्येषा मानुषेण प्रकीर्ति
ता॥३४॥ अष्टौ शतसहस्राणि वर्षाणां मानुषाणि च॥ चतुःषष्टिसहस्राणि वर्षाणां द्वापरं युगं॥३५॥ चत्वारि
नियुतानि स्युर्वर्षाणां तु कलिर्युगं॥ द्वात्रिंशच्च तथान्यानि सहस्राणि तु संख्यया॥३६॥ एतत्कलियुगं मानं मा
नुषेण प्रमाणतः॥ एषा चतुर्युगावस्था मानुषेण प्रकीर्तिता॥३७॥ चतुर्युगस्य संख्याता संध्यासंध्यांशकैः स
वच॥ एषा चतुर्युगाख्या तु साधिका ह्येकसप्ततिः॥३८॥ कृतत्रेतादियुक्ता सा मनोरंतरमुच्यते॥ मन्वंतरेतस्य

राम०
२१७

संख्या च मानुषेण निबोधत॥३९॥ एकत्रिंशत्तथा कोट्यः संख्याताः संख्यया द्विजैः॥ तथा शतसहस्राणि स्या
वान्यानि नागशः॥४०॥ सहस्राणि च द्वात्रिंशच्छतान्यष्टाधिकानि तु॥ अशीतिश्चैव वर्षाणि मासाश्चैवाधि
कास्तु षट्॥४१॥ मन्वंतरस्य संख्येषा मानुषेण प्रकीर्तिता॥ दिव्येन च प्रमाणेन प्रवक्ष्याम्यंतरं मनोः॥४२॥ सह
स्राणि शतान्याहुर्नव चैव परिसंख्यया॥ चत्वारिंशत्सहस्राणि मनोरंतरमुच्यते॥४३॥ मन्वंतरस्य कालस्तु
युगैः सह प्रकीर्तितः॥ एषा चतुर्युगाख्या तु साधिका ह्येकसप्ततिः॥४४॥ क्रमेण परिवृत्तास्ता मनोरंतरमुच्य
ते॥ चतुर्दशगुणं कल्पमाहुस्तु तत्र तद्विदः॥४५॥ कल्पप्रमाणाद्द्विगुणो यथा भवति संख्यया॥ ततस्तु प्रलयः
कृत्स्नः स तु संप्रलयो महान्॥४६॥ चतुर्युगमाख्यातं कृतं त्रेतायुगं च वै॥ त्रेतासृष्टिं प्रवक्ष्यामि द्वापरं कलिमे
व च॥४७॥ युगपत्समवेतौ द्वौ द्विधा वक्तुं न शक्यते॥ क्रमागतं मयाप्येतत्तुभ्यं नोक्तं युगद्वयं॥४८॥ ऋषिवंशप्र
संगेन व्याकुलत्वात्तथाक्रमात्॥ नोक्तं त्रेतायुगे शेषं तद्वक्ष्यामि निबोधत॥४९॥ अथ त्रेतायुगस्यादौ मनुः
सप्तर्षयश्च ये॥ श्रौतं स्मार्तं च धर्मं वै ब्रह्मणा तु प्रचोदितः॥५०॥ दाराग्निहोत्रसंबंधं ऋग्यजुःसामसंहितं।
इत्यादि बहुलं श्रौतं धर्मं सप्तर्षयोऽब्रुवन्॥५१॥ परंपराधर्मं स्मार्तं त्वाचारलक्षणं॥ वर्णाश्रमाचारयुक्तं मनुः
स्वायंभुवोऽब्रवीत्॥५२॥ सत्येन ब्रह्मचर्येण श्रुतेन तपसा यथा॥ तेषां सुतप्ततपसा आर्षेणानुक्रमेण ह॥

म०पु०
२१९

५३॥सप्तर्षीणां मनोश्चैव आ दौनायुत त ः॥ अबुद्धिपूर्वकं तेन कृतपूर्वकमेव च॥५४॥ अनिवृत्तास्तु ते मंत्रा
दर्शनैस्तारकादिभि ः॥ आदिकल्पे हि देवानां आविर्भूतास्तु ते स्वयं॥५५॥ प्रमाणे घ यसिद्धानामन्येषांच
प्रवर्तते॥ मंत्रयोगोत्पत्ति तेषु कल्पेष्विद सहस्र ः॥५६॥ तिमन्त्रा वै पुनस्तेषां प्रतिमायामुपस्थिता ः॥ ऋचो
यजूंषि सामानि मंत्राश्चाथर्वणाश्च ये॥५७॥ सप्तर्षिभिस्तु ते प्रोक्ता ः स्मार्तं तु मनुरब्रवीत्॥ त्रेतादौ स
हता वेदा ः केवलं धर्ममेव च॥५८॥ संरोधादायुषश्चैव व्यस्यंते द्वापरे च ते॥ ऋषयस्तपसा वेदान् अहोरात्रे
मधीयत॥५९॥ अनादिनिधना दिव्या ः पूर्वं प्रोक्ता ः स्वयंभुवा॥ स्वधर्मसंस्कृतान् सांगान् यथाधर्मं युगे
यवा॥६०॥ विक्रियंते स्वधर्मास्तु वेदा वेदा यथायुगं॥ आरंभयज्ञा ः क्षत्रस्य हविर्यज्ञा विदा ः स्मृता ः॥६१॥
परिचर्यायज्ञा ः शूद्रा जपयज्ञाश्च ब्राह्मणा ः॥ ततः समुदिता वर्णास्त्रेतायां धर्मशालिन॥६२॥ क्रियावंत ः प्र
जावंत ः समृद्धा ः सुखिनश्च ये॥ ब्राह्मणैश्च विधीयंते क्षत्रिया ः क्षत्रियैर्विश ः॥६३॥ वैश्यान् शूद्रानुवर्तंते
शूद्रान्परस्परमनुग्रहात्॥ शुभा ः प्रकृतयस्तेषां धर्मवर्णाश्रमाश्रया ः॥६४॥ संकल्पितेन मनसा वाचा हस्त
कर्मणा॥ त्रेतायुगे ह्यविकले कर्मारंभ ः प्रसिध्यति॥६५॥ आयूरूपबलं मेधा आरोग्यं धर्मशीलता॥ स
र्वसाधारणं त्वेतत् आसीत् त्रेतायुगे तु वै॥६६॥ वर्णाश्रमव्यवस्थानं तेषां ब्रह्मा तथाकरोत्॥ संहिताश्च त

राम
२१९

था मंत्रा ऋषिभिर्ब्रह्मण ः सुतै ः॥६७॥ यज्ञा ः प्रवर्तिताश्चैव तदा ह्येव तु दैवतै ः॥ यामै ः शुक्रैर्जयैश्चैव सर्वधा
तसंभृतै ः॥६८॥ सार्द्धं विश्वसृजश्चैव देवेंद्रेण महौजसा॥ स्वायंभुवेंतरे देवैस्ते यज्ञा ः प्राक्प्रवर्तिता ः॥
६९॥ सत्यं दया तपो दानं पूर्वं धर्मे यदुच्यते॥ यदा धर्मस्य ह्रसत ः शाखा धर्मस्य वर्द्धते॥७०॥ जायंते च
तदा शूरा आयुष्मंतो महाबला ः॥ न्यस्तदंडा महायोगा यज्वानो ब्रह्मवादिन ः॥७१॥ पद्मपत्रायताक्षा
श्च पृथुवक्त्रा ः सुसंहिता ः॥ सिंहोरस्का महासत्त्वा मत्तमातंगगामिन ः॥७२॥ सर्वलक्षणसंपूर्णा स
न्यग्रोधपरिमंडला ः॥ न्यग्रोधौ तु स्मृतौ बाहू व्यामो न्यग्रोध उच्यते॥७३॥ व्यामेनोच्छ्रयो यस्य सत ऊर्ध्वं च
देहिनो॥ समुच्छ्रयपरीणाहे न्यग्रोधपरिमंडले॥७४ चक्रं रथो मणिर्भार्या निधिरश्वो गजस्तथा॥ सप्ता
नि सप्त रत्नानि पूर्वं स्वायंभुवेंतरे॥७५॥ विष्णोरंशेन जायंते पृथिव्यां चक्रवर्तिन ः॥ मन्वंतरेषु सर्वेषु
अतीतानागतेषु वै॥७६॥ भूतभव्यानि यानीह वर्तमानानि यानि च॥ त्रेतायुगानि तेष्वत्र जायंते च
क्रवर्तिन ः॥७७॥ भद्राणीमानि तेषां वि भावंच समुद्भवं॥ अत्यद्भुतानि चत्वारि बलं धर्मं सुखं धनं॥
७८॥ अन्योन्यस्याविरोधेन प्राप्यंते तैर्नृपै ः समं॥ अर्थो धर्मश्च कामश्च यशो विजय एव च॥७९॥ ऐश्वर्ये
णानिमाद्येन प्रभुशक्तिबलान्विता॥ श्रुतेन तपसा चैव ऋषींस्तेभिभवंति हि॥८०॥ बलेनाभिभवंते चतेन

दानवमानवानलक्षणैश्चैवजायंतेशरीरस्थिरमानुषैः॥८१॥केशास्थिताललाटोर्म्मीजिह्वाचपरिमार्ज्जनी॥ता
म्रप्रभाश्चतुर्दंष्ट्राःश्रीवत्सोद्धोर्ध्वरोमकाः॥८२॥आजानुबाहवश्चैवतालहस्तावृषाकृतिः॥परीणाहप्रमाणा
भ्यांसिंहस्कंधासमेधनः॥८३॥पादयोश्चक्रमत्स्यौतुशंखपद्मेचहस्तयोः॥पंचाशीतिसहस्राणिजीवंतेह्य
जरामराः॥८४॥असंगागतयस्तेषांचतस्रश्चक्रवर्त्तिनां॥अंतरिक्षेसमुद्रेषुपातालेपर्वतेषुच॥८५॥इज्यादानं
तपःसत्यंत्रेताधर्मास्तुवैस्मृताः॥तदाप्रवर्त्ततेधर्मोवर्णाश्रमविभागजः॥८६॥मर्यादास्थापनार्थंचदंडनीतिः
प्रवर्त्तते॥हृष्टपुष्टजनाःसर्वेअरोग्याःपूर्णमानसाः॥८७॥एकोवेदश्चतुष्पादस्त्रेतायांत्रिविधःस्मृतः।
त्रीणिवर्षसहस्राणिजीवंतेतत्रताःप्रजाः॥८८॥पुत्रपौत्रसमाकीर्णाम्रियंतेचक्रमेणताः॥एषत्रेतायुगे
भागस्त्रेतासंध्यांनिबोधत॥८९॥त्रेतायुगस्वभावोनासंध्यापादेनवर्त्तते॥संध्यापादस्वभावास्वयोंशःपा
देनतिष्ठति॥९०॥इतिश्रीमत्स्यपुराणेमन्वंतरानुकीर्त्तनंनाम॥॥ऋषयऊचुः॥॥कथंत्रेतायुगमु
खेयज्ञस्यासीत्प्रवर्त्तनं॥पूर्वस्वायंभुवेसर्गेयथावत्प्रब्रवीहिनः॥१॥अंतर्हितायांसंध्यायांसार्द्धकृतयुगे
नतु॥कालाख्यायांप्रवृत्तायांप्राप्तेत्रेतायुगेतथा॥२॥औषधीषुचयातासुप्रवृत्तेवृष्टिसर्जने॥प्रतिष्ठिता
यांवार्त्तायांग्रामेषुचपुरेषुच॥३॥वर्णाश्रमव्यवस्थानंकृत्वामंत्रांश्चतैःपुनः॥संहितास्तासुसंहत्यक

थंयज्ञःप्रवर्त्तितः॥४॥ततश्रुत्वाब्रवीत्सूतःश्रूयतांयःप्रचोदितं॥४॥सूतउवाच॥॥मंत्रान्वैयोजयित्वातु
इहामुत्रेषुकर्मसु॥तथाविश्वभुगिंद्रस्तुयज्ञंप्रावर्त्तयेत्प्रभुः॥५॥दैवतैःसहसंहृत्यसर्वसाधनसंवृतः॥त
स्याश्वमेधेवितते समाजग्मुर्महर्षयः॥६॥यजंतंपशुभिर्मेध्यैरूचुःसर्वेमहर्षयः॥यज्ञकर्मण्यवर्त्ततेक
र्मण्यग्रेतथर्त्विजा॥७॥हूयमानेदेवहोत्रेअग्नौबहुविधंहविः॥संप्रतीतेषुदेवेषुयज्ञभुक्तनदासदा॥
८॥यइंद्रियात्मकादेवायज्ञभागभुजस्तुते॥तान्यजंतितदादेवाःकल्पादिषुभवंतिते॥९॥अध्वर्युप्रै
षकालेतुव्युत्थिताऋषयस्तथा॥महर्षयश्चतान्दृष्ट्वादीनान्पशुगणांस्तदा॥१०॥विश्वभुजंतेचान्व
पृच्छन्कोयंयज्ञविधिस्तव॥अधर्मोबलवानेषहिंसाधर्मेप्सयातव॥११॥ततःपशुवधस्त्विष्टस्तवयज्ञेसु
रोत्तम॥अधर्मोधर्मघातायप्रारब्धःपशुभिस्त्वया॥१२॥नायंधर्मोह्यधर्मोयंनहिंसाधर्मउच्यते॥आग
मेनभवान्धर्मंप्राकांक्षेतुयदिच्छति॥१३॥विधिदृष्टेनयज्ञेनधर्मेणाव्यसनेतुना॥यज्ञबीजैःसुरश्रेष्ठत्रिव
र्गपरिमोक्षितैः॥१४॥एषयज्ञोमहानिंद्रःस्वयंभूविहितःपुरा॥एवंविश्वभुगिंद्रस्तुऋषिभिस्तत्वदर्शिभिः।
१५॥उक्तोनप्रतिजग्राहमानमोहसमन्वितः॥तेषांविवादःसुमहानजज्ञेइंद्रमहर्षिणां॥१६॥जंगमैःस्था
वरैःकेनयष्टव्यमितिचोच्यते॥तेतुखिन्नाविवादेनशक्तायुक्तामहर्षयः॥१७॥संधायसममिंद्रेणपप्र

छुः रत्र चरं वसु॥१७॥ऋषय ऊचुः॥॥महाप्राज्ञ कथं दृष्टस्त्वया यज्ञविधिर्नृप॥उत्तानपादप्रभृ हि संशयं नोनुद
प्रभो॥१८॥॥सूत उवाच॥॥श्रुत्वा वाक्यं वसुस्तेषामविचार्य बलाबलं॥वेदशास्त्रमनुस्मृत्य यज्ञपातमुवाच ह॥
१९॥यथोपनीतैर्यष्टव्यमिति होवाच पार्थिवः॥यष्टव्यं पशुभिर्मेध्यैरथ मूलफलैरपि॥२०॥हिंसास्वभावो
यज्ञस्य इति मे दर्शनागमः॥यथेमे भाषिता मंत्रा हिंसालिंगा महर्षिभिः॥२१॥दीर्घेण तपसा युक्तैस्तारका
निदर्शनैः॥तत्प्रमाणं मया चोक्तं तस्मा छमितुमर्हथ॥२२॥यदि प्रमाणं स्वान्येव मंत्रवाक्यानि वो द्विजाः॥
तदा प्रवर्ततां यज्ञो ह्यन्यथा मानृतं वद॥२३॥एवं कृतोत्तरास्ते तु युक्त्वात्मानं ततो धिया॥अवश्यं भाविनं दृष्ट्वा
तमर्थ्यमृषयस्तथा॥२४॥इत्युक्तमात्रो नृपतिः प्रविवेश रसातलं॥ऊर्ध्वचारी नृपो भूत्वा रसातलच
रोऽभवत्॥२५॥वसुधातलचारी तु तेन वाक्येन सोऽभवत्॥धर्माणां संशयच्छेत्ता राजा वसुरधोगतः॥२६
तस्मान्न वाच्यो ह्येकेन बहुज्ञेनापि संशयात्॥बहुद्वारस्य धर्मस्य सूक्ष्मा दुरनुगा गतिः॥२७॥तस्मान्न निश्च
याद्वक्तुं धर्मः शक्यो हि केनचित्॥देवानृषीनुपादाय स्वायंभुवमृते मनुं॥२८॥तस्मान्न हिंसा यज्ञे स्याद्यदुक्त
मृषिभिः पुरा॥ऋषिकोटिसहस्राणि स्वैस्तपोभिर्दिवं गताः॥२९॥तस्मान्न दानयज्ञं च प्रशंसंति
महर्षयः॥फलउञ्छो मूलं शाकमुदपात्रं तपोधनाः॥३०॥एवं दत्त्वा विभवतः स्वर्गलोकमितो गताः॥अद्रो

हश्चाप्यलोभश्च दमो भूतदया तपः॥३१॥ब्रह्मचर्यं तपः सत्यं अनुक्रोशः क्षमा धृतिः॥सनातनस्य धर्मस्य मूल
मेतद्दुरासदं॥३२॥द्रव्यमंत्रात्मको यज्ञस्तपश्च समतात्मकं॥यज्ञैश्च देवानाप्नोति वैराजं तपसा पुनः॥३३
ब्रह्मणः कर्मसंन्यासाद्वैराग्यात्प्रकृतेर्लयं॥ज्ञानात्प्राप्नोति कैवल्यं पंचैता गतयः स्मृताः॥३४॥एवं विवादः
सुमहान्यज्ञस्यासीत्प्रवर्तने॥ऋषीणां देवतानां च पूर्वं स्वायंभुवेंऽतरे॥३५॥ततस्ते ऋषयो दृष्ट्वा हृतं ध
र्मं बलेन तु॥वसोर्वाक्यमनादृत्य जग्मुस्ते वै यथागतं॥३६॥गतेषु ऋषिसंघेषु देवा यज्ञमवाप्नुयुः॥श्रूयं
ते ते तपःसिद्धा ब्रह्मक्षत्रादयो नृपाः॥३७॥एते चान्ये च बहवः स्वैस्तपोभिर्दिवं गताः॥राजर्षयो महात्मा
नो येषां कीर्तिः प्रतिष्ठिता॥३८॥तस्माद्विशिष्यते यज्ञात्तपः सर्वैस्तु कारणैः॥ब्रह्मणा तपसा सृष्टं जगत्स
र्वमिदं पुरा॥३९॥तस्मान्नाप्नोति तद्यज्ञात्तपोमूलमिदं स्मृतं॥यज्ञप्रवर्तनं त्वेवमासीत्स्वायंभुवेंऽतरे॥
४०॥तदाप्रभृति यज्ञोऽयं युगैः सार्धं प्रवर्तितः॥४१॥॥इति श्रीमत्स्यपुराणे मन्वंतरानुकल्पे॥सूत उवाच॥
अत ऊर्ध्वं प्रवक्ष्यामि परस्य रविधिं पुनः॥तत्र त्रेतायुगे क्षीणे द्वापरं प्रतिपद्यते॥१॥द्वापरादौ प्रजानां तु
सिद्धिस्त्रेतायुगे तथा॥परिवृत्ते युगे तस्मिन्ततः सा वै प्रणश्यति॥२॥ततः प्रवर्तते तासां प्रजानां द्वापरे पुनः
लोभो धृतिर्वणिग्युद्धं तत्त्वानामविनिश्चयः॥३॥प्रध्वंसा ध्वेव वर्णानां कर्मणां तु विपर्ययः॥यज्ञो वधः परो

म॰पु॰
२२१

दंडो मानो दर्पो क्षमा बलं॥तथा रजस्तमो भूयः प्रवृत्ते द्वापरे पुनः॥आद्य कृते नाधर्मोस्ति स त्रेतायां प्रवर्ति
तः॥५॥द्वापरे व्याकुलो भूत्वा प्रणश्यति कलौ पुनः॥वर्णानां द्वापरे धर्माः संकीर्यंते तथाश्रमाः॥६॥द्वैधमु
त्पद्यते चैव युगे तस्मिन् श्रुतिस्मृतौ॥द्विधा श्रुतिस्मृती चैव निश्चयो नाधिगम्यते॥७॥अनिश्चयो गमना ध
र्मतत्वं न विद्यते॥धर्मतत्वे ह्यविज्ञाते मतिभेदस्तु जायते॥८॥परस्परं विभिन्नैस्तैः दृष्टीनां विभ्रमेण तु॥
अन्यैर्वृक्षैर्विभिन्नैस्तैः कृतमव्याकुलं त्विदं॥९॥एको वेदश्चतुष्पादः संहृत्य तु पुनः पुनः॥संक्षेपादा
युषश्चैव व्यस्यते द्वापरेष्विह॥१०॥वेदश्चैकश्चतुर्धा तु व्यस्यते द्वापरादिषु॥ऋषिपुत्रैः पुनर्वेदा भिद्यंते
दृष्टिविभ्रमैः॥११॥मंत्रब्राह्मणविन्यासैः स्वरक्रमविपर्ययैः॥संहृत्य ऋग्यजुःसाम्नां संहितास्तैः श्रुति
र्षिभिः॥न्नैः क्वचित्॥ब्राह्मणं कल्पसूत्राणि भाष्यविद्यास्तथैव च॥१३॥अन्ये तु प्रस्थितास्तैर्वै केचित्तांप्र
त्यवस्थिताः॥द्वापरेषु प्रवर्तंते भिन्नार्थैस्तैः स्वदर्शनैः॥१४॥एकमाध्वर्यवं पूर्वमासीद्द्वैधं तु तत्पुनः॥
सामान्यविपरीतार्थैः कृतं शास्त्राकुलं त्विदं॥१५॥आध्वर्यवं च प्रस्थानैर्बहुधा व्याकुलीकृतं॥
तथैवाथर्वणां साम्नां विकल्पैः स्वस्य संक्षयैः॥१६॥व्याकुलो द्वापरे स्तोर्थः क्रियते भिन्नदर्शनैः॥द्वा
परे संनिवृत्ते वेदा नश्यंति वै कलौ॥१७॥तेषां विपर्ययोत्पन्ना भवंति द्वापरे पुनः॥अदृष्टिर्मरक

राम॰
२२१

श्चैव तथैव व्याधुपद्रवाः॥१८॥वाङ्मनःकर्मभिर्दुःखैर्निर्वेदो जायते ततः॥निर्वेदाज्जायते तेषां दुःखमोक्षवि
चारणा॥१९॥विचारणायां वैराग्यं वैराग्याद्दोषदर्शनं॥दोषाणां दर्शनाच्चैव ज्ञानोत्पत्तिस्तु जायते॥२०॥तेषां
मेधा पूर्वमस्मिन् स्वायंभुवेंतरे॥उत्पत्स्यंतीह शास्त्राणां द्वापरे परिपंथिनः॥२१॥आयुर्वेदविकल्पश्च अंगा
नां ज्योतिषस्य च॥अर्थशास्त्रविकल्पाश्च हेतुशास्त्रविकल्पनं॥२२॥प्रक्रियाकल्पसूत्राणां भाष्यवि
द्याविकल्पनं॥स्मृतिशास्त्रविभेदाश्च प्रस्थानानि पृथक्पृथक्॥२३॥द्वापरेष्वभिवर्तंते मतिभेदास्त
थैव च॥मनसा कर्मणा वाचा कृच्छ्राद्वार्ता प्रसिध्यति॥२४॥द्वापरे सर्वभूतानां कायक्लेशपुरस्कृतः
लोभो भृतिर्वणिग्युद्धं तत्वानामविनिश्चयः॥२५॥वेदशास्त्रप्रणयनं धर्माणां संकरस्तथा॥वर्णाश्रमपरि
ध्वंसः कामद्वेषस्तथैव च॥२६॥पूर्णे वर्षसहस्रे द्वे परमायुस्तदा नृणां॥निःशेषे द्वापरे तस्मिन् संध्या
तु पादतः॥२७॥गुणहीनास्तु तिष्ठंति धर्मस्यातद्वापरस्य तु॥तथैव संध्यापादेन अंशस्तस्यां प्रतिष्ठि
तः॥२८॥द्वापरस्य तु पर्येवाद्यस्य तु निबोधत॥द्वापरस्यांशशेषे तु प्रतिपत्तिकलेरथ॥२९॥हिंसास्ते
यानृतिर्माया वधश्चैव तपस्विनां॥एते स्वाभावाः पुष्यस्य साधयंति च ते प्रजाः॥३०॥एष धर्मः स्मृतो कृत्स्नो
धर्मश्च परिहीयते॥मनसा कर्मणा वाचा वार्ता सिध्यति वा न वा॥३१॥कलिप्रमाणको रोगः सततं चापि

क्षुद्भयं॥ अनावृष्टिभयंचैव देशानांच विपर्ययः॥३२॥ नप्रमाणोस्थितिर्ह्यस्ति पुष्यघोरेयुगेकलौ॥ग
र्भस्थोम्रियतेकश्चिद्यौवनस्थस्तथापरः॥३३॥ स्थाविरेमध्यकौमारेम्रियंतेचकलौप्रजाः॥ अल्पतेजो
बलाःपापामहाकोपात्यधार्मिकाः॥३४॥ अनृतव्रतलुब्धाश्चपुष्येचैवप्रजाःस्थिताः॥ दुरिष्टैर्दुरधी
तैश्चदुराचारैर्दुरागमैः॥३५॥ विप्राणांकर्मदोषैस्तैःप्रजानांजायतेभयं॥ सिहानतास्तथेष्याच
क्रोधोसूयाक्षामाधृतिः॥३६॥ पुष्येभवतिजंतूनांलोभोमोहश्चसर्वशः॥ संक्षोभोजायतेत्यर्थंकलिमा
साद्यवैयुगं॥३७॥ नाधीयतेतथावेदान्नजायंतेतद्द्विजातयः॥ उत्सीदंतितदावैवैश्यैःसार्द्धंतुक्षत्रियाः॥
३८॥ शूद्राणांमंत्रयोनिस्तुसंबंधाब्राह्मणैःसह॥ भवंतिहकलौतस्मिन्शयनासनभोजने॥३९॥ राजा
नःशूद्रभूयिष्ठाःपाखंडानांप्रवर्त्तय॥ एवंविधाश्चयेकेचित्भवंतिहकलौयुगे॥४०॥ अधीयंतेत
दाशूद्राःशूद्राःश्चधर्मार्थकोविदाः॥ यजंतिह्यश्वमेधैश्चराजानःशूद्रयोनयः॥४१॥ स्त्रीबालगोवधंकृ
त्वाहत्वाचैवपरस्परं॥ उपहत्यतथान्योन्यंसाधयंतितदाप्रजाः॥४२॥ दुःखप्रचुरतात्मायुर्देशोत्मादःस
रोगता॥ अधर्माभिनिवेशात्वततमोवृत्तंकलौयुगे॥४३॥ भ्रूणहत्याप्रजानांचतथात्येयंप्रवर्त्तते॥ तस्मा
दायुर्बलंरूपंप्रहीयंतेकलौयुगे॥४४॥ दुःखेनाधिष्टितानांचपरमायुःशतंनृणां॥ भूत्वाचनभवंतीह

वेदाःकलियुगेखिलाः॥४५॥ उत्सीदंतेतथायज्ञाःकेवलाधर्मसेतव॥ एषएकलियुगावस्थाःसंध्यांशौतु
निबोधत॥४६॥ युगेयुगेतुहीयंतेस्वांस्त्रात्मदाश्चसिद्धयः॥ युगस्वभावात्संध्यास्तुअवतिष्ठंतिपादतः॥४७॥
संध्यास्वभावाःस्वांतेषुयादेनैवावतस्थिरे॥ एवंसंध्यांशकेकालेसंप्राप्तेतुयुगांतके॥४८॥ शास्तातेषामसा
धूनांभृगूणांचकुलोस्थितः॥ गोत्रेणवैचंद्रमसोनाम्नाप्रमतिरुच्यते॥४९॥ कलिःसंध्यांशभागेषुमनोः
स्वायंभुवेंतरे॥ समाःस्त्रिंशत्तुसंपूर्णाःपर्यटन्वैवसुंधरां॥५०॥ अश्वकर्मसैनांहस्त्यश्वरथसंकुलां॥
प्रगृहीतायुधैर्विप्रैःशतशोथसहस्रशः॥५१॥ सतदातैःपरिवृतोम्लेच्छान्सर्वनि॥ सहत्वासर्वशश्चैवरा
जानःशूद्रयोनयः॥५२॥ पाखंडान्सतदासर्वान्निःशेषानकरोत्प्रभुः॥ आधार्मिकाश्चयेकेचित्ता
न्सर्वान्हंतिसर्वतः॥५३॥ औदीच्यान्मध्यदेशांश्चपार्वतीयांस्तथैवच॥ प्राच्यान्प्रतीच्यांश्चतथाविंध्य
पृष्ठापरांतिकान्॥५४॥ तथैवदाक्षिणात्यांश्चद्रविडान्सिंहलैःसह॥ गांधारान्दरदांश्चैवपह्लवान्यव
नाञ्छकान्॥५५॥ तुषारान्बर्बरांश्चैतान्पुलिंदान्बर्बरांश्चतान्॥ लंबकान्द्रकरकाञ्चोराणांचै
वजातयः॥५६॥ प्रवृत्तचक्रोबलवान्म्लेच्छानामंतकृद्विभुः॥ विश्राम्यसर्वभूतानांचचारवसुधामिमां॥५७
मानवस्यचवंशेतुनृदेवस्येहयस्तिथान्॥ पूर्वजन्मानिविष्णुश्चप्रमतिर्नामवीर्यवान्॥५८॥ सुतःसवै

चेन्ममसः पूर्वेकलियुगेप्रभुः॥ द्वात्रिंशेस्तुदितेवर्षेप्रक्रांतोविंशतिःसमाः॥५९॥निजघ्नेसवभूतानोमानुषाने
वसर्वशः॥ कृत्वाबीजावशिष्टांतांपृथ्वींक्रूरेणकर्मणा॥६०॥परस्परनिमित्तेनकालेनाकस्मिकेनच॥संस्थि
तासहसापंतेसेनाप्रमतिनासह॥६१॥गंगायमुनयोर्मध्येसिद्धिंप्राप्ताःससाधनाः॥ततस्तेषुप्रणष्टेषुसंध्यां
शेक्रूरकर्मसु॥६२॥उच्छिद्यपार्थिवान्सर्वान्नितेष्वतीतेषुवैसदा॥ततःसंध्यांशकेकालेसंप्राप्तेचयुगांतिके
६३॥स्थितास्वल्पावशिष्टास्तुप्रजास्त्विहक्वचित्क्वचित्॥सुप्रदानास्तदातेवैलोभादोषास्तुदुर्दृशः॥६४॥
उपहिंसंतिचान्योन्यंप्रलुंपंतिपरस्परं॥अराजकेयुगांशेतुसंशयेसमुपस्थिते॥६५॥प्रजास्तावैतदासर्वाः
परस्परभयार्द्दिताः॥व्याकुलास्तापराहृत्वास्त्यज्यदेवगृहाणितु॥६६॥स्वान्स्वान्प्राणाननपेक्ष्यंतेनिःकारु
ण्याःसुदुःखिताः॥नष्टेश्रौतस्मृतेधर्मेकामक्रोधवशानुगाः॥६७॥निर्मर्यादानिरानंदानिःस्नेहानिरप
त्रपाः॥नष्टेधर्मेप्रतिहताह्रस्वकाःपंचविंशकाः॥६८॥हित्वादारांश्चपुत्रांश्चविषादव्याकुलाःप्रजाः॥
अनावृष्टिहतास्तेवैवार्त्तामुत्सृज्यदुःखिताः॥६९॥वीरक्तास्तेजिनधरानिःक्रियानिःपरिग्रहाः॥वर्णाश्रमपरि
भ्रष्टाःसंकटंघोरमास्थिताः॥७०॥एतांकाष्ठामनुप्राप्ताल्पसंदोषाःप्रजास्ततः॥जंतवश्चक्षुधाविष्टादुःखान्नि
र्वेदमागताः॥७१॥संश्रियंतिविदेशांस्तांश्चक्रवत्परिवर्तिनाः॥ततःप्रजास्तुताःसर्वामांसाहारावंतिवैः

७२॥मृगान्वराहान्वृषभांस्तेचान्येवनचारिणः॥भक्ष्यांश्चैवाप्यभक्ष्यांश्चसर्वांस्तान्भक्षयंतिताः॥७३॥स
मुद्रंसंश्रितायास्तुनदीश्चैवप्रजास्तथा॥तेपिमत्स्यान्हरंतीहआहारार्थंचसर्वशः॥७४॥अभक्ष्याहार
दोषेणएकवर्णंगताःप्रजाः॥यथाकृतयुगेपूर्वमेकवर्णमभूत्किल॥७५॥तथाकलियुगस्यांतेशूद्रीभा
भूताःप्रजास्तथा॥एवंवर्षगतेपूर्णेदिव्यंतेषांनिवर्त्तितं॥७६॥षट्त्रिंशत्तुसहस्राणिमानुषाणितुतानिवै॥
अथदैर्घ्येणकालेनपक्षिणःपशवस्तथा॥७७॥मत्स्याश्चैवहताःसर्वेक्षुधाविष्टाश्चसर्वशः॥निःशेषेषु
पसर्वेषुमत्स्यपक्षिपश्वादिषु॥७८॥संध्यांशेप्रतिहन्येनिःशेषास्तुतदाक्षताः॥ततःप्रजास्तुसंभूयकंदमू
लमथाखनन्॥७९॥फलमूलाशिनःसर्वेच्यनिकेतास्तथैवच॥वल्कलान्यथवासांसिश्चधःशय्याश्चसर्व
शः॥८०॥परिग्रहोनतेषास्तिधनंशुद्धिमवाप्नुयुः॥एवंक्षयंगमिष्यंतिह्यल्पशिष्टाःप्रजास्तदा॥८१॥ता
सामल्पावशिष्टानामाहारावृद्धिरिष्यते॥एवंवर्षशतंदिव्यंसंध्यांशस्तुप्रवर्त्तते॥८२॥ततोवर्षसहस्रांते
त्र्यल्पशिष्टाःस्त्रियस्तुताः॥मिथुनानितुताःसर्वाह्यन्योन्यंसंप्रजज्ञिरे॥८३॥ततस्तास्तुसमयंतेवैपूर्वेल्पिलाःप्र
जास्तुताः॥जातमात्रेषपत्येषुततःकृतंप्रवर्त्तते॥८४॥यथास्वर्गेशरीराणिनरकेचैवदेहिनां॥उपभोगसम
र्थानिएवंकृतयुगादिषु॥८५॥एवंकृतस्यसंतानःकालश्चैवक्षयस्तथा॥निवारणानुनिर्वेदःसाम्यावस्थावि

विचारणात्॥८६॥ततश्चैवात्मसंबोधो संबोधाधर्मशीलता॥कलिशिष्टेषु तेष्वेवं वायंते हृष्टवित्प्रजाः॥८७॥म
वितोर्थस्य च वलात्कृतः कृतमवर्त्तत॥अतीतानागतानि मन्वंतरेष्विह॥८८॥एते युगस्वभावावोमयोक्ता
स्तु समासतः॥विस्तरेणानुपूर्व्याच्चिनमस्कृत्य स्वयंभुवे॥८९॥प्रवृत्ते तु भवस्तस्मिन् पुनः कृतयुगे पुवै॥
उत्पन्नाः कलिशेषेषु प्रजाः कार्त्तयुगास्तथा॥९०॥तिष्ठंति चेहस्ति द्वायेश्रदृष्टाश्चहरंति च॥सहसप्तर्षिभिर्ये
तु तत्र ये च व्यवस्थिताः॥९१॥ब्रह्मक्षत्रविशः शूद्रावीर्यार्थे ये इह स्मृता॥कार्त्तयुगजैः सार्द्धं निर्विशेषस्त
दा भवत्॥९२॥तेषां सप्तर्षयो धर्मं कथयंतीह ते पु च॥वर्णाश्रमाचारयुतः श्रौतस्मार्त्तविधानतः॥९३॥एवं
ये पु क्रियावत्सु प्रवर्त्तंतीह वै कृते॥यथा दावप्रदग्धेषु तृणेष्वेवापनक्षितौ॥९४॥वनानां प्रथमं दृष्ट्या तेषां
मूलेषु संभवः॥एवं युगायुगानां वै संतानस्तु परस्परात्॥९५॥वर्त्तते ह्यनवच्छेदाद्यावन्मन्वंतराक्षयः
सुखमायुर्बलं रूपं धर्मार्थकाममेव च॥९६॥युगेष्वेतानि हीयंते त्रीन् पादांश्च क्रमेण तु॥इत्येष प्रतिसंधि
र्वः कीर्त्तितस्तु मया द्विज॥९७॥चतुर्युगानां सर्वेषां तद्देव प्रसाधनं॥एषां चतुर्युगानां तु गणितान्येषसप्त
तिः॥९८॥क्रमेण परिवृत्तास्ता मनोरंतरमुच्यते॥युगाख्यास्तु तु सर्वासु पुरस्ताद्वेयथाक्रमं॥९९॥सर्गे
सर्गे यथा भेदा ह्युत्पद्यंते तथैव च॥चतुर्दशस्तु तावंतो ज्ञेया मन्वंतरेष्विह॥१००॥आसुरी यातुधानी च पै

शाची यक्षराक्षसी॥युगे युगे तदा काले प्रजा जायंति ताः शृणु॥१०१॥तथा कल्पयुगैः सार्द्धं भवंति तुल्यलक्ष
णाः॥इत्येतल्लक्षणं प्रोक्तं युगानां वै यथाक्रमं॥१०२॥मन्वंतराणां परिवर्त्तनानि चिरप्रवृत्तानि युगस्वभावा
त्॥क्षणेन संतिष्ठति जीवलोकः क्षयोदयाभ्यां परिवर्त्तमानः॥१०३॥एते युगस्वभावाश्च परिक्रांता यथाक्रमं॥
मन्वंतराणि यान्यस्मिन् कल्पे वक्ष्यामि तानि च॥१०४॥॥इति श्रीमत्स्यपुराणे मन्वंतरानुकीर्त्तने युगवर्ण
नं नाम॥॥सूत उवाच॥॥मन्वंतराणि यानि स्युः कल्पे कल्पे चतुर्दश॥अतीतान्यागतानि स्युर्यानि मन्वंत
रेष्विह॥१॥विस्तरेणानुपूर्व्या च स्थितिं वक्ष्ये युगे युगे॥तस्मिन्युगे च संभूतिर्यासां यावच्च जीविता॥२॥युगमात्रं तु
जीवंति न्यूनतस्याद्रूपेन च॥चतुर्दशसु तावंतो ज्ञेया मन्वंतरेष्विह॥३॥त्रेतायां वै प्रयुः परिक्रांतं युगधर्मेषु सर्वशः
स्थितिं तु कल्पो दृष्ट्वा कृतानानायुषस्तथा॥४॥परमायुः शतं त्वेतन्मनुष्याणां कलौ स्मृतं॥देवासुरमनु
ष्याश्च यक्षगंधर्वराक्षसाः॥५॥परिणाहोछ्रये स्तुल्या जायंतेह कृते युगे॥षण्णवत्यंगुलोत्सेधा ह्यष्टानां
देवयोनिनां॥६॥नवांगुलं प्रमाणेन निष्पन्नेन तथाष्टकं॥एतत्स्वाभाविकं तेषां प्रमाणमधिकुर्वता॥७॥
मनुष्या वर्त्तमानाश्च युगसंध्यांशकेष्विह॥देवासुरप्रमाणं तु सप्तसप्तांगुलं क्रमात्॥८॥चतुराशीतिकेश्चै
व कलिजैरंगुलैः स्मृतः॥आपादतलमस्तकेन वतालोभवेत्तु यः॥९॥संहत्या जानुबाहुश्च दैवतैरपिपू

म०पु० ज्यते॥मजाश्वहस्तिनां चैव महिषस्थावरात्मजां॥१०॥क्रमेणैतेन विज्ञेया ह्रासवृद्धि युगे युगे॥षट्सप्तत्यंगु
२२५ लोत्सेधः पशुराककुदोच्चवेत्॥११॥अंगुलानामष्टशतमुत्सेधो हस्तिनां स्मृतः॥अंगुलानां सहस्रंतु द्वि
चत्वारिंशदगुलं॥१२॥शतात्पूर्वमंगुलानां तूत्सेधः शाखिनां परे॥मानुषस्य शरीरस्य सन्निवेशस्तु यादृशः॥
१३॥तल्लक्षणं तु देवानां दृश्यतेन्वयदर्शनात्॥बुध्यातिशयसंयुक्तं देवानां कार्यमुच्यते॥१४॥तथानातिश
यं चैव मानुष्यं कार्यमुच्यते॥इत्येवं हि परिक्रांता भावा ये दिव्यमानुषा॥१५॥पशूनां पक्षिणां चैव स्थावरा
णां च सर्वशः॥गवाजाश्व विज्ञेया हस्तिनः पक्षिणो मृगाः॥१६॥उपयुक्ताः क्रियास्वेते यज्ञियास्थिति सर्वशः
यथाक्रमोपभोगश्च देवानां पशुमूर्तयः॥१७॥तेषां रूपानुरूपैश्च प्रमाणैः स्थिरजंगमाः॥मनोज्ञैस्तत्र ते
भावैः सुखिनो ह्युपपेदिरे॥१८॥अथ शिष्टान्प्रवक्ष्यामि साधून्पततश्च वै॥ब्राह्मणः श्रुतिशब्दाश्च देवा
नां पशुमूर्तयः॥१९॥सपौर्यं ब्राह्मणोत्पन्नस्तेन संतः प्रचक्ष्यते॥सामान्येषु च धर्मेषु तथा वैशेषिकेषु च॥
२०॥ब्रह्मक्षत्रविशोत्पन्नकारणं ते वै हेतुकर्मणां॥वर्णाश्रमेषु युक्तस्य सुखोदर्कस्य स्वर्गतौ॥२१॥श्रौतस्मा
र्तस्य धर्मस्य ज्ञानधर्मः स उच्यते॥दिव्यानां साधुना साधुब्राह्मणेपचतुरोहिते॥२२॥कारणात्साधनाच्चैव ग राम
हस्थसाधुरुच्यते॥तपसश्च तथारण्ये साधुर्वैमानसः स्मृतः॥२३॥यतमानो यतिः साधुः स्मृतो योगस्य सा २२५

धनात्॥धर्मेधर्मगतिः प्रोक्ता शब्दोह्येषक्रियात्मकः॥२४॥कुशलाकुशलौधर्माधर्मौधर्मेब्रवीत्प्रभौ॥अ
थ देवान्पितरो ऋषयो न च मानुषाः॥२५॥अयं धर्मो ह्ययंत्वेन ब्रुवते मानमर्शिना॥धर्मेति धारणे धातु
महित्वे चैव वचोच्यते॥२६॥तत्रेष्टप्रापको धर्म आचार्यैरुपदिश्यते॥आधारणे महत्वे वा धर्मः स तु निरुच्यते
२७॥अधर्मश्चानिष्टफलश्चाचार्यैर्नोपदिश्यते॥वृद्धाह्यलोलुपाश्चैव ह्यात्मवंतो ह्यदांभिकाः॥२८॥सम्य
ग्विनीता ऋजवस्तानाचार्यान्प्रचक्षते॥धर्मज्ञौ विहितो धर्मः श्रौतस्मार्तौ द्विजातिजौ॥२९॥दाराग्निहोत्र
संबंधमिज्याश्रौतस्य लक्षणं॥स्मार्त्तो वर्णाश्रमाचारो यमैश्च नियमैश्च सः॥३०॥पूर्वेभ्यो वेदयित्वेकः श्रौतस
प्तर्षयो ब्रुवन्॥ऋचो यजूंषि सामानि ब्राह्मणांगानि सा श्रुतिः॥३१॥मन्वंतरस्यातीतस्य स्मृत्वा तन्मनुरब्रवी
त्॥तस्मात्स्मार्त्तः स्मृतो धर्मो वर्णाश्रमविभागजः॥३२॥एवं वै द्विविधो धर्मः शिष्टाचारः स उच्यते॥शेषे
धातोश्च निष्ठातात्पुरुषः शिष्टः प्रचक्ष्यते॥३३॥मन्वंतरेषु ये शिष्टा इह तिष्ठंति धार्मिकाः॥मनुः सप्तर्षयश्चैव
लोकसंतानकारिणः॥३४॥तिष्ठंतीह च धर्मार्थं तान्शिष्टान्संप्रचक्षते॥तैः शिष्टैश्चरितो धर्मः स्थाप्यते वै यु
गे त्रयी॥३५॥वार्त्ता वै दंडनीतिश्च प्रजा वर्णाश्रमे स्यया॥शिष्टैराचर्यते यस्मात्पुनश्चैव मनुक्षये॥३६॥पूर्वैः
पूर्वैर्मतत्वाच्च शिष्टाचारः स शाश्वतः॥दानं सत्यं तपो लोके विद्येज्या प्रजननं तमः॥३७॥अष्टतानि चरित्राणि

म०पु० २२६

शिष्टाचारस्यलक्षणं॥शिष्टायस्माच्चरंत्येनंमनुःसप्तर्षयस्तदा॥३८॥मन्वंतरेषुसर्वेषुशिष्टाचारस्ततःस्मृ
तः॥विज्ञेयःश्रवणोद्भौतःस्मारणात्स्मार्तउच्यते॥३९॥इज्यादेशात्मनःश्रौतःस्मार्त्तोवर्णाश्रमात्मकः॥प्रत्यं
गानिप्रवक्ष्यामिधर्मस्याहेतुलक्षणं॥४०॥दृष्टानुभूतमर्थंयदृष्टोनिष्टमगूहते॥यथाभूतप्रवादस्त्वित्ये
तधर्मलक्षणं॥४१॥ब्रह्मचर्यंतपोमौनंनिराहारत्वमेवच॥इत्येतत्तपसोरूपंसुघोरंतुदुरासदं॥४२॥प
शूनांद्रव्यहविषामृक्सामयजुषांतथा॥ऋत्विजांदक्षिणायाश्चसंयोगोयज्ञउच्यते॥४३॥आत्मवत्स
र्वभूतेषुयोहितायशुभायच॥वर्त्ततेसततंहृष्टःक्रियाह्येषादयःस्मृता॥४४॥अकुष्टोभिहतोयस्तुनक्रोशे
त्प्रहरेदपि॥अदुष्टोवाङ्मनःकायैस्तितिक्षुःसाक्षमास्मृता॥४५॥स्वामिनामनुरक्ष्माणामुत्सृष्टानांचसंभ्र
मे॥परस्वानामनादानमलोभइतिसंज्ञित॥४६॥मैथुनस्यसमाचारोजल्पतांचिंततांस्तथा॥निवृत्तिर्ब्रह्मच
र्यंचतदित्यमस्यलक्षणं॥४७॥नक्रुध्येन्नप्रतिहतःसजितात्माविभाष्यते॥तद्यदिष्टतमंद्रव्यंन्यायेनैवागतं
यतः॥४८॥तत्तुगुणवतेदेयंइत्येतद्दानलक्षणं॥श्रुतिस्मृतिभ्यांविहितोधर्मोवर्णाश्रमात्मकः॥४९॥शिष्टा
चारविरुद्धश्चधर्मोयंसाधुसंमतः॥अप्रद्वेषोह्यनिष्टेषुइष्टंवैनाभिनंदति॥५०॥प्रीततापविषादानांविनि
वृत्तिर्विरक्तता॥संन्यासःकर्मणांन्यासःकृतानामकृतैःसह॥५१॥कुशलाकुशलानांतुप्रहाणंन्यासउच्य

राम० २२६

ते॥प्रत्यनितुधर्मस्यइत्येतल्लक्षणंस्मृतं॥५२॥ऋषिभिर्मततत्त्वज्ञैःपूर्वेस्वायंभुवेंतरे॥अत्रवोकीर्त्तयिष्या
मिविधिंमन्वंतरस्यतु॥५३॥तथैवचातुर्होत्रस्यचातुर्होत्रस्यचैवहि॥प्रतिमन्वंतरंचैवश्रुतिरन्याविधीयते॥
५४॥ऋचोयजूंषिसामानियथावत्प्रतिदैवतं॥विधिस्तोत्रंतथास्तोत्रंपूर्ववत्संप्रवर्त्तते॥५५॥द्रव्यस्तोत्रंकर्म
स्तोत्रंक्रमस्तोत्रंतथैवच॥तथैवाभिजनस्तोत्रंतथैवच॥तथैवाभिजनस्तोत्रंस्तोत्रमेवंचतुर्विधं॥५६॥मन्वं
सर्वेषु तरेषुयथाभेदाभवंतिहि॥प्रवर्त्तयतितेषांवैब्रह्मस्तोत्रंपुनःपुनः॥५७॥एवंसर्वगुणानांतुसमुत्पत्तिश्चतु
र्विधा॥अथर्वऋग्यजुःसाम्नांवेदेष्विहपृथक्पृथक्॥५८॥ऋषीणांतप्यतांतेषांतपःपरमदुश्चरं॥मंत्राः
प्रादुर्बभूवादौपूर्वमन्वंतरस्यह॥५९॥असंतोषाद्भयाद्दुःखात्सुखाच्छोकाच्चपंचधा॥ऋषीणांतारकाये
नलक्षणेनयदृच्छया॥६०॥ऋषीणांयदृषित्वंहितद्वक्ष्यामीहलक्षणं॥अतीतानागतानांतुपंचधाह्यार्षकं
स्मृतं॥६१॥तथाऋषीणांवक्ष्यामिआर्षस्येहसमुद्भवं॥गुणसाम्येनवर्त्ततेसर्वसंप्रलयेतदा॥६२॥अविभा
जेनवेदानामनिर्देश्येतमोमये॥आबुद्धिपूर्वकंतद्वैचेतनार्थंप्रवर्त्तते॥६३॥तेनतस्यपुरुषाधिपर्यंत्येतेनचाप्य व
धिष्ठितं॥प्रवर्त्ततेतथातौतुयथामत्स्योदकावुभौ॥६४॥चेतनाधिकृतंसर्वंप्रवर्त्ततेगुणात्मकं॥कार्यकारण
भावेनतदातस्यप्रवर्त्तते॥६५॥विषयोविषयित्वंचतदार्थेपदात्मकौ॥कालेनप्रापणीयेनभेदाकार

णात्मनः॥६६॥संसिद्धिकास्तथावृत्ताः क्रमेण महदादयः॥महतः स्यादहंकारस्तस्माद्भूतेंद्रियात्मकः॥६७॥
भूतानि दाश्च भूतेभ्यो जज्ञिरे तु परस्परं॥संसिद्धिः कारणं कार्ये यद्येव विनिवर्त्तये॥६८॥यथोल्मुकाद्विकरू
ढ्या एककालाद्भवंति हि॥तथाप्रवृत्ताः क्षेत्रज्ञाः कालेनैकेन कारणात्॥६९॥यथांधकारे खद्योतः सहसा
संप्रदृश्यते॥तथा निवृत्तो ह्यव्यक्तः खद्योत इव संज्वलन्॥७०॥समहात्मा शरीरस्थस्तत्रैव परिवर्त्तते॥म
हतस्तमसः पारे वैलक्षण्याद्विभाव्यते॥७१॥तत्रैव संस्थितो विद्वान् तपसोंत इति श्रुतं॥बुद्धिर्विवर्द्धितस्तस्य
प्रादुर्भूता चतुर्विधा॥७२॥ज्ञानं वैराग्यमैश्वर्यं धर्मश्चेति चतुष्टयं॥सांसिद्धिकान्यथैतानि अप्रतीघानि तु
स्य वै॥७३॥महात्मस्य शरीरस्यस्तत्रैव परिवर्त्तते॥महतस्तमसः पारे वैलक्षण्याद्विभाव्यते॥७४॥तत्रै
व संस्थितो विद्वान्तपसोंत इति श्रुतं॥बुद्धिर्विवर्द्धितस्तस्य प्रादुर्भूता चतुर्विधा॥७५॥ज्ञानं वैराग्यमैश्व
र्यं धर्मश्चेचतुष्टयं॥सांसिद्धिकान्यथैतानि अप्रतीघानि तस्य वै॥७६॥महात्मस्य शरीरस्य चैतन्यात्सिद्धिरुच्य
ते॥पुरे शेते यतः पूर्वं क्षेत्रज्ञानं यथापि च॥७७॥पुरुषे शुशयनात्पुरुषः क्षेत्रज्ञानात् ज्ञ उच्यते॥तस्मात्क्षे
लोकस्तत इतस्माद्धि धात्मकं तु वै॥७८॥सांसिद्धिके शरीरे च बुद्ध्या व्यक्तं तु चेतनं॥एवं विवृत्तः क्षेत्रज्ञः क्षेत्र
त्यनभिसंधिता॥७९॥निवृत्तिः समकाले तु पुराणं तदचेतनं॥क्षेत्रज्ञेन परिज्ञातं भोग्योयं विषयो मम॥८०॥

ऋषितद्विंसागतो यातु विद्यासत्यं तपः श्रुतं॥एष सन्निचयो यस्माद्ब्रह्मणस्तु ततस्त्वृषिः॥८१॥विवृत्तिसम
कालाच्च बुद्ध्याव्यक्तिमृषिः स्वयं॥ऋषते परमं यस्मात्परमर्षिस्ततः पुनः॥८२॥गत्यर्थादृषतेर्धातोर्नाम निर्वृ
त्तिकारणं॥यस्मादेष स्वयं भूतस्तस्माच्च ऋषिता मता॥८३॥ईश्वराः स्वयमुद्भूता ब्रह्मणो मनसा सुताः॥नि
वर्त्तमानास्तेजाता बुद्ध्या महान्परगतः परः॥८४॥यस्मादृषाः परत्वेन सह तस्मान्महर्षयः॥ईश्वराणां सुतास्ते
षां मानसाश्चौरसाश्च वै॥८५॥ऋषिस्तस्मात्परत्वेन भूतादिकऋषयस्ततः॥ऋषिपुत्र ऋषीकास्तु मैथुनाद्ग
र्भसंभवाः॥८६॥परत्वेन ऋषंते वै भूतादीनृषिकास्ततः॥ऋषीकाणां सुता ये तु विज्ञेया ऋषिपुत्रकाः॥
८७॥श्रुत्वा ऋषपरत्वेन स्मृतास्तस्मात् श्रुतर्षयः॥अव्यक्तात्मा महात्मा चाहंकारात्मा तथैव च॥८८॥भूता
त्मा चेंद्रियात्मा च तेषां तत् ज्ञानमुच्यते॥इत्येवमृषिजातस्तु पंचधा नाम विश्रुता॥८९॥भृगुर्मरीचिरत्रिश्च
ह्यंगिराः पुलहः क्रतुः॥मनुर्दक्षो वसिष्ठश्च पुलस्त्यश्चापि ते तत॥९०॥ब्रह्मणो मानसा ह्येते उत्पन्नाः स्वय
मीश्वराः॥परत्वेन र्षयो यस्मान्मतास्तस्मान्महर्षयः॥९१॥ईश्वराणां सुतास्तेषां ऋषयस्तान्निबोधत॥ततो बृ
हस्पतिश्चैव कश्यपश्च्यवनस्तथा॥९२॥उतथ्यो वामदेवश्च अगस्त्यः कौशिकस्तथा॥कर्दमो वालिखिल्या
श्च विश्रवाः शक्तिवर्द्धनः॥९३॥इत्येते ऋषयः प्रोक्तास्तपसा ऋषितां गताः॥तेषां पुत्रान् ऋषीकांस्तु गर्भोत्पन्नान्नि

बोधत॥९४॥ भृगुः काश्यपः प्राचेता दधीचो ह्यात्मवानपि॥ और्वोथ जमदग्निश्च वेद सारस्वतस्तथारष्टा
जोजवाल्मकः॥९५॥ तथाम्रगधवागर्गः शितिसाकृतिरेव च॥ गातुरवीतश्च मांधाता अंबरीषस्तथैव च॥९६॥
युवनाश्वः पुरुकुत्सः स्वश्रमश्वतमस्यवान्॥ अजमीढो त्यृहार्यश्च मक्षपकरिरेव च॥९७॥ पषदश्वो वि
रूपश्च कण्वश्चैवाथ मुद्गलः॥ औतथ्यश्च शरद्वांश्च तथा वाजिश्रवा अपि॥९८॥ अपस्यौषः सुचित्तिश्च
वामदेवस्तथैव च॥ औशिज्यो बृहदुक्थश्च दीर्घतपा अपि॥९९॥ कक्षीवांश्च अतपञ्चत्रिंशास्मृता ह्यांगि
रसां वराः॥ एते मंत्रकृतः सर्वे कश्यपां स्तुनिबोधत॥१००॥ कश्यपः सहवत्सारो नैध्रुवो नित्य एव च॥ असि
तो देवलश्चैव षडेते ब्रह्मवादिनः॥१०१॥ अत्रिरर्धस्वनाश्चैव श्यावाश्वोथ गविष्ठिरः॥ कर्णकश्च ऋषिः सिद्ध
स्तथा पूर्वातिथिश्च यः॥१०२॥ इत्येते त्वत्रयः प्रोक्ता मंत्रकृतो महर्षयः॥ वसिष्ठश्चैव शक्तिश्च तृतीयश्च परा
शरः॥१०३॥ ततस्तु इंद्रप्रमतिः पंचमस्तु भरद्वसुः॥ षष्ठस्तु मित्रावरुणः सप्तमः कुंडिनस्तथा॥१०४॥ इत्येते
सप्त विज्ञेया वसिष्ठा ब्रह्मवादिनः॥ विश्वामित्रश्च गाधेयो देवरातस्तथा बलः॥१०५॥ तथा विद्वान्मधुछंदा
ऋषिश्चान्योघमर्षणः॥ अष्टको लोहितश्चैव नतकीलश्च तावुभौ॥१०६॥ देवश्रवा देवराजः पुराणश्च धनं
जयः॥ शिशिरश्च महातेजाः शालंकायन एव च॥१०७॥ त्रयोदशैते विज्ञेया ब्रह्मिष्ठाः कौशिकादयः॥ अग

स्त्योथ दृढद्युम्न इंद्रबाहुस्तथैव च॥१०८॥ ब्रह्मिष्ठा ह्यागस्त्यपौत्रास्ते त्रयः परमकीर्तिताः॥ एते मंत्रकृतो ज्ञेया
वैश्यानां प्रवराः सदा॥१०९॥ इत्येके नवतिः प्रोक्ता मंत्रा यैश्च बहिष्कृताः॥ ब्राह्मणाः क्षत्रिया वैश्या ऋषिपुत्रा
न्निबोधिनः॥ ऋषीकाणां सुतास्त्वेते ऋषिपुत्राः श्रुतर्षयः॥११०॥ ॥ इति श्री मत्स्यपुराणे ऋषिकल्पवर्ण
नो नाम॥ ॥ ऋषय ऊचुः॥ ॥ कथं मत्स्येन कथितस्तारकस्य वधो महान्॥ कस्मिन्काले विनिर्वृत्तं सूतित्वं स
तनंदन॥१॥ त्वन्मुखक्षीरसिंध्युत्था कृपेयममृतासिका॥ कर्णाभ्यां पिबतां तृप्तिरस्माकं न प्रजायते॥२॥
इदं मुने समाख्याहि महाबुद्धे मनोगतं॥२॥ ॥ सूत उवाच॥ ॥ एवस्तु मुनिना देवो मत्स्यरूपी जनार्दनः॥३॥
कथं शरवणे जातो देवः षड्वदनो विभुः॥३॥ एतत्तु वचनं श्रुत्वा पार्थिवस्यामितौजसः॥ उवाच भगवान्प्रीतो
ब्रह्मसूनुर्महात्मनि॥४॥ वज्रांगो नाम दैत्योभूत्तस्य पुत्रस्तु तारकः॥ सुरान्वासयामास पुत्रेभ्यः समहा
बलः॥५॥ ततस्ते ब्राह्मणोभ्यां संजग्मुर्भयपीडिताः॥ भीतांश्च त्रिदशान्दृष्ट्वा ब्रह्मा तेषामुवाच ह॥६॥
संत्यजध्वं भयं देवाः शंकरस्यात्मजः शिशुः॥ हिमाचलदौहित्रः स हनिष्यति दानवं॥७॥ ततः काले तु
कस्मिंश्चित्तु दृष्ट्वा शैलजां शिवां॥ स्वरेतोवह्निवदने व्यसृजत्कारणांतरे॥८॥ तच्चांभवन्हिवदनेरेतो
देवानतर्पयत्॥ विदार्य जठराण्येषां अजीर्णं निर्गतं मुने॥९॥ पतितं तत्सरोवर्ये तस्मिन्सुरसरजानाना॥ त

तस्मात्त्वतु समुत्तो गृहो दिनकरप्रभः ॥१०॥ स सप्तदिवसो बालो निर्जघ्ने तारकासुरं ॥ एवं श्रुत्वा ततो वाक्यं त
मृचुर्ऋषिसत्तमाः ॥११॥ ऋषय ऊचुः ॥ श्रुत्वाश्चर्यवतीं रम्यां कथां पापनाशिनीं ॥ विस्तरेण ह नो ब्रूहि
याथातथ्येन सूत एव तां ॥१२॥ वज्रांगो नाम दैत्येंद्रः कस्य वंशोद्भवः पुनः ॥ यस्माज्जातः तारकः पुत्रः सुरप्रम
नो बली ॥१३॥ को वा वाच्यान्नृतस्य दैत्येश्वरस्य तु ॥ गृहो जन्म तु कात्स्न्येन अस्माकं ब्रूहि मानद ॥१४॥ सू
त उवाच ॥ मानसो ब्रह्मणः पुत्रो दक्षो नाम प्रजापतिः ॥ षष्टिं सोऽजनयत्कन्या वीरिण्यामेव नक्तं ॥१५॥ द
दौ स दश धर्माय कश्यपाय त्रयोदश ॥ सप्तविंशतिं सोमाय चतस्रोरिष्टनेमये ॥१६॥ द्वे चैवाकुपुत्रा
य द्वे चाप्यंगिरसे तथा ॥ द्वे कृशाश्वाय विदुषे प्रजापतिसुताः प्रभुः ॥१७॥ अदितिर्दितिर्दनुर्विश्वा अरिष्टा
वा नायुषा विषा ॥ सुरभिर्विनता चैव ताम्रा क्रोधवशा इरा ॥१८॥ कद्रूर्मुनिश्च लोकस्य मातरो गोषु मात
रः ॥ तासां सकललोकानां जंगमस्थावरात्मनां ॥१९॥ जन्मनाम प्रकाराणां ताभ्यो न्ये देहिनः स्मृताः ॥
पक्षिणो विनतापुत्रा गरुड प्रमुखाः स्मृताः ॥२०॥ नागाः कद्रूसुता ज्ञेयाः शेषाश्चाप्येपि जंतवः ॥ त्रैलो
क्यनाथं शक्रं तु सर्वामरगणप्रभुं ॥२१॥ हिरण्यकशिपुश्चक्रे जित्वा राज्यं महाबलः ॥ ततः केनापि का
लेन हिरण्यकशिपादयः ॥२२॥ निहता विष्णुना संख्ये शेषाश्चेंद्रेण दानवाः ॥ ततो निहतपुत्रा च दितिर्वि

रमाप्याचत ॥२३॥ भर्तारं कश्यपं देवं पुत्रमन्यं महाबलं ॥ समर्थं शक्रहंतारं स तस्या मददात्प्रभुः ॥२४॥ न
वमेव तु सहस्राणि समग्रं शुचिमानसा ॥ वर्षाणां लप्स्यसे पुत्रमित्युक्ता सा तथाकरोत् ॥२५॥ वर्तंत्या नियमे त
स्याः सहस्राक्षः समाहितः ॥ उपासामाचरंस्तस्याः सदैन मनुमन्यते ॥२६॥ दशावत्सरशेषस्य सहस्रस्य त
दा दितिः ॥ उवाच शक्रं सुप्रीता वरदा न तपःस्थिता ॥२७॥ दितिरुवाच ॥ पुत्रोत्तीर्णं व्रतप्रायं विद्धि मां पा
कशासन ॥ भविष्यति च ते भ्राता तेन सार्द्धमिमां श्रियं ॥२८॥ भुंक्ष्व वत्स यथाकामं त्रैलोक्यं हतकंटकं ॥ इत्यु
क्त्वा निद्रयाविष्टा चरणाक्रांतमूर्द्धजा ॥२९॥ स्वयं सुष्वाप वै तिप तावद्विनापस्यगोरवात् ॥ तत्तु रंध्रं सामा
द्य जंभराज पाकशासनः ॥३०॥ चकार सप्तधा गर्भं कुलिशेन तु मायया ॥ एकैकं पुनः खंडं चकार मघवां
स्ततः ॥३१॥ सप्तधा सप्तधा कोपात् बुध्यत ततो दितिः ॥ विबुद्धोवाच मा शक्र घातयेनां प्रजां मम ॥३२॥
तत् श्रुत्वा निर्गतः शक्रः स्थित्वा प्रांजलिरग्रतः ॥ उवाच वाक्यं संत्रस्तो मातस्त्वद्वदनेरितो ॥३३॥ शक्र उ
वाच ॥ दिवासुप्तिपरा मातः पादाक्रांतशिरोरुहा ॥ सप्तसप्तभिरेमा तत्त्व गर्भः कृतो मया ॥३४॥ एकोन
पंचाशत् कृता भागा वज्रेणते शुभा ॥ दास्यामि तेषां स्थानानि दिवि दैवतपूजितः ॥३५॥ इत्युक्ता मातरं तदा
देवं सुरशतामप्यभाषत ॥ पुनश्च देवं भर्तारं उवाचासितलोचना ॥३६॥ पुत्रं प्रजापते देहि शक्रजेतारमूर्जि
२

प०पु० तं॥ यो नास्त्ररास्त्रैर्वध्यत्वं गच्छेत्त्रिदशवासिनां॥३७॥ इत्युक्तः स तयोवाच तां पत्नीमतिदुःखितां॥ दश
२३० वर्षसहस्राणि तस्यानिष्ठाप्रलप्स्यसे॥३८॥ वज्रसारमयैरंगैरच्छेद्यैरव्ययैर्दृढैः॥ वज्रांगो नाम पुत्रस्ते भ
विता पुत्रवत्सले॥३९॥ सा तु लब्ध्वा वरं देवी जगाम तपसे वनं॥ दशवर्षसहस्राणि सा तपो घोरमचरत्॥४०
तपसोंते भगवती जनयामास दुर्जयं॥ पुत्रमप्रतिकर्माणमजेयं पुत्रदुःखितं॥४१॥ स जातमात्र एवाभू
त्सर्वशास्त्रार्थपारगः॥ उवाच मातरं भक्त्या मातः किं करवाण्यहं॥४२॥ तमुवाच ततो हृष्टा दितिर्दैत्या
धिपं सदा॥ बहवो मे हताः पुत्राः सहस्राक्षेण पुत्रक॥४३॥ तेषां त्वं प्रतिकर्त्तव्यो मम छक्रवधाय च॥ बा
सृ ढमित्येव तामुक्त्वा जगाम दिवं बली॥४४॥ बध्वा तत्र सहस्राक्षं पाशेनामोघवर्चसा॥ मातुरंतिकमाग
च्छत् व्याधः क्षुद्रमृगं यथा॥४५॥ एतस्मिन्नंतरे ब्रह्मा कश्यपश्च महातपाः॥ आगतौ यत्र तत्रास्तां मा
ता पुत्रावभीतकौ॥४६॥ ततो वाक्यमुवाचेदं ब्रह्मणा कश्यपं प्रति॥ मुंचैनं पुत्र देवेंद्रं किमनेन प्रयो
जनं॥४७॥ अवधमानो वधः प्रोक्तः पुत्रः संभावितस्य तु॥ आत्मा वाक्येन यो मुक्तो वधिनं मृतमेव वा राम०
॥४८॥ परस्य गौरवान्मुक्ता शत्रूणां भारमावहेत॥ जीवन्नेव मृतो वत्स दिवसे दिवसे स तु॥४९॥ मह २३०
तां च समायाने वैरमेवास्ति वैरिणि॥ एतच्छ्रुत्वा तु वज्रांगः प्रणतो वाक्यमब्रवीत्॥५०॥ न मे कृत्यमनेना

स्ति मातुराज्ञा कृता मया॥ त्वं सुरासुरनाथो वै मम च प्रपितामहः॥५१॥ करिष्ये च वचो देव एष मुक्तः शत
क्रतुः॥ तपसे मे रतिर्देव निर्विघ्नं त्वं तु मे भवेत्॥५२॥ त्वत्प्रसादेन भगवन्नित्युक्त्वा विरराम सः॥ तस्मिंस्तूष्णीं
स्थिते दैत्ये प्रोवाचेदं पितामहः॥५३॥ ब्रह्मोवाच॥ यतस्त्वं क्रूरमापन्नो ह्यस्मच्छासनसंस्थितः॥ अन
या चित्तशुद्ध्या ते प्राप्तं हि जन्मनः फलं॥५४॥ इत्युक्त्वा पद्मजः कन्यां ससर्जायतलोचनां॥ तामस्मै प्रद
दौ देवो पत्न्यर्थं पद्मसंभवः॥५५॥ वरांगीति च नामास्याः कृत्वा यातः पितामहः॥ वज्रांगोपि तया सार्द्धं ज
गाम तपसे वनं॥५६॥ ऊर्ध्वबाहुः स दैत्येंद्रो वरं वर्षसहस्रकं॥ कालं कमलपत्राक्षः शुद्धबुद्धिर्महात
पाः॥५७॥ तावदवाङ्मुखः कालं तावत्पंचाग्निमध्यगः॥ निराहारो घोरतपास्तपोराशिरजायत॥५८
ततः सोंतर्जले चक्रे कालं वर्षसहस्रकं॥ जलांतरं प्रविष्टस्य तस्य पत्नी महाव्रता॥५९॥ तस्यैव तीरे स
रसस्तस्थौ मौनमास्थिता॥ निराहारा तपो घोरं प्रविवेश महाद्युतिः॥६०॥ तस्यां तपसि वर्त्तत्यामिंद्र
श्चक्रे विभीषिकां॥ भूत्वा तु मर्कटस्तत्र तस्याश्रमपदं महत्॥६१॥ चक्रे विलोलनिःशेषं तु बीघकरंडकां
ततस्तु रध्ररूपेण कंपं तु सा करोन्महत्॥६२॥ ततो भुजंगरूपेण नद्धा तु चरणद्वयं॥ अपाकर्षति
तो दूरं भ्रमंत्या स्यामहीमिमां॥६३॥ तपोबलाढ्या सा तस्य न वध्यत्वं जगाम ह॥ ततो गोमायुरूपेण तस्या

दूषयद्दाश्रयं॥६४॥ ततस्तु मेघरूपेण ततो दूषयदाश्रयं॥ भीषिकाभिरनेकाभिस्तां क्लिश्यत्पाकशासनः॥
६५॥ विरराम यदा नैवं वज्रांगमहिषी तदा॥ शैलस्य दुष्टतां मत्वा शापं दातुं व्यवस्यत॥६६॥ ज्ञात्वा शापाभिमु
खं दृष्ट्वा शैलः पुरुषविग्रहः॥ उवाच तां वरारोहां वरांगीं भीरुचेतनः॥६७॥ नाहं वरांगने दुष्टः सेव्योहं स
र्वदेहिनां॥ विभ्रमं तु करोत्येष रुषितः पाकशासनः॥६८॥ एतस्मिन्नंतरे यातः कालो वर्षसहस्रकः॥
तस्मिन्याते च भगवान् कालेकमलसंभवः॥६९॥ तुष्टः प्रोवाच वज्रांगं तमागम्य जलाश्रये॥६९॥ ब्र
ह्मोवाच॥ ददामि सर्वकामांस्ते उत्तिष्ठ दितिनंदन॥ एवमुक्तस्तदोत्थाय दैत्येंद्रस्तपसां निधिः॥७०॥ उ
वाच प्रांजलिर्वाक्यं सर्वलोकपितामहं॥७०॥ वज्रांग उवाच॥ आसुरो मास्तु मे भावः संतु लोका ममाक्ष
याः॥ तपसि च रतिर्मेस्तु शरीरस्यास्तु वर्तनं॥७१॥ एवमस्त्विति देवोक्त्वा जगाम स्वकमालयं॥ वज्रांगो
पि समाप्ते तु तपसि स्थिरसंयमः॥७२॥ आहारमिच्छन्भार्यां स्वां न ददर्शाश्रमस्थले॥ क्षुधाविष्टः स ग
वाङ्क्व गतेयं मम प्रिया॥७३॥ दृष्ट्वा तु तस्य शैलस्य गहनं प्रविवेश ह॥ आदातुं फलमूलानि स च तस्मिन्
विलोकयन्॥७४॥ रुदतीं स्वां प्रियां दीनां तरुप्रच्छादिताननां॥ तां विलोक्य च दैत्येंद्रः प्रोवाच परिसां
त्वयन्॥७५॥ वज्रांग उवाच॥ केनापकृतं भीरु यमलोकं यियासुना॥ कं वा कामं प्रयच्छामि शीघ्रं मे

ब्रूहि मानिनि॥७६॥ ॥इति श्रीमत्स्यपुराणे वज्रांगोत्पत्तिः॥ ॥वरांग्युवाच॥ ॥त्रासितास्म्यपविद्धास्मि ता
डिता क्रोडिता पि च॥ रौद्रेण देवराजेन नष्टनाथेव भूरिशः॥१॥ दुःखपारमपश्यंती प्राणांस्त्यक्तुं व्यवसि
ता॥ पुत्रं मे तारकं देहि दुःखशोकमहार्णवात्॥२॥ एवमुक्तः स दैत्येंद्रः कोपव्याकुललोचनः॥ शक्तोपि
देवराजस्य प्रतिकर्तुं महासुरः॥३॥ तपः कर्तुं पुनर्दैत्यो व्यवस्यच्च महाबलः॥ ज्ञात्वा तु तस्य तत्कर्म ब्र
ह्मा क्रूरतरं पुनः॥४॥ आजगाम तदा तत्र यत्रासौ दितिनंदनः॥ उवाच तस्मै भगवान्मधुरं मधुरया गि
रा॥५॥ ब्रह्मोवाच॥ किमर्थं पुत्र भूयस्त्वं नियमं क्रूरमिच्छसि॥ आहाराभिमुखो दैत्य तन्मे ब्रूहि म
हाव्रतं॥६॥ यो हृष्टसहस्रेण निराहारस्य वै फलं॥ सत्तो नैकेन लब्धं त्यक्त्वाहारमुपस्थितं॥७॥ त्या
गोत्यप्राप्तकामानां कामेभ्यो न तथा गुरुः॥ तथाविं परित्यज्य कामं कमलजोचनः॥८॥ श्रुत्वा तात तब्रह्म
णो वाक्यं दैत्यः प्रांजलिरब्रवीत्॥ चिंतयस्व प्रसायुक्तो हृदि ब्रह्म सुरखेरितं॥९॥ ॥वज्रांग उवाच॥ उक्षिते
न मया दृष्टा समाधानात्तदा तया॥ महिषी भीषिता दीना रुदती आश्रिनः स्थले॥१०॥ सर्वमयोक्ता नित
न्वंगी दूयमानेन चेतसा॥ किमेवं वर्तसे भीरु वद त्वं किं चिकीर्षसि॥११॥ इत्युक्ता सा मया देव प्रोवाच ल
नाक्षरं॥ वाक्यं वाचस्पतेर्भीता तन्वंगी हेतुसंहितं॥१२॥ वरांग्युवाच॥ ॥त्रासितास्म्यपविद्धास्मि धर्षि

तापीडितापिच॥ रौद्रेणदेवराजेननष्टनायेवभूरिशः॥१३॥ दुःखस्यांतमपश्यंतीप्राणांस्त्यक्तुंव्यवस्थि
ता॥ पुत्रंमेतारकंदेहिअस्माद्दुःखमहार्णवात्॥१४॥ एवमुक्तस्ततःसंक्षुब्धस्तस्याःपुत्रार्थमुद्यतः।
तपोघोरंकरिष्यामिजयायत्रिदिवौकसः॥१५॥ एतच्छ्रुत्वावचोदेवःपद्मगर्भोद्भवस्तदा॥ उवाचदै
त्यराजानंप्रसन्नश्चतुराननः॥१६॥ ब्रह्मोवाच॥ अलंकृतेनतपसावत्समाक्लेशोदुस्तराविश॥
पुत्रस्तेतारकोनामभविष्यतिमहाबलः॥१७॥ देवसीमंतिनीकांतधम्मिल्लस्यविमोक्षणः॥ इत्युक्तो
दैत्यनाथस्तुप्रणिपत्यपितामहं॥१८॥ आगत्यानंदयामासमहिषींहर्षितानन॥ तौदंपतीकृतार्थौ
तुजग्मतुःस्वाश्रमंमुदा॥१९॥ वज्रांगेणाहितंगर्भंवरांगीवरवर्णिनी॥ पूर्णंवर्षसहस्रंचदधारोदक
संप्लुता॥२०॥ ततोवर्षसहस्रांतेवरांगीसुषुवेसुतं॥ जायमानेतुदैत्येंद्रेतस्मिन्लोकभयंकरे॥२१॥ च
चालसकलापृथ्वीसमुद्राश्चचकंपिरे॥ चेलुर्महीधराःसर्वेववुर्वाताश्चभीषणाः॥२२॥ जेपुर्जप्यंमुनि
वरानेदुर्व्यालमृगाअपि॥ चंद्रसूर्यौजहुःकांतींमनिहाराद्दिशोभवन्॥२३॥ जातेमहासुरेतस्मिन्स
र्वेचापिमहासुराः॥ आजग्मुर्हर्षितास्तत्रतथाचासुरयोषितः॥२४॥ जगुर्हर्षसमाविष्टान्नृत्यश्चाप्सरो
गणाः॥ ततोमहोत्सवोजातोदानवानांद्विजोत्तमाः॥२५॥ विषण्णमनसोदेवाःससहेंद्रास्तदाभवन्॥

वरांगीस्वसुतंदृष्ट्वाहर्षेणपूरितातदा॥२६॥ बहुमेनेनदेवेंद्रोविजयंतुतदैवसा॥ जातमात्रस्तुदैत्येंद्रस्तारकश्चंडवि
क्रमः॥२७॥ अभिषिक्तोसुरैःसर्वैःकुजंभमहिषादिभिः॥ सर्वासुरमहाराज्येपृथिवीतुलनक्षमः॥२८॥ सतुप्राप्य
महाराज्यंतारकोमुनिसत्तमाः॥ उवाचदानवश्रेष्ठोयुक्तियुक्तमिदंवचः॥२९॥ ॥इतिश्रीमत्स्यपुराणेतारकोत्पत्ति
र्नाम॥ ॥तारकउवाच॥ ॥शृणुध्वमसुराःसर्वेवाक्यंममहाबलाः॥ श्रेयसीक्रियतांबुद्धिःसर्वैःसत्यस्यसंविधा॥
१॥ वंशक्षयकरोदेवाःसर्वेषामेवदानवाः॥ अस्माकंजातिधर्मोवैविरूढंवैरमक्षयं॥२॥ वयमद्यगमिष्यामस्त
पोघोरंदितेःसुताः॥ ततःसुरान्विजेष्यामोजोक्ष्यामोथजगत्त्रयं॥३॥ स्थिरोपायोहिपुरुषःस्थिरश्रीरपिजायते॥
रक्षितुंनैवशक्नोतिचपलश्चपलांश्रियं॥४॥ तच्छ्रुत्वादानवाःसर्वेवाक्यंतस्यासुरस्यतु॥ साधुसाध्वित्यवोचं
स्तेतत्रदैत्याःसविस्मयाः॥५॥ सोगच्छत्पारियात्रस्यगिरेःकंदरमुत्तमं॥ सर्वर्तुकुसुमाकीर्णंमानौषधिविदी
पितं॥६॥ नानाधातुरसस्रावंचित्रंनानागुहागृहाः॥ गहनैःसर्वतोगूढंचित्रकल्पद्रुमाश्रयं॥७॥ अनेकाक
रवक्रूलंपृथुकाक्षिकुलाकुलं॥ नानाप्रस्रवणोपेतंनानाविधजनाश्रयं॥८॥ प्राप्यतत्कंदरंदैत्यश्चचारवि
पुलंतपः॥ निराहारःपंचतपाःपत्रभुग्वारिभोजनः॥९॥ शतंशतंसमानांतुतपांस्येतानिसोकरोत्॥ ततः
स्वदेहाद्दुःकृत्यकर्षंकंप्रदिनेदिने॥१०॥ मांसान्यग्नौजुहावासौततोनिर्मांसतांगतः॥ एतस्मिन्नंतरेब्रह्मा

परमंतोषमागतः॥११॥तारकस्यवरंदातुमाजगामस्वकाल्पात्॥प्राप्यतंशैलराजानंसरसास्पंदनेस्थितः॥१२
उवाचतारकंदेवोगिरामधुरयाततः॥१२॥ब्रह्मोवाच॥उत्तिष्ठतपसातेस्तुनास्तिसाध्यंतुवाधुना॥वरंवृ
णीष्वरुचिरंयत्तेमनसिवर्त्तते॥१३॥इत्युक्तस्तारकोदैत्यःप्रणम्यात्मभवंविभुं॥उवाचप्रांजलिर्भूत्वाप्रणतः
पृथुविग्रहः॥१४॥तारकउवाच॥॥देवभूतमनोवासीवेत्सितंतुविचेष्टितं॥कृतप्रतिकृताकांक्षीजिगीषुःप्रा
यसोजनः॥१५॥वयंचजातिधर्मेणकृतावैराःसहामरैः॥तैश्चनिःशेषितादैत्याःक्रूरैःसंत्यज्यधर्मतां॥१६॥ते
षामहंसमुद्धर्त्तामिवेयइतिमेमतिः॥अवध्यःसर्वभूतानामस्त्राणांचमहौजसां॥१७॥स्यामहंपरमेत्येषव
रोयंमेहृदिस्थितः॥एतंमेदेहिदेवेशनान्योमेरोचतेवरः॥१८॥तमुवाचततोदैत्यंविरंचामरनायकः॥नयु
ज्यंतेविनामृत्युंदेहिनोदैत्यसत्तम॥१९॥यतस्ततोवावरयमृत्युंयस्मान्नशंकसे॥ततःसंचिंत्यदैत्येंद्रःशि
शुतःसप्तवासरात्॥२०॥वव्रेमहासुरोमृत्युमवलेपेनमोहितः॥ब्रह्माचास्मैवरंदत्वायतकिंचिन्मसेप्सितं।
२१॥जगामत्रिदिवंदेवोदैत्योपिस्वकमालयं॥उत्तीर्णतपसस्तंतुदैत्यंदैत्येश्वरास्तथा॥२२॥परिवव्रुःसहस्रा
क्षंदिविदेवगणायथा॥तस्मिन्नहनिराज्यस्थेतारकेदैत्यनंदने॥२३॥ऋतवोमूर्त्तिमंतस्तंस्वकालगुणबृंहि
ताः॥अभवन्किंकरास्तस्यलोकपालाश्चसर्वशः॥२४॥कांतिद्युतिर्मेधाश्रीरखंडातदाभवत्॥परिवव्रुर्ग

णाकीर्त्तिभिःस्रष्टाःसर्वएवहि॥२५॥कालागुरुविलिप्तांगंमहामुकुटभूषितं॥रुचिरांगदनद्धांगंमहासिं
हासनस्थितं॥२६॥वीजयंतस्मरःश्रेष्ठाप्सरसांमुंचंतिनैवतां॥चंद्रार्कौदीपमार्गेषुव्यजनेषुचमारुतः॥२७॥कृ
तांतोग्रेसरस्तस्यवन्हिवसुनिसत्तमाः॥एवंप्रयातिकालेतुदिनेतारकासुतः॥२८॥बभाषेसवितादैत्यःप्रह
र्षबलदर्पितः॥२९॥॥तारकउवाच॥॥राज्येनकारणंकिंमेयेनाक्रम्यत्रिविष्टपं॥अनियाप्यसुरैर्वैरंका
मार्त्तिर्हृदयेमम॥२९॥भुंजतेद्यापियज्ञांशानस्वराक्रांतानुगाहि॥विधुःश्रियंनत्यजतितिष्ठतेजगतःश्रमः॥
३०॥स्वस्त्राभिःस्वर्गनारीभिःपीड्यतेचसुवद्धुभा॥मदिरासोत्पलामोदादिविविक्रीयतेषुचा॥३१॥तव्वाज
न्मनयःकश्चिद्यटनेयोरुपंनरः॥जनुस्तस्यहृथाभूतंनजन्मायुर्विनिःष्पते॥३२॥मातापितृन्मानकरोतिका
मान्बंधुश्चकांत्यानकरोतियोवा॥कीर्त्तिहिवानार्जयतेहिमान्यांपुमांश्चजातोमृतामृतश्चा॥३३॥तस्मात्त्वया
यामरपुंगवानांत्रैलोक्यलक्ष्मीहरतोघराघ्रं॥संयोज्यतांतेरथमष्टचक्रंबलंचमेदुर्जयदैत्यचक्रं॥३४॥
ध्वजंचमेकांचनपट्टनद्धंछत्रंचमेमौक्तिकजालबद्धं॥३४॥तारकस्यवचःश्रुत्वाग्रसमानाद्वदानवः॥समानीदै
त्यराजस्यतथाचक्रेबलान्वितः॥३५॥आहत्यभेरींगंभीरांदैत्यानाहूयसत्वरः॥गरुजानांसहस्रेणचक्रा
ष्टकविभूषितं॥३६॥शुक्लांवरपरिष्कारंचतुर्योजनविस्तृतं॥नानाक्रीडागृहयुतंगीतवाद्यमनोहरं॥३७॥

विमानमिव देवस्य सुरभर्तुःशतक्रतोः॥ दशकोटीश्वरा दैत्या दैत्यानां चंडविक्रमाः॥३८॥ नानायुधमहरणना
नाशास्त्रापारगाः तारकस्योच्छ्रितः केतुरौद्रः कृष्णलोचनः॥३९॥ केनाप्यपरेणापि सेनानीर्ग्रसनस्त्विह॥ पे
शाचं पस्य वदनं जंभस्यासीद्योमयं॥४०॥ खरं विभूतलांगूलं कुंभस्य नवद्विजाः॥ महिषस्तु गोमायुके
तोहैमं तदाभवत्॥४१॥ ध्वांक्षं ध्वजे तु शुंभस्य कृष्णायोमयमुच्छ्रितं॥ अनेकाकारविमासामेषां तु ध्वजानिच
४२॥ स तेन शीघ्रवेगानां व्याघ्राणां हेममालिनां॥ ग्रसनस्य रथो युक्तः किंकिणीजालमालिनां॥४३॥ शते
नचापि सिंहानां रथो जंभस्य दुर्जयः॥ कुजंभस्य रथो युक्तः पिशाचवदनैः खरैः॥४४॥ रथं महिषस्योष्ट्रैर्ग
जस्य च तुरंगमैः॥ मेघाभस्फाटिनिर्मितैः कूष्मांडैः कालनेमिनः॥४५॥ पर्वताभैः समारूढो निर्निमित्तैर्मतंग
जैः॥ चतुर्दंष्ट्रैर्गंधवाहः शिष्यतेमेघनैरवैः॥४६॥ शतसहस्रायते कृत्वे तुरंगे हेमभूषणे॥ सितचामर
जालेन शोभने नीषणं दिशः॥४७॥ सितचंदनचर्चिते नानापुष्पस्रजोज्ज्वलः॥ मथवो नाम दैत्येंद्रः पाशह
स्तोभ्यराजत॥४८॥ जंभकः किंकिणीजालमालाशतसमास्थितः॥ कालः शुक्लं महामेघमारूढः श्री
मदानवः॥४९॥ अन्येपि दानवा वीरा नानावाहनगामिनः॥ प्रचंडचित्रवर्मणः कुंडलोष्णीषभूषणाः॥५०
नानाविधोत्तरासंगा नानामाल्यविभूषणाः॥ नानागंधसुगंधाढ्या नानाबंदिजनस्तुताः॥५१॥ नानावाद्यप

रिस्पंदाः श्रेसरमहारथाः॥ नानाशौर्यकथासक्तास्तस्मिन्सैन्ये महासुराः॥५२॥ तद्बलं दैत्यसिंहस्य भी
मरूपं प्रजायते॥ प्रपन्नखंडमातंगम मत्तरथसंकुलं॥५३॥ प्रतस्थेमरयुद्धाय बहुपत्तिपताकिनं॥ एतस्मि
स्मिन्नंतरे वायुर्देवदूतो वरालयः॥५४॥ दृष्ट्वा तु दानवबलं जगामेंद्रस्य संसदि॥ स गत्वा तु सभां दिव्यां महेंद्रस्य महा
त्मनः॥५५॥ बृहस्पतिसुवाचेदं वाक्यं काले महाभुजः॥ अद्यासंन्यध्येदेवानां इदं कार्यमुपस्थितं॥५६॥ ततः श्रु
त्वा देवराजस्तु निमीलितविलोचनः॥५७॥ इंद्र उवाच॥ संप्राप्तोतिविमर्दोयं देवानां दानवैः सह॥ कार्यं कि
मत्र तत् ब्रूहि नीतुपायसमुत्थितं॥५७॥ एतच्छ्रुत्वा तु वचनं महानागो बृहस्पतिरुदारधीः॥५८॥ बृहस्पतिरुवाच॥
सामपूर्वास्मृता नीतिश्चतुरंगा पताकिनी॥ जिगीषतां सुरश्रेष्ठ स्थितिरेषा सनातनी॥५९॥ साम भेदस्तथा दानं दं
डं चांग चतुष्टयं॥ नीतौ क्रमादेशकाले रिपुयोगात्क्रमादिदं॥६०॥ न सांत्वगोचरो लुब्धः क्रूरो लुब्धसमाश्रयो
संतापितबलो जातिसाधिताभ्युष्टसंश्रयः॥६१॥ साम दैत्येषु वै नास्ति यतस्ते लब्धसंश्रयाः॥ दानधर्मेण चा
न्ये घाद्ानं प्राप्तश्रियेवकिं॥६२॥ एकोत्युपायोदंकोत्र भवतां यदि मन्यते॥ दुर्जनेषु कृतं साम महत्ता याति वाच
तां॥६३॥ भयादिति व्यवस्यं ते क्रूराः सांत्वं महात्मनां॥ ऋजुता मार्जबुद्धित्वं दयां नीतिक्रमं॥६४॥ मन्यंते दुर्ज
या नित्यं साम चारिजयोदयात्॥ तस्मात् दुर्जनमाक्रांताः श्रेयान्पौरुषसंश्रयः॥६५॥ अक्रांतेत्त क्रियापु

प॰पु॰
२३५

कः समासेतन्महाव्रतं ॥ दुर्जनासुजनत्वाय कल्प्यतेन कदाचन ॥ ६६ ॥ स्वजनोपि सुजनास्पर्शो गमिष्ठेन्न कर्हिचि
त् ॥ एवमेवियतेबुद्धिमद्वंतोत्र व्यवस्थिताः ॥ ६७ ॥ एवमुक्तः सहस्राक्षएवमेवेत्युवाचह ॥ कर्तव्यतां संविचिंत्य प्रो
वाच परसंसदि ॥ ६८ ॥ इंद्र उवाच ॥ ॥ सावधानेन मेवाचं शृणुध्वं नाकवासिनः ॥ भवंतोयत्र तो कारः स्तुत्या ध्व
त्मानोतिसात्विकाः ॥ ६९ ॥ स्वमहिम्नि स्थिता नित्यं जगतः पालनेरताः ॥ भवंतो च निमित्तेन वध्यंते दानवैः सु
राः ॥ ७० ॥ तेषां साम न च क्वापि दंड एव विधीयते ॥ समंताघतपो घोरं सैन्यं संपाद्यतां मम ॥ ७१ ॥ आदिश्यंतां च
शस्त्राणि युज्यतां मम दैवतं ॥ वाहनानि तु सर्वाणि योजयंतु ममामराः ॥ ७२ ॥ यमं सेनापतिं कृत्वा शीघ्रमे
व दिवौकसः ॥ इत्युक्ताः समयुज्यंत देवानां ये प्रधानतः ॥ ७३ ॥ वाजिनामयुतं चाजौ हेमघंटापरिष्कृतं ॥ चं
डकिंकरवृंदेन सर्वतः परिवारितः ॥ ७४ ॥ कज्जलाभोच्छ्रितज्वालापूरितांबरगोचरः ॥ कृतांतरानच्छागरू
ढः शक्तिहेतिव्यवस्थितः ॥ ७५ ॥ पवनोंकुशपाणिस्तु विसारितमहाजवः ॥ भुजगेंद्ररथारूढो वरुणेशो न गं
वा नुच्चयं ॥ ७६ ॥ नरयुक्ते रथे देवागच्छमेशो वियच्चरः ॥ तीक्ष्णखड्गयुतो वीरो भीमः समवस्थितः ॥ ७७ ॥ म
हासिंहरथो देवो धनाध्यक्षो महाबुधः ॥ चंद्रादित्यावश्विनौ तु तुरंगबलधिष्ठितौ ॥ ७८ ॥ राजभिः सहिता राम
स्तु गंधर्वा हेमभूषणाः ॥ हेमपीतोत्तरालंगाश्चित्रचर्मवरायुधाः ॥ ७९ ॥ नाकपृष्ठः शिखंडी स्तु वे २३५

दूर्यमकरध्वजाः ॥ जवास्त्रो नरासंगा राक्षसारक्तमूर्धजाः ॥ ८० ॥ धूम्रेगे ध्वजमहावीर्या निर्मला युधभूष
णाः ॥ मुशलासिगदाहस्ता रथेशो ऋषैश्च वशिताः ॥ ८१ ॥ महामेघरवानागा भीमोत्कारा शिहेतयः ॥ पक्षा
ः कृतांबरधरा नीमवाणधनुर्धराः ॥ ८२ ॥ ताम्रोलूकध्वजा रौद्रा हेमरत्नविभूषणाः ॥ द्वीपिवमोन्नरासंगपि
शाचवज्रमावभौ ॥ ८३ ॥ ताम्रपत्रध्वजप्रायमस्थिभूषणभूषितं ॥ मुशलायुधदुःप्रेक्ष्यं नानाप्राणिमहारथे
८४ ॥ किंनराः श्वेतवसनाः सितःपादापताकिनः ॥ मत्तेभवाहनप्रायास्तीक्ष्णतोमरहेतयः ॥ ८५ ॥ मु
क्ताजालपरिष्कारं हंसरजतनिर्मितं ॥ केतुजलधिमापस्य भीमरूपध्वजानलः ॥ ८६ ॥ पंचरागमहारत्नवि रा
रकं धनदस्यतु ॥ ध्वजंसमुच्छ्रितं भाति गं तुकामवांबरं ॥ ८७ ॥ हृ केणकुणभिलेनयमस्या भूषांतेन्महा
ध्वजे ॥ राक्षसस्य वृद्धनं प्रेतस्य ध्वजमावभौ ॥ ८८ ॥ हतहंसध्वजो देवौ वैद्या कविमितद्युती ॥ कुंभेन र
क्तचित्रेण केतुरश्विनघोरभूत ॥ ८९ ॥ मातंगंडेमरश्चितं चित्ररत्नपरिष्कृतं ॥ ध्वजशातक्रतोरासी
त्सितचामरमंडितं ॥ ९० ॥ सनागयक्षगंधर्वमहोरगनिशाचराः ॥ सेनासावेवशाकस्य दुर्जनासुव
नत्रये ॥ ९१ ॥ कोटयस्तास्त्रयस्त्रिंशत् देवादयतिकायितं ॥ ९२ ॥ हिमाचलोभेसितकर्णचामरे सुवर्ण
पद्मांगुलसुंदरध्वजे ॥ कृतोपियानाजलकुंकुमांकुरे कपोललीलालिकदंबसंकुले ॥ ९३ ॥ स्थितस्त देरा

म०पु०

२२६

णानामकुंजरेमहाबलश्चित्रविभूषणांबरः॥विशालवज्रांगविमानभूषितःप्रकीर्णकेयूरभुजाग्रमंडलः॥
१३॥सहस्रदृग्वंदिसहस्रसंस्तुतस्त्रिविष्टपेशोभितपाकशासनः॥तुरंगमातंगरथौघसंकुलासिता
तपत्रध्वजराजशालिनी॥१४॥चमूस्तदादुर्जयपंक्तिसज्जिताविभातिनानायुधयोधमुद्यता॥१५॥
इतिश्रीमत्स्यपुराणेदेवासुरसंग्रामे॥॥सूतउवाच॥॥सुरासुराणांसमंदैत्यानांशंखभेरीरवेण
॥ तस्मिन्परमदारुणे॥तुमलेतिमहानासीत्सेनयोरुभयोरपि॥१॥गर्जतांदेवदैत्यानांशंखभेरीर
वेणच॥तूर्याणांचैवनिर्घोषैर्मातंगानांचबृंहितैः॥२॥हेषितैर्हयबृंदानांरथनेमिस्वनेनतु॥ज्याघोषे
णचशूराणांतुमलोभिमहानभूत्॥३॥समासाद्योभयोःसेनापरस्परजयैषिणां॥रोषणाविपरी
तानांत्यक्तजीवितचेतनां॥४॥समतात्स्यवतेमोन्यमक्रमेणविलोमिता॥रथेनासक्तपादास्तेरथ
येनचतुरंगमः॥५॥हस्तीपदातिसंसक्तोरथिनापिकपिरुथी॥मातंगेनापरोहस्तीतुरंगैर्बहुभिर्गजाः
६॥गजेश्चबहुभिर्हस्तीपदातिबहुभिर्गजाः॥पदातिरेकोबहुभिर्गजैर्मत्तैश्चयुज्यते॥७॥प्रासासि
निगदाभिंडिमालाशिपट्टिशैः॥चक्रैर्निर्मुशलैःशूलैर्मुद्गरैःकर्णयैर्गुडैः॥८॥चक्रैःपरश्वधैश्चैव राम
तोमरैरंकुशैःशितैः॥काहिंनालीकनाराचवत्सदंतार्धचंद्रकैः॥९॥भल्लैश्चैवसपत्रैश्चश्चकतुंके २२६

श्चनिर्मलैः॥इषितप्रकृतांकाराणगगनेसमदृश्यत॥१०॥संछाद्यदिशःसर्वास्तमोमयमिवाकरोत्॥नप्र
ज्ञायेततोन्योन्यंतस्मिंस्तमसिसंकुले॥११॥आलक्ष्यंतिस्वनस्तास्तास्ताहतसंघातमद्भुतं॥एधंतसेनयोर्मध्ये
निरीक्षंतेपरस्परं॥१२॥ततोध्वजैर्भुजैश्छत्रैःशिरोभिश्चसकुंडलैः॥गजैस्तुरंगैःपादातैःपतद्भिःपतितै
रपि॥१३॥आकाशसरसोभ्रष्टैःपंकजैरिवभूस्तृता॥भग्नदंताभग्नकुंभाश्छिन्नदीर्घमहाकाराः॥१४॥ग
जाःशैलनिभाःपेतुर्धरण्यांरुधिरस्रुताः॥भग्नेषारथचक्राक्षास्रथाश्चशकलीकृताः॥१५॥पेतुःशकलतांयाता
स्तुरंगाश्चासहस्रशः॥ततोसृक्कर्दमदुस्ताराष्टथिवीसमजायत॥१६॥नद्यश्चरुधिरावर्त्ताहर्षिताःपिशिताशि
नां॥वैतालक्रीडमनवंसातत्संकुलरणांगणं॥१७॥॥इतिश्रीमत्स्यपुराणेदेवासुरसंग्रामे॥॥सूतउवाच
अथग्रसनमालोकयमक्रोधेनमूर्छितः॥ववर्षशरवर्षेणविशिषेचानिवर्त्तसः॥१॥सूचिघबहुभिर्बा
णैर्ग्रसनोपितराक्रमः॥कृतिप्रतिकृताकांक्षीधनुरानम्यभैरवं॥२॥शतैःपंचभिरत्युग्रैःशराणांयमम
र्दयत्॥सविचिंत्यशरव्रातंग्रसनस्यातिपौरुषं॥३॥बाणवृष्टिभिरुग्राभिर्यमोग्रसनमार्दयत्॥कृतांत
शरवृष्टिश्चपतितामनिसर्पती॥४॥चिच्छेदशरवर्षेणग्रसनोदानवेश्वरः॥विफलांतांसमालोक्यप्रश्चा
श्री शरसंहति॥पट्टिशंहोल्मुकंदीप्तंग्रसनस्सरथंप्रति॥सततंमुद्गरमापातंस्तत्वगगनस्थितं॥६॥जग्रा

इ वामहस्तेन याम्यं दानवनंदनः ॥ तमेव सुरु रंगं त्यय मस्य महिषरूपा ॥७॥ ताडयामास वेगेन स पपात मही
तले ॥ उत्पपात यमस्तस्मात् न्महिषान्निपतिष्यतः ॥८॥ प्रासेन ताडयामास ग्रसनं वदने दृढं ॥ स तु प्रासप्रहा
रेण मूर्छितोऽपतद्भुवि ॥९॥ ग्रसनं पतितं दृष्ट्वा कुंभो भीमपराक्रमः ॥ यमस्य भिंडिपालेन प्रहारमकरोत् हृ
दि ॥१०॥ यमस्तेन प्रहारेण सुस्राव रुधिरं मुखात् ॥ कृतांतमर्दितं दृष्ट्वा गदापाणिर्धनाधिपः ॥११॥ हतो यक्षायुत
गणो जंभमुख्यग्रघोररूपं ॥ जंभो रोषात्समायातं दानवानीकसंहतः ॥१२॥ जघ्ने दानवं प्रासस्तस्य यया स्निग्धेन जा
षितं ॥ ग्रसनो लब्धसंज्ञो यमस्याभिहो गदां ॥१३॥ मणिहेमपरिस्कारां गुर्वीमरीचिमर्द्दिनीं ॥ तामापतंतीं सं
प्रेक्ष्य गदां महिषवाहनः ॥१४॥ गदायाः प्रतिघाताय निदज्वलदनैरवं ॥ दंडं मुमोच कोपेन ज्वालामालासमा
कुलं ॥१५॥ स गदां विपतिप्राप्य संप्राप्य बुधरो यथा ॥ संघट्टमनवन्नाभ्यां शैलाभ्यामिव दुःसहं ॥१६॥ ताभ्यां नि
ष्पेषनिर्ह्लादजडीकृतदिगंतरं ॥ जगद्व्याकुलतां जातं प्रलयागमशंकया ॥१७॥ क्षणात् प्रशांतनिर्ह्रादं ज्व
लदुल्कासमाचितं ॥ निःपेषेण नयो भीममत्र जनमनगोचरं ॥१८॥ निहत्य च गदादंडः ततोऽग्रसनमूर्धनि ॥
जित्वा प्रियमिवानर्थो दुर्हृत्तस्यापतद् दृढः ॥१९॥ स तु तेन प्रहारेण दृष्ट्वा सतिमिरा दिशः ॥ पपात भूमौ निःसंज्ञो भूमि
रेणविरूषितः ॥२०॥ ततः संहरतो घोरं सेनयोरुभयोरभूत् ॥ ततो मुहूर्तमात्रेण ग्रसनः प्राप्य चेतनं ॥२१॥ प्र

पश्यत्स्वातनुं ध्वस्तां विलोलां भरणाबरां ॥ स चापि चिंतयामास कृतप्रतिकृतप्रियं ॥२२॥ तद्विधेव स्तुतिपु
सिमन्नो परिभरोदया ॥ मय्याश्रिता निसैन्या निर्जिते मयि विनाशिताः ॥२३॥ असंभावित एवास्तु जनः स्वच्छंदचे
ष्टितः ॥ न तु कार्यं समाघुष्टः स्वभावनिधनोत्तरः ॥२४॥ एवं संचिंत्य वेगेन समुत्तस्थौ महाबलः ॥ मुद्गरं कालदंडा
भं गृहीत्वा गिरिसंनिभं ॥२५॥ ग्रसनो घोरसंकल्पः सदष्टोष्ठपुटच्छदः ॥ ततः स्वानिहतां दृष्ट्वा घोरां किंकरवा
हिनीं ॥२६॥ आगमत्परमक्षोभं नानाप्रहरणायुतं ॥ ग्रसनस्तु समालोक्य तां किंकरमयीं चमूं ॥२७॥ मेने पम
सहस्राणि हृष्टानि यममायया ॥ विगत्य ग्रसनः सेनां व्यसृजत् शस्त्रवृष्टयः ॥२८॥ कल्पांत घोरसंकाशे
बभूव क्रोधमूर्छितः ॥ कांश्चिच्छिभेद शूलेन कांश्चिद्बाणैर जिह्मगैः ॥२९॥ कांश्चित्पिपेष गदया कांश्चिन्मु
द्गरहस्तिभिः ॥ कांश्चित्प्रासप्रहारैस्तु दारुणैस्ताडयत्तनु ॥३०॥ अपरे बद्धतास्तस्य सलीलं बाहुमंडलौ ॥ शिला
भिरपरे जघ्नुर्द्रुमैरन्ये महोच्छ्रयैः ॥३१॥ तस्यापरे तु गात्रेषु दशनैरपि दंशयन् ॥ अपरे मुष्टिभिः एकं किंकराः
प्रहरंति च ॥३२॥ अभिद्रुतस्तु तैर्घोरैर्ग्रसनः क्रोधमूर्छितः ॥ उत्त्पत्यगात्रं जूटाद्यानिः पिपेष सहस्रशः ॥ कां
श्चिदुत्पाय मुष्टीभिर्जघ्ने किंकरसंचयां ॥ स तु किंकरयुद्धे न ग्रसनः समवाप्तवान् ॥३४॥ तमालोक्य यतः श्री
ते निहतां च भूवाहिनीं आजगाम समुद्यम्य दंडं महिषवाहनः ॥३५॥ ग्रसनस्तु तमायांतमाजघ्ने ण दयोरसि ॥

आचिंतयित्वातत्कर्मग्रसनस्यांतकस्तत ॥३६॥ जघ्नेचरणपृष्ठाभ्यांव्याघ्रान्‌दंडेनकोपनः ॥ तंचलज्जिह्विविमुष्विते
व्याघ्रेनद्वैविक्रिष्यते ॥३७॥ संत्रायंपुरुषस्येवच्छिन्नंदैत्यस्यतद्रथं ॥ समुत्सृज्यरथंदैत्यःपदातिर्धरणीततः
३८॥ समंतुजाग्र्यमादायपदीधयामासदानवः ॥ यमोपिशस्त्राणुत्सृज्यबाहुयुद्धेव्यवर्तत ॥३९॥ ग्रसनः
कटिवस्त्रेतुयमंगत्वाबलोद्धतः ॥ त्रासयामासवेगेनविचित्रमिवसंनवः ॥४०॥ यमोपिकंठदेशस्यदैत्यंबा
हुयुगेनतु ॥ वेगेनभ्रामयामासतमुत्क्षिप्यमहीतले ॥४१॥ तौततोमुष्टिभिर्जघ्नुरद्दयंतोपरस्परं ॥ दैत्येंद्र
स्यातिकायत्वान्नतःश्रांतस्तुजोयम ॥४२॥ स्कंधेनिधायदैत्यस्यमुखंविश्रांतुमैछत ॥ तमाक्ष्यततोदैत्यः
श्रांतमंतकमोजसा ॥४३॥ निष्पिपेषमहीपृष्टेजानुनापाष्णिपाणिभिः ॥ यावद्यमस्यवदनात्सुस्त्रावरुधिरं
बहु ॥४४॥ निर्जीवितंयमंदृष्ट्वाततःसंत्यज्यदानवः ॥ यमंप्राणयाघनंमुक्तानादंदैत्यमहाबलः ॥४५॥
स्वकंसैन्यंसमासाद्यतस्थौगिरिवाचलः ॥ धनाधिपस्यजंतेनसायकैर्मर्मभेदिभिः ॥४६॥ दिशोपरुध्याकुंडे
नसैन्यंतस्याहतेत्वरं ॥ तंदृष्ट्वाकमदैत्यस्यधनाध्यक्षःप्रतापवान्‌ ॥४७॥ आकर्ण्याकृष्टचापस्तुजंभमा
लोक्यमहाबलं ॥ हृदिविव्याधबाणानांसहस्रेणाग्निवर्चसा ॥४८॥ सारथिंचशतेनालंध्वजंदशभिरेव राम०
च ॥ हस्तपादंचसप्तत्यामार्गणैर्दशभिर्धनुः ॥४९॥ मार्गणाद्वरूपक्षांकैस्तैहस्तेणलघौतैरद्धिःगैः ॥ सिंहमे २३८

केनतंतीक्ष्णैःशरैर्विक्षिप्तदानवः ॥५०॥ ततक्षणंधैर्यमालंब्यधनुराकृष्यभैरवं ॥ किरन्बाणसहस्राणिनिशिता
निधनाधिपः ॥५१॥ दिशश्चविदिशोभूमिमनकाममसुरस्यच ॥ छादयामासवेगेनसंछाद्यरविमंडलं ॥५२॥ जं
भोपिशरमेकैकंशरैर्बहुभिराहवे ॥ चिच्छेदलघुसंधानोधनेशस्यातिपौरुषः ॥५३॥ ततोधनेशःसंक्रुद्धोदानवें
द्रस्यकर्मणा ॥ बाधमनस्यसैन्यानिनानासायकवृष्टिभिः ॥५४॥ तंदृष्ट्वातुकृतंकर्मधनाध्यक्षेणदानवः ॥ गृही
त्वामुद्गरंभीममायसंहेमभूषितं ॥५५॥ धनेंदानुचरानक्षान्निःपिपेषसहस्रशः ॥ तेवध्यमानादैत्येनमुचं
तोभैरवान्रवान्‌ ॥५६॥ रथंधनपतेःसर्वेपरिवार्यव्यवस्थिताः ॥ दृष्ट्वानानादितानभृत्यानशूलंजग्राहदारु
णं ॥५७॥ तेनदैत्यसहस्राणिसूदयामाससत्वरः ॥ क्षीयमाणेषुनीकेषुदानवःक्रोधमूर्छितः ॥५८॥ जग्रा
हपरशुंदैत्योमर्दनंविद्विषांततः ॥ सतेनशितधारेणधनुर्नभुर्महारवः ॥५९॥ चिच्छेदतिजशोदैत्योत्यसृजःस्त्रि
गधमिवांबरं ॥ ददाविरथविश्वेशोगदामादायभैरवां ॥६०॥ महाहवविमर्देषुदृष्टशत्रुविनाशनं ॥ अष्टक्षां
सर्वभूतानांवज्रवर्षगणार्चितं ॥६१॥ नानाचंदनदिग्धांगीदिव्यपुष्पाधिवासितां ॥ निर्मलायोमयींगुर्वीं
अमोघांहेमभूषणां ॥ चिक्षेपमूर्ध्निसंकुद्धोजंभस्यचधनाधिपः ॥ आयांतींतांसमालोक्यतडित्संधानमं
डितं ॥६२॥ दैत्योगदाविघातायशस्त्रंवृक्षिष्टिंमुमोचह ॥ चक्राणिकुणपान्प्रासान्मुसद्यःपट्टिशानपि ॥६४

हेमकेयूरबन्धाभ्यां बाहुभ्यां चंडविक्रमः ॥ व्यर्थीकृत्य च तान्सर्वान् आयुधान्दैत्यपक्षसि ॥ ६५ ॥ प्रस्फुरंतीपपा
तास्रमहोल्केवाद्रिकंदरे ॥ स तयाभिहतो गाढं पपात रथकूबरे ॥ ६६ ॥ स्रोतोभिश्चास्य रुधिरं सुस्रावगत
चेतनः ॥ जंभं तु हि निहतं मत्वा कुजंभो घोरविक्रमः ॥ ६७ ॥ धनाधिपस्य संक्रुद्धो वाक्येनातीवकोपितः ॥ च
क्रे बाणमयं जालं दिक्षु यक्षाधिपस्य तु ॥ ६८ ॥ विच्छिद्य बाणजालं तदर्धचंद्रैः शितैस्ततः ॥ मुमोच शरवृष्टिं
च तस्य यक्षाधिपो बली ॥ ६९ ॥ स तु दैत्यशरव्रातांश्चिच्छेद निशितैः शरैः ॥ व्यर्थीकृतां तु तां दृष्टिं दृष्ट्वा शापर
धनाधिपः ॥ ७० ॥ शक्तिं जग्राह दुर्धर्षामघंटाट्टहासिनीं ॥ बाहुना रत्नकेयूरकांतिहंता नद्यासितां ॥ ७१ ॥ मत्तं
निरूप्य वेगेन कुजंभाय मुमोच ह ॥ सा कुजंभस्य हृदयं दारयामास दारुणा ॥ ७२ ॥ विन्नेशामूलसत्वस्य पु
रुषस्याविजा वता ॥ अथास्य हृदयं भित्वा जगाम धरणीतलं ॥ ७३ ॥ लब्धा सुरूर्त्ता दृक्षस्त्रो दानवो दारु
णाकृतिः ॥ जग्राह पट्टिशं दैत्यः मांतशितशिखासुरं ॥ स तेन पट्टिशेनाजौ दधनदस्य स्तनांतरं ॥ वाक्येन
तीक्ष्णधारेण मर्मातिरविसर्पिणा ॥ ७५ ॥ निशिते दानिजातस्य हृदयं दुर्जनो यथा ॥ तेन पट्टिशपातेन धने
शो तीव्रमूर्छितः ॥ ७६ ॥ निषसाद रथोपस्थे जर्जरः पर्वतो यथा ॥ तथागतं तु तं दृष्ट्वा धनेशं नरवाहनं ॥ ७७
खड्गहस्तो निर्ऋतिस्तु निशाचरबलानुगः ॥ अभिदुद्राव वेगेन कुजंभं भीमविक्रमं ॥ ७८ ॥ अथ दृष्ट्वा तु दुध

ल

र्षं कुजंभो राक्षसेश्वरः ॥ चोदयामास दैत्याश्च राक्षसेशरथं प्रति ॥ ७९ ॥ स दृष्ट्वा चोदितो तोसेन तलांस्नान
भीषणान् ॥ रथादाप्लुत्य वेगेन रूपेणा द्युतिभास्करः ॥ ८० ॥ खड्गेन कमलानीव दिकाशोनांबरत्विषा ॥ चि
छेद कुन्तवक्त्राणि विचित्राणि समंततः ॥ ८१ ॥ निष्पत्य तमधश्चोर्द्ध्वं दीर्घबाहुर्महासिमान् ॥ संदष्टोष्ठपुटोपभृ
कुटीविकटाननः ॥ ८२ ॥ प्रचंडकोपरक्ताक्षो म्यर्क्कं तदानवानुरणे ॥ ततो निःशेषितप्रायां विलोक्य स्वामनी
किनीं ॥ ८३ ॥ दृष्ट्वा कुजंभो वक्रधा राक्षसेंद्रमभिद्रवन् ॥ बद्ध्वा संत्रो कुजंभस्तु धनाध्यपदानुगान् ॥ ८४ ॥ जी
वान्समतिजग्राह जयबद्धारारौः सहस्रशः ॥ मंत्रिणं ति तुरत्नानि निधानानि च दानवाः ॥ ८५ ॥ वाहनानि
च दिव्यानि विमानानि सहस्रशः ॥ धनेशो लब्धसंज्ञस्तु तामवस्थां विलोक्य च ॥ ८६ ॥ निश्वस्य दीर्घमुष्णं च रोषा
ताम्रविलोचनः ॥ ध्यात्वास्त्रं गारुडं दिव्यं बाणं संधाय कार्मुके ॥ ८७ ॥ मुमोच दानवानीके तं बाणं शत्रुदारणं ॥
भयंकरं कार्मुकान्नस्य निर्जग्मुर्धर्मराजयः ॥ ८८ ॥ अनंतरं स्फुलिंगानां कोटयो दीर्घवर्चसां ॥ ततो ज्वालाकु
लव्योमश्चकारास्त्रं समंततः ॥ ८९ ॥ तत्क्रमेण दुर्वारं नानापक्षं तदाभवत् ॥ अमूर्त्वा क्षणवल्लोकं अंध
कारसमावृतं ॥ ९० ॥ ततोंतरिक्षे दृश्यंते तेजस्को नु परस्परं ॥ कुजंभस्तं समालोक्य दानवोतिपराक्रमः ॥ ९१ ॥
अतिदुद्राव वेगेन पदातिर्धनदं नदन् ॥ अथाभिमुखमायांतं दैत्यं दृष्ट्वा धनाधिपः ॥ ९२ ॥ बन्धूकसंनिभाविष्टः प

लापनपरायणः॥ततःपलायनस्तस्यमुकुटोरत्नमंडितः॥९३॥पपातभूतलेदीप्तोमहोल्केवतदांबरात्॥शूरा
णामभिजातानांमत्तयस्तुपरस्तेरणात्॥९४॥मन्तुंसंग्राममभिरासिमुक्तंतद्दूषणायतः॥इतिव्यवस्यदुर्धर्षानाना
स्त्रास्त्रपाणयः॥९५॥युयुत्सवःस्थितापक्षामुकुटंपरिवार्यतं॥अभिमानधनावीराधनदस्यपदानुगाः॥
९६॥तानमर्षाच्चसंप्रेक्ष्यदानवाश्चंडपौरुषः॥तुमंदीजैरवाकारांग्रहीलासौजगौरवं॥९७॥दक्षिणेमुकु
टस्यापनिष्पेषेषनिशाचरः॥तान्नपुष्यादपदनुजोमुकुटंतस्यकेरघे॥९८॥समारोप्यामरारिस्तुजित्वा
धनदमाहवे॥९९॥धनानिरत्नानिचमणिमंतितथापिधानानिवारीरवंति॥आदायसर्वाणिजगाममैदै
त्यांजंभःस्वसैन्यंदनुजेंद्रसंघः॥१००॥धनाधिपोविप्रतिकोसमूधजोजगादीनस्तुरजन्नरंतिकं॥१००॥कु
जंभेनाथसंसक्तारथीचरनंदनः॥मायाममोधामाश्रित्यतामसीराक्षसेश्वरः॥१०१॥मोहयामासदैत्यें
द्रंजगत्कृत्वातमोमयंततो॥विफलनेत्राणिदानवानांफलानिच॥१०२॥नशेकुश्चालितुंकुत्रपदादपिपदंततः॥
ततोनानास्त्रवर्षैरादानवानांमहाचमूं॥१०३॥जघानघननीहारतिमिरातुरवाहनां॥वध्यमानेषुदैत्येषुकु
जंभेमूढचेतसि॥१०४॥महिषोदानवेंद्रस्तुकल्पांतांभोदसंनिभः॥असृजच्चकारसोप्यत्रउल्कासंघातमंडितं॥ राम०
१०५॥विजृंभत्यसावित्रेपरमास्त्रंप्रतापिनि॥प्रणाशमगमत्तीव्रंतमोघोरमनंतरं॥१०६॥ततोस्त्रविस्फुलिंगांक २४०

नमःकृत्स्नंव्यजायत॥प्रोत्फुल्लारणपद्मौघंशारदीवामलंशारः॥१०७॥ततस्तमसिसंभ्रांतेदैत्येंद्रःप्राप्तच
क्षुषः॥चक्रुःक्रूरेणमनसादेवानीकंमहाद्भुतं॥१०८॥शास्त्रैरमर्षात्तिस्तुकैर्भुजगास्त्रविनोदितं॥अपादाय
धनुर्घोरमिषुनासीविषोपमा॥१०९॥कुजंभोधावक्षिप्रंरक्षोराजरथंप्रति॥राक्षसेंद्रस्तमायांतंक्लिनोकूसप
दानुगं॥११०॥विव्याधनिशितैर्बाणैःक्रूराग्नीविषभूषणैः॥आदानंचसंधानंनमोक्षंचास्यलक्षते॥१११॥चिछे
दतैःशरप्रांब्रातैस्त्रान्शरानतिलाघवात्॥ध्वजंशरेणतीव्रेणनीचकर्णमिरद्विषः॥११२॥सारथिंचास्यनद्ने
नरपुनीडादपाहतं॥कुजंभःसवतंदृष्ट्वाराक्षसेंद्रस्यसंयुगे॥११३॥रोगरक्तेक्षणायुगोरथादाल्प्लुत्यवच॥
खड्गंजग्राहदुष्टात्माशारदंबरनिर्मलं॥११४॥चर्मचोदंग्रखंडेंदुदशाकेनविभूषितं॥अभ्यद्रवद्रणेदैत्योरक्षो
धिपतिमोजसा॥११५॥तंरक्षोधिपतिःप्राप्तंमुद्गरेणाहनद्धृतिं॥सतुतेनप्रहारेणक्षीणःसंभ्रांतमानसः॥११६
नष्टावष्टंभोदनुजोपथाधीरोधरः॥समुत्पत्यामाश्वस्तोराक्षसेंद्रोतिदुर्जयः॥११७॥एतस्मिन्नंतरेदेवोवरुणो
पांपतिर्द्रुतं॥पाशेनदानवेंद्रस्यबबंधाशुभुजद्वयं॥११८॥ततोबद्धभुजंदैत्यंविफलीकृतपौरुषं॥ताडयामासग
दयाउत्सृज्यमहिषासुरं॥११९॥आरक्तवदनोगानिसृक्तमैद्धत्सुराधुजो॥निष्कृतिवरुणंचैवतीक्ष्णदंष्ट्रोत्कटा
ननः॥१२०॥तावभिप्राप्यमालक्ष्यतस्यदैत्यस्यदूषितं॥लक्ष्मारपथयंजीतोमहिषस्यातिरंहसः॥१२१॥विमर्दुतो

जरायुक्तासुजाभ्यांनयविह्वलौ॥जगामनिष्कृतिःक्षिप्रंशरणंपाकशासनं॥२२॥कुवलमहिषोदैत्योवरुणंसम
भिद्रवन्॥समंतकमुखासन्नमान्योक्यहिमदीधितिः॥२३॥चक्रेसोमोस्तुतिःपिष्टदिगसंधातसंकटं॥अयपवमा
नुमतुलंचंद्रमक्कमतीयकं॥२४॥वायुनातेनचंद्रेणसंस्तंभकेणछिन्नपौरुषः॥नशेकुस्थितुंतत्रशरणा
दातुमेवच॥२५॥महाहिमनिपातेनशस्त्रैश्चप्रचोदितैः॥गणानांसुरसैन्यानांसुदत्युंतसमंततः॥२६॥महे
षोभिःप्रयत्नस्तुशीतेनकंपिताननः॥कक्षावलंब्यपाणिस्वासुपविष्टोह्यधोमुखः॥२७॥सर्वेतेनिःप्रतीका
रादैत्यसंग्रामेजितः॥रणेछांदरतस्यक्रांतस्तुक्तातस्तुस्तेजोविनाकृताः॥२८॥तत्राब्रवीत्कालनेमिर्दैत्या
नकोपेनदीपितः॥मानोमृगापिणःशूराःसर्वशास्त्रास्त्रपारगाः॥२९॥एकैकोपिजगत्सर्वंशक्तस्तुलयितुंभु
जैः॥एकैकोपिक्षमोग्रस्तुंजगत्सर्वंचराचरं॥३०॥एकैकस्यापिपर्याप्तानसर्वेपिदिवौकसः॥कलाःपूर्णपि
तंयपन्नस्योउशीमतिविक्रमाः॥३१॥किंभयाताश्चतिष्ठध्वंसमरेपरिवर्जिताः॥नयुक्तमितिशूराणांविशेषादि
त्यजन्मनां॥३२॥राजानेदितिजोस्माकंतारकोलोकतारकः॥विरतानांरणादस्मात्क्रुद्धःप्राणान्हरिष्य
ति॥३३॥शीतेननष्टश्रुतयोभ्रष्टवाक्यरुचस्तथा॥मूकास्तथाभवन्दैत्यारणादर्शनविह्वलाः॥३४॥तान्
दृष्ट्वानष्टचेतनकान्दैत्यान्शीतेनसादितान्॥पश्चात्कालजुषमंकार्येकालनेमिर्महासुरः॥३५॥आश्रित्य

दानवींमायांदिनित्यस्त्वमहापुराः॥पूरयामासगगनंदिशोविदिशएवच॥३६॥निमेषात्तदानवेंद्रोसौशारीरेभा
स्करासुतं॥दिशश्चमाययाचंडैःपूरयामासपावकैः॥३७॥ततोज्वालाकुलंसर्वंत्रैलोक्यमभवत्तदा॥तेनज्वा
लासमूहेनहिमांशुरगमत्क्षयं॥३८॥ततःक्रमेणविश्वेषांशीतदुर्दिनमावभौ॥तद्बलंदानवेंद्राणांमाययाका
लनेमिनः॥३९॥तद्दृष्ट्वादानवानीकंलब्धसंज्ञोदिवाकरः॥उवाचचासमुद्भ्रान्तस्त्रकोपात्तलोकैकलोचनः॥
४०॥दिवाकरउवाच॥वाहारुणरथंशीघ्रंकालनेमिर्यतःपतः॥विमर्दस्तत्रविषमोभविताशूरसंक्षयः॥
४१॥स्थितएकाशांकेतत्रयत्रयंवलमाश्रितः॥स्तुत्यश्चोदयामासरथंगरुडपूर्वजः॥४२॥प्रियान्त
विधृतेरश्वैःसितचामरवाजिभिः॥जगद्दीपोथभगवान्जग्राहविततंधनुः॥४३॥ग्राशैचक्रोमहाभागोविष
मान्नाविषयुती॥शंबरास्त्रेणसंधायबाणमेकंससर्जसः॥४४॥द्वितीयमिंद्रजालेनयोजितप्रमुमोचह॥
शंबरास्त्रेणरूपाणांक्षणाच्चक्रेविपर्ययं॥४५॥देवानांदानवंरूपंदानवानांचदैविकं॥मत्वापरान्स्वका
नेवजघ्नुर्घोरास्त्रबलापवान्॥४६॥कालनेमिक्षयोदग्रःकृतांतइवसंक्षये॥कांश्चितखड्गेनतीक्ष्णेनकां
श्चिन्नाराचवृष्टिभिः॥४७॥कांश्चिद्गदाभिर्घोराभिःकांश्चित्घोरैःपरश्वधैः॥४८॥शिरांसिकेषांचिद
पातयत्समंकांश्चिद्याश्चोद्धरयाश्चवेगतः॥कांश्चित्पिपेषपरयाश्चवेगात्कांश्चिद्रुष्टोकृतमुष्टिपा

म०पु०
२४३

तेः॥४८॥रणेविनिहतान्दृष्ट्वानिमिस्तान्दानवाधिपः॥रूपंस्वनंप्रपद्यंतेत्यसुराधर्षितामताः॥४९॥का
लनेमिरुषाविष्टास्तेषांरूपंतंवुष्टवान्॥निमिर्दैत्यस्तुतान्दृष्ट्वाकालनेमिमुवाचह॥५०॥माहक्षिचसुरेरेते
कालनेमीवदवमां॥नाविनामोहितोत्यातैर्निहतास्सुरविक्रमैः॥५१॥दैत्यानांदशलक्षाणिदुर्जयानांरा
तैरिह॥सवास्त्रधारणांमुंचत्रात्मसमस्त्वतरान्वितः॥५२॥सतेनबोधितोदैत्यःसंभ्रमाकुलचेतनः॥योजपा
मासबाणेनब्रह्मास्त्रविदितेनचराचरं॥५३॥मुमोचबाणंदैत्येंद्रास्त्रस्वयंसुरकंटकः॥ततःसुतेजसाव्या
प्तंत्रैलोक्यंसचराचरं॥५४॥देवानांचमवेत्सैन्यंसर्वमिवरुषान्वितं॥वैबरास्त्रंचसंइतंस्वयमायोधनेवौ
नौ॥५५॥तस्मिन्प्रतिहतेशस्त्रेब्रह्मष्टतेजादिवाकरः॥महेंद्रजालमाश्रित्यचक्रेस्वांकोटिशस्तनुं॥५६॥वि
स्फुरद्रश्मिसंघातसमाक्रांतंजगत्त्रयं॥ततापदानवानीकंजलंमज्जोघन्नोणितं॥५७॥ततगसाव्वदस्तत्ततेसमं
तादसंहते॥चक्षूंषिदानवानांचचकारांधानिवप्रभुः॥५८॥गजास्तावगलन्मदाःपेतुश्चापिरथाभुवि॥तुरं
गमाःक्षणंतस्यप्रमस्ताराघिनोपिच॥५९॥इतश्चेतस्यसलिलंप्रार्थयितस्तृषातुराः॥सछायादिष्टपांश्चैवगिरी
णांगहनानिच॥६०॥तेषांप्रार्थयितांशीतंद्रुमांतरविसर्पिणीं॥दानवान्निर्ज्वलंस्तीव्रोघोषाग्निदग्धपादपः राम०
६१॥तोयार्थितःपुरोदृष्ट्वातोयंकल्लोलमालितं॥पुरस्थितमपिप्रापुंस्तुरंगाश्चसमार्पिता॥६२॥स्थितारमंतो २४२

ततःसमेतरूपीतुकालनेमिर्महासुरः॥शास्त्रवृष्टिंववर्षोग्रांदेवानांकेतुदुर्जयां॥६३ ७५

धावंतोमलकुतवसासजनाः॥दानवानांसहस्राणिव्रह्स्वपंतमृतानिव॥६३॥संक्षयंदानवेंद्राणांतस्मिन्महति
वर्त्तते॥प्रकोपाद्रक्ततास्याक्षःकालनेमीरुषातुरः॥६४॥स्मनवत्कालमेघांतःस्फुरद्रश्मिवृत्राहृदः॥गंभीरा
स्फोटितिर्ह्रादोजगद्धृदयघाटकः॥६५॥सछागगनाभोगंरविमायांम्पनाशयत॥शीतंवर्षंविसलिलंदानवें
द्रदरम्रदं॥६६॥दैत्यास्तांदृष्टिमासाद्यसमाश्वस्तास्ततःक्रमात्॥बीजांकुरइवाम्लानाप्राप्यवृष्टिंधरातले॥
६७॥तेषांदृष्ट्वादृप्यमानादैत्यास्त्राणांमहौजसां॥गतिकांधिदपरस्पंतागावःशीताहिंतिइव॥६८॥परस्परंव
लीपंतदष्टेषुशस्त्रपाणयः॥स्वेषुबाधाव्यलीयंतगजेषुतुरगेषुच॥७०॥वप्रेषुचमयत्रस्ताःस्तवतत्रविधि
स्थिरे॥अपराकुंचितैर्गात्रैःशंखहस्तापितानना॥७१॥इतश्चेतश्चसंभ्रांताःशत्रुमुक्तोक्ष्मसंवृतिः॥एवंप्रवृत्ते
संग्रामेतुमलेदैवसंक्षये॥७२॥दृश्यंतेपतिताभूमौशस्त्रभिन्नागसंक्षयाः॥विभिन्नाभिन्नाभिन्नमूर्धनि
स्तपाश्छिद्योरुजानवः॥७३॥विस्वस्तध्वजमंगानिःसृष्टध्वजपंक्तयः॥निर्गतैस्तुरंगैस्तैस्तुगजैश्चाचल
सन्निभैः॥७४॥सोमरक्तकर्दमाभूमिर्विक्लितासमजायत॥एवमाजौबलिर्दैत्यःकालनेमिर्महासुरः॥७५॥जघ्ने
मुहूर्तमात्रेणगंधर्वाणांदशायुतः॥यक्षाणांपंचलक्षाणिरक्षसामयुतानिषट्॥७६॥त्रीणिलक्षाणिजघ्ने
चकिंकराणांतपस्विनां॥जघ्नेराक्षसमुख्यानांसप्तलक्षाणिनिर्जया॥७७॥इतरेषामसंख्यातसुरजातिनि

म०पु०
२५३

काषिनां॥ --- कोटीसंकुरुश्छिन्नास्तारणदुर्जया॥७८॥एवंप्रतिचयोमीमोमहामरमहाकुला॥संकुद्धस्त
तमासाद्यरणेघोरःमेकैकंपष्टिभिःशरैः॥७९॥जघ्नेसमंद्रुतीक्ष्णाग्रैरसुरंनीमदर्शनिं॥तांस्तांबाणप्रहारे
स्तुकिंचिदायमुलोचनं॥८०॥जग्राहचक्रमष्टारंतैलधौतसमांतकं॥तेनचक्रेणसोऽस्निस्यांविछेदरथ
कूबरं॥८१॥तान्निपातपतेःशास्त्रैर्जग्राहाथधनुर्दैत्यःशरांस्तानिपिविषोपमान्॥ववर्षशिषजांमूर्ध्निसि
छाद्याकाष्टगोचरं॥८२॥तवप्पातीधितैःशास्त्रैश्चिछेददैत्यसायकान्॥एतत्कर्मतयोर्दृष्ट्वाविस्मितः
कोपमाविशत्॥८३॥महाताम्स्तुकोपेनसंधायपमसादनं॥जग्राहमुद्गरंघोरंकालदंडविभीषणं॥८४
सततोभ्राम्यवेगेनक्षिप्तेषामुखिरथप्रति॥तेदृष्टमुद्गरमायांतमालोक्याबरगोचरं॥८५॥व्युक्काररथौधनुर्वे
त गदोद्रुतौरसाश्विनौ॥तौरथौसतुनिष्पेष्यमुद्गरोचलसन्निभः॥८६॥वारयामासधरणींहेमजालपरि
स्कृतं॥तस्यकर्मापिदृष्ट्वातौभिषजौचित्रयोधिनौ॥८७॥वनंजास्त्रंप्रकुर्वंतौदानवेंद्रनिवारणं॥ततोवज्र
मपेवघ्नावत्रदतिदारुणं॥८८॥घोरवज्रप्रहारैस्तुदैत्येंद्रःसपरिष्कृतः॥रथंध्वजंधनुश्छत्रंकवचंचाति
कांचनं॥८९॥क्षणेनतिलशोजातंसर्वसैन्यस्यपश्यतः॥तंदृष्ट्वादुष्करंकर्मअश्विभ्यांभीमविक्रमः॥नाराय राम
णास्त्रंबलवान्मुमोचरणमूर्धनि॥अस्त्रास्त्रंरामपामासदानवेंद्रास्त्रतेजसा॥९०॥तस्मिन्प्रशांतेवज्रास्त्रे २५३

कालनेमिरनंतरं॥जीवग्राहग्राहयितुंअश्विनौतुप्रचक्रमे॥९२॥तावश्विनौरणेभीतौसहस्राक्षरथंप्रति॥
प्रयातौवेपमानौतुतदाशास्त्रविवर्जितौ॥९३॥तयोरनुगतोदैत्यःकालनेमिर्महाबलः॥ प्येंद्रस्यवलंचक्रेदै
त्यानीकपदानुगः॥९४॥तदृष्ट्वासर्वभूतानिविविग्नेषुविह्वलानितु॥दृष्ट्वादैत्यस्यसतंक्रोधंसर्वभूतानिमेनिरे॥
९५॥पराजयंमहेंद्रस्यसर्वलोकेक्षयावहं॥चेलुःशिखरिणोमुख्याःपेतुरुल्कानभस्तलात्॥९६॥जग
र्जुर्जलदादिक्षुप्रजूताश्वमहार्णवान्॥तान्भूतविकृतिंदृष्ट्वाभगवान्गरुडध्वजः॥९७॥प्रबुध्यदहि
पर्यंकाद्योगनिद्रांपोगनिद्रांविहायतां॥लक्ष्मीकरयुगकरायस्तुलालितांघ्रिसरोरुहा॥९८॥शारदीव
चनीलाब्जकांतरकछविविभुः॥कौस्तुभोद्भासितोरस्कःकांतकेयूरभास्वरः॥९९॥विमृष्यासुरसंक्षो
भंवैनतेयमथाह्वयत॥आहूतेचास्थितंयस्मिन्नानाकारास्त्रवर्षिणि॥२००॥दिव्यनानास्त्रतीव्रार्चिराक
म्यागात्तदाहवं॥तत्रपश्चाच्चदेवेंद्रमभिद्रुतमभिलवैः॥२०१॥दानवेंद्रैर्नवांभोदसच्छयैःपौरुषोत्कटैः॥
यथाहिपुरुषोघोरैर्मार्गेयैश्चवलिशालिभिः॥२०२॥परित्राणायसुकृतंसुधैवेकर्मनिर्मलं॥अथापश्यत्सु
दैत्येंद्रोविपतिंज्योतिनिर्मलं॥२०३॥स्फुरंतमुदयाद्रिस्थसूर्यमुक्तालिपाइव॥मज्जावंतातुमिछंतोदानवा
स्तस्यतेजसा॥२०४॥गरुत्मंतमपश्यंतत्कल्पांतानलभैरवं॥तमास्थितंचधर्मोघालिरविद्युतिसहस्रभं॥२०५

तमालोकपासुरेंद्रस्तु हर्षनिर्भरमानसः ॥ अयं च देवसर्वस्वं जितेस्मिन्निर्जितासुराः ॥२०६॥ अयं सदैत्यचक्रा
णां कृतांतः केशवो रिपुः ॥ एनमाश्रित्य लोकेशा पन्नगाशनगो मराः ॥ ७ ॥ इत्युक्त्वा तु समस्तास्ते परिवा
र्य समं ततः ॥ तेजघ्नुर्विविधैरस्त्रैर्गरुत्मान्तव माहव ॥ ८ ॥ कालनेमिप्रभृतयो दशदैत्यमहारथाः ॥ षष्ट्या
विव्याध बाणानां कालनेमिर्जनार्दनं ॥२०७॥ निमिश्शतेन बाणानां मथनोऽशीतिभिः शरैः ॥ जंभकश्चै
व सप्तत्या शुंभो दशभिरेव च ॥१०॥ शेषा दैत्येश्वराः सर्वे विष्णुमेकैकशः शरैः ॥ दशभिर्दशभिर्येनाजघ्नु
सगरुडं रणे ॥११॥ तेषाममृष्यन्कर्म विष्णुर्दानवसूदनः ॥ तस्माच्छरे संवतो बाणा हृदयेतप्रकांचनाः ॥
१२॥ मयस्त्वा नीवदीप्तानि कौस्तुभस्य स्फुरत्विषः ॥ नैबाणैः किंचिदायस्ता हरिर्जग्राह मुद्गरं ॥१३॥ सतु
ततस्तम्भ्राम्य वेगेन दानवाय व्यसर्जयत ॥ दानवेंद्र समप्राप्तं वियत्येव चाशितैः शरैः ॥२४॥ चिच्छेद तिलशः क्रु
रो दर्शयन्पाणिलाघवं ॥ ततो विष्णुः प्रकुपितः प्रासं जग्राह भैरवं ॥१५॥ तेन दैत्यस्य हृदयं ताडयामास गा
ढतः ॥ क्षणेन लब्धसंज्ञस्तु कालनेमिर्महासुरः ॥१६॥ शक्तिं जग्राह तीक्ष्णाग्रां हेमघंटा हहासिनीं ॥ तया वा
मभुजं विष्णोर्जग्राह विपुलं धनुः ॥१७॥ स पंचदशभिर्नाराचास्तीक्ष्णांश्च मर्मभेदिनः ॥ षड्भिर्दैत्यस्य हृदयं विव्या
ध च शरैस्त्रिभिः ॥१८॥ चतुर्भिः सारथिं चास्य ध्वजं चैकेन पत्रिणा ॥ द्वाभ्यां तु धनुषी चापि भुजं सव्यं च प

त्रिणा ॥१९॥ स विद्धो हृदये गाढं दैत्यो हरिशिलीमुखैः ॥ कररक्तारुणः पांशुपीडाकुलितमानसः ॥२०॥ चकंपे
मारुतेनैव नोदितः किंशुकद्रुमः ॥ तमाकंपितमालक्ष्य गदां जग्राह केशवः ॥२१॥ तां च वेगेन चिक्षेप काल
नेमिरथं प्रति ॥ सा पपात शिरस्युग्रा दिशुर्नो कालनेमिनः ॥२२॥ संचूर्णितोत्तमांगस्तु निष्पिष्टमुकुटोसुरः ॥
संचूर्णितोत्तमांगस्तु निष्पिष्टमुकुटोसुरः ॥ स्रुतरक्तोपरंह स्नुस्रुतधातुश्चिरात् ॥२३॥ पपात स्वे रथे भग्ने
विसंज्ञः शिष्टजीवितः ॥ पतितस्य रथोपस्थे हनवस्थाच्युतो हरिः ॥२४॥ स्मितपूर्वमुवाचेदं वाक्यं चक्रायु
धः प्रभुः ॥ गच्छासुर विमुक्तोसि सांप्रतं जीव निर्भयः ॥२५॥ ततः स्वल्पेन कालेन अहमेव नवांतकः ॥ ग
त श्रुत्वा वचस्तस्य सारथिः कालनेमिनः ॥२६॥ अपवाह्य रथं दूरमानयत्कालनेमिनं ॥२७॥ ॥ इति श्री
मत्स्यपुराणे देवासुरसंग्रामे कालनेमिपराजये ॥ ॥ सूत उवाच ॥ ॥ तं दृष्ट्वा दानवाः क्रुद्धाः संचेलुः से
बलैर्वृताः ॥ सरथाश्वसाक्षीकं हरणो सर्वमादिशो ॥१॥ क्रुधस्थ्या भरजासौ घेसुधाविरचिता कुरो ॥ चित्र
पंचपताके तु ससिंहकरटामुखे ॥२॥ पर्वताभे गजे भीमे मदस्राविणि दुर्धरे ॥ आह्यारुजो निमिदैत्यो हि
रिश्रत्युद्यबलं ॥३॥ तस्यासन्दानवा रौद्रा गजस्य परिरक्षिणः ॥ सप्तविंशति साहस्राः किरीटकवचोज्ज्व
ला ॥४॥ अश्वमारुह्य मथनो जंभकश्चोष्ट्र गहनः ॥ शुंभो विविपुलं मेषं समारुह्य चविज्वलन ॥५॥ अपरे दा

नवैमास्तुरवड्गनानास्त्रपाणयः॥आजघ्नुःसमपकुद्धाविष्णुमक्लिष्टकारिणं॥घापरिघेणनिमिर्दैत्योमयनोमु
ष्टरेणतु॥शुंभःशूलेनतीक्ष्णेनप्रासेनससनस्तपा॥७॥चक्रेणमहिषःक्रुद्धोजंभःशक्त्यामहारणे॥जघ्नुर्ना
रायणंसर्वेशेषास्तीक्ष्णैस्त्वमार्गणैः॥८॥तान्यस्त्राणिप्रयुक्तानिशरीरंविविशुर्हरेः॥युरुक्तानिपदेत्यांस्तुसु
शिष्टायमुक्त्वानिव॥९॥असंभ्रांतोरणेविष्णुरथजग्राहकार्मुकं॥शरांश्चासिविषाकारांस्तेनधोतानिजिह्म
गान्॥१०॥ततोनिसंध्यदैत्यांस्तानाकृष्याकर्णकार्मुकं॥अभ्युद्गवक्रणेकृद्धोदेवारीनतिपौरुषः॥११॥निर्मितिं
व्याधविंशत्याबाणानामग्निवर्चसां॥मयनंदशभिर्बाणैःशुंभंपंचभिरेवच॥१२॥एकेनमहिषंक्रुद्धोविव्याधो
रसिपत्रिणा॥जंभंद्वादशभिस्तीक्ष्णैःसर्वांश्चैकैकरणेष्टभिः॥१३॥तस्ततल्लाघवंदृष्ट्वादानवाःक्रोधमूर्छि
ताः॥घटमानाःप्रयत्नेनचक्रुरत्यद्भुतंरणं॥१४॥जग्राहमुद्गरंघोरंदिव्यंरत्नपरिस्कृतं॥तंमुमोचातिवेगेन
निमिमुद्दिश्यदानवं॥१५॥तमायांतंवियत्येवत्रपोदैत्यद्भुतंरणे॥तापत्समागतान्दृष्ट्वाप्रस्थानेप्रार्थितानि
वा॥१६॥जग्राहमुद्गरंघोरंदिव्यरत्नपरिस्कृतं॥तंमुमोचातिवेगेननिमिमुद्दिश्यदानवं॥१७॥तमापांतंवियत्ये
वत्रपोदैत्यान्यावारयन्॥गदयाजंभदैत्यस्तुयमनःपहिस्रोनतु॥१८॥शक्त्याचमहिषोदैत्यःस्वपक्षजयकां राम॰
क्षया॥निराकृतंमालोकदुर्जनःप्रणयंययौ॥१९॥जग्राहशक्तिमत्युग्रामष्टघंटोत्कटस्वनां॥जंभायतांसमुद्दि २४५

श्यमहिषोरणभीषणः॥२०॥तामंतरस्थांजग्राहजेत्नोदानवनंदनः॥गृहीत्वातांसमालोक्यशिष्यामिवविवेकि
ना॥२१॥दृढंसारमहंसारमन्यदादत्तकार्मुकं॥रोद्राष्ट्रमभिसंधायतस्मिन्बाणान्मुमोचह॥२२॥ततोस्त्रतेज
सासर्वंव्याप्तलोकंचराचरं॥ततोबाणमयंसर्वमाकाशंसमदृश्यत॥२३॥नदिशोविदिशश्चैवबाणजालम
यकृतौ॥दृष्ट्वातस्त्रमाहात्म्यसेनानीग्रसनोसुरः॥२४॥ब्राह्ममस्त्रंचकाराशुसर्वास्त्रविनिवारणं॥ततःशाम्येशा
मयातेरौद्रास्त्रेलोक्यभयस्मरः॥२५॥अस्त्रेप्रतिहतेतस्मिन्विष्णुर्दानवसूदनः॥कालदंडास्त्रमकरोत्सर्वलो
कजयकरं॥२६॥संधीयमानेतस्मिंस्तुमारुतःपरुतःपरुषोववौ॥चकंपेचमहीदेवीभिन्नात्वांबुधयोभवन्॥
२७॥तदस्त्रमुग्रंदृष्ट्वातुदानवायुद्धदुर्मदाः॥चक्रुरस्त्राणिदिव्यानिनानारूपाणिसंयुगे॥२८॥नारायणास्त्रम
सनस्तुचक्रेत्वाष्ट्रंनिमिस्तथास्त्रवरंमुमोच॥एकैकमस्त्रंचचकारजंभस्तत्कालदंडास्त्रनिवारणाय॥२९॥नावृक्ष
पोनेवजघानकोटीर्दैत्येश्वराणांसमजांसहाश्वां॥अनंतरंशांतमभूत्तदस्त्रंदैत्यास्त्रयोगेनतुकालदंडं॥३०॥गं
तसमालोक्यहरिःस्वमस्त्रंसविक्रमेणविपरीतमूर्तिः॥जग्राहचक्रंतपनायुताभंजयंचमार्तंडमिवक्षितीयं॥
३१॥चिक्षेपसेनापतयेनिसंध्यकंतरत्नलंवज्रकठोरमुग्रं॥चक्रंतदाकाशगतंविलोक्यसर्वात्मनादैत्यवराःस्व
वीर्यैः॥३२॥नाशक्नुवन्वारयितुंप्रचंडंदैत्यंयथाक्रमामुधावजंतः॥तमप्रतिक्रमजयन्त्रवर्यैचकंपपातग्रस

नस्कंधे॥३३॥द्विधा तु कृत्वा ग्रसनस्य कर्यं तच्चक्रधारारुणघोरनाभिः॥जगाम भूयोपि जनार्दनस्य पाणिं प्रदहन्
चतुल्यदीप्तिः॥३४॥इति श्रीमत्स्यपुराणे देवासुरसंग्रामे ग्रसनस्य वधः॥सूत उवाच॥॥तस्मिन् विनिहते
दैत्ये ग्रसने बलनायके॥निर्मर्यादमयुध्यंत हरिणा सह दानवाः॥१॥पट्टिशैर्मुसलैः शस्त्रैर्गदाभिः कणपैरपि॥
तीक्ष्णाननैस्तु नाराचैश्चक्रैः शक्तिभिरेव च॥२॥तानस्त्रान्विप्रयुक्तांश्च चित्रयोधी जनार्दनः॥एकैकं शतधा चक्रे
बाणैरग्निशिखोपमैः॥३॥ततः क्षीणायुधप्राया दानवा भ्रांतचेतसः॥अस्त्रैस्ते दानुमभवन्नसमर्था विदारुणे॥
४॥तदा स्वैस्तैर्गजैरश्वैर्जनार्दनमयोधयन्॥समंताच्च दिशो दैत्याः सर्वतः प्रत्ययोधयन्॥५॥बहुकृत्वा रणं
विष्णुः किंचित् श्रांतभुजोभवत्॥उवाच च गरुत्मंतं तस्मिंस्तु तुमुले रणे॥६॥गरुत्मन् कच्चिदश्रांतस्त्वमस्मिन्ने
वसांप्रतं॥यद्यश्रांतोसि तद्याहि मथनस्य रथं प्रति॥७॥श्रांतोसि च मुहूर्तं त्वं रणाद पसृतो भव॥इत्युक्तो गरु
डस्तेन विष्णुना प्रभविष्णुना॥८॥आससाद रणे दैत्यं मथनं घोरदर्शनं॥दैत्यस्त्वभिमुखं दृष्ट्वा शंखचक्रगदा
धरं॥९॥जघान भिंडिमालेन निशितधारेण वक्षसि॥तं प्रहारमचिंत्यैव विष्णुस्तस्मिन्महाहवे॥१०॥जघान पं
चभिर्बाणैर्मार्गणैर्लोमवाहिभिः॥पुनर्दशभिराकर्ष कृष्टैर्गाढं स्तनांतरे॥११॥विद्धो मर्मसु दैत्येंद्रो हरिबा
णैरकंपयत्॥समुरुत्वंसमाश्वास्य जग्राह परिघं तदा॥१२॥जघ्ने जनार्दनं चापि परिघेणाग्निवर्चसा॥वेष्णुस्ते

न प्रहारेण किंचिदाप्रतिसितोभवत्॥१३॥ततः कोपपरिद्विक्षो गदां जग्राह केशवः॥मथनस्य जघामेखं निष्पिपेषा
पराक्रमतः॥१४॥मेषात्सपातदैत्येंद्रः क्षयकाले जनो यथा॥तस्मिन्निपतिते दैत्ये दानवे वीर्यशालिनि॥१५॥अव
सायं प्रयुर्दैत्याः कर्मत्यपेकाकिनो यथा॥न तेस्त्वष्वसन्नक्षुद्रा नवे षभिमानिषु॥१६॥प्रकोपाक्रांतहस्ताम
हिषो दानवेश्वरः॥प्रत्युद्ययौ रणे रौद्रः स्वबाहुबलमाश्रितः॥१७॥तीक्ष्णधारेण शूलेन महिषो हरिमा
र्दयत्॥शक्त्या च गरुडं हत्वा पृष्ठवान् मरुतं दृढं॥१८॥उत तच्चक्तारुवदनं महाचलगुहानिभं॥यस्तुमिच्छन्
पेदैत्यः स गरुत्मंतमच्युतं॥१९॥अथाच्युतोपि विज्ञाय दानवस्य चिकीर्षितं॥वदनं स्वरयामास दिव्यैरस्त्रैर्म
हाबलः॥२०॥महिषस्याप्रमम्रजे बाणौघं गरुडध्वजः॥पिधाय वदनं दैत्यस्य दिव्यास्त्रैः परिमंत्रितैः॥२१॥
सतैर्बाणैरभिहतो महिषोचलसंनिभः॥परिवृत्य निकोपो यपपातच्चसमारचा॥२२॥महिषं पतितं दृष्ट्वा भू
मौ प्रोवाच केशवः॥महिषासुर मत्र त्वं इंधनास्त्रैरिहाचितैः॥२३॥योषिद्वधः पुरोक्तासि साक्षात्कमतयो
निता॥उत्तिष्ठ जीवितं रक्ष गच्छास्मान् संगरात् द्रुतं॥२४॥तस्मिन्परीसुरवे दैत्ये महिषे श्रेष्ठे भदानवः॥संद
ष्टौष्ठपुटः कोपात् भ्रकुटीविकृताननः॥२५॥निष्पिष्य पाणिना पाणिं धनुरादाय भैरवं॥सज्यं चकार
स धनुः शरांस्तु भुजगोपमान्॥२६॥स चित्रयोधी दृढमुष्टिघाती समस्तबविष्णुं गरुडं च दैत्यः॥बाणैर्नवबुद्धिः

शिरवानिकार्द्रौः क्षिप्रैः प्रसंख्यैः परितो गृहीतः ॥२७॥ विष्णुस्तु दैत्येंद्रशराहितोहि चक्रंसमादत्तकृतांततुल्यं ॥ तया
ऽस्त्राण्यस्य पिपेष मेषं भुग्नं चशरांतु धरणीधराभं ॥२८॥ तस्माद्यथाज्ञत्यइताफ्रमेषाम्मोपदातिर्दनुजाधिपः
सः ॥ ततः सत्रस्वस्य हरिः सघोरान्मुमोच कालानलतुल्यपासः ॥२९॥ शरैस्त्रिभिस्तस्य भुजं बिभेद षड्भिश्च शीर्ष
दशाभिश्च केतुं ॥ विष्णुर्दिकिष्टैः श्रवणा वसानं दैत्यस्य दैत्यं विनिहत्य नेत्र ॥३०॥ सते न दैत्यो व्यथितो बभूव दैत्येश्च
रोविप्लुतशोणितौघः ॥ ततोस्य किंचिच्चलितस्य धैर्यात् उवाच संख्ये सतु शार्ङ्गपाणिः ॥३१॥ कुमारिवध्योसिर
णं विमुंवस्त्रं नासुरः त्वस्यतरैरहोमिः ॥ वर्धन मन्नो हसि गच्छ मूढ तपैवकिंयुफसमुत्सुकोसि ॥३२॥ श्रुत्वैव
धं विष्णुमुखान्निशम्य निशिः स संख्ये समिये प्रविष्टुं ॥ गदाम घोद्यम्य निमिः प्रचंडां जघान गाढं गरुडं सरव
स्त्रः ॥३३॥ वासांसि देवाद्युधुदुः परे तु दध्मुश्च शंखान् कगो मुखौर्घन् ॥३३॥ अथ संज्ञामवाप्याशु गरुडोपि स
केशवः ॥ पराङ्मुखो रणात्तस्मात्पलायन महाजवः ॥३४॥ ॥ इति श्रीमत्स्यपुराणे देवासुरसंग्रामे विष्णुपलाय
नो नाम ॥ ॥ सूत उवाच ॥ ॥ तमालोक्य पलायंतं विच्छ्रष्टध्वजकार्मुकं ॥ हरिं देवं सहस्राक्षो मेनेजय्यान्सुरानपि
१॥ दैत्यांश्च मुदितान्दृष्ट्वा नर्दमाना ध्यगच्छत ॥ अथ पोनिकटं विष्णोः सुरेशः पाकशासनः ॥२॥ उवाच चैनम
धुरंभोत्साहपरिबृंहकं ॥ किमेभिः क्रीडसे देव दानवैर्दुष्टमानसैः ॥३॥ दुर्जनैर्लब्धरंध्रस्य पुरुषस्य कृतः क्रिया

शक्रेनोपेक्षितो जीतो मन्यते बलमाश्रितः ॥४॥ तस्मान्नीचं मतिमान्गृहीतं हि न संत्यजेत ॥ अपाग्रेसुरसंप
न्मारव्धितोजयमाप्नुयुः ॥५॥ कुष्टस्त्वमभव तस्मरो हिरण्याक्षवधेप्रजो ॥ हिरण्यकशिपुर्दैत्यो वीर्यशालीमदोद्ध
तः ॥६॥ तं प्राप्य च यथानस्मादसुरो विषमाकृतिः ॥ त्वमं प्रतिबलो येवं दैत्येंद्रा सुरविद्विषः ॥७॥ विष्णो ते नक्र
तालतां स्वत्नाद्वपावकं ॥ युगे युगे च दैत्यानां त्वमेवांतवरो हरे ॥८॥ तथैवाद्य वमत्तानां नवविष्णो सुराश्रयः ॥
एवं प्रबाधितो विष्णुर्व्यवर्धत महासरः ॥९॥ बलेन तेजसाह ध्यास वन्हिताश्रयो रिहा ॥ अथोवाच सहस्राक्षं क
लक्ष्ममधोक्षजः ॥१०॥ दैत्येंद्रः स्वैर्यथोपायैः शक्राहं तु हिनाम्यतः ॥ दुर्जयस्तारको दैत्यो मुक्त्वा सप्तदिनं
विश्रुं ॥११॥ कश्चिच्छ्रुवेच्छतां प्राप्तोवधाल्यस्य कुमारकात् ॥ जंभस्त्ववध्यतां प्राप्तो दानवः क्रूरविक्रमः ॥१२॥
तस्माद्वीर्येण दिव्येन जघ्ने जंभं जगद्धरं ॥ अवध्यः सर्वभूतानां त्वामृतेस तु दानवः ॥१३॥ मयाद्य तोरणे जंभं न
गत्कंटकमुद्धरं ॥ तद्दैत्यं कुञ्जवचः श्रुत्वा सहस्राक्षो मरारिहा ॥१४॥ समादिशत्सुरान्सर्वान्सैन्यस्य रचनां प्रति ॥
यस्मारं सर्वजीकेषु वीर्यसतपसोपि च ॥१५॥ तदेकादशरुद्राश्च चकाराग्रेसरान्हरिः ॥ व्यालभोगांगदो नद्धा
स्फलिनो नीलकंधराः ॥१६॥ चंद्ररेखंडन्न मुंडा नामंडितोरुशिखंडिनः ॥ मूलज्वालावलिप्तांग भुजमंडलभैर
वाः ॥१७॥ पिंगोत्तुंगजयजटाः सिंहचर्मांगसंगिनः ॥ कपालीशादयो रुद्रा विद्राविंतमहासुराः ॥१८॥ पाकंबीपि

गलोभीमोविरूपाक्षोविद्योहित॥अजेशः शासनः शास्ता शंभुश्चंडकुशस्तथा॥१९॥एतेकादशानंतबलफल
प्रकाशिनः॥पालयंतोबलस्याग्रेदारयंतश्चदानवान्॥२०॥आप्याययंतस्त्रिदशान्विगर्जंतिस्वांबुदाः॥
हिमाचलाभेमहतिकांचनांबुरुपास्रजि॥२१॥प्रचलच्चामरेहेमघंटासंघातमंडिते॥ऐरावणेचतुर्दंतेमा
तंगेमत्तसंस्थिते॥२२॥महामदजलस्रावेकामरूपेशतक्रतुः॥तस्थौहिमवतःशृंगेमानुमानिवदीप्तिमा
न्॥२३॥तस्यारक्षत्यदंसव्यंमारुतः॥शतविक्रमः॥रणेपोऽपरमग्निस्तुत्वालापूरितदिङ्मुखः॥२४॥पृष्ठ
रक्षोभवद्विष्णुःससैन्यस्यशतक्रतोः॥आदित्यावसवोविश्वेमारुतश्चाश्विनावपि॥२५॥गंधर्वाराक्षसा
यक्षाःसकिंनरमहोरगाः॥प्रसाधिताःशास्त्रविशादधानाहेमभूषणाः॥२६॥कोटिशःकोटिशःकृत्वा
वृंदंचिह्नैत्यलक्षिणि॥विश्रावयंतःस्वांकीर्तिंबंदिवृंदाःपुरःसरैः॥२७॥चेलुस्तुदैत्यवधेहृष्टाःसहेंद्राःसु
रजातयः॥शतक्रतोरमरनिकायपालितापताकिनी॥२८॥गजरथवाजिनादीप्तामदोल्लताःसवज्रपाः॥को
टिमंडिताबभूवसादिनीशोकवर्धिनी॥२९॥आयांतींतांविलोक्याथसुरसेनांगजासुरः॥गजरूपोमहामोद
संहतामाधिजैरव॥३०॥परस्वधायुधादैसोदशानानागसंकटः॥ममर्दचरणैर्दैर्किंविक्षेपाशापात्करेणवा॥३१
परान्परश्चनाजघ्नेदैत्येंद्रोरौद्रविक्रमः॥तस्यपालयतःसेनांयक्षगंधर्वकिन्नराः॥३२॥मुमुचुःसंहताःसं

हताःसर्वेचित्रशस्त्रास्त्रसंहता॥परान्परस्तधांश्चक्रुर्भिंडिमालान्समुद्गरान्॥३३॥कुंतान्प्रासानसीन्श्री
क्ष्णान्मुद्गरांश्चापिदुःसहान्॥तान्सर्वान्सोग्रसद्दैत्यःकवलानिववृषपः॥३४॥प्रकोपास्फालिदीर्घश्चकरा
स्फोटेनपातयन्॥विचचाररणेदेवान्दुःप्रेक्ष्योगजदानवः॥३५॥यस्मिन्यस्मिन्निपततिसुरवृंदेगजदानवः॥
तस्मिंस्तस्मिन्महाशब्दोहाहाकारकृतोभवत्॥३६॥अथविद्रवमाणंतुबलंप्रेक्ष्यसमंततः॥रुद्राःपरस्परं
प्रोचुरहंकारोत्थिताद्विषः॥३७॥नोनोगच्छतिदैत्येंद्रोभिद्यतांयेनमुह्यासुरः॥घावितैःनिशितैःशूलैस्तंजघ्नेनं
हिममस्तु॥कपालीवाक्यमाकर्ण्यशूलंसितशातासुरं॥समाप्यमौंवाहस्तेनसंरंभविवृत्तेक्षणः॥३९॥अ
घागात्सकुटीचक्रोदैत्येंद्राभिमुखोरणे॥दृढेनमुष्टिबंधेनशूलंविष्टभ्यनिर्मलं॥४०॥जघानकुंजरेशेतुक
पालीगजदानवं॥ततोदशापितेरुद्रानिर्मलायोधुखेरणे॥४१॥जघ्नुःशूलैस्तुदैत्येंद्रंशैलवमणिमाहवेस्तु
तःशोणितरंध्रःसनीलशूलमुखार्पितः॥४२॥बभौकृष्णच्छविर्दैत्यःशरदीवामलंसरः॥प्रोत्फुल्लारुणनी
लाब्जसंघातैःसर्वतोदिशं॥४३॥तस्यश्रुकृतमुच्छायेरुद्रेहंसैरिवाहृतं॥उपस्थितास्त्रिदैत्योपमचलकमपिध्र
वः॥४३॥कुंभंबिभेदहत्वातेनीतिदेशोगजासुरः॥दृष्ट्वाचशंकिरुद्राप्यानवरुद्रास्ततोद्रुतं॥४४॥ततस्तुविविधैः
शस्त्रैःशरीरममरद्विषः॥भ्रामयामासचातीववेगेनचगजासुरं॥४५॥दृष्ट्वाभ्रमातुरंदैत्यंकिंचित्स्फुरितजी

वितं॥निरुत्साहं रणे तस्मिन् गतयुद्धोत्सवोद्यमं॥४६॥ततः पततयेवास्य चमवी त्कल्पमैरवाः॥स्ववत्सर्वांगरक्तौ
घं चकारांबरात्मनः॥४७॥दृष्ट्वा विनिहतं दैत्यं दानवेंद्रा महाबलाः॥विनेदुर्दुदुभुर्जघ्नुर्निपेतुश्च सहस्रशः
४८॥हस्ताकपालिनो रूपं गजचर्मांबरावृतं॥दिक्षु भीमं ततो योगं रुद्रं दैत्या अलोकयन्॥४९॥एवं विनिह
ते तस्मिन्दानवेंद्रे महाबले॥द्विपाधिरूढो यदैत्येंद्रो हत दुंदुभिना ततः॥५०॥कन्यातंबुधरो सेनदुर्धरेयापि
दानवः॥निमिस्तत्रापि तन्मूर्ध्नि सुरसैन्यान्यलोड्यत॥५१॥यायां निमिगजा याति दृष्टांतानां च वाहनः॥तत्सुदु
दुदुवुर्देवाश्च यात्रास्थिकहेतयः॥५२॥गंधेन सुरमातंगाद्दुद्रुवुस्तस्य हस्तिनः॥पलायमाने सैन्ये तु सुराणां
पाकशासनः॥५३॥तस्थौ दिक्पालकैः सार्द्धमिष्टैः केशवेन च॥संप्राप्तो निमिमातंगो यावच्छक्रगजं प्रति॥५४॥
तावृच्छक्रगजो भीतो मुक्त्वा नादं सुभैरवं॥ध्रियमाणोपि यत्नेन सरणेनावधिष्ठितः॥५५॥पलायति गजे तस्मिन्ना
रूढो पाकशासनः॥विपरीतमुखो युद्धात् दानवेंद्रवधं प्रति॥५६॥शतक्रतुस्वचक्रेण निमिं वक्षस्यताडयत्॥
गदया दंतिनं तस्य गंडस्थाने हतं दृढं॥५७॥तन्महारमचिंत्यं मे वनिमिर्निश्चलपौरुषः॥ऐरावणं कटी हेतो सुक्ष्मरे
णाभ्यताडयत्॥५८॥सहतेसुम रेया पन्नाक कुंजरश्चाहवे॥जगाम पतश्चाथ रणे धरणीं भूधरा कृतिः॥५९॥ राम॰ २४९
लाघवाक्षिप्रमुत्थाय ततो मरमहागजः॥रणे दर्पमसर्वं किं नीपितो निमिहस्तिना॥६०॥ततो वायुर्ववौ रूक्षः श्चंड:

श्चकरपांसुलः॥संमुखो निमिमातंगपवनाचलकंपितः॥६१॥स्रुतरक्तो बभौ शैलो धनधातुरुदे यथा॥धनदोपि
गदां तु गुर्वीं तस्य दानवहस्तिनं॥६२॥चिक्षेप हस्ताद्दैत्येंद्रं निपपातास्य मूर्धनि॥ततो गदानिपातेन सततेनप
रिमूर्छितः॥६३॥दंतैर्निर्त्वा धरां वेगात् पपाताचलसंनिभः॥स्रुतरक्तो बभौ शैलः सिंहनादो महाबलो॥६४॥
सर्वतः सुरसैन्यानां गजं दृष्ट्वा हितं॥तेषां रथेन चाश्वानां गुणास्फोटनध्वनिः॥६५॥गजं तं निहतं दृष्ट्वा कालकोपे
नशाक्षांश्च इव पावकः॥स सुरान्कोपरक्ताक्षो धनुष्पारोप्य सायकं॥६७॥निमिं वापि पराङ्मुखं॥श्रुत्वा च
सिंहनादं च सुराणामतिकोपनः॥६६॥जंभो जन्वांति श्रेति शाब्रवीत सर्वानसारथिं चास्य नोदयन्॥वेगेन चूल
तस्तस्य तत्रपस्यानवतद्युतिः ६७॥यथादित्यसहस्रस्य तदुपस्यानवद्युतिः॥यथादित्यसहस्रस्य उत्तस्यो
दयाचले॥६९॥पताकिनारथेनाजौ किंकिणीजालमालिना॥असिश्चन्नातपत्रेण सतेन स्यंदनेन तु॥७०॥घट
यन्सुरसैन्यानां हृदयानि च हृदयते॥तमायांतमभिप्रेक्ष्य धनुष्याहितसायकं॥७१॥शतक्रतुरदीनात्मा हृढमा
दत्त कार्मुकं॥बाणं च तैलधौताग्रमर्द्धचंद्रमजिह्मगं॥७२॥तेनास्य सशरं चापं रणे चिच्छेद वृत्रहा॥क्षिप्रं संत्यज्य
तच्चापं जंभो दानवनंदनः॥७३॥अन्यत्कार्मुकमादाय वेगेन शारसाधनं॥शरांश्चाशीविषाकारांस्तैलधौता
नजिह्मगान्॥७४॥अश्रान्तान्दानवेंद्रस्तु शरान्शाक्रभुजेरितान्॥चिच्छेद शतधा काशे शरैरग्निशिखोप

मे ॥७५॥ ततस्सुरराजाजेन देवेंद्रो दानवेश्वरं ॥ आच्छादयत यत्नेन वृषान्विश्व घनैर्नग ॥७६॥ दैत्योपि नागजालेन वध
मत्स्याधकैः शितैः ॥ यथा वायुर्घना टोपं दुर्निवार्यं दिशां मुखे ॥७७॥ शक्रोप्यथाध संरंभान्न विव्रोषयते तदा ॥ दानवें
द्रं तदा चक्रे गंधर्वास्त्रं महाद्भुतं ॥७८॥ ततो स्तेजसा व्याप्तमभूत्खगगनोदरं ॥ गंधर्वकिंनरैश्चापि नानाप्रकारतो
रणे ॥७९॥ मुंचद्भिरद्भुताकारैरस्त्रदृष्टिं प्रयत्नतः ॥ तयास्त्रदृष्ट्या दैत्यानां हन्यमानामहाचमूः ॥८०॥ जंभेशार
मागच्छद्भ्रामयपराक्रमं ॥ व्याकुलोपि पदा दैत्या सह स्वाक्षस्वपीडया ॥८१॥ स्मरन्नसाधुसमाचारंमी
तस्त्रासपरीभवत् ॥ त्र्यंबकास्त्रं मोहनं नाम मुमोच दितिनंदन ॥८२॥ तत्तदा मुशलैः सर्वंश्चवत्पूजितंजग
त् ॥ एकप्रकारकरणैरप्रधृष्टैः समंततः ॥८३॥ गंधर्वमिररत्वेषु गंधर्वास्त्रविनिर्मितान् ॥ गांधर्वमस्त्रं संधाय
सुरसैन्येषु वापरं ॥८४॥ एकैकेन प्रहारेण गजानश्चान्महारथान् ॥ एतांश्चाप्यहनत्त्रिंशत्ततोग्र्यस
हस्त्रशः ॥८५॥ ततः सुराधिपः शक्रस्त्वाष्ट्रास्त्रं समुदीरयन् ॥ संधीयमाने तत्त्वाष्ट्रे निश्चेरुः पावका
र्चिषः ॥८६॥ ततो यंत्रमयान्दिव्यानायुधान्दुःप्रधर्षणान् ॥ तैर्युद्धैरनवद्युद्धमंतरिक्षे वितानकं ॥८७॥
वितानकेन तेनाथ प्रशमं मोहशालेगते ॥ शैलास्त्रं सुमुचे जंभो यंत्रसंघातलेपमं ८८ तं प्रमाणैश्चपाषा
णैस्ततो वर्षप्रवर्त्तिते ॥ त्वाष्ट्रास्त्रजनितान्याशु यंत्राणि तदनंतरं ॥८९॥ ततोपलनिपातेन गगनिविलशास्त्र

तः ॥ यंत्राणि तिलशः कृत्वा शैलास्त्रोपरि मूर्धसु ॥ निपपाताशुवेगेन दारयन् पृथिवीतलं ॥ ततोपत्तास्त्र
मकरोत्सहस्राक्षः पुरंदरः ॥९१॥ शिषीकं नागसेनास वज्रास्त्रं शक्रवल्लभं ॥ विजंजंत्यथ चोक्ता टोकीके पर
मास्त्रे सुदुर्धरे ॥९२॥ जज्वलुः सर्वसैन्यानि सस्यंदनगजानितु ॥ दह्यमानस्यैषीकेन तेजसा सुरसत्तमे ॥
९३॥ आग्नेयं चास्त्रमकरोत् बलहा पाकशासनः ॥ तेनास्त्रेण तदस्त्रं सदनंतरं ॥९४॥ तस्मिन्प्रति खंतद
हते चास्त्रे पावकास्त्रं विजंभति ॥ जज्वलुः कायजं भस्म सरथं च ससारथिं ॥९५॥ ततः प्रतिहता दृष्ट्वा त्वं दै
त्येंद्रः प्रतिमानवान् ॥ वरुणास्त्रं मुमोचाशु शमनं पावकार्चिषः ॥९६॥ ततो जलधराव्योम स्फुरद्विद्युद्ध
ताकुलं ॥ गंभीरमुरजाघातै दिशः सूर्यं समंततः ॥९७॥ करीन्द्रकरतुल्याभिर्जलधाराभिरंबरात् ॥ पत
तीभिरधः सर्वं क्षपेन हरितं बभौ ॥९८॥ शांतमाग्नेयमस्त्रं प्रतिलोक्य सुराधिपः ॥ वायव्यमस्त्रमक
रोत् मेघसंघघातनाशनं ॥९९॥ वायव्यास्त्रेतु मलेषं निधूते मेघमंडले ॥ बभूव विमलंव्योम नीलोत्पलदल
प्रभं ॥१००॥ वायुना चाति रूक्षेण कंपितास्ते तदा नवाः ॥ नाशं कं तत्रते स्थातुं रणेनु बलिनोपि ये ॥१०१॥ त
तोजंभो भवत्स्थूलो दशयोजनविस्तृतः ॥ मारुतः प्रतिघातार्थं दानवानां भयापहः ॥१०२॥ मुक्तनानायुधो
दग्र निर्मुक्ताति जताद्भुमः ॥ ततः प्रशामिते वायौ दैत्येंद्रे पर्वतो ॥१०३॥ महाशनि वज्रमयं मुमोचास्त्रं

म०पु०
२५१

शान्यापतितया दैत्यस्याचलरूपिणः ॥८४॥ कंदराणि वाशीर्यंत समंतान्निर्झराणि च ॥ ततः सा दानवेंद्रस्य शैल स्त
मायाप्यवर्त्तत ॥८५॥ निवर्त्तितशैलमये दानवेंद्रो मयोत्कटः ॥ बभूव कुंजरो भीमो महाशैलसमाकृतिः ॥८६॥ म
मर्द्द चासुरानीकं दंतैश्चाप्यहनत्सुरान् ॥ बभंज पृष्ठतः कांश्चित्कारणाद्वेष्टुदानवः ॥८७॥ ततस्सधनतस्यसु
रसैन्यानि हत्रहा ॥ अथ स्वं त्रैलोक्यदुर्धर्षं नारसिंहं सुमोच हा ॥८८॥ ततः सिंहसहस्राणि निश्चेरुस्तत्र तेज
सा ॥ कृतदंष्ट्राट्टहासनि ककर्शानि नखानि च ॥८९॥ तैर्विपाटितगात्रोसौ गजमायां व्यपादयत् ॥ ततश्चा
शीविषो घोरोभवत्फणशताकुलः ॥९०॥ विषनिश्वासनिर्दग्धसुरसैन्यमहारथः ॥ ततोस्त्रं गारुडं चक्रे
शक्रस्तत्तुर्जंतदा ॥९१॥ ततो गरुत्मतस्तस्मात्सहस्राणि विनिर्ययुः ॥ तैर्गरुत्मद्भिरासाद्य जंभो भुजगरूपधृक् ॥
९२॥ कृतस्तु गरुडादेताः सा स्यमाया व्यनश्यत ॥ नाशयांतु मायायां ततो जंभो महासुरः ॥९३॥ चकार रूप
मतुलं चंद्रादित्यपथानुगं ॥ विवृतवदनो ग्रस्तुमियेष सुरपुंगवान् ॥९४॥ ततोस्य विविश्च वक्त्रं समहारथकुं
जरः ॥ सुरसेनान्यपतत्तभीमापातालोत्तालवात्यकां ॥९५॥ सैन्येषु ग्रस्यमानेषु दानवेन बलीयसा ॥ शाक्रोदी रामः
नत्वमापन्नः श्रांतवाहनवाहनः ॥९६॥ कर्त्तव्यतां नाध्यगच्छत्सो वाचो दंजनार्द्दनं ॥ किमनंतरमेवास्ति कर्त्तव्य २५१
स्यावशेषितं ॥९७॥ यदि श्रिसघटामोस्य दानवस्य पृथुत्सतः ॥ ततो हरिरुवाचेदं वज्रायुधमुदारधीः ॥९८॥ न

सांप्रतं रणं त्यक्त्वा कांकांतरनीतवत् ॥ वध्याचाशु महामायापरं दरिपोस्त्वया ॥९९॥ मयैतत्वक्षितो दैत्यो धिष्ठितः शा
स्त्रपौरुषः ॥ माशक्रमोहमागच्छक्षिप्रमस्त्रं शरप्रभो ॥१००॥ ततः शक्रः प्रकुपितो दानवं प्रतिदेवराट् ॥ नारायणा
स्त्रपाप्रयतोमुमोचासुरवक्षसि ॥१॥ एतस्मिन्नंतरे दैत्याद्विवृतास्योप्यसत्क्षणात् ॥ नीणिन्ऽक्षाणि गंधर्वकिंनरो
रगरक्षसां ॥२॥ ततो नारायणास्त्रं स्वपपातासुरवक्षसि ॥ महास्त्रभिन्नहृदयः सुस्राव रुधिरं बहु ॥३॥ रणराग मिवोक्ष
दं तस्याजासुरनंदनः ॥ नव स्वतेजसा तस्य रूपं दैत्यस्य नाशनं ॥४॥ ततश्चांतर्द्धे दैत्यो विपत्ल्यनातिलक्षितः ॥ गगनस्थः स
देत्येंद्रः शस्त्राशनिमती क्रियं ॥५॥ मुमोचासुरसैन्यानां संहारकरणीपरा ॥ प्रासान्परस्वधान्चक्रानशालान्बा
णान्समुद्गरान् ॥६॥ कुंगरान्क्षुरान् शाडानभिंडमालानयोगुडान् ॥ ववर्ष दानवो रौद्रोत्यव ध्यानक्षयानपि ॥१०७॥
तैरस्त्रैर्दनिवानुक्तैर्देवानांकेषु भीषणैः ॥ बहुभिर्धरणीपृष्ठं शिरोभिश्च सकुंडलैः १०८ ऊरुभिर्गजहस्ता
भैः करीश्चाचलोपमैः ॥ भग्नेषादंडचक्राक्षैरथैः सारथिभिः सह ॥१०९॥ दुःसंचाराभवत्पृथ्वी मांसशोणि
तकर्दमा ॥ रुधिरौघह्रदावर्त्ताशिबराशिशिलोच्चया ॥११०॥ कबंधनृत्यसंकुलेसुबहुसांद्रकर्दमा ॥ जगत्र्
येपि सहते सम्यो समस्तदेहिनां ॥११२॥ श्रृगालगृध्रवायसाः परप्रमोदकाः ॥ क्वचिद्विकृष्यलोचनं शवस्य रौ
विवापसः ॥१२॥ कचिद्विकृष्य पीवरांत्रकः प्रयाजितं बुकः कचित् ॥ स्थितो ति भीषणं कनित् चुचुंबुरर्दितो

रसः॥११३॥मृतस्य नाम आहूय कश्चित्स्वजातिसंस्थितः॥कश्चिद्वृंदमजासंकं पपौ प्याजीयुतासवः॥११४॥क
श्चित्तुरंगमं उलंतं स्तुयुष्यते स्वजातिमंडिभिः॥कश्चित्त्रिशाचजातकैः प्रपीतश्शोणितोत्सवैः॥११५॥स्वकामिनी
युतैर्हतः क्रोष्टामोदिभिः॥ससंभ्रमैर्मर्मैवृदावनीतं कुवेरायमस्तु मे प्रियाः॥१६॥करोयमाकृसन्निमोमम
स्तुकष्टपूरका॥समाषमीक्षिता पराचपाविताप्रिये तया॥११७॥अपायय न्मुदापरास्नेहशोणितासदा॥
स्तुपायने नराधसाः॥मृताक्षकेशवं म्हतास्थिरप्रगल्भपाणिना॥१८॥प्रियाविमुक्तजीवितात् समान
यास्रजः सेवनं मम तां प्रयाति मे॥११९॥गतं ममाशानसामिषं नरस्य सां जहात्यसौ॥अपश्यकिंनरान रंसरा
गतेषु नोजयं॥२०॥दधाति मुक्तजीवितोन दानवस्य शिष्यते॥मयातुमेकपानुनुशतप्रिया प्रियवल्लभं॥२१
वदंति यक्षमार्यः परे कपालपाणयः॥पिशाचयक्षराक्षसा वदंति देहि देहि मे॥२२॥ममेति भैक्ष्यचारिणः
परेपरेति शोणितैर्दिवासुधोनमूर्तयः॥पितृतर्पदेवतासमर्चयंत चामिषैः॥२३॥गजोडुपैः सुसंस्थितास्त
रंति शोणिताप्रदान॥इति प्रगाढसंकटेसुरासुरे स संकरे॥१२४॥भयं समजयद्दुर्जयाभटाः स्फुरंतिसादि
ताः॥ततः शक्रो धनेशश्च वरुणः पवनोनलः॥२५॥यमोयं निर्ऋतिश्चापि दिव्यानस्त्रान्महाबलः॥आक
शोमुमुचुः सर्वे दानवाभिमुखं ततः २६ अस्त्राणि मयश्शांजग्धुर्देवानां दानवं प्रति॥संरंभेपातिहिं मेतामह

तास्तुशाले न च॥२७॥गतिं न विविदुस्थापि भ्रांता दैत्यस्य देवताः॥दैत्यास्त्रभिन्नसर्वांगा न किंचित्करतां गताः॥२८
परस्परं अकंपतागावः शीतार्दिताइव॥तदवस्थं न हरिर्दृष्ट्वा देवः॥२९॥अप्रास्त्रं स्मरदेवेंद्रयस्य वंधोनविध
ते॥विष्णुनानोदितः शक्रः सस्मारास्त्रं महौजसां॥३०॥संपूजितं दिवामरातिनाशनं समाहितं बाणमभि
त्रनाशनं॥धनुष्याधृष्यं विनियोज्य बुद्धिना सस्मार मंत्रं च समाधिमानसः॥३१॥समंत्रमुज्ज्वालयितोज
नाश्रयेव धाय दैत्यस्य धियाभिसंधितं॥विकृष्य कर्णांतम कुंठदीधितिं मुमोच वीक्ष्यां बरमार्गमुन्मुखः
॥३२॥अथासुरः प्रेक्ष्य महास्त्रमाहितं विहाय मायाम वलोक्य पतिष्टतः॥प्रवेपमानेन मुखेन शुष्यता बलेन
गात्रेण च संभ्रमाकुलः॥३३॥ततोसातस्यास्त्रवराभिमंत्रितः शिरोर्द्धचंद्रप्रनवं महारणाः॥पुरंदरस्याम
रवध्यतां गतो नवार्कबिंबं वपुषा विडंबयन्॥३४॥किरीटिकूटस्फुटकांतिसंकुलं सुगंधिनाना कुसुमा
धिवासितं॥प्रकीर्णधूमज्वलनाभिमूर्धजं पपात जंभस्य शिरः सकुंडलं॥३५॥तस्मिन्विनिहते जंभे दा
नवेंद्राः पराङ्मुखाः॥सर्वे ते भग्नसंकल्पाः प्रययुस्त्रितारकः॥३६॥तांस्तु त्रस्तान्समालोक्य श्रुत्वा च च
तुरोद्धतान्॥स जंभान् दानवेंद्रास्तु सरैरणमुखे ततः ३७ सावलेपं ससंदर्पं सगर्वं सपराक्रमं॥साहंका
रं स्वसैन्यस्य तारको रोषमाविशत्॥३८ सजेयरथमास्थाय सहस्रेण गरुत्मतां॥सर्वायुधपरिष्कारस

म०पु० वस्त्रिपरिरक्षितं ॥३९॥ त्रैलोक्यऋद्धिसंदिग्धंसुविस्तृतमहाननं ॥ रणायाभ्यपतत्तूर्णंसैन्येनमहतावृतः ॥
४०॥ उग्रास्त्रक्षतसर्वांगंत्यक्त्वैरावणदंतिनं ॥ जैत्रंपातनसंयुक्तंवरमेकाध्यतिष्ठत ॥४१॥ तत्रदेवपरिस्का
२५३ रंस्वसैन्यस्यतारकोरोषमाविशत् ॥ सजैत्रंरथमास्थायसहस्रेणगरुत्मतां ॥४२॥ सर्वायुधपरिस्कारंजै
त्रैपातनसंकुलं ॥ तप्तहेमपरिस्कारंमहारत्नसमन्वितं ॥४३॥ तत्रपदेवराजस्यपरिवार्यसमंततः ॥ दंशि
तालोकपालाश्चतस्थुःसगरुडध्वजा ॥४४॥ ततश्चचालवसुधाततोरुक्षोमरुद्वरौ ॥ ततोबुधयतउद्भू
ताहताश्चैवचरप्रभो ॥४५॥ ततोजज्वालचास्त्राणिततोकंपितबाहवः ॥ ततःसमस्तमुद्भ्रांतंतातोद
द्रूपततारकः ॥४६॥ एकस्तारकोदैत्यःसुरसंघास्तथैकतः ॥ लोकावसानमेकत्रस्थलोकोद्धरणमेकतः
४७॥ जगत्संक्षयमेकत्रजगत्पालनमेकतः ॥ चराचराणिभूतानिसुरासुरविभेदिनः ॥४८॥ तद्धायै
कतांपातंददृशुःप्रेक्षकाइव ॥ यद्धस्तुकिंचिल्लोकेषुविपुसत्तास्वरूपकं ॥४९॥ तत्तत्राहताशेषंखिलीभूत
विभूतिकं ॥ अस्त्राणितेजांतिधनानिधैर्यंशोभाफलंवीरपराक्रमश्च ॥५०॥ सर्वौजिसोतन्निकषंबभूसु
रासुराणांतपसाबलेन ॥ अथाभिमुखमायांतंनवभिर्नवभिस्तदा ॥५१॥ बाणैस्ततरकल्पाग्रैर्विव्याधतार राम०
कंहृदि ॥ सतानचिंत्यदैत्येंद्रःसुरबाणक्षतोहृदि ॥५२॥ सचापिनवभिर्बाणैःसुरान्विव्याधदानवः ॥ जग २५३

धाराणसंभूतैःशल्यैरिवपुरस्सरैः ॥५३॥ ततोच्छिन्नशरव्रातंसंग्रामेमुमुचुःसुराः ॥ अनंतरंचक्रांतानामाशु
पातमिवानिशं ॥५४॥ तदप्राप्तंजयत्येवनाशयामासदानवः ॥ शूरैर्यथाकुचरितैःप्रख्यातपरमांगतिं ॥५५॥
सुनिर्मलंक्रमायांतंकुपुत्रस्तंमहाकुलं ॥ ततोनिवायतिबाणजालंसुरभुजेरितं ॥५६॥ बाणैर्व्योमदिशःपृथ्वीप्र
रयामासदानवः ॥ चिच्छेदसुखदेशोतुस्वकैर्बाणैश्चलाघवात् ॥५७॥ बाणजालैःसुतीक्ष्णाग्रैःकंकबर्हिणवा
जितैः ॥ कर्णांतकृष्टैर्विमलैःसुवृक्षरिजतोज्वलैः ॥५८॥ शस्त्रार्थैश्चापव्रातान्योकास्त्रैर्विकल्पितैः ॥ ततः
शतेनबाणानांशक्रंविव्याधदानवः ॥५९॥ नारायणंचसप्तत्यानवत्याचहुताशनं ॥ दशभिर्मारुतंमू
र्ध्नियमंदशभिरेवच ॥६०॥ धनदंचैवसप्तत्यावरुणंचदशाष्टभिः ॥ विंशत्यानिर्ऋतिंदैत्यःपुनश्चाष्टभिरे
वच ॥६१॥ विव्याधपुनरेकैकंदशभिर्मर्मभेदिभिः ॥ तथासमातलिंदैत्योविव्याधत्रिभिराशुगैः ॥६२॥ ग
रुडंदैत्यराजस्तुदशभिश्चैवत्याशुगैः ॥ अरुणंदशभिश्चैवमहिषंदशभिस्ततः ॥६३॥ पुनश्चदैत्योदेवानां
तिलशोनतपर्वभिः ॥ चकारचर्मजालानिच्छिच्छेदचधनूंषिवै ॥६४॥ ततोविकवचादेवाविधुःक्षारार
क्षताः ॥ अथान्यानिचचापानिरणेतस्मिंस्तुवैशरान् ॥६५॥ सुरलोकपालानीलासमंतात्परिवारयन् ॥ श
रैश्चसत्वरंदेवान्दानवेंद्रःप्रपीडयन् ॥६६॥ ततस्तेदेवताःसर्वेक्रोधसंरक्तलोचनाः ॥६६॥ ततोदानवः

म॰पु॰ क्रोधसंरक्तनेत्रः शरातनिकश्चातान्त्वर्णमिराणां॥बाणान्समादायतथैवतालेजघानमक्षिप्रमिंद्रसुबाहुं।
२५४ ६७॥महेंद्रोपितंपश्यस्थितोपिएवरथस्यापिध्वाग्रेसमोहःपपात॥लोकांतरिक्षसहसाकीर्विंबसुदाश
तोविक्रमोद्भूतवीर्यः॥६८॥शराभ्यांजघानामूलेसलीलाततःकेशवस्योपस्थेशार्ङ्गमग्रेसकंपस्यपी
डापरीतस्यसख्ये॥६९॥ततोस्यारकःरतनायकंठयकृकल्पैःसवक्त्रदंतैःस्मरतक्षुद्भमावं॥शरैरग्नि
कल्पैर्जलेशस्यकालेनरणेज्ञातेयदुर्जयोदैत्यराजः॥७०॥शरैरग्निकल्पैश्चकाराशुदैत्यस्तथाराक्ष
संभीतभीतंदिशंतु॥प्रपक्षैश्वरुक्षैर्विकारप्रयुक्तैश्चकारानलंलीलयैवासुरेशः॥७१॥क्षणालक्ष
चित्रास्त्रपाविष्णुशाक्रातलाघास्तुसंहत्यतीक्ष्णैःप्रषक्तैः॥प्रचक्रुःप्रचंडेनदैत्येनसार्द्धमेहसंगरं
संगरश्यामकल्पं॥७२॥अथानम्यचापंहरिस्तीक्ष्णबाणेर्हतसारथिंदैत्यराजस्यहृद्यं॥ध्वजंधूमके
तुःकिरीटंमहेशाधनेशोधनुःकांचनानद्धरथिंदैत्यराजस्यहृद्यं॥ध्वजंधूमकेतुःकिरीटंमहेशाधने
शाधनुःकांचनानद्धपृष्ठं॥७३॥यमोबाहुदंडंरयोगानिवायुनिशाचारिणामीश्वरश्चापिवर्म॥तंदृ
ष्ट्वाक्षुद्रममरैरक्षात्रियपराक्रमं॥७४॥दैत्यनाथहतेसख्येसुबाहुयुगबांधवः॥मुमोचमुद्ग राम॰
रंभीमंसहस्राक्षायसंगरे॥७५॥दृष्ट्वामुद्गरमायांतमनिवार्यमथांबरे॥तथादाद्भुततरागीम २५४

गमत्याकृशासनः॥७६॥मुद्गरोपिरथोपस्थेपपातपरुषस्वनः॥सरथंचूर्णयामासयत्नात्साचनमातलिं॥७७॥
गृहीत्वापट्टिशंदैत्योजघानोरसिकेशवं॥स्कंधेगरुत्मतःसोपिनिषसादविचेतनः॥७८॥खड्गेनराक्षसेंद्रं
चविचकर्तसवाहनं॥यमंचपातयामासभूमौदैत्याशुमंडितः॥वह्निंचभूमिपालेनताडयामासमूर्धनि॥
वायुंचदोर्भ्यामुत्क्षिप्यपातयामासभूतले॥७९॥धनेशंचधनुःकोट्याकुट्टयामासकोपनः॥ततोदेवनि
कायानामेकैकंसमरेततः॥८०॥जघानास्त्रैरसंख्यातैर्दैत्येंद्रोनमविक्रमः॥लब्धसंज्ञःक्षणात्विष्णुश्चक्रं
जग्राहसत्वरं॥८१॥दानवेंद्रवक्षसिक्रम्यतांशुरवरिकामुखं॥तन्मुमोचासुरेंद्रस्यहृढेवक्षसिकेशवः॥
८२॥पपातचक्रंदैत्यस्यहृदयेभास्करद्युति॥विशीर्यतारकोरस्कंनीलोत्पलमिवावनिं॥८३॥ततोव
ज्रंमहेंद्रोपिमुमोचाचिंतंचिरं॥यस्मिन्जयाशाशक्रस्यदानवेंद्ररणेघ्नभूत॥८४॥तारकस्यससं
प्राप्यशरीरंशतपर्वणि॥प्रशीर्यतविकीर्णाश्वैःशतधाश्चैवतांगतः॥८६॥विनाशनायतन्मुक्तं
वायुनासुरवक्षसि॥ज्वलितंज्वलनाभासंसंकुशंकुशलेशवत्॥८७॥विनाशमागतंदृष्ट्वावायुःस्वा
युधमाहवे॥दंडंशैलेंद्रसुत्याद्यपुष्पितद्रुमकंदरं॥८८॥चिक्षेपदानवेंद्रायपंचयोजनविस्तृतं॥महीं
डीधरंतमायांतंदैत्यःस्मितमुखस्तदा॥८९॥जग्राहवामहस्तेनबालःकंदुकलीलया॥ततोदंडंसमु

द्विरूपकृतांतः क्रोधमूर्छितः॥९०॥ दैत्यस्य मूर्ध्नि चिक्षेप ग्रामवेगेन दुर्जयं॥ सोसुरस्यापतन्मूर्ध्नि दैत्यः संचूर्णतु
ष्टवान्॥९१॥ कल्पांतदहनालोकामज्ज्यांज्वलनस्ततः॥ शक्तिं चिक्षेप दुर्धर्षों दानवेंद्राय संयुगे॥९२॥ न
वाशिरीषमालेव सास्य वक्षसि राजते॥ खड्गं समाकृष्य काशादाकाशनिर्गतं॥९३॥ द्युतिमासितदिग्
नागं लोकपालाहिनिर्ह्रुति॥ चिक्षेप दानवेंद्राय तस्यांगे निपपात ह॥९४॥ पतितश्चागमत्खड्गसशी
र्ण शतखंडतां॥ जलेशस्तमदुर्गं धिविषपावकभैरवं॥९५॥ मुमोच पाशं दैत्यस्य भुजबंधाभिलाषुकः॥
स दैत्यभुजमासाद्य सर्पस्सिद्धोप्य पशपत॥९६॥ स्फुरितः कवचः क्रूरो दशनालिमड्डिहतु॥ ततोश्विनौ समन्ना
नु ससाध्याश्च महोरगाः॥९७॥ यक्षगंधर्वरक्षसादिव्यनानास्त्रपाणयः॥ जघ्नुर्दैत्येश्वरं सर्वे संभूयः
सुमहाबलाः॥९८॥ न चास्यास्त्राण्यसज्जंत गात्रे वज्रावलोपने॥ ततो रथाद्वतुत्प्लुत्य तारको दानवाधि
कः॥९९॥ जघान कोटिशो देवाः करपार्ष्णिभिरेव तु॥ हतशेषाणि सैन्यानि देवानां च प्रदुद्रुवुः॥२००॥
दिशो भीतानि सर्वे संत्यजरणोपकरणानि च॥ लोकपालांस्ततो बबंध विमुखान्नये॥२०१॥ स केशवान्
दृढैः पाशैः पशुमारः पशूनिव॥ स नृपो रथमास्थाय जगामस्वकमालयं॥२॥ सिद्धगंधर्वसंघैर्घुष्टं
विपुलाचलमस्तकं॥ स्तूयमानो दितिसुतैरप्सराभिर्विनोदितः॥२०३॥ त्रैलोक्यरत्नभीतद्देहमावि

शत्सुरं यथा॥ निषण्णावासने पंचरागरत्नविनिर्मितेः॥२०४॥ ततः किन्नरगंधर्वनागनदीविनोदितैः॥ क्षणं विनो
द्यमानसः प्रचलन्मणिकुंडलः॥२०५॥ ॥ इति श्रीमत्स्यपुराणे तारकजयः॥ ॥सूत उवाच॥ ॥प्रादुरासीत्प्र
तीहारः अन्वीनोनुकंबरः॥ स जानुभ्यां महीं गत्वा पीडितस्यास्य पाणिना॥१॥ उवाच नातिविलंबाक्षम
त्याक्षरपरिस्कृतं॥ दैत्येंद्र सुरसंदानां विस्तृतं चासुरं वपुः॥२॥ कालनेमी सुरान्बध्वाद्दायवारिनिष्ठ
ति॥ सवित्रापपतिस्त्वेयंक बंदिभिरितिच प्रभो॥३॥ तं निशम्याब्रवीत् दैत्यः प्रतीहारस्य भाषितं॥ चपे
ष्टंस्त्रीयतामेति गृहं मे भुवनत्रयं॥४॥ कबलं चासवत्वेनविपुर्क्तैरविलंबितं॥ एवं कृतेततो देवाह यम
नेनचेतसा॥५॥ जग्मुर्जगद्गुरुं द्रष्टुं शरणं कमलोद्भवं॥ निवेदिता श्वशक्राद्याः शिरोभिर्धरणीगताः॥६
तुष्टुवुःस्पष्टवर्णार्थैर्वचोभिः कमलासने॥ देवा ऊचुः॥ ॥ वरोंकारांकुरायाप्रसृत्यै विश्वस्यास्थानंतने
दस्य पूर्वं संभूवस्यानंतरं सत्वमूर्त्ते संहारेच्छातेतमः॥७॥ कालम्हर्त्ते व्यक्रमीशत्वं वपुः स्वं मंडिम्नावास
दंशात्वा सिद्धानादचिंत्याः॥ द्यावापृथ्वोरूर्ध्वखंडाधराभ्यामंडादस्मान्नवं दिनयाचकार॥८॥ व्यक्तं
चैतद्यतगतञ्चस्तवो भूदेवं विश्वस्त्वं [illegible] तेविकारे॥ व्यक्तं जन्माजन्मनः शंभूतस्यानंतस्यांतस्या
रिणो देहभाजः॥९॥ द्यौस्ते मूर्धा लोचने चंद्रसूर्यैव्यालाः केशास्त्रोत्ररंधादिशस्ते॥ गात्रे दुःचंस्तध्व

जोदौः स्थितांतेपादोमूमिनीनिरंप्रेसमुद्रा॥१०॥मासाकारः कारणात्प्रसिद्धो वेदैः शांतोज्योतिषस्त्वं
विमुक्तः॥ वेदार्थेषुत्वांविहृ एवंतिबुद्धाकृते कांतः सन्निविष्टंपुराणं॥११॥त्वामात्मानंलब्धयोगागणं
तिसांख्येयास्ताःसप्तसूक्ष्माप्रतीताः॥तासांहेतुश्चाष्टमीत्वांसुगीतातास्त्वंतस्योजीवपिस्वामिस्वापिधातः॥१२॥
दृष्टामूर्तिस्थूलसूक्ष्मा चकारयेवैनावाःकारयोः केचिदुक्ताः॥ संभूतास्तेतत्र एवादिसर्गेनूयस्त्वन्नोवा
सनांतेष्वपेयुः॥१३॥त्वत्संकल्पेनांतमायातिसूरः कालोमेयोध्वस्तसंख्याविकल्पः॥नावाभावव्यक्तिसंहा
रहेतुर्वासोतांतंतस्यकर्त्तासिचात्मन्॥१४॥येस्मेसूक्ष्मायेतितेष्योपिगीतः स्थूलाभावाश्चांतरालेपितेषां॥ते
ष्यः स्थूलत्वमस्त्वंपुराणेप्रतीतोभूतंभूतंभूतपद्भूतनाजां॥१५॥भावेभावेभक्तिंत्वंयुनक्षिपुक्तंयुक्तिभावं
निरस्य॥व्यक्तस्यस्तेगुणकल्पितंकरोषिव्यक्तंदेवैर्भक्तिभाज्यंप्रणयः॥१६॥शतागणेप्राभुवनेनतमूर्त्तिः
ख विरेमुःसुराःस्तुत्वाप्रमाणमविकारिणं॥नस्त्वमनोभिरिष्टफलंप्राप्तिप्रायनास्तत॥१७॥एवंस्तुतोविरिंचि
स्तुप्रसादंपरमंगतः॥ अमरान्वरदःप्राहवामहस्तेननिर्दिशन्॥१८॥ ॥श्रीब्रह्मोवाच॥ ॥नारीयामन्द्र
काकस्मात्सुतेत्यक्तभूषणा॥राजातेनतथाशक्रस्तातनुकुशिरोरुहः॥१९॥ज्वालाशानविमुक्तोपिधूम राम०
नर्नविराजते॥ भस्मैनैवसमाछन्नोदस्मरावविरोधितः॥२०॥यमामलमलेनैवद्वारारेणविराजसे॥दंडे २५६

नालंबितेनैवरूक्षोडेनपदे॥२१॥रजनीवरनाथोपिकिंभीतइवभाषते॥राक्षसेंद्रक्षातारातेत्वमरातिःक्षतो
यथा॥२२॥तनुस्तेवरुणायुष्मन्रीताद्ववव्हिना॥विमुक्तंतुचिरंपाशंपाणिभिःप्रविलोकयन्॥२३॥वायो
मत्वंचेतद्दिमस्त्रिश्चैरिवनिर्जितः॥चंद्रकविनेषिवदनसंतप्तैयक्षकुबेरतं॥२४॥रुद्राःत्रिशूलिनःसंभावद
ध्वंवक्रस्वलतां॥भवतांकेनसंक्षिप्तंनेत्रंतुसंरतामिव॥२५॥अकिंचित्करतांप्राप्तः कराभूतविनाशिनि॥
बलंतीक्ष्णोत्सवजानेनचक्रेणमधुसूदन॥२६॥किंभवाद्युदराजीनसुवनंप्रविलोकयन्॥क्रियतेत्विमि
तास्क्षेणभवताविस्मृतोमुखः॥२७॥एवमुक्ताःसुरास्तेनब्रह्ममूर्त्तिना॥वाचाप्रधानभूतांतादुवाचकम
लोद्भवः॥२८॥अपविस्मुखैर्देवैःश्वसनःपरिचोदितः॥आहदेवंचतुर्वक्त्रंत्वंतुवेत्सिचराचरं॥२९॥क्र
तवोविहीनाःकिलदेवतयावितलोकिलजग्मुर्विचित्रयुपाः॥अपिदुहितकृतस्त्रुतकामफलविहितविज
याचकदेवयुधाः॥३०॥अपिनाकमभूतकिलयत्तसुजोभवतोविनियोगवशात्सततं॥ अपहृत्यविमान
गणंसकृतोजनुजैर्त्रमहामरुभूमिसमः॥३१॥कृतवानसिसर्वगुणातिशयंयमशेषमहीधरराजतया
कुजभूतपनांकृतुतामवधिस्त्वमेरुगिरिंगमितेनसुराः॥३२॥अधिवासविहारविधात्तुविनोदनुजेनपु
रीक्षतश्टंगतटः॥अविजंबितरत्नगुहानिवहाव्रक्रदैत्यसमाश्रयतांमगमितः॥३३॥सुरराजसतस्यभजे

म॰पु॰ नगतंसविषादशरीरनिषण्णतया॥उपययोगतयाविहतंश्चिरंविमलद्युतिपूरितदिग्वदनं॥३४॥नासीरध-
लिध्वस्तांगाशारिकाःस्वकपर्द्दिना॥लब्धप्रवेशाःकृच्छ्रेणवयंतस्यामवद्विषः॥३५॥समायाममराद्देवप्रकृष्टे
२५१ त्युपवेशिताः॥३५॥नवतैवविनिर्मितमादियुगेसुरोहंतिसहस्रमकुंठमिदं॥दितिजस्यशरीरमवाप्यगतं
शतधामतिभेदमिवाल्पविदं॥३६॥वेत्रहस्तेरत्रप्येतस्तदोरक्षितापरैः॥महाघ्रासितसर्वापिनिवंतःस्वप्रभा
क्षिणः॥३७॥सचेयंदैत्यसिंहस्यनत्राकस्माविसास्खुलाः॥भवंतिरितिदैत्यस्यप्रेष्यैर्विहसिताबुधाः॥३८॥कृ
तवोमूर्त्तिमितस्तस्तुपासंतेत्यदर्शनं॥कृतापराधसंज्ञासंसलजंतिकथंचन॥३९॥तंत्रीलयत्रयोपेतंसिद्धगं
धर्वकिंनरैः॥सरागमुपधातिघ्नंगीयतेतस्यवेश्मसु॥४०॥हंताकृतोपकरणोमित्रागतिलाघवः॥शरण्या
गतसंत्यागेस्वकृतस्यमितिश्रयः॥४१॥इतिनिःशेषमथवानिःशेषंतेनशक्यते॥तस्याविनयमाख्या
तुंस्वष्टातत्परायणं॥४२॥सूतउवाच॥इत्युक्तस्त्वात्मभूर्देवैःसुरैर्दैत्यविचेष्टितं॥सुरानुवाचभगवां
स्ततस्मितमुखांबुजः॥४३॥श्रीब्रह्मोवाच॥अवध्यस्तारकोदैत्यःसर्वैरपिसुरासुरैः॥यस्यवध्यस्सता
द्यापिजातस्त्रिभुवनेपुमान्॥४४॥मयासवरदानेनछंदयित्वानिवारितः॥तपसःसांप्रतंराजात्रैलोक्य राम॰
दहनात्मकः॥४५॥सचवव्रेवरंदैत्यःशिशुतःसप्तवासरात्॥सचसप्तदिनोबालःशंकराद्योभविष्य २५१

ति॥४६॥तस्यासकामाछवतेयामरण्यायावकोयथा॥जनयिष्यतितंप्राप्यतारकोनभविष्यति॥४७॥भ
याम्युपायःसत्कृतोयथेवंहिभविष्यति॥शेषंचाप्यस्यविभववदिवमन्यदनंतरं॥४८॥लोकपालेश्वरःसोपिनि
विशंकेनचेतसा॥इत्युक्तास्त्रिदशास्तेनसाक्षात्कमलयोनिना॥४९॥जग्मुस्तेप्रणिपत्येशंयथायोग्यंदि
वौकसः॥ततोगतेषुदेवेषुब्रह्मालोकपितामहः॥५०॥निशांसस्मारदेवेशःस्वांतनुंपूर्वसंभवां॥ततोभग
वतीरात्रिरुपतस्थेपितामहं॥५१॥तांविविक्तेसमालोक्यब्रह्मोवाचविभावरीं॥५२॥ब्रह्मोवाच॥विभावरिम
हत्कार्यंदेवानांसमुपस्थितं॥तत्कर्त्तव्यंत्वयादेविशृणुचाप्यस्यनिश्चयं॥५२॥तारकोनामदैत्येन्द्रःसुरकेतुर
नुज्झितः॥तस्याभवायभगवानजनयिष्यतिवेश्वरः॥५३॥सुतंसभविताततस्यतारकस्यांतकारकः॥शाक
रस्याभवत्पत्नीपुरादक्षसुतासती॥५४॥सापितुःकुपितादेवीकस्मिंश्चित्कारणांतरे॥भवित्रीहिमशैलस्य
दुहितालोकभावनी॥५५॥विरहेणहरस्तस्यामत्ताप्यत्यंजगत्त्रयं॥तप्यतेहिमशैलस्यदुर्हिकंदरेसिद्धसेविते॥
५६॥प्रतीक्षमाणस्तज्जन्मकंचित्कालंविनरपति॥तयोःसुतप्ततपसोःसंयोगादुभयात्मकः॥५७॥ततस्त्वा
म्योचजनितःस्वल्पेवाकल्ययोभवेत्॥ततस्तुसंशयोभूयस्तारकस्यनहस्यते॥५८॥तयोःसंयुक्तयोस्तस्मा
त्सुरताछक्तिकारणे॥विघ्नस्त्वयाविधातव्योयथातास्यांतथाशृणु॥५९॥गर्भस्थस्यैवतामातुःस्वेनरूपेणरं

म॰ पु॰
२५९

हसा॥ततौ हिस्तत्रावस्तांविभ्रांतोनर्मपूर्वकं॥६०॥नत्सायिष्यति तांदेवीततः साकुपितासती॥प्रयास्यति तपश्चर्तुंमाता
६१॥जनिष्यतिसुतंत्रावदिमितद्युति मंडलं॥सत्नविष्यतिहंतावैसुरारीणामसंशयं॥६२॥त्वयापिदानवादेविहंत
व्यालोकदुर्जटा॥यावत्सरः सतीदेहंसंक्रांतंगुणसंचया॥६३॥तत्संगमेरताचत्वंदैत्यान्हंतुंनशक्ष्यसि॥एवं
कृतेतपस्तस्यालयामास्मविचक्षणा॥६४॥समाव्रनियमादेवीसादावामानयिष्यति॥तदात्वमेवतद्रूपंशैल
जाप्रतिपत्स्यते॥६५॥ततस्त्वमपिसहजागौरीगर्भाभविष्यति॥रूपांशेनचसंयुक्तात्वमुपायाभविष्यसि॥
६६॥एकानंशातिलोकस्त्वांवरदेपूजयिष्यति॥तदात्वंबहुधाकारैःसर्वगाकामसाधनी॥६७॥ॐकारवक्त्रा
गायत्रीप्रयतेब्रह्मवादिभिः॥आक्रांतिमूर्जिताकारा राजभिर्महीभुजैः॥६८॥त्वंभूरितिविज्ञेयामाताभूर्भुवः स्व
र्येतिपूजिता॥क्षांतिर्मुनीनामक्षोभ्यादयानियमितानपि॥६९॥त्वंमहोपायसंदोहानीतिर्नयविसर्पिणां॥
परिछित्तिःस्वधर्माणांत्वमिहप्राणरिक्षया॥७०॥त्वंयुक्तिःसर्वभूतानांत्वंगतिःसर्वदेहिनां॥त्वंचकीर्तिर्म
तांकीर्तिस्त्वंमूर्तिःसर्वदेहिनां॥७१॥रतिस्त्वंरक्तचित्तानांप्रीतिस्त्वंहृदयदर्शिनां॥त्वंकांतिःसर्वभूपाणांत्वंशां
तिर्दुष्टकर्मणां॥७२॥त्वंभ्रांतिःसर्वभूतानांत्वंक्रांतिःकामयायिनां॥जलधीनांमहावेलात्वंचलीलाविला
सिनां॥७३॥त्वंभूतिस्त्वंपदार्थानांस्थितिस्त्वंलोकपालिनां॥त्वंकालरात्रिर्निःशेषभुवनावलिनाशनी॥ राम॰ २५९

७४॥प्रियकंठग्रहानंददायिनीत्वंविभावरी॥इत्यनेकविधैर्देविरूपैर्लोकेत्वमर्चिता॥७५॥यस्त्वांवत्स्यतिवरदे
पूजयिष्यतिवापिये॥तेसर्वकामान्प्राप्स्यंतिनिपतानात्रसंशयः॥७६॥इत्युक्ताचनिशासवतिथेत्युक्ता
कृतांजलिः॥जगामत्वरितोदेवगृहंहिमगिरेर्महत्॥७७॥तत्रासीनामहाहर्म्यरत्नभूतिसमाश्रया॥ददर्शमा
नाम्नापांडुच्छविवक्रशिरोरुहा॥७८॥किंचिच्छ्यामसुखोदग्रस्तनभारावनामितं॥महौषधिमणाबद्धसंत्वराज
निषेवितं॥७९॥सुहृद्हंसातकानंदजीवरक्षासहोरगं॥मणिदीपगणज्योतिर्महालोकेप्रकाशिते॥८०॥प्रकी
र्णबालसित्तापमस्पोत्सुपरिचारके॥शुचिवीनांशुकच्छन्नभूशय्यास्तरणोज्वले॥८१॥धूपामोदमनो
रम्येसज्जसर्वांगयोगिके॥ततःक्रमेणदिवसेगतेदूरेविभावरी॥८२॥विजृंभितमुखोदकांततोमेनामहाग्र
हे॥गाढकंठग्रहालग्नसुभगेसुदिनेतत॥८३॥किंचिदाभ्रमतांप्राप्तेमेनानेत्रांबुजद्वये॥आविवेशामुखंरा
त्रिपुरवाक्षकृतसंगमः॥८४॥जन्मदायाजगन्मातुःक्रमेणजठरांतरं॥आविवेशातुलंजन्ममन्यमानाक्षपा
तुवै॥८५॥आजीजयच्छविर्देव्याशुहारण्याविभावरी॥ततोजगतिनिर्वाणहेतुर्हिमगिरिस्त्वया॥८६॥ब्राह्मे
मुहूर्तेसुभगाप्रासूयतगुहारणिः॥तस्यांतुजायमानायांजंतवःस्थाणुजंगमा॥८७॥अवकूरसमस्तानां
बेनःशांतंचदेहिनां॥ज्योतिषामपितेजस्त्वंपरात्पराभवत्तदा॥८८॥घनाश्रिताश्चौषधयःस्वादुवंतिफलानिच॥
अभवन्सुखिनःसर्वेसर्वलोकनिवासिनः॥नारकाणामपितदासुखंसर्वगतंमहत्॥८९॥ ३२

गंधर्वंतिच मात्स्यानिर्विमलं चनन्नोभवत्॥९०॥ मारुतश्च सुखस्पर्शो दिव्याभसुमनोहरा॥ गिराउद्भूतपाशिन्यं
परिपाकगुणोज्वलः॥९१॥ अभवत्पृथिवी देवी शालमालाकुलानिच॥ तपांसि दीर्घचीर्णानि मुनीनांभा
विताम्मनां॥९२॥ तस्मिन्जातानिसाकात्स्मिंकाले निर्मलचेतसा॥ विस्मृतानितु शस्त्राणि प्रादुर्भावान्नपेदि
रे॥९३॥ प्रभावंतीर्थमुख्यानां तदापुण्यतमं त्वभूत्॥ अंतरिक्षमानास्थान्विमानेषुसहस्रशः॥९४॥ सम
हेंद्रहरिब्रह्मवायुवह्निपुरोगमाः॥ पुष्पवृष्टिं मुमुचुस्तस्मिंस्तुहिनभूधरे॥९५॥ जगुर्गंधर्वमुख्याश्चन
नृतुश्चाप्सरोगणाः॥ अभिगम्यचतत्रैव सर्वेयास्यचलोत्तमः॥९६॥ अनुभूयोत्सवं देवाजग्मुर्निजालयान्
मुदा॥ देवनागेंद्रगंधर्वशैललीलावतानांगते॥९७॥ हिमशैलसुतादेवी त्वहंपूर्विकयाततः॥ क्रमेणावृद्धिमा
नीताजस्मीवानालसेबुधैः॥९८॥ क्रमेणरूपसौभाग्यप्रबोधैर्भुवनत्रयं॥ अजयद्रूपलब्धापिसनिःसारैर्नगा
त्मजा॥९९॥ एतस्मिन्नंतरे शक्रो नारदं देवसंमतं॥ देवर्षिमथसस्मार कार्यसाधनसत्वरः॥१००॥ सतुशक्र
स्यविज्ञाय कांक्षितं भगवान्सदा॥ आजगाममुदायुक्तो महेंद्रस्यनिवेशनं॥१०१॥ तंदृष्ट्वासहसोत्थायः सम्भ्र
म्यायमहासनात्॥ यथार्हेणतुपाद्येन पूजयामासवासवः॥१०२॥ शक्रप्रणीतांतां पूजां प्रतिगृह्य तथावि
रे॥जयेषुभयदंशोम्निदेवदैत्यपराजितं॥४०॥ददृशुस्तेस्थितंदेवंदिव्यलोकमयेरथे॥तेकृतांजलयःसर्वेदेवाः
शक्रपुरोगमाः॥४१॥जयशब्दंपुरस्कृत्यशरण्यंशरणंगता॥सतेषांतांगिरंश्रुत्वाविष्णुर्दर्पितशीपितः॥४२॥मन
श्चक्रेविनाशायदानवानांमहामृधे॥आकाशेपिस्थितोविष्णुरुत्तमंवपुरास्थितः॥४३॥उवाचदेवताःसर्वाःस्रष्टा
तिज्ञमिदंवचः॥शांतंभजतभद्रंवोमाभैष्टमरुतांगणाः॥४४॥जितामेदानवाःसर्वेत्रैलोक्यंप्रतिगृह्यतां॥तेत
स्यसत्यसंधस्यविष्णोर्वाक्येनतोषिताः॥४५॥देवाःप्रीतिंपरांजग्मुःप्राप्यामृतमिवामराः॥ततस्तमःसंहृतंतद्वि
न्विमृष्टेवबलाहकाः॥४६॥प्रववुश्चशिवावाताःप्रसन्नाश्चदिशोदश॥शुद्धप्रागणिज्योतींषिसोमंचक्रुःप्रदक्षि
णं॥४७॥विनिग्रहंग्रहाश्चक्रुःप्रसन्नाश्चापिसिंधवः॥विरजस्काभवन्मार्गाःप्रसन्नवीथयस्त्रयः॥४८॥यथा
र्थमूहुःसरितोनापिचुक्षुभिरेर्णवाः॥आसन्शुभानिचेंद्रियाणिनराणामंतरात्मसु॥४९॥महर्षयोवीतशोका
वेदानुच्चैरधीयत॥यज्ञेषुचहविःपाकंशिवमापचपावकः॥५०॥प्रवृत्ताधर्मसंवृत्ताध्योकाश्चमुदितमानसाः॥वि
ष्णोर्दत्तप्रतिज्ञस्यश्रुत्वारिनिधनेरणे॥५१॥ ॥इतिश्रीमत्स्यपुराणेपद्मोद्भवप्रादुर्भावेतारकामयेयुद्धे॥ ॥मत्स्य ३०

म०पु०
३०४

तत्राभयं स्थितमयं श्रुत्वा दैतेयदानवाः ॥ उद्योगं विपुलं चक्रुर्युद्धाय विविधाय च ॥१॥ मयस्तु कांचनमयं त्रैनत घातपमक्ष
रं ॥ चतुष्कंसविष्कंभकः कल्पितं च महायुधं ॥२॥ किंकिणीजालनिर्घोषं द्वीपिचर्मपरिस्कृतं ॥ रुचिरं रत्नजालैश्च हेमजा
लैश्च शोभितं ॥३॥ ईहामृगगणाकीर्णं पक्षिपंक्तिविराजितं ॥ दिव्यास्त्रतूणीरधरं पयोधरनिनादितं ॥४॥ स्वस्स
चारतपस्त्वंगगनोपमं ॥ गदापरिघसंपूर्णं मूर्तिमंतमिवार्णवं ॥५॥ तिमिरोगारकिरणं गजंतमिव कोयदी ॥ लोहजा
लेन महता सगवाक्षेण दंसितं ॥६॥ आयसैः परिघैः पूर्णैः क्षेपणीयैः समुद्गरैः ॥ प्रासैरस्त्रैश्च विविधैरसंयुक्तैश्च
कंडुकैः ॥७॥ शोभितं त्रासमायैश्च तोमरैः सपरस्वधैः ॥ उद्यंतं द्विषतां हेतोर्द्वितीयमिव मंदरं ॥८॥ विरोचनस्तु
संक्रुद्धो गदापाणिरवस्थितः ॥ प्रमुखे तस्य सैन्यस्य दीप्तश्रृंग इवाचलः ॥९॥ युक्तं हयसहस्रेण हयग्रीवस्तु दा
नवः ॥ स्यंदनं वाहयामास सपत्नानीकमर्दनं ॥१०॥ व्यायतं किष्कुसाहस्रं धनुर्विस्फारयन्महत् ॥ वराहश्च प्रमुखे
तस्थौ सप्ररोह इवाचलः ॥११॥ खरस्तु विक्षरन्दर्पं नेत्राभ्यां रोषजं जलं ॥ स्फुरद्दंतोष्ठनयनः संग्रामं सोभ्यका
क्षत ॥१२॥ त्वष्टा त्वष्टगजे घोरं यात्युक्तायसदानवः ॥ व्यूहितुं दानवव्यूहं परिचक्राम वीर्यवान् ॥१३॥ विप्रचित्ति
सुतश्चैतः श्वेतकुंडलभूषणः ॥ श्वेतशैलप्रतीकाशो युद्धायाभिमुखस्थितः ॥१४॥ अपवद्दैत्यसैन्यस्य मध्ये राम०
रविरिवोदितः ॥ लंबस्तु लंबमेघाभः प्रलंबांबरभूषणः ॥१५॥ दैत्यव्यूहगतो भाति सनीहार इवांशुमान् ॥ स्व ३०४

र्भानुरस्य योधी तु दंष्ट्रातो घेक्षणो युवा ॥१६॥ हसंति प्रति सैन्यानां प्रमुखे समहाग्रहः ॥ अन्ये हयगतास्तत्र गजस्कं
धगताः परे ॥१७॥ सिंहव्याघ्रगताश्चान्ये वराहर्क्षेषु चापरे ॥ केचित्खरोष्ट्रगंतारः केचिन्नोदजवाहनाः ॥१८॥ प
दातिनो परे दैत्याः भीषणा विकृताननाः ॥ एकपादा द्विपादाश्च ननृतुर्युद्धकांक्षिणः ॥१९॥ आस्फोटयंतो बहवः
क्ष्वेडंतश्च गजोपरि ॥ हृष्टशार्दूलनिर्घोषा नेदुर्दानवपुंगवाः ॥२०॥ ते गदापरिघैरुग्रैः शिलामुसलपाणयः ॥ बा
हुभिः परिघाकारैस्तर्जयंति स्म देवताः ॥२१॥ पाशैश्च खड्गैश्च तथा तोमरांकुशपट्टिशैः ॥ चिक्रीडुस्ते शतघ्नीभिः
शितधारैश्च मुद्गरैः ॥२२॥ गंडशैलैश्च धमलैः परिघैश्चोत्तमायुधैः ॥ चक्रैश्च दैत्यप्रवराश्चक्रुरातद्दिवलं ॥
२३॥ एवं तु दानवं सैन्यं सर्वं युद्धमदोत्कटं ॥ देवानभिमुखं तस्थौ मेघानीकमिवाद्भुतं ॥२४॥ तदद्भुतं दैत्यस
हस्रगाढं वाय्वग्निशैलांबुदतोयकल्पं ॥ यादोगणैर्धांबुदमस्तु दीर्घं युयुत्सवोन्मत्तमिवावभासे ॥२५॥ ॥
इति श्री मत्स्यपुराणे तारकमयेयुद्धे ॥ ॥ मत्स्य उवाच ॥ ॥ श्रुत्वा तं दैत्यसैन्यस्य विस्तारं वै सवं शृणु ॥ आदित्या
वसवो रुद्रा अश्विनौ च महाबलौ ॥१॥ सबलाः सानुगाश्चैव संनह्यंत यथाक्रमं ॥ पुरुहूतश्च पुरुतो लोकपा
लः सहस्रदृक् ॥२॥ अग्रणीः सर्वदेवानां तानामारुरोह सुरद्विपं ॥ सव्ये चास्य रथः पार्श्वे पक्षिप्रवरसंयुक्तः ॥३॥
सुचारुचक्रचरणो हेमवज्रपरिस्कृतः ॥ देवगंधर्वयक्षौघैरनुयातः सहस्रशः ॥४॥ दीप्तिमद्भिः सहायैश्च दे

वब्रह्मर्षिभिःस्तुतः॥वज्रविस्फूर्जितोद्भूतैर्विद्युदिंद्रायुधप्रभैः॥५॥युक्तंबलाहकरथैःपवनैरिवकामगैः॥प्रभा
रूढःसभगवान्पर्येतिसकलंजगत्॥६॥हविर्धानेषुगायंतीविप्रामखमुखेस्थिताः॥स्वर्गेशक्रानुयातेषुदे
वरूपरणादिषु॥७॥सैन्येसमुपनत्यंतिसततंसांत्यप्सरोगणाः॥केतुमातंगराजेनराजमानोयथारविः॥८॥युक्ते
हयसहस्रेणमनोमारुतरंहसा॥सस्यंदनवरोजातिशुभ्रोमातलिनातदा॥९॥कृत्स्नःपरिहृतोमेरुर्भास्करस्ये
वतेजसा॥यमःसदंडमुद्यम्यकालंयुक्तंचमुद्गरं॥१०॥तस्थौसुरगणानीकेदैत्यान्नादेनभीषयन्॥चतुर्भिः
सागरैर्युक्तोलेलिहानैश्चपन्नगैः॥११॥शंखमुक्तांगदधरोबिभ्रत्तोयमयंवपुः॥कालपाशान्समाविध्यन्
हयैःसकरकोपमैः॥१२॥स्वातंत्र्यातिजलाकारैःकुर्वन्नद्योतानसहस्रशः॥पांडुरोद्धूतवसनःप्रवालरु
चिरांगदः॥१३॥मणिश्यामोत्तमवपुर्हरितारापिमादरः॥वरुणःपाशभृन्मध्येदेवानीकस्यतस्थिवा
न्॥१४॥युद्धवेलामभिलषन्भिन्नवेलइवार्णवः॥यक्षराक्षससैन्येनगुह्यकानांगणैरपि॥१५॥युक्त
श्चशंखपद्माभ्यांनिधीनामधिपःप्रभुः॥राजराजेश्वरःश्रीमान्गदापाणिरदृश्यत॥१६॥विमानयायी
धनदोविमानेपुष्पकेस्थितः॥सराजराजःशुशुभेधनेशोनरवाहनः॥१७॥ईक्षामासस्थितःसंख्येसाक्षा
दिवत्रिदिवेश्वरः॥पूर्वपक्षंसहस्राक्षःपितृराजश्चदक्षिणं॥१८॥वरुणःपश्चिमंपक्षमुत्तरंनरवाहनः॥च

—

तुर्ष्वपिचत्वारोलोकपालामहाबलाः॥१९॥स्वासुदिक्षुररक्षंततस्यदेवस्यवक्ष्यते॥सूर्यःसप्ताश्वयुक्तेनरथे
नामितगामिना॥२०॥रथेनाजस्यमानेनदीप्यमानेश्वरश्मिभिः॥उदयास्तमचक्रेणमेरुपर्वतमानिना॥
२१॥त्रिदिवद्वारचक्रेणतपतेलोकमव्ययं॥सहस्ररश्मियुक्तेनभ्राजमानेनतेजसा॥२२॥चचारमध्येदेवा
नांद्वादशात्मादिनेश्वरः॥सोमःश्वेतैर्हयैर्यातिस्यंदनेशीतरश्मिना॥२३॥हिमतोयप्रपूर्णाभिर्भाभिराह्लादयन्ज
गवानपि॥तमृक्षयोगानुगतंशिशिरांशुंद्विजेश्वरं॥२४॥शशिच्छायांकितंतत्रनेत्रंस्वस्यतमसःक्षयं॥ज्योति
ष्णामीश्वरंव्योम्निरसानांरसप्रभुं॥२५॥औषधीनांपवित्राणांविधानममृतस्यच॥जवतःप्रथमंभागंसौम्यं
सैन्यमनोरमं॥२६॥दद्दृशुरिवदेवाःसोमंहैमश्रदरथास्थितं॥यःप्राणःसर्वभूतानांपंचत्वंभिद्यतेनृषु॥२७॥
सप्तस्कंधगतोलोकांस्त्रीन्दधारचकारयः॥यमाहुरग्नेःकर्तारंसर्वप्रभवमीश्वरं॥२८॥सप्तस्वरगा
नायस्यनित्यंगीतिरितियते॥यंवदंत्युत्तमंभूतंयंवदंत्यशरीरिणं॥२९॥यमाहुराकाशगमंशीघ्रगंत्वाष्ट
योनितं॥सर्वायुःसर्वभूतायुःसभूतःस्वेनतेजसा॥३०॥वातैःप्रत्यग्रपदैस्त्वाःप्रतिलोमंप्रमादयः॥मरु
तोदेवगंधर्वविद्याधरगणैःसह॥३१॥विक्रांडुरमुसिःखड्गैर्निर्धुकैरिवपन्नगैः॥सृजंतःसर्वतःसर्वतीव्रंरो
षमयविषं॥३२॥सरस्वलादिवीप्राणांवैरूप्यानातदादिवि॥पर्वताश्चशिलाशृंगैःशतशाखैश्चपादपैः॥३३

॥३...

उपतस्थुः सुरगणाः प्रहर्तुं दानवं बलं ॥ यः स देवो हृषीकेशः पद्मनाभस्त्रिविक्रमः ॥३४॥ युगांतकृत्सचा
त्मा नो विश्वस्य जगतः प्रभुः ॥ सर्वयोनिः स मधुहा हव्यभुक्क्रतुसंस्थितः ॥३५॥ भूम्यापो व्योमभूतात्मा श्या
मः शांतिकरोरिहा ॥ सोर्कदीप्तिकरं भूत्रं दिव्यं उत्तमतेजसं ॥३६॥ अरिघ्नममरारीणां चक्रं चक्रगदाधरः ॥
सव्येनालंब्य महतीं सर्वासुरविनाशनीं ॥३७॥ करेण कालवपुषा शत्रुकालप्रदां गदां ॥ शेषैर्भुजैः प्रदीप्तानि
भुजगारिध्वजः प्रभुः ॥३८॥ दधारायुधजातानि शार्ङ्गादीनि महाबलः ॥ कश्यपस्यात्मजं वीरं द्विजं भुजगभो
जनं ॥३९॥ पवनाधिकसंकाशं गगनक्षोभकारणं ॥ भुजगेन्द्रेण वदने निविष्टेनाभिराजितं ॥४०॥ महेंद्रेणा
मृतस्यार्थे वज्रेणाकृतलक्षणं ॥ अमृतारंभनिर्युक्तं मंदराद्रिमहोच्छ्रितं ॥४१॥ देवासुरविमर्देषु बहुशो
दृष्टविक्रमं ॥ शिखिनं बलिनं चैव तप्तकुंडलभूषणं ॥४२॥ विचित्रपत्रवसनं धातुमंतमिवाचलं ॥ स्फीत
क्रोडाचलं बंधशीतांशुसमतेजसं ॥४३॥ भोगिभोगारिसक्तेन मणिरत्नेन भास्वता ॥ पक्षाभ्यां चारु
पत्राभ्यामावृत्य दिवि लीलया ॥४४॥ युगांते सेंद्रचापाभ्यां तोयदाभ्यामिवांबरं ॥ नीललोहितपीताभिः
पताकाभिरलंकृतं ॥४५॥ केतुवेशः प्रतिच्छन्नं महागिरिनिकेतनं ॥ अरुणावरजं श्रीमानारुरोह सम
रे विभुः ॥४६॥ सुवर्णविमलविपुलासु पक्षैः खचरोत्तमं ॥ ततस्त्वयुद्धे विगणास्तु नयश्च समाहिताः ॥४७

ऋषिभिः परममंत्राभिष्टूयमानो गदाधरं ॥ द्विजराजपरिक्षिप्तं देवराजविराजितं ॥४८॥ चंद्रप्रभाववि
भुं विभुत्वायसमवर्तत ॥ स्वस्त्यस्तु देवेभ्य इति बृहस्पतिरभाषत ॥४९॥ स्वस्त्यस्तु दानवानीके उश
ना वाक्यमब्रवीत् ॥५०॥ ॥ इति श्रीमत्स्यपुराणे पद्मोद्भवतारकामये युद्धे ॥ ॥ श्रीमत्स्य उवाच ॥ ॥
ताभ्यां बलाभ्यां संजज्ञे तुमुलो विग्रहस्तदा ॥ सुराणामसुराणां च परस्परजयैषिणां ॥१॥ दानवा दै
वतैः सार्द्धं नानाप्रहरणोद्यताः ॥ समीयुर्युध्यमाना वै पर्वता इव पर्वतैः ॥२॥ तत्सुरासुरसंबद्धं युद्धमत्य
द्भुतं बभौ ॥ धर्माधर्मसमायुक्तं दर्पेण विनयेन च ॥३॥ ततो रथैः प्रजवितैर्वारणैश्च प्रणोदितैः ॥ उत्प
तद्भिश्च गमनं अग्निहस्तैः समंततः ॥४॥ क्षिप्यमाणैश्च मुशलैर्निर्यत्नाश्च शरैः कृताः ॥ प्रक्रांता दान
वीं छायां नाशाकुलो विचेष्टितुं ॥५॥ तत्स्तंभितमिवाभाति निर्दाण सदृशाकृति ॥ बलं सुराणामसुरैरति
प्रयत्नायुधं कृतं ॥६॥ दैत्यचापच्युतान् घोरान् छित्वा वज्रेण तान् शरान् ॥ शक्रो दैत्यबलं घोरं विवे
श बकुलोचनः ॥७॥ स दैत्यप्रमुखान् हत्वा तद्दानवबलं महत् ॥ तामसेनास्त्रजालेन तमोभूतमथाक
रोत् ॥८॥ ततोन्यतावद्बृष्पंतदैत्यानां वाहनानि च ॥ घोरेण तमसाविष्टा पुरुहूतस्य तेजसा ॥९॥ माया
पाशैर्विमुक्ताश्च यत्नवंतः सुरोत्तमाः ॥ बध्नंति दैत्यसंघातान् तमोभूतान्यपातयत् ॥१०॥ असुरध्व

स्ताविसंज्ञाच्छतमसा नीलवर्चसा ॥ पेतुस्ते दानवगणाश्छिन्नपक्षाइवाद्रयः ॥११॥ तद्यतां मृतदैत्येंद्रमं
धकारमिवाम्भवं दानवं देवसदनं तमोभूतमिवाभवत् ॥१२॥ तथास्त्रजन्महामायां मयस्तां तामसीं सुतः ॥
औ युगांतज्योतिर्जननीं सृष्टां और्वेण वह्निना ॥१३॥ सा ददाह ततः सर्वा मायामयादिकंपिता ॥ दैत्या आदित्यव
पुषः सद्य उत्तस्थुराहवे ॥१४॥ मयो मायां वीसमासाद्य दह्यमानादिवौकसः ॥ भेजिरे चंद्रविषयं शीतां
शुसलिलं क्रमात् ॥१५॥ तद्दह्यमानाद्यौर्वेण वह्निना नष्टचेतसः ॥ शरणं सुरजित्रं देवाः संतप्ताः शरणैषिणः
१६॥ संतप्ते मायया सैन्ये दह्यमाने च दानवे ॥ तं तपंतमिवादित्यं तपसा च जगत्त्रये ॥१७॥ उपतस्थुर्मुनिगणादि
व्या देवर्षिभिः सह ॥ हिरण्यकशिपुश्चैव दानवो दानवेश्वरः ॥१८॥ ऋषिं विज्ञाप्य यशसा सपुरा परमतेजसं ॥ ऊ
ग चुर्ब्रह्मर्षयस्तं तु वचनं धर्मसंहितं ॥१९॥ ऋषिवंशेषु सर्वेषु छिन्नमूलमिदं परं ॥ एकस्त्वमतपत्यश्च गोत्रे यो
नन्यवर्त्तते ॥२०॥ कौमारं व्रतमास्थाय क्लेशमेवानुवर्त्तते ॥ बहूनि विप्रगोत्राणि मुनीनां भावितात्मनां ॥२१॥
एकदेहानि तिष्ठंति विविक्तानि विना प्रजाः ॥ एकमच्छिन्नभूतेषु पुत्रे मे नास्ति कारणं ॥२२॥ भवांस्तु तपतां श्रे
ष्ठः प्रजापतिसमद्युतिः ॥ जगहतिहिगया वचनं चेदमब्रवीत् ॥२३॥ तथायं विहितो धर्मो मुनीनां श्लाघ्यतः राम
पुरा ॥ आर्षं हि मे वचः कर्मवन्यमूलफलाशिनः ॥२४॥ ब्रह्मयातौ प्रसूतस्य ब्राह्मण्यस्यात्मवर्तिनः ॥ ब्र ३०७

ह्मणेमपि चात्मयेत् ॥२५॥ जन्मनां वृत्तयस्त्विसो ये गृहाश्रमवासिनः ॥ अस्माकं तु वने वृत्तिर्वनाश्रमनिवा
सिनां ॥२६॥ अंबुभक्षा वायुभक्षा दंतोलूखलिनस्तथा ॥ अश्मकुट्टा दशानवाः पंचतप्ततपश्च ये ॥२७॥
एते तपसि तिष्ठंतो व्रतैरपि सुदुष्करैः ॥ ब्रह्मचर्यं पुरस्कृत्य प्रार्थयंति परां गतिं ॥२८॥ ब्रह्मचर्याद्ब्राह्मण
स्य ब्राह्मणत्वं विधीयते ॥ एवमाहुः परे लोके ब्रह्मचर्यविदो जनाः ॥२९॥ ब्रह्मचर्ये समाधत्ते किमतः प
रं तपः ॥ कुयोगे केशधरणमसंकल्पव्रतक्रिया ॥३०॥ ब्रह्मचर्यपवित्रं यस्य स्यादं जसांति के ॥ क दाराः क्व
च संयोगः क्व च भावविपर्ययः ॥३१॥ ययं च ब्रह्मणा सृष्टा मनसा मानसी प्रजा ॥ यद्यस्ति तपसो वीर्यं युष्मा
कं विदितात्मनां ॥३२॥ सृजध्वं मानसान्पुत्रान्प्राजापत्येन कर्मणा ॥ मनसो निर्मिता योनिर्नाधित
त्ता तपस्विभिः ॥३३॥ अदारयोगे वीर्यं वा व्रतमुक्तं तपस्विनो ॥ यदि त्वं बुद्धधर्मार्थं युष्माभिरिह निर्णयैः ॥
३४॥ व्याहृतं सद्भिरित्यर्थमसद्भिरिव मे मतं ॥ वपुर्दीप्तांतरात्मानमेतत्कृत्वा मनोमयं ॥३५॥ दारयोगं विना
स्रक्ष्ये पुत्रमात्मतनूरुहं ॥ एवमात्मानमात्मा मे द्वितीयं जनयिष्यति ॥३६॥ धन्येनानेन विधिना दिध
क्षंतमनः प्रजाः ॥ और्वस्तु तमसा विष्टो निवेश्योरुं हुताशने ॥३७॥ निर्ममंथैकदर्भेण सुतस्य प्रभवार
णिं ॥ तस्योरुं सहसा भित्त्वा ज्वालामाली ह्यनिंधनः ॥३८॥ जगतो दहनाकांक्षुः पुत्रोग्निः समपद्यत ॥ उर्व

म॰पु॰
३०८

रेपोरूं चितिर्निर्द्धिग्रौर्वो नामांतकोनलः ॥३९॥ दिधक्षन्निव लोकांस्त्रीन् जज्ञे परमकोपनः ॥ उत्पद्यमानस्त्रौवाचपि
तरं दीनया गिरा ॥४०॥ क्षुधा मे बाधते तात जगद्भक्षे त्यजस्व मां ॥ त्रिदिवारोहिभिर्ज्वालैर्जृंभमाणो दिशो
दश ॥४१॥ निर्दहन् सर्वभूतानि ववृधे सोंतकोनलः ॥ एतस्मिन्नंतरे ब्रह्मा मुनिमौर्वं शमागमत् ॥४२॥ उ
वाच वार्यतां पुत्रो जगतश्च दयां कुरु ॥ कस्यापत्यस्य विप्र करिष्ये स्थानमुत्तमं ॥४३॥ तथ्यमेतन्ममव
चः शृणु त्वं वदतां वर ॥४३॥ और्व उवाच ॥ धन्योस्म्यनुगृहीतोस्मि जन्मेद्य मम यद्विभो ॥ मतिमे
नोद्दातीह परमानुग्रहाय वै ॥४४॥ प्रभातकाले संप्राप्ते कांक्षितेस्मिन्समागमे ॥ भगवंस्तर्पितं पुत्रकेर्ह
वैः प्राप्य ते सुखं ॥४५॥ कुत्र दास्यति वासस्स्यात् भोजनं तु किमात्मकं ॥ विधास्यतीह भगवान्वीर्यं तु समम
होयशः ॥४६॥ श्री ब्रह्मोवाच ॥ संवर्त्तवायुश्च वसतिः समुद्रेतेन विप्रपति ॥ मम यो निजलं विप्र तस्य पीतव
तः सखं ॥४७॥ अत्राहमात्मनियतं पिब वारिमयं हविः ॥ तद्धे तस्य पुत्रस्य स्वस्त्व जस्रालयं प्रतो ॥४८॥ त
तो युगति भूतात्मा मद्रमे षप पुत्रका ॥ स हितो विचरिष्यावोनि: पुत्राणामृणापर: ॥४९॥ एषोग्निरंतकाले
षु सलिलाशी मया कृतः ॥ दहनः सर्वभूतानां सदेवासुररक्षसां ॥५०॥ एवमस्त्विति तं सोग्निः संहृतज्वा
लमंडलः ॥ प्रविवेशार्णवमुखं प्रक्षिप्य पितरि प्रभां ॥५१॥ प्रतियातस्ततो ब्रह्मा ये च सर्वे महर्षयः ॥ औ

राम
३०८

र्वस्य च प्रभां ज्ञात्वा स्वां गतिं समुपाश्रिताः ॥५२॥ हिरण्यकशिपुर्दृष्ट्वा तदा तन्महदद्भुतं ॥ और्वं प्रणतिसर्वांगी
वाक्यमेतदुवाच ह ॥५३॥ भगवन्नद्भुतमिदं निवृत्तं लोकसाक्षिकं ॥ तपसा ते मुनिश्रेष्ठ परितुष्टः पितामहश्च
५४॥ अहं तु तव पुत्रस्य तव चैव महाव्रत ॥ भृत्य इत्यपि मां तत्र साध्योयदिहकर्मणा ॥५५॥ तन्मां पश्य स
मापन्नं तवैवाराधने रतं ॥ यदि शामेस्तु निश्रेष्ठ भवेयं सा वराजितं ॥५६॥ और्व उवाच ॥ धन्योस्म्यनुगृही
तोस्मि महान् ॥ नास्ति तेतप सानेनभयमद्येह सुव्रत ॥५७॥ तामेव मायां गृह्णीष्व मम पुत्रेण निर्मितां ॥ निरं
धनामग्निमयां दुःप्राप्यां पावकैरपि ॥५८॥ एषा ते स्वस्य वंशस्य वशानैरिव निग्रहे ॥ संरक्षत्वात्मपक्षं च विप्रभ नः
क्षं च प्रचक्षति ॥५९॥ मत्स्य उवाच ॥ एवमस्त्विति तां गृह्य प्रणम्य मुनिपुंगवं ॥ जगाम त्रिदिवं हृष्टः कृ
तार्थो दानवेश्वरः ॥ स्वा एषा दुर्विषहा माया देवैरपि दुरासदा ॥ और्वेण निर्मिता पूर्वं पावकेनौर्वसूनुना ॥६१
तस्मिंस्तु व्युत्थिते दैत्ये निर्वीर्ये बाव संशयः ॥ सा पात्या सा दुरादस्ते स्त्रष्टा तेनैवतेजसा ॥६२॥ शोषा प्रतिहंतव्या कर्त्ता यार
व्यो भगवान् सुखी ॥ दीयतां मे सखा शक्रतोययोनिर्निशाकरः ॥६३॥ तेनाहं सह संगम्य यदेभिश्च समाहृतः ॥
मायामेतां हनिष्यामि त्वत्प्रसादान्न संशयः ॥६४॥ ॥ इति श्रीमत्स्यपुराणे प्रयोऽज्ञवेतारकमयेयुद्धे ॥ ॥ श्रीमत्स्य
उवाच ॥ एवमस्त्विति संहृष्टः शक्रस्त्रिदशवर्द्धनः ॥ संदिदेशाय ततः सोमं युद्धाय शिशिरायुधं ॥१॥ गच्छ सोम

म०पु०
ब
३०९

सहायत्वंकुरुपाशाधरस्वै॥असुराणांविनाशायजयार्थंचदिवौकसां॥२॥त्वमत्रःपरिवीयश्चज्योतिषांचेश्वरेश्वरः॥
त्वसुराणांविनाशायजयार्थंचदिवौकसां॥२॥त्वमयंसर्वलोकेषुसंरवेदविदोविदुः॥३॥क्रियाश्चद्विलयाश्चकासमस्ते
श्चैवमंडले॥परिवर्तस्यहोरात्रंकालंजगतियोजयत्॥४॥लोकछायामयंलक्ष्मीस्त्वांगेक्षुचविभ्रमः॥नविदुःसो
मवेचापियेचनक्षत्रयोनयः॥त्वमादित्यस्तथाऊर्ध्वज्योतिषांचोपरिस्थितः॥ततःप्रोत्सार्यसहसाप्रासयंश्चाखिलं
जगत्॥६॥श्वेतभानुश्रितंमन्येज्योतिषामधिपंप्रभो॥अधिकृतकालयोगत्वादिज्यापायन्नसाव्ययः॥७॥ओषधी
नाःक्रियायेतिहरन्नोपरनुक्रया॥श्वेतांश्वरमृताधारश्चपलःश्वेतवाहनः॥८॥त्वंकांतवपुषांत्वंसोमःसोमपायिनां॥ कांतं
साम्यस्त्वंसर्वभूतानांतिमिरघ्नस्त्वमृक्षराट्॥९॥तद्गच्छत्वंमहासैन्यंवरुणेनविरूपिणा॥शमयस्वासुरीमायांयया
दह्यामसंयुगे॥१०॥सोमउवाच॥॥जन्मवेधसिबुधार्थोदेवराजवरप्रदः॥एषवर्षामिशिशिरंदैत्यमायापक
र्षणं॥११॥एतान्मछीतनिर्दग्धान्पश्यत्वंहिमचेष्टितान्॥विमायान्विमदांश्चैवपश्यदैत्यान्महाहवे॥१२॥
तथाहिमकरोत्सृष्टाःश्रोणिराहिमवृष्टयः॥चेष्टयंतिचतान्घोरान्दैत्यान्मेघगणाइव॥१३॥तौपाशशक्ती
शुधरौवरुणेंदुमहाबलौ॥जघ्नतुर्हिमपातैश्चपाशपातैश्चदानवान्॥१४॥द्वावंबुनाथौसमरेतौपाशहिमयो
धिनौ॥मृधेचेरतुरंभोभिःक्षुब्धाविवमहासवौ॥१५॥ताभ्यांमाप्रावितंसैन्यंतद्दानमिवदृश्यते॥जगत्संवर्तकांभोदैः

राम०
३०९

प्रविष्टैरिवसंवृतं॥१६॥तांचूत्युतांबुपाशौतुशशांकवरुणावुभौ॥मायांसंशमयामासदेवोदैत्येयनिर्मितां॥१
७॥शीतांशुजालनिर्दग्धाःपाशैःसंयमिताःरणे॥नशेकुश्चलितुंदैत्यावज्रहंसाइवाश्रयाः॥१८॥शीतांशुनिहतास्ते
तुदैत्याःसर्वेहिमार्दिताः॥हिमप्लावितसर्वांगानिरुष्माणइवाश्रयाः॥१९॥तेषांतुदिविदैत्यानांविपरीतप्रभाणि
वै॥विमानानिविचित्राणिप्रपतंत्युत्पतंतिच॥२०॥तान्माशहसाग्रसितान्छादितान्हिमरश्मिना॥मयोद
दर्शमायावीदानवान्दिविदानव॥२१॥सशैलजालविततांखङ्गचर्मासिहासिनां॥पादपाग्रोत्कटानांच
कंदराकीर्णकाननां॥२२॥सिंहव्याघ्रगणाकीर्णांपवनाघूर्णितद्रुमां॥निर्मितांस्वेनपुत्रेणकूजितांदिक्काम
गां॥२३॥प्लावितांपार्थिवीमायांससर्जेससमंततः॥शैलशिखरैःशिलावर्षैःसंपतद्भिश्चपादपैः॥२४॥यान्जघ्नु
र्दैत्यसंघास्तान्दानवान्प्रत्यजीवयत्॥नैशाकरीवारुणीचमायांतुदधतस्ततः॥२५॥अश्मभिश्चापसद्दैनैः॥
किरन्देवगणान्रणे॥साश्मनंत्रायुधदनाउपमर्दनसंकटा॥२६॥अनवाद्यारसंचारापृथिवीपर्वतैरिव॥अ
श्मनाप्रहतादेवाःशिलाभिश्चससुग्जरैः॥२७॥नवारूप्योद्रुमगयौदेवैर्वहन्रूपतकश्चन॥तदयत्रस्तधनुषंसमयेत
रणेविलं॥२८॥सहियुद्धगतःश्रीमानआस्मशोर्कंस्पकंपंकन॥सहिष्णुस्ताजगत्स्वामीनचुक्रोधगदाधरः॥
२९॥कालज्ञःकालमेघाभःसमीक्ष्यकालमाहवे॥देवासुरविमर्दंतुद्रष्टुकामस्तदाहरिः॥३०॥ततोभगवता

दिशारणपावकमारुतौ॥चादितौ विष्णुना कथनं नौ माया व्यकर्षत॥३१॥ताभ्यांमुक्तवेगाभ्यां प्रविष्टाभ्यां महा
हवे॥दग्धा सा पार्वती माया भस्मभूता गता तदा॥३२॥सोनिलोनिलसंयुक्तः सोनिलस्थानलः कृतः दैत्यसे
नांप्रदहतुर्युगांतेष्विव मूर्छितौ॥३३॥वायुः प्रधावितस्तत्र पश्चादग्निस्तु मारुतात्॥चरतुर्हनिवानीकेक्रीडं
तावनिलानलौ॥३४॥भस्मावयवभूतेषु प्रपतत्सु पतत्सु च॥दानवानां विनातेषु निपतत्सु समंततः॥३५॥बाच्
स्कंधापविद्धेषु कृतवर्मणि पावके॥मायाबंधनविद्धेनेष्णुरूपमाने गदाधरे॥३६॥निःप्रयत्नेषु दैत्येषु त्रै
लोक्ये मुक्तबंधने॥संप्रहृष्टेषु देवेषु साधुसाध्विति सर्वशः॥३७॥जये दशशताक्षस्य दैत्यानां च पराजये॥दिक्षु
सर्वासु शुद्धासु प्रवृत्ते धर्मविस्तरे॥३८॥अपवृत्ते चंद्रमसि स्वस्थानस्थे दिवाकरे॥प्रवृत्तिस्थेषु त्रिषु चारित्रबंधु
षु॥३९॥अभिलंबंधने मृत्यौ ह्रायमाने कृतानने॥यज्ञाशासित देवेषु स्वर्गार्थिं दिशयिषु च॥४०॥लोकपालेषु सर्वे
षु दिक्षु संयानवर्त्मिषु॥भावे तपसि सिद्धानामभावे पापकर्मणां॥४१॥देवपक्षे प्रमुदिते दैत्यपक्षे विषीदति॥त्रि
पादविग्रहे धर्मे अधर्मे पादविग्रहे॥४२॥अपावृत्ते महाद्वारे वर्तमाने च सत्पथे॥लोकप्रवृत्ते वृत्तेषु स्वधर्माश्रमे
षु च॥४३॥प्रजारक्षणयुक्तेषु भ्राजमानेषु राजसु॥प्रशांतकल्मषे लोके शांते तमसि दानवे॥४४॥अग्निमारुतयो ॥ राम· ३१०
स्तस्मिन्वृत्ते संग्रामकर्मणि॥तन्मये विमले लोके ताभ्यां जयकृतः कृतः॥४५॥पूर्वं दैत्यगतः श्रुत्वा मारुताग्निकृ

तं महत्॥कालनेमीति विख्यातो दानवः प्रत्यदृश्यत॥४६॥भास्कराकारमुकुटः स्कुजितामरणांगदः॥मंदराद्रिप्रती
काशो महारजतसंवृतः॥४७॥शतप्रहरणोदग्रः शतबाहुः शताननः॥शतशीर्षः स्थितः श्रीमान् शतशृंग इवा
चलः॥४८॥कक्षे महति संवृद्धो निदाघ इव पावकः॥धूम्रकेशो हरिश्मश्रुः संदष्टोष्ठपुटाननः॥४९॥त्रैलोक्यांत
रविस्तारि धारयन्विपुलं वपुः॥बाहुभिस्तुलयन्व्योम क्षिपन्पद्भ्यां महीधरान्॥५०॥ईरयन्मुखनिश्वासैर्वृष्टि
मंतो बलाहकाः॥तिर्यगायतरक्ताक्षं मंदरोदयवर्चसं॥५१॥दिधक्षंतमिवायांतं सर्वान्देवगणान्मृधे॥व
र्जयंतं सुरगणं छादयंतं दिशो दश॥५२॥संवर्तकाले तृषितं दृष्टमृत्युमिवोत्थितं॥सुतले नोच्छ्रयवता विपुलांगुलि
पर्वणा॥५३॥लंबाभरणपूर्वेण किंचिच्चालितवर्ष्मणा॥उच्छ्रितेनाग्रहस्तेन दक्षिणेन वपुष्मता॥५४॥दानवान्देव
निहतांस्तिष्ठंत इति च ब्रुवन्॥तं कालनेमिं समरे द्विषतां कालचेष्टितं॥५५॥वीक्षंते स्म सुराः सर्वे भयसंत्रस्तलो
चनाः॥तं वीक्ष्य सुरभूतानि क्रमंतं कालनेमिनं॥५६॥त्रिविक्रमं विक्रमंतं नारायणमिवापरं॥सोभ्युच्छ्रयपु
नः पादं मारुताघूर्णितांबरः॥५७॥प्रक्रामेतासुरो युद्धेत्रासयन्सदेवताः॥समयेनासुरेंद्रेण परिषिक्तस्त
तोरणे॥५८॥कालनेमिर्बभौ दैत्यः सविष्णुरिव मंदरः॥अथ विव्यथिरे देवाः सर्वे शक्रपुरोगमाः॥५९॥कालने
मिं समायांतं दृष्ट्वा कालमिवांबरं॥६०॥॥इति श्री मत्स्यपुराणे पद्मोद्भवतारकमयेयुद्धे॥ ॥मत्स्य उवाच॥॥दानवा

नामनीकेषुकालनेमिर्महासुरः॥व्यवर्द्धतमहातेजास्तपतौजलदोउवाच॥॥दानवानामनीकेषुकालनेमिर्महासु
रः॥व्यवर्द्धतमहातेजास्तपतौजलदोयथा॥१॥तंत्रैलोक्यांतरगतंदृष्ट्वातेदानवेश्वराः॥उत्तस्थुरपरिश्रांताः
पीत्वेवामृतमुत्तमं॥२॥तेतीव्रजयसंत्रस्तामायपारजतोपमा॥तारकामयसंग्रामेसततंजितकाशिनः॥रेजु
रायोधनगतादानवायुद्धकांक्षिणः॥मंत्रमभ्यसतांतेषांगदंचपरिधावतां॥४॥समुद्धृतायुतायेचप्राटषीवब
लाहकाः॥प्रेक्ष्यतांचाभवन्प्रीतिर्दानवेंद्रंकालनेमिनं॥५॥येतुतत्रमयाश्वासमुख्यायुद्धपुरस्सराः॥तेतुसर्वेन
यंसक्ताहृष्टायोद्धुमुपस्थिताः॥६॥मयस्तारवराहश्चहयग्रीवश्चवीर्यवान्॥विप्रचित्तिसुतश्चैवतरलंबावुभा
वपि॥७॥अरिष्टोबलिपुत्रश्चकिशोरश्चतथैवच॥स्वर्भानुश्चामरप्रख्योवक्त्रयोधीमहासुरः॥८॥एतेस्त्रवेदि
नःसर्वेसर्वेतपसिसुस्थिताः॥दानवाःकृतिनेजग्मुःकालनेमिनमद्भुतं॥९॥तेगदाभिश्चगुर्वीभिश्चक्रैरथपरस्व
धैः॥कालकल्पैश्चमुद्गलैःक्षेपणीयैश्चमुद्गरैः॥१०॥अश्मभिश्चाद्रिसदृशैःगंडशैलैश्चदारुणैः॥पट्टिशैर्भि
डिमालैश्चपरिघैश्चोत्तमायसैः॥११॥घातनीभिश्चगुर्वीभिःशतघ्नीभिश्चसर्वतः॥युगैर्यंत्रैश्चनियुक्तैर्मार्गणैर्य
चताडितैः॥१२॥दोर्भिश्चायतपीनाभिःप्रासैःपाशैश्चमूर्छितैः॥भुजंगैर्लेलिहानैश्चविसर्पद्भिश्चसायकैः॥१३॥च
क्रैःप्रहरणीयैश्चदीप्यमानैश्चतोमरैः॥विकोशैरसिभिस्तीक्ष्णैःशूलैश्चशितनिर्मलैः॥१४॥दैत्याःसंदीप्यमानाःस

न्नप्रगृहीतशरासनाः॥ततःपुरस्कृत्यतदाकालनेमिनमाहवे॥१५॥सादीप्तशस्त्रप्रवरादैत्यानांचमहाचमूः॥द्यौ
र्निमीलितसर्वांगाघनानीवांबुदागमे॥१६॥देवतानामपिचमूर्मुदेशक्रपालिता॥एयुतासितकृष्णाभ्यांताराभ्यांचंद्र
सूर्ययोः॥१७॥वायुवेगवतीसौम्यातारागणपताकिनी॥तोयदाविद्धसदनाग्रहनक्षत्रहासिनी॥१८॥यमेंद्रवरुणै
र्गुप्ताधनदेनचधीमता॥साप्रदीप्ताग्निसदनानारायणपरायणा॥१९॥तासमुद्रौघसदृशीदिव्यादेवमहाचमूः॥
रराजासुवतीभीमायक्षगंधर्वशालिनी॥२०॥तयोश्चम्वोस्तदानीचबभूवससमागमः॥द्यावापृथिव्योःसंयोगेय
थास्यात्युगपर्यये॥२१॥तद्युद्धमभवत्घोरंदेवदानवसंकुलं॥क्षमापराक्रमपरंदर्पस्यविनयस्यच॥२२॥निश्च
क्रमुर्बलाभ्यांतेभीमाभ्यांतुमहासुराः॥पूर्वापराभ्यांसरवाःसागराभ्यामिवांबुदाः॥२३॥ताभ्यांबलाभ्यांसंहृष्टा
श्चेरुस्तेदेवदानवाः॥वनाभ्यांपर्वतीयाभ्यांपुष्पिताभ्यांयथानगाः॥२४॥समाजघ्नुस्ततोभेरीःशंखानुदध्मुरनेकशः
अपांभुवंचखंचैवदिशश्चसमपूरयन्॥२५॥ज्याघाततलनिर्घोषधनुषांकूजितानिच॥दुंदुभीनांचनिनदोदैत्य
मंतर्दधुःस्वनं॥२६॥तेन्योन्यमभिसंपेतुःपातयंतःपरस्परं॥बभंजुर्बाहुभिर्बाहून्द्वंद्वमन्येयुयुत्सवः॥२७॥दे
वताःशरवृष्टीश्चपरिघांश्चोत्तमायसान्॥निस्त्रिंशान्ससृजुःसंख्येगदागुर्वीश्चदानवाः॥२८॥गदानिपा
तैर्भग्नांगाबाणैश्चशकलीकृताः॥परिपेतुर्भृशंकेचित्पुनःकेचित्तविजघ्निरे॥२९॥ततोरथैःसतुरगैर्विमानैश्च

श्रृगामिभिः॥समीयुस्तेतिसंघट्टाद्रोषादन्योन्यमाहवे॥३०॥संवर्त्तमानाः समरेसंदष्टौष्ठपुटाननाः॥तथारथैर्नियुधं
तेपादाताश्चपदातिभिः॥३१॥तेषांरथानांतुमहान्सन्नादः शब्दवाहिनां॥नभोनभस्योहियथानभस्येजलदस्वनैः
३२॥बभंजिरेरथाः केचित्केचित्संमर्दितारथैः॥संबाधमन्येसंप्राप्यनशेकुश्चलितुंपथा॥३३॥अन्योन्यमानाः सम
रेदोर्भ्यामुत्क्षिप्यदर्पिताः॥संह्रादमानाभरणाजघ्नुस्तत्रासिचर्मिणः॥३४॥शस्त्रैरस्त्रैर्विनिर्भिन्नारक्तंवेमुर्हतायुधि॥
क्षरज्जलानांसदृशाजलदानांसमागमे॥३५॥तदस्त्रशस्त्रग्रथितंक्षिप्ताक्षिप्तगदाचलं॥देवदानवसंक्षुब्धंसंक्षु
ब्धंयुद्धमावभौ॥३६॥तद्दानवमहामेघंदेवायुधविराजितं॥अन्योन्यशस्त्रवर्षेणयुद्धदुर्दिनमावभौ॥३७॥एतस्मिन्नंत
रेक्रुद्धःकालनेमिःसदानवः॥व्यवर्धतसमुद्रौघैःपूर्यमाणइवांबुदः॥३८॥तस्यविद्युत्कृताःपीडाःप्रदीप्ताशनि
वर्षिणः॥गात्रेनगगिरिप्रख्याविनिश्चेरुर्वलाहकाः॥३९॥क्रोधान्निःश्वसतस्तस्यभ्रूभेदस्वेददर्शिनः॥साग्निधूम
स्फुताःस्रस्यमुखान्निःपेतुरर्चिषः॥४०॥तिर्यगूर्ध्वंचगगनेववृधुस्तस्यबाहवः॥पर्वतादिवनिःक्रांताःपंचास्याइव
पन्नगाः॥४१॥शस्त्रजालैर्बहुविधैर्धनुर्भिःपरिघैरपि॥दिव्याकाशमावव्रेपर्वतैरुच्छ्रितैरिव॥४२॥सोनिलो
द्धूतवसनस्तस्थौसंग्रामलालसः॥संध्यातपग्रस्तशिलःसाक्षान्मेरुरिवाचलः॥४३॥गुरुवेगसमथितैःशैलशृंगा
ग्रपादपैः॥अपातयद्देवगणान्वज्रेणेवमहागिरीन्॥४४॥बहुभिःशस्त्रनिस्त्रिंशैश्छिन्नभिन्नशिरोरुहाः॥नशे

मा

कुश्चलितुंदेवाःकालनेमिहतायुधि॥४५॥मुष्टिभिर्निहताःकेचित्केचिच्चविदलीकृताः॥यक्षगंधर्वपतयःपे
तुःसहमहोरगैः॥४६॥तेनवित्रासितादेवाःसमरेकालनेमिना॥नशेकुर्यत्नवंतोपियत्नंकर्तुंविचेतसः॥४७॥ते
नशक्रःसहस्राक्षस्यंदितःशरबंधनैः॥ऐरावतगतःसंख्येचलितुंनशशाकह॥४८॥निर्जलांभोदसदृशो
निर्जलार्णवसप्रभः॥वियप्प्यारकृतस्तेनपिपासोवरुणोमृधे॥४९॥रणोवैश्रवणस्तेनपरिघैःकामरूपिणः॥
विन्नदोरिकृतःसंख्येत्याजितोधनदक्रियां॥५०॥यमःसर्वहरस्तेनपिपासोवरुणोमृधे॥याम्यामवस्थांसंत्यज्यभीमः
स्वांदिशामाविशत्॥५१॥सलोकपालांस्तेसर्वेकृत्वातेषांचकर्मकृत्॥दिक्षुसर्वासुदेहंस्वंचतुर्धाविदधेतदा॥५२॥
सनक्षत्रपथंकृत्वादिव्यंस्वर्भानुदर्शितं॥जहारलक्ष्मींसोमस्यतंचास्यविषयंमहत्॥५३॥भासयामासदीप्तांश्च
धर्मद्वारात्सभास्करं॥सायनंचास्यविषयंजहारदिनकर्मच॥५४॥सोग्निदेवमुखंकृत्वाचकारात्ममुखंत्रयं॥
वायुंचतरसाजित्वाविदधेस्ववशानुगं॥५५॥ससमुद्रान्समानीयसर्वाश्चसरितोबलात्॥चकारात्ममुखेवीर्यादि
हभूताश्चसिंधवः॥५६॥अपःस्ववशगाःकृत्वादिविजायाश्चभूमिजाः॥स्थापयामासजगतींसुयुक्तांधरणीध
रैः॥५७॥सस्वयंभूरिवाभातिमहाभूतपतिर्महान्॥सर्वलोकमयोदैत्यःसर्वलोकभयावहः॥५८॥सलोकपाल
श्चवपुश्चंद्रसूर्यग्रहात्मवान्॥पावकानिलसंयोगोरराजयुधिदानवः॥५९॥परमेष्ठिस्थितस्थानेलोकानांप्रभ

वोपमे॥ ततुष्टुवुर्दैत्यगणा देवाऽनुपितामहं॥ ६०॥ ॥इति श्रीमत्स्यपुराणे पद्मोद्भवे तारकमयेयुद्धे॥ मत्स्य उवाच॥
पंचतंनाम्यवर्त्तत विपरीतेन कर्मणा॥ वेदो धर्मः क्षमा सत्यं श्रीश्च नारायणाश्रया॥ १॥ स तेषां समुपस्थानात् सक्रोधो
दानवेश्वरः॥ वैष्णवं पदमन्विच्छन्ययौ नारायणांतिकं॥ २॥ स ददर्श सुपर्णस्थं स्वस्थं चक्रगदाधरं॥ दानवानां वि
नाशाय भ्रामयंतं गदां शुभां॥ ३॥ सजलांभोदसदृशं विद्युत्सदृशवाससं॥ स्वारूढं स्वर्णपत्रा ढ्यं शिखिनं काश्य
पं खगं॥ ४॥ दृष्ट्वा दैत्यविनाशाय रणे स्वस्थमिव स्थितं॥ दानवो विष्णुमाजह्य वाचा चेक्षुब्धमानसः॥ ५॥ अयं स रि
पुरस्माकं पूर्वेषां प्राणनाशनः॥ अयमर्णवनिर्घोषो लोके स्त्रीबालनिरपत्रपः॥ ६॥ येन दानवनारीणां सीमंतोद्धरणं
कृतं॥ अयं स विष्णुर्देवानां वैकुंठो यं दिवौकसां॥ ७॥ अनंतो भोगिनामप्सु स्वपन्नाप्यः स्वयंभुवः॥ अयं स नाथो
देवानामस्माभिर्विप्रियात्मनां॥ ८॥ अस्य स क्रोधं समासाद्य हिरण्यकशिपुर्हतः॥ अस्यच्छायामुपाश्रित्य देवा
हविर्भुजः स्थिताः॥ ९॥ आज्यं महर्षिभिर्दत्तं मश्नुवंति त्रिधा कृतं॥ आवसति धने हेतुः सर्वेषामसुरद्विषां॥ १०॥
यस्य चक्रप्रविष्टानि कुलान्यस्माकमाहवे॥ अयं स किल युद्धेषु सुरार्थे त्यक्तजीवितः॥ ११॥ सवितुस्तेजसा तुल्यं
चक्रं क्षिपति शत्रुषु॥ अयं स कालो दैत्यानां कालरूपे मयि स्थिते॥ १२॥ अतिक्रांतस्य कालस्य फलं प्राप्स्यसि केश
व॥ दिष्ट्येदानीं समक्षं मे विष्णुरेष समागतः॥ १३॥ अद्य मद्बाहुनिष्पिष्टो मय्येवं प्रणमिष्यति॥ यास्यामप

चितं दिष्ट्या पूर्वेषामद्य संयुगे॥ १४॥ इमं नारायणं हत्वा दानवानां भयावहं॥ क्षिप्रमेव हनिष्यामि रणेऽमरगणानि
च॥ १५॥ जात्यंतरगतो ह्येष बाधते दानवान् मृधे॥ एषोऽनंतः पुरा भूत्वा पद्मनाभ इति श्रुतः॥ १६॥ जघानैका
र्णवे घोरे तावुभौ मधुकैटभौ॥ द्विधाभूतं वपुः कृत्वा सिंहस्यार्द्धं नरस्य च॥ १७॥ पितरं च जघानैको हिरण्यक
शिपुं पुरा॥ शुभं गर्भमधात्तेन मदितिर्देवतारणिः॥ १८॥ त्रीन् लोकान् स जहारैकः क्रममाणस्त्रिभिः क्रमैः॥
भूयस्त्विदानीं संप्राप्ते संग्रामे तारकामये॥ १९॥ मया सह समागम्य सदेवो विनशिष्यति॥ एवमुक्त्वा बहुविधं
क्षिपन्नारायणं रणे॥ २०॥ वाग्भिरप्रतिरूपाभिर्युद्धमेवाभ्यरोचयत्॥ क्षिप्यमाणोऽसुरेंद्रेण न चुकोप गदाध
रः॥ २१॥ क्षमाबलेन महता सस्मितं चेदमब्रवीत्॥ अल्पं दैत्य दर्पबलं स्थिरमक्रोधजं बलं॥ २२॥ हतस्त्वं दर्पजैर्दोषैः
हित्वा योऽभ्युपसे क्षमां॥ अधर्मस्तिमममतो धिगेतत्तव वाग्बलं॥ २३॥ न तत्र नराः स्त्रीसतिय त्र गर्जंति योषितः॥ अहं
त्वां दैत्य पश्यामि पूर्वेषां मार्गगामिनं॥ २४॥ प्रजापतिकृतं सेतुं कः स्वस्थः स्वस्तिमान् व्रजेत्॥ अद्य त्वां नाशयि
ष्यामि देवव्यापारघातिनं॥ स्वेषु स्वेषु च स्थानेषु स्थापयिष्यामि देवताः॥ एवं ब्रुवति चात्यर्थं मृधे श्रीवत्सधा
रिणं॥ २६॥ जहास दानवः क्रोधाद्धस्तांश्चक्रे च सायुधान्॥ स बाहुशतमुद्यम्य सर्वास्त्राणि रणे रणे॥ २७॥ क्रोधाद्द्वि
गुणरक्ताक्षो विष्णुं वक्षस्यताडयत्॥ दानवाश्चापि समरे मयतारपुरोगमाः॥ २८॥ उद्यतायुधनिस्त्रिंशा विष्णुमभ्य

म॰पु॰ ३१४

स्ववन्महती॥गदामुद्यबाहुभिः॥घोरांज्वलंतीमुमुचे संरब्धो गरुडोपरि॥२९॥कर्मणा तेन दैत्यस्य विष्णुर्विस्मयमा
गमत्॥यदा तेन सुपर्णस्य पातिता मूर्ध्नि सा गदा॥३०॥सुपर्णं व्यथितं दृष्ट्वा क्षतं च वपुरात्मनः॥क्रोधसंरक्त
नयनो वैकुंठश्चक्रमाददे॥३१॥व्यवर्द्धत च वेगेन सुपर्णेन च सम्मं विभुः॥भुजास्तस्य व्यवर्धंत व्याप्नुवंतो दिशो दश॥
३२॥विदिशश्चैव खं चापि गां चैव प्रतिपूरयन्॥ववृधे स पुनर्लोकानाक्रांतकाम इवौजसा॥३३॥सय्यां क्रिरीटेन म
लिहंसाभ्रसंबरैः॥पद्भ्यामाक्रम्य वसुधां दिशश्चाक्रम्य बाहुभिः॥३५॥+तं जयाय सुरेंद्राणां वर्द्धमानं नभ
स्तले॥ऋषयः सह गंधर्वैस्तुष्टुवुर्मधुसूदनं॥३४॥स सूर्यकरतुल्याभं सहस्रारमरिक्षयं॥दीप्ताग्निसदृशं
घोरं दर्शनेन सुदर्शनं॥३६॥सुवर्णरेणुपर्यंतं वज्रनाभं भयावहं॥मेदोस्थिमज्जारुधिरैः सिक्तं दानवसंभवैः
३७॥अद्वितीयं प्रहरणं क्षुरपर्यंतं सर्वविद्विषां॥महर्षिरोषैर्गर्भैर्विष्टं नित्यमाहवविजृंभितं॥३९॥प्रक्षेपा
घस्य मुक्तानि लोकाः संस्थाणुजंगमाः॥क्रव्यादानि च भूतानि तृप्तिं यांति महामृधे॥४०॥तदप्रतिमकर्मा
णं समानं सूर्यवर्चसं॥चक्रमुद्यम्य समरे कोपदीप्तो गदाधरः॥४१॥संमुष्ण दानवं तेजः समरे स्वेन तेजसा॥
चिच्छेद बाहुं चक्रेण श्रीधरः कालनेमिनः॥४२॥स तस्य देहो विमुखो विबाहुः स्वात्परिभ्रमन्॥निपपात दि राम॰
वं त्यक्त्वा गोस्त्यपन्धरणीतले॥४३॥तस्मिन्निपतिते दैत्ये देवाः सर्वगणास्तदा॥साधु साध्विति वैकुंठं समेताः ३१४

प्रत्यपूजयन्॥४४॥अपरे ये तु वै दैत्या युद्धेहष्टपराक्रमाः॥ते सर्वे बाहुभिर्व्याप्ता न शेकुश्चरितुं रणे॥४५॥कां
श्चित्केशेषु जग्राह कांश्चित्कंठे न्यपीडयत्॥चकर्त कस्यचिद्वक्त्रं मध्ये गृह्यापरं॥४६॥ते गदाचक्रनिर्द
ग्धा दैतेयास्तु गतासवः॥गगनात्भ्रष्टसर्वांगा निपेतुर्धरणीतले॥४७॥तेषु सर्वेषु दैत्येषु हतेषु पुरुषोत्तमः॥
तस्थौ शक्रप्रियं कृत्वा कृतकर्मा गदाधरः॥४८॥तस्मिन्विमर्दे निर्वृत्ते संग्रामे तारकामये॥तं देशमाजगा
माशु ब्रह्मा लोकपितामहः॥४९॥सर्वैर्ब्रह्मर्षिभिः सार्धं गंधर्वैश्चाप्सरोगणैः॥देवदेवं हरिं देवं पूजयन्वाक्यम
ब्रवीत्॥५०॥कृतं देव महत्कर्म सुराणां शल्यमुद्धृतं॥वधेनानेन दैत्यानां जयं च परितोषिताः॥५१॥योयं त्वया
हतो विष्णो कालनेमिर्महासुरः॥त्वमेकोस्य रणे हंता नान्यः कश्चिन्न विद्यते॥५२॥एष देवान्हरे जित्वा लोकांश्च
सचराचरान्॥ऋषीणां कदनं कृत्वा मामपि प्रतिगर्जितः॥५३॥तदा तेन वधेनास्य परितुष्टोस्मि कर्मणा॥य
द्यं कालकल्पस्ते कालनेमिर्निपातितः॥५४॥तदागच्छस्व भद्रं ते गच्छामि दिवमुत्तमं॥ब्रह्मर्षयस्त्वां तत्रस्थाः प्र
तीक्षंते सदोगताः॥५५॥किं चाहं न वरं तस्मात् मि वरं वरय तां वर॥सुरेष्वपि च दैत्येषु वराणां वरदो भवान्॥५६॥
नियातितं ये तत्त्रैलोक्यं स्फीतं निहतकंटकं॥अस्मिन्नेव मृधे विष्णो शक्राय सुमहात्मने॥५७॥एवमुक्तो भगवता ब्र
ह्मणा हरिदेवता॥देवान्शक्रमुखान्सर्वानुवाच शुभया गिरा॥५८॥॥विष्णुरुवाच॥॥अयतो त्रिदशाः सर्वे

यावंतोत्रसमागताः॥श्रवणाद्विहितैः श्रोत्रैः पुरस्कृत्यपुरंदरं॥५९॥अस्माभिः समरे सर्वे कालनेमिमुखाहताः॥दान
वाविक्रमोपेताः शक्रादपिमहत्तराः॥६०॥अस्मिन्नहनि संग्रामे द्वावेतौतुविनिर्गतौ॥विरोचनश्चदैत्येशः स्वर्भानु
श्चमहाग्रजः॥६१॥तदिष्टांभजतांलोकोदिशंचवरुणवज्रा॥याम्यांयमः पालयतांस्तुन्नरायां धनाधिप॥६२॥ऋक्षैः
सहसमायोगंगच्छतामपिचंद्रमाः॥अयंकृतमुखेस्वेयेनिजतामयनैसह॥६३॥देवाश्चपितरश्चैवत्त्रिंयांतिच
तेसुखं॥वायुश्चवायुमार्गस्थस्त्रिधादीप्यतपावकः॥६४॥त्रयोवर्णाश्चलोकांस्त्रींस्तर्पयंतांमजैर्गुणैः॥कृतवः
संप्रवर्तंतांदीक्षणीयेर्द्विजातिभिः॥६५॥दक्षिणाश्चोपपद्यंतांयतकेभ्यः पृथक्पृथक्॥गाश्चसूर्योरसान्दृश्यैः
णमहेंद्रमलयोद्भवाः॥६७॥त्रैलोक्यमातरः सर्वाः समुद्रंयांतुसिंधवः॥दैत्येभ्यस्त्यज्यतांभीश्चशांतिंव्रजंतु
देवताः॥६८॥स्वस्तितास्तुगमिष्यामिब्रह्मलोकंसनातनं॥स्वगृहेस्वर्गलोकेवासमेवास्त्वविशेषतः॥६९॥ए
वमुक्त्वासुरगणान्विष्णुः सत्यपराक्रमः॥जगामब्रह्मणासार्द्धंब्रह्मलोकंमहायशाः॥७०॥एतदाश्चर्यम
भवत्संग्रामेतारकामये॥दानवानांचविष्णोश्चयन्मांत्वंपरिपृच्छसि॥७१॥ ॥इतिश्रीमत्स्यपुराणेपद्मोद्भवप्रादु
र्भावः समाप्तः॥ ॥ऋषयऊचुः॥श्रुतः पद्मोद्भवः सूतविस्तरेणत्वयेरितः॥समासाद्भवमाहात्म्यंभैरवस्यविधि
यतो॥१॥सूतउवाच॥॥तस्यापिदेवदेवस्यशृणुध्वंकर्मचोत्तमं॥आसीत्दैत्योंधकोनामभिन्नांजनचयप्रभः॥

२॥तपसामहतायुक्तोप्यवध्यस्त्रिदिवौकसां॥सकदाचिन्महादेवंपार्वत्यासहितंविभुं॥३॥क्रीडमानंतदादृष्ट्वाह
र्तुंदेवींप्रचक्रमे॥तस्ययुद्धंतदाघोरंमभवत्सहशंभुना॥४॥रुद्रबाणविनिर्भिन्नेदरुधिरादंधकस्यह॥अं
धकाश्चसमुत्पन्नाः शतशोथसहस्रशः॥५॥तेषांविदार्यमाणानांरुधिरादपरेपुनः॥बभूवुरंधकाघोरायै
र्व्याप्तमखिलंजगत्॥६॥एवंमायाविनंदृष्ट्वातंचदेवस्तदांधकं॥पानार्थमंधकस्यापिससर्जेमातरस्तदा॥
७॥माहेश्वरीतथाब्राह्मीकौवेरीचानवींतथा॥वाराहीनारसिंहीचवैष्णवीचैवलक्ष्मीकां॥८॥शतानंदींभ
गानंदींपिच्छिमांभगमालिनीं॥बलामतिछलांचक्रांसुरभींमुखमंडिकां॥९॥मातृनंदींसुनंदांचबिडालीं
शाकिनींतथा॥रेवतींशंकरींचंडांलांगलींकुहिनांतथा॥१०॥अदितिंचदितिंचैवमारींमृत्युंतथैवच॥
कर्षमोटींतथायाम्यामुल्कांचघटोदरीं॥११॥वज्रहस्तांपिशाचींचकपालींराक्षसींतथा॥भुशुंडींशां
करींचंडांचक्रस्त्रींतथा॥१२॥प्रोटांसुलोचनांधूम्रांवरवर्णींकपालिकां॥विशालांदंष्ट्रिणींश्यामांत्रि
जटींकुर्कुटांतथा॥१३॥विनायकींचैववेतालींमुनानांवडवांतथा॥सिद्धिंचजेलिहानांचकेकरींगर्द्दभींतथा
१४॥वल्कटींबकपुत्रींमप्रेतयानांविटंकिनीं॥क्रौंचींशिलमुखींचैवविनतांसरमांदनुं॥१५॥उमारंजांमेन
कांचसलिलांचित्ररूपिणीं॥स्वधांस्वाहांवषट्कारांधृतिज्येष्ठांकपर्दिनीं॥१६॥मायांविचित्ररूपांचकाम

म०पु०
३१६

रूपांच संगमां॥सुखेदिनांविनीतांमंगल्यांमहानसां॥१७॥महामुखींकुमारींरोचनांभीमांसदामासमदोत्क
टां॥लंबाक्षींकालजिह्वांचकुंभकर्णींमहासुरीं॥१८॥केशिनींशंखिनींचैवपिंगालाक्षींहितामसीं॥उत्का
मुखींहिधूम्राशांकंपिनींपरिकंपिनीं॥१९॥मोहिनींकुंडलांक्ष्वेडांनिर्मांसांवाक्प्रशालिनीं॥खरकर्णीतथै
काक्षींविशांकांनंदिनींतथा॥२०॥ज्योत्स्नामुखींपुरघुरांनिकुंभांरक्तकंपनां॥अधिकारांमहाचित्रांचं
डसेनांमनोरमां॥२१॥अदर्शनांहरंत्याप्यांमातंगींलंबमेखलां॥अबलांवंदनांकालींप्रमोदांलांगला
चितां॥२२॥जटाकोशांशंतिकांहृष्टशालिनीं॥लंबस्तनींलंबसटांविसटांवासधूननीं॥२३॥खरनादींदीर्घ
रूतींस्तुचिरांसुंदरींसुखां॥अयोमुखींक्रोधनींचतथाशिनीं॥२४॥कृतस्तिकांशक्तिकांचचंद्रिकांबालमो
हिनीं॥सामांस्तामहिनींलंबांविदारींचसमासतः॥२५॥एतास्थान्याश्चदेवेशःसोसृजन्मातरश्चयाः॥अंध
कानांमहाघोराःपपुस्तारुधिरंतदा॥२६॥ततोंधकास्त्रजःसर्वाःपरांतृप्तिमुपागताः॥ततस्तप्रास्तथान्ट
ताःक्षीणाएवांधकस्त्रजः॥२७॥शूलमुद्गरपाणिस्तुपीडितःशंकरस्तदा॥ततःसशंकरोदेवोत्यंकथंकैर्म्या
कुलैःकृतः॥२८॥जगामशरणंदेवोवासुदेवंमजंविभुं॥ततःसभगवान्विष्णुःसृष्टवान्शुष्करेवतीं॥२९ राम:
यापपौसकलंतेषामंधकानांअसृक्क्षणात्॥यथायथाचरुधिरंपिबत्येसंभवंतथा॥३०॥तथातथाधि ३१६

कांदेवींसंतुष्यतीजनाधिपः॥पीयमानेतथातेषामंधकानांतथोसृजि॥३१॥अंधकास्तुक्षयंनीताःस
र्वेतत्रिपुरारिणा॥मूलांधकांतुविक्रम्यतदासर्वास्त्रिलोकधृक्॥३२॥चकारवेगाछूलाग्रेतत्रतुष्ट
श्चवशंकरं॥अंधकस्तुमहावीर्यस्तस्तुष्टोभवेद्भवः॥३३॥सामीप्यंप्रददौनित्यंगणेशत्वंतथैवच॥ततोमातृग
णाःसर्वेशंकरंवाक्यमब्रुवन्॥३४॥भक्षयिष्यामदेवेशसदेवासुरमानुषं॥त्वत्प्रसादाज्जगत्सर्वंतदनुज्ञातुमर्ह
सि॥३५॥शंकरउवाच॥भवतीभिःप्रजाःसर्वारक्षणीयानसंशयः॥अस्मात्घोरादभिप्रायान्मनःशी
घ्रंनिवर्त्यतां॥३६॥इत्येवंशंकरेणोक्तंअनादृत्यवचस्तदा॥भक्षांयामासुरव्यग्रास्त्रैलोक्यंसचराचरं॥३७
त्रैलोक्येभक्ष्यमाणेतुतदामातृगणेनवै॥नृसिंहमूर्तिंदेवेशंप्रदध्यौभगवान्विभुः॥३८॥अनादिनिध
नंदेवंसर्वलोकभवोद्भवं॥वज्रतीक्ष्णनखंघोरमाकर्णादारिताननं॥३९॥मेरुशैलप्रतीकाशमुदार्याकु
सुमेक्षणं॥हिमाद्रिशिखराकारंचारुदंष्ट्रोज्वलाननं॥४०॥नखनिःसृतरोषाग्निज्वालाकेसरमालिनं॥बृहं जि
गदांसुमुकुटंहारकेयूरभूषणं॥४१॥श्रोणीसूत्रेयमहाताकांचनेनविराजितं॥नीलोत्पलदलश्यामंवासोयु
गविभूषणं॥४२॥तेजसाक्रांतसकलब्रह्मांडांतरमंडपं॥पवनभ्राम्यमाणाग्नांकुतहव्यवदर्चिषं॥४३॥
आवर्तैःसहशाकारैःसंयुक्तांदेहलोमजैः॥सर्वरत्नविचित्रांगंधारयानंमहास्रजं॥४४॥संध्यातमो

म०पु०
३१७

वोनगवानप्रददौतस्यदर्शनं॥यादृशोनैवरूपेणध्यानेरुद्रेणभक्तितः॥४५॥तादृशेनैवरूपेणादुर्निरीक्ष्येणदैव
तैः॥प्रणिपत्यंतुदेवेशंतदातुष्टावशंकरः॥४६॥शंकरउवाच॥नमस्तेस्तुजगन्नाथनरसिंहवपुर्हरे॥दैत्य
नाथासृजापूर्णनखशुक्तिविराजते॥४७॥ततस्तुकलुषंलग्नंहेमपिंगलविग्रहं॥ततोस्यपद्मनाभस्यसोमा
चक्रेजगद्गुरोः॥४८॥कल्पांतमेघनिर्घोषःसूर्यकोटिसमप्रभः॥सहस्रयमसंक्रोधःसहस्रेंद्रपराक्रमः॥४९
सहस्रवदनस्फीतःसहस्रग्रहविक्रमः॥सहस्ररुद्रतेजस्कःसहस्रब्रह्मसंस्तुतः॥५०॥सहस्रवायुवेगो
ग्रःसहस्राक्षनिरीक्षणः॥सहस्रयंत्रमथनःसहस्रबंधमोचनः॥५१॥अंधकस्यविनाशायसृष्टायामातरोम
या॥अनादृत्यतुतद्वाक्यंभक्षयंत्युद्यताःप्रजाः॥५२॥कृत्वाताश्चनराकोहंसंमर्दुरपराजिताः॥स्वयंकृत्वाक
यंतासांअविनाशमरोचयथा॥५३॥एवमुक्तःसरुद्रेणनरसिंहवपुर्धरः॥ससर्जजिह्वयातास्तदावागीश्वरीं
हरिः॥५४॥हृदयात्तुतथामायांतुल्यांधनगमालिनीं॥ह्रस्विमिश्चतदाकालीसृष्टाह्येवंमहात्मना॥५५॥य
यातद्रुधिरंपीतंअंधकानांमहात्मनां॥यासास्मिकविनालोकेमामतःशुष्करेवती॥५६॥द्वात्रिंशन्मातरःसृ
ष्टागात्रेभ्यःशक्तियानतः॥तासांनामानिवक्ष्यामितानिमेगदतःशृणु॥५७॥सर्वासांसांमहामाणाघंटाकर्णी
तथैवच॥त्रैलोक्यमोहिनीपुण्यासर्वसत्ववशंकरी॥५८॥तथाचचक्रहृदयापंचमीकामचारिणी॥संकर्षणी

राम
३१८

तथास्वस्वाबीजरत्नुपचारिता॥५९॥कल्याणीमधुदंष्ट्राचकराजोत्पलहस्तिका॥इतिदेव्यष्टकराजन्मावा
तुचरवच्यते॥६०॥अजितासूक्ष्महृदयाहरावेशास्मदंशना॥नृसिंहभैरवाबिल्वागरुत्मध्दयाजया॥६१॥
मगमालिन्यरुचिराइत्यष्टौनपमातरः॥आकर्षणगणारुदीचतथैकोत्तरमालिका॥६२॥ज्वालामुखीभी
षणिकाकामधेनुश्चबालिका॥तथापद्मकराराजन्नष्टवैसानुस्तताःस्मृताः॥६३॥अष्टौमहाबलाःस
र्वदिव्यगात्रसमुद्भवाः॥त्रैलोक्यसृष्टिसंहारसमर्थाःसर्वदेवताः॥६४॥ताःसृष्टमात्रादेवेनक्रुद्धोमातृग
णःस्वच॥प्रधाविताहाराजक्रोधविस्फारितेक्षणाः॥६५॥अविषह्यंतुमातृणांदृष्टितेजसुदारुणं॥तमेव
शरणंप्राप्तनृसिंहोवाक्यमब्रवीत्॥६६॥यथामनुष्याःपशवःपालयंतिजगज्जनाः॥जायंतेवैतथैवाद्भुत
थावैदेवतागणाः॥६७॥भवंत्यस्तुतथालोकान्पालयंतुमयेरितां॥मनुजेश्चतथादेवैरक्षध्वंवैपुरोत
कं॥६८॥नबाधयावाप्रकर्तव्यायेनभक्तास्त्रिपुरांतके॥येचमांसंस्मरंतीहतेचरक्षानरास्मरा॥६९॥बलिक
र्मकरिष्यंतियुष्माकंयेसदानराः॥सर्वकामप्रदास्तेषांनविष्यध्वंनुसंशयः॥७०॥उत्पादितंयथावैवहरि
ष्यंतिहहतिचरक्षाःसदालोकारक्षितव्यंवयास्सनं॥७१॥रौद्रीचेवापरामूर्तिर्महादेवःप्रहास्यति॥
युष्मन्तुखामहादेवास्तपरोधंनरसच॥७२॥मयामातृगणःसृष्टोयोपंविर्पतिसाध्वज॥एषानित्वं

म०पु०
३१८

विज्ञाला क्षौमयैव सहरंस्यतं॥७३॥ मयासार्धं तथा पूजां नरेभ्यश्चैव लप्स्यथ॥१ यक्षप्रपूजितो लोके स
र्वान्लोकान्प्रदास्यथ॥७४॥ मुक्तो संप्रजयिष्यंति मैये च पुत्रार्थिनो जना:॥ तेषां पुत्रं तदा देवी भविष्य
ति न संशय॥७५॥ सर्वकामप्रदा लोके भविष्यंति च पूजिता:॥७५॥ ॥मत्स्यउवाच॥ ॥ तातावुक्त्वा भग
वान्सह मातृगणेन तु॥ ज्वालामालाकुलवपुस्तत्रैवांतरधीयत॥७६॥ रौद्रस्य मातृवर्गस्य दत्वा रुद्रस्य
पार्थिव:॥ रोकं दिव्यं तनुस्तत्र तत्रैवांतरधीयत॥७७॥ समातृवर्गस्य सरोषमूर्तिर्जुष्टे यदा तिष्ठति तत्समी
पे॥ देवेश्वरस्यापि नृसिंहमूर्तेः पूजां विधत्ते त्रिपुरांतकारी॥७८॥ ॥इतिश्रीमत्स्यपुराणे अंधकवध:॥ ॥
ऋषय ऊचु:॥ ॥ श्रुतोंधकवध: सूत यथावत्त्वदीरित:॥ वाराणस्यास्तु माहात्म्यं श्रोतुमिच्छामि सांप्रतं॥१
भगवान्पिंगल: केन गणत्वं समुपागत:॥ अन्नदत्वं च संप्राप्तो वाराणस्यां महाद्युति:॥२॥ क्षेत्रपालेक
थं जात: प्रियत्वं च कथं गत:॥ एतदिच्छामकथितं श्रोतुं ब्रह्मसुत त्वया॥३॥ ॥सूत उवाच॥ ॥ शृणुध्वं वै यथा
लेभे गणेशत्वं च पिंगल:॥ अन्नदत्वं च लोकानां स्थानं वाराणसी महत्॥४॥ पूर्णभद्रसुत: श्रीमानासीद्य राम
क्ष: प्रतापवान्॥ हरिकेश इति ख्यातो ब्राह्मणो धार्मिकोपि च॥५॥ तस्य जन्मप्रभृत्येव सर्वे भक्तिपरा नरा:॥ ३१८
तदासीत्तन्नमस्कारस्तन्निष्ठस्तत्परायण:॥६॥ आसीनश्च शयानश्च गच्छंस्तिष्ठन्ननुसन्व्रजन्॥ भुंजानोथ

पिबन्वापि रुद्रमेवान्वचिंतयत्॥७॥ तमेवंभक्तमनसं पूर्णभद्र: पिताब्रवीत्॥ नत्वां पुत्रमहं मन्ये दुर्जातो यस्त्व
यान्यथा॥८॥ नहि यक्षकुलीनानामेतद्वृत्तं भवत्सुत॥ गुह्यकायनस्त्वं वै स्वभावक्रूरचेतस:॥९॥ क्रव्यादाश्चै
व संभक्ष्या सिंहशीलाश्च पुत्रक॥ मैवं कार्षीर्न ते वृत्तिरेवं दिष्टा महात्मना॥१०॥ स्वयंभुवा यथा दिष्टा त्यक्त्वा यदि
यं नो भवेत्॥ आश्रमांतरजं कर्म न कुर्यात्गृहिणां ततः॥११॥ हित्वा मनुष्यभावं च कर्मभिर्विविधैश्च ह॥ देवत्वं
तो विमार्गंतु मनुष्या जातिरेव च॥१२॥ अथवा विविधं तेषां धर्मं निष्प्राप्तिसंस्थितं॥ मयापि विहितं पश्य कर्म त
न्मे नात्र संशय:॥१३॥ ॥सूत उवाच॥ ॥ स एवमुक्त्वा पुत्रेण पूर्णभद्र: प्रतापवान्॥ उवाच निष्ठुरं विप्रं गच्छ पुत्र
यथेच्छसि॥१४॥ ततः स निर्गतस्त्यक्त्वा गृहं संबंधिनस्तथा॥ वाराणसीं समासाद्य तपस्तेपे सुदुश्चरं॥१५॥ स्था
णुभूतो ह्यनिमिष: शुष्ककाष्ठोपलोपम:॥ संनियम्येंद्रियग्रामं अवाक्तिष्ठति निश्चय:॥१६॥ अथ तस्यानि
स्य मिषस्य तत्परस्यतदाश्रय:॥ सहस्रमेकं वर्षाणां दिव्यमस्मुदवर्तत॥१७॥ वल्मीकेन समाक्रांतो भक्ष्यमा
ण: पिपीलकै:॥ वज्रसूचीमुखैस्तीक्ष्णैर्विध्यमानस्तथैव च॥१८॥ निर्मांसरुधिर: खिन्न: कुंदेंदुशंखप्र स
भ:॥ अस्थिशेषोभवत्तस्य तं देवं वै चिंतयन्नपि॥१९॥ एतस्मिन्नंतरे देवी विज्ञापयति शंकरं॥१९॥ ॥देव्यु
वाच॥ ॥ उद्यानं पुनरेवेदं द्रष्टुमिच्छामि सर्वदा॥२०॥ क्षेत्रस्य चैव माहात्म्यं श्रोतुं कुतूहलं हि मे॥२०॥ यतस्तत्प्रि

म०पु० ३१८

विङ्गलाक्षौ मयैव सहरंस्यतं ॥७३॥ मया सार्धं तथा पूजां नरेभ्यश्चैव लप्स्यथ ॥ १ यक्षप्रहृजिता लोके स
र्वान्लोकान्प्रदास्यथ ॥७४॥ श्रद्धांसः प्रजयिष्यंति मे ये च पुत्राश्च निजनाः ॥ तेषां पुत्रं तदा देवी न विघ्न
तिन संशय ॥७५॥ सर्वकामप्रदा लोके भविष्यंति च पूजिताः ॥७५॥ ॥ मत्स्य उवाच ॥ ॥ एतावदुक्त्वा भग
वान्सह मातृगणो नृतः ॥ ज्वालामालाकुलवपुस्तत्रैवांतरधीयत ॥७६॥ रौद्रस्य मातृवर्गस्य दत्वा रुद्रस्य
पार्थिवः ॥ रौद्रं दिव्यं तनुस्तत्र तत्रैवांतरधीयत ॥७७॥ समातृवर्गस्य सरोषमूर्तिं जुषे यदा तिष्ठति तत्समी
पे ॥ देवेश्वरस्यापि नृसिंहमूर्तेः पूजां विधत्ते त्रिपुरांतकारी ॥७८॥ ॥ इति श्रीमत्स्यपुराणे अंधकवधः ॥ ग्र
रूपपञ्चशु ॥ ॥ श्रुतोंधकवधः सूत यथावत्त्वदुदीरितः ॥ वाराणस्यास्तु माहात्म्यं श्रोतुमिच्छामि सांप्रतं ॥१
भगवान्पिंगलः केन गणत्वं समुपागतः ॥ अन्नदत्वं च संप्राप्तो वाराणस्यां महाद्युतिः ॥२॥ क्षेत्रपालः क
थं जातः प्रियत्वं च कथं गतः ॥ एतदिच्छाम्यहं कथितं श्रोतुं ब्रह्मसुत तत्त्वतः ॥३॥ ॥ सूत उवाच ॥ ॥ शृणुध्वं वै यथा
लेभे गणेशत्वं च पिंगलः ॥ अन्नदत्वं च लोकानां स्थानं वाराणसी महत् ॥४॥ पूर्णभद्रसुतः श्रीमानासीद्य राम ३१८
क्षः प्रतापवान् ॥ हरिकेश इति ख्यातो ब्राह्मणो धार्मिकोप्यथ ॥५॥ तस्य जन्मप्रभृत्येव सर्वे भक्तिपरा नराः ॥
तदासीत्तन्नमस्कारस्तन्निष्ठस्तत्परायणः ॥६॥ आसीनश्च शयानश्च गच्छंस्तिष्ठन्ननुव्रजन् ॥ भुंजानोऽथ

पिबन्ध्यायिरुद्रमेवान्वचिंतयत् ॥७॥ तमेवं युक्तमनसं पूर्णभद्रः पिताब्रवीत् ॥ नत्वां पुत्रमहं मन्ये दुर्जातो यस्त्व
यान्यथा ॥८॥ नहि यक्षकुलीनानामेतद्वृत्तं भवत्सुत ॥ गुह्यकायनस्य वै स्वभाव क्रूरचेतसः ॥९॥ क्रव्यादाश्चै
व संभक्ष्याः सिंहशीलाश्च पुत्रक ॥ मैवं कार्षीर्नैतद्वृत्तिरेवं दिष्टा महात्मना ॥१०॥ स्वयंभुवा यथा दिष्टा त्यक्त्वा यदि
यं नो भवेत् ॥ आश्रमांतरजं कर्म न कुर्याद्गृहिणस्ततः ॥११॥ हित्वा मनुष्यभावं च कर्मभिर्विविधैश्च हि ॥ देवत्वं
तो विमार्गस्तु मनुष्या जातिरेव च ॥१२॥ अथवा विविधं तेषां धर्मं न प्राप्नि संस्थितं ॥ मयापि विहितं पश्यक कर्मत
स्मैन्नात्र संशयः ॥१३॥ ॥ सूत उवाच ॥ ॥ स एवमुक्त्वा पुत्रेण पूर्णभद्रः प्रतापवान् ॥ उवाच निष्ठुरं विप्र गच्छ पुत्र
यथेच्छसि ॥१४॥ ततः स निर्गतस्त्यक्त्वा गृहं संबंधिनस्तथा ॥ वाराणसीं समासाद्य तपस्तेपे सुदुश्चरं ॥१५॥ स्था
णुभूतो ह्यनिमिषः शुष्ककाष्ठोपलोपमः ॥ संनियम्येंद्रियग्रामं अवाक्तिष्ठति निश्चयः ॥१६॥ अथ तस्यानि
स्य मिषस्य तत्परस्य तदाश्रयः ॥ सहस्रमेकं वर्षाणां दिव्यमभ्युदवर्तत ॥१७॥ वल्मीकेन समाक्रांतो भक्ष्यमा
णः पिपीलकैः ॥ वज्रसूचीमुखैस्तीक्ष्णैर्विध्यमानस्तथैव च ॥१८॥ निर्मांसरुधिरः खिन्नः कुंदेंदुशंखसन्नि स
भः ॥ अस्थिशेषोऽभवत्सर्वं देवं वै चिंतयन्नपि ॥१९॥ एतस्मिन्नंतरे देवी विज्ञापयति शंकरं ॥१९॥ ॥ देव्यु
वाच ॥ ॥ उद्यानं पुनरेवेदं द्रष्टुमिच्छामि सर्वदा ॥२०॥ क्षेत्रस्येव चैव माहात्म्यं श्रोतुं कुतूहलं हि मे ॥२०॥ यतश्च प्रि

यमंतत्तेपदस्यफलमुत्तमं॥इतिविज्ञापितोदेवःपार्वत्या परमेश्वरः॥२१॥सर्वहि दंयथातथ्यमाख्यातुमुपचक्रमे॥
निर्जगामैवदेवेशःपार्वत्यासहशंकरः॥२२॥उद्यानंदर्शयामासदेवदेवःपिनाकधृक्॥प्रफुल्लनानाविधगु
ल्मशोभितंलताप्रतानैसफलंमनोहरं॥विरूढपुष्पैःपरितःप्रियंगुभिःसपुष्पितैःकंटकितैश्चकेतकैः॥२३॥
तमालगुल्मैर्निचितैःसुगंधिभिःसकर्णिकारैर्विपुलैश्चसर्वशः॥आम्रातकपुन्नागवरैश्चपुष्पितैर्द्विरेफमालाकु
लपुष्पसंचयैः॥२४॥क्वचित्प्रफुल्लांबुजरेणुभूषितैर्विहंगमैश्चारुकलप्रणादिभिः॥क्वचिच्चचक्रांगरुतैःप्रणा
दितंक्वचिच्चकादंबकदंबकायुतं॥२५॥क्वचिच्चकारंडवनादनादितंक्वचिच्चमत्तालिकुलाकुलीकृतं॥मदाकुला
भिर्भ्रमरांगनाभिर्निषेवितंचासुरगंधिपुष्पितैः॥२६॥क्वचित्सुपुष्पैःसहकारवृक्षैर्लतोपगूढैस्तिलकैश्चवृक्षि
केः॥प्रगीतविद्याधरसिद्धचारणंप्रनृत्यगीताप्सरोगणं॥२७॥प्रहृष्टनानाविधपक्षिसेवितंप्रमत्तहारी
तकुलोपनादितं॥मृगेंद्रनादाकुलमत्तमानसैःक्वचित्क्वचिद्द्वंद्वकदंबकैर्मृगैः॥२८॥प्रफुल्लनानाविधवृक्षचं
पकैःसरस्तडागैरुपशोभितंक्वचित्॥निविडनिचुलनीडनीलकंठाभिरामंमदमुदितविहंगव्रातनादाभिरामं॥
कुसुमिततरुशाखालीनमत्तद्विरेफंनवकिसलयशोभाशोभितप्रांतशाखं॥२९॥क्वचिच्चदंताक्षतचारुवीरु राम
धंक्वचिल्लतालिंगितचारुवृक्षं॥क्वचिद्विलासालसगामिनीभिर्निषेवितंकिंपुरुषांगनाभिः॥३०॥पारापतध्व ३१९

निनिकूजितचारुशृंगैरत्नंकषैःसितमनोहरचारुरूपैः॥आकस्मिपुष्पनिकरप्रविमुक्तहासैर्विभ्राजितंत्रिदश
देवकुलैरनेकैः॥३१॥फुल्लोत्करैःफलसहस्रवितानयुक्तैःशोभासवैःसमनुशासितदेवमार्गः॥मार्गीतरागलि
तपुष्पविचित्रभक्तिःसंबद्धगुल्मविटपैर्विहगैरुपेतं॥३२॥शृंगाग्रनीलपुष्पैःस्तबकभरनतप्रांतशाखैरशोकै
र्मत्तालिप्रांतगीतश्रुतिसुखजननैर्भाषितांतर्मनोगैः॥रात्रौचंद्रस्यभासाकुसुमिततिलकैरेतांसंप्रयातंछा
यासुप्तप्रबुद्धस्थिरहरिणकुलालुप्तदर्भांकुराद्यं॥३३॥हंसानांपक्षवातप्रचलितकनमस्वच्छविस्तीर्णतो
यंतोयानांतीरजातप्रविकचकदलीवाटनृत्यन्मयूरं॥मायूरैःपक्षचंद्रैःक्वचिदपिपतितैरंजिताक्ष्माप्रदेशंदेशे
देशेमनोज्ञप्रमुदितविलसन्मत्तहारीतवृंदं॥३४॥सारंगैःक्वचिदपिशोभितप्रदेशंसंछन्नैःकुसुममयैःक्व
चिद्विचित्रैः॥हृष्टाभिःक्वचिदपिकिंनरांगनाभिःक्षीराभिर्मधुरसुगीतवृक्षखंडैः॥३५॥संसृष्टैःक्वचिदुप
लिप्तकीर्णपुष्पैरावासैःपरिवृतपादपंमुनीनां॥आमूलोच्चलनिचितैःक्वचिच्चतरुशालगैःपवनसमस्त
कुमैरुपेतं॥३६॥फुल्लातिमुक्तलतागृहलीलसिद्धिगनाकनकनूपुररावरम्यं॥रम्यप्रियंगुतरुमंजरिसक्त
भृंगंभृंगावलीचलिताम्रकदंबपुष्पं॥३७॥पुष्पोत्करानिलविघूर्णितपादपाग्रमग्रेशतैर्मुनिपातसमंजरागु
ल्मं॥गुल्मांतरप्रभृतीभिसमृगीसहस्रंसंमुत्पाततानुमतातपवर्गहिंतुं॥३८॥चंद्रांशुजालधवलैस्तिलकैर्मनो

तेः सिंदूरकुंकुमकुसुंभनिभैरशोकैः॥ चामीकरप्रतिमैरथ कर्णिकारैः फुल्लारविंदनिवहैः सुविशाललग्नैः
३९॥ क्वचिद्रजतपर्णाभिः क्वचिद्रजतसन्निभैः॥ क्वचित्कांचनसंकाशैः पुष्पैराचितभूतलं॥४०॥ पुन्नागेषु द्वि
जवरचितलंरक्ताशोकस्तबकंनरनमितं॥ रम्योपांतसमहोपवनंफुल्लास्तेषु भ्रमरविहगसितं॥४१॥ सकलभु
वनजनालोकस्तब्यस्तदानीं तुहिनशिखरिपुत्र्या सार्द्धमिष्टैर्गणेशैः॥ विविधतरुविशालं मत्तहृष्टान्यपुष्टंउ
पवनतरुरम्यंदर्शयामासदेव्याः॥४२॥ श्रीदेव्युवाच॥ उद्यानंदर्शितंदेवशोभयापरयायुतं॥ क्षेत्रस्यतुगु
णाः सर्वेपुनर्वक्तुमिहार्हसि॥४३॥ अस्यक्षेत्रस्यमाहात्म्यमविमुक्तस्यवैतथा॥ श्रुत्वापिहिनमेतृप्तिरतो
भूयोवदस्वमे॥४४॥ देवदेवउवाच॥ इदंगुह्यतमंक्षेत्रंसदावाराणसीमम॥ सर्वेषामेवजंतूनांहेतुर्मो
क्षस्यसर्वदा॥४५॥ अस्मिन्सिद्धाःसदादेविमदीयंव्रतमास्थिताः॥ नानालिंगव्रतानित्यंममलोककांक्षिणः
४६॥ अभ्यसंहतिपरंयोगंयुक्तात्मानोजितेंद्रियाः॥ नानावृक्षसमाकीर्णेनानाविहगनादिते॥४७॥ कमलोत्प
लपुष्पाढ्यैःसरोभिःसमलंकृते॥ अप्सरोगणगंधर्वैःसदासंसेवितेशुभे॥४८॥ रोचतेमेसदावासोयेनकार्येण
तच्छृणु॥ मात्मनाममभक्तश्चमय्येवसर्वार्पितक्रियः॥४९॥ यथामोक्षमिहाप्नोतिअन्यत्रनतथाक्वचित्॥ एतन्मम राम
पुरंदिव्यंगुह्याद्गुह्यतमंमहत्॥५०॥ ब्रह्मादयोविजानंतियेचसिद्धामुमुक्षवः॥ अतःप्रियतमंक्षेत्रंतस्माद्धेवह ३२०

हरेमम॥५१॥ अविमुक्तंमयायस्मात्मोक्ष्यतेनकदाचन॥ इहसंप्राप्यतेयेनततएतद्विशिष्यते॥५२॥ प्रयोगेवा
नवेदमोक्षइवासत्यविग्रहात्॥ प्रयोगादपितीर्थास्याद्दिदमेवमहस्मृतं॥५३॥ जैगीषव्यःपरांसिद्धिंयोगतःसु
महातपाः॥ अस्यक्षेत्रस्यमाहात्म्यात्भक्त्याचसमभावनात्॥५४॥ जैगीषव्योमहाश्रेष्ठोयोगिनांस्थानमिष्यते॥ ३
ध्यायतस्तत्रमांनित्यंयोगाग्निर्दीप्यतेभृशं॥५५॥ कैवल्यंपरमंयातोदेवानामपिदुर्लभं॥ अव्यक्तलिंगैर्मुनिभि
सर्वसिद्धांतवादिभिः॥५६॥ इहसंप्राप्यतेमोक्षोदुर्लभोन्यत्रकर्हिचित्॥ ततश्चायंप्रयच्छामियोगैश्वर्यमनुत्तमं
५७॥ आत्मनाचैवसायोज्यमीप्सितंस्थानमेवच॥ कुवेरस्तुमहायक्षस्तथासर्वार्पितक्रियः॥५८॥ क्षेत्रसंसेवना
देवगणेशत्वमवाप्तह॥ संवर्तोभवितायश्चसोपिभक्तोममैवहि॥५९॥ इहैवाराध्यमांदेविसिद्धिंयास्यत्यनुत्तमां
पराशरसुतोयोगीऋषिर्व्यासोमहातपाः॥६०॥ धर्मकर्ताभविष्यश्चवेदसंस्थाप्रवर्तकः॥ तप्स्यतेसोपिपद्मा
क्षिप्तेत्रेस्मिन्मुनिपुंगवः॥६१॥ ब्रह्मादेवर्षिभिःसार्द्धंविष्णुर्वायुर्दिवाकरः॥ देवराजस्तथाशक्रोयेचान्येपिदिवौक
सः॥६२॥ तेवसंतेमहात्मानःसर्वेषामिहसुव्रत॥ मयिसर्वार्पितगुणोममैवप्रतिपत्स्यते॥६३॥ ततःप्रभृति
चावृगियेपिक्षेत्रेनिवासिनः॥ गृहिणोलिंगिनोवापिभक्तामत्परायणाः॥६४॥ मत्प्रसादात्गमिष्यंति
मोक्षंपरमदुर्लभं॥ विषयासक्तचित्तोपिनरकधर्मरतिर्नरः॥६५॥ इहक्षेत्रेमृतःसोपिसंसारेनपुनर्भवेत्॥

म०पु०
३२१
पुनर्निर्मत्सराधीराः सत्वस्थाः पिविजितेंद्रिया ॥६६॥ यतिनश्च निरारंभाः सर्वेते मयिभाविता ॥ देहभंगं समासाद्य
धीमंतः संगवर्जिताः ॥६७॥ गताएव परं मोक्षं प्रसादातां ॥ जन्मांतरसहस्रेषु युंजन्योगी यमाप्नुयात् ॥६८॥ त
दिहैव परं मोक्षं मरणादपि गच्छति ॥ एवं संक्षेपतो देवि क्षेत्रस्यास्य महाफलं ॥६९॥ अविमुक्तस्य कथितं म
यातेगुत्यभाषितं ॥ अतः परतरं नास्ति इदं गुत्यं महेश्वरि ॥७०॥ एतद्बुध्यंति योगज्ञाय त्र योगेश्वरात्तुवि ॥ ए
तदेव परं स्थानमेतदेव परं शिवं ॥७१॥ एतदेव परं ब्रह्म एतदेव परं पदं ॥ वाराणसी तु भुवनत्रयसारभूता नस्याः
पुरी मम सदा गिरिराजपुत्रि ॥ अत्रागता विविध दुःकृतकारिणो पि पापक्षये विरजसः प्रतिभांति मर्त्याः ॥७२॥
एतत्स्मृतं प्रियतमं मम देवि कृत्यं क्षेत्रं विचित्र तरु गुल्म निकाय पुष्पं ॥ अस्मिन्मृतास्तनुभृतः पदमाप्नुवंति
सूरार्खंगमेन रहितापि नसंशयो स्तु ॥७३॥ सूत उवाच ॥ ॥ एतस्मिन्नंतरे देवो देवीं प्राह गिरींद्रजां ॥ दातुं प्रसा
दं यक्षाय वरं भक्ताय पन्नाविने ॥७४॥ भक्तो मम वरारोहे तपसा हतकिल्बिषः ॥ अहो वरमसौ लब्धं अस्मत्तो
भुवनेश्वरि ॥७५॥ एवमुक्त्वा ततो देवः सह देव्या जगत्पतिः ॥ जगाम यक्षो यत्रास्ति कृशो धमनि संततः ॥ राम०
७६॥ तं हष्ट्वा प्रणतं भक्त्या हरिकेशं वृषध्वजः ॥ दिव्यं चक्षुस्तदा तस्मै येना पश्यत्स शंकरं ॥७७॥ सूत उवाच ॥ ३२१
अथ यक्षस्तदा तत्र शनैरुन्मील्य चक्षुषी ॥ अपश्यत्सगणं देवं वृषध्वे तमुपाश्रितं ॥७८॥ ॥ देवदेव उवाच ॥ ॥

वरं ददामि ते पूर्वं त्रैलोक्ये दर्शनं तथा ॥ सावर्ण्यं च शरीरस्य पश्य मां विगत ज्वरः ॥१०७॥ सूत उवाच ॥ गत तः प
लब्ध्वा तु वरं शरीरे स्वाक्ष मं वचः ॥ पादयोः प्रणतस्तस्थौ कृत्वा शिरसि चांजलिं ॥८०॥ उवाचाथ तदा तेन वरदो
स्मीति चोदितः ॥ भगवन्भक्तिमव्यग्रां त्वय्यनन्यां विधत्स्व मे ॥८१॥ अन्नदः सर्व लोकानां गणेशत्वं तथाक्ष
यं ॥ अविमुक्तं च नेक्षेत पश्येयं सर्वदा पदं ॥८२॥ एतदिच्छामि देवेश त्वत्तो वरमनुत्तमं ॥८२॥ देवदेव उवाच ॥
जरामरण निर्मुक्तः सर्वलोक विवर्जितः ॥ भविष्यसि गणाध्यक्षो वरदः सर्वपूजितः ॥८३॥ अजेयश्चापि सर्वेषां
योगैश्वर्य समन्वितः ॥ अपेह चापि लोकस्य क्षेत्रपालो भविष्यति ॥८४॥ महाबलो महासत्वो ब्रह्मण्यो मम च प्रियः
त्र्यक्षश्च दंडपाणिश्च महायोगी तथैव च ॥८५॥ उद्भ्रमः संभ्रमश्चैव गणौ ते परिचारकौ ॥ तवाज्ञया करिष्येते लो
कस्योद्भ्रम संभ्रमौ ॥८६॥ ॥ सूत उवाच ॥ ॥ एवं स भगवांस्तत्र यक्षं कृत्वा गणेश्वरं ॥ जगाम वासं देवेशः स
ह तेन महेश्वरः ॥८७॥ ॥ इति श्रीमत्स्य पुराणे वाराणसी माहात्म्ये दंडपाणि वरप्रदानं ॥ ॥ सूत उवाच ॥ ग
पा अथ पुण्योद्भवां स्निग्धां कथां पंप्रणाशनीं ॥ शृण्वंतु मनुजाः सर्वे शुचि श्रद्धासमाहिताः ॥ गणेश्वरपतिं दि
व्यं रुद्रतुल्य पराक्रमं ॥ सनत्कुमारो भगवान्पृच्छते नंदिकेश्वरं ॥२॥ सनत्कुमार उवाच ॥ ॥ ब्रूहि गुत्यं तथा तत्वं
य तत्र नित्यं भवं स्थितः ॥ महात्मा सर्वभूतानां परमात्मा महेश्वरः ॥३॥ ॥ श्रीनंदिकेश्वर उवाच ॥ प्रपुरा देवेन यत्नो

म०पु० कंपुराणंपुण्यमुत्तमं ॥ तत्सर्वंसंप्रवक्ष्यामिनमस्कृत्वामहेश्वरं ॥ ४ ॥ यतोदेवेनतुष्टेनउमायाः प्रियकाम्यया ॥
३२२ कथितंचुविविक्तेतयत्रनित्यंभवंस्थितः ॥ ५ ॥ रुद्रस्यार्द्धासनगतामेरुशृंगायशस्विनी ॥ महादेवंततोदेवीप्रण
तापरिपृच्छति ॥ ६ ॥ श्रीदेव्युवाच ॥ ॥ भगवन्देवदेवेशचंद्रार्धकृतशेखर ॥ कथयंतुम्भतिलोकानांमर्त्यलोकेपर
मेश्वर ॥ ७ ॥ इष्टंदत्तंहुतंजप्तंतपस्तप्तंकृतंचयत् ॥ ध्यानमध्ययनंदानंकथंभवतिचाक्षयं ॥ ८ ॥ जन्मांतरस
हस्रेणयत्पापंपूर्वसंचितं ॥ कथंतत्क्षयमायातितन्ममाचक्ष्वशंकर ॥ ९ ॥ यस्मिन्नवस्थितोभक्तास्तुष्यसे
परमेश्वर ॥ व्रतानिनियमांश्चैवमाचारंधर्ममेवच ॥ १० ॥ सर्वसिद्धिकरंयत्रअक्षयाचगतिर्भवेत् ॥ वक्तुम
र्हसितत्सर्वंपरंकौतूहलंहिमे ॥ ११ ॥ देवदेवउवाच ॥ ॥ शृणुदेविप्रवक्ष्यामिगुह्यानांगुह्यमुत्तमं ॥ सर्वक्षेत्रे
वि षुविख्यातमविमुक्तंप्रियंमम ॥ १२ ॥ अष्टषष्टिंपुराणोक्तस्थानानांशिवमुत्तमं ॥ यत्रसाक्षात्स्वयंरुद्रः कृत्ति
वासाः स्वयंस्थितः ॥ १३ ॥ तत्रसंनिहितोनित्यमविमुक्तेनिरंतरं ॥ ततःक्षेत्रंमयामुक्तमविमुक्तंततःस्मृतं ॥ १४
अविमुक्तेपरासिद्धिरविमुक्तेपरागतिः ॥ इष्टंदत्तंहुतंजप्तंतपस्तप्तंकृतंचयत् ॥ १५ ॥ ध्यानमध्ययनंदा राम०
नंसर्वंभवतिचाक्षयं ॥ जन्मांतरसहस्रेणयत्पापंपूर्वसंचितं ॥ १६ ॥ अविमुक्तेप्रविष्टस्यतत्सर्वंव्रजतिक्षयं ॥ ३२२
अविमुक्ताग्निनादग्धमग्नौतूलमिवाहुतं ॥ १७ ॥ ब्राह्मणाः क्षत्रियावैश्याः शूद्रावैवर्णसंकराः ॥ स्त्रियोम्लेच्छा

श्चयेचान्येसंकीर्णाःपापयोनयः ॥ १८ ॥ कीटाःपिपीलिकाश्चैवयेचान्येमृगपक्षिणः ॥ कालेननिधनंप्राप्ताअवि
मुक्तेशृणुष्वमे ॥ १९ ॥ चंद्रार्द्धमौलिनःसर्वेललाटाक्षावृषध्वजाः ॥ शिवेममपुरेदेविजायंतेतत्रमानवाः ॥ २० ॥ अ
कामोवासकामोवातिर्यग्योनिगतोपिवा ॥ अविमुक्तेत्यजेत्प्राणान्ममलोकेमहीयते ॥ २१ ॥ अविमुक्तंतदाग
च्छेत्कदाचित्कालपर्ययात् ॥ अश्मनाचरणौभित्वातत्रैवनिधनंव्रजेत् ॥ २२ ॥ अविमुक्तंगतोदेविननिर्गच्छे
त्ततःपुनः ॥ वस्त्रापदंब्रह्मकोटिंसिद्धेश्वरमहालयं ॥ २३ ॥ गोकर्णंरुद्रकर्णंचसुवर्णाक्षंतथैवच ॥ एतानिहि
विचित्राणिसान्निध्यंसंध्ययोर्द्वयोः ॥ २४ ॥ कालंजनवनेचैवशंकुकर्णंस्थलेश्वरं ॥ जालंधरंपरंगुह्यंगुह्यंश्रीप
र्वतंतथा ॥ २५ ॥ महालयंपरंगुह्यंयमंचंडेश्वरंतथा ॥ गुह्यातिगुह्यंकेदारंमहाभैरवमेवच ॥ २६ ॥ अष्टावेतानिस्था
नानिसान्निध्यानिममप्रिये ॥ यानिस्थानानिश्रूयंतेत्रिषुलोकेषुविश्रुते ॥ २७ ॥ सर्वेश्वरस्यपादेषुनित्यंसंनिहि
तानिवै ॥ अयोत्तरंकथंपादिव्यामविमुक्तस्यशोभने ॥ २८ ॥ स्कंदोवक्ष्यतिमाहात्म्यंयदुक्तमीश्वरेणतु ॥ ऋषीणां
भावितात्मानांतत्शृणुष्वनरेश्वर ॥ २९ ॥ ॥ इतिश्रीमत्स्यपुराणेअविमुक्तमाहात्म्ये ॥ ॥ सूतउवाच ॥ ॥ कैला
शास्त्रिष्टमासीनंस्कंदंब्रह्मविदांवरं ॥ पप्रच्छुर्ऋषयःसर्वेसनकाद्यामहातपाः ॥ १ ॥ तथाब्रह्मर्षयःसर्वेपृभक्ता
स्तुमहेश्वरे ॥ १ ॥ ऋषयऊचुः ॥ ॥ ब्रूहित्वंस्कंदमर्त्यलोकेयत्रनित्यंभवःस्थितः ॥ २ ॥ महात्मासर्वभूतात्मादेवदेवः

म०पु०
३२२

सनातननैः॥२॥घोररूपं समास्थाय दुःकरं देवदानवैः॥अमृतसप्रवं यावत्स्थाप्य न्मृतः स्थितः प्रभुः॥३॥तत्वा
नां परमं गुह्यमविमुक्तमितिस्मृतं॥अविमुक्ते सदा सिद्धिर्यदिनां तेन वव स्थितः॥४॥अस्य क्षेत्रस्य महात्म्यं युक्तं
मीश्वरेण तु॥स्थानांतरं पवित्रं च तीर्थमायतनं तथा॥५॥श्मशाने संस्थितं वेश्म दिव्यं श्रां विहितं च यत्॥न्मृलो
केनैव संयुक्तं अंतरिक्षे शिवालयं॥६॥अयुक्तास्तु न पश्यंति चेतसा॥ब्रह्मचर्यव्रतैः श्रांतां चेता निष्ठानकोवि
दः॥७॥आदेहपतनाद्यावत्क्षेत्रं यो न विमुंचति॥ब्रह्मचर्यव्रतैः सम्यक्सम्यग्गिष्ट सुखे भवेत्॥८॥अया
मागतिः सर्वेषाम योक्ता च क्रियावतां॥नैःश्रेयसीं गतिं पुण्यां तथा योगगतिं लभेत्॥९॥नहि योगगतिर्दिव्या
जन्मांतरशतैरपि॥प्राप्यते क्षेत्रमाहात्म्यात्प्रसादाच्छंकरस्य तु॥१०॥यस्तत्र वसते नित्यं संयतात्मा समाहि
तः॥त्रिकालमपि भुंजानो वायुभक्षः सदा भवेत्॥११॥निमेषमात्रमपि यो ह्यविमुक्ते तु भक्तिमान्॥ब्रह्मचर्य
समायुक्तः सपरं तपते तपः॥१२॥वत्न मासं चरेद्वीरो जितात्मा विजितेंद्रियः॥सम्यक्तेन व्रतं चीर्णं दिव्यं पाशु
पतं रूपतेतपः॥१३॥तत्र मासं चरेद्वीरो जितात्मा विजितेंद्रियः॥सम्यक्तेन व्रतं चीर्णं दिव्यं पाशुपतं मह
त्॥१३॥जन्ममृत्युजयं त्यक्त्वा स याति परमां गतिं॥ब्रह्महा यो हि गच्छेत अविमुक्तं कदाचन॥१४॥तस्य क्षेत्रस्य
माहात्म्यात् ब्रह्महत्या निवर्तते॥प्राप्य विश्वेश्वरं देवं न स भूयोपि जायते॥१५॥अनन्यमनसो भूत्वा यो विमुक्तं

राम०
३२३

न विमुंचति॥सगणो हि भवेद्देवो भक्तानामनुकंपया॥१६॥अविमुक्तं परं क्षेत्रं अविमुक्ते परा गतिः॥अविमुक्ते
परा सिद्धिरविमुक्ते परं पदं॥१७॥अविमुक्तं निषेवेत देवर्षिगणसेवितं॥यदिच्छेन्मानवो धीमान् पुनर्जन्म न चाल
नः॥१८॥मेरोः शक्या गुणा वक्तुं द्वीपानां तु तथैव च॥समुद्राणां च सर्वेषां नाविमुक्तस्य शक्यते॥१९॥अंतकालेम
नुष्याणां छिद्यमानेषु मर्मसु॥वायुनां श्रोर्यमाणानां स्मृतिर्नैवोपजायते॥२०॥अविमुक्ते त्रिकालांते भक्तानामी
श्वरः स्वयं॥कर्मभिः धार्यमाणानां कर्णजापं प्रयच्छति॥२१॥अविमुक्ते त्यजेद्देहं गतिमिष्टां स गच्छति॥ईश्वर
प्रेरितो याति दुःप्राप्यमकृतात्मभिः॥२२॥अशाश्वतमिदं ज्ञात्वा मानुष्यं बहुकिल्विषं॥अविमुक्तं निषेवेत सं
सारभयमोचनं॥२३॥योगमोक्षप्रदं पुण्यं बहुविघ्नविनाशनं॥विघ्नैरालोड्यमानोपि यो विमुक्तं न विमुंचति॥
२४॥न मुंचति जरां मृत्युं जन्म चैतदशाश्वतं॥अविमुक्तप्रसादात्तु शिवसायुज्यतां व्रजेत्॥२५॥ ॥इत्यविमुक्त
माहात्म्ये॥ ॥श्रीपार्वत्युवाच॥ ॥हिमवंतं गिरिं त्यक्त्वा मंदरं गंधमादनं॥२६॥कैलासं निषधं चैव मेरुपृष्ठं महाद्युतिं॥
१॥रम्यं त्रिशिखरं चैव मानसं च महागिरिं॥देवोद्यानानि रम्याणि नंदनं वनमेव च॥२॥स्वर्गस्थानानि पुण्यानि ती
र्थाण्यायतनानि च॥तानि सर्वाणि संत्यज्य अविमुक्ते रतिः कथं॥३॥किमत्र सुमहत्पुण्यं परं गुह्यं वदस्व मे॥येन
त्वं रमसे नित्यं मृतसंघ गुणैर्युतः॥४॥क्षेत्रस्य प्रवरत्वं च ये च तत्र निवासिनः॥तेषामनुपदं कश्चित्तत्सर्वं ब्रूहि त

वत:॥५॥देवदेवउवाच॥ ॥ममैव प्रीतिरतुला कृत्तिवासं च सुंदरि॥ सर्वेषां चैव स्थानानां तत्स्थानं तु यथाधिकं॥
६॥तेन कार्येण सुश्रोणि तस्मिन् स्थाने रतिर्मम॥ तस्मिं ल्लिंगे च सान्निध्यं मम देवि सुरेश्वरि॥७॥ क्षेत्रस्य तु प्रवक्ष्या
मि गुणान् शीलवतां वरे॥ यान् श्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः॥८॥ यदि पापो यवा खंडो यद्यप्य पातिगो
चरः॥ मुच्यते सर्वपापेभ्यः कृत्तिवासस्य दर्शनात्॥९॥ प्रलये सर्वभूतानां नष्टे स्थावरजंगमे॥ नाहं त्यजामि त
त्स्थानं ततः प्रियतरं शुभे॥१०॥ गुह्यो गुणशतैर्वरः॥ यत्र देवाः सगंधर्वाः सयक्षोरगराक्षसाः॥ ब्रह्मं महा
नागे प्रविशंति युगक्षये॥११॥ तेषां साक्षादहं हृष्टुं जां प्रतिगृह्णामि पार्वति॥ सर्वगुणोत्थीर्त्रं मे स्थानं मम प्रियत
रं शुभे॥१२॥ धन्या प्रविष्टा सुश्रोणि मम भक्ता द्विजातयः॥ मद्भक्तिपरमा नित्यं नान्यभक्ताश्च वैनराः॥१३॥ त
स्मिन्प्राणान् परित्यज्य गच्छेति परमां गतिं॥ सदा जपति शतरुद्रेण सदा दानं प्रयच्छति॥१४॥ तदा तपस्वी भवति अ
विमुक्ते स्थितो नरः॥ यो मां पूजयते नित्यं तस्य तुष्याम्यहं प्रिये॥१५॥ सर्वदानानि यो दद्यात् सर्वयज्ञैर्यजेन्नरः॥
सर्वतीर्थाभिषेकं तु स प्रपद्येत मामिह॥१६॥ अविमुक्ते द्विजा देवि ये व्रजंति सुनिश्चिताः॥ तेति ष्टंती हसुश्रो
णि मद्भक्ताः स्त्रिविष्टपे॥१७॥ मत्प्रसादात्ततो देवि दिव्यंति शुभलोचने॥ दुर्धर्षा दुर्धराश्चैव भवंति विगतज्व
श्रीदेव्युवाच रा:॥१८॥ दुर्लभास्तु गुणा देवि अविमुक्ते सुकीर्तिताः॥ सर्वांस्तान्मम तत्वेन कथयस्व महेश्वर॥१९॥ कौतूहलेन

हृदेवर्द्धि स्थेयं प्रवर्तते॥ तत्सर्वं मम तत्वेन व्याख्याहि परमेश्वर॥२०॥ ईश्वर उवाच॥ ॥अक्षयाश्चामराश्चैव
श्चादेहाश्च भवंति ते॥ मत्प्रसादाद्वरारोहे मामेव प्रविशंतु ते॥२१॥ ब्रूहि ब्रूहि विशालाक्षी किमन्यत् श्रोतुमिच्छसि
२१॥ श्रीदेव्युवाच॥ ॥अविमुक्ते महाक्षेत्रे ह्यहो पुण्य महोगुणाः॥ न तृप्तिमधिगच्छामि कं हि देव पुनर्गुणान्॥२२॥ ब्रू
ईश्वर उवाच॥ ॥महेश्वरि वरारोहे शृणु तानि मम प्रिये॥ अविमुक्ते गुणा ये तु तथा न पितान् शृणु॥२३॥ शाकपर्णाशि
नो दांताः सप्रक्षाता महीक्षिताः॥ दंतोलूखलिनश्चान्ये अश्मकुट्टास्तथा परे॥२४॥ मासि मासि कुशाग्रेण जलं भ
स्मादयच्छति॥ वृक्षमूलनिकेताश्च शिलाशय्यास्तथापरे॥२५॥ आदित्यवपुषः सर्वे जितक्रोधा जितेंद्रियाः॥ ए
वं बहुविधैर्धर्मैरन्ये च चरितव्रताः॥२६॥ त्रिकालमपि भुंजाना ये विमुक्तनिवासिनः॥ तपस्विनस्तथैवात्र कलां ना
र्हंति षोडशीं॥२७॥ ये विमुक्ते वसंति स्म स्वर्गेऽपि ते वसंति ते॥ तत्समः पुरुषो नास्ति तत्समा नास्ति कामिनी॥२८॥ अ
विमुक्तसमं क्षेत्रं न भूतं न भविष्यति॥ अविमुक्ते परो योगो ह्यविमुक्ते परा गतिः॥२९॥ अविमुक्ते परो मोक्षो ह्यत्र नैवास्ति से
ता दृशं॥ परं गुह्यं प्रवक्ष्यामि तत्वेन वरवर्णिनि॥३०॥ अविमुक्ते महाक्षेत्रे यदुक्तं हि मया पुरा॥ जन्मांतरशतैर्देवि यो
गोयं यदि लभ्यते॥३१॥ मोक्षं शतसहस्रेण जन्मनां लभ्यते नवा॥ अविमुक्ते वसेद्देवि मद्भक्तः कृतनिश्चयः॥३२॥ एकेन
जन्मना देवि योगं मोक्षं च विंदति॥ अविमुक्ते नरा देवि ये व्रजंति सुनिश्चिताः॥३३॥ न तेषां भयमस्तीह भवरुद्रं व्रजंति

म०पु०
२२५

ते॥समंत्रो मंत्रकोदेवि द्विविधो विधिरुच्यते॥(समंत्रो मंत्रकोदेवि द्विविधो विधिरुच्यते॥३४॥ सांख्यंचैवाथयोगश्च
द्विविधो योग उच्यते॥ सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः॥३५॥ सर्वथा वर्त्तमानोपि स योगी मयि वर्त्तते॥ आ
त्मौपम्येन सर्वत्र समं पश्यति यो नरः॥३६॥ तस्याहं न प्रणश्यामि स च मे न प्रणश्यति॥ निर्गुणः सगुणश्चापि योग
श्च कथितो भुवि॥३७॥ सगुणं चैमि विविजेयं निर्गुणं तमसः परं॥ एतत्ते कथितं देवि यन्मां त्वं परिपृच्छसि॥३८॥
श्रीदेव्युवाच॥ ॥ या भक्तिस्त्रिविधा प्रोक्ता भक्तानां बहुधा त्वया॥ तामहं श्रोतुमिच्छामि तत्त्वेन कथयस्व मे॥३९॥ श्री
महेश्वर उवाच॥ ॥ शृणु देवि महाभागे भक्तानां भक्तिवत्सले॥ प्राप्य सांख्यं च योगं च दुःखांतं च नियच्छति॥४०॥ स
दाय सर्वतो भिक्षांततो भवति रंजितः॥ रंजनात्तन्मयो भूत्वा लीयते स तु भक्तिमान्॥४१॥ शास्त्राणां च वरारोहे ये
तु कारणदर्शिनः॥ नाना पश्यंति ते देवि ज्ञानवाक्यविवादिनः॥४२॥ परार्थज्ञानतत्त्वा ये युक्ताः पश्यंति योगिनः॥ वि
द्यया विदितात्मानो योगस्यापि द्विजातयः॥४३॥ प्रत्याहारेण शुद्धात्मा नान्यथा चिंतयन्स तु॥ तुष्टिं च परमां प्रा
प्य योगं सांख्यपरं तथा॥४४॥ त्रिभिर्गुणैः समायुक्तो ज्ञानवान्पश्यते हि मां॥ एतत्ते कथितं देवि किमन्यत् श्रोतु राम·
मिच्छसि॥४५॥ रूपश्चापि वरारोहे कथयामि हसुव्रते॥ शुद्धं पवित्रमथ पवाथवापि हृदि वर्त्तते॥४६॥ तत्सर्वं क २२५
थयिष्यामि शृणुष्वैकमनाः प्रिये॥४६॥ ॥ देव्युवाच॥ ॥ तद्रूपं कीदृशं देव मुक्ताः पश्यंति योगिनः॥ एतन्मे संबूयं

देव नमस्तेसुरसत्तम॥४७॥ श्रीभगवानुवाच॥ ॥ अमूर्त्तं चैव यद्ब्रह्म ज्योतिरूपं हितत्स्मृतं॥ तस्योपलब्धिमिच्छामि
यत्नेकार्यं विजानता॥४८॥ गुणैर्विमुक्तो भूतात्मा एवं वक्तुं न शक्यते॥ शक्यते यद्वक्तुं वै देवैर्वर्षशतैरपि॥४९॥
श्रीदेव्युवाच॥ ॥ किंप्रमाणं तु तत्क्षेत्रं समंतात्सर्वतो दिशं॥ यत्र नित्यं स्थितो देवः कृत्तिवासा गणैः सह॥५०॥ ॥ श्रीई
श्वर उवाच॥ ॥ द्वियोजनं तु यत्क्षेत्रं पूर्वपश्चिमतः स्थितं॥ अर्द्धयोजनविस्तीर्णं तत्क्षेत्रं दक्षिणोत्तरं॥५१॥ वारा
णसी नदी या तु श्रुता शुक्रनदीमुखे॥ भीमचंडिकदारुम्यः पर्वतीश्वरमंतिके॥५२॥ गणाय चात्र च तिष्ठंति तथा
विघ्नविनायकाः॥ कूष्मांडजरदंशुश्च जयंतश्चकटंकटः॥५३॥ सिंहव्याघ्रमुखाः केचिद्विकराः कुब्जवासनाः॥
यत्र नंदी महाकालश्चंडघंटो महेश्वरः॥५४॥ वामश्चंडेश्वरश्चैव घंटाकर्णो महाबलः॥ एते चान्ये च बहवो ग
णा रुद्रास्तपेश्वराः॥५५॥ महोदरा महाकायाः वज्रशक्तिधरास्तथा॥ रक्षंति सततं देवि द्युविस्वक्तंतपोधनाः उ
५६॥ द्वारे द्वारे च तिष्ठंति शूलमुद्गरपाणयः॥ स्वर्णशृंगीं रूप्यखुरां चैलघंटां पयस्विनीं॥५७॥ वाराणस्यां तु यो शै
दद्यात्त्रिवर्षाय तलोचने॥ गां दत्वा तु वरारोहे ब्राह्मणे वेदपारगे॥५८॥ आसप्तमं कुलं तेन पावितं नात्र संशयः॥
यो दद्यात्ब्राह्मणे किंचित्तस्मिन्क्षेत्रे वरानने॥५९॥ कांचनं रजतं वस्त्रं अन्नाद्यं बहुविस्तरं॥ अक्षयं चैव यो दद्यात् सु राम
वर्णं चैव सुव्रते॥६०॥ शृणु तत्र भवार्थस्य विभूतिं स्तुष्टिमेव च॥ यत्र स्नात्वा महाभागे भवंत्यरजसो नराः॥६१॥ द्रष्ट

नामश्वमेधानांफलंप्राप्नोतिचमानवाः॥ तद्वाप्नोतिधर्मात्मातत्रस्नात्वावरानने॥६२॥स्वल्पमल्पंचयोदद्यात्ब्राह्म
णेवेदपारगे॥ स्वर्गंगतिमवाप्नोतिअग्निवच्चैवदीप्यते॥६३॥वाराणस्यांजान्हवीस्यात्संगमेलोकविश्रुते॥दत्वा
मंत्रचविधानेननसंभूयोभिजायते॥६४॥एतत्तेकथितंदेवितीर्थस्यफलमुत्तमं॥उवाचसंप्रवक्ष्यामिनिष्कपंस्
णुसुव्रते॥६५॥एकरात्रोपवासंतुकृत्वाविप्रांस्तुतर्पयेत्॥सौत्रामणेस्तुयज्ञस्यफलंप्राप्नोतिमानवः॥६६॥द
शसौवर्णिकंपुष्पंयोविष्णवेप्रयच्छति॥अग्निहोत्रफलंधूपेगंधदानेनतत्स्मृतं॥६७॥भूमिदानेनतत्तुल्यंगं
धदानेफलंस्मृतं॥सम्मार्जनेपंचशतंसहस्रमुपलेपने॥६८॥मालाशतसहस्रंतुअनंतंगीतवादिनं॥
६९॥ ॥श्रीदेव्युवाच॥ ॥अत्यद्भुतमिदंदेवयच्छ्रामेतत्प्रकीर्तितं॥रहस्यंश्रोतुमिच्छामियदर्थत्वंनमुंचसि।
ईश्वरउवाच॥ ॥असीत्पूर्वंवरारोहेब्राह्मणस्तुशिरोरुहं॥यथेदंदृश्यतेसुश्रोणितप्तकांचनसुप्रभं॥
७०॥ज्वलंतंपंचशीर्षंजातंतस्यमहात्मनः॥सएवमब्रवीद्देविजन्मजानामितेह्यहं॥७१॥ततःक्रो
धपरीतेनसंरक्तनयनेनच॥वामांगुष्ठनखाग्रेणछिन्नंतस्यशिरोमया॥७२॥श्रीब्रह्मोवाच॥य
स्मादनपराधस्यछिन्नंशिरस्त्वयामम॥तस्माच्छापसमायुक्तःकपालीत्वंभविष्यसि॥७३॥ब्रह्म
हाकुलितोगत्वाचरंस्तीर्थानिभूतले॥ततोहंगतवान्देविहिमवंतंशिलोच्चयं॥७४॥तत्रना

रायणःश्रीमान्महाभिक्षांप्रयाचितः॥ततस्तेनस्वकंपार्श्वंनखाग्रेणविदारितं॥७५॥महतस्रवतेधारातस्यर
क्तस्यनिःसृता॥नसंपूर्णंकपालंतुघोरमद्भुतदर्शनं॥७६॥दिव्यंवर्षसहस्रंतुसापिधाराप्रवाहिता॥प्रोवाच
भगवान्विष्णुःकपालंकुततस्त्वयं॥७७॥आश्चर्यभूतदेवेशसंशयंमयिवर्तते॥कुतश्चत्वंभोदेवेशसर्वमेव
हिपृच्छति॥७८॥ईश्वरउवाच॥ ॥श्रूयतामस्यदिव्यस्यकपालस्यतुसंभवं॥शतंवर्षसहस्राणांतपस्तप्त्वा
सुदारुणं॥७९॥ब्रह्मसृजंपुनर्दिव्यमद्भुतंलोमहर्षणं॥तपसश्चविभागेनदिव्यंकांचनसुप्रभं॥८०॥ज्वलंतंपं
चमंशीर्षंजातंतस्यमहात्मनः॥यत्कृतंतेनतन्मयोक्तंचतदिदंपश्यदुर्जयं॥८१॥यत्रयत्राव्रगच्छामिकपालं
तत्रगच्छति॥एवमुक्तस्ततोदेवःप्रोवाचपुरुषोत्तमः॥८२॥ ॥श्रीनारायणउवाच॥ ॥गच्छदेवस्वकंस्थानंब्र
ह्मणस्तुप्रियंकुरु॥तस्मिंस्त्यजसिभक्तेकपालंतस्यतेजसा॥८३॥ततःसर्वाणितीर्थानिपुण्यानिन्याय
तनानिच॥गतोस्मिपृथुलश्रोणिनकिंचित्पततिस्थिति॥८४॥ततोहंसमनुप्राप्तोह्यविमुक्तेमहायशे॥ततः
स्थितःस्वकेस्थानेशापश्चविगतोमम॥८५॥विष्णुप्रसादात्सुश्रोणिप्रसादंतत्सहस्रधा॥स्फुटितंबहुधा
यातंस्वप्नलब्धंचवैयथा॥८६॥ब्रह्महत्यापहंतीर्थक्षेत्रमेतन्मयाकृतं॥श्मशानमेतद्विख्यातंदेवानांव
रवर्णिनी॥८७॥कलौभूत्वाजगत्सर्वंसंहरामिसृजामिच॥देवेशिसर्वजंतूनांस्थानंप्रियतरंमम॥८८॥म

म०पु०
२२७

क्तास्तत्र गच्छंति विमुक्तास्तथैव च॥ ये भक्ता भास्करं देवं लोकनाथं दिवाकरं॥ ८९॥ तत्रस्थो जे देहं मामे यस्य
व प्रविशत्यसौ॥ ८९॥ ॥श्रीदेव्युवाच॥॥ अत्यद्भुतमिदं देव यदुक्तं परयोनिना॥ त्रिपुरांतकतस्थांतंगु
ह्यमेतन्महामुने॥ ९०॥ संनिधानान्मुने सर्वे कलां नार्हंति षोडशीं॥ यत्र तिष्ठति देवेशो यत्र तिष्ठति शंक
रः॥ ९१॥ गंगातीर्थसहस्राणां तुल्यो भवति वा न वा॥ त्वमेव गतिर्देवेश त्वमेव गतिरुत्तमा॥ ९२॥ ब्रह्मादीनां
तु सर्वेषां गतिरुक्ता सनातनी॥ श्राव्यमेतत् द्विजातीनां भक्तानामनुकंपया॥ ९३॥ ॥इति श्रीमत्स्यपुरा
णेऽविमुक्तमाहात्म्ये॥ ईश्वर उवाच॥॥ सेवितं बहुभिः सिद्धैः रपुनर्भवकांक्षिभिः॥ हित्वा तु परमं चै
वमविमुक्तनिवासिनां॥ १॥ तद्गुह्यं देवदेवेश तत्तीर्थं तत्तपोवनं॥ परं स्थानं ततेतेषां ति संभ्रवं ति पुनः पु
नः॥ २॥ न्यायोपहितनिष्ठानां परमानंदमिच्छतां॥ या गतिर्विहिता सुभ्रु साविमुक्ते मृतस्य तु॥ ३॥ भवस्य
प्रीतिरतुला अविमुक्तेत्यनुत्तमा॥ असंख्येयं फलं तत्र अक्षयायां गतिर्भवेत्॥ ४॥ परं गुह्यं समाख्यातं
श्मशानमितिसंज्ञितं॥ अविमुक्तं न सेवंति वंचितास्ते नरा भुवि॥ ५॥ अविमुक्ते स्थिता पुण्यपांशुभिर्वा
युनेरितैः॥ अपि दुःकृतकर्माणो यास्यंति परमां गतिं॥ ६॥ अविमुक्तगुणान कुं देवदानवमानवैः॥ नरा राम
वसंते प्रमेयत्वात्स्वयंपुत्रभवः स्थितः॥ ७॥ नाहिताग्निर्नयज्ञानां नाध्रचि स्त्रस्करोपि वा॥ अविमुक्ते वसेद्य २२८

स्तु स तसेदीश्वरालये॥ ८॥ तत्र नापुण्यकृत्कश्चित्प्रसादादीश्वरस्य च॥ ज्ञानेनाज्ञानतो वापि स्त्रियो वा पुरु
षेण वा॥ यत्किंचिदशुभं कर्मकृतं मानुषबुद्धिना॥ अविमुक्तं प्रविष्टस्य तत्सर्वं भस्मसाद्भवेत्॥ १०॥ सरितः
सागराः शैलास्तीर्थान्यायतनानि च॥ भूतप्रेतपिशाचाश्च श्मशानीके परीतकः॥ प्रियस्तस्य महात्मनः॥ ११॥ तेन
मुंचति हृतेशं भवस्थानं विमुंचति॥ रमते च रणैः सार्द्धमविमुक्ते स्थितः प्रभुः॥ १२॥ दृष्ट्वैतान्दीनकृपणान्पा
पदुःकृतकर्मिणः॥ कृपया तस्य देवस्य जायते परमा गतिः॥ १३॥ भक्तानुकंपी भगवांस्तिर्यग्योनिगतेष्वपि॥
भवत्येव परं स्थानं यत्र यांति नयाशिकाः॥ १४॥ भगवो गिरस्तः सिद्धाश्च यश्च महाव्रताः॥ अविमुक्ताग्निनादग्धा
अग्नौ तूलमिवाहितं॥ १५॥ न सा गतिः कुरुक्षेत्रे गंगाद्वारे च पौष्करे॥ या गतिर्विहिता पुंसामविमुक्तनिवा
सिनां॥ १६॥ तिर्यग्योनिगता गत्वा ये विमुक्ते कृतालया॥ कालेन निधनं प्राप्ताः श्रेयांति परमां गतिं॥ १७॥ मेरु
मंदरमात्रोपि राशिः पापस्य कर्मणः॥ अविमुक्तं समासाद्य तत्सर्वं व्रजति क्षयं॥ १८॥ तत्र त्वं देवदेवस्य त
तीर्थं तपोधने॥ तत्तु ब्रह्मादयो देवा नारायणपुरोगमाः॥ १९॥ योगतः शंनराः सिंहं सिद्धा भगवंतं सनातनं॥
उपासंति च ये भक्ता मद्भक्त्या सत्परायणाः॥ २०॥ या गतिर्ज्ञानतपसां या गतिर्वर्जिताजिनां॥ ये विमुक्ते वसंति
तिस्म सा गतिर्विहिता सदा॥ २१॥ सर्वे सचैव कर्मा चतस्मिन् ब्राह्मादयः सुराः॥ ये ये लोकाः स्मृजायंते तेषां च

म०पु०
३२८

नपुनर्भवेत्॥२२॥महोजनस्य पश्येवसत्यलोकरुपेवच॥मनसःपरमोयोगोभूतभव्यभविष्यतां॥२३॥ब्रह्मादि
स्तंबपर्यंतायोनिःसांख्यविमोक्षयोः॥अविमुक्तंनमुंचंतिनरास्तेनैववंचिताः॥२४॥उत्तमंसर्वतीर्थानांस्थानानां
मुत्तमंतथा॥त्रिपञ्चिर्नवभक्तेश्च अविमुक्तंतुसेव्यते॥२५॥क्षेत्राणामुत्तमंचैवस्मशानानांतथैवच॥तडागानां
तुसर्वेषांरूपाणामुत्तमंतथा॥२६॥शैलानामुत्तमंशैलेतीर्थानामुत्तमंतथा॥ब्रह्मणःपरमंस्थानंब्रह्मणाध्या
सितंपरं॥२७॥ब्रह्मणासेवितंनित्यंब्रह्मणाचैवरक्षितं॥तस्यैवचपुवनान्महकांचनंमेरुपर्वतं॥२८॥मनसःपर
मोयोगःप्रीलर्थंब्राह्मणास्मृतं॥तस्मात्तुतत्रभगवांस्त्रिसंध्यमीश्वरःस्थितः॥२९॥पुण्यापुण्यतमंक्षेत्रंपुण्यैर्ऋषि
भिर्निषेवितं॥आदित्योपासनंकृत्वाविप्रायमरतांगताः॥३०॥अनेपियेत्रयीवृत्तिर्भवभक्ताःसमाहिताः॥अवि
मुक्तेतनुंत्यक्त्वागच्छंतिपरमांगतिं॥३१॥अन्यायाःकामचारिण्यःस्त्रियोभोगपरायणाः॥कालेननिधनं
प्राप्तागच्छंतिपरमांगतिं॥३२॥अष्टौमासाविहारस्ययतीनांसंयतात्मनां॥एकत्रचतुरोमासानष्टवाति
वसेत्पुनः॥३३॥अविमुक्तेप्रविष्टानांविहारस्तुनविद्यते॥सदेहोवनितातत्रहृष्टःश्मशानेवरानने॥३४॥मोक्षो
प्यमंशयस्तत्रपंचत्वंतुगतस्यच॥स्त्रियःपतिव्रतायाश्चभवभक्ताःसमाहिताः॥३५॥अविमुक्तेतनुंत्य
क्त्वागच्छंतिपरमांगतिं॥यत्रयोगस्तथामोक्षश्चप्राप्यतेदुर्लभोनरैः॥३६॥अविमुक्तेसमासाद्यनागच्छेत्तपो

राम०
३२९

वनं॥सर्वात्मनाभवःसेव्योब्राह्मणेचनसंशयः॥३७॥अविमुक्तेवसेद्यस्तुममतुल्योभवेन्नरः॥यतोमयासदु
क्तेहिअविमुक्तंततःस्मृतं॥३८॥अविमुक्तंनसेवंतिमूढास्तेपापसंयुताः॥विण्मूत्ररेतसांमध्येपेवसंतिपु
नःपुनः॥३९॥कामःक्रोधश्चलोभश्चदंभस्तंभोप्यसम्मदः॥निद्रातंद्रीतथालस्यंपैशून्यमितितावराः॥४०
अविमुक्तेस्थिताविघ्नाःशक्रेणविहिताःस्वयं॥विनायकोपिस्वर्गस्थसततंमूर्ध्नितिष्ठति॥४१॥पुराणमेत
त्कृयत्सर्वंभक्तानामनुकंपया॥परंगुह्यमितिज्ञात्वाभक्तशास्त्रानुमोदनात्॥४२॥विष्णुनाभूमिसंहि
तेरविमुक्तेतुवर्जिता॥एताःसमभवन्सर्वमिहादेवेनरक्षिताः॥४३॥संस्कारस्तेनक्रियतेभूमेरन्यत्रसू
रिभिः॥येभक्तावरदंदेवमक्षयंपदं॥४४॥देवमानवगंधर्वयक्षरक्षोमहोरगाः॥अविमुक्तमुपासंतेतन्नि
ष्ठास्तत्परायणाः॥४५॥तेविशंतिमहादेवमाज्याहुतिरिवानलं॥तंवैप्राप्यमहादेवमीश्वराध्युषितंशुभं॥
४६॥अविमुक्तेकृतार्थोसिआत्मानमुपलक्षये॥ऋषिदेवासुरगणैर्जपहोमपरायणैः॥४७॥यतिभि
र्मोक्षकामैश्चअविमुक्तंनिषेव्यते॥नाविमुक्तेमृतःकश्चिन्नरकंयातिकिल्बिषी॥४८॥ईश्वरानुगृ
हीताहिसर्वेयांतिपरांगतिं॥द्वियोजनमथापूर्वंतत्क्षेत्रंपश्चिमंस्मृतं॥४९॥अर्द्धयोजनविस्तीर्णंसंद
क्षिणोत्तरतःस्थितं॥वाराणसीनदीयावत्यावत्शुष्कनदीस्तवे॥५०॥एतत्क्षेत्रस्यविस्तारंप्रोक्तंदेवे

नधीमता॥लब्ध्वायोगंचमोक्षंचकांक्षतेज्ञानमुत्तमं॥५१॥अविमुक्तंनमुंचंतिमन्निष्ठामत्परायणाः॥अस्मिन्वसंति
येविप्रानतेश्रेष्ठाःकथंचन॥५२॥योगक्षेत्रेतपःक्षेत्रेसिद्धगंधर्वसेविते॥सरितःसागराःशैलाःअविमुक्तंसमा
श्रिताः॥५३॥भूर्लोकेचांतरिक्षेचदेवतीर्थानिच॥अतीत्यवर्तंतेसर्वाण्यविमुक्तप्रभावतः॥५४॥एतध्यानेसमासा
द्यरमंतेत्रसुनिश्चिताः॥संहृत्यचक्षितःकामान्विषयेभ्यश्चातिष्ठतः॥५५॥नक्षितःसर्वतोयुक्ताःशक्तितस्तप
सिस्थिताः॥नतेषांपुनरावृत्तिःकल्पकोटिशतैरपि॥५६॥करणानीहचात्मानमपुनर्भवमाविताः॥तंवैप्राप्य
महादेवमीश्वरंनिर्भयाःस्थिताः॥५७॥अविमुक्तेवियुज्यंतेनवैनष्टुविनाशयं॥उत्पादितंमहाक्षेत्रंसिध्यंतेय
त्रमानवाः॥५८॥उद्देशमात्रःकथिताअविमुक्तगुणाम्मया॥समुद्रस्येवरत्नानामविमुक्तस्यविस्तरं॥५९॥मो
हनंतदभक्तानांभक्तानांबुद्धिवर्धनं॥मूढास्तेपिनपश्यंतिश्मशानमितिमोहिताः॥६०॥हन्यमानोपियोवि
द्वान्वसेद्विघ्नशतैरपि॥सयातिपरमंस्थानंयत्रगत्वानशोचति॥६१॥जन्ममृत्युजरामुक्तंपरंज्ञानंशिवालयं॥
अपुनर्मरणानांहिसागतिर्मोक्षकांक्षिणां॥६२॥यंप्राप्यकृतकृत्यःस्यादितिमन्यंतपंडिताः॥नदानैर्नतपोभि
र्नयज्ञैर्नापिविद्यया॥६३॥प्राप्यतेगतिरिष्टातुयाविमुक्तेतुलभ्यते॥नानावर्णाविवर्णाश्चचंडालायेजुगु राम ३२९
प्सिताः॥६४॥किल्बिषैःपूर्णदेहाश्चप्रकृष्टैःपातकैरपि॥भेषजंपरमंतेषामविमुक्तंविदुर्बुधाः॥६५॥जात्यंतरसह

॥६६
स्रेषुअविमुक्तेम्रियेतयः॥भक्तपाविश्वेश्वरंदेवंनससूयोपिजायते॥तत्रजप्तंकृतंदत्तंतपस्तप्तंतथाकृतं॥सर्वमक्षय
तामेतित्व्यविमुक्तेनसंशयः॥६७॥कालेनोपरतायोतिजवमायोज्यपतांध्रुवं॥कलापापसहस्राणिपश्चात्संतापमेत्य
च॥६८॥अविमुक्तेवियुज्येतसयातिपरमांगतिं॥उत्तरंदक्षिणंवापिअयनंनविकल्पयेत्॥६९॥सर्वस्तेषांशुभःका
लोअविमुक्तेम्रियंतिये॥नतत्रकालोमीमांस्यःशुभोवायदिवाशुभः॥७०॥तस्यदेवस्यमाहात्म्यात्स्थाणोरद्भुतकर्मणः
॥सर्वेषामेवनाथःससर्वेषांविभुतास्वयं॥७१॥श्रुत्वेदंकथितंसर्वंस्कंदेनकथितंपुरा॥अविमुक्ताश्रमंपुण्यंभावि
तंकारणैःशुभैः॥७२॥॥इतिश्रीमत्स्यपुराणेअविमुक्तमाहात्म्ये॥॥सूतउवाच॥अविमुक्तेमहाक्षेत्रेआस्तिकाःप्रि
यदर्शनाः॥विस्मयंपरमंजग्मुर्हर्षगद्गदनिस्वनाः॥२॥ऊचुस्तेहृष्टमनसःस्कंदंब्रह्मविदांवरं॥ब्रह्मणोदेवपुत्रस्त्वं
ब्रह्मण्योब्राह्मणप्रियः॥थब्रह्मिष्ठोब्रह्मवित्ब्रह्मन्ब्रह्मैकोब्रह्मलोककृत॥ब्रह्मवित्ब्रह्मचारीत्वंब्रह्माविर्ब्रह्म हृ
वत्सलः॥३॥ब्रह्मतुल्योकृवकरोब्रह्मन्नतुभ्यंनमोस्तुते॥जावितात्माचश्रुत्वेदंपरमंपावनंमहत्॥४॥तत्त्वंतुपर
मंस्तात्तुंपतशालामृतमश्नुते॥स्वस्तितेस्तुगमिष्यामोभूर्लोकंशांकरालयं॥५॥यत्रासौसर्वभूतात्मास्थाणुभूतः
स्थितःप्रभुः॥सर्वलोकहितार्थायितपस्युग्रेव्यवस्थितः॥६॥योगेनतपमायैषरोक्षीतनुमुपाश्रितः॥गुत्यकैरात्म
भूतैस्तुआत्मतुल्यगुणैर्वृतः॥७॥ततोब्रह्मादिभिर्देवैःसिद्धैश्चपरमर्षिभिः॥विज्ञायपरमात्मत्वात्प्रसादा

त्गणेश्वरं॥ वीवस्तुमिछामिनियतमविमुक्केसुनिश्चितं॥ एवंगुणास्तथामर्त्याअविमुक्केवसंतिये॥१९॥ धर्मशीला
जितक्रोधानिर्ममानियतेंद्रियाः॥ ध्यानयोगपरासिद्धिंगछंतिपदमव्ययं॥२०॥ योगज्ञायोगसिद्धाश्चयोगमोक्ष
प्रदंविभुं॥ उपासंतेभक्तियुक्ताशुह्यंदेवंसनातनं॥२१॥ अविमुक्तेसमासाद्यप्राप्नयोगंमहेश्वरात्॥ परेब्रह्मणिसं
लीनाभवसायोज्यतांगता॥२२॥ एतत्तुपरमंक्षेत्रंअविमुक्तंविदुर्बुधाः॥ अप्रबुद्धानपश्यंतिअवमायाविमोहि
ताः॥२३॥ तेनचैवाभ्यनुज्ञातास्तन्निराशास्त्वरायणाः॥ अविमुक्तेतनुंत्यक्त्वाऽसंगतायोगगतिंगताः॥२४॥ स्नानं
गुह्यंस्मरणनानांसर्वेषामेतदुच्यते॥ नहियोगाद्दतेमोक्षःप्राप्यतेभुविमानवैः॥२५॥ अविमुक्तेनिवसतांयोगो
मोक्षश्चसिध्यति॥ अनेनैवचजन्मनाप्राप्यतेगतिरुत्तमा॥२६॥ एकएवप्रभावोस्तिक्षेत्रस्यपरमेश्वरि॥ एकेन
जन्मनादेविमोक्षंपरंपलनुत्तमं॥२७॥ अविमुक्तेनिवसताव्यासेनामिततेजसा॥ नैवलब्धाकचिद्भिक्षाभ्रममाणे
नयत्नतः॥१८॥ क्षुधाविष्टतनुःक्रुद्धश्चिंतयन्नगणपसुत्तमं॥ माभूत्त्रिपुरुषंविद्यामाभूत्त्रिपुरुषंधनं॥१९॥ माभू
त्त्रिपुरुषंसांख्यंव्यासोवाराणसींशपन्॥ अविमुक्तेनिवसतांनराणांपुण्यकर्मणां॥२०॥ विघ्नंसृजामिसर्वेषांयेन
सिद्धिर्नविद्यते॥ व्यासचित्तंतदाज्ञात्वादेवदेवोमहेश्वरः॥२१॥ व्यासस्यदर्शनंदत्वारूपंतुमानुषं॥ भिक्षांदत्वातुव्या
सायस्तपसामम्नतोपमां॥२२॥ अनासादितपूर्वीतांभक्षितामृषिणातदा॥ भिक्षांव्यासस्ततोभुक्त्वाचिंतयत्हृष्ट

मानसः॥२३॥ व्यासःकमलपत्राक्षइदंवचनमब्रवीत्॥ देवोदेवीनदीगंगामृष्टमन्नंगतिंशुभा॥२४॥ वाराणस्यांविशा
लाक्षीव्यासःकस्यनरोचते॥ एवमुक्त्वाततोव्यासोनगरीमवलोकयन्॥२५॥ चिंतयानस्ततांभिक्षांहृदयानंदकारि
णीं॥ अपश्यत्पुरतोदेवंदेवीचगिरिजांशुभां॥२६॥ गृहांगणस्थितंव्यासंदेवदेवोब्रवीदिदं॥ इहक्षेत्रेनवस्तव्यंक्रोध
येस्त्वंमहामुने॥२७॥ एवंसमयमापन्नोमहादेवंजगादसः॥२७॥ व्यासउवाच॥ चतुर्दश्यांतथाष्टम्यांप्रवेशं
दातुमर्हसि॥ एवमस्त्वभ्यनुज्ञातस्तत्रैवांतरधीयत॥२८॥ एवंत्रैलोक्यविख्यातःपुराव्यासोमहातपाः॥ ज्ञात्वाक्षे
त्रगुणान्सद्वै॥ स्थितस्तस्यैवपार्श्वतः॥२९॥ एवंव्यासंस्थितंज्ञात्वाक्षेत्रंसेवंतिपंडिता॥ अविमुक्तगुणानांतुकःस
मर्थोविदिष्यति॥३०॥ देवब्राह्मणविद्विष्टादेवभक्तिविडंबकाः॥ ब्रह्मघ्नाश्चकृतघ्नाश्चतथानैकृतिकाश्चये॥३१
गुरुद्विष्टलोकद्विष्टास्तीर्थायतनदूषकाः॥ एवंपापरताश्चैवयेचान्येकुत्सितानुवि॥३२॥ रक्षणायनियुक्तोवै
दंडनायकउत्तमः॥ पूजयित्वायथान्यायंगंधधूपादिदीपकैः॥३३॥ नमस्कारंततःकृत्वानायकस्यनुमंत्रवित्॥
सर्वविघ्नहतेवैचतन्निष्ठास्तत्परायणाः॥३४॥ यदिछंतिपरंस्थानमक्षयंतदवाप्नुवन्॥३४॥ परंपदंदेवपदाद्विशे
षंएतत्पुरंब्रह्मपुरात्परस्थितं॥ तपोबलाईश्वरयोगनिर्मितंततस्तमांब्रह्मदिवौकसालयं॥३५॥ मनोरमंकामगतंव
नामयमतीत्यतेजोसितपांसियोगवित्॥३५॥ अधिष्ठितंतुतत्स्थानंदेवदेवोविराजते॥ तपांसियानितप्यंतेव्रतानिनि

यमास्तथा॥३६॥सर्वतीर्थाभिषेकंतुसर्वदानफलानिच॥सर्वयज्ञेषुयत्पुण्यमविमुक्तेतदाप्नुयात्॥३७॥अतीतंवर्त्तमानं
चज्ञातानामज्ञानतोपिवा॥सर्वंतस्यकृतंपापंक्षेत्रंदृष्ट्वाविनश्यति॥३८॥शांतेदांतैस्तपोभिर्वापिकिंचित्धर्मसंश्रितं।
सर्वमेवतदाप्नोतिह्यविमुक्तेजितेंद्रिय॥३९॥अविमुक्तंसमासाद्यलिंगमर्चयतेनरः॥कल्पकोटिशतैर्वापिनास्तितस्य
पुनर्भवः॥४०॥अमरोत्यक्षयश्चैवक्रीडतेरुद्रसन्निधौ॥क्षेत्रतीर्थोपनिषदमविमुक्तंनसंशयः॥४१॥अविमुक्तेमहा
देवमर्चयंतिस्तुवंतिच॥सर्वपापविनिर्मुक्तास्तेतिष्ठंत्यजरामराः॥४२॥सर्वकामाश्चयेयज्ञाःपुनरावर्त्तकाःस्मृते॥अवि
मुक्तेमृतायेतुसर्वेतेह्यनिवर्त्तकाः॥४३॥ग्रहनक्षत्रताराणांकालेनपतनंभवेत्॥अविमुक्तेमृतानांतुपतनंनविमु
च्यते॥४४॥कल्पकोटिसहस्रैस्तुकल्पकोटिशतैरपि॥नतेषांपुनरावृत्तिर्येमृतास्तेत्रजन्मने॥४५॥संसारसागरेघो
रेभ्रमतःकालपर्ययात्॥अविमुक्तंसमासाद्यगच्छंतिपरमांगतिं॥४६॥ज्ञात्वाकलियुगेघोरेहाहाभूतमयेवनं॥
ह्यविमुक्तंनमुंचंतिकृतार्थास्तेनराभुवि॥४७॥अविमुक्तंप्रविष्टस्तुयदिगच्छेत्पुनर्नरः॥तदाहसंतिभूतानिअन्यो
न्यकरताडनैः॥४८॥कामक्रोधेनलोभेनमोहितानराभुवि॥निःक्रामंतिनरादेतिदंडनायकमोहिताः॥४९॥जप
ध्यानविहीनानांज्ञानवर्जितचेतसां॥तमोभिःप्रगृहीतानांगतिर्वाराणसीनृणां॥५०॥इतिश्रीमत्स्यपुराणेऽ
विमुक्तमाहात्म्ये॥॥ऋषयऊचुः॥माहात्म्यमविमुक्तस्ययथावत्कथितंत्वया॥इदानींनर्मदायास्तुमाहात्म्यंवदस

त्तम॥१॥पंचोंकारस्यमाहात्म्यंकपिलासंगमस्यच॥अमरेश्वरस्यैवात्यलंमाहात्म्यंपापनाशनं॥२॥कथंप्रलय
कालेपिननष्टानर्मदायदा॥मार्कंडेयश्चभगवान्नविनष्टस्तदाहरे॥त्वयोक्तमादिसर्गेपित्वन्नोविस्तरतोवद॥३॥
सूतउवाच॥॥एतदेवपुरापृष्टःपांडवेनमहात्मना॥नर्मदायास्तुमाहात्म्यंमार्कंडेयोमहामुनिः॥४उग्रेणत
पसायुक्तोवनस्थोवनवासिना॥पृष्टःसर्वंमहाभागोधर्मपुत्रेणधीमता॥५॥युधिष्ठिरउवाच॥॥श्रुतामेवि
विधाधर्मास्त्वत्प्रसादाद्द्विजोत्तम॥भूयोयच्छ्रोतुमिच्छामितन्मेकथयसुव्रत॥६॥कथमेषानदीपुण्यासर्वकेषुवि
श्रुता॥नर्मदानामविख्यातातन्मेब्रूहिमहामुने॥७॥॥श्रीमार्कंडेयउवाच॥॥नर्मदासरितांश्रेष्ठासर्वपापप्रणाशि
नी॥धारयेत्सर्वभूतानिस्थावराणिचराणिच॥८॥नर्मदायास्तुमाहात्म्यंपुराणेयन्मयाश्रुतं॥तदेतद्धिमहारा
जासर्वंतुकथयामिते॥९॥पुण्याकनखलेगंगाकुरुक्षेत्रेसरस्वती॥ग्रामेवायदिवारण्येपुण्यासर्वत्रनर्मदा॥
१०॥त्रिभिःसारस्वतंतोयंसप्ताहेनतुयामुनं॥सद्यःपुनातिगांगेयंदर्शनादेवनार्मदं॥११॥कलिंगदेशपश्चार्द्धेचप
र्वतेमरकंटके॥पुण्याश्चतुःपथोरिवारमणीयामनोरमा॥१२॥सदेवाःसहगंधर्वाऋषयश्चतपोधनाः॥तपस्तप्त्वाम
हाराजसिद्धिंपरमिकांगताः॥१३॥तत्रस्नात्वानरोराजन्नियमस्थोजितेंद्रियः॥उपोष्यरजनीमेकांकुलानांतार
येच्छतं॥१४॥जलेश्वरेनरःस्नात्वापिंडंदत्वायथाविधि॥पितरस्तस्यतृप्यंतियावदाहूतसंप्लवं॥१५॥सवतिश्चसमं

म०पु०
३३२

तानुरुद्रकोटिः प्रतिष्ठिता॥ यः स्नानं कुरुते तत्र गंधमाल्यानुलेपनः॥१६॥ प्रीतस्तस्य भवेच्छर्वो रुद्रकोटिर्न संशयः
सर्वं तु पश्चमन्यते देवाश्च समहेश्वराः॥१७॥ तत्र स्नात्वा शुचिर्भूत्वा ब्रह्मचारी जितेंद्रियः॥ पितृकार्यं च कुर्वीत वि
धिदृष्टेन कर्मणा॥१८॥ तिलोदकेन रेवायां तर्पयेत् पितृदेवता॥ आसप्तमं कुलं तस्य स्वर्गे मोदति पांडव॥१९॥
षष्टिवर्षसहस्राणि स्वर्गलोके महीपते॥ अप्सरोगणसंकीर्णो दिव्यांबरविभूषितः॥२०॥ दिव्यगंधानुलिप्तश्च
दिव्यालंकारभूषितः॥ ततः स्वर्गात्परिभ्रष्टो जायते विमले कुले॥२१॥ धनवान् दानशीलश्च धार्मिकश्चैव जा
यते॥ पुनः स्मरति तत्तीर्थं गमनं तत्र कुर्वते॥२२॥ तारयेच्च कुलानि सप्त रुद्रलोकं स गच्छति॥ योजनानां शतं साग्रं
श्रूयते सरिदुत्तमा॥२३॥ विस्तारेण तु राजेंद्र योजनद्वयमायता॥ षष्टितीर्थसहस्राणि षष्टिकोट्यस्तथैव च॥२४
॥ पर्वतस्तु समंतात्तु दृश्यते मरकंकटे॥ ब्रह्मचारी शुचिर्भूत्वा जितक्रोधो जितेंद्रियः॥२५॥ सर्वहिंसानिवृत्त
स्तु सर्वभूतहिते रतः॥ एवं सर्वसमाचारो यस्तु प्राणान्परित्यजेत्॥२६॥ तस्य पुण्यफलं राजन् शृणुष्वावहितो भ
व॥ शतं वर्षसहस्राणां स्वर्गे मोदति पांडव॥२७॥ अप्सरोगणसंकीर्णो दिव्यस्त्रीपरिवारितः॥ दिव्यगंधानुलि
प्तश्च वस्त्रालंकारभूषितः॥२८॥ क्रीडते देवलोके च दैवतैः सह मोदते॥ ततः स्वर्गात्परिभ्रष्टो राजा भवति वीर्य
वान्॥२९॥ गृहं तु लभते सौम्यं नानारत्नविभूषितं॥ स्तंभैर्मणिमयैर्दिव्यैर्वज्रवैडूर्यभूषितैः॥३०॥ आलेख्य

राम
३३२

सहितं दिव्यं दासीदाससमन्वितं॥ मत्तमातंगशब्दैश्च हयानां हेषितेन च॥३१॥ क्षुभ्यते तस्य तद्द्वारमिंद्रस्य भुवनं य
था॥ राजराजेश्वरः श्रीमान् सर्वस्त्रीजनवल्लभः॥३२॥ तस्मिन्गृहे वसित्वा तु क्रीडाभोगसमन्वितं॥ तावद्वर्ष
शतं साग्रं सर्वरोगविवर्जितः॥३३॥ एवं भोगो भवेत्तेषां ये मृता मरकंकटे॥ अग्नौ विशेज्जले वापि तथा चैवानशना
त्के॥३४॥ अनिवर्तिका गतिस्तस्य पवनस्यांबरे यथा॥ पतनं कुरुते यस्तु अमरेशे नराधिप॥३५॥ कन्यास्त्री
णि सहस्राणि एकैकस्यापि चाप्सराः॥ तिष्ठंति तस्य भवने प्रेषणं प्रार्थयंति च॥३६॥ दिव्यभोगस्तु संपन्नः क्रीडते
कालमक्षयं॥ पृथिव्यामासमुद्रायामीदृशो नैव जायते॥३७॥ यादृशोऽयं नरश्रेष्ठ पर्वते मरकंकटे॥ एतावत्तीर्थं
विविशेयं पर्वतात्पश्चिमे तटे॥३८॥ ह्रदे जालेश्वरो नाम त्रिषु लोकेषु विश्रुतः॥ तत्र पिंडप्रदानेन संध्योपासन
कर्मणा॥३९॥ पितरो दशवर्षाणि तर्पितास्तु भवंति वै॥ दक्षिणे नर्मदाकूले कपिलाख्या महानदी॥४०॥ सर्व
त्र चन संछन्ना नातिदूरे व्यवस्थिता॥ तत्र कोटिशतं साग्रं तीर्थानां तु युधिष्ठिर॥४१॥ पुराणे श्रूयते राजन् सर्वं
कोटिगुणं भवेत्॥ तस्यास्तीरे तु ये वृक्षाः पतिताः कालपर्ययात्॥४२॥ नर्मदातोयसंस्पृष्टास्तेऽपि यांति प
रां गतिं॥ द्वितीया तु महाभागा विशल्यकरणी शुभा॥४३॥ तत्र तीरे नरः स्नात्वा विशल्यो भवति क्षणात्॥
सा तु पुण्या महाभागा त्रिषु लोकेषु विश्रुता॥४४॥ तत्र देवगणाः सर्वे सकिन्नरमहोरगाः॥ यक्षा राक्षसगंधर्वा

म०पु०

२३३

ऋषयः सतपोधनाः॥४५॥सद्यः समागतास्तत्र सर्वे तिमरकंकटे॥तैश्च सर्वैः समागम्य मुनिभिश्च तपोधनैः॥४६॥नर्म
दा संस्मृता पुण्या विशल्या नाम नामतः॥उत्पादिता महाभागा सर्वपापप्रणाशिनी॥४७॥तत्र स्नात्वा नरो राजन् ब्र
ह्मचारी जितेंद्रियः॥उपोष्य रजनीमेकां कुलानां तारयेत् शतं॥४८॥कपिलां च विशल्यां च श्रूयतेंद्रियं॥उपोष्य
रजनीमेकां कृत्वा नोतां तत्र स॥ईश्वरेण पुरा प्रोक्ता लोकानां हितकाम्यया॥४९॥तत्र स्नात्वा नरो राजन् अश्वमेधफ
लं लभेत्॥अनाशकं तु यः कुर्यात् तस्मिन्तीर्थे नराधिप॥५०॥सर्वपापविशुद्धात्मा रुद्रलोकं स गच्छति॥नर्मदा
यास्तु राजेंद्र पुराणे यत् श्रुतं मया॥५१॥तत्र तत्र नरः स्नात्वा अश्वमेधफलं लभेत्॥एवं सत्सु तरे कूले रुद्रलोके वसं
ति ते॥५२॥सरस्वत्यां च गंगायां नर्मदायां युधिष्ठिर॥समं स्नानं च दानं च यथा मे शंकरोऽब्रवीत्॥५३॥परि
त्यजति यः प्राणान् पर्वतेऽमरकंटके॥वर्षकोटिशतं साग्रं रुद्रलोके महीयते॥५४॥नर्मदायाः जलं पुण्यं फेनोर्मि
समलंकृतं॥पवित्रं शिरसा वंद्य सर्वपापैः प्रमुच्यते॥५५॥नर्मदा सर्वतः पुण्या ब्रह्मा ब्रह्महत्यापहारिणी॥अहोरा
त्रोपवासेन मुच्यंते ब्रह्महत्यया॥५६॥एवं पुण्या च रेवा च नर्मदा पांडुनंदन॥त्रयाणामपि लोकानां पुण्या त्वेषा महा
नदी॥५७॥वटेश्वरे महापुण्ये गंगाद्वारे तपोधने॥एतेषु सर्वस्थानेषु ये द्विजाः शंसितव्रताः॥श्रूयते दशधा पुण्यं
नर्मदोदधिसंगमे॥५८॥॥इति श्री मत्स्यपुराणे अमरेश्वरमाहात्म्यं॥॥मार्कंडेय उवाच॥॥नर्मदा तु नदी श्रेष्ठपु

राम

२३३

एषपुण्यपतमात्रिषु॥मुनिभिस्तु महाभागैर्विरंक्तार्थमर्कांस्मिण॥१॥यज्ञोपवीतमात्राणि प्रविनष्टानि पांडव॥तेषु स्ना
त्वा तु राजेंद्र सर्वपापैः प्रमुच्यते॥२॥जालेश्वरं परं तीर्थं त्रिषु लोकेषु विश्रुतं॥तस्योत्पत्तिं कथयतः शृणु पांडवनंदन
॥३॥पुरा मुनिगणाः सर्वे सेंद्राश्चैव मरुद्गणाः॥स्तुवंति ते महात्मानं देवदेवं महेश्वरं॥४॥देवमानस्तुतैः प्राप्तस्तत्र देवो महे
श्वरः॥विज्ञापयंति देवेशं ते त्रस्तुः समरुद्गणाः॥५॥भयोद्विग्ना विरूपाक्ष परित्रायस्व नः प्रभो॥५॥॥ईश्वर उवाच॥
स्वागतं तु मुनिश्रेष्ठाः किमर्थमिह चागताः॥किंदुःखं को नु संतापः कुतो वा यूयमागतं॥६॥ऋषयस्तु महाभागाए
तमिच्छामि वेदितुं॥एवमुक्तास्तु रुद्रेण प्रोचुस्ते शंसितव्रताः॥७॥॥ऋषय ऊचुः॥॥अपि घोरो महावीर्यो दानवो ब
लदर्पितः॥बाणो नामेति विख्यातो यस्यैतत् त्रिपुरं हर॥८॥गगने संततं दिव्यं भ्रमते तस्य तेजसा॥अपभीता विरू
पाक्ष त्वामेव शरणं गताः॥९॥तद्विधत्स्व महादेव त्वं हि नः परमा गतिः॥एतत् प्रसादं देवेश तेषां वै कर्तुमर्हसि॥१०
यथा देवाः सगंधर्वाः सुखमेधंति शंकर॥परां निर्वृतिमायांति तत्त्वं ते कर्तुमर्हसि॥११॥देवदेव उवाच॥॥एतत्सर्वं
करिष्यामि मा विषादं करिष्यथ॥अचिरेणैव कालेन कुर्यां युष्मत्सुखावहं॥१२॥॥श्रीमार्कंडेय उवाच॥॥आश्वास
यित्वा तान्सर्वान् नर्मदातटमाश्रितः॥चिंतयामास देवेशस्तद्वधं प्रति पांडव॥१३॥कथं केन प्रकारेण हंतव्यस्त्रि
पुरी मया॥सस्मार नारदं देवो ब्रह्मर्षिं वृषभध्वजः॥१४॥स्मृतमात्रः समागम्य प्रोवाच प्रणतो मुनिः॥१५॥ ॥

म०पु०
३२४

नारदउवाच॥ ॥आज्ञापयमहादेवकिमर्थंसंस्मृतोत्वहं॥किंकार्यंतुमहादेवकर्तव्यंकथयस्वयं॥१५॥ ॥ईश्वरउवाच
गछनारदतत्रैवयत्रयत्रैपुरंपुरं॥बाणस्यदानवेंद्रस्यशीघ्रंगछहितंकुरु॥१६॥नत्वैकोदैवतंतत्रस्त्रियश्चाप्सरसःस
मा॥तासांवैतेजसाविप्रभ्रमतेत्रिपुरंदिवि॥१७॥तत्रगत्वातुविप्रेंद्रसतिमन्यांप्रबोदय॥देवस्यवचनंश्रुत्वामुनिरत्न
रितविक्रमः॥१८॥स्त्रीणांहृदयनाशायचलितस्तत्पुरंप्रति॥शोभतेतत्पुरंदिव्यंनानारत्नोपशोभितं॥१९॥शतयोज
नविस्तीर्णंतत्रोद्दिश्यपमायतं॥ततःपश्यतितत्रैवबाणंतुबलदर्पितं॥२०॥मणिकुंडलकेयूरमुकुटेनविराजितं॥
हाराहारसुवर्णैश्चवंडकांतविभूषितं॥२१॥रत्नानातत्ररत्नाढ्याबाहुकनकमंडितैः॥उथितोनारदंदृष्ट्वादानवें
द्रोमहाबलः॥२२॥बाणउवाच॥ ॥देवर्षिंतुस्वयंप्राप्तमर्घपाद्यंनिवेदयेत॥सामिवंघयथान्यायंक्रियतांकिंद्विजो
त्तम॥२३॥चिरात्त्वमागतोविप्रस्थीयतामिदमासनं॥एवंसंतोषयित्वातुनारदंऋषिसत्तमं॥२४॥तस्यभार्याम
हादेवीअनौपम्यातुनामतः॥उवाचभगवान्केनदेवास्तुष्यंतिमानुषे॥२५॥व्रतेननियमेनापिदानेनतपसापि
वा॥२५॥ ॥नारदउवाच॥ ॥तिलधेनुंचयोदद्यात्ब्राह्मणेवेदपारगे॥ससागरवनद्वीपास्तत्राभवतिमेदिनी॥२६॥
सूर्यकोटिप्रतीकाशैर्विमानैःसर्वकामिकैः॥मोदतेसुचिरंकालंत्राक्षयंकुरुतेसनं॥२७॥आग्रामानकपित्था
निनदराणितथैवच॥कदंबचंपकाशोकअनेकविविधद्रुमाः॥२८॥अश्वत्थपिप्पलंचैवकदलीकरलोरिका॥

राम
३२४

मुचकुंदसदैवात्रउपास्याःस्त्रियपासदा॥२९॥सनौकपित्थसहशोकरूचकदलीसमौ॥अश्वत्थेचवदयचिमु
चुकुंदेनसुगंधिनां॥३०॥चंपकेचंपकानास्यादशोकेशोकवर्जिता॥मधुकेमधुरेचापिकंकतेस्नदुगान्नता
३१॥वंदनीसर्वदास्त्रीणांमदासौभाग्यदायिनी॥कुकटीकर्कटीचैवभव्यपृष्ठीवसंश्रिते॥३२॥कदंबमिश्रा
कनकमंजरीतपूजनेतथा॥अनग्निपकाशनेचनालिकेरस्यभक्षणं॥३३॥फल्गानांचपरित्यागंसंध्या
मन्नेतथैवच॥प्रथपमाक्षेत्रपालस्यपूजाकार्याप्रयत्नतः॥३४॥तस्माद्भवतिवैनत्रासुखप्रेक्षासदानये
त॥अष्टमीचचतुर्थीचपंचमीचादशीतथा॥३५॥संक्रांतौविसवेचैवदिनछिद्रमुखेतथा॥एवंतुविदुषान्
दिव्यासुपवासमवयाःस्त्रियः॥३६॥तासांतुधर्मयुक्तानारवादग्रेनसंशयः॥कलिकालस्यनिर्मुक्तासर्वपाप
विवर्जिताः॥३७॥उपवासरतांनारींनोपमर्पंतीनायमः॥३७॥ ॥अनौपम्योवाच॥ ॥अस्मिन्कृतेनपुण्येनपु
राजन्मकृतेनवा॥भवदागमनंजातेकिंचित्पृछाम्यहंमुने॥३८॥अस्तिविंध्यावलीनामबलिपत्नीयशस्विनी॥
स्वश्रूःसामांचविप्रेंद्रनतुष्यतिकदाचन॥३९॥श्वसुरोमेसर्वकालंदृष्ट्यापिनतुष्यति॥अस्तिकुंभीनसीना
मननंदापापकारिणी॥४०॥दृष्ट्वाचअंगुलीसंगंसदाकालंकरोतिमे॥धिग्यथायेनत्वंध्याहिमाचसोस्वं
कदाचन॥४१॥उदरेमाप्ररोहंतेबीजकुर्यात्किदाचन॥येनव्रतेनचीर्णेनभवंतीदृशागामम॥४२॥तत्रत्वंब्रू

म॰पु॰
३३५

हिविप्रेंद्रदास्यन्नावंव्रजामिते॥४२॥ ॥नारदउवाच॥ ॥यदेतन्मेमयापूर्वंव्रतमुक्तंशुभानने॥अनंतपार्वतीदेवी
चीर्णेनवरवर्णिनि॥४३॥शंकरस्यशरीरस्थाविष्णोर्लक्ष्मीस्तथैवच॥सावित्रीब्रह्मणश्चापिवसिष्ठस्याप्य
रुंधती॥४४॥एतेनोपोषितोनेहभर्त्तारंप्राप्यतितेवशे॥श्वश्रूश्वसुरयोश्चैवसुखंबंधोभविष्यति॥४५॥एवं
श्रुत्वातुसुश्रोणिपथेष्टंकर्त्तुमर्हसि॥नारदस्यवचःश्रुत्वाराज्ञीवचनमब्रवीत्॥प्रसादंकुरुविप्रेंद्रदानं
गृहाणयथेप्सितं॥४६॥सुवर्णमणिरत्नानिवस्त्राण्याभरणानिच॥ददास्याम्यहंविप्रयच्चान्यदपिदुर्ल
भं॥प्रतिगृह्णद्विजश्रेष्ठप्रीयेतांहरिशंकरौ॥४७॥ ॥नारदउवाच॥ ॥अन्यस्मैदीयतांभद्रेक्षीणवृत्तिस्तु
योद्विजः॥अहंसर्वत्रसंपन्नोमुक्तिःक्रियतामिति॥४८॥ ॥श्रीमार्कंडेयउ०॥ ॥एवंतांसंततोहत्वास
र्वासांतुपतिव्रतां॥जगाममरतश्रेष्ठस्वकीयंस्थानकंतदा॥४९॥ततोहृष्टमनाःसातुअन्यतोगतमा
नसा॥पुरेछिद्रंसमुत्पन्नंबाणस्यतुमहात्मनः॥५०॥ ॥इतिश्रीमत्स्यपुराणेअमरेश्वरमाहात्म्ये॥
मार्कंडेयउवाच॥ ॥एतस्मिन्नंतरेरुद्रोनर्मदातटमाश्रितः॥नाम्नामहेश्वरंस्थानंत्रिषुलोकेषुविश्रु राम॰
तं॥१॥तस्मिन्स्थानेमहादेवश्चिंतयंस्त्रिपुरंवधं॥गांडीवंमंदरंकृत्वाप्रक्षंचामपिवासुकिं॥२॥स्था ३३५
नंकृत्वातुवैशाखंविष्णुंकृत्वाशरोत्तमं॥३॥अग्निंप्रतिष्ठाप्यमुखेवायुंसमर्पयन्॥३॥हयांश्चापश्च

चतुरोवेदासर्वदेवमयंरथं॥तदाचाश्विनौदेवौइक्षौपश्चधनुःस्वयं॥४॥सामिस्वजांसमाधायनोरवि
धनदःस्थितः॥यमस्तुदक्षिणेहस्तेवामेकालस्तुदारुणः॥५॥चक्रेत्वमरकोट्यस्तुगंधर्वलोकविश्रुताः॥प्र
जापतिरग्रश्रेष्ठोब्रह्माचैवतुसारथिः॥६॥एवंकृत्वातुदेवेनसर्वदेवमयंरथं॥सोतिष्ठत्स्थाणुभूतस्तुसहस्रंपरि
वत्सरान्॥७॥यदात्रीणिसमेतानिअंतरिक्षस्थितानिवै॥त्रिपर्वणात्रिशल्पेनयदाभूमिंव्यभेदयत्॥८॥श
रप्रस्थापितस्तत्ररुद्रेणात्रिपुरंप्रति॥भ्रष्टतेजाःस्त्रियोजाताबलंतासांव्यशीर्यत॥९॥उत्पाताश्चपुरेतस्मिन्प्रादु
र्भूताःसहस्रशः॥त्रिपुरस्यविनाशायकालरूपोभवत्तदा॥१०॥अट्टहासंप्रमुंचंतिरूपकाष्ठमयास्तदा॥निमि
षोन्मिषणंचैवकुर्वंतोचित्रकर्मणः॥स्वप्नेपश्यंतिचात्मानंनकांबरविभूषितं॥स्वप्नेनिपश्यतेएवंविपरीता
नियानिच॥१२॥एतांस्तुपश्यतिउत्पातांतत्रस्थानेषुयेजनाः॥तेषांबलंचबुद्धिश्चहरकोपेननाशितं॥१३॥च्युता
संवर्त्तकोवायुर्युगांतप्रतिमोमहान्॥समीरितोनलस्तेनउत्तमांगेषुबाधते॥१४॥ज्वलंतिपादपास्तत्रपतंति
शिखराणिच॥सर्वतोव्याकुलीभूतंहाहाकारमचेतनं॥१५॥नगोद्यानानिसर्वाणिक्षिप्तेतत्रप्रभंजनः॥तेनैवपी
डितंसर्वंज्वलितैर्विशिखैःशरैः॥१६॥द्रुमआरामखंडानिगृहाणिविविधानिच॥दशदिक्षुप्रवृत्तोयंसमृद्धोहव्यवा
हनः॥१७॥ततःशिलापुंजनिभंदिशोदिशाविनागतः॥शिलाशितैरनेकैस्तुप्रजज्वालकृताशनः॥१८॥सर्व

किंशुकवनमिवज्वलद्दह्यतेपुरं॥प्रासादशिखराग्राणिविशीर्यंतिसहस्रशः॥१९॥नानामणिविचित्राणि
विमानान्यनेकशः॥गृहाणिचैवरम्याणिदीप्यंतेदीप्तवह्निना॥२०॥धावंतिवनखंडेषुवलभीषुतथैवच॥दे
वागारेषुसर्वेषुप्रज्वलंतिप्रधाविताः॥२१॥क्रंदंतिचानलंदृष्ट्वानदंतिविविधैःस्वरैः॥गिरिकूटनिभास्तत्र
दह्यंतेगारराशयः॥२२॥स्तुवंतिदेवदेवेशंपरित्रायस्वमांप्रभो॥अन्योन्यंचपरिष्वज्यकृताशशरपीडिताः
॥२३॥दह्यंतेदानवास्तत्रशतशोथसहस्रशः॥हंसकारंडवाकीर्णानिविनीसहपंकजा॥२४॥दह्यंतेनलद
ग्धानिपुरोद्यानानिदीर्घिका॥अस्नानैःपंकजैश्छन्नाविस्तीर्णायोजनायता॥२५॥गिरिकूटनिभास्तत्रप्रा
सादारत्नभूषिताः॥पतंतिवह्निनादग्धावितते जालदारुवः॥२६॥सहस्त्रीबालवृद्धेषुगोषुपक्षिषुवाजिषु॥
निर्दयोदहतेवह्निःहरकोपप्रणोदितः॥२७॥सहस्त्रीभिःप्रसुप्ताश्चसंसुप्ताबहवोजनाः॥पुनरालिंग्यतेगाढं
दह्यंतेत्रिपुराणिच॥२८॥अथतस्मिन्पुरेदीप्तेस्त्रियस्ताप्सरसोपमाः॥अग्निज्वालाहतास्तत्रपतंतिधरणी
तले॥२९॥काचित्कनकवर्णाभाइंद्रनीलविभूषिता॥भर्तारंपतितंदृष्ट्वापतितातस्यचोपरि॥३०॥काचिद्धा
माविशालाक्षीमुक्तावलिविभूषिता॥धूमेनाकुलितासातुपतिताधरणीतले॥३१॥काचिदादित्यसंकाशा राम०
प्रसुप्ताचगृहेस्थिता॥अग्निज्वालाहतासातुविगतागतचेतसा॥३२॥उत्थितोदानवस्तत्रगदाहस्तोमहा ३३६

बलः॥वेध्यनेरहतःसोपिपतितोधरणीतले॥३३॥मेघवर्णापरानारीहारकेयूरभूषिता॥श्वेतवस्त्रपरीधाना
बालंस्तन्यंप्रपाययत्॥३४॥दहंतंबालकंदृष्ट्वारुदतेमेघशब्दवत्॥एवंसंदहतेरौद्रोहरक्रोधेनप्रेरितः॥३५॥
काचित्स्वेंद्रप्रभासौम्यावज्रवैडूर्यभूषिता॥सुतमालिंग्यवेपंतीदग्धापततिभूतले॥३६॥अन्यागृहीत्वाहस्ताभ्यां
सलिलंदद्यतिमेलका॥अनेनदिव्यरूपाभ्यांदृष्ट्वापदविमोहिता॥३७॥शिरसिप्रांजलिंकृत्वाविज्ञापयतिपावकं॥
यदित्वमिच्छसेवैरंपुरुषेष्वपकारिषु॥३८॥स्त्रियःकिमपराध्यंतिगृहपंजरकोकिलाः॥पापनिर्दयनिर्लज्जाकस्ते
कोपःस्त्रियोपरि॥३९॥तदाहिपापेनतेज्ञानंसत्यशौचविवर्जितः॥अनेकैर्सस्त्रूपाढ्याउपलभ्याबदास्थिता॥४०॥ व
किंत्वयानश्रुतंलोकेप्रदध्यासंतियोषितः॥किंतुतुभ्यंगुणात्येतेदहनोछौंदनंप्रति॥४१॥अगम्यपिदुराचारास्त्रि त्सा
यंकिंत्वंनिपातसे॥दुष्टनिघृष्टनिर्लज्जकृताशानमंदभाग्यक॥४२॥निराशस्त्वंदुराचारअस्मान्दहंनिर्दयः॥एवंवि न
लप्यमानानांस्तान्वल्यमानाबहुस्वरं॥४३॥अन्याःक्रोशंतिसंक्रुद्धाबालाःशोकेनमोहिताः॥दहतेनिर्दयोवह्निः ह
संक्रुद्धःशत्रुवत्॥४४॥पुष्करिण्यांजलेकूपेज्वालाअपितथैवच॥अस्मान्संदहमानस्त्वंकांगतिंप्राप्स्य
प्यसि॥४५॥एवंप्रलपमानानांनावह्निर्वचनमब्रवीत्॥४६॥वैश्वानरउवाच॥स्ववशोनैवपुष्माकंविनाशंतु
करोम्यहं॥अहमादेशकर्ताविनाहंकर्तास्मिनुग्रहं॥४६॥रुद्रक्रोधसमादिष्टोविचराम्यपिच्छया॥तं

म०पु० तोबाणेमहामहातेजास्त्रिपुरंवीक्ष्यदीपितं॥४७॥आसनस्थोब्रवीद्देवंमहादेवेविनाशितः॥अस्मसवैर्दुरा
३३९ चारेरीश्वरस्यनिवेदितं॥४८॥अपरीक्ष्यत्वहंदग्धःशंकरेणमहात्मना॥नान्यःशक्तस्तुमेहंतुंवर्जयित्वा
महेश्वरं॥४९॥उत्थितःशिरसाकृत्वालिंगंत्रिभुवनेश्वरं॥निर्गत्यतुपुरोद्वारात्परित्यज्यसुहृत्सुतान्॥५०॥
रत्नानिसुविचित्राणिस्त्रियोनानाविधास्तथा॥गृहीत्वाशिरसालिंगंगच्छनागतमंडले॥५१॥स्तुवतेदेवदेवेशं
त्रिलोक्याधिपतिंशिवं॥त्वत्कोपानलनिर्दग्धोयदिवध्योसिशंकर॥५२॥त्वत्प्रसादान्महादेवमामेलिंगंविनश्य
तु॥साध्यमेतन्महादेवत्वत्कोपाद्दहनंमम॥५३॥प्रतिजन्ममहादेवत्वत्पादनिरतोस्म्यहं॥तोटकछंदसा
देवंस्तुवतेमरमेश्वरं॥५४॥ॐशिवशंकरसर्वहरायनमोभवतीभीममहेश्वरदेवनमः॥कुसुमायुधदे
हविनाशकरत्रिपुरांतकशूलधरायनमः॥५५॥प्रमदाप्रियकामविभंजकमनुःससुरासुरसिद्धमणेन ग
मितं॥हयवानरसिंहगजेंद्रकलोत्कदेवनमः॥५६॥नहिपुत्रकलत्रनबंधुकृतैःसततंमहदेवतवस्मर म
णं॥व्यथितोस्मिशरीरशतैर्बहुभिर्गमिताचमहानरकस्यगतिः॥ननिवर्ततिजन्मअपायगतिश्शुचि
शुचिकर्मविधिंनपरित्यजति॥अनुकंपतिबिभ्रमतिचरसतिममयुद्धबुद्धिंनिवारयति॥५८॥यःपठे राम०
त्तोटकंहस्तंप्रयतःशुचिमानसः॥बाणसेवयथारुद्रस्तसेवंवरदोभवेत्॥५९॥इदंत्वस्तवंमहादिवंस्तु ३३९

लादेवोमहेश्वरः॥प्रसन्नस्तुतदातस्यस्वयंदेवोमहेश्वरः॥६०॥॥ईश्वरउवाच॥॥नभेतव्यंत्वयावत्ससोपर्णि
तिष्ठदानव॥पुत्रपौत्रकबंधूनांभार्याभिस्त्वजनैःसह॥६१॥अद्यप्रभृतिबाणत्वमवध्यस्त्रिदशैरपि॥भूयस्त्व
स्यवरोदत्तोदेवदेवेनपांडव॥६२॥अक्षयश्चाव्ययोलोकेविचरस्वाकुतोभयः॥ततोनिवारयामासरुद्रःश
ष्टसत्वंतथा॥६३॥तृतीयंरक्षितंतस्यशंकरेणमहात्मना॥भ्रमतेगगनेदिव्यंरुद्रतेजःप्रभावतः॥६४॥ए
वंतत्रिपुरंदग्धंशंकरेणमहात्मना॥ज्वालामालाप्रदीप्तंतुपतितंधरणीतले॥६५॥एकंनिपतितंतत्रश्रीशै
लेत्रिपुरांतके॥द्वितीयंपतितंतत्रपर्वतेमरकंकटे॥६६॥दग्धेतुत्रिपुरेराजनरुद्रकोटिःप्रतिष्ठिता॥ज्वलंतेतंप
तितंतत्रतेनज्वालेश्वरेस्मृतं॥६७॥ऊर्ध्वेनप्रस्थितातत्रदिव्याज्वाला॥जादिवंगता॥हाहाकारस्तदाजातोदेवासुरस
किंनरैः॥६८॥शरमस्तभयभुजोमाहेश्वरपुरोत्तमे॥एवंवृत्तंतदातस्मिन्पर्वतेमरकंकटे॥६९॥चतुर्दशसु
वनानिसप्तुत्कोपांडुनंदन॥वर्षकोटिसहस्रेतुत्रिंशत्कोट्यस्तथापराः॥७०॥ततोमहीतलंप्राप्यराजाभव
तिधार्मिकः॥पृथिवीमेकछत्रेणभुंक्तेनास्त्यत्रसंशयः॥७१॥एवंपुण्योरामहाराजपर्वतोमरकंकटः॥चंडस
येपरागेभुयोयात्यमरकंकटे॥अश्वमेधाद्दशगुणंप्रवदंतिमनीषिणः॥स्वर्गलोकमवाप्नोतिदृष्ट्वातत्रहेश्वरं॥
७३॥सन्निहत्यांगमिष्यंतिराज्यस्कोटिवाकरे॥तदेवनिखिलंपुण्यंपर्वतेमरकंकटे॥७४॥मनसापिस्मरेद्य

म० पु० स्तु गिरिश्च मरकंकटे ॥ चांडाप एणशतं साग्रं लभते नात्र संशयः ॥७५॥ त्रयाणामपि विख्यातो लोका नामरकंकटे ॥ ए
३३९ षपुण्यो गिरिश्रेष्ठः सिद्धगंधर्वसेवितः ॥७६॥ नानाद्रुमलताकीर्णो नानापुष्पोपशोभितः ॥ मृगव्याघ्रसहस्रैस्तु सेव्य
मानो महागिरिः ॥७७॥ तत्र संनिहितो राजन् देव्या सहेश्वरः ॥ ब्रह्मा विष्णुस्तथा चंद्रो विद्याधरगणैः सह ॥७८॥ ऋषि
भिः किन्नरैर्यक्षैर्नित्यमेव निषेवितः ॥ वासुकिसहितस्तत्र क्रीडते पन्नगोत्तमैः ॥७९॥ प्रदक्षिणं तु यः कुर्यात् पर्वते
मरकंकटे ॥ पुंडरीकस्य यत्तस्य फलं प्राप्नोति मानवः ॥८०॥ ततो जालेश्वरो नाम पर्यवर्ते मरकंकटे ॥ तत्र स्नात्वा दि
वं यांति ये मृतास्ते पुनर्भवाः ॥८१॥ रुद्रलोकमवाप्नोति यावदाहूतसंप्लवं ॥ अमरेशस्य देवस्य पर्वतस्य तु उन्नत
टे ॥८२॥ कोटिशो ऋषिमुख्यास्ते तपस्तप्यंति सुव्रताः ॥ समंताद्योजनं राजन् चामरकंकटे ॥८३॥ अकामो वा सका
मो वा नर्मदायाः शुभे तटे ॥ स्नात्वा मुच्येत पापेभ्यो रुद्रलोकं स गच्छति ॥८४॥ ॥ इति श्रीमत्स्यपुराणे अमरेश्वरमा
हात्म्ये ॥ ॥ सूत उवाच ॥ ॥ पृच्छति च माहात्म्यं मार्कंडेयं महामुनिं ॥ युधिष्ठिरपुरोगास्ते ऋषयश्च तपोधनाः ॥१॥
व्याख्याहि भगवंस्तथ्यं कावेरीसंगमं महत् ॥ लोकानां च हितार्थाय अस्माकं च विवृद्धये ॥२॥ सदा पापहता ये तु राम
नराः दुःकृतकर्मिणः ॥ मुच्यंते सर्वपापेभ्यो गच्छंति परमं पदं ॥ एतदिच्छामि विज्ञातुं भगवन् वक्तुमर्हसि ॥३॥ श्री ३३९
मार्कंडेय उवाच ॥ ॥ शृणुध्वं सहिताः सर्वे युधिष्ठिरपुरोगमाः ॥ अस्ति पर्पा महापक्षाः कुलिकाः सत्यविक्रमाः ॥४॥

इदं तीर्थमनुप्राप्याधिको न वेत् ॥ सिद्धिं प्राप्तो महाराज तन्मे निगदतः शृणु ॥५॥ कावेरीनर्मदायत्र संगमे लोकविश्रुते ॥ तत्र
स्नात्वा शुचिर्भूत्वा कुबेरः सत्यविक्रमः ॥६॥ तपस्तप्यति यक्षेंद्रो दिव्यं वर्षशतं महत् ॥ तस्य तुष्टो महादेवः प्रददौ वरमुत्त
मं ॥ भो भो यक्ष वरं रम्यं यथा मनन्त्र हि यथेप्सितं ॥ ब्रूहि कार्यं यथेष्टं तु यत्ते मनसि वर्तते ॥७॥ कुबेर उवाच ॥ ॥ यदि तुष्टोसि दे
वेश यदि देयो वरो मम ॥ आदिः कृती च सर्वेषां यक्षाणामधिपो भवेत् ॥९॥ श्रीमार्कंडेय उवाच ॥ ॥ कुबेरस्य वचः श्रुत्वा तु
ष्टो देवो महेश्वरः ॥ एवमस्त्विति प्रोक्त्वा तत्रैवांतरधीयत ॥१०॥ सोपि लब्धवरो यक्षः शीघ्रं यक्षकुलं गतः ॥ पूजितः स
र्वयक्षैस्तु अभिषिक्तः पार्थिव ॥११॥ कावेरीसंगमं तत्र सर्वपापप्रणाशनं ॥ ये नरा नाभिजानंति वंचितास्ते न संशयः
तस्मात् सर्वप्रयत्नेन तत्र स्नायीत मानवः ॥ कावेरी च महापुण्या नर्मदा च महानदी ॥१३॥ तदत्र स्नात्वा तु राजेंद्र अर्च
येद्वृषभध्वजं ॥ अश्वमेधफलं प्राप्य रुद्रलोके महीयते ॥१४॥ अग्निप्रवेशं यः कुर्यात् यश्च कुर्यादनाशिकं ॥ अनिव
र्तिका गतिस्तस्य यथा मे त्र्यंबकोब्रवीत् ॥१५॥ सेव्यमानो वरस्त्रीभिः क्रीडते दिवि रुद्रवत् ॥ षष्टिवर्षसहस्राणि षष्टिको
ट्यस्तथापराः मोदते रुद्रलोकस्थो यत्रैव गच्छति ॥ पुण्यक्षयात्परिभ्रष्टो राजा भवति धार्मिकः ॥ भोगवान् दानशीलश्च मह
त्येव कुले जायते ना ॥१७॥ ॥ इति श्रीमत्स्यपुराणे अमरेश्वरमाहात्म्ये ॥ श्रीमार्कंडेय उवाच ॥ नर्मदा उत्तरे कूले तीर्थं यो
जनविस्तृतं ॥ यंत्रेश्वरेति विख्यातं सर्वपापहरं परं ॥ तत्र स्नात्वा नरो राजन् दैवतैः सह मोदते ॥ पंचवर्षसहस्राणि

क्रीडते कालरूपधृक् ॥ राजा नो चततो गच्छेत् मेघनादं सुसंस्थितः ॥ इंद्रजिन्नाम संप्राप्तस्तस्य तीर्थप्रभावतः ॥३॥ मेघ
नादं ततो गच्छेद्यत्र मेघानुगर्जितं ॥ मेघनादो गणस्तत्र गणसंपन्नतां गतः ॥४॥ ततो गच्छेत राजेंद्र तीर्थमाम्रात
केश्वरं ॥ तत्र स्नात्वा नरो राजन् गोसहस्रफलं लभेत् ॥५॥ नर्मदा उत्तरे कूले धारातीर्थमनुत्तमं ॥ तस्मिंस्तीर्थे नरः स्नात्वा
तर्पयेत्पितृदेवताः ॥६॥ कामान्सर्वानवाप्नोति मनसा ये विचिंतिताः ॥ ततो गच्छेत राजेंद्र ब्रह्मा विष्णुमिति स्मृतं ॥७॥ तत्र
संनिहितो ब्रह्मा नित्यमेव युधिष्टिर ॥ तत्र स्नात्वा तु राजेंद्र ब्रह्मलोके महीयते ॥८॥ ततो गणेश्वरं गच्छेत् नियतो नियता
त्मनः ॥ सर्वपापविनिर्मुक्तो रुद्रलोकं स गच्छति ॥९॥ ततो गच्छेत राजेंद्र कपिलातीर्थमुत्तमं ॥ तत्र स्नात्वा नरो राजन्
गोप्रदानफलं लभेत् ॥१०॥ करंजतीर्थं ततो गच्छेत् देवर्षिगणसेवितं ॥ तत्र स्नात्वा नरो राजन् रुद्रलोकमवाप्नुया
त् ॥११॥ ततो गच्छेत राजेंद्र कुंडलेश्वरमुत्तमं ॥ तत्र संनिहितो रुद्रस्तिष्ठते चोमया सह ॥१२॥ तत्र स्नात्वा तु राजेंद्र अ
वध्यस्त्रिदशैरपि ॥ पिप्पलेशं ततो गच्छेत् सर्वपापप्रणाशनं ॥१३॥ तत्र स्नात्वा तु राजेंद्र रुद्रलोके महीयते ॥ ततो ग
च्छेत राजेंद्र विमलेश्वरमुत्तमं ॥१४॥ ———————— ईश्वरेण निवेदितं तत्र प्राणान्परित्यज्य रुद्रलोकमवा
प्नुयात् ॥१५॥ ततः पुष्करिणीं गच्छेत् तत्र स्नानं समाचरेत् ॥ स्नानमात्रो नरस्तत्र इंद्रस्यार्धासनं लभेत् ॥१६॥ नर्मदा सरि
तां श्रेष्ठा रुद्रदेहाद्विनिःसृता ॥ तारयेत्सर्वभूतानि स्थावराणि चराणि च ॥१७॥ सर्वदेवाधिदेवेन ईश्वरेण महात्मना ॥

कथिता ऋषिसंघेभ्यः अस्माकं च विशेषतः ॥१८॥ मुनिभिः संस्तुता ह्येषा नर्मदा प्रवरा नदी ॥ रुद्रदेहाद्विनिःक्रां
ता लोकानां हितकाम्यया ॥१९॥ सर्वपापहरा नित्यं सर्वदेवनमस्कृता ॥ संस्तुता सर्वगंधर्वैरप्सरोभिस्तथैव सा ॥
२०॥ नमः पुण्यजले आद्ये नमः सागरगामिनि ॥ नमस्ते पापनिर्दाहे नमो देवि वरानने ॥२१॥ नमोस्तु ते ऋषिगणसंघ
सेविते नमोस्तु ते शंकरदेहनिःसृते ॥ नमोस्तु ते धर्मभृतां वरानने नमोस्तु ते सर्वपवित्रपावने ॥२२॥ य इदं पठते स्तो
त्रं नित्यं शुद्धमना नरः ॥ ब्राह्मणो वेदमाप्नोति क्षत्रियो विजयी भवेत् ॥२३॥ वैश्यस्तु लभते लाभं शूद्रश्चैव शुभां गतिं ॥
अर्थार्थी लभते ह्यर्थं स्मरणादेव नित्यशः ॥२४॥ नर्मदां सेवते नित्यं स्वयं देवो महेश्वरः ॥ तेन पुण्या नदी ज्ञेया ब्रह्मह
त्यापहारिणी ॥२५॥ ॥ इत्यमरेश्वरमाहात्म्ये ॥ ॥ मार्कंडेय उ० ॥ ॥ तदा प्रभृति ब्रह्माद्या ऋषयश्च तपोधनाः ॥ सेवं
ते नर्मदां राजन् रागक्रोधविवर्जिताः ॥१॥ युधिष्ठिर उ० ॥ ॥ यस्मिन्निपतितं ह्यस्यां स्थलं देवस्य भूतले ॥ तस्य पुण्यं स
माख्यातं शंकरेण महात्मना ॥२॥ श्रीमार्कंडेय उवाच ॥ ॥ ज्वलनेति विख्यातं तीर्थं पुण्यतमं महत् ॥ तत्र स्ना
त्वा यदि देवं गोसहस्रफलं लभेत् ॥३॥ त्रिरात्रं कारयेद्यस्तु तस्मिंस्तीर्थे नराधिप ॥ अर्चयित्वा महादेवं पुनर्जन्म न वि
द्यते ॥४॥ श्रीमेश्वरं ततो गच्छेन्नारदेश्वरमुत्तमं ॥ आदित्येशं महापुण्यं स्मृतं किल्विषमुत्तमं ॥५॥ नरकेशं परिक्रम्य प्राप्य
प्रजन्मनः फलं ॥ वारुणेशं ततः पश्येत् सराज्येश्वरमेव च ॥६॥ सर्वतीर्थफलं तस्य पंचायतनदर्शनात् ॥ ततो गच्छेत रा

म०पु० ३४०

जेंद्रपुष्पवैयत्र साधितं ॥७॥ कोटितीर्थं तु विख्यातं असुरा यत्र योधिता ॥ यत्र ते निहता राजन् दानवा बलदर्पिता ॥
तेषां शिरांसि गत्वा तु निहतास्ते समागता ॥ तैस्तु संस्थापितो देवः शूलपाणिर्महेश्वर ॥९॥ कोटीर्वि निहतास्तत्र ते
न कोटीश्वरः स्मृतः ॥ दर्शनात्तस्य तीर्थस्य सदेहः स्वर्गमारुहेत् ॥१०॥ तदाइंद्रेण क्षुब्धा वज्रकीटैस्त्वयंत्रितां ॥
तदा प्रभृति लोकानां स्वर्गमार्गो निवारितः ॥११॥ सहतं श्रीफलं दद्यात् तुल्याचोते प्रदक्षिणं ॥ सर्वतः सहदेवेन
शिरसा दीप धारयेत् ॥१२॥ स सर्वकामसंपूर्णो राजा भवति पांडव ॥ मृतो रुद्रत्वमाप्नोति न चेह जायते पुनः ॥१३॥
स्वर्गं गत्वा ततो राज्यं कृत्वा तु बहुकामेलकं ॥ महादेवं ततः पश्येत् त्रयोदशपात्तु मानवः ॥१४॥ स्नानमात्रो नर
स्तत्र सर्वयज्ञफलं लभेत् ॥ ततो गच्छेत राजेंद्र तीर्थं परमशोभनं ॥१५॥ नराणां पापनाशाय व्यग्रस्तेश्वरमुत्त
मं ॥ तत्र स्नात्वा नरो राजन् मुच्यते ब्रह्महत्यया ॥१६॥ कार्त्तिकस्य तु मासस्य कृष्णपक्षे चतुर्दशीं ॥ घृतेन स्नापयेद्दे
वं समाधिस्थो जितेंद्रियः ॥१७॥ एकविंशत्कुलोपेतो नच्यवेदेश्वरात्पदात् ॥ धेनवोपानहछत्रं दद्याच्च घृतकं
बलं ॥१८॥ भोजनं चैव विप्राणां सर्वं कोटिगुणं भवेत् ॥ ततो गच्छेत राजेंद्र बलिविस्तरमुत्तमं ॥१९॥ एवं कृ
त्वा तु राजेंद्र सिंहासनपतिर्भवेत् ॥ नर्मदादक्षिणे कूले तीर्थं शाकस्य विश्रुतं ॥२०॥ उपोष्य रजनीमेकां स्नानं रा०मु०
तत्र समाचरेत् ॥ स्नानं कृत्वा यथान्याय्यं अर्चयित्वा जनार्दनं ॥२१॥ गोसहस्रफलं तस्य विष्णुलोकं स गच्छति ॥ ३४०

ऋषितीर्थं ततो गच्छेत् सर्वपापहरं नृपां ॥२२॥ स्नानमात्रो नरस्तत्र शिवलोके महीयते ॥ नारदस्य तु तत्रैव तीर्थं पर
मशोभनं ॥२३॥ स्नानमात्रो नरस्तत्र गोसहस्रफलं लभेत् ॥ वेदतीर्थं ततो गच्छेत् ब्रह्मणा निर्मितं पुरा ॥२४॥ तत्र स्ना
त्वा नरो राजन् ब्रह्मलोके महीयते ॥ अमरकंकटं गच्छेद् अमरैः स्थापितं पुरा ॥२५॥ स्नानमात्रो नरस्तत्र रुद्रलोके
महीयते ॥ ततो गच्छेत राजेंद्र वामनेश्वरमुत्तमं ॥२६॥ तत्र वायतनं दृष्ट्वा मुच्यते ब्रह्महत्यया ॥ कृपणतीर्थं ततो ग
च्छेत् रूपेण्यो मुच्यते ध्रुवं ॥२७॥ वाटेश्वरं ततो दृष्ट्वा पर्याप्तं जन्मनः फलं ॥ भीमेश्वरं ततो गच्छेत् सर्वव्याधि
विनाशनं ॥२८॥ स्नानमात्रो नरो राजन् सर्वदुःखैः प्रमुच्यते ॥ ततो गच्छेत राजेंद्र नदीसंगममुत्तमं ॥२९॥ सो
मतीर्थं ततो गच्छेत् चंद्रक्षेत्रमनुत्तमं ॥ तत्र स्नात्वा नरो राजन् भक्त्या परमया युतः ॥३०॥ तत्क्षणाद्दिव्यदेहस्थः
शिववत् मोदते चिरं ॥ षष्टिवर्षसहस्राणि शिवलोके महीयते ॥३१॥ ततो गच्छेत राजेंद्र पिंगलेश्वरमुत्तमं ॥ अ
होरात्रोपवासेन त्रिरात्रफलमाप्नुयात् ॥३२॥ तस्मिंस्तीर्थे तु राजेंद्र कपिलां यः प्रयच्छति ॥ यावंति तस्य रोमाणि
तत्प्रसूतिकुलेषु च ॥३३॥ तावद्वर्षसहस्राणि रुद्रलोके महीयते ॥ यस्तु प्राण परित्यागं तत्र कुर्यान्नराधि
प ॥३४॥ अक्षयं मोदते कालं यावच्चंद्रदिवाकरौ ॥ नर्मदातटमाश्रित्य तिष्ठंते ये तु मानवाः ॥३५॥ ते मृताः स्व
र्गमायांति संतः सुकृतिनो यथा ॥ स्तुरंतिकेश्वरं गच्छेत् नामकर्कोटकेश्वरं ॥३६॥ ततो दीपेश्वरं गच्छेत् व्यासतीर्थं

म॰पु॰
३४१

तपोवने॥ निवर्त्तिता पुरा तत्र व्यासतीर्थमहानदी॥३७॥ हुंकारितात्तु व्यासेन दक्षिणेन ततो गता॥ प्रदक्षिणं तु
यः कुर्यात् तस्मिन् तीर्थे नराधिप॥३८॥ स्वर्गे स मोदते कालं यावच्चंद्रदिवाकरौ॥ व्यासस्तस्य भवेत्प्रीतो वांछि
तं लभते फलं॥३९॥ सूत्रेण वेष्टयेद्यस्तु द्वीपं देवं सवेदिकं॥ क्रीडते चाक्षयं कालं यथा रुद्रस्तथैव सः॥४०॥ त
तो गच्छेत राजेंद्र एरंडीतीर्थमुत्तमं॥ संगमे तु नरः स्नात्वा मुच्यते सर्वकिल्बिषैः॥४१॥ एरंडी त्रिषु लोकेषु विख्याता पा
पनाशिनी॥ अथवाश्वयुजे मासि शुक्लपक्षस्य चाष्टमी॥४२॥ शुचिर्भूत्वा नरः स्नात्वा सोपवासपरायणः॥
ब्राह्मणं भोजयेदेकं कोटिर्भवति भोजिता॥४३॥ एरंडीसंगमे स्नात्वा भक्तिभावानुरंजितः॥ मृत्तिकां शिरसि
स्थाप्य अवगाह्य च वै जलं॥४४॥ नर्मदोदकसंमिश्रं मुच्यते सर्वकिल्बिषैः॥ प्रदक्षिणं तु यः कुर्यात् तस्मिन् ती
र्थे नराधिप॥४५॥ प्रदक्षिणीकृता तेन सप्तद्वीपा वसुंधरा॥ ततः सुवर्णकिष्कौः स्नात्वा दत्वा कांचनं॥४६॥
कांचनेन विमानेन रुद्रलोके महीयते॥ ततः स्वर्गच्युतः कालाद्राजा भवति वीर्यवान्॥४७॥ ततो गच्छे
त राजेंद्र इक्षुनद्यास्तु संगमं॥ त्रैलोक्यविश्रुतं दिव्यं तत्र संनिहितः शिवः॥४८॥ तत्र स्नात्वा नरो राजन् गाणपत्य
मवाप्नुयात्॥ स्कंदतीर्थं ततो गच्छेत् सर्वपापप्रणाशनं॥४९॥ तत्र गत्वा तु राजेंद्र स्नानं तत्र समाचरेत्॥ आज
न्मसंचितं पापं स्नानमात्रेण पोहति॥५०॥ तत आंगिरसं गच्छेत् स्नानं तत्र समाचरेत्॥ गोसहस्रफलं तस्य रु

राम॰
३४१

द्रलोके महीयते॥५१॥ सप्तजन्मकृतैः पापैर्मुच्यते नात्र संशयः॥ वटेश्वरं ततो गच्छेत् सर्वतीर्थमनुत्तमं॥५२॥
तत्र स्नात्वा नरो राजन् गोसहस्रफलं लभेत्॥ संगमेशं ततो गच्छेत् सर्वदेवनमस्कृतं॥५३॥ स्नानमात्रो नरस्त
त्र इंद्रत्वं लभते ध्रुवं॥ कोटितीर्थं ततो गच्छेत् सर्वपापहरं॥५४॥ तत्र स्नात्वा नरो राजन् लभते नात्र संशयः।
पयस्वि तीर्थं समासाद्य दानं दद्याच्च यो नरः॥५५॥ तस्य तीर्थप्रभावेन सर्वं कोटिगुणं भवेत्॥ अथ नारी भवे
त्काचित् स्नानं तत्र समाचरेत्॥५६॥ गौरीतुल्या भवेत्सा तु इंद्रपत्नी न संशयः॥ अंगारेशं ततो गच्छेत्
स्नानं तत्र समाचरेत्॥५७॥ स्नानमात्रो नरस्तत्र रुद्रलोके महीयते॥ अंगारकचतुर्थ्यां तु स्नानं तत्र समाचरे
त्॥५८॥ अक्षयं मोदते कालमवध्यस्तु सुरैरपि॥ विष्णुलोकं ततो गत्वा क्रीडाभोगसमन्वितः॥५९॥ तत्र भु
क्त्वा महाभोगान् मर्त्यो राजाभिजायते॥ कपोतकेश्वरं गच्छेत् स्नानं तत्र समाचरेत्॥६०॥ उत्तरायणे तु सं
प्राप्ते यदि गच्छेत्तस्य तद्भवेत्॥ चंद्रभागं ततो गच्छेत् स्नानं तत्र समाचरेत्॥६१॥ स्नानमात्रेण नरस्तत्र सोमलो
के महीयते॥ ततो गच्छेत राजेंद्र तीर्थं शक्रस्य विश्रुतं॥६२॥ पूजितं देवराजेन देवैरपि नमस्कृतं॥ तत्र स्ना
त्वा नरो राजन् दत्वा दानं सकांचनं॥६३॥ अथवा नीलपत्नीं वृषभं यः प्रयच्छति॥ वृषभस्य तु रोमाणि त
त्प्रसूतिकुलेषु च॥६४॥ तावद्वर्षसहस्राणि नरो हरिपुरे वसेत्॥ ततः स्वर्गात्परिभ्रष्टो राजा भवति

म०पु० ३४२

वीर्यवान्॥६५॥ अस्या नांश्वेतवर्ण्णानांसहस्रेषुनराधिप॥ स्वामीभवतिमर्त्येषुतस्यतीर्थप्रभावतः॥६६॥ततोगछेतरा
जेंद्रकपिलातीर्थमुत्तमं॥ तत्रस्नात्वानरोराजन्कपिलायःप्रयछति॥६७॥ सपूर्ण्णांपृथिवींदत्वायत्फलंतदवाप्नु
यात्॥नर्मदेशंपरंतीर्थंनिभूतंनभविष्यति॥६८॥ तत्रस्नात्वानरोराजन्अश्वमेधफलंलभेत्॥नर्मदादक्षिणेकूले
संगमेश्वरमुत्तमं॥६९॥तत्रस्नात्वानरोराजन्अश्वमेधफलंलभेत्॥ततःस्वर्गतोराजापृथिव्यामभिजायते॥७०॥
सर्वलक्षणसंपूर्णःसर्वव्याधिविवर्जितः॥ अर्मदाउत्तरेकूलेतीर्थंतित्रुपरंस्मृतं॥७१॥ आदित्यायतनंरम्यमीश्व
रेणतुभाषितं॥तत्रस्नात्वातुराजेंद्रदानंदत्वातुशक्तितः॥७२॥तत्रतीर्थप्रभावेनदत्तंभवतिचाक्षयं॥दरिद्राव्या
धितायेचयेचदुःकृतकर्मिणः॥ मुच्यंतेसर्वपापेभ्योरविलोकंमहीयते॥माघमासेतुसंप्राप्तेशुक्लपक्षेषुचसप्त
मी॥७४॥वसेदायतनेयस्तुनिराहारोजितेंद्रियः॥नजडोव्याधितोव्याप्मूकोनचांधोबधिरस्तथा॥७५॥सु
भगोरूपसंपन्नःस्त्रीणांभवतिवल्लभः॥एवंतीर्थमहापुण्यंमार्कंडेयेनभाषितं॥येनजानंतिराजेंद्रवंचि
तास्तेनसंशयः॥गर्गेश्वरंततोगछेत्स्नानंतत्रसमाचरेत्॥स्नानमात्रेणनरस्तत्रस्वर्गलोकमवाप्नुयात्॥मो
दतेस्वर्गलोकस्थोयावदिंद्राश्चतुर्दश॥७८॥तस्यसामीप्यतःस्थितानागेश्वरतपोधनं॥तत्रस्नात्वातु
राजेंद्रनागलोकमवाप्नुयात्॥७९॥ चतुर्भिर्नागकन्याभिःक्रीडतेकालमक्षयं॥कुबेरभवनंगछेत्कुबे

राम ३४२

रोपत्रसंस्थितः॥८०॥कालेश्वरंपरंतीर्थंकुबेरोयत्रतोषितः॥तत्रस्नात्वातुराजेंद्रसर्वभूतिसमाहितः॥८१॥कांच
नंचततोदद्यात्यथाशक्त्यातुबुद्धिमान्पुष्पकेणविमानेनवायुलोकंसगछति॥८२॥यमतीर्थंततोगछेत्
माघमासेयुधिष्ठिरः॥कृष्णपक्षेचतुर्दश्यांस्नानंतत्रसमाचरेत्॥८३॥नक्तभोज्यंततःकुर्यात्नयश्येद्योनि
संकटं॥अहिल्यातीर्थंततोगछेत्लिंगोयत्रजनार्दन॥८४॥तत्रस्नात्वातुराजेंद्रविष्णुलोकेमहीयते॥नर्म
दादक्षिणेकूलेतीर्थंपरमशोभनं॥८५॥कामदेवःस्वयंतत्रतपस्तप्यतमंमहत्॥दिव्यवर्षसहस्रंतुशंक
रंपर्युपासत॥८६॥समाधेःपूर्वंदग्धस्तुशंकरेणमहात्मना॥श्वेतपूर्वोयमश्चैवकुताशःशुक्रपर्वणि
८७॥एतद्दग्धास्तुतेसर्वेकुसुमेश्वरमास्थिताः॥दिव्यवर्षसहस्रेणतुष्टस्तेषांमहेश्वरः॥८८॥उमयासहितो
रुद्रस्तेषांतुवरप्रदः॥विमोचयित्वातत्सर्वान्नर्मदातटमास्थितः॥८९॥तस्यतीर्थप्रभावेनपुनर्देवत्व
मागतः॥त्वत्प्रसादान्महादेवतीर्थंभवतुचोत्तमं॥९०॥अर्द्धयोजनविस्तीर्णंसंतितीर्थंदिक्षुसमंततः॥तस्मिं
स्तीर्थेनरःस्नात्वाउपवासपरायणः॥९१॥कुसुमायुधरूपेणरुद्रलोकेमहीयते॥विश्वानरयमेनैवकामदेवे
नचापरे॥९२॥तपस्तप्यातुराजेंद्रतत्रैवचपुरागताः॥अंकोलस्यसमीपेतुनातिदूरेतुतस्यवै॥९३॥स्नान
दानंचतत्रैवभोजनंपिंडपानं॥अग्निप्रवेशेजलेवापिअथवाचाप्यनाशके॥९४॥अनिवर्तागतिस्तस्यम

तस्यापमजायते॥त्र्यंबकेतत्रतोयेनपञ्चकंस्नापयेन्नरः॥९५॥अंकोल्लमूलेदत्वातुपिंडंचैवयथाविधि॥पितर
स्तस्यतृप्यंतियावच्चंद्रदिवाकरौ॥९६॥उत्तरायणेतुसंप्राप्तेघृतस्नानंकरोतियः॥पुरुषोवास्त्रियोवापिव
सेच्छिवपुरेशुचिः॥९७॥सिद्धेश्वरस्यदेवस्यप्रातःपूजांप्रकल्पयेत्॥कामांगतिमवाप्नोतिशिवलोकेमही
यते॥९८॥यदावकार्कःसंकालेनरूपवान्सुभगोभवेत्॥नवभिवतिराजासौआसमुद्रांतगोचरात्॥९९
क्षेत्रपालंनपरूपेघोरंदंडपाणिंमहाबलं॥ध्यानसाक्षुतेयात्राअर्हक्षकर्णकुंडलं॥१००॥एततीर्थंफ
लंज्ञात्वासर्वेदेवाःसमागताः॥मुंचंतिपुष्पवृष्टिंचस्तुवंतिकुसुमेश्वरं॥१०१॥॥इतिनर्मदामाहात्म्ये॥मार्कंडे
यउवाच॥॥मार्गवेशंततोगच्छेत्भृगुयत्रजनार्दनः॥हुंकारितास्तुदेवेनदानवाःप्रलयंगताः॥तत्रस्नात्वा
तुराजेंद्रसर्वपापैःप्रमुच्यते॥शुक्लतीर्थस्यचोत्पत्तिंशृणुपांडवनंदन॥२॥हिमवच्छिखरेरम्येनानाधातुवि
चित्रिते॥तरुणादित्यसंकाशेतप्तकांचनसप्रभे॥३॥वज्रस्फटिकसोपानेचित्रपाशिलातले॥जांबुनद
मयेदिव्येनानापुष्पोपशोभिते॥४॥तत्रासीनंमहादेवंसर्वज्ञंप्रभुमव्ययं॥लोकानुग्रहकंशांतंगणवृंदैः
समाकुलं॥५॥स्कंदनंदमहाकालैर्वीरभद्रगणादिभिः॥उमयासहितंदेवंमार्कंडःपरिपृच्छति॥६॥देव
देवमहादेवब्रह्मविष्णुस्त्रिभिःसंस्तुतः॥संसारभयभीताहंसुखोपायंवदाहिमे॥७॥गंगाकनकखलेपुण्या

प्रयागंपुष्करंगया॥कुरुक्षेत्रंयथापुण्यंराहुग्रस्तेदिवाकरे॥८॥दिवावायदिवारात्रौशुक्लतीर्थंमहाफलं॥द
र्शनात्स्पर्शनाच्चैवस्नानाद्दानात्तपोवनात्॥९॥होमाच्चैवोपवासाच्चशुक्लतीर्थफलंमहत्॥शुक्लतीर्थंमहापु
ण्यंनर्मदायांव्यवस्थितं॥१०॥चाणक्यनामराजेंद्रसिद्धिंतत्रपरांगतः॥एतत्क्षेत्रंसुविस्तीर्णंयोजनावर्त्तिसंस्थितं।
११॥शुक्लतीर्थमहापुण्यंसर्वपापप्रणाशनं॥पादपाग्रेपातिष्ठेतब्रह्महत्यांव्यपोहति॥१२॥जलसद्दष्टिमात्रे
ण॥भ्रूणहत्यांव्यपोहति॥अहंतत्रऋषिश्रेष्ठतिष्ठामिमयासह॥१३॥वैशाखेतुमुनेमासिकृष्णपक्षेचतुर्दशी॥
कैलाशाद्वासान्निःक्रम्यतत्रसंनिहितोह्यहं॥१४॥देवदानवगंधर्वाःसिद्धविद्याधरास्तथा॥गणाश्चाप्सरसोन
गाःसर्वेदेवाःसमागताः॥१५॥गगनस्थास्तुतिष्ठंतिविमानैःसार्वकामिकैः॥शुक्लतीर्थेनृराजेंद्रआगताध
र्मकांक्षिणः॥१६॥केनकेनतथावत्सशुक्लंभवतिवारिणा॥आजन्मसंचितंपापंशुक्लतीर्थेव्यपोहति॥१७
स्नानंदानंमहापुण्यंमार्कंडऋषिसत्तमः॥शुक्लतीर्थस्थिरंतीर्थंनभूतंनभविष्यति॥१८॥पूर्ववयसिकर्माणि
कृत्वापापानिमानवः॥अहोरात्रोपवासेनशुक्लतीर्थेव्यपोहति॥१९॥तपसाब्रह्मचर्येणयज्ञैर्दानैस्तथापु
नः॥देवदानेनयातुष्टिर्नसाक्रतुशतैरपि॥२०॥कार्तिकस्यतुमासस्यकृष्णपक्षेचतुर्दशी॥घृतेनस्ना
पयेद्देवंउपोष्यपरमेश्वरं॥२१॥एकविंशकुलोपेतोनच्यवेदैश्वरात्पदात्॥शुक्लतीर्थमहातीर्थंऋषि

सिद्धे निषेविते ॥२२॥ तत्र स्नात्वा नरो राजन् पुनर्जन्म न माप्नुवेत् ॥ स्नात्वा वै शुक्रतीर्थे तु अर्चयेद् वृषभध्वजं ॥२३॥ कपा
लपूरणं कृत्वा तु महेश्वरं ॥ अर्द्धनारीश्वरं देवं पटस्थं यो लिखापयेत् ॥२४॥ शंखतूर्यनिनादैश्च ब्रह्मघोषैश्च स
द्विजैः ॥ जागरं कारयेद्यत्र नृत्यगीतादिमंगलैः ॥२५॥ प्रभाते शुक्रतीर्थे तु स्नानं वै देवतार्चनं ॥ आचार्यं भोजयेत्स
म्यक् शिवव्रतपरं शुचिः ॥२६॥ भोजनं च यथाशक्त्या वित्तशाठ्यं न कारयेत् ॥ प्रदक्षिणां ततः कृत्वा शनैर्देवांतिकं
व्रजेत् ॥२७॥ एवं वै कुरुते यस्तु तस्य पुण्यफलं शृणु ॥ दिव्यं विमानं चारूढः स्तूयमानोप्सरोगणैः ॥२८॥ शिवतुल्य
बलोपेतस्त्रिसप्ताभूतसंप्लवं ॥ शुक्रतीर्थे तु या नारी ददाति कनकं शुभं ॥२९॥ घृतेन स्नापयेद्देवं कुमारं चाग्नि
पूजयेत् ॥ एवं या कुरुते भक्त्या तस्याः पुण्यफलं शृणु ॥३०॥ मोदते देवलोकस्था यावदिंद्राश्चतुर्दश ॥ अयने वा
चतुर्दश्यां संक्रांतौ विषुवे तथा ॥३१॥ स्नात्वा तु सोपवासेन विजितात्मा समाहितः ॥ दानं दद्याद्यथाशक्त्या प्रीयेतां
हरिशंकरौ ॥३२॥ शुक्रतीर्थप्रभावेन सर्वं भवति चाक्षयं ॥ अनाथं दुर्गतं विप्रं नाथवंतमथापि वा ॥३३॥ उद्वाह
यति यस्तीर्थे तस्य पुण्यफलं शृणु ॥ यावंति लोमसंख्यानि तत्प्रसूतिकुलेषु च ॥ तावद्वर्षसहस्राणि शिवलो
के महीयते ॥३४॥ ॥ इति शुक्रतीर्थविधानं ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततस्तु नरकं गच्छेत् स्नानं तत्र समाचरेत् ॥
स्नानमात्रेण रस्तत्र नरकं च न पश्यति ॥१॥ अस्य तीर्थस्य माहात्म्यं शृणु त्वं पांडुनंदन ॥ तस्मिंस्तीर्थे तु राजेंद्र पा

न्यस्थीनि विनिक्षिपेत् ॥२॥ विलयं यांति सर्वाणि रूपवान् जायते नरः ॥ गोतीर्थे तु ततो गच्छेद् दृष्ट्वा पापात्प्रमुच्य
ते ॥३॥ ततो गच्छेत राजेंद्र कपिलातीर्थमुत्तमं ॥ तत्र स्नात्वा नरो राजन् गोसहस्रफलं लभेत् ॥४॥ ज्येष्ठमासे तु सं
प्राप्ते चतुर्दश्यां विशेषतः ॥ तत्रोपोष्य नरो भक्त्या कपिलां यः प्रयच्छति ॥५॥ घृतेन दीपं प्रज्वाल्य घृतेन स्नापये
च्छिवं ॥ सघृतं श्रीफलं कृत्वा दत्वा चांते प्रदक्षिणां ॥६॥ घंटाभरणसंयुक्तां कपिलां यः प्रयच्छति ॥ शिवतुल्यब
लो भूत्वा न चेह जायते पुनः ॥७॥ अंगारकदिने प्राप्ते चतुर्थ्यां तु विशेषतः ॥ स्नापयित्वा शिवं दद्यात् ब्राह्मणेभ्यस्तु
भोजनं ॥८॥ अंगारकेन वप्यां तु अमावास्यां तथैव च ॥ स्नापयेत्तत्र यत्नेन रूपवान् सुभगो भवेत् ॥९॥ घृतेन स्ना
पयेल्लिंगं पूजयेद्भक्तितो द्विजान् ॥ पुष्पकेण विमानेन नवकृत्राः परिवारितः ॥१०॥ शैवं पदमवाप्नोति यत्र चा
भिमतं भवेत् ॥ अक्षयं मोदते कालं यावद्रुद्रस्तथैव च ॥११॥ यदा तु कर्मसंयोगान्मर्त्यलोकमुपागतः ॥ रा
जा भवति धर्मिष्ठो रूपवाञ्जायते बली ॥१२॥ ततो गच्छेत राजेंद्र गणेश्वरमनुत्तमं ॥ श्रावणे मासि संप्राप्ते कृष्ण
पक्षे चतुर्दशी ॥१३॥ स्नानमात्रेण रस्तत्र रुद्रलोके महीयते ॥ पितॄणां तर्पणं कृत्वा मुच्यते नात्र संशयः ॥१४॥
ततो गच्छेत राजेंद्र ऋषितीर्थमनुत्तमं ॥ तृणबिंदुऋषिर्नाम शापदग्धो न चास्थितः ॥१५॥ तत्र तीर्थप्रभावेन शा
पमुक्तो भवत् द्विजः ॥ गंगेश्वरसमीपे तु गंगावदनमुत्तमं ॥१६॥ अकामो वा सकामो वा तत्र स्नात्वा तु मानवः ॥

म०पु०
३४५

माजन्मनिर्मितैःपापैर्मुच्यतेनात्रसंशयः॥सर्वदापर्वदिवसेस्नानंतत्रसमाचरेत्॥१९॥पितॄणांतर्पणं
कृत्वामुच्यतेचऋणत्रयात्॥अपांगेयस्फलंदृष्टंशंकरेणमहात्मना॥२०॥तदेवनिखिलंपुण्यंगंगावदन
संगमे॥तस्यैवपश्चिमेपार्श्वेसमीपेनातिदूरतः॥२०॥दशाश्वमेधनामानंत्रिषुलोकेषुविश्रुतं॥उपोष्यरजनी
मेकांमासित्वाप्रपदेतया॥२१॥अमावास्यादिनेस्नात्वाव्रजेत्पत्रशंकरः॥सर्वदापर्वदिवसेस्नानंतत्रसमा
चरेत्॥२२॥पितॄणांतर्पणंकृत्वाअश्वमेधफलंलभेत्॥दशाश्वमेधपश्चिमतःस्थितोमृत्युःसमाहितः॥२३॥
दिव्यंवर्षसहस्रंतुईश्वरंपर्युपासत॥वल्मीकेधिष्ठितस्त्वासोपक्षिणांतुनिकेतनः॥२४॥आश्चर्यंतुमहज्जातं
उमायाःशंकरस्यच॥गौरीतुपृच्छतेदेवंकोममेवंतुसंस्थितः॥२५॥देवोवादानवोवाथकथयस्वमहेश्वर॥२६॥
ईश्वरउवाच॥॥मृत्युनामद्विजश्रेष्ठःऋषीणांप्रवरोमुनिः॥ध्यायतेमांसमाधिस्थोवरंप्रार्थयतेप्रिये॥२६॥त
तःप्रहसितादेवीशंकरंप्रत्यभाषत॥पूर्णवर्त्रिशिरवाजातातमींतोधापिनतुष्यसि॥२७॥दुराराध्यस्ततोन
त्वांनात्रकार्याविचारणा॥२७॥॥देवदेवउवाच॥॥नजानामिमहादेविअयंक्रोधेनवेष्टितः॥दशायामपथा
तथ्यंप्रत्यक्षतेकरोम्यहं॥२८॥स्मरनादेवदेवेनधर्मरूपोवृषस्तथा॥स्मरणादेवदेवस्यवृषःशीघ्रमुपस्थि राम॰
तः॥२९॥वदतेमानुषांवाचमादेशोदीयतांप्रभो॥३०॥॥श्रीईश्वरउवाच॥॥वल्मीकंतरवनेस्येनंविप्रंमूर्मोनि ३४५

पातय॥योगस्थंतुततोध्यायंततस्तेननिपातितः॥३१॥तत्क्षणात्क्रोधसंतप्तोहस्तमुत्क्षिप्यचाशपत्॥एवं
संभाष्यमाणस्तुकुत्रगच्छसिरेवृष॥३२॥त्वद्यहंत्वांसकोपेनप्रज्वलयनमिहेऽपशः॥धर्षितस्तुसदाविप्रअंत
रिक्षांगतोवृषः॥३४॥आकाशात्मोषितोविप्रोपदृनांतवनुत्तमः॥ततःप्रहसितोरुद्रोरुषेरगेभवस्थितः॥
३५॥तत्तपिंगलोचनंदृष्ट्वावैलक्ष्यात्पतितोभुवि॥प्रणम्यदंडवत्भूमौस्तुवतेपरमेश्वरं॥३६॥मार्तण्डप्रणिपत्यमृतनाथंम
वोद्भवंदिव्यमयंनित्यं॥मीताहंभुवनपतेप्रजोविज्ञापयेकिंचित्॥३७॥त्वद्गुणनिकरंवकुंभक्तिर्नवतुमेमुखेनाथ
॥वासुकिरपिहिकदाचिद्वदनसहस्रंभवेद्यस्य॥३८॥भक्तिस्तथापिशंकरभुवनपतेस्तुनिमुखरयतिमेमहेश॥
प्रसीदतवचरणनिरतस्यत्वंसत्वरजस्तमसिस्थित्युत्पत्तिः॥३९॥प्रणाशदेवत्वांमुक्तापुवतेऽज्ञानेनचदेवदंकिंचि
त्॥ममनियमयमयज्ञदानैर्वेदाभ्यासावधारणयोगात्॥४०॥त्वद्भक्तेःसर्वमिदंनार्हतिकलासहस्रांशेनखड
त्रिष्टरसरसापनखड्गांजनयादुकाविचरसिद्धिः॥४१॥चिह्नानितवनतानांदृश्यंतेजन्मनःप्रकटं॥३॥ध्येनम
तियतिर्धपिदासितांधर्ममिच्छतांदेवः॥४२॥भक्तिर्नवेच्छेदकरीमोक्षायविनिर्मिताघना॥परपस्वरतपरप
रिजवदःखशोकसंतप्तं॥४३॥परवदनवीक्षणपरमंपरमेश्वरमांपरित्राहि॥उलकाभिधानदग्धंक्षणमंयुरदे
ववितसितक्रूरं॥४४॥कृपयाभिमुखंपतितंत्वंमांपापात्परित्राहि॥दीनद्विजगुणसर्वैर्बंधुजनेनेवपूरिताअ

म०पु०
३४८

शा॥४५॥तस्मात्तथापिशंकर्किमूढमांविडंबयसि॥तस्मादहरस्थलक्ष्मीमेदेहिहृदयवासिनीनित्यं॥४६॥छिंधिम
दमोहपाशंउद्धारयमांमहादेव॥कारपाल्सुदर्पनामस्तोत्रंदंसर्वसिद्धिदंदिव्यं॥यःपठतियभक्तियुक्तस्तस्यतु
ष्येऽगोगयिष्याहिशिवं॥४७॥॥ईश्वरउवाच॥॥अहंतुष्टोस्मितेविप्रवरंप्रार्थयचेप्सितं॥उमयासहितोदेवो
वरंतस्यहिदापयेत्॥४८॥भृगुरुवाच॥॥यदितुष्टोसिदेवेशयदिदेयोवरोमम॥रुद्रवेदिनवेदेपारगतत्वंप्र
दयमे॥४९॥एवंभवतुविप्रेंद्रकुस्थानंनभविष्यति॥नपितापुत्रयश्चैवएकवासानविष्यति॥५०॥तदाप्रभृति
धर्मज्ञाःसदेवासुरकिंनराः॥उपासंतेभृगोस्तीर्थंतुष्टोयत्रमहेश्वरः॥५१॥दर्शनात्तस्यदेवस्यसद्यःपाप
त्प्रमुच्यते॥अवशास्ववशावापिम्रियंतेयत्रजंतवः॥५२॥गुह्यातिगुह्यातसुगतिस्तेषांनिःसंशयंभवेत्॥ए
तत्क्षेत्रंसुविपुलंसर्वपापप्रणाशनं॥५३॥तत्रस्नात्वादिवंयांतियेमृतास्तेपुनर्भवं॥उपानहौतथाछत्रंदे
यमन्नंतुकांचनं॥५४॥भोजनंतुयथाशक्त्याअक्षयंतस्यतद्भवेत्॥चंद्रसूर्योपरागेतुयत्फलंमरकंकदे॥ न
५५॥तदेवनिखिलंपुण्यंभृगुतीर्थेनसंशयः॥क्षीयंतेसर्वदानानियज्ञदानतपःक्रियाः॥५६॥क्षियेतत्तपस्त
प्तंभृगुक्षेत्रेयुधिष्ठिर॥तस्यवैतपसोग्रेणतुष्टेनैवतुशंभुना॥५७॥सान्निध्यंतत्रकथितंभृगुतीर्थेराधिपा॥ राम०
भृगुतीर्थस्यमाहात्म्यंयःशृणोतिनरःसकृत॥५८॥समुक्तःसर्वपापेभ्योविष्णुलोकंचगच्छति॥ततोगच्छेत ३४६

राजेंद्रगौतमेश्वरमुत्तमं॥५९॥तत्रस्नात्वानरोराजन्उपवासपरायणः॥कांचनेनविमानेनब्रह्मलोकेमहीयते॥
६०॥धौतपापंततोगच्छेत्धौतंयत्रवृषेणतु॥नर्मदायांस्थितोराजन्सर्वपातकनाशनं॥६१॥तत्रतीर्थेनरः
स्नात्वाब्रह्महत्यांव्यपोहति॥तस्मिंस्तीर्थेतुराजेंद्रप्राणत्यागंकरोतियः॥६२॥चतुर्भुजस्त्रिनेत्रस्तुरुद्रतुल्यो
बलोभवेत्॥वसेत्कल्पायुतंसाग्रंशिवतुल्यपराक्रमः॥६३॥कालेनमहताप्राप्तःपृथिव्यामेकराट्भवेत्॥
ततोगच्छेतराजेंद्रएरंडीतीर्थमुत्तमं॥६४॥प्रयागेयत्फलंदृष्टंमार्कंडेननराधिप॥मासिनाभ्रपदेचैवशुक्ल
पक्षस्यचाष्टमी॥६५॥उपोष्यरजनीमेकांतस्मिन्स्नानंसमाचरेत्॥यमदूतैर्नबध्येतइंद्रलोकंसगच्छति॥६६
ततोगच्छेतराजेंद्रसिद्धोयत्रजनार्दनः॥हिरण्यद्वीपविख्यातंसर्वपापप्रणाशनं॥६७॥तत्रस्नात्वानरोराजन्
धनरूपवान्भवेत्॥ततोगच्छेतराजेंद्रतीर्थंकनखलंभवेत्॥६८॥गरुडेनतपस्तप्तंतस्मिंस्तीर्थेनराधिप॥
प्रख्यातंत्रिषुलोकेषुयोगिनीयत्रतिष्ठति॥६९॥क्रीडतेव्रतिभिःसार्द्धंशिवेनसहनृत्यति॥तत्रस्नात्वानरो
राजन्इंद्रलोकेमहीयते॥७०॥ततोगच्छेतराजेंद्रहंसतीर्थमनुत्तमं॥हंसस्तत्रविनिर्मुक्तोगतऊर्द्ध्वंनसंशयः
७१॥ततोगच्छेतराजेंद्रप्रसिद्धोयत्रजनार्दनं॥वाराहरूपमास्थायअर्चितःपरमेश्वरः॥७२॥वाराहतीर्थेयः
स्नात्वाद्वादश्यांतुविशेषतः॥विष्णुलोकमवाप्नोतिनरकंचनपश्यति॥७३॥ततोगच्छेतराजेंद्रसोमतीर्थ

न०पु० ३४७ मनुत्तमं ॥ पौर्णमास्यां विशेषेण स्नानं तत्र समाचरेत् ॥ ७४ ॥ स्नानमात्रो नरस्तत्र चंद्रलोके महीयते । नक्षितो न
तु कारेण कस्मात् तीर्थे तु विश्रुतं ॥ ७५ ॥ शुक्लपक्षे तृतीयायां स्नानं तत्र समाचरेत् ॥ प्रणिपत्य तथेशानं बलीराजा प्र
सीदति ॥ ७६ ॥ हरिश्चंद्रपुरं दिव्यं अंतरिक्षे तु दृश्यते ॥ शक्रध्वजे समावृत्ते सुप्ते नागरिके जने ॥ ७७ ॥ नर्मदातोय
वेगेन तत्सर्वं ज्ञायते दृश्यति ॥ अस्मिन् स्थाने विनाशः स्यादिति सुःसंकरमब्रवीत् ॥ ७८ ॥ दीपेश्वरे नरः स्नात्वा ल
भेत् बहुसुवर्णकं ॥ ततो गच्छेत राजेंद्र रुद्रकन्यासुसंगमः ॥ ७९ ॥ स्नानमात्रो नरस्तत्र देव्याः स्थानमवाप्नु
यात् ॥ देवतीर्थे ततो गच्छेत् सर्वकोटिगुणं भवेत् ॥ ८० ॥ अपरपक्षे मावास्यायां स्नानं तत्र समाचरेत् ॥
ब्राह्मणं भोजयेदेकं कोटिर्भवति भोजिताः ॥ ८१ ॥ नर्मदातीर्थे तु राजेंद्र तीर्थकोटिव्यवस्थिता ॥ अकामो वास
कामो वा तत्र स्नायाच्च मानवः ॥ ८२ ॥ अश्वमेधमवाप्नोति देवैः सह मोदते ॥ तत्र सिद्धिं परां प्राप्तो भृगुस्तमु
निपुंगवः ॥ ८३ ॥ अवतारः कृतस्तत्र शंकरेण महात्मना ॥ ८४ ॥ इति नर्मदामाहात्म्ये ॥ श्रीमार्कंडेय उ० ॥
ततो गच्छेत राजेंद्र अंकेश्वरमनुत्तमं ॥ दर्शनान्मुच्यते सर्वपातकैः ॥ १ ॥ ततो गच्छेत राजेंद्र नर्मदेश्वरमु
त्तमं ॥ तत्र स्नात्वा नरो राजन् स्वर्गलोके महीयते ॥ २ ॥ अश्वितीर्थं ततो गच्छेत् स्नानं तत्र समाचरेत् ॥ सुभगो राम ३४७
दर्शनीयश्च भोगवान् जायते नरः ॥ ३ ॥ पितामहं ततो गच्छेत् ब्रह्मणा निर्मितं पुरा ॥ तत्र स्नात्वा नरो भक्त्या पितृपि

डेनु मदापयेत् ॥ ४ ॥ तस्मिन् तीर्थप्रभावेन सर्वं भवति चाक्षयं ॥ सावित्रीतीर्थमासाद्य यस्तु स्नानं समाचरेत् ॥ ५ ॥ विधू
य सर्वपापानि स ब्रह्मलोके महीयते ॥ मनोहरं तु तत्रैव तीर्थं परमशोभनं ॥ ६ ॥ नरः स्नात्वा नरो राजन् पितृलो
के महीयते ॥ ततो गच्छेत राजेंद्र मानसं तीर्थमुत्तमं ॥ ७ ॥ विख्यातं विष्णुलोके तु सर्वपापप्रणाशनं ॥ पानीयान्
प्राप्यते कामान् पशुपुत्रधनानि च ॥ ८ ॥ प्राप्नुयात् तानि सर्वाणि तत्र स्नात्वा नराधिप ॥ ततो गच्छेत राजेंद्र अश्वि
नातेयतिसत्तमं ॥ ९ ॥ यत्र ता कृषिकन्यास्तु तपस्तप्यंति सुव्रताः ॥ भर्ता भवतु सर्वासां ईश्वरः प्रभुरव्ययः ॥ १० ॥
प्रीतस्तासां महादेवो डिंडीरूपधरो हरः ॥ विकृतानन वभस्तु स तत्तीर्थमुपागतः ॥ ११ ॥ तत्र कन्या महाराज
वस्थेत्य रमेश्वरः ॥ अस्माकं देवदेवस्य कन्यादानं प्रदीयतां ॥ १२ ॥ तीर्थं तत्र नरो राजन् दशकन्येति विश्रुतं ॥
तत्र स्नात्वा चयिद्देवं सर्वपापात्प्रमुच्यते ॥ १३ ॥ ततो गच्छेत राजेंद्र स्वर्गापिंडमषिखितं ॥ तत्र स्नात्वा नरो रा
जन् दुर्गतिं न च पश्यति ॥ १४ ॥ अप्सरोत्सं ततो गच्छेत् स्नानं तत्र समाचरेत् ॥ क्रीडते नागलोकस्थो सरोभि
सह मोदते ॥ १५ ॥ ततो गच्छेत राजेंद्र नरकं तीर्थमुत्तमं ॥ तत्र स्नात्वा चयिद्देवं नरकं न च गच्छति ॥ १६ ॥ भूरन्
तिं ततो गच्छेत् उपवासपरायण ॥ एतत्तीर्थं समासाद्य अवतारं न संभवे ॥ १७ ॥ अर्चयित्वा विरूपाक्षं रुद्र
लोके महीयते ॥ अस्मिंस्तीर्थे नरः स्नात्वा भारभूते महात्मनः ॥ १८ ॥ यत्र तत्र मृतस्यापि ध्रुवं गाणेश्वरी गतिः ॥

कार्त्तिकस्य तु मासस्य अर्चयित्वा महेश्वरं ॥१९॥ अश्वमेधाद्दशगुणं प्रवदंति मनीषिणः ॥ दीपकानां शतं
तत्र घृतपूर्णं निरूपयेत् ॥२०॥ विमानैः सूर्यसंकाशैर्व्रजते यत्र शंकरः ॥ वृषभं यः प्रयच्छेत शंखकुंदेंदुसं
निभं ॥२१॥ वृषयुक्तेन यानेन रुद्रलोकं स गच्छति ॥ चरुमेकं ततो दद्यात्तस्मिंस्तीर्थे नराधिप ॥२२॥ पाय
सं मधुसंयुक्तं भक्ष्याणि विविधानि च ॥ यथाशक्त्या तु राजेंद्र रुद्रलोकं स गच्छति ॥२३॥ चरुमेकं ततो दद्यात्त
स्मिंस्तीर्थे नराधिप ॥ पायसं मधुसंयुक्तं भक्ष्याणि विविधानि च ॥२४॥ यथाशक्त्या तु राजेंद्र भोजयेत्स द्विदक्षि
णां ॥ तस्य तीर्थप्रभावेन सर्वं कोटिगुणं भवेत् ॥२५॥ नर्मदायां जलं पीत्वा समभ्यर्च्य वृषध्वजं ॥ दुर्गतिं न च
पश्यंति तस्य तीर्थप्रभावतः ॥२६॥ एतत्तीर्थं समासाद्य यस्तु प्राणान्परित्यजेत् ॥ सर्वपापविशुद्धात्मा व्रजते
यत्र शंकरः ॥२७॥ जलप्रवेशं यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ हंसयुक्तेन यानेन रुद्रलोकं स गच्छति ॥२८
यावच्चंद्रश्च सूर्यश्च हिमवांश्च महोदधिः ॥ गंगाद्याः सरितो यावत्तावत्स्वर्गे महीयते ॥२९॥ अनशनं यः कुर्या

वं

त्तु तस्मिंस्तीर्थे नराधिप ॥ गर्भवासे तु राजेंद्र न पुनर्जायते नरः ॥३०॥ ततो गच्छेत राजेंद्र बदरीतीर्थमुत्तमं ॥ तत्र
स्नात्वा नरो राजन्निंद्रस्यार्द्धासनं लभेत् ॥३१॥ शृंगतीर्थं ततो गच्छेत्सर्वपापप्रणाशनं ॥ तत्र स्नानमात्र
स्य ध्रुवं गाणेश्वरी गतिः ॥३२॥ एरंडीनर्मदायाश्च संगमं लोकविश्रुतं ॥ तच्च तीर्थं महापुण्यं सर्वपापप्रणाश

नं ॥३३॥ उपवासपरो भूत्वा नित्यं व्रतपरायणः ॥ तत्र स्नात्वा नरो राजन्मुच्यते ब्रह्महत्यया ॥३४॥ ततो गच्छेत
राजेंद्र नर्मदोदधिसंगमे ॥ जामदग्न्य इति ख्यातः सिद्धो यत्र जनार्दनः ॥३५॥ तत्र स्नात्वा नरो राजन्पर्वतोदधि
संगमे ॥ त्रिगुणं चाश्वमेधस्य फलं प्राप्नोति मानवः ॥३६॥ पश्चिमोदधिसंवेद्यं स्वर्गद्वारकपाटनं ॥ तत्र देवाः स
गंधर्वाः ऋषयः सिद्धचारणाः ॥३७॥ आराधयंति देवेशं त्रिसंध्यं विमलेश्वरं ॥ तत्र स्नात्वा नरो राजन्रुद्रलो
के महीयते ॥३८॥ विमलेश्वरात्परं तीर्थं न भूतं न भविष्यति ॥ तत्रोपवासं कृत्वा ये पश्यंति विमलेश्वरं ॥३९॥
सप्तजन्मकृतं पापं हित्वा यांति शिवालयं ॥ ततो गच्छेत राजेंद्र कपिलातीर्थमुत्तमं ॥४०॥ तत्र स्नात्वा तु राजें
द्र उपवासपरायणः ॥ उपोष्य रजनीमेकां नियतो नियताशनः ॥४१॥ तीर्थस्यास्य प्रभावेन मुच्यते ब्रह्महत्य
या ॥ सर्वतीर्थाभिषेकं च यः पश्येत्सागरेश्वरं ॥४२॥ योजनाभ्यंतरे तिष्ठेदावर्ते संस्थितं शिवं ॥ तं दृष्ट्वा स
र्वतीर्थानि दृष्टानि तु न संशयः ॥४३॥ सर्वपापविनिर्मुक्तो यत्र रुद्रः स गच्छति ॥ नर्मदासंगमं यावद्या
वच्चामरकंटकं ॥४४॥ तत्रांतरे महाराज तीर्थकोट्यो दशस्मृताः ॥ तीर्थात्तीर्थांतरे तत्र ऋषिकोटिभिरन्विते ॥
४५॥ साग्निहोत्राश्च विद्वांसः सर्वध्यानपरायणाः ॥ सेवंते नर्मदां राजन्नीप्सितार्थप्रदायिनीं ॥४६॥
अस्त्विदं पठते नित्यं शृणुयाद्वापि भावितः ॥ तस्य तीर्थानि सर्वाणि अभिषिंचंति पांडव ॥४७॥ नर्मदा च स

दप्रीतानवेतत्स्यनसंशयः॥तस्मप्रीतोनवेकुशोमार्कंडेयोमहामुनिः॥४८॥वृंधाच्चलभतेपुत्रंदुर्ग
गाम्नुतगाजवेत्॥नत्तारिंजनतेकन्यायम्न्वयगच्छेतिफलं॥४९॥तदेवलभतेसर्वनात्रकार्याविचारणा॥
ब्राह्मणोवेदमाप्नोतिक्षत्रियोपिजयेन्महीं॥५०॥वैश्यस्तुलभतेलाभंशूद्रःप्राप्नोतिसद्गतिं॥सूर्यवंस्तुल
भतेविद्यांत्रिसंध्यंयःपठेन्नरः॥५१॥नरकंतुनपश्येतवियोनिंनैवगच्छति॥५२॥॥इतिश्रीमत्स्यपुराणेन
र्मदामाहात्म्यंसंपूर्णं॥॥सूतउवाच॥॥इत्याकर्ण्यपुराजेंद्रउकारस्याभिवर्त्तनिं॥ततःपप्रच्छदेवे
शंब्रह्मरूपंजनार्दनं॥१॥मनुरुवाच॥॥ऋषीणांनामगोत्राणिवंशावतरणंतथा॥प्रवराणांतथा
सम्यकमाहात्म्यविस्तराद्वद॥२॥महर्षयःसप्तदितितदास्वायंभुवेंतरे॥तेषांवैवस्वतेप्राप्तेसंभवंम
मकीर्त्तय॥३॥दाक्षायणीनांचतथाप्रजाःकीर्त्तयमेविभो॥ऋषीणांचतथावंशान्भृगुवंशविवर्द्धना
न्॥४॥॥मत्स्यउवाच॥॥मन्वंतरेस्मिन्संप्राप्तेसप्तवैवस्वतेपुरा॥अश्वमेधेतुविततेब्रह्मणःपरमे
ष्ठिनः॥५॥महादेवःसशापेनत्यक्त्वादेहान्स्वयंततः॥ऋषयश्चसमुद्भूताःकृतेशक्रेयदृच्छया॥६
देवानांमातरोहृष्टादेवपत्न्यस्तथैवच॥स्कंन्नंशुक्रंमहाराजब्रह्मणःपरमेष्ठिनः॥७॥ततोब्रह्माततो
जातोहुताशनः॥ततोर्जातोमहातेजाभृगुःसतपसांनिधिः॥अंगारेष्वंगिराजातःसोर्चिभ्योत्रिस्तथैव

वच॥मरीचिभ्योमरीचिश्चततोजातोमहातपाः॥९॥केशैस्तुकपिशोजातःपुलस्त्यश्चमहाऋषिः॥केशैः
प्रवालैःपुलहजाततोजातोमहायशाः॥१०॥वसुसंध्यासमुत्पन्नोवसिष्ठश्चतपोधनः॥भृगुपुलोम्न्यश्चसुतांदि
व्यांनार्यांसविंदत॥११॥यस्यतस्यसुताज्ञातादेवाद्वादशयाज्ञिकाः॥भवंतोभाविनश्चैवसुजनःसुजनस्तथा॥१२
क्रतुःश्रुचिश्चमूर्धाचियाजश्चवसुधश्चह॥प्रभवश्चाव्ययश्चैवपक्षोदादमकस्तथा॥१३॥इत्येतेभृगवोदेवाना
मपादशकीर्त्तिताः॥पुलस्त्योजनयद्विप्रदेवानांचकनीयसां॥१४॥च्यवनंचमहाभागआत्मधानमथाप्नवै॥
आत्मधानात्मजश्चौर्वोजमदग्निस्तथात्मजः॥१५॥और्वगोत्रकरास्तस्यभार्गवाणांमहात्मनां॥तत्रगोत्रवरा
न्वक्ष्येभृगोर्वंदीप्ततेजसः॥१६॥भृगुश्चच्यवनश्चैवआत्मधानस्तथैवच॥और्वश्चजमदग्निश्चवत्सोदीक्षिपि
तिहायनिः॥१७॥वैगायतोचेतिहत्यःपैलश्चैकतशांतिकाः॥शौनकायनजीवंतिकावेदःपार्थकृत्स्तथा॥१८॥
वेदिनरिविरूपाक्षोआदित्यायानिरेवच॥वैश्वानरश्चपालीतुनस्मिवर्षिविकश्चह॥१९॥विष्णुपौरेयवाल्मी
रोलिकानंतभोगिनः॥मृत्यास्तथामार्कंडेजोहीनोवीतिनस्तथा॥२०॥मंडमांडव्यमांडूकःफेनपास्तुरपि
स्तथा॥स्थलपिंडिसुखावृक्षःपंक्तःसाक्षिस्तथैवच॥२१॥माकयिनोदेवतिःपांडरोमिःसगालवः॥संकृत्य
श्चातकिकायिपात्तोयजासिनाभिनः॥२२॥गर्गायनोभ्रायनश्चऋषिर्मोहायनिस्तथा॥गोशपनोवैशंपायन

एवच॥२३॥वैकर्णेयिस्यक्षरिवोयात्तो बभ्रुष्टकायनिः॥ललाटिल्विकिश्चैवलाक्षिण्योपरिमंडलः॥२४॥जलाणि
त्सोयकिः कौत्सस्तथा खेपिंगलायनिः॥सत्यायनिर्मलायानिः कौटिलः कोविहस्तिकः॥२५॥सौसः सौक्रि
कसावाक्षिः कंसिश्चाऽश्मसितस्तथा॥नैकजिह्नो नराकेशवधाप्याजोकवैरिणः॥२६॥सारहृतिक्रूरैः शि
ष्टेलाप्यक्षिश्चकुलकुंडल॥चारायनिश्चारुमतिपौष्णिमागतिकासकृत॥२७॥यमस्यातितथैतेषां पंच
मः प्रवरोमतः॥भृगुश्च्यवनश्चैवआप्नुवायनएवच॥२८॥और्वश्चजमदग्निश्च पंचैतेप्रवरामताः॥पर
स्परमवैवाह्याऋषयः परिकीर्तिताः॥२९॥प्रवरानामवैवाह्याऋषिभिः परिकीर्तिताः॥वाह्यानाह्येतपाना
ह्यारोपास्त्रिप्रवरास्त्रिषु॥३०॥भृगुश्चजमदग्निश्च तथैवौर्ध्वश्चपार्थिवः॥अतः परं प्रवक्ष्यामि शृणुध्वम्
नृपयगत्महान्॥३१॥जमदग्निर्भृगुश्चैववपुलस्त्यो वैजभृतपा॥ऋषिश्चासजडातश्चएकायनिवरा
यनिः॥३२॥आर्षेयोमास्त्वतश्चैषांसर्वेषांप्रवरः श्रुतः॥भृगुश्चच्यवनश्चैवआप्नवानश्चतथैवच॥३३॥प
रस्परमविवाह्याऋषयः परिकीर्तिताः॥भृग्वादयो मार्गपयो ग्रामापनवटायनिः॥३४॥आपस्तंबस्त राम
याम्नद्विनैकशाकंविरेवच॥आर्ष्टिषेणोदिंदुनिश्च कर्दमायनिरेवच॥३५॥आश्वायनश्चैनिरयानभूमिः ३५०
पंचार्षेयाः प्रकीर्तिताः॥भृगुश्चच्यवनश्चैवआत्मधानस्तथैवच॥३६॥आर्ष्टिषेणस्तथाभूषिः प्रवराः

पंचकीर्तिताः॥परस्परमवैवाह्याऋषिभिः परिकीर्तितः॥३७॥यस्कोवोदावीतहव्यौमांडधश्चंडमोदनः॥
जीवंत्सायनिमौञ्ज्यश्चपिलिश्चैववृत्तिलिस्तथा॥३८॥नागजिनागिविश्चकौसाविस्तुम्बकास्यपिः॥चाजेयिः
समदाङ्गोषिः स्तथापौर्णायनिऋषिः॥३९॥रासोदश्चतथातेषांआर्षेयोप्रवरोमतः॥गार्गेयश्चसपां
चालिः सौरक्षतस्तथैवच॥४०॥भृगुश्चवीतहव्यश्चतथावेवृसदैवसः॥परस्परमवैवाह्याऋषयः परि
कीर्तिताः॥४१॥शाकायनोयज्ञपतिः खलायनिः शाकटाक्षोमेः॥मैत्रेयः शांकयस्तथा॥४२॥जेताये
नोरौक्षायनिआपिष्टश्चाष्टकायनिः॥रंगजिद्दस्तथैवैषां ऋषिः प्रवरकोमतः॥४३॥भृगुश्चैवाधवध्यश्चो
दिवोदासस्तथैवच॥आर्ष्टिषेणस्तथाभूपपंचप्रवराः कीर्तिताः॥४४॥परस्परमवैवाह्याऋषयपरि
कीर्तिताः॥शाक्रायनोयज्ञपतिमत्स्यगंधः प्रकीर्तितः॥४५॥प्रत्यूहश्चतथाश्रोन्याश्चाक्षिवानकर्दमाय
निः॥तथागृत्समदोराजनूसनकश्चमहानृषिः॥४६॥प्रवरास्तुतथोक्तानाह्यार्षेयाः परिकीर्तिताः॥भृगुर्गृत्स
मदश्चैवक्रानेतौ परिकीर्तितौ॥४७॥परस्परमवैवाह्या इत्येते परिकीर्तिताः॥एतेतवोक्ता भृगवेराजा
ताम्महानुभावानृपगोत्रकाराः॥येषांतुनाम्नापरिकीर्तितेनपापंसमग्रंविजहातिजंतुः॥४८॥॥इतिश्री
मत्स्यपुराणेप्रवरानुकीर्तनोनाम॥सूतउवाच॥मरीचिनोमहाभागस्तुरूपानामवैश्रुताः॥मार्या

म॰पु॰
३५१

चांगिरसादेवितस्याःपुत्रादशस्मृताः॥१॥आत्मात्यायननोदक्षोमहाप्राणस्तथैवच॥हविष्मांश्चवसिष्ठश्चऋतंसत्यंच
तेदश॥२॥एतेचांगिरसोनामदेवावैसोमपायिनः॥सरूपाजनयामासऋषिःसर्वेश्वरानिमान्॥३॥बृहस्प
तिंगौतमंचसंवर्त्तंचमहाऋषिं॥उतथ्यंवामदेवंचअयस्यमुशिजंस्तथा॥४॥इत्येतेऋषयःसर्वेगोत्रकाराः
प्रकीर्त्तिताः॥तेषांगोत्रेसमुत्पन्नान्गोत्रकारान्निबोधमे॥५॥उतथ्योगौतमश्चैवतौलेयोभिजितस्तथा॥रो
हिण्यायनिरेवात्रिमल्लयोपांडुरेवच॥६॥क्षिपाविश्वकुवेरश्चगोकिर्नोगिःसगोजाषिःक्षीरकोटिरेवच॥रा
ढ्रुकर्णिःसौधुरिश्चवोरातिःसारलोमकिः॥७॥पौष्पचिश्रागनावारिऋषिःखांडिकृपएवच॥काराटकिःसपाणेयो
उपविंदुःसुरैषिणः॥८॥रोहिणीयानवैशालकोष्टावैवारुणिस्तथा॥सोमोत्रायनिकासोरुःकौसील्याःपार्थि
वास्तथा॥९॥मातिश्वतृणकर्णिश्चप्रवाहिश्चपलायनिः॥वारोहिश्छर्दिसादीश्चशिरवायीविस्तथैवच॥१०॥
काचापिश्चमहाकापितथाचान्वोपडुपतिःप्रजुः॥काचक्रेधुरितश्चैववपुष्मान्ऋषिस्तथैवच॥११॥प्राण्वेयिःसात्य
मुग्रश्चतथागोमदगंधिका॥मत्स्याकाथोमलहरोफलाहारस्तथैवच॥१२॥गार्गेदयिःकौतपतिकौरक्षेत्रिस्त
थैवच॥नायकोजन्यद्रोणिश्चश्चैजलायनिरेवच॥१३॥आर्षेयोमरुतश्चैवसर्वेषांप्रवरोत्तमः॥अंगिराःप्रथम
स्तेषांद्वितीयश्चबृहस्पतिः॥१४॥तृतीयश्चभरद्वाजःप्रवराःपरिकीर्त्तिताः॥परस्परमवैवाह्याइत्येतेपरिकी

राम॰
३५१

र्त्तिताः॥१५॥कणायकाःकैपवेयास्तथामत्स्यानरायणाः॥त्राष्टसतत्राष्टपिंडीचलेमानिःसालकायनिः॥१६॥
क्रोधेष्टाक्षीवकृधीता-चतालाकृत्स्याधुवाहनाः॥नारडालामकफालाविश्वायामकटिस्तथा॥१७॥पौत्रका
यनिस्कंदसश्चतथाचक्रीपरोऋषिः॥एतेमयासमाख्याताःगार्ग्याःसमयस्तथा॥१८॥वलाकिःसहरिश्चैवप
चार्षेयाःप्रकीर्त्तिताः॥फकृषतिरिश्चैवतथादक्षःशाक्रिपतंजलिः॥१९॥भूयसीजलसंधिश्चविंदुसाहिःकुशीद
जिः॥ततस्तुराजकेशीचधौंवाधिःसांसपिस्तथा॥२०॥मालिश्चकस्मीमालिश्चकंवोरुपाकरीतथा॥कावेवाल्प
यनिश्चैवमाचास्मायनिरेवच॥आर्षेयाम्मुनयश्चैवप्रवराभूमिपोत्तम॥अंगिरावमवाह्यश्चतथैवादिऋ
क्षयः॥२१॥परस्परमवैवाह्याःसर्वएवप्रकीर्त्तिताः॥गालवश्चअनेहिश्चसर्वेषांप्रवरोमतः॥२२॥अंगिरोत्रि
रवैवाह्याएवमाऊःपुरातनाः॥रथीतराणांप्रवराआर्षेयाःपरिकीर्त्तिताः॥२४॥अंगिराश्चरथीतरौवित्रप
श्चतथैवच॥यथेतराश्रविवाह्यानित्यमेवरथीतरैः॥२५॥विष्णुवृद्धिःशिवेमप्रिजत्तृणःकर्मिणिस्तथा॥अत्र
यश्चमहातेजास्तथा॥अत्रयश्चमहातेजास्तथावैरपरायणाः॥२६॥पार्षेयाहिमतस्तेषांसर्वेषांप्रवराःश्रुताः
अंगिराश्चविरूपश्चवृषश्चैवतथैवच॥२७॥परस्परमवैवाह्याऋषयःपरिकीर्त्तिताः॥आपांडुश्चगरुश्चै
वतृतीयःशाकटायनः॥२८॥ततःप्रगाथामानारीमर्कटःशारतःशिवाः॥आर्षेयोहिमतश्चैषांसर्वेषांप्रवरः

स्तुमगा॥२९॥ अंगिराश्चैव वाशिष्ठोमुद्गलश्च महातपाः॥ कंकटः कंकटाश्चैव तथा नारायणो गुरुः॥३०॥ श्चैरपा
मायनस्तथा देवआर्षेयः प्रवरो मतः॥ अंगिराश्चाजमीढाश्च कंवश्चैव महातपाः॥३१॥ परस्परमवैवात्याक्रु
षयः परिकीर्त्तिताः॥ तित्तिरः कपिभूश्चैव गार्ग्यश्चैव महानृषिः॥३२॥ आर्षेयोऽहिमश्चैते तेषां पंचार्षेयाः
प्रकीर्त्तिता॥ अंगिराः सतरद्वाजस्तथैव सबृहस्पतिः॥३३॥ ऋषिमित्रवरश्चैव ऋषिमनिवस्तथा॥ परस्प
रमवैवात्याक्रुषयः परिकीर्त्तिता॥३४॥ नरद्वजाः कगासो ऋासैनिरयस्तथैव च॥ इत्येते कथिताः सर्वेश्चा
मुष्प्यायणगोत्रजाः॥३५॥ पंचार्षेयास्तु राजेषां प्रवराः परिकीर्त्तिताः॥ एते तवोक्ता अंगिरसस्तु वंशा महानुभावा
ऋषिगोत्रकाराः॥ येषां तु नाम्ना परिकीर्त्तितेन पापं समग्रं पुरुषो जहाति॥३६॥ इति श्रीमत्स्यपुराणे आंगि
रसकीर्त्तनो नामाध्यायः॥ ॥ मत्स्य उवाच॥॥ अत्रिवंशसमुत्पन्नान् गोत्रकारान्निबोध मे॥ कर्दमायनशाखेवा
तमासारायणश्चये॥१॥ उद्दालकी सौनकर्णिरथ्यवीतो कनुवतश्चये॥ गौरग्रीवीरकोजितस्तथा वैनायनाश्चये
२॥ अस्मरणा वसेरापेयोगोपनास्त्रिकिर्वेदयः॥ कुरजिह्वाऊरमीतिवनेभ्रातिः सकायनः॥३॥ वैलपश्च सवैल
धात्रेयोनीपिनस्तथा॥ जलदो सवपादस्थ सौपुष्टिश्च महातपाः॥४॥ छंदोगेयस्तथैते षां आर्षेयः प्रवरो मतः॥
सावस्तंवस्तथा त्रिष्टुन्निवरानामग्रावन्च॥५॥ परस्परमवैवात्या ऋषयः परिकीर्त्तिता॥ दक्षिवल्लिः पाइपश्च अस्मि

नाभिः सलिंदभिः॥६॥ बीजवापिशिरीषश्च गौंडकेयोगविष्टिरः॥ कलंदनस्तथैते षां आर्षेयः प्रवरो मतः॥७॥
श्चत्रिवसिष्टश्चैव तथा पूर्वतिथिः स्मृतः॥ परस्परमवैवात्या ऋषयः परिकीर्त्तिताः॥८॥ एते त्रिवंशप्रभवास्त
यो क्ता महानुभावान् पगोत्रकाराः॥ येषां तु नाम्ना परिकीर्त्तितेन पापं समग्रं पुरुषो जहाति॥९॥॥ इति श्री
मत्स्यपुराणे प्रवरानुकीर्त्तनो नाम॥ ॥ मत्स्य उवाच॥॥ अत्रेः सोमः सुतः श्रीमांस्तस्य वंशोद्भवो नृपः॥१॥
विश्वामित्रस्तु तपसा ब्राह्मण्यं समवाप्तवान्॥ तस्य वंशं वक्ष्ये तन्मे निगदतः शृणु॥२॥ विश्वामित्राद् देवरा
तस्तथात्येकतिवालय॥ वतंडश्च मलकीस्मोऽअहंवाश्च यतापनाः॥३॥ श्यामायनायाज्ञवल्क्याजाबा
लाः सैंधवायनाः॥ बाभ्रवाश्च करीषाश्च संसुत्सः प्रथमः स्मृताः॥४॥ उद्घ्रपा औषगद्र्या पादपन
यावृत॥ खरपा वहलया माविंतबासकोशल्या॥५॥ आर्षेयाः प्रवरास्तेषां सर्वेषां परिकीर्त्तिताः॥ विश्वा
मित्रोदेवरात उद्दालश्च महायशाः॥६॥ परस्परमवैवात्या ऋषयः परिकीर्त्तिताः॥ देवश्रावसजायेतु
सोसुकाः कासुकायनाः॥७॥ तथा वैदेहजाता ये कुशिकाश्च नराधिप॥ आर्षेयाश्च मतास्तेषां सर्वेषां प्र
वराः शुभाः॥८॥ देवस्रवा देवरात विश्वामित्रस्तथैव च॥ परस्परमवैवात्या ऋषयः परिकीर्त्तिता॥९॥ पर
जयः कर्षधमपि रिकरश्च पार्थिव॥ मानगिनिश्च आर्षेयाः सर्वे चैव प्रकीर्त्तिताः॥१०॥ विश्वामित्रो मधुछं

दालयाश्चैवाघमर्षणाः॥ विश्वामित्रः पूरनश्च तथा विप्रवरोस्मृतौ॥११॥ परस्परमवैवाह्या ऋषयः परिकी
र्त्तिताः॥ कवषाय जिनश्चैव स्वस्परयस्तथैव च॥१२॥ चंचलिश्चैव याज्ञेयः सर्वेषां प्रवरो मतः॥ विश्वामित्र
श्चाप्सरयोवञ्जुलिश्च महातपाः॥१३॥ परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः॥ परिधावमवैवाह्या पूर
णश्च परस्परं॥१४॥ उदरेणः क्रूरकश्च ऋषिश्चोदाहरिस्तथा॥ आर्षेयो विमतश्चैव सर्वेषां प्रवरः स्मृतः॥
१५॥ ऋषणवाचगतिश्चैव विश्वामित्रस्तथैव च॥ परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः॥१६॥ उप
दुश्च सैविरिटिः ऋषिस्ताक्ष्यायणिस्तथा॥ निकायनिःऋषिश्चैव ऋषिस्ताक्ष्यायणिस्तथा॥१७॥ कात्यायनिः
करीराशी सालंकायनिस्तावकिः॥ कौंजायतिश्च भगवाना र्षेयाः परिकीर्त्तिताः॥१८॥ खलिखिलिस्तथा
विद्वविश्वामित्रस्तथैव च॥ परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः॥१९॥ एते तवोक्ताः कुशिकानरेमहा
नुभावाः सततं द्विजेन्द्राः॥ येषांतु नाम्ना परिकीर्त्तितेन पापं समग्रं पुरुषो जहाति॥२०॥ ॥इति श्रीमत्स्य
पुराणे प्रवरानुकीर्त्तने विश्वामित्रवंशो नाम॥ ॥मत्स्य उवाच॥ ॥मरीचेः कश्यपः पुत्रः कश्यपस्य
तपाकुले॥ गोत्रकारानृषीन्वक्ष्ये तेषां नामानि मे शृणु॥१॥ आश्रायणिः ऋषिगणा मेषकीटकरायणः
उदग्रमाजाररश्च भजानिरयलक्ष्मणः॥२॥ माहलेयाः केनिद्याः कन्याकश्चासुरायनाः॥ मंदाकिन्यावेन्द्र

गयाः श्रुतयो नीरूपायनाः॥३॥ देवयाना गोपयानान्धबोछायानयाश्चये॥ कात्यायनाः शाक्रयना महियोग
मदायनाः॥४॥ हानवंदिमहावक्रिर्हरक्षायायनिरेव च॥ योधायनो काश्चयनेरयादासस्तथैव च॥५॥ वात्स्य
वालिनिकन्नाश्च तथा पाऋषणाश्चैव मौलिरामनावातायनिस्तथा॥६॥ कालेनकाश्चवाराग्निरग्निशर्माय
नश्चये॥ सेसयाकैकवालश्चातथाचैवस्तुतश्रयाः॥७॥ प्रावेपोज्ञानतेयश्च अग्निधूमस्तथैव च॥ यासोद
रायेविषयस्तथा पेषावलायनाः॥८॥ काश्यह रीतमारीचलोजिहायनहस्तिकाः॥ वैकर्णेयाः कस्यपाश्च
सिताजारितापमाः॥९॥ मातंगिश्चमोचरथ आर्षेयाः परिकीर्त्तिताः॥ वत्सहव्यपश्चैव असितुवश्च महातपाः
१०॥ परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः॥ एते सुसंख्यमित्रस्तथैवंशा येम्रकीर्त्तिताः॥११॥ वत्सपश्चैवस
वैहितेमहातपाः॥ परस्परमवैवाह्या गोत्रोक्ताः परिकीर्त्तिताः॥१२॥ अतः परं प्रवक्ष्यामि त्र्यामुष्यायणगो
त्रजान्॥ अनसूयावास्लानायाराजवल्लभाः॥ सैसिरादेवहिश्चैव सैरंध्रीपोपमवाकिः॥१३॥ यामुनिः ऋषि
गश्च क्षितसिश्च तथैव च॥ दिवावष्ठा श्वस्वि स्वेते भक्ताते पाश्च कश्यपाः॥१४॥ आर्षेयश्च तथा वंशाः कीर्त्ति
प्रवराः शुभाः॥ वत्सन्तकश्यपश्चैव वसिष्टश्च महातपाः॥१५॥ परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः॥ सं
पातिश्च वलनाश्चोभौ मध्यजीयः जलं धनः॥१६॥ भुजनेहरपर्यंतः सोष्टमोगर्दभीमुखः॥ हिरण्यबाहुकेर

तोउभौकश्यपमत्रोमितौ॥१७॥कुलहोवृषकंदस्मम गकेतुस्तथोदरः॥निदाघमस्विनेमत्स्योमहाकवज
वांश्चयः॥१८॥इगांहिस्योदानवश्चैवस्तथावैदेवपातनः॥पैप्पलादिश्चवसिष्ठऋषयःपरिकीर्त्तिताः॥
१९॥संपातिस्तेषांसर्वेषांप्रवरःपरिकीर्त्तितः॥असितोदेवलश्चैवकश्यपश्चमहातपाः॥२०॥परस्पर
मवैवाह्याऋषयःपरिकीर्त्तिताः॥ऋषिप्रधानस्यतुकश्यपस्यदाक्षायणीभ्यःसकलंप्रसूतं॥जगत्स
मग्रंमुनिसिंहमुख्यंतन्नेप्रवक्ष्याम्यहमुत्तरेण॥२१॥॥इतिश्रीमत्स्यपुराणेप्रवरानुकीर्त्तनंनाम॥॥म
त्स्यउवाच॥॥वसिष्ठवंशजाजान्विप्रान्निबोधगदतोमम॥एकार्षेयस्तुप्रवरोवसिष्ठानांप्रकीर्त्तितः॥
१॥वसिष्ठाएववासिष्ठेरविवाह्यावसिष्ठजाः॥व्याघ्रपादाऔपगवावैक्लवाःसपुलायनाः॥२॥कपि
त्यजाअघ्रिरोमाआम्नायनःकादारकाः॥गालायनाबोधकिश्चडोकन्याश्चैववात्यकाः॥३॥बालस
व्यपालिसयास्तुघोपाकुरवश्चये॥आपस्थूणाःछान्नवृक्षास्तथाब्रह्मकृतायनाः॥४॥माध्यायनिस्त
लिकरश्चांडालिर्गेहिपिस्तथा॥बालाहतिःस्वसुमताउपाविद्धिस्तथैवच॥५॥नोलिवलिब्रह्मबलोमौ
लिश्चवसएवच॥पांडवोपत्तदत्तश्चएकार्षेयोमहानृषिः॥६॥वसिष्ठएषांप्रवरस्त्ववैवाह्याःपरस्परं॥
शैवलेयोमहाकर्णाकौरव्यःक्रोधनस्तथा॥७॥कपिंजलाबालखिल्याभगवित्तायनाश्चये॥संधानास्तुक

काश्चमथ्यमविशिरावयः॥८॥दातकानवहायापेनगोपपरापास्तथा॥आलेवायनिगाश्चपिपेचक्रोडादरारणाः॥९॥
प्रत्यंचःत्रूंकराश्चापिऊपमन्यवएवच॥सांख्यायनाश्चऋषयोपेतश्चैवदसेरकाः॥१०॥पादपानश्चधाटख्या
स्त्रावयश्चदलेशयः॥मायाब्रह्मवलयपुन्नागारिस्तथैवच॥११॥आर्षेयोमरुतश्चैषांसर्वेषांप्रवरःशुभः॥म
गीनश्चवसिष्ठश्चइंद्रःसमितिरेवच॥१२॥परस्परमवैवाह्याऋषयःपरिकीर्त्तिताः॥आस्तछाद्यफलजास्त्वा
लोहिनकराश्चये॥१३॥सम्मंदानश्चक्षतयःपैप्पल्यादिविवर्द्धकौ॥त्रैश्टंगाःसर्वसौलावाःकुंडिनरोत्तमाः॥१४॥
आर्षेयोमरुतश्चैषांसर्वेषांमरुतःशुभः॥वसिष्ठमित्रावरुणौःकुंडिनश्चमहातपाः॥१५॥दानकायामहावर्या
नागेयाःपरमास्तथा॥उलंबवाचनाश्चापियेचक्रोडादरायणाः॥१६॥परस्परमवैवाह्याऋषयःपरिकी
र्त्तिताः॥शाकवलेविपश्चैवपादपश्चतथैवच॥आत्रेयप्रवरास्तेषांसर्वेषांप्रवरःसदा॥जातकर्णोवसि
ष्ठश्चतथैवविश्वपार्थिव॥१७॥परस्परमवैवाह्याऋषयःपरिकीर्त्तिताः॥वसिष्ठवंशानिवहास्तथैतेऋ
षिप्रधानासततंद्विजेंद्राः॥येषांतुनाम्नापरिकीर्त्तितेनपापंसमग्रंपुरुषोजहाति॥१८॥॥इतिश्रीम
त्स्यपुराणेप्रवरानुकीर्त्तनेवसिष्ठगोत्रवंशानुवर्णनं॥मत्स्यउवाच॥॥वसिष्ठस्तुमहातेजानिमेःपूर्वपु
रोहितः॥बभूवपार्थिवश्रेष्ठयज्ञस्तस्यतुसंस्कृते॥१॥श्रांतात्मापार्थिवश्रेष्ठविशश्रामतदापुरा॥तं

गत्वा पार्थिवश्रेष्ठ निमिर्वचनमब्रवीत् ॥२॥ भगवन् यष्टुमिच्छामि तं मां याजय माचिरं ॥ तमुवाच महातेजाव
सिष्ठः पार्थिवोत्तमं ॥३॥ कंचित्कालं प्रतीक्षस्व तव यज्ञैः सुसंस्कृतैः ॥ भवंतं श्रांतो सिविश्रम्य योजयिष्यामि
ते नृप ॥४॥ एवमुक्तः प्रत्युवाच वसिष्ठं नृपसत्तमः ॥ पारलौकिक कार्येषु कः प्रतीक्षितुमुत्सहे ॥५॥
पूर्वाह्ले चापराजिकं न हि प्रतीक्षते मृत्युः कृतं वा यदि वाकृतं ॥ क्षेत्रापणासमासक्तं अन्यत्रगतमानसं ॥६॥
वृकीवैरणमासाद्य मृत्युरादाय गच्छति ॥ न कश्चित् प्रियवृत्तकस्य ध्येयश्चास्य न विद्यते ॥७॥ आयुष्ये कर्म
णि क्षीणे प्रसह्य हरते जनं ॥ प्राणो वायुश्चलत्वं च वायुर्विदित एव ते ॥८॥ यत्र वाजीव्यते ब्रह्मन् क्षणमा
त्रं तदद्भुतं ॥ सोहं समृतसंनामा नवनम्रत्वमुपागतः ॥९॥ न चेत् याजयसे मत्स्यं अन्यं पास्या नियाजकं ॥
एवमुक्तस्तदा तेन निमिना ब्राह्मणोत्तमः ॥१०॥ शशापते निमिं क्रोधात् विदेहस्त्वं भविष्यसि ॥ श्रांतं मां त्वं
समुत्सृज्य यस्मात् त्वान् द्विजोत्तमान् ॥११॥ धर्मज्ञः सन् नरेंद्र त्वं याजकान्कर्तुमर्हसि ॥ निमिस्तं प्रत्युवाचा
थ धर्मकार्यरतस्य मे ॥१२॥ विघ्नं करोषि सततं याजनं च तथेच्छसि ॥ शापं ददामि तस्मात्त्वं विदेहो द्य भविष्य
सि ॥१३॥ एवमुक्ते तु तौ जातौ विदेहौ द्विजपार्थिवौ ॥ देहहीनो तपोजीवि ब्रह्माणमुपजग्मतुः ॥१४॥ आगतौ
तौ समीक्ष्याथ ब्रह्मा वचनमब्रवीत् ॥ अद्य प्रभृति ते स्थानं निमेजीवद दाम्यहं ॥१५॥ तत्र पक्ष्मसु सर्वेषां मानुष्या

णां भविष्यसि ॥ वसिष्ठेन वते न मतत्रापि च भविष्यति ॥१६॥ जन्मद्वयमतीतं च तत्रापित्वं स्मरिष्यसि ॥ एतस्मिन्
काले तु मित्रश्च वरुणश्च स्तथा ॥१७॥ बदर्याश्रममासाद्य तपस्तेपतुरव्ययो ॥ तपस्यतोस्तयोरेवं कदाचिन्मा
धवे दिने ॥१८॥ पुष्पितद्रुपसंछन्ने शुभे वाति च मारुते ॥ उर्वशी यपि वरारोहा कुर्वती कुसुमोच्चयं ॥१९॥ सुसू
क्ष्मचीरवसना तयोर्दृष्टिपथं गता ॥ तौ दृष्ट्वा सुमुखी सुभ्रू नीलनीरजलोचना ॥२०॥ उभौ चुक्षुभतुर्धैर्यात्तत्
द्रूपपरिमोहितौ ॥ स्कन्नं रेतस्तयोर्दृष्ट्वा सा चभीता परं ॥२१॥ चकार कलशे सुभ्रूस्तयोः पूर्णमनोरमे ॥ तयो
र्ऋषिवरौ जातौ तेजसाप्रतिमौ भुवि ॥२२॥ वसिष्ठश्चाप्यगस्त्यश्च मित्रावरुणयोः सुतौ ॥ वसिष्ठस्तूपयेमेथ भ
गिनीं नारदस्य तु ॥२३॥ अरुंधतीं वरारोहां तस्यां शक्तिमजीजनत् ॥ शक्तेः पराशरः पुत्रस्तस्य वंशं न निबो
ध मे ॥२४॥ यस्य द्वैपायनः पुत्रः स्वयं विष्णुरजायत ॥ प्रकाशो जनितो येन लोके भारतचंद्रमा ॥२५॥ ये
नाज्ञानतमोंधस्य लोकस्योन्मीलनं कृतं ॥ पराशरस्य तस्य त्वं शृणु वंशमनुत्तमं ॥२६॥ शांविष्ठायनवासिं
याश्च पियाकरपाश्च ये ॥ इड्डीकः पंचहस्तश्च एते सर्वे पराशरात् ॥२७॥ वलिघा ताहरिश्चैव स्कंधव्याः क्रो
धमानवाः ॥ क्षोमिरेषां पंच वर्गा चतुरेते गौराः पराशराः ॥२८॥ स्वल्पायनं दयश्चैव नातेयो खल्लुपूतपः ॥ तं
तिरेषां पंचमस्तु एते धूम्राः पराशराः ॥ पराशराणां प्रवरो मतः ॥ पराशरश्च शाक्तिश्च वसिष्ठश्च महातपाः ॥२९

म०पु० परस्परमवैवाह्याः सर्वएतेपराशराः ॥ उक्तास्तेवैतेवंशमुख्याः पराः सूर्यसुतप्रभावाः ॥ येषांतुनाम्नापरिकीर्त्तिते
३५६ नपापंसमग्रंपुरुषोजहाति ॥ ३१ ॥ ॥ इतिश्रीमत्स्यपुराणेपराशरवंशकीर्त्तनोनाम ॥ ॥ मत्स्यउवाच ॥ ॥ अतः
रंअगस्त्यस्यवक्ष्येवंशंभवान्द्विजान् ॥ अगस्त्यश्चकरंभश्चकौशल्याःक्रमटस्तथा ॥ १ ॥ आर्षेयोमारुतस्ते
षांसवेषांप्रवरःशुभः ॥ अगस्त्यश्चमहेन्द्रश्चऋषिश्चैवतपोमुनिः ॥ २ ॥ परस्परमवैवाह्याऋषयःप
रिकीर्त्तिताः ॥ पौर्णमासःपुराणश्चआर्षेयाःपरिकीर्त्तिताः ॥ ३ ॥ अगस्त्यःपौर्णमासश्चपारश्चमहातपाः ॥ पर
स्परमवैवाह्यापौर्णमासास्तुपारणाः ॥ ४ ॥ एवमुक्तमृषीणांतुवंशमुत्तमपौरुषं ॥ अतःपरंप्रवक्ष्यामिकिंत
वानद्यकथ्यते ॥ ५ ॥ मनुरुवाच ॥ ॥ पुलहस्यपुलस्त्यस्यक्रतोश्चैवमहात्मनः ॥ अगस्त्यस्यतथाप्येवंकथंवंशस्त
दुच्यतां ॥ ६ ॥ ॥ मत्स्यउवाच ॥ ॥ क्रतुःखल्वनपत्योभूद्राजादैवस्वतेंतरे ॥ इध्मवाहंसपुत्रत्वेजग्राहऋषिसत्त
मं ॥ ७ ॥ आगस्त्यपुत्राधर्मज्ञाअगस्त्याक्रतवस्ततः ॥ पुलहस्यतस्यथापुत्रास्त्रयश्चपृथिवीपते ॥ ८ ॥ तेषांजन्म
चवक्ष्यामिउत्तरत्रयथाविधि ॥ पुलहस्तुप्रजांदृष्ट्वानातिप्रीतिमनाःस्वकां ॥ ९ ॥ अगस्त्यजंदृढचित्तंपुत्रत्वे राम
कृतवांस्ततः ॥ पौलहाश्चतथाराजन्नगस्त्याःपरिकीर्त्तिताः ॥ १० ॥ पुलस्त्यान्वयसंभूतान्दृष्ट्वाराक्षसपुंगवान्
अगस्त्यःसुपुवेधीमान्पुत्रत्वेकृतवांस्तथा ॥ ११ ॥ पौलस्त्याश्चतथाराजन्नगस्त्याःपरिकीर्त्तिताः ॥ एतेतथो ३५६

क्ताःप्रवराद्विजानांमहानुभावान्पवंशकाराः ॥ येषांतुनाम्नापरिकीर्त्तितेनपापंसमग्रंपुरुषोजहाति ॥ १२ ॥ ॥ इ
तिश्रीमत्स्यपुराणेप्रवरानुकीर्त्तनोनाम ॥ ॥ मत्स्यउवाच ॥ ॥ अस्मिन्नेवस्वतेप्राप्तेशृण्णुधर्मस्यपार्थिव ॥ दाक्षा
यणीभ्यःसकलंवंशंदेवतमुत्तमं ॥ १ ॥ पर्वताश्चमहीदुर्गशरीराणिनराधिप ॥ अरुंधत्याप्रसूतानिधर्मान्वै
वस्वतेंतरे ॥ २ ॥ अष्टौवसवःपुत्राःसोमपावसवस्तथा ॥ ध्रुवोध्वरश्चसोमश्चअपश्चैवानिलोनलः ॥ ३ ॥ प्रत्यूष
श्चप्रभासश्चवसवोष्टौप्रकीर्त्तिताः ॥ वरस्यपुत्रोद्रविणःकालःपुत्रोध्रुवस्यच ॥ ४ ॥ कालश्चवपवानांतुशरीरा
णिनराधिप ॥ मूर्त्तिवर्ज्यकलाविभ्रंप्रसूतीनांविशेषतः ॥ ५ ॥ सोमस्यभगवान्वर्चश्चमस्तापश्चकीर्त्तितः ॥
अनेकजन्मजननकुमारस्यानलस्यतु ॥ ६ ॥ पुरोजवालिनश्चप्रत्यूषश्चतुलःस्मृतः ॥ विश्वकर्माप्रभासस
स्यत्रिदशानांचवार्धुकिः ॥ ७ ॥ यामीबुहिसरःप्रोक्तानागवीथ्यादयोनव ॥ लंबापुत्रःस्मृतोघोषोभानोः
पुत्राःशुभानव ॥ ८ ॥ महापांचैवसर्वेषांअन्येषांचामितौजसां ॥ अरुंधत्यामरुंधत्यंसर्वेपुत्राःप्रकीर्त्तिताः
९ ॥ संकल्पायाश्चसंकल्पास्तथापुत्राःप्रकीर्त्तिताः ॥ मुहूर्त्तास्तुमुहूर्त्तायाःसाध्याःसाध्यसुतामताः ॥ स्याम
नोमनश्चप्राणश्चतथापानश्चवीर्यवान् ॥ वितर्हयोनयश्चैवतथानारायणःसह ॥ ११ ॥ विभुश्चापिप्रभुश्चा
पिसाध्याद्वादशकीर्त्तिताः ॥ क्रतुर्दक्षोवसुःसत्यःकालःकामोतिथिस्तथा ॥ १२ ॥ कुरवांश्चमजोविश्वोरोचनश्चते

दृशा॥ तावदुक्तस्तव धर्मवंशाः संक्षेपतः पार्थिववंशमुख्या॥ व्यासेन वक्तुं नहि शक्तिरस्तिरा॥ १३॥॥ इतिश्रीमत्स्यपुरा
णे धर्मवंशावर्णनं प्रवरानुकीर्त्तनं समाप्तं॥ ॥मत्स्य उवाच॥ ॥एते वंशा भवा विप्राः श्राद्धे भोज्याः प्रयत्नतः॥ पितॄणां च
ह्यमं यस्मात्तेषु श्राद्धं नराधिप॥१॥ अतः परं प्रवक्ष्यामि पितृभिर्याः प्रकीर्त्तिताः॥ गाथाः पार्थिवशार्दूल मवर्षिः पुरेस्व
के॥२॥ अपिस्यात्स कुलेस्माकं यो नो दद्याज्जलांजलिं॥ नदीषु बहुतोयासु विशेषतः॥३॥ अपिस्यात्स कुलेस्माकं हि
ममिश्रं जलांजलिं॥ तिलमाक्षिकसंयुक्तं यो नो दद्यात्समाहितः॥४॥ अपिस्यात्स कुलेस्माकं यः श्राद्धं नित्यमाचरेत्
पयोमूलफलैर्भक्ष्यैस्तिलतोयेन वा पुनः॥५॥ अपिस्यात्स कुलेस्माकं षण्मासेन यः सकृत्॥ श्राद्धं कुर्यात्प्रय
त्नेन कालशाकेन वा पुनः॥६॥ अपिस्यात्स कुलेस्माकं यो नो दद्यात्त्रयोदशीं॥ पायसं मधुसर्पिर्भ्यां वर्षासु मघा
सु च॥७॥ कालशाकं महाशाकं मधुस्यानमेव च॥ विषाणा वर्ज्यं खड्गस्य आसूर्यं चाश्नुमामहे॥८॥ गयायां दृशी
नाराहोरवड्गमांसेन योगवित्॥ भोजयेद्वा कुलेस्माकं छायायां कुंजरस्य च॥९॥ आकल्पकालिकी तृप्तिस्तेना
स्माकं भविष्यति॥ दाता सर्वेषु लोकेषु कामचारो भविष्यति॥१०॥ आब्रह्मस्तंबकांतं नात्र कार्या विचारणा॥ प्रदेत
त्स कुले तस्मात्तृप्ति के नापि च सर्वदा॥११॥ तृप्तिं श्रास्याम चानेयां किं पुनः सर्वमेव हि॥ अपिस्यात्स कुलेस्माकं कश्चि
त्पुरुषसत्तमः॥१२॥ प्रसूयमानां यो धेनुं दद्यात् ब्राह्मणपुंगवे॥ सर्ववर्णविशेषेण शुक्लां नीलं वृषं तु वा॥१३॥ अ

पिस्यात्स कुलेस्माकं यः कुर्यात् श्रद्धयान्वितः॥ सुवर्णदानं गोदानं पृथिवीदानमेव च॥१४॥ अपिस्यात्स कुलेस्माकं
कश्चित्पुरुषसत्तमः॥ कूपारामतडागानां वापीनां यश्च कारकः॥१५॥ अपिस्यात्स कुलेस्माकं सर्वभावेन यो हरिं॥ प्र
यातिशरणं विष्णुं देवेशं मधुसूदनं॥१६॥ एतावदुक्तं तव भूमिपाल श्राद्धस्य कल्पं मुनिसंप्रदिष्टं॥ पापापहं पुण्यवि
वर्द्धनं च लोकेषु मुख्यत्वकरं तथैव॥१७॥ ॥इतिश्रीमत्स्यपुराणे पितृगाथानुकीर्त्तनं॥ ॥मनुरुवाच॥ ॥प्रसूयमा
ना दातव्या धेनुर्ब्राह्मणपुंगवे॥ विधिनाकेन धर्मज्ञ दानं दत्ता च किं फलं॥१॥ मत्स्य उवाच॥ ॥रुक्मशृंगी रूप्यखुरां
मुक्तालांगूलभूषितां॥ कांस्योपदोहनां राजन् सवत्सां द्विजपुंगवे॥२॥ प्रसूयमानां गां दत्वा महत्पुण्यफलं लभ
ते॥ यावद्वत्सो योनिगतो यावद्गर्भं न मुंचति॥३॥ तावद्गौः पृथिवी ज्ञेया सशैलवनकानना॥ प्रसूयमानां
यो दद्यात् धेनुं द्रविणसंयुतां॥४॥ ससमुद्रगुहा तेन सशैलवनकानना॥ चतुरंता भवेद्दत्ता पृथिवी नात्र सं
शयः॥५॥ यावंति धेनुरोमाणि वत्सस्य च नराधिप॥ तावत्संख्यान्युगगणान् देवलोके महीयते॥६॥ पितॄन्
पितामहांश्चैव तथैव प्रपितामहान्॥ उद्धरेच्च न संदेहो नरकात् भूरिदक्षिणः॥७॥ घृतक्षीरवहा नद्यो दधि
पायसकर्दमाः॥ यत्र तत्र गतिस्तस्य द्रुमाश्चेप्सितकामदाः॥८॥ गोलोकः सुलभस्तस्य ब्रह्मलोकश्च पार्थिव॥
स्त्रियश्च तं चंद्रसमानवक्त्राः प्रतप्तजांबूनदतुल्यरूपाः॥ महानितंबास्तनुमध्ययुक्ताः सेवंत्यजस्रं नलिना

मनेत्राः॥९॥ ॥इतिश्रीमत्स्यपुराणेउभयतोमुखीप्रदानिकोनाम॥ ॥मनुरुवाच॥ ॥कृष्णाजिनप्रदानस्य
विधिनासंममानघ॥ब्राह्मणंचतथाचक्ष्वतत्रमेसंशयोमहान्॥१॥ ॥मत्स्यउवाच॥ ॥वैशाखपौर्णमास्यां
चग्रहणेशशिसूर्ययोः॥पौर्णमासीतथामाघीआषाढीकीर्तया॥२॥उत्तरायणंचद्वादश्यांतस्यांदत्तंम
हाफलं॥आहिताग्निर्द्विजोयस्तुतस्यदेयंतुपार्थिव॥३॥यथायेनविधानेनतन्मेनिगदतःशृणु॥गोम
येनोपलिप्तेतुशुचौदेशेनराधिप॥४॥आपदावेचसमास्तीर्यमृगाजीनंचशोभनं॥तत्रशृंगेखुरमास्तरेत्
न्मगमुत्तमं॥५॥कर्तव्यंरुक्मशृंगंतुरूप्यदंतंतथैवच॥लांगूलंमौक्तिकैस्तद्वत्तिलच्छन्नंतथैवच॥६॥ति
लैस्तुस्थगितंकृत्वावाससाछादयेद्बुधः॥सुवर्णनाभिंतत्कुर्यादलंकृत्वाविशेषतः॥७॥रत्नैर्गंधैर्यथाश
क्त्यातस्यदिक्षुचविन्यसेत्॥कांस्यपात्राणितेषांदद्याद्यथाक्रमं॥८॥मृन्मयेषुचपात्रेषुपूर्वादिषुक्रमेणतु
घृतंक्षीरंदधिक्षौद्रंएवंदत्वायथाविधि॥९॥पादस्यपश्चाद्शाखामम्रपंकुंभमेवच॥ब्राह्मेपस्थानकंकृत्वा
शुभ्रंचिह्नानिवेशयेत्॥१०॥नमवस्त्रंशुभंपीतंसर्वांगेषुनिवेशयेत्॥तथामृन्मयपात्राणिपादयोस्तस्यदा
पयेत्॥११॥यानिपापानिकापेतप्रणश्यंतुममाशुवै॥लोहपात्रादिदानेनप्रणश्यंतुममाशुवै॥१२॥तिलपूर्णं
चततःकृत्वावामपादेनिवेशयेत्॥येनपापानिकाम्यानिकामोत्थानिकृतानिवै॥१३॥कांस्यपात्रप्रदानेनत

निनश्यंतुमेसदा॥मधुपूर्णंततःकृत्वापादेवैदक्षिणेन्यसेत्॥१४॥परापवादपैशून्यप्रसृष्टमांसस्यभक्षणात्॥त
थोत्थितंचमेपापंताम्रपात्रात्प्रणश्यतु॥१५॥कन्याहृतंगवांचैवपरदारप्रधर्षणं॥आतपत्रप्रदानेनक्षिप्रं
नाशंप्रयातुमे॥१६॥उक्तंपात्रंतुमेकार्पेताम्रस्यरजतस्यच॥जन्मांतरसहस्रेषुकृतंपापंकुबुद्धिना॥१७॥
सुवर्णपात्रदानाशयाशुजनार्दन॥हेममुक्ताविद्रुमंचदाडिमंबीजपूरकं॥अश्वत्थपत्रंश्रवणोखुरेशृंगा
टकानिच॥एवंकृत्वायथोक्तेनसर्वशाकफलानिच॥१९॥तत्प्रतिग्रहविधानज्ञोआहिताग्निर्द्विजोत्तमः
स्नातोवस्त्रयुगाछन्नःस्वशक्त्याचाप्यलंकृतः॥२०॥प्रतिग्रहस्यतस्योक्तःपुच्छदेशेमहीपते॥सुवर्णनाभि
कंदद्यात्प्रीयतांमेवृषध्वजः॥२१॥अनेनविधिनादत्तंयथावत्कृष्णमार्गत्॥नस्पृशेत्तंद्विजंराजन्चितिय
पसमोहितः॥२२॥दानेचश्राद्धकालेचदूरतःपरिवर्जयेत्॥स्वगृहात्प्रेषितंविप्रंमंडपेस्नानमाचरेत्॥२३॥कृ
ष्णाजिनेनराजेंद्रशाखयापादपस्यच॥कृत्वाचाचार्यकलशंसंयोगेनेनमूर्धनि॥२४॥आप्यायतास्त्वमुक्ता
लेकृचोवान्यास्तुषोडश॥अहतेवाससीवीतआचांतःशुचितामियात्॥२५॥ततःसर्वंकुंभसहितंनीत्वाक्षेप्यं
चतुष्पथे॥कृतेयानेनपातुष्टिर्नसाशक्यासुरैरपि॥२६॥वक्तुंतुनृपतिश्रेष्ठतथाप्युद्देशतःशृणु॥समग्र
भूमिदानस्यफलंप्राप्नोत्यसंशयं॥२७॥सर्वलोकांश्चचरतिकामचारीविहंगमः॥आभूतसंप्लवंयावत्सर्गं

म०पु० आप्नोत्यसंशयं॥२८॥ नपितापुत्रमरणं वियोगं भार्यया सह॥ धनदेशपरित्यागं नचैवेहाप्नुयात्कचित्॥२९॥ कृष्णा
३५९ जिनं कृष्णमृगस्य चर्मद्विजाय दद्यात् च समाहितात्मा॥ यथोक्तमेतत्मरणं न शोचेत् प्राप्नोत्यभीष्टं मनसः फलं
तु॥३०॥ ॥इति श्रीमत्स्यपुराणे कृष्णाजिनप्रदानिकोनामाध्यायः॥ ॥मनुरुवाच॥ ॥भगवन्श्रोतुमिछामि
वृषभस्य तु लक्षणं॥ वृषोत्सर्गविधिं चैव तथा पुण्यफलं महत्॥१॥ ॥मत्स्यउवाच॥॥ धेनुमादौ परीक्षेत सुशी
लां च गुणान्वितां॥ अरोगिणीं स्निग्धसुखां स्निग्धवर्णां तथैव च॥२॥ मनोहराकृतिं सौम्यां सुप्रमाणामनुद्ध
तां॥ आवर्तैर्दक्षिणावर्तैर्युक्तां दक्षिणतस्तथा॥३॥ वासावर्त्तविरामनाम्नाविस्तीर्णजघनां तथा॥ मृदुसंहनता
भाविरक्तपुष्पांसुपूजितां॥४॥ आश्यामदीर्घस्फटिकरक्तचंदनचर्चितां॥ अनेककुसुमाकीर्णैः फलैरन्यैर्हृदैः
५॥ वैडूर्यमधुवर्णैश्च जलबुद्बुदसंनिभैः॥ रक्तस्निग्धैश्च नयनैस्तथा रक्तकरीरकैः॥६॥ सप्तचतुर्दशएव दंतास्तथा
चास्यां गल्लालया॥ षडुन्नता श्रवणश्चोरुपृष्ठं पंचसमायता॥७॥ अपायता शिरोग्रीवा पोजयेत्तासुलक्षणा
७॥ ॥मनुरुवाच॥॥ षडुन्नताः के भगवन् के च पंच समायताः॥ अपताश्च तथैवास्ये धेनूनां केशवा वद॥
श्रीमत्स्यउवाच॥॥ उरुपृष्ठं तथा कुक्षौ श्रवणौ वसुधाधिप॥ षडुन्नतानि धेनूनां पूजयंति विचक्षणाः॥९॥ राम
कर्णौ नेत्रे ललाटं च पंचभास्करनंदन॥ समायता शिरास्तेतेपुछं सा च सक्थिनी॥१०॥ चत्वारश्चस्तनाराजन् ३५९

गवमष्टौमनीषिभिः॥ शिरोग्रीवायता श्वेते भूमिपालसमतादृशा॥११॥ तस्याः सुतं परीक्षेत वृषभं लक्षणान्वितं॥ उ
न्नतस्कंधमुदरश्रोक्षे लायतकंबलं॥१२॥ महाकटीतटस्कंधे वैडूर्यमणिलोचनं॥ प्रवालशृंगकश्मीरंसदंपृष्ट
पुवालधि॥१३॥ नवाष्मदशसंख्यैर्वातितीक्ष्णाग्रैर्दशनैः शुभैः॥ मल्लिकाक्षश्चमोक्तव्यो गृहेपि धनधान्यकृत्॥१४॥
वर्णतस्ताम्रकपिलो ब्राह्मणस्य प्रशस्यते॥ श्वेतो रक्तश्च कृष्णश्च गौरः पाटल एव च॥१५॥ भाक्रणस्तन वृष्टश्चसव
लः पंचकालकः॥ पृथुकर्णमहास्कंधः श्लक्ष्णरोमायो भवेत्॥१६॥ श्वेतोदरः कृष्णपार्श्वो ब्राह्मणस्य प्रशस्यते॥ स्नि
ग्ध वर्णेन रक्तेन क्षत्रस्यते॥१७॥ कांचनाभेन वैश्यस्य कृष्णेनाप्यत्य जन्मनः॥ यस्य वामायते शृंगे भमुखाभिमुखे
सस॥१८॥ सर्वेषामेव वर्णानां स च सर्वार्थसाधकः॥ मार्जारपादकपिलो धन्यः कपिलपिंगलः॥१९॥ श्वेतो
मार्जारपादस्तु वंधेमणिनिभेक्षणः॥ करटः पिंगलश्चैव श्वेतपादस्तथैव च॥२०॥ सर्वपापहरो नीलसर्वैश्चैवभ
संमतः॥ अथवा श्वेतपादस्तु विज्ञेयः सार्वकामिकः॥२१॥ ताम्रारसनिभो धन्यस्तथा तित्तिरसंनिभः॥ आकर्ण
मूलं श्वेतं तु मुखं यस्य प्रकाशते॥२२॥ सनंदामुखः स विज्ञेयो रक्तवर्णो विशेषतः॥ श्वेतं तु जठरं यस्य भवेत्पृष्ठं तु गो
पते॥२३॥ वृषभः स च भद्राक्षः सततं कुलवर्द्धनः॥ मल्लिकाचित्रपुष्पश्च धन्यो भवति पुंगवः॥२४॥ कमलैर्वि
मत्रैश्चापि धन्यो भवति भाग्यदः॥ अतसीपुष्पवर्णश्च तथा धन्यतरः स्मृतः॥२५॥ एते धन्यास्तथा धन्यान्की

न्विक्ष्यामि तेन प॥ कृष्णताल्वोष्ठदशना रूक्षशृंगशफाश्च ये॥२६॥ अव्यक्तवर्णा ह्रस्वाश्च व्याघ्रसिंहनिभाश्च ये।
व्याघ्रगृध्रसवर्णाश्च तथा मूषकसन्निभा॥२७॥ कुष्टः काणस्तथा खंजाः केकराक्षास्तथैव च॥ विषमश्वेतपाद
श्च उद्भ्रांतनयनास्तथा॥२८॥ न ते वृषाः प्रयोक्तव्या न च धार्यास्तथा गृहे॥ मोक्तव्यानां च धार्याणां भूयो वक्ष्या
मि लक्षणं॥२९॥ स्वस्तिकारवर्णाश्च मेघौघस्तिमितस्वनः॥ महाप्रमाणाश्च तथा मत्तमातंगगामिनः॥३०॥ म
होरस्का महोच्छ्राया महाबलपराक्रमा॥ शिरः कर्णौ ललाटं च वालधिश्चरणास्तथा॥३१॥ नेत्रपार्श्वे च कृष्णानि ह
दृश्यते चंद्रसप्रभं॥ श्वेतान्येतानि दृश्यंते कृष्णस्य तु विशेषतः॥ भूमौ लंबति लांगूलं प्रलंबस्थूलवालधिः॥ पुरस्ता
दुच्छ्रितो नीलो वृषभः सप्रशस्यते॥३३॥ सच ध्वजपताकाश्च येषां राजन्विराजते॥ अनड्वाहस्तु ते धन्या चित्र
सिद्धिजयावहाः॥३४॥ प्रदक्षिणं निवर्तंते स्वयं च विनिवर्तिता॥ समुन्नतशिरोग्रीवा धन्यास्ति धनवर्द्धनाः॥
३५॥ रक्तशृंगाग्रनयना रक्तशृंगो भवेद्यदि॥ शिफैः प्रवालसदृशैर्नीधि धन्यतरस्ततः॥३६॥ एते धार्याः प्रय
त्नेन मोक्तव्या यदि वा वृषाः॥ धारिताश्च तथा युक्ता धनधान्यविवर्धनाः॥३७॥ चरणाश्च मुखं पुच्छं यस्य श्वेता
नि गोपते॥ लाक्षारससवर्णश्च तं नीलमिति निर्दिशेत्॥३८॥ वृषएष स मोक्तव्यो न स धार्यो गृहे भवेत्॥ तदर्थ राम०
मेवाचरते लोगाथा पुरातनी॥३९॥ एष्टव्या बहवः पुत्रा यद्येकोपि गयां व्रजेत्॥ गौरीं वोद्वहयेत्कन्यां नीलं वा ३६०

वृषमुत्सृजेत्॥४०॥ एवं वृषं लक्षणसंप्रयुक्तं गृहोद्भवं क्रीतमथापि राजन्॥ मुक्त्वा न शोचेन्मरणं महात्मा मो
क्षैकभावास्य तवाभिधास्ये॥४१॥ ॥इति श्रीमत्स्यपुराणे वृषलक्षणो नामाध्यायः॥ ॥सूत उवाच॥ ततः स राजा
देवेशं पप्रच्छामितविक्रमः॥ पतिव्रतानां माहात्म्यं तत्संबद्धां कथामपि॥१॥ मनुरुवाच॥ ततः स राजा देवेशं
कयामृत्युः पराजितः॥ नामसंकीर्तनं कस्याः कीर्तयंती सदा नरः॥२॥ सर्वपापक्षयकरा इदानीं कथय
स्व नः॥२॥ मत्स्य उवाच॥ वैलोम्य धर्मराजोपि नाचरत्य योषितां॥ पतिव्रतानां धर्मज्ञः पूज्यः स्तुत्यः पतिः स
दा॥३॥ अत्र ते वर्णयिष्यामि कथां पापप्रणाशिनीं॥ यथा विमोक्षितो भर्त्ता मृत्युपाशाद्गतः स्त्रिया॥४॥ मद्रे
षु शाकले राजा बभूवाश्वपतिः पुरा॥ अपुत्रस्तस्य भार्यासौ पुत्रार्थे सर्वकामदां॥५॥ आराधयत सावित्रीं ल
क्षितां सद्द्विजोत्तमैः॥ सिद्धावैकप्यमाना सा सावित्री प्रसहं द्विजैः॥६॥ कृतुसंख्यैश्चतुर्थ्यां मासदशादिने गते॥
काले तद्दर्शयामास सोवाच मनुजेश्वरं॥७॥ ॥सावित्र्युवाच॥ ॥राजन्भक्तोसि मे राजन्निलं प्राप्स्यसे तन
यं द्विज॥ तां दत्तां मत्प्रसादेन पुत्रीं प्राप्स्यसि शोभनं॥८॥ एतावदुक्त्वा राजानं शोकले शांतपीरतं॥ जगामदर्श
नं देवी विद्युत्सौदामिनी यथा॥९॥ मालव्या नाम तस्यासीत् राजपत्नी पतिव्रता॥ सुषुवे तनयां सा च सावित्रीमिव रू
पतः॥१०॥ सावित्र्या प्रीतया दत्ता तद्रूपसदृशी तया॥ सावित्री च भवेत्तेषां जगाद नृपतिर्द्विजान्॥११॥ नाम

आश्वद्विजश्रेष्ठा सावित्रीति नृपोत्तम ॥ हृष्टातां यौवनोपेतां ददौ सत्यवते पिता ॥ १२ ॥ नारदस्तु ततः प्राह राजानं दी
प्ततेजसं ॥ क्षीणायुः शतवर्षेण भविष्यति नृपात्मज ॥ १३ ॥ सकृत्कन्या प्रदीयेत चिंतयित्वा नराधिप ॥ तथा
पि प्रददौ कन्यां कृते त्वात्मतेजसे ॥ १४ ॥ सत्यवत्यपि भर्त्तारं मासाद्य नृपमंदिरे ॥ नारदस्य तु वाक्येन दुःखमा
नापतिव्रता ॥ १५ ॥ शुश्रूषां परमां चक्रे भर्तृश्वसुरयोर्वने ॥ राज्यभ्रष्टः सभार्यस्तु नष्टचक्षुर्नराधिपः ॥ १६ ॥ तु
तोषतां समासाद्य राजपुत्री सदस्नुषां ॥ चतुर्थेहनि मर्त्तव्यमिति सत्यवती द्विजाः ॥ १७ ॥ श्वसुरेणाभ्यनु
ज्ञाता तदा राजसुतापि सा ॥ चक्रे त्रिरात्रं धर्मज्ञा प्राप्ते तस्मिंस्तदा दिने ॥ १८ ॥ चरु पुष्पफलाहर्तुं स तदा प्रस्थि
तो वने ॥ श्वसुरेणाभ्यनुज्ञाता याचनाभंगभीरुणा ॥ १९ ॥ सावित्र्यपि जगामार्त्ता सह भर्त्रा महद्वनं ॥ चेतसा दूय
मानेन रूपमानावतद्वपं ॥ २० ॥ वने पप्रच्छ भर्त्तारं द्रुमच्छायाश्रितं तदा ॥ आश्वासयामास स राजपुत्रीं क्लांताव
ने पंकजपत्रनेत्रां ॥ संदर्शनेनापि कृतामध्याजानात्यथा मृगाणां विपिने न वीर ॥ २१ ॥ ॥ इति श्रीमत्स्यपुराणे सावि
त्र्युपाख्याने ॥ ॥ सत्यवानुवाच ॥ ॥ वनेस्मिन्पक्षिभिः क्रीडसि हृष्टकारमनोहरे ॥ श्रोत्रघ्राणादिसुखदं वसंतेरति
वर्द्धनं ॥ १ ॥ वनेष्वशोकं दृष्ट्वेव मावसंतसपुष्पितः ॥ वसंते हसतीवाद्य मामिवायतलोचने ॥ २ ॥ दक्षिणे दक्षिणेन तु
तां पश्य रम्यां वनस्थली ॥ पुष्पितैः किंशुकैर्युक्तां ज्वलितानलसप्रभैः ॥ ३ ॥ सुगंधकुसुमामोदि वनरावदि

निर्मितां करोमि वायुर्दाक्षिण्ये आवयोः क्लमनाशने ॥ ४ ॥ पश्चिमेन त्विदृश्यात्र श्लिकर्णिकारः सपुष्पितः ॥ कां
चनैर्विभ्रमैर्येषा वनराजी मनोहरा ॥ ५ ॥ अतिमुक्तालताजालसुडमार्गा वनस्थली ॥ पद्मोदकचारुसर्वांगीकु
सुमोज्वलभूषणा ॥ ६ ॥ मधुमत्तालिझंकाररम्याजे नवरवर्ल्गिनी ॥ चापाकृष्टिं करोत्येव कामपाय जिघांसया ॥
७ ॥ फुल्लचंपकसंकाशा पुंस्कोकिलनिनादिता ॥ विभाति चारुतिलकात्वामिवैषा वनस्थली ॥ ८ ॥ कोकिलः शिखरे
मंजरेणुपिंजरः ॥ गदितैर्व्यक्ततां याति कुलीनश्चेष्टितैरिव ॥ ९ ॥ प्रेक्ष्य रेणुविलिप्तांगी प्रियामनुसरद्वने ॥ कुसु
मात कुसुमं याति कूजन्कामी शिलीमुखः ॥ १० ॥ मंजरीसहकारस्य कांता भ्रवगर्खंडितं ॥ स्वादते बकुपुष्पे
तिपिं पुंस्कोकिलस्तु वाद्रुमे ॥ ११ ॥ काकः प्रसूतां वृक्षाग्रे स्वामेकाग्रेण चंचुना ॥ काकीं संभावयत्येष पक्षाछादि
तपत्रकः ॥ १२ ॥ भूभागे पितासहितो युवा ॥ नाहारमपि चादत्ते कामाक्रांतः कपिंजलः ॥ १३ ॥ कलविंकस्तुरच
यन्प्रियोत्संगसमाश्रितः ॥ मुहुर्मुहुर्विशालाक्षि उत्कंठयति कामिनं ॥ १४ ॥ क्षुद्रशाखासमारूढः शुको यं
सहकांतया ॥ हरणे लंबनो सो करोति सफलां गिरं ॥ १५ ॥ आमिषेणापि मिथुनं पश्य शैलकंदरसंस्थितं ॥ यायानेत्रश्र
मालोकेगुहाभिनैविलक्ष्यते ॥ १६ ॥ अयं द्वीपी प्रियां लेढि जिह्वाग्रेण पुनः पुनः ॥ प्रीतिमायाति महतीति लमान
श्वकांतया ॥ १७ ॥ उत्संगकृतमूर्द्धानं निद्रापहृतचेतनं ॥ जेतुवदानारीभूमौ निपतितां कांतामार्जारो दर्शीनो

दूरी॥१८॥नखेर्दंतैस्तुदत्येषनचपीडयतेतथा॥ध्वांक्षःध्वांक्षीचैतौसंसुप्तेपीडितेइमे॥१९॥संलीनगात्रेचरणेकु
सिद्धिकिसुपागते॥स्नात्वासरसिपद्माढ्येनागस्तुमदनप्रियः॥२०॥संभावयतितन्वंगिमृणालकंदलप्रिया॥कांतमो
यसस्तुस्नानेकांतमागन्तुगामिनी॥२१॥करोतिकवलंमुक्तेवारहीपोतकानुगा॥दृढांगसंधिमहिषिःकर्दमाक्तनुव
त्तनि॥२२॥अनुव्रजंतिधावंतीप्रियाचत्रक्रकः॥पश्यतेनापिसारंगंत्वत्कटाक्षविभ्रमावने॥२३॥सन्नार्यसमपश्यंपतंकौ
तूहलसमन्वितं॥पश्यपश्चिमपादेनगेहाकंडूयतेसुरवः॥२४॥स्नेहाद्भिर्वाल्कपतिमन्नाश्रिंगाग्रकोटिना॥चमरी
पश्यपसितवालोअगच्छती॥२५॥अन्नास्तेचमरःकामीमांचवीक्ष्यनगर्विता॥आतपेगमवपेपश्यमरुःपन्नार्यया
सह॥२६॥संपनानिचकुर्वणिंकाकंककुदिवारयत॥पश्यराजन्नार्ययासार्द्धंन्मिस्ताम्रचरणद्वयं॥२७॥विपुलेबद
रीस्कंधेबदराद्रानकाम्यया॥हंसंसन्नार्यसरस्विविचरंतंसुनिर्मलं॥२८॥सुश्रुक्रपक्षपवैप्रियमुद्वहन॥सन्नार्यश्च
क्रवाकोयंकमलेकालमध्यगः॥२९॥करोतिपद्मिनीकांतेसपुष्पमिवसुंदरि॥मयाफलोच्चयःसुश्रुत्वयापुष्पो
च्चयःकृतः॥३०॥इंधनंतकृतंसुश्रुतत्करिष्यामिसांप्रतं॥तमस्यसरसस्तीरेद्रुमच्छायासमाश्रितः॥३१॥क्षणमात्रं
प्रतीक्षस्वविश्रांतासिचभामिनि॥३१॥सावित्र्युवाच॥॥एवमेततकरिष्यामिममदृष्टिपथयायथा॥दूरंकांतनगं राम
च्छ्वंबिभेमिगहनेवने॥३२॥मत्स्यउवाच॥॥ततःसकाष्ठानिचकारतस्मिन्वनेतदाततस्यास्त्वदूरेसरसस्त २६२

स्य॥३३॥॥इतिश्रीमत्स्यपुराणेसावित्र्युपाख्याने॥॥मत्स्यउवाच॥॥तस्यपाटयतःकाष्ठंजज्ञेशिरसिवेदना॥तमभ्युप
विश्यामीवनचजानातिकिंचन॥१॥त्वदुत्संगेशिरःकृत्वास्वप्तुमिच्छामिसांप्रतं॥राजपुत्रीमेवमुक्त्वातदासुप्तापथा
गव॥२॥तदुत्संगेशिरःकृत्वानिश्चयान्वितलोचनः॥पतिव्रतामहाभागाततःसाराजकन्यका॥३॥ददर्शधर्मरा
जानस्वयंतंदेशमागतं॥नीलोत्पलदलश्यामंपीतांबरधरंप्रभुं॥४॥विद्युल्लतानिबद्धांगंसतोयमिवतोयदंकि
रीटेनार्कवर्णेनकुंडलाभ्यांविराजितं॥५॥हारभारार्पितोरस्कंविचित्रांगदभूषितं॥महतापरिवारेणकालेनसह
मृत्युना॥६॥सतुसंप्राप्यतंदेशंदेहात्सत्यवतस्तदा॥अंगुष्ठमात्रंपुरुषंपाशबद्धंवशंगतं॥७॥आकृष्यदक्षिणा
माशांप्रययौसत्वरंतदा॥सावित्र्यपिवरारोहादृष्ट्वातंगतजीवितं॥८॥अनुवव्राजगच्छंतंधर्मराजमतंद्रिता॥कृ
तांजलिरुवाचाथहृदयेनप्रवेपता॥९॥इमंलोकंमातृभक्त्यापितृभक्त्यातथैवच॥गुरुशुश्रूषयाचैवब्रह्मलो
कंसमश्नुते॥१०॥सर्वेतस्याहताधर्मायस्यैतेत्रयआदृताः॥अनादृतास्तुयस्यैतेसर्वास्तस्याफलाःक्रियाः॥११॥
यावत्त्रयस्तेजीवेयुस्तावन्नान्यंसमाचरेत्॥एषंचनित्यंशुश्रूषांकुर्यात्प्रियहितेरतः॥१२॥तेषामनुपरोधेनपा
रत्र्यंयद्यदाचरेत्॥तत्तन्निवेदयेत्तेभ्योमनोवचनकर्मभिः॥१३॥त्रिष्वेतेष्वितिकृत्यंहिपुरुषस्यसमाप्यते॥१४॥म
त्स्यउवाच॥॥कृतेनकामेननिवर्तयाशुधर्मेनतेकोपिहिगच्छतेच॥ममापराधस्तुवचःक्रमःस्यात्तथाधुना

म०पु०
३६३

तेनतब्रवीमि॥१४॥गुरुष्टजारतिर्भर्त्तात्विंचसाध्वीपतिव्रता॥विनिवर्त्तस्वधर्मज्ञेश्रान्तानिर्नवितितेधुना॥१५॥सावित्र्युवा
च॥॥पहतिर्हिदैवतंस्त्रीणांपतिरेवपरागतिः॥अनुगम्यःस्त्रियासाध्व्यापतिःप्राणधनेश्वरः॥१६॥मितंददाति
हिपितामितंभ्रातामितंसुतः॥अमितस्यप्रदातारंभर्त्तारंकानपूजयेत्॥१७॥नीयतेयत्रभर्त्तामेस्वयंवायत्रगछति॥
मयापितत्रगंतव्यंयथाशक्तिसुरोत्तम॥१८॥पतिमादायगछंतंअनुगंतुमहंयच॥तदेवंनहिनेश्यामितदासक्ष्या
मिजीवितं॥१९॥मनस्विनीतयावाचावैधव्याक्षरदूषिता॥मुहूर्त्तमपिजीवेयमंडनार्हाह्यमंडिता॥२०॥यमउवाच
॥पतिव्रतेमहाभागेपरितुष्टोस्मितेशुभे॥विनासत्यवतःप्राणैर्वरंवरयमाचिरं॥२१॥सावित्र्युवाच॥॥विनष्टचु
क्षुषोराज्यंचक्षुषासहकारय॥च्युतराज्यस्यधर्मज्ञश्वशुरस्यमहात्मनः॥२२॥यमउवाच॥॥दुरपथेगछनिवर्त्त
मद्भेनविष्यतीष्यतीहंसकलंत्वयोक्तं॥ममावरीस्सुव्रतःक्रमःस्यात्तथाधुनातेनतवब्रवीमि॥२३॥इतिश्रीम
त्स्यपुराणेसावित्र्युपाख्यानेप्रथमोवरलंभनः॥॥सावित्र्युवाच॥॥कुतःक्लमःकुतोदुःखंसद्भिःसुहृत्समागमे॥स
तांतस्मान्नमेग्लानिस्त्वत्समीपेसुरोत्तम॥१॥साधूनांवाप्यसाधूनांसंतएवसदागतिः॥नैवासंतान्नैवसतांअसंतो
नैवचात्मनः॥२॥नतथाजायतेभर्त्तुअकारेणजगद्वैरिस्तलेभ्योजायतेयथा॥संतःप्राणान्परित्यक्त्वापरार्थंकु राम
र्वंतियथा॥३॥तथासंतोपिसंतस्थपरपीडासुतत्पराः॥सजंत्यसन्नयेलोकंत्तणवद्यस्यकारणात्॥४॥परोप ३६३
त

षु घातशक्तास्तत्परलोकंतथासतः॥निकार्येनिकार्येषुतथाब्रह्माजगद्गुरुः॥५॥असतामुपघातायराजानंस्वा
वान्स्वयं॥नराम्परीक्षयोराजन्स्याधूर्त्तस्सनयेत्सदा॥६॥निग्रहंशासनात्कुर्यात्सलोकेलोकजित्तमः॥उत्कृष्टा
याश्रिययावर्द्धयेत्तेधान्यंवर्द्धयेत्तथाप्रजाः॥७॥निग्रहेणसदाराष्ट्रेसतांचपरिपालनात्॥एतावद्देवकर्त्तव्यंराज्ञास्व
र्गमभीप्सुना॥८॥राजाकृतंसहिलोकेस्मिन्नास्त्यन्यकृतंगतांपते॥असतांनिग्रहादेवसतांचपरिपालनात्॥९॥रा
जभिश्चाप्यशास्तानांअसतांशासितानवान्देवेभ्यःप्रतिजानसिमे॥१०॥जगद्विधार्यतेसद्भिःसतामग्र्यस्तथाभ
म वान्॥तेनत्वामनुजानामिक्रमोपनविद्यते॥११॥यमउवाच॥॥तुष्टोस्मितेविशालाक्षिवचनेधर्मसंगतेः॥
विनासत्यवतःप्राणान्वरंवरयमाचिरं॥१२॥सावित्र्युवाच॥॥सहोदराणांभ्रातृणांकामयामिशतंविभो॥यथा
यमउवाच गतसतिदिने॥१३॥ऊर्ध्वदैहिककार्येषुयत्नमनुःसमाचर॥नानुगंतुमयंशक्यस्त्वयालोकांतरंगतः॥१४॥प
तिव्रतासितेनत्वंमुहूर्त्तंमानुपश्यति॥गुरुशुश्रूषणान्नैतथासत्यवताप्यहं॥१५॥पुण्यंसमनयाप्येनमहंस्वयं
एतावदेवकर्त्तव्यंविजवता॥१६॥मातुःपितुश्चशुश्रूषागुरोश्चवरवर्णिनी॥गुरुत्रितयमेतत्तुसदासत्यवतांमते
१७॥पूजितेनिर्जितःस्वर्गस्तदातेनचिरंशुभे॥तपसाब्रह्मचर्येणगुरुशुश्रूषयाशुभे॥१८॥पुरुषाःस्वर्गमाप्नु
वंत्यग्निशुश्रूषयातथा॥आचार्यश्चपिताचैवमाताभ्राताचपूर्वजः॥१९॥नचैतेत्यवमंतव्याब्राह्मणेनविशे

म॰पु॰ पतः॥आचार्यो ब्रह्मणो मूर्त्तिः पिता मूर्त्तिः प्रजापतेः॥२०॥माता पृथिव्या मूर्त्तिस्तु भ्राता स्वा मूर्त्तिरात्मनः॥यं मातापितरौ क्ले
शं सहेते संभवे नृणां॥२१॥न तस्य निःकृतिः शक्या कर्तुं वर्षशतैरपि॥तयोर्नित्यं प्रियं कुर्यात् आचार्यस्य च सर्वदा
३६३४ २२॥तेष्वेव त्रिषु तुष्टेषु तपः सर्वं समाप्यते॥तेषां त्रयाणां शुश्रूषा परमं तप उच्यते॥२३॥न तैरभ्यननुज्ञातो धर्म च
मन्यं समाचरेत्॥त एव त्रयो लोकास्त एवाश्रमास्त्रयः॥२४॥त एव त्रयो वेदास्त एव त्रयोऽग्नयः॥पिता गा
र्हपत्योऽग्निर्माताग्निर्दक्षिणः स्मृतः॥२५॥गुरुराहवनीयस्तु साग्नित्रेता गरीयसी॥त्रिष्वेतेषु प्रमाद्येत त्रींल्लोका
न् जयते गृही॥२६॥दीप्यमानः स्ववपुषा देववद्दिवि मोदते॥२६॥॥यमउवाच॥॥कृतेन कामेन कृतेन नर्मन्न
विष्मतीदं सकलं लयोक्तं॥ममापराधस्तव च कार्यस्मान्न यथा हितादेवतवब्रवीमि॥२७॥ ॥इति श्रीमत्स्ये सावित्र्यु
पाख्याने द्वितीयो वरलंभः॥ ॥सावित्र्युवाच॥॥धर्मार्जनं सुरश्रेष्ठ कुतो हानिः क्रमोपगा॥तस्मादमूलमेवाप
परमं धर्मकारणं॥१॥धर्मार्जनं सदा कार्यं पुरुषेण विजानता॥तद्धीनः सर्वलोकेभ्यो नित्यमेव विशिष्यते॥२॥
धर्मश्चार्थश्च कामश्च त्रिवर्गो जन्मनः फलं॥धर्महीनस्य कामार्थौ वंध्यासुतसमौ प्रभो॥३॥धर्मादर्थस्ततः कामो
धर्माल्लोकद्वयं तथा॥धर्मः कोनपत्येनं यत्र कं च नागामिनं॥४॥शरीरेण समं नाशं सर्वमन्यद्धि गच्छति॥एकोपि राम
स्त जायते जंतुरेक एव प्रमीयते॥धर्मस्तमनुयात्येको न सुहृन्न च बांधवाः॥क्रिया सौभाग्यलावण्यं सर्वं धर्मेण लभ्यते ३६३४

ते॥६॥ब्रह्मेंद्रोपेंद्ररुद्रार्केडयमाग्न्यर्कानिलांभसां॥वसूनां धनदाद्यानां ये लोकाः सर्वकामदाः॥७॥धर्मेण तानवा
प्नोति पुरुषः पुरुषांतरः॥मनोहराणि द्वीपानि वर्षाणि सुबहूनि च॥८॥प्रयांति धर्मेण नरास्तथैवामरचंद
नादीनि मुख्यानि देवोद्यानानि यानि च॥९॥तानि पुण्येन लभ्यंते नाकपृष्ठं तथामरैः॥विमानानि विचित्राणि त
थैवाप्सरसः शुभाः॥१०॥तेजस्वीनि शरीराणि सदा पुण्यवतां फलं॥राज्यं नृपतिपूजा च कामसिद्धिस्तथेप्सिता॥
११॥संस्काराणि च मुख्यानि फलं पुण्यात्स्वहस्पते॥रुक्मवैदूर्यवस्त्राणि वंगास्त्रसहस्राणि च॥१२॥चामराणि सुरा
ध्यक्ष भवंति शुभकर्मणा॥पूर्णेंदुमंडलाभानि रत्नांशुविविधानि च॥१३॥धृतेन यांति छत्रेण नराः पुण्येन कर्मणा
जयशंखस्वतो घेनस्तमागधनिस्वनैः॥१४॥वरासनं समंगारं फलं पुण्यस्य कर्मणः॥वरान्नपानगीतं च वन
त्रमाल्यानुलेपनं॥१५॥रत्नवस्त्राणि सकलं फलं पुण्यस्य कर्मणः॥रूपौदार्यगुणोपेताः स्त्रियश्चापि मनोहराः
१६॥वरप्रासादपृष्ठेषु भवंति शुभकर्मिणः॥सुवर्णकिंकिणीमिश्रचामरापीडचारिणः॥१७॥वहंति तुरगा देव
नरं पुण्येन कर्मणा॥हेमपद्मैः स्वमातंगैश्चलपर्वतसन्निभैः॥१८॥खेलद्भिः पादविन्यासैर्यांति पुण्येन कर्मणा॥
सर्वकामप्रदे देव सर्वविघ्नदुरितापहे॥१९॥वदंति भक्तिं पुरुषाः सदा पुण्येन कर्मणा॥तस्य द्वाराणि यजनं तपो
दानं दमः क्षमा॥२०॥ब्रह्मचर्यं तथा तीर्थानुसरं परमस्मृतं॥स्वाध्यायः सेवा साधूनां सहवासः सुरार्चनं॥२१॥

गुरूणांचैवशुश्रूषाब्राह्मणानांचपूजनं॥इंद्रियाणांजयश्चैवब्रह्मचर्यममत्सरः॥२२॥तस्माधर्म्मंसदाकार्यंहरू
पेणविजानता॥नहिप्रतीक्षतेमृत्युःकृतमस्यनवाकृतं॥२३॥बालएवचरेत्धर्ममनित्यंदेवजीवितं॥कोहिजाना
तिकस्याद्यमृत्युरूपेनःप्रतिष्ठति॥२४॥पश्यतःपश्यलोकस्यमरणंपुरतःस्थितं॥अमरस्येवचरितमत्याश्चर्यंसुरोत्तम॥
२५॥पुत्रत्वात्प्रेक्ष्यतेबालोवृद्धत्वापेक्षयायुवा॥मृत्योःसर्वसमारूढंततोवृक्षाग्रमाश्रितः॥२६॥तत्रापिविंदतिप्राणं
मृत्युर्नीतस्यकागतिः॥नभवेन्मरणंदेवप्राणिनामन्नयंक्वचित्॥२७॥तत्रापिनिर्जयाःसंतःसदासुकृतकारिणः॥
२७॥यमउवाच॥तुष्टोस्मितेविशालाक्षिवचनैर्धर्मसंयुतैः॥विनासत्यवतःप्राणान्वरंवरयमाचिरं॥२८॥सावि
त्र्युवाच॥॥वरयामित्वयादत्तंपुत्राणांशतमौरसं॥अनंतातस्यलोकेषुगतिःकिलनविद्यते॥२९॥यमउवाच॥
कृतेनकामेननिवर्त्तभद्रेभविष्यतीदंसकलंत्वयोक्तं॥ममापराधंवचनक्रमःस्यात्तत्पाद्यतन्नैचतवब्रवी
मि॥३०॥॥इतिश्रीमत्स्यपुराणेसावित्र्युपाख्यानेत्रितीयोध्यायः॥॥सावित्र्युवाच॥॥धर्माधर्मविधानज्ञस
र्वधर्मप्रवर्त्तकः॥त्वमेवपरतोनाथप्रजासंयमनोयमः॥१॥कर्मणामनुरूपेणतस्मात्दमयसिप्रजाः॥तस्मा
त्वमुच्यसेदेवयमइत्येवनामतः॥२॥धर्मेणेमाःप्रजाःसर्वायस्माद्रंजयसेविभो॥तस्मात्त्वंधर्मराजेतिनामस
द्भिर्निगद्यते॥३॥सुकृतंदुःकृतंचोभेपुरोधायजनायदा॥उत्सुकाःसंसतौयातितस्मात्त्वंमृत्युरुच्यसे॥४॥

ते
कालःसर्वार्थिकिलयन्सर्वेषांत्वंहितिष्ठसि॥तस्मात्कालेतितेनामप्रोच्यसैतत्वदर्शिभिः॥५॥सर्वेषामेवभूतानां
यस्मात्दंतकरोमहान्॥तस्मात्वमंतकःप्रोक्तःसर्वैर्देवैर्महाद्युते॥६॥विवस्वतस्त्वंतनयःप्रथमःपरिकीर्त्ति
तः॥तस्माद्वैवस्वतोनाम्नासर्वलोकेषुकथ्यसे॥७॥आयुषःकर्मणिक्षीणेग्रहणातिप्राणजीवनं॥तदात्वंकृ
ष्यसेलोकेसर्वप्राणहरोसिवै॥८॥तवप्रसादाद्देवेशत्रयीधर्मोननश्यति तवप्रसादाद्देवेशंकरोनप्रजायते॥ श
९॥सतांसदागतिर्देवत्वमेवपरिकीर्त्तितः॥जगतोस्यजगन्नाथमर्यादापरिकीर्त्तितः॥जगतोस्यजगन्नाथमर्या
दापरिपालक॥१०॥त्राहिमांविदशश्रेष्ठदुःखितंशरणागतं॥पितरौचतथानाथराजपुत्रस्यदुःखितौ॥११॥
यम उवाच मत्स्यउवाच॥॥एवंतेनमयाधर्मज्ञेमयानुष्टेनसत्यवान्॥तवभर्त्तापिमुक्तोसौलब्धकामाप्रजावजे॥१२॥रा
ज्यंकृत्वात्वयासार्द्धंवर्षाण्यपशतिपंचकं॥नाकपृष्टंतथारुह्यत्वयासहसरंस्यते॥१३॥त्वयिपुत्रशतंचापिस
त्यवान्जनयिष्यति॥तेचापिसर्वेराजानोवीर्यवंतोमरोपमाः॥१४॥मुख्यास्तुनाम्नापुत्रास्तेभविष्यंतीति
त्रख्यता॥पितुस्त्वतेपुत्रशतंभवितातरसेगरि॥१५॥मालव्यामालवानामशाश्वताःपुत्रपौत्रिणः॥भ्रातरस्ते
भविष्यंतिक्षत्रियास्त्रिदशोपमाः॥१६॥स्तोत्रेणानेनधर्मत्तिकालेउत्थाययस्तुमं॥कीर्त्तयिष्यतितस्यापिदी
र्घमायुर्भविष्यति॥१७॥मत्स्यउवाच॥॥एतावदुक्त्वाभगवानधर्मोविसृज्यतंराजसुतंमहात्मा॥अदर्शनंतत्रज

गामकालेकालेनसार्धंसहमृत्युनाच॥१८॥ ॥इतिश्रीमत्स्यपुराणेसावित्र्युपाख्यानेसत्यवज्जीवनलंभोनाम॥
मत्स्यउवाच॥ ॥सावित्र्यपिततःसर्वंजगामवरवर्णिनी॥यथायथागतेनैवयत्रासीत्सत्यवान्मृतः॥१॥सासमा
साद्यभर्तारंतस्योत्संगगतंशिरः॥कृत्वाविवेशतन्वंगीलंबमानेदिवाकरे॥२॥सत्यवानपिनिर्मुक्तोधर्मराज
च्छनैःशनैः॥उन्मीलयतेनेत्राभ्यांप्राकृशिरश्चैवभार्गवि॥३॥ततःप्रत्यागतप्राणःप्रियोवचनमब्रवीत्॥क्वा
सौप्रयातःपुरुषोयोमामेवंविकर्षति॥४॥जानासिचवरारोहेकश्चासौपुरुषःशुभे॥वनेस्मिन्चारुसर्वांगि
सुप्तस्यचचिरंगतं॥५॥उपवासपरिश्रांताकर्शिताभवतीमया॥अस्मद्दुर्हृदायनाद्यपितरौदुःखितौतथा॥६॥
द्रष्टुमिच्छाम्यहंसुभ्रुगमनेत्वरिताभव॥६॥ ॥सावित्र्युवाच॥ ॥आदित्यस्तमनुप्राप्तोयदिदंतदिदंप्रभो॥आ
श्रमंचप्रयास्यावःश्वशुरौहीनचक्षुषौ॥७॥यथावृत्तंचतत्रैवप्रविश्यामितवाश्रमे॥एतावदुक्त्वाभर्तारंसहभर्त्रा
तदाययौ॥८॥समासाद्याश्रमंचैवसहभर्त्रानृपात्मजा॥एतस्मिन्नेवकालेतुलब्धचक्षुर्महीपतिः॥९॥द्युमत्सेन
सभार्यस्तुपर्यतप्यतभार्गवि॥प्रियंपुत्रमपश्यंश्चस्नुषायेवात्यकर्शितः॥१०॥आश्वास्यमानःसुतपाःसतुराजा
तपोवने॥ददर्शपुत्रमायांतंस्नुषयासहकाननात्॥११॥सावित्रीचवरारोहासहसत्यवतातदा॥ववंदेतत्ररा
जानंसभार्यंनृपनंदना॥१२॥परिष्वक्तस्तथापित्रासत्यवान्नृपनंदनः॥अभिवाद्यततःसर्वान्वनेतस्मिन्तपो

वनात्॥१३॥उवासतत्रतांरात्रिंऋषिभिःसहधर्मवित्॥सावित्र्यपिजगादाथयथावृत्तमनिंदिता॥१४॥व्रते
समापयामासतस्यामेवतदानिशि॥ततस्तुरात्रियामांतेशाल्वेभ्यस्तस्यभूपतेः॥१५॥आजगामजनःसर्वोराज्या
र्थायनिमंत्रणे॥विज्ञापयामासतथातत्रप्रकृतिशासनं॥१६॥विचक्षुषस्त्वेनृपतेयेनराज्यंपुराहृतं॥अमात्यैः
सहितोराजाभवान्नस्त्वेचपुरेनृप॥१७॥एतच्छ्रुत्वाततन्तपोबलेनचतुरंगिणा॥लेभेचसकलंराज्यंधर्मराजा
न्महात्मनः॥१८॥भ्रातॄणांचशतंलेभेसावित्र्यपिवरांगना॥एवंपतिव्रतासाध्वीपितृपक्षंनृपात्मज॥१९॥
उज्जहारवरारोहाभर्तृपक्षस्तथैवच॥मोचयामासभर्तारंमृत्युपाशवशंगतं॥२०॥तस्मात्साध्व्यःस्त्रियःपूज्याःस
ततंदेववज्जनैः॥तासांराजन्प्रसादेनधार्यतेवैजगत्त्रयं॥२१॥तासांहिवाक्यंभवतीहसद्यःफलंतिकामाःसकला
अभीष्टाः॥तस्मात्सदाताःपरिपूजनीयाःकामान्समग्रान्अपिकामयानैः॥२२॥ ॥इतिश्रीसावित्र्युपाख्यानं
समाप्तं॥ ॥मनुरुवाच॥ ॥राज्ञोभिषिक्तमात्रस्यकिंनुकृत्यतमंभवेत्॥एतत्सर्वंसमाचक्ष्वसम्यग्वेत्सियतोभवा
न्॥१॥मत्स्यउवाच॥ ॥अभिषेकार्द्रशिरसातत्रराज्यंप्रतिष्ठितं॥यद्यप्यल्पतरंकर्मतदप्येकेनदुष्करं॥२॥पुरु
षेणसहायेनकिंतुराज्यंमहोदयं॥तस्मात्सहायान्वरयेत्कुलीनान्नृपतिःस्वयं॥३॥शूरान्कुलीनजातीया
न्बलयुक्तान्श्रियान्वितान्॥रूपसत्त्वगुणोपेतान्सज्जनान्क्षमयातथा॥४॥क्लेशक्षमान्महोत्साहान्धर्मज्ञां

ष्वप्रियेवरान्॥हितेपादशकाल्लात:स्वामिभक्तान्पदशोर्थिनं॥५॥एवंविधान्सहायांस्तुशुभकर्मसुयोजये
त्॥गुणहीनानपितथाविज्ञायनृपति:स्वयं॥६॥कर्मस्वेचनियुंजीतयथायोगेनभागश:॥कुलीन:शी
लसंपन्नश्चतुर्वेदविशारद:॥७॥हस्तिशिष्यादिकुशलोनित्यंहिश्लक्ष्णभाषितं॥निमित्तेशकुनज्ञानेवा
त्रचिवचिकित्सिते॥८॥कृतज्ञ:कर्मणांशूरस्तथाक्लेशसह:ऋजु:॥व्यूहतत्वविधानज्ञोफल्गुसारविशेष
वित्॥९॥राज्ञासेनापति:कार्योब्राह्मण:क्षत्रियोपिवा॥प्राज्ञ:सुरूपोदक्षस्तुप्रियवादीनचोद्धत:॥१०॥वि
नग्राहश्चसर्वेषांप्रतिहारोविधीयते॥यथोक्तवादीदूत:स्यात्देशभाषाविशारद:॥११॥शक्त:क्लेशस
होवाग्मीदेशकालविभागवित्॥विज्ञायदेशकालौचहितोय:स्यान्महीक्षितं॥१२॥वक्तापितस्यय:काले
सदूतोनृपतेर्भवेत्॥प्रांशवोव्यसन:शूराद्दृढभक्तिनिराकुला:॥१३॥राज्ञांतुरक्षिण:कार्या:सदाक्लेशसमाहि
ता:॥अनाहार्यन्नित्यंसंस्वदृढभक्तिश्चपार्थिवे॥१४॥तांबूलधारीभवतिनारीवाप्यथतद्गुणा॥षाड्गुण्यविधित
त्वज्ञोदेशभाषाविशारद:॥१५॥संधिविग्रहक:कार्योराज्ञानयविशारद:॥आयव्ययज्ञोलोकज्ञोदेशोत्पत्ति
विशारद:॥१६॥कृताकृतज्ञोभृत्यानांज्ञेय:स्याद्क्षरक्षिता॥सुरूपस्तरुण:प्रांशुर्दृढभक्तोकुलोद्भव:॥१७॥
शूर:क्लेशसहश्चैवखड्गधारीप्रकीर्त्तित:॥शूरश्चबलयुक्तश्चगजाश्वकोविद:॥१८॥क्लेशधारीभवेत्प्राज्ञ:सर्व

— —

क्लेशसहक्षम:॥निमित्तशकुनहयशिक्षाविशारद:॥१९॥हयायुर्वेदधर्मज्ञोभुवोभागविशेषवित्॥बलाबल
ज्ञोरथिन:स्थिरदृष्टि:प्रियंवद:॥२०॥शूरश्चकृतविद्यश्चसारथि:परिकीर्त्तित:॥अनाहार्य:शुचिर्दक्षश्चिकित्सि
तविदांवर:॥२१॥सूपशास्त्रविधानज्ञ:सूपाध्यक्ष:प्रशस्यते॥सूपशास्त्रविधानज्ञाकुलोद्भवा॥२२॥सर्वेमहान
सेकार्या:कृतकेशनखाजना:॥सम:शत्रौचमित्रेचधर्मशास्त्रविशारदा॥२३॥विप्रमुख्य:कुलीनश्चधर्माधि
करणीभवेत्॥कार्यविधास्तथास्तत्रद्विजमुख्या:सभासद:॥२४॥सर्वदेशालेखक:कथितोराज्ञ:सर्वाधिकरणे
षुवै॥शीर्षोपेतान्सुसंपूर्णान्समश्रेणिगतान्समान्॥२५॥अक्षरानुल्लिखेद्येलेखक:सपर:स्मृत:॥उपायवा
क्यकुशल:सर्वशास्त्रविशारद:॥२६॥बह्वर्थवक्ताचाल्पेनलेखक:स्यात्नृपोत्तम॥वाक्याभिप्रायतत्वज्ञोदेश
कालविभागवित्॥२७॥अनाहार्योभवेद्भक्तोलेखक:स्यान्नृपोत्तम॥पुरुषांतरतत्वज्ञा:प्रांशवोहिह्यलोलुपा:॥२८॥
धर्माधिकरणेकार्याज्ञानाहानकरानना:॥एवंविधास्तथाकार्याराजद्वारिकाजना:॥२९॥लोहवस्त्राजिनादी
नांरत्नानांविविधानवित्॥विज्ञाताफल्गुसाराणांअनाहार्या:शुचिस्मिता:॥३०॥निपुणश्चाप्रमत्तश्चधनाध्यक्ष:प्र
कीर्त्तित:॥व्ययद्वारेषुसर्वेषुधर्माध्यक्ष:समोनर:॥३१॥व्ययद्वारेषुसर्वेषुकर्त्तव्यादिपरीक्षक:॥पारंगतोयपस्तुस
तअष्टांगेषुचिकित्सिते॥३२॥अनाहार्य:सवैद्य:स्याधर्मात्माचकुलोद्भव:॥प्राणाचार्य:सविज्ञेयोवचनंतस्यभूभुज:

म०पु०
३६७

३३॥राजन्राज्ञासदाकार्यंयथाकार्यंपृथक्जनैः॥हस्तिशिक्षाविधानज्ञोवनजातिविशारदः॥३४॥क्लेशक्षमस्त
थाराज्ञोगजाध्यक्षःप्रशस्यते॥एतैरेवगुणैर्युक्तःस्थविरश्चविशिष्यते॥३५॥राजारोहेनरेंद्रस्यसर्वकर्मसुशस्य
ते॥हयशिक्षाविधानज्ञोश्वचिकित्सितपारगः॥३६॥अश्वाध्यक्षोमहीभर्तुःस्वासनश्चप्रशस्यते॥अनाहार्यश्च
शूरश्चवाग्मीप्राज्ञःकुलोद्गतः॥३७॥दुर्गाध्यक्षःस्मृतोराज्ञःउद्युक्तःसर्वकर्मसु॥वास्तुविद्याविधानज्ञोलघुहस्तो
जितक्रमः॥३८॥दीर्घदर्शीचशूरश्चस्थपतिःपरिकीर्तितः॥यंत्रमुक्तेपाणिमुक्तेसर्वतःपरिवारित॥३९॥अस्त्रा
चार्योतिरुद्वेगःकुशलश्चविशिष्यते॥वृद्धःकुलोद्गतःसूक्तःपितृपैतामहैःशुचिः॥४०॥राज्ञोंतःपुराध्यक्षोविनी
तश्चतथेष्यते॥एवंसर्वाधिकाराश्चपुरुषाःसप्ततेपराः॥४१॥राजकार्याणिगजाःसर्वेषुकर्मसु॥स्थापनाजाति
तत्त्वज्ञःसततंप्रति॥४२॥राज्ञःस्यादायुधागारेदक्षःकर्मसुचापतः॥कर्मण्यपिपरिमेयानिराज्ञोनृपकुलो
द्भव॥४३॥उत्तमाधममध्यानिबुध्वाकर्माणिपार्थिवः॥उत्तमाधममध्येषुपुरुषान्विनियोजयेत्॥४४॥
रैनेकर्मविपर्यासाद्राजानाशमवाप्नुयात्॥नियोगपुरुषभक्तिंश्रुतिशौर्यकुलंचयत्॥४५॥ज्ञात्वावृत्तिर्विधातव्या
पुरुषाणांमहीभुजा॥पुरुषांतरविज्ञानतत्त्वमात्रनिबंधनात्॥४६॥बहुभिर्मंत्रयेत्कामंराजासर्वत्रपृथक्पृथ
क्॥मंत्रिणामपिनोकार्यात्मंत्रिमंत्रप्रकाशनं॥४७॥क्वचिन्नकस्यविश्वासोभवतीहसदान्नृणां॥निश्चयश्चस

---- राम
२६७

दामंत्रेकार्यएकेनसूरिणा॥४८॥भवेद्वानिश्चयावाप्तिएकस्यैवमहीभर्तुर्भूयःकार्यविनिश्चये॥४९॥ब्राह्मणान्
पर्युपासीतधर्मकर्मसुनिश्चलात्॥नासतेहिंसोकर्मविप्रान्वेदविदःशुचीन्॥५०॥तेभ्योहिशिक्षेद्विनीतात्मा
नित्यशः॥समग्रांवशतांकुर्यात्पृथिवींनात्रसंशयः॥५१॥बहवोविनयात्भ्रष्टाराजानःसपरिच्छदाः॥ध
नानिचैवराज्यानिविनयात्प्रतिपेदिरे॥५२॥त्रैविद्येभ्यस्त्रयीविद्यांदंडनीतिंचशाश्वतीं॥आन्वीक्षिकींचात्मवि
द्यांवार्तारंभांश्चलोकतः॥५३॥इंद्रियाणांजयेयोगैःसमातिष्ठेद्दिवानिशं॥जितेंद्रियोहिशक्नोतिवशेस्थापयितुंप्र
जाः॥५४॥यजेत्राजाक्रतुभिःबहुभिर्नृदरिदक्षिणैः॥धर्मार्थमेवविप्रेभ्योदद्यात्भोगान्धनानिच॥५५॥सांव
त्सरिकमाप्तैश्चराष्ट्रादाहारयेद्बलिं॥स्याध्यायपरोलोकेवर्त्तेतपितृवंधुवत्॥५६॥आवृत्तानांगुरुकुलाद्द्विजा
नांपूजकोभवेत्॥नृपाणामक्षयोह्येषविधिर्ब्राह्मोविधीयते॥५७॥तंचह्येनानवामित्राहरंतिनविनश्यति॥तस्मा
द्राज्ञाविधातव्योब्राह्मणेष्वक्षयोनिधिः॥५८॥समोत्तमधर्मराजानन्निवर्त्तेतसंग्रामात्क्षात्रंव्रतमनुस्मरन्॥५
९॥संग्रामेष्वनिवर्त्तित्वंप्रजानांपरिपालनं॥शुश्रूषाब्राह्मणानांचराज्ञांनैःश्रेयसंपरं॥६०॥कृपणानाथवृद्धानां
विधवानांचपोषितां॥योगक्षेमंचवृत्तिंचतथैवपरिकल्पयेत्॥६१॥वर्णाश्रमव्यवस्थानंतथाकार्यविशेषतः॥स्व
धर्मप्रच्युतान्राजान्स्वेधर्मेस्थापयेत्सदा॥६२॥आश्रमेषुतथाकार्यअन्नंचैलं॥स्वयमेवजयेद्राजासत्कृतान्

म०पु०
३६८

वमानयेत्॥६३॥तपसे सर्वकार्याणि राज्यमात्मानमेव च॥निवेदयेत्प्रयत्नेन देववद्वैनमर्चयेत्॥६४॥हे प्राप्ते विदि
तव्ये च ऋज्वी वक्रे च मानवैः॥वक्रं ज्ञात्वा न सेवेत प्रतिबाधेत चागतं॥६५॥सात्विकं स्वमास्थाय ऋजीं च परिपा
लयेत्॥विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृंतति॥६६॥विश्वासयेच्चाप्यपरं तत्वभूतेन हेतुना॥बकवत्चिंत
येदर्थं सिंहवच्च पराक्रमेत्॥६७॥वृकवद्दृढप्रहारी च शवेत्शूकरवन्नृप॥चित्रकारश्च शिखिवत्दृढभक्तित
याश्ववत्॥६८॥भवेच्च मधुराभाषी हंसकोकिलवन्नृपः॥काकशंकी भवेन्नित्यं अज्ञातवसतिं वसेत्॥६९॥ना
परीक्षितपूर्वं तु भोजनं शयनं स्पृशेत्॥वस्त्रमलंकारं यथान्यं मनुजोत्तम॥७०॥जनसंबाधं मत्ताशातं जलाश्रयं॥
नापरीक्षितपूर्वं तु पुरुषैराप्तकारिभिः॥७१॥नारोहेत्कुंजरं व्यालं वदरंगं तथा॥नाविज्ञातां स्त्रियं गच्छेत् नै
व देवोत्सवे वसेत्॥७२॥नरेंद्रलक्ष्म्याधर्मज्ञात्राता भवेन्नृपः॥सत्याद्यैर्वतथापुष्पैः सततं प्रतिमानि
ता॥७३॥राज्ञा सहायाः कर्तव्याः पृथिवीं जेतुमिच्छता॥यथाहितान्वसुमतान्राजा कर्मसु योजयेत्॥७४॥धर्मि
ष्ठान्धर्मकार्येषु शूरान्संग्रामकर्मसु॥निपुणान्नर्थकृत्येषु सर्वत्रैव तथा शुचीन्॥७५॥स्त्रीषु षंढान्नियुं
जीत तीक्ष्णान्दारुणकर्मसु॥धर्मे चार्थे च कामे च भये चरविनेदृ न॥७६॥यथायथार्हं कुर्वीत उपधा
भिः परीक्षणं॥समतीतोपधान्भृत्यान्कुर्यात्हस्ति॥७७॥एवमादीनि कर्माणि पापैः कार्याणि भार्गव॥

राम
३६८

सर्वथा नेष्यते राजा तीक्ष्णोपकरणक्षयः॥७८॥पापसाध्यानि कर्माणि यानि राजन्नृपोत्तमं॥संतस्तानि न कुर्वंतित
स्मात्तानाश्रयेन्नृपः॥७९॥नेक्षते पृथिवीशानां तीक्ष्णोपकरणक्षयः॥यस्मिन्कर्मणि यस्य स्यात्विशेषेण च कौशलं
८०॥तस्मिन्कर्मणि तं राजा परीक्ष्य विनियोजयेत्॥पितृपैतामहान्भृत्यान्सर्वकर्मसु योजयेत्॥८१॥विना दाया
दकृत्येषु तत्र ते हि समागताः॥राजा दायादकृत्येषु परीक्ष्य च हुतांतरं॥८२॥नियुंजीत महाभाग तस्य ते हितकारि
णः॥परराजगृहात्प्राप्ता जनसंग्रहकाम्यया॥८३॥राजा देशांतरं प्राप्तं पुरुषं पूजयेत्भृशं॥ममायं देशसंप्राप्तो ना
वमानेन चिंतयेत्॥८४॥कामं भृत्यजनं तेजातो च कुर्यान्नृपोत्तमः॥नत्वेवासंविभक्तांस्तान्भृत्यान्कुर्यात्कथं
चन॥८५॥शत्रवोग्निर्विषं सर्पो निस्त्रिंशमपि चैकतः॥भृत्या मनुजशार्दूल सपिता स्वतथैकतः॥८६॥तेषां चारेया चा
रित्रं राजा विज्ञाय नित्यदा॥गुणिनां पूजनं कुर्यात्निर्गुणानां च शासनं॥८७॥कथिताः सततं राजन्राजानश्चारचक्षु
षः॥स्वके देशे परे देशे ज्ञानशीलान्विचक्षणान्॥८८॥अनाहार्यान्क्लेशसहान्नियुंजीत महानरान्॥जनस्या
विदितात्सौम्यांस्तथाज्ञातान्परस्परं॥८९॥वणिजो मंत्रकुशलान्सांवत्सरचिकित्सितान्॥तथा प्रव्रजिताकारांश्च
राजन्राजा नियोजयेत्॥९०॥नैकस्य राजा श्रद्दध्यात्चारस्यापि च भाषितं॥द्वयोः संवादमाज्ञाय श्रद्दध्यान्नृपतिस्ततः॥९१॥

म॰पु॰
२६९

परस्परस्याविदितौयदिस्यातांचरावुभौ॥तस्माद्राजाप्रयत्नेनगूढांश्चरान्प्रयोजयेत्॥९२॥राज्ञश्चमूलमेतावत्यारा
ज्ञश्चारदृष्टिता॥चराणामपियत्नेनराज्ञाकार्यंपरीक्षणं॥९३॥रागापरागौभृत्यानांजनस्यचगुणागुणं॥विज्ञानेरा
जधर्माणांसर्वंराज्ञश्चराज्यता॥९४॥तेषुयत्नंसमातिष्ठेत्कर्मणाकेनलौकिके॥विद्यतेचतथातेनविज्ञेयंतन्महीक्षि
ता॥९५॥अनुरागकरंलोकेकर्मकार्यंमहीक्षिता॥विरागजनसंसर्गंविवर्ज्यंनीयंप्रयत्नतः॥९६॥जनानुरागप्रभवा
हिलक्ष्मीःसंजायतेभास्करवंशचंद्र॥तथाप्रयत्नेनरेंद्रमुख्यकार्योनुरागोभुविमानवेषु॥९७॥ ॥इतिश्रीमत्स्यपु
राणेराजधर्मसहायसंपत्तिः॥मत्स्यउवाच॥ ॥यथानुवर्तितव्यंस्यान्मनोराज्ञोनुजीविभिः॥सर्वदानुसदाचारैनि र
बोधगतोममः॥१॥ज्ञात्वासर्वात्मनाकार्यस्विराज्ञःरविनंदन॥आक्षिप्यवचनंतस्यनकर्तव्यंतथावचो॥२॥अनु
कूलंप्रियंतस्यवक्तव्यंजनसंसदि॥चेतसिन्नागवि॥३॥स्वार्थेसुहृद्भिर्वक्तव्यंनस्वयंतुकथंचन॥कार्यातिपातःसर्वे
षुरक्षितव्यःप्रयत्नतः॥४॥नचहिंस्यंजनंकिंचित्नियुक्तेनचकर्मणि॥नापेक्ष्यंतस्यमानंचतथाराज्ञःप्रियोभवेत्॥५ राम॰
राज्ञश्चतनयोकार्यगतिभाषितचेष्टितं॥विवर्जयेत्॥६॥राज्ञासमाहितंकार्यंनस्वयंतुविजानता॥दूरादिषुतथैवा ३६९
स्यकौशलंतुप्रदर्शयेत्॥७॥मदर्पकौशलंचास्यराजानंविरोषयेत्॥अंतःपुरधनाध्यक्षैर्वैरदृतैःपराकृतैः॥८॥
यै

संसर्गंनव्रजेद्राजाविनापार्थिवशासनात्॥निःस्नेहंत्वंचयाचमानंतत्प्रयुक्तंतुगोपयेत्॥९॥यच्चगुह्यंनवेद्राज्ञो
नतल्लोकेप्रकाशयेत्॥नृपेणश्रावितंयस्मात्गुह्यात्गुह्यंनयोत्तमः॥१०॥नतत्संपादयेल्लोकेतथाराज्ञःप्रियो
भवेत्॥अन्योपांगानचान्यस्मिन्नुलाघवंतुव्रजेत्ध्रुवं॥११॥शैरोःप्रियाणिवाक्यानिनचात्यर्थंपुनःपुनः॥नहास्य
शीलश्चभवेत्नचास्यभ्रुकुटीमुखः॥१२॥नापिवक्ताननिर्वक्ताचमात्सरिकल्पषः॥आत्मसंभावितश्चैवनभवे वा
ति त्कथंचन॥१३॥दुःकृतानिनरेंद्रस्यनचसंकीर्तयेत्क्वचित्॥वस्त्रछत्रमविज्ञानेराज्ञादत्तंतुधारयेत्॥१४॥औ
दार्येणनतद्देयंअन्यस्मैभूमिच्छता॥नचैवात्मज्ञानंकार्यंनचस्वप्नंनकारयेत्॥१५॥नानिर्दिष्टेतथाद्वारेप्रविशे
तुकदाचन॥नचपश्येतराजानंअयोग्यासुचभूमिषु॥१६॥राज्ञस्तुदक्षिणेपार्श्वेवामेचोपविशेत्तथा॥पुरस्ता
त्तुतथापश्चादासनंतुविगर्हितं॥१७॥जंभनिष्ठीवनंकासंकोपंपर्यस्तिकाश्रियं॥भ्रकुटिवातमुद्गारिंकरणीयंविव
र्जयेत्॥१८॥हासंतथानकुर्वीतस्वगुणाख्यापूर्वयुजाः॥स्वगुणाख्यापनेयुक्त्यापरानेवनियोजयेत्॥१९॥हृद
यंनिर्मलंकृत्वापरांभक्तिंसमाश्रितैः॥अनुजीविगणैर्भाव्यंनित्यंराज्ञामतंद्रितैः॥२०॥शाठ्यंलौल्यंचपैशून्यंनास्तिकं
जडतांतथा॥चापल्यंचपरित्याज्यंनित्यंराज्ञोनुजीविभिः॥२१॥आस्तुपोज्यंमहात्मना॥राजसेवाततःकार्याभूतये
भूतिमिच्छता॥२२॥नमस्कार्याःसदाचास्यपुत्रवल्लभमंत्रिणः॥सचिवैश्चैवविश्वासोनचकार्यःकथंचन॥२३॥अ

म॰पु॰
३७०

हृष्ट्वास्यनब्रूयात्कामंब्रूयात्तथायदि॥इतंपथ्यंवचस्तथ्यंसहसानिश्चयंकृतं॥२४॥चित्तंचैवास्यविज्ञेयंनि
नुजीविभिः॥एवमाराधनंकुर्यात्चित्तज्ञोमानवःसुखं॥२५॥रागापरागौचैवास्यविज्ञेयौभृतिमिछता॥त्यजेत्प
रक्तंनृपतिंरक्ताद्वृत्तिंतुकारयेत॥२६॥विरक्तःकारयेतनाशंसंविज्ञायसुदयंतथा॥आशावर्द्धनकंकृत्वाफलरागंक
रोतिच॥२७॥आकोपेपिसकायामःप्रसन्नोपिसनिः॥सार्थसमंदवदतिवृत्तिंछेदंकरोतिच॥२८॥प्रवेशपकाक्य
मुदितोनसंभावयतेतथा॥आराधनासुसर्वासुसुप्तवच्चैवचेष्टते॥२९॥कथासुदोषंक्षिपतिवाक्यभंगंकरोतिच॥
लक्षतेविमुखश्चैवगुणसंकीर्त्तनेकृते॥३०॥दृष्टिंक्षिपत्यथान्यत्रक्षेपमाणास्वकर्मणि॥विरक्तलक्षणंत्वेतत्शृणुर
क्तस्यलक्षणं॥३१॥दृष्ट्वाप्रसन्नोभवतिवाक्यंगृह्णातिचादरात॥कुशलादिपरिप्रश्नंहृष्टोवदति॥३२॥विरक्तदर्शने
चासरहस्येनशंकते॥जायतेहृष्टवदनःश्रुत्वातस्यतुसंकथां॥३३॥अप्रियाण्यपिवाक्यानितदुक्तान्यभिनंदते॥
उपारतंचगृह्णातिस्तोकमप्यादरंतथा॥३४॥कथांतरेषुस्मरतिप्रहृष्टवदनस्तथा॥एवंरक्तस्यकर्त्तव्यासेवारविकु
लोद्वह॥आपत्सुचनसंदृष्टाविरक्तमधिसेवितं॥३५॥मित्रंनचापत्सुतथाचभृत्यंजंभियेनिर्गुणमप्रमेयं॥प्रभुंविशेषे
णचयेव्रजंतिसुरेंद्रधामामरहंदृष्ट्वा॥३६॥॥इतिश्रीमत्स्यपुराणेराजधर्मेनुजीविवृत्तंनाम॥॥मत्स्यउवाच॥॥राजा
सहायसंयुक्तःप्रभूतयवसंधनं॥रम्यमानंचसामंतमध्यमंदेशमाविशेत॥१॥वैश्यप्रायंचजनप्रायंअनाहार्यंतथा

राम॰
३७०

परैः॥किंचित्ब्राह्मणसंयुक्तंबहुकर्मकरंतथा॥२॥अदेवमातृकंरम्यंअनुरक्तजनान्वितं॥करैरपीडितंचापिब
हुपुष्पफलंतथा॥३॥अगम्यंपरचक्राणामाराधंसहसापदि॥समदुःखसुखंराज्ञःसततंचप्रियंस्थितं॥४॥
सरीसृपविहीनंचव्यालतस्करवर्जितं॥एवंविधंयथालाभंराजाविषयमाविशेत॥५॥तत्रदुर्गंनृपःकुर्यात्षण्णा
मेकतमंबुधः॥धन्विदुर्गंमहीदुर्गंनरदुर्गंतथैवच॥६॥वैवांबुदुर्गंचगिरिदुर्गंचपार्थिवः॥सर्वेषामेवदुर्गाणां
गिरिदुर्गःप्रशस्यते॥७॥दुर्गंचपरिखोपेतंवप्राट्टालकसंयुतं॥शतघ्नीयंत्रमुख्यैश्चशतशस्तुसमावृतं॥८॥गो
पुरंसकपाटंचतत्रस्यात्सुमनोहरं॥सपताकगजारूढोयेनराजाविशेत्स्वयं॥९॥चतस्रश्चतथातत्रकार्यास्तत्रोप
वीथयः॥एकस्मिंस्तत्रवीथ्यग्रेदेववेश्मभवेद्दृढं॥१०॥वीथ्यग्रेचद्वितीयेचराजवेश्मविधीयते॥धर्माधिकरणंका
र्यंवीथ्यग्रेचतृतीयके॥११॥चतुर्थेचैववीथ्यग्रेगोपुरंतुविधीयते॥जायतेचतुरस्रंवावृत्तंवाकारयेत्पुरं॥१२॥
अहीनंत्रिकोणंयत्रमध्यंतथैवच॥अर्द्धचंद्रप्रकारंचवज्राकारंचकारयेत॥१३॥अर्द्धचंद्रप्रशस्तंतुनदीतीरे
षुतद्वसेत॥अन्यत्रतुनकुर्वीतप्रयत्नेनविजानता॥१४॥राज्ञाकोशगृहंकार्यंदक्षिणेराजवेश्मनः॥तस्या
पिदक्षिणेभागेगजस्थानंविधीयते॥१५॥गजानांप्राङ्मुखीशालाकर्त्तव्यावाप्युदङ्मुखी॥आग्नेय्यांचतथा
भागेआयुधागारमिष्यते॥१६॥महानसंचधर्मज्ञकर्मशालास्तथापरा॥गृहंपुरोधसःकार्यंवामतोराजवेश्मनः॥

१७॥ मंत्रिदैवविदांचैवचिकित्साकर्तुरेवच॥ नवैवचमहाभागमहानसंचविधापयेत्॥१८॥ गवांस्थानंतथैवात्रतुरंगाणां
तथैवच॥ उत्तराभिमुखाश्रेणीतुरंगाणांविधीयते॥१९॥ प्राङ्मुखावापिधर्मज्ञपरिशेषास्तुगर्हिता॥ तथाकार्यास्तु
रंगाणांहितैषिणा॥२०॥ गोरजास्त्वादिशान्तपुरीषस्यनिर्गमः॥ असंगतेनकर्तव्योदेवदेवेदिवाकरे॥२१॥ ततस्त
त्रयथास्थानंराजाविज्ञातसारथिः॥ दद्यादावसथस्थानंसर्वेषामनुपूर्वशः॥२२॥ योधानांशिल्पिनांचैवसर्वेषाम
विशेषतः॥ दद्यादावसथस्थानंदुर्गेविदांशुभान्॥२३॥ गोवैद्याश्ववैद्यांश्चगजवैद्यांस्तथैवच॥ आहरेत्तन्नृपः
राजादुर्गेप्रबलारुजः॥२४॥ कुशीलवानांविप्राणांदुर्गेस्थानंविधीयते॥ बहूनांचननेदुर्गेविनाकार्यंनोभ
वेत्॥२५॥ दुर्गेतुयंत्राःकर्तव्यानानाप्रहरणान्विताः॥ सहस्रघातिनोराजन्तैस्तुरक्षाविधीयते॥२६॥ दुर्गेद्वारा
णिगुप्तानिकार्याण्यपिचभूभुजा॥ संग्रहश्चात्रसर्वेषांआयुधानांप्रशस्यते॥२७॥ धनुषःक्षेपणीयानांतोमरा
णांचपार्थिवः॥ शराणामथखंगानांकवचानांतथैवच॥२८॥ लगुडानांगुडानांचहुडानांपरिघैःसह॥ कुदा
रखङ्गवेत्राणांघटिकानांतथैवच॥२९॥ सर्वेषांशिल्पभाजानांसंचयस्तत्रचेष्यते॥ वादित्राणांचसर्वेषांऔषधानां
तथैवच॥३०॥ यवसानांप्रभूतानांइंधनानांतथैवच॥ गुडस्यसर्वतैलानांगोरसानांतथैवच॥३१॥ वसाजूतांसव
न्राणांस्नायूनामस्थिभिःसह॥ गोचर्मपटहानांचधान्यानांसर्वतस्तथा॥३२॥ राजासंचिनुयात्तथैवास्तपटानां

वयवगोधूमयोरपि॥ मणरवजर्जरसंभूर्जवत्सुसाक्षातकंवरं॥३३॥ राजासंचिनुयातदुर्गेयच्चान्यदपिकिंचन॥ र
त्नानांसर्वलोहानांवस्त्राणांचाप्यशेषतः॥३४॥ कोद्रवन्मुद्गमाषाणांचणकानांतिलैःसह॥ तथाचसर्वसर्वस
स्यानांपांशुगोमययोरपि॥३५॥ कुंभोश्वासायपीयुक्तान्यपानसिंहादयस्तथा॥ दंगांश्चपक्षिणश्चैवरक्षास्तेचप
रस्परं॥३६॥ स्थानानिचविरुद्धानांसुगुप्तानिपृथक्पृथक्॥ कर्तव्यानिमहाभागयत्नेनपृथिवीभुजा॥३७॥ उ
क्तानिचाप्यनुक्तानिगजद्रव्याण्यशेषतः॥ सुगुप्तानिपरंकुर्यातजनानांहितकाम्यया॥३८॥ जीवकर्षभकका
कोलमामलक्यापरुषकः॥ शालपर्णीपृश्निपर्णीमुद्गपर्णीतथैवच॥३९॥ माषपर्णीचमेदाफलत्रयं॥ वीणास्त्र
मेत्रीह्यस्लीचबृहतीकटकारिका॥४०॥ शृंगीशृंगाटिकाद्रोणीतक्षाभद्रहसाभ्रिका॥ मधुपर्णीतिसर्वेषांमहाक्षु
द्रामहातथा॥४१॥ धन्वनासहदेव्याख्याकटुकेरंडकंविषं॥ पर्णीद्विमदीकाकलमषक्षुरयष्टिका॥४२॥ शुक्राति
शुक्लकाश्मर्यछिन्नातिछद्रवैरिणः॥ इक्षुरिक्षुविकर्षांश्चफलिताश्चाम्वगंतमः॥४३॥ महाचसहदेवाचविश्वदेवा
टरूषकः॥ मधूकपुष्पंषष्टांशातात्पामघूलिका॥४४॥ शतावलामधूकीचप्रियालस्थाजमेवच॥ श्वाता
कपालाख्याक्षारदाराजसारका॥४५॥ राज्ञाऋषभकंकयानस्याक्रुसाप्रोक्तातयोत्कटा॥ कालशाकंपद्मबीजंगोवल्ली
मधुवल्लिका॥४६॥ शीतपीतोजलजीमाक्षीकाकजिह्वारुपत्रिका॥ कसेरुक्तःपुषौवाभोपुनर्नवस्तथैवच॥४७॥

कर्कोटवासेरुवाणकं॥एवमादीनिचान्यानिविधिनोमधुरोगणः॥४८॥राजासततयासर्वंपुरेनिरवशेषतः॥दाडि
मांम्लीवनितिडीकाम्लवेतसं॥४९॥न्यकर्कंधुलकुचकरमंदाररूपकं॥बीजपूरकांडेरंशालकीरसुना॥५०॥
कालकरुयपल्मीनिकयोराम्रेकयोरपि॥नागदंतियानिचोक्तानिसर्वाणिज्ञेयाम्लंवर्गणोद्विजाः॥५१॥एवमा
द्यान्यानिराजासंचिनुयात्पुरे॥सैंधवोषातेयकुप्पासौवर्चला।बिल्वंकालकेयपवाकर्कं॥५२॥फलेशणवि
ज्ञेयोलवणोगणः॥एवमादीनिसर्वाणिराजासंचिनुयात्पुरे॥५३॥पिप्पलीपिप्पलीमूलंचित्रकंनागरंतथा॥
कुवेरंचसमीरंचसिद्धार्थीनिद्धतसर्षपाः॥५४॥कुंकुमोदकनिर्माहिंगुस्तथाचमूलवान्पकं॥कुरवाकुलि
कारवाजरासुमुखाकासमालिका॥५५॥फणिजाकोवलमुरंमूतणंसुरसंतथा॥सर्वपित्तानिमूत्राणि
प्रियोवैहतकानिच॥५६॥फणानिचैवसूक्ष्माणिसूक्ष्मैलाहिंगुयावकं॥एवमादीनिसर्वाणिराजासंचिनु
यात्तद्धनैः॥५७॥एवमादीनिसर्वाणिगणकंचुकमंजुकं॥राजासंचिनुयात्दुर्गेप्रयत्नेननृपोत्तमः॥५८
सप्तचंदनदीपेरक्तमालकस्यवर्णं॥हरिद्राचतथोशीररक्तशालिकबंधुना॥५९॥दूर्वापटोलकटुकेदीप
लकृपत्रकंतथा॥केतकानिचयुग्मानियष्टीणिविषाणिच॥६०॥शालीनपत्रनगरंसप्तपर्णकिकंतथा॥काको
दुंवरिकादीप्यासमघकणिकालकं॥६१॥खंडवारोहिणीमांसीपावीगेहदंतिका॥रसांजनंभंगरसपर्णपरि

छदं॥६२॥तेम्योपांगुरषीकासइपामार्गकंधुकांगुली॥त्रसपत्र्याव्याघ्रमुखीसारंगाचतुरंगुलः॥६३॥रंभांचै
वांकुशंगंभेत्तारसोम्हररेणुका॥वैत्राभावैतसत्सुरवीविषाणालोहमंजरी॥६४॥मालतीकरतिक्ताख्याविषमा
जिषमाजिह्मकांतथा॥पर्षढंचगडूचीचसगराख्यातिसंज्ञिका॥६५॥एवमादीनिसर्वाणिराजासंचिनुयात्पु
रे॥अन्नयामलकेवानेतथैवचविभीतकः॥६६॥प्रियंगुधातुकीपुष्पंमोवावैराजनागरः॥अनंताख्रिपुत
र्नामाइपेनकफलंतथा॥६७॥रुदंतीपाटलोक्षेदपाटलोपहनेदकं॥समज्ञाचहताम्रलकर्पासानांतिकां
जनैः॥६८॥तिंदुकंममधुच्छिष्टंकुंभीकुंजसमोसलं॥अश्वत्थौदुंवराश्वत्थकिंशुकाविरिसिपातथा॥६९॥संज्ञा
पिप्पलपीडावाशिरीषःपटकंतथा॥रुदंतीपाटलोक्षेदःपाटलापद्मलोध्रकं॥७०॥समुज्ञाचहताम्रलकर्पासा
नांतिकांजनैः॥तिंदुकंसमधुच्छिष्टंकुंभीकंकुसुमोत्पलं॥७१॥व्याघ्रघ्नोदुंवरोनिंबराद्यानंकरीरेववर्षकिप्रिय
कौतथा॥कर्कोटाशोकबदरकदंबखदिराह्वयः॥७२॥एषांपत्राणिसाराणिमूलानिकुसुमानिच॥एवमादी
निसर्वाणिकरुयायोरखोगणोमतः॥७३॥प्रयत्नेननृपश्रेष्ठराजासंचिनुयात्पुरे॥कल्याश्वमारणेपोम्पाह
षमाणांतथैवच॥७४॥वातप्रमांशुमापायांइषणानांतथैवच॥धायीणिपार्थिवैर्दुर्गेतांस्तुवक्ष्यामिपार्थिव
७५॥महीभुजाविचित्राश्चाविपत्स्वराममनास्तथा॥रक्षोभूतपिशाचानांपापघ्नांपुष्टिवर्द्धनां॥७६॥कलाविद

ध्यपुरुषादुर्गेधा यः प्रयत्नतः॥भीतान्क्रुद्धान्प्रमत्तांश्च तथावचनमानितान्॥७७॥कुमृत्यान्पापशीलांश्च
नराजावासयेत्पुरे॥७८॥ ॥इतिश्रीमत्स्यपुराणेराजधर्मेदुर्गसंपत्तिर्नामाध्यायः॥ ॥मनुरुवाच॥ ॥रक्षोघ्नानि
विषघ्नानियानिधार्याणिभूभुजा॥आयेदानींसमाचक्ष्वतानिधर्मवतांवर॥१॥ ॥मत्स्यउवाच॥ ॥बिल्वाढ
कीयवक्ष्यामिपटोलीवह्निकोषणा॥त्रिपर्णीसत्त्वकीसुक्तानिकापाशोक्षणंपरं॥२॥सविषंप्रोक्षितंतेनस
द्योभवतिनिर्विषं॥यवसेंधनपानीयवस्त्रशय्यासनोदकं॥३॥कवचाभरणंछित्रंवालव्यजनवेश्मच॥शेलु
पाटलानिविषाशीसुगोपीपुनर्नवा॥४॥समंताहस्तमूलंचकपित्थंविषशोणितं॥सहदेवीहरिन्द्रेविषना
शंप्रकीर्तितं॥५॥लाक्षाप्रियंगुमंजिष्ठासमंगाहरेणुकां॥यष्ट्याव्यामधुनायुक्ताबभ्रुपित्तेनकल्किता॥
६॥निक्षिपेत्गोविषाणस्थासप्तरात्रंमहीतले॥ततःकृत्वामणिंहेम्नाबद्धहस्तेनधारयेत्॥७॥संस्पृष्टंसविषं
तेनसद्योभवतिनिर्विषं॥नामाक्षायश्यामीपुष्पीतुंडिकाश्वेतवर्षया॥शीकपित्थकुष्ठमंजिष्ठारजनीमधुका
मधु॥अक्षत्वग्निरसंलाक्षापूजितासर्वविस्मणि॥९॥वादिवाणिपताकासुपिरेतैर्विलेपितः॥श्रुत्वादृष्ट्वासमा
घ्रायसद्योभवतिनिर्विषः॥१०॥त्र्यूषणंपंचलवणंमंजिष्ठारजनीद्वयं॥सूक्ष्मैलात्रिवृतापत्रंविडंगानींद्रवारणी॥
११॥मधुकेचितिच्छक्षौशृंगेविषाणेविधारयेत्॥तस्मातदुष्टतनामममात्रंप्राप्युक्तंविनियोजयेत्॥१२॥विषभुक्तंज

रंयातिनिर्विषंपित्तदोषकृत्॥जतुसर्जरसोशीरसर्षपापत्रालकैः॥१३॥सबिल्वारस्करसुरैःकुसुमैरर्जुन
स्यतु॥धूपोवासगृहेहंतिविषंस्थावरजंगमं॥१४॥नतत्रकीटाःसविषानोदुरानसरीसृपाः॥नकृत्याकर्मणाद्यं
धूपोयंयत्रदह्यते॥१५॥शिखिपिच्छबलाकास्थिसर्षपाश्वंदनंयुतं॥धूपोविषघ्नःशापनवसनासनगेहगः॥१६॥
एवोक्तंभूपगोद्यंचस्नानेनाभसियोजयेत्॥कापोवाअर्यकुसुमश्वेतापामार्गसर्षपैः॥१७॥सदध्याघृतायुक्ताः
कामोनान्यकुलद्वयः॥कल्कोवाचंदनक्षीरपलाशद्रुमवल्कलैः॥१८॥मूर्वेलिवालसरसनाकुलीतंदुलीयकैः
क्वाथःस्फोटकार्येषुचमानायुनोहिनः॥१९॥रोचनात्ररदेवालीकंकुमेस्तिलकंवहन्॥विषेर्नबाध्यतेसाधु
नरनारीनृपप्रियः॥२०॥चूर्णैर्हरिद्रामंजिष्ठाकिणाकीकणनिंबजैः॥दृष्टंनिर्विषतामेतिगात्रंसर्वमपार्दितं॥
२१॥शिरीषस्यफलंपत्रंपुष्पंत्वङ्मूलमेवच॥गोमूत्रपिष्टोगदःसर्वकर्मकरःस्मृतः॥२२॥एकवीरंमहौषध्यः
शृंगवेरंतथैवच॥वंध्याकर्कोटकीराजन्विष्णुक्रांतातथोत्कटी॥२३॥शतमूलाशतानंदाबलामोचापटोलि
का॥श्यामपीडानिशाचैवतथादग्धरुहाचया॥२४॥स्थलेकमलनीयाचपिंडलीशंखमूलिका॥चंडालीहस्ति
चंडालीगोचंडालीकबंधिका॥२५॥रक्ताचैवमहारक्तातथाबर्हिशिखाचया॥कोशातकीनक्तमालप्रियालसुल
क्षणा॥२६॥वारुणावसुगंधाचतथावैरोधनाकुली॥ईश्वरीशिवगंधाचश्यामलीवंशनालिका॥२७॥जातुका

म॰पु॰
३७५

रीमहाश्वेताश्वेताचमधुयष्टिका॥वन्ध्याचपारिभद्रश्चतथावैमिंडकारिका॥२८॥मंडूकपर्णीवाराहीद्वेतथातंदु
लीयके॥सपक्षीलवणाब्राह्मीविश्वरूपासुखंकरी॥२९॥जीवानंदाचसुमतीनगरकंटका॥तालकंचजालजातं
चतथाचवटपत्रिका॥३०॥बकुक्षीरातथानीलीकुगरं हंसपादिका॥रुजापहाद्धिकरीतथाशस्त्रापहाचया॥
३१॥पत्रकालीरोहिणीचरक्तलीचमहौषधी॥तमलकतंदाकंयावचित्रपटात्मिका॥३२॥काकोलीक्षीरकाको
लीपीलुपर्णीवती॥केशिनीवृश्चिकालीचमहारागाव्रातावरी॥३३॥तथागरुडवेगाचस्थालकमलिनीतथा॥स्थ
लेचोत्पजनीयाचमहाभूमिवतीतथा॥३४॥उन्मादनीसोमराजीशिवरत्नानीपार्थिव॥विशिखामरचान्यत्रकी
टपक्षंविशेषतः॥३५॥जीवजाताश्चमणयःसर्वेधार्याविशेषतः॥रक्षोघ्नाश्चविषघ्नाश्चकृत्यावेतालनाशनाः
३६॥विशेषाजरनागाश्वगोराष्ट्रेषुसमुद्भवाः॥सपतितत्तिरिगोमायुवभ्रुमंडूषलाश्रये॥३७॥सिंहव्याघ्राक्ष
मार्जारद्वीपिवानरसंभवाः॥कपिंजलाजगोवाहमहिषेणभवाश्रये॥३८॥इत्येवमेतैःसकलैरुपेमैर्द्रव्यैःप
राध्यैःपरिरक्षितःस्यात्॥राजावसेत्तत्रगृहेचशुभ्रेगुणान्वितेलक्षणसंप्रयुक्ते॥३९॥ ॥इतिश्रीमत्स्यपुरा
णेराजधर्मेअगदाध्यायः॥ ॥मनुरुवाच॥ ॥राजरक्षारहस्यानियानिदुर्गेमधारयेत्॥धारयेद्यामहीभर्त्ताब्रू
हितत्वेनतानिमे॥१॥ ॥श्रीमत्स्यउवाच॥ ॥शिरीषोदुंबरशमीबीजपूरंघृतप्लुतं॥क्षुद्योगःकथितोराजन्मास

राम
३७५

र्द्धस्यपुरातनैः॥२॥कसेरुफलमूलानिइक्षुमूलंतथाविधं॥दूर्वाक्षीरघृतैर्मण्डःसिक्तोयःसमासिकः॥३॥
नरंश्वास्त्रहतंप्राप्यवासव्याशुकसारणौ॥कल्माषवेणुणातत्रजनयेत्तुविभावसुं॥४॥गृहेनिरपसव्यंचक्रि
यतेयत्रपार्थिवः॥ज्वलत्यग्नौनतत्रापिनात्रकार्याविचारणा॥५॥कर्पासास्थिभुजंगस्यतथानिर्मोचिनोभ
वेत्॥सर्पनिर्वासिनोनृपःप्रशास्तःसततंगृहे॥६॥सामुद्रंसैंधवंयवक्षारविद्युद्दग्धाचमृत्तिका॥तैर्विलिप्तंचयु
हेस्मिन्अग्निनादह्यतेनृपः॥७॥दिवाचदुर्गेरक्षोभिवातिवातेविशेषतः॥विलयास्वरक्षान्नृपाणांतत्रशुभ्रके
निबोधमे॥८॥क्रीडानिमित्तंनृपतिधारयेन्मृगपक्षिणः॥अन्नंवैप्राक्परीक्षेतवह्नौचाग्न्येतरेषुच॥९॥वस्त्रंप
त्रमलंकारंभोजनाच्छादनंतथा॥नापरीक्षितपूर्वंतुस्पृशेदपिमहीपतिः॥१०॥श्यामास्यश्चाकसंतप्तःसोद्वेगं
चनिरीक्ष्यते॥विषदोषनिषेधार्थंसततंतुनिरीक्ष्यते॥११॥अस्तोत्तरीयोविमनास्तंभकुड्यादिभिस्तथा॥प्र
च्छादयतिचात्मानंलज्जतेत्वरतेतथा॥१२॥भुवंविलिखतिग्रीवांस्वैरंचालयतेतथा॥कंडूयतेचमूर्धानंपरि
लेढ्यधरंतथा॥१३॥क्रियासुत्वरतेराजाविपरीतास्वपिब्रुवन्॥एवमादीनिचिह्नानिविषदस्यपरीक्षयेत्॥
१४॥गतिःस्खलतिहंसस्यवदेत्तुस्वरयान्वितः॥इंगापुधसवर्णंतुरूक्षंस्फोटसमन्वितं॥१५॥एकावर्तोपिदुर्ग
धीभ्रशंचरयपते॥ततस्तत्सेवनाज्जाड्यंताःशिरोरोगश्चजायते॥१६॥सविष्यत्तेविलीयंतेनचपार्थिवमक्षि

का॥मिलीनाश्चविषयुंतेदृष्टेचसविषेतथा॥१७॥विरज्यतिचकारस्य दृष्टिःपार्थिवसत्तम॥विकृतिंचस्वरोयातिकोकि
लस्यतथाद्विज॥१८॥गतिश्चलतिहंसस्यभृंगश्चहरिकूजति॥क्रौंचोमदमथाप्नोतिकृकताकुर्विरौतिच॥१९॥विक्रो
शतिशुकोराजन्लीयतेजीवजीवकः॥हृष्टरोमानवेत्बभ्रुः पृषतश्चैवरोदिति॥२०॥हर्षमायातिचशिखीविषसंद
र्शनाद्द्विज॥अन्नंचसविषंराजन्चिरेणचविपच्यते॥२१॥तथारुचत्यतिश्राव्यंपक्वंपर्युषितोपमं॥व्यपेतरसगंधं
चचंद्रिकानिःस्रुतायुतं॥२२॥व्यंजनानांतुशुष्कत्वंद्रव्याणांबुद्बुदोद्भवः॥ससैंधवानांद्रव्याणांजायतेफेनलाल
ता॥२३॥रसस्यराजनीलाभाताम्राचपयसस्तथा॥कोकिलाभावमद्यस्यतोयस्यचनृपोत्तम॥२४॥धान्याम्लस्यात
स्यकृष्णाकपिलाकोद्रवस्यच॥मधुश्यामातक्रस्यनीलपीतातथैवच॥२५॥घृतस्योदकसंकाशाकपोताभा
वमस्तुनः॥हरितामाक्षिकस्यातैलस्यचतथारुणः॥२६॥मृदुनांकविनेसंपतंमृदूनांचविपर्ययः॥सूक्ष्माणांरूप
दर्शनंतथाचैवातिरागवान्॥२७॥श्याममंडलताचैववस्त्राणांचविशेषतः॥लोहानांचमणीनांचमलपंकोपदि
ग्धता॥२८॥अनुलेपनगंधनांस्रानानांचनृपोत्तम॥विगंधताचविज्ञेयावर्णानांम्लानतातथा॥२९॥पिनाभास
चविज्ञेयातथाराजन्जनस्ततः॥दिनकाष्ठायवोमावाम्नुसत्वास्तथैवच॥३०॥एवमादीनिचिह्नानिविज्ञेयानि
नृपोत्तम॥तस्माद्राजासदातिष्ठेन्मणिमंत्रौषधादिभिः॥३१॥उक्तैसंरक्षितोराजन्प्रमादपरिवर्जकः॥प्रजातजोष्ट

चमिहावनीशस्तद्रक्षणात्दृढिसुपैतिराष्ट्रं॥तस्मात्प्रयत्नेननृपस्यरक्षासर्वेणकार्यारविवंशचंद्र॥३२॥ ॥इतिश्री
मत्स्यपुराणेधर्मराजरक्षानाम॥ ॥मत्स्य उवाच॥ ॥राजपुत्रस्यरक्षाचकर्तव्यापृथिवीक्षिता॥आचार्यैश्चास्यक
र्तव्योनित्ययुक्तैश्चरक्षणं॥१॥धर्मकामार्थशास्त्राणिसर्ववेदांगविक्षितः॥रथेषुकुंजरेचैवव्यायामंकारयेत्सदा॥२॥
शिल्पानिशिक्षयेदीनैनाप्तैर्मिथ्याप्रियंवदेत॥शरीररक्षाव्याजेनरक्षागोश्चनियोजयेत्॥३॥नचाष्टाशिष्यादत
व्याक्रुद्धलुब्धावमानितैः॥तथापिविनयेदेनंयथायौवनगोसुखे॥४॥इंद्रियैर्नविकृष्येतमनोमार्गान्सुदुर्गमान्॥
गुणाधानमशक्यंतुयस्यकर्तुंस्वभावतः॥५॥बंधनंतस्यकर्तव्यंगुप्तेदेशेसुखान्विते॥अविनीतंकुमारंहिकुलमाशु
विशीयते॥६॥अधिकारेषुसर्वेषुविनीतंविनियोजयेत्॥आदौस्वल्पेततःपश्चात्क्रमेणाथबृहत्स्वपि॥७॥मृग
यांपानपक्षांश्चवर्जयेत्पृथिवीपतिः॥एतान्यासेवमानास्तुविनष्टाःपृथिवीभुजः॥८॥बहवोरविशार्दूलसंख्या
येषांनविद्यते॥दिवास्वापंक्षितीशस्तुविशेषेणविवर्जयेत्॥९॥अर्थानांदूषणंचैकंतथार्थेनचदूषणं॥वाक्पारु
ष्यंनकर्तव्यंदंडपारुष्यमेवच॥१०॥परोक्षनिंदाचतथावर्जनीयामहीक्षिता॥अर्थस्यदूषणंराजन्द्विप्रकारं
विवर्जयेत्॥११॥अर्थानांदूषणंचैकंतथार्थेनचदूषणं॥आकाराणांसमुच्छेदोदुर्गादीनामसत्क्रिया॥१२॥अर्था
नांदूषणंप्रोक्तंविप्रकीर्णत्वमेवच॥अदेशकालेपात्रेभ्योनामपात्रेदानमेवच॥१३॥कामंक्रोधंमदंमानंलोभंदर्पंत

थैवच॥जेतव्यमारिषंदुर्गंस्तुतरां पृथिवीक्षिता॥१४॥ एतेषां विजयं कृत्वा कार्याकार्येष्वसत्पत॥ कृत्वा भृत्यजयं रा
जा पौरजानपदान्जयेत्॥१५॥ कृत्वा तु विजयं तेषां स कृत्वात्वांस्ततो जयेत्॥ बाह्यास्तु त्रिविधा ज्ञेयास्तुल्यास्वं
तत्र कृत्रिमाः॥१६॥ गुरवस्ते यथा पूर्वं तत्सुपत्नः सदा भवेत्॥ पितृपैतामहं मित्रं सामंतं च तथा रिपुः॥१७॥ कृत्रिमं
च महाभाग मित्रं चैव विधमुच्यते॥ तथा पि च गुरुः पूर्वो भिविताऽपि च ताद्दशः॥१८॥ स्वाम्यमात्यं जनं पाताः दुर्गं दंड
स्तथैव च॥ कोशा मित्रं च धर्मज्ञ सप्तांगं राज्यमुच्यते॥१९॥ सप्तांगस्यापि राज्यस्य मूलं स्वामी प्रकीर्तितः॥ तन्मू
लत्वात्तथांगानां स तु रक्ष्यः प्रयत्नतः॥२०॥ षडंगरक्षा कर्तव्या तथा तेन प्रयत्नतः॥ अंगेभ्यो यस्तथैको पि मा
हं कुर्यात्सबलाधिकः॥२१॥ वधस्तस्य प्रकर्तव्यः शीघ्रमेव महीक्षिता॥ न राज्ञा मृदुना भाव्यं मृदुर्हि परिभूयते॥
२२॥ न भाव्यं दारुणेनापि तीक्ष्णादुद्विजते जनः॥ कालेमृदुर्यो भवति काले भवति दारुणः॥२३॥ राजा लोकद्वया
पेक्षी तस्य लोकद्वयं भवेत्॥ भृत्यैः सह महीपालः परिहासं विवर्जयेत्॥ भृत्याः परिभवंतीह नृपं हर्षितसंकथा
व्यसनानि च सर्वाणि भूपतिः परिवर्जयेत्॥२५॥ लोकसंग्रहणार्थाय कृतकव्यसनी भवेत्॥ शौंडीरस्य नरेंद्रस्य
स नित्यमुत्सिक्तचेतसः॥२६॥ जना विरागमायांति सदा दुःसेव्यभाषतः॥ स्मितपूर्वाभिभाषी स्यात् सर्वस्यापि म
हीपतिः॥२७॥ अन्येष्वपि महाभाग भृकुटीं न समाचरेत्॥ भाव्यं धर्मभृतां श्रेष्ठ स्थूललक्षेण भूभृता॥२८॥ स्थूल

लक्ष्यस्य वशगा नासर्वा भवति मेदिनी॥ अदीर्घसूत्रश्च भवेत्सर्वकर्मसु पार्थिव॥२९॥ दीर्घसूत्रस्य नृपतेः कर्महानिर्ध्रु
वं भवेत्॥ रागे दर्पे च माने च द्रोहे पापे च कर्मणि॥३०॥ अप्रिये चैव कर्तव्ये दीर्घसूत्रः प्रशस्यते॥ राज्ञा संवृतमंत्रेण सदा
भाव्यं नृपोत्तम॥३१॥ तस्य संहतमंत्रस्य ज्ञेयाः सर्वापदो ध्रुवं॥ कृतान्येव तु कार्याणि ज्ञायंते यस्य भूपतेः॥३२॥ विवि
धानि महाभाग तस्य स्याद्वसुधा वशे॥ मंत्रमूलं सदा राज्यं तस्मान्मंत्रं सुरक्षितं॥३३॥ कर्तव्यं पृथिवीपालैर्मंत्रभेद
भयात्सदा॥ मंत्रवित्साधितो मंत्रः संजातानां सुखावहः॥३४॥ मंत्रच्छलेन बहवो विनष्टाः पृथिवीभृतः॥ आकारैरिं
गितैर्गत्या वपुषा भाषणेन च॥३५॥ नेत्रवक्त्रविकारैश्च गृह्यतेंतर्गतं मनः॥ न यस्य कुशलैस्तस्य जयेत्सर्वा वसुंध
रा॥३६॥ भवतीह महीभर्तुः सदा पार्थिवनंदन॥ नैकस्तु मंत्रयेन्मंत्रं न राजा बहुभिः सह॥३७॥ वीरो हेषमंतोवा
म परिक्षितनायकं॥ ये वास्य भूमिजयतो भवेयुः परिपंथिनः॥३८॥ तानानयेद्वशे सर्वान्सामादिभिरुपक्रमैः॥
यथा न स्यात्क्लेशो भावः प्रजानामनवेक्षया॥३९॥ तथा राज्ञा वर्तितव्यं स्वराज्यं परिरक्षता॥ मोहाद्राजा स्वराष्ट्रं यः
कर्षयत्यनवेक्षया॥४०॥ सोचिराद्भ्रश्यते राज्याज्जीविताच्च सबांधवः॥ एतत्संभृतो जाबालः कर्मीयो ग्योपष्या नुवेत
४१॥ तथा राष्ट्रं महाभाग भृतं कर्म समावहेत्॥ यो राष्ट्रमनुगृह्णाति राज्यं स परिरक्षति॥४२॥ संजातमुपजीवेन विंदते
स महत्फलं॥ राष्ट्राद्धिरण्यं धान्यं च महाराजा सुरक्षितं॥४३॥ नित्यं स्वेभ्यः परेभ्यश्च पयो माता यथा पिता॥ गोपि

तानिसदाकुर्यात्संयतानींद्रियाणिच॥४४॥अजस्रमुद्योक्तव्यंफलंतेभ्यस्तथैवच॥सर्वंकर्मदमापन्नंवेधामेदैव
मानुषे॥४५॥तयोर्दैवमचिंत्यंहिपौरुषेपद्यतेक्रिया॥एवंमहीपालयतोस्यमनुर्लोकानुरागंप्रभवाहिलक्ष्मील
क्ष्मीवतश्चैवपराचलक्ष्मीः॥४६॥ ॥इतिश्रीमत्स्यपुराणेराजधर्मानुकीर्तनं॥ ॥मनुरुवाच॥ ॥दैवेपुरुषका
रेचकीकलंतद्ब्रवीहिमे॥अत्रमेसंशयोदेवशंसकेतद्ब्रवीषया॥१॥ ॥श्रीमत्स्यउवाचच॥ ॥अहेतुःकर्मदै
वाख्यंविद्धिदेहांतरार्जितं॥तस्मात्पौरुषमेवेहश्रेष्ठमाहुर्मनीषिणः॥२॥प्रतिकूलंतथादैवंपौरुषेणविनातेषां
भवेत्॥येषांचपौरुषंराजन्केषांचित्तद्दृश्यतेफलं॥३॥कर्मणाप्राप्यतेलोकेराजसेस्तुतथाफलं॥पौरुषेणा
प्यतेराजन्अजितिव्यंपलंनरैः॥४॥दैवमेवंनजानंतिपरपौरुषवर्जिताः॥तस्मात्त्रिकालसंयुक्तंदैवंतुस
फलंभवेत्॥५॥पौरुषंदैवसंपत्त्याकालेफलतिपार्थिव॥दैवंपुरुषकारश्चकालश्चमनुजोत्तम॥६॥त्रय
मेतन्मनुष्यस्यपीडितंस्यात्फलावहं॥कृषिवृष्टिसमायोगाद्दृश्यंतेफलसिद्धयः॥७॥तास्वकालेप्रदृश्यंतेनैवा
कालेकथंचन॥तस्मात्सदैवकर्तव्यंसधर्मंपौरुषंनरैः॥८॥विपन्नावपियस्येहपरलोकफलंध्रुवं॥नालसाः
प्राप्नुवंत्यर्थान्नचदैवपरायणाः॥९॥तस्मात्सर्वप्रयत्नेनपौरुषेयत्नमाचरेत्॥त्यक्त्वालसान्दैवपरान्मनुष्या
स्वस्थानयुक्तान्प्रथमंहिलक्ष्मीः॥अन्विष्ययत्नाद्वृणुयान्नृपेंद्रतस्मात्सदोत्थानवताहिभाव्यं॥१०॥ ॥इतिश्री

मत्स्यपुराणेधर्मदैवपुरुकारमाहात्म्ये॥ ॥मनुरुवाच॥ ॥उपायान्मेसमाचक्ष्वसामपूर्वान्महाद्युते॥लक्ष
णंचतथातेषांप्रयोगंचसुरोत्तम॥१॥श्रीमत्स्यउवाच॥ ॥सामभेदस्तथादानंदंडश्चमनुजोत्तम॥उपेक्षाचतथामाया
इंद्रजालंचपार्थिव॥२॥प्रयोगाःकथिताःसप्ततन्मेनिगदतःशृणु॥द्विविधंकथितंसामतथ्यंवातथ्यमेवच॥३॥तत्रा
प्येसाधुतामाक्रोशायैवजायते॥तत्रसाधुःप्रयत्नेनसमाधौनरोत्तम॥४॥महाकुलीनाऋजवोधर्मनित्याजितेंद्रि
याः॥समासाध्यानचातथ्यंतेषुसामप्रयोजयेत्॥५॥तथ्यंचसामकर्तव्यंकुलशीलाभिवर्णनं॥तयातदुपचाराणां
कृतानांचैववर्णनं॥६॥अनयैवतथायुक्त्याकृतज्ञाख्यापनंस्वकं॥एवंसंछिन्नकर्तव्यावरूपाधर्मतत्पराः॥७॥न
म्नापद्यपिरक्षांसिगृह्यंतेहिपराश्रुतिः॥अथाप्येतदसाधूनांप्रयुक्तंमापकारकं॥८॥अतिसंधिकमित्येवंपुरुषं
सामनोदितं॥असाधवोविजानंतेतस्मात्तत्तेषुवर्जितं॥९॥येशुद्धवंशाऋजवःप्रतीताधर्मेस्थिताःसत्यपरावि
नीताः॥तेसामसाध्याःपुरुषाःप्रदिष्टाअनुव्रतायेसततंचराजन्॥१०॥ ॥इतिश्रीमत्स्यपुराणेसामादिविधिः॥ च
श्रीमत्स्यउवाच॥ ॥परस्परंचयेदुष्टाःक्रुद्धाभीताविमानिताः॥तेषांभेदंप्रयुंजीतभेदसाध्याहितेमताः॥१॥ये
तुयेनैवदोषेणपरस्मैवापराधिताः॥तेतेनैवाश्रयोभेद्यस्तेदेवापरमुखेनवा॥२॥परीक्ष्यसाधुमन्येतास्तदनप
रमुखाश्रुतं॥भेद्यस्यकार्यमुद्दिश्यकुशलैर्यैर्हिभेदतः॥३॥भेदितास्तेतिनिर्दिष्टानैवराजार्थवादिभिः॥महिषायुध

राजाम्यांतथासेनापतिर्द्विजाः॥४॥अमात्यमंत्रिणश्चैवराजापुत्रेतथैवच॥अंतःकोपोविनिर्दिष्टोदारुणःपृथिवी
क्षिता॥५॥बाह्यकोपेसमुत्पन्नेसुमहत्यपिपार्थिव॥शुद्धांतस्तुमहाभागशीघ्रमेवजयीभवेत्॥६॥अपिशक्रसमो यो
राजाकोपान्नातोविनश्यति॥अतःकार्यंप्रयत्नेनतस्माद्रक्षंमहीक्षिता॥७॥परंतःकोपमुत्पाद्यतेभेदेनविजीयते॥
जातीनांभेदसंस्कार्यंपरेषांविजिगीषुणा॥८॥रक्षःस्वतुप्रयत्नेनजातिभेदस्तथात्मनः॥जातयःपरितप्यंतेसततंच
परितप्यते॥९॥तथापितेषांकर्तव्यंसुगंभीरेषौवदेवसा॥ग्रहणंदानमानाभ्यांभेदस्तेभ्योभयंकरः॥१०॥नाजा
तिरनुगृह्णातिनाज्ञातिदधुमिच्छति॥ज्ञातिभेदेनभीयास्तुरिवंवस्तेनपार्थिवः॥११॥भिन्नादिशत्रुविपदःप्रभ
ताःस्वकेनरैंषेनहिहंतुमाजो॥सुसंहितेनायततस्तुभेदःकार्योरिपूर्णांनहिशास्त्रदक्षि॥१२॥॥इतिश्रीमत्स्य
पुराणेराजधर्मेभेदविधिः॥॥मत्स्यउवाच॥॥सर्वेषामप्युपायानांदानंश्रेष्ठतमंमतं॥सुदत्तेनसमाप्नोति
दानेनोभयलोकजित्॥१॥नशास्तिराजादानेनवशगोयेनजायते॥दानेनवशगादेवाभवंतीहसदानृणां॥
दानमेवोपजीवंतिप्रजाःसर्वान्नृपोत्तमः॥प्रियोहिदानवान्लोकेसर्वस्यैवोपजायते॥३॥दानवानचिरात्तत्वान्नोति
तथाराजापदःक्वचित्॥दानवानेवशक्नोतिसंहतोपजित्तुंपरान्॥४॥यद्यप्यनेश्वगंभीराषोपुरुषाःसागरोप राम
माः॥नगृह्णंतितथाप्येतेजायंतेपक्षपातिनः॥५॥अन्यत्रापिकृतांतेनकरोत्यन्यांस्तथावशे॥उपायेभ्यःप्रशंसं ३७८

तिदानंश्रेष्ठतमंजनाः॥६॥दानंश्रेयस्करंपुंसांदानंपुंसांप्रपूरकं॥दानवानेवलोकेषुयत्नेनध्रियतेसदा॥७॥नकेवलं
दानपराजयंतिभूर्लोकमेकंपुरुषप्रवीराः॥जयंतितेराजसुरेंद्रलोकंसुदुर्जयंयपधनुपातयेव॥८॥॥इतिश्रीम
त्स्यपुराणेराजधर्मेदानप्रशंसा॥॥मत्स्यउवाच॥॥नशक्यायेवशीकर्तुंउपायत्रितयेनतु॥दंडेनतानवशीकु
र्यात्दंडोहिवशकृन्नृणां॥१॥सम्यक्प्रणयनंतस्यतथाकार्यंमहीक्षिता॥वानप्रस्थांश्चधर्मज्ञांविधिवत्परिग्र द
हान्॥२॥स्वदेशेपरदेशेचधर्मशास्त्रविशारदान्॥समीक्ष्यप्रणयेद्दंडंसर्वंदंडेप्रतिष्ठितं॥३॥आश्रमीयदिवा
वर्णीपूज्योवाप्यगुरुर्महान्॥नादंड्योनामराज्ञोयःस्वधर्मेणोवतिष्ठति॥४॥अदंड्यान्दंडयन्राजादंड्यांश्चै
वाप्यदंडयन्॥इहराज्यपरिभ्रष्टोनरकंप्रतिपद्यते॥५॥तस्माद्राज्ञाविनीतेनदंड्याःशास्त्रानुसारतः॥दंड
प्रणयनंकार्यंलोकानुग्रहकाम्यया॥६॥यत्रश्यामोलोहिताक्षोदंडश्चरतिनिर्भयः॥प्रजास्तत्रनमुह्यंति
नीत्याचेत्साधुपश्यति॥७॥बालवृद्धातुरयतिद्विजस्त्रीविधवापतः॥मत्स्यन्यायेनवक्ष्येरन्यदिदंडेनपातये मध
त्॥८॥देवदैत्योरगनराःसर्वेभूतपतत्रिणः॥उत्क्रामेयुःस्वमर्यादांयदिदंडेनपातयेत्॥एषब्रह्मादिशापे
षुसर्वप्रहरणेषुच॥सर्वविक्रमकार्येषुव्यवसायेचतिष्ठति॥१०॥पूज्यंतेदंडिनोदेवानपूज्यंतेत्वदंडिनः॥
नब्रह्माणंविधातारंनपूषार्यमणावपि॥११॥जयंतेमानवाःकेचित्प्रशांताःसर्वकर्मसु॥रुद्रमग्निंचशक्रंच

स्यश्चंद्रमसोतथा॥१२॥विष्णुदेवगणानन्यानदंडिनः पूजयंतिहि॥दंडःशास्तिप्रजाःसर्वादंडएवहिरक्षति॥
१३॥दंडःसुप्तेषुजागर्तिदंडंधर्मंविदुर्बुधाः॥राजदंडभयादेवपापाःपापंनकुर्वते॥१४॥यमदंडभयादेकेप
रस्परभयादपि॥एवंसांसिद्धिकेलोकेसर्वंदंडेप्रतिष्ठितं॥१५॥अंधेतमसिमज्जेतयदिदंडंनपातयेत्॥यस्मा
द्दंड्यान्दंडयतिदुर्मदान्दमयत्यपि॥१६॥दमनादंडनाच्चैवतस्माद्दंडंविदुर्बुधाः॥दंडस्यभयतोस्त्रिदशो
समेतेभागोद्यतःस्मृतः॥धरस्यजज्ञे॥चक्रुःकुमारंपृथिवीपतिंचवंशांशिम्लानांचभयाद्वलस्य॥१७॥इति
मत्स्यपुराणेराजधर्मेदंडप्रशंसा॥॥मत्स्यउवाच॥॥दंडप्रणयनार्थायराजासृष्टःस्वयंभुवा॥देवभागा
नुपेयायसर्वभूतादितप्तये॥१॥तेजसायद्वत्कश्चिन्नैवशक्नोतिवीक्षितुं॥ततोभवतिलोकेषुराजाभा
स्करवत्प्रभुः॥२॥यदास्यदर्शनेलोकःप्रसादमुपगच्छति॥नयनानंदकारित्वात्तदाभवतिचंद्रमाः॥३॥नि
क्षेपस्यसमंमूल्यंदंडोनिक्षेपभुक्तया॥वस्त्राकल्पस्यधर्मस्यतदाधर्मोनहीयते॥४॥योनिक्षेपयाचयतियश्चा
न्निक्षिप्ययाचते॥तावुभौचौरवच्छास्यौदाप्यौचद्विगुणंदमं॥५॥उपाधिभिश्चयःकश्चित्परद्रव्यस्यवैक्रियं॥नि
तदा दोषज्ञानपूर्वंतुचौरवद्दंडमर्हति॥६॥मूल्यमादायपोविद्यांशिष्येभ्योनप्रयच्छति॥चंडःसमूल्यकर्तव्योधर्मज्ञेनम राम॰
हीक्षिता॥७॥द्विजेभोजेतुसंप्राप्तेप्रातिवेश्यमभोजयन्॥हिरण्यमाषकंदंड्यःपापेनास्तिस्मृतिक्रमः॥८॥आम ३७९

न्त्रितोद्विजोयस्तुवर्तमानोपरिग्रहे॥निःकारणंनगच्छेत्सदंड्येषुगुणंदमं॥९॥प्रतिश्रुत्याप्रदातारंसुवर्णंदंडम
र्हति॥भृत्योराजाकृपात्तदपत्किमयपरितः॥१०॥संदंड्यःकृष्णलानष्टौनदेयंवास्यवेतनं॥समगृहीत्वात्तविधा
याद्देकालंचेतनमानवः॥११॥अकालेतुत्यजेद्भृत्यंदंड्यःस्यात्सममेवच॥योग्रामदेशसंघानांकृत्वासत्येनसंविदं॥
१२॥विसंवदेन्नरोलोभात्तंराष्ट्राद्विप्रवासयेत्॥क्रीत्वाविक्रीयवाकिंचित्पश्चात्तापानुशयोभवेत्॥१३॥सतादशाहा
त्तत्स्वामीदद्याच्चैवाददीतवा॥परेणातुदशाहस्यनदद्यान्नैवदापयेत्॥१४॥अददत्तादनंचौवराज्ञादंड्यःकृ
तानिषट्॥यस्तुदोषवतींकन्यामनाख्यायप्रयच्छति॥१५॥उन्नमंतस्यकुर्वीतराजादंडंतुसाहसं॥वरोप्येवंस
माछाद्ययःकन्यांवरयेदिह॥१६॥दत्ताप्यदत्तासातस्यराज्ञादंड्यःशतादयं॥प्रदायकन्यांयोन्यस्मैपुरस्तांसं
प्रयोजयेत्॥१७॥दंडःकार्योनरेंद्रेणतस्माद्दत्तातुसाहसः॥सत्सकारेणवाचाचयुक्तःपूणमसंशयं॥१
८॥लुब्धोन्यत्रतुविक्रेतापट्शतंदंडमर्हति॥दुहेपुण्यंतुविक्रेताभ्रष्टातंतुवसेत्यजेत्॥१९॥द्विगुणांदं
डयेदेनंइतिधर्मेव्यवस्थितः॥मूल्येनैकादशांकृत्वायदिक्रेताधनंत्यजेत्॥२०॥सदंड्योमध्यमंदंडंतस्यपुण्यपस्य
मोक्षणं॥दद्याद्धेतुनयःपालोगृहीत्वाभक्तवेतनं॥२१॥सतुदंड्यःशतंराज्ञासुवर्णंचाप्यरक्षता॥दंडंहत्वायथवि
रमेतस्वामिनाकृतरक्षणः॥२२॥बहुकोप्यायसैःपाशैस्तस्यकर्मकरोभवेत्॥धनुःशतंपरीणाहोग्रामस्य

च समं ततः॥२३॥ द्विगुणं त्रिगुणं चापि नगरस्य प्रकारयेत्॥ क्षिप्तिमंतत्र कुर्वीतयत्क्लांतो चलोपयेत्॥२४॥ छिद्रं
वाधारयेत्सर्वं स्वश्रूकरसुखानुगं॥ तत्रापारिहृतं धान्यं निहिंस्युः पशवो यदि॥२५॥ न तत्र कारयेद्दंडं नृपतिः पशु
पक्षिणां॥ अनिर्दशाहां गां सूतां वृषं देवपशुं तथा॥२६॥ छिद्रं वाधारयेत्सर्वं न दद्यान्मनुरब्रवीत्॥ अतोन्यथा
विनष्टस्य दशांशं दंडमर्हति॥२७॥ पाल्यं च पालकस्वामी विना संख्येः प्रदश्यते॥ वर्णानामानुपूर्व्येण त्रपाणा
मविशेषता॥२८॥ अकार्यकारिणः सर्वे चेष्टितान्न कारयेत्॥ असीतिर्दस्युनिस्त्रिंशकन्याव्रतं चरेत्॥२९॥ दाने
न वधनिनाशं सर्वादीनामनाकुर्वन्॥ एकैकपश्चरेत्कृच्छं द्विजः पापापनुत्तये॥३०॥ बलदानं च वृक्षाणां छेद
ने जापमृक्शतं॥ गुल्मवल्लीलतानां च पुष्पितानां च वीरुधां॥३१॥ अस्थिमतां च सत्वानां रजतानां च सर्वशः॥
फलपुष्पोद्भवानां च घृतप्राशो विशोधनं॥३२॥ कृष्टानामौषधीनां च पानानां स्वयंवने॥ वृथारंभे न गच्छेत
दिनमेकं पयोव्रतः॥३३॥ एतैः प्रतिपोत्थस्यादिनो हिंसासमुताकृतं॥ स्तेयं दोषापहर्तृणां व्रतानां श्रूयतां विधिः
३४॥ धान्यान्निधनचौर्याणि कृत्वा कामाद्द्विजोत्तमः॥ स्वजाता चग्रहादेव कृच्छ्राब्देन विशुध्यति॥३५॥ मनुष्याणां
च हरणे स्त्रीणां क्षेत्रगृहस्य च॥ कूपवापीजलानां तु शुद्धे चांद्रायणं स्मृतं॥३६॥ द्रव्याणामल्पसाराणां स्तेयं राम·
कृत्वान्यवेश्मनः॥ चरेत्सांतपनं कृच्छं तन्निरात्मविशुद्धये॥३७॥ भक्ष्यभोज्यापहरणे यानशय्यासनस्य च॥ पु ३६०

ष्पफलानां पंचगव्यं विशोधनं॥३९॥ मणिरक्ताप्रवालानां स्वर्णस्य रजतस्य च॥ अयस्कांस्योपलानां द्वादशा
हं कणान्नभुक्॥३९॥ कार्पासकीटजोर्णानां द्विशफैकशफस्य च॥ पक्षिगंधौषधीनां च रक्षा चैव त्र्यहं पयः॥
४०॥ तृणकाष्ठद्रुमाणां च पक्वान्नस्य गुडस्य च॥ चैलकर्मविषाणां च त्रिरात्रं स्यादभोजनं॥४१॥ एतैर्व्रतैरपोह
त पापं स्वयंकृतं बुधः॥ अगम्यागमनीयं तु व्रतैरेभिरपानयेत्॥४२॥ गुरुतल्पव्रतं कुर्याद्रेतःसिक्त्वा स्वयो
निषु॥ कुमारीष्वंगजासु च॥४३॥ पितृष्वस्रेयीं भगिनीं स्वस्रीयां मातुरेव च॥ भ्रातुर्दुहितरं चैव गत्वा चांद्राय
णं चरेत्॥४४॥ एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत बुद्धिमान्॥ जातयो नानुपेयास्ताः पतितापयोति चेत्॥४५
अमानुषीषु पुरुष उदक्यायामयोनिषु॥ रेतः सिक्त्वा जले चैव कृच्छ्रं सांतपनं चरेत्॥४६॥ मैथुनं च समासाद्य
पुंसियोषित वा द्विजः॥ गोयाने प्सु दिवा चैव सवासा स्नानमाविशेत्॥४७॥ चंडालांत्यस्त्रियं गत्वा भुक्त्वा च प्रतिगृह्य
ते॥ पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति॥४८॥ विप्रदुष्टां स्त्रियं भर्ता निरुंध्यादेकवेश्मनि॥ यत्पुंसः परदा
रेषु तच्चैनां चारयेद्व्रतं॥४९॥ सा चेत्पं प्रदुष्येत नशास्तेनापमानिता॥ कृच्छ्रं चांद्रायणं चैव तदस्याः पावनं स्मृते॥५०
यत्करोत्येकरात्रेण वृषलीसेवनाद्द्विजः॥ तद्भैक्ष्यभुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति॥५१॥ एताः पापकृतामु
क्ता चतुर्णामपि निःकृतिः॥ पतितैः संप्रयुक्तानामिमाः शृणुत निःकृतीं॥५२॥ संवत्सरेण पतति पतितेन समाच

म०पु० रैन्॥याजनाध्यजनाद्दौपाद्दसनाशनान्॥५३॥योजेनपतितेनैषांसंसर्गंयातिमानवः॥सतस्यैवव्रतंकुर्यात्तत्सं
३८१ सर्गविशुद्धये॥५४॥पतितस्योदकंकार्यंसपिंडैर्बांधवैःसह॥निंदितेहनिसायाह्नेज्ञात्यृत्विग्गुरुसंनिधौ॥५५॥दा
सीघटशतंपूर्णपयस्तोप्रेतवत्पदा॥अहोरात्रंसपिंडानामाशौचंबांधवैःसह॥५६॥निवर्त्त्यपरमंतस्मात्संभाष
णसहासनं॥दायादस्यप्रदानंचयात्रामेवलौकिकीं॥५७॥ज्येष्ठकार्यंनिवर्त्त्येतज्येष्ठलभ्यंचयत्पुनः॥ज्येष्ठंसंप्रा
प्नुयाच्चास्यपापीयान्गुणितोपिवा॥५८॥स्नापितांचापिमर्यादांयेभिंद्युःपापकर्मिणां॥तेवैपृथक्पृथक्दंड्या
राज्ञाप्रथमसाहसं॥५९॥शतंब्राह्मणमाक्रुश्यक्षत्रियोदंडमर्हति॥वैश्यस्तुद्वेशतेराजन्शूद्रस्तुवधमर्हति॥६०
पंचाशत्ब्राह्मणोदंड्यःक्षत्रियस्याभिशंसने॥वैश्यस्तुसार्द्धपंचाशत्शूद्रेद्वादशकोदमः॥६१॥क्षत्रियस्याप्नुयाद्वै
श्यःसाहसंपुनरेवच॥शूद्रःक्षत्रियमाक्रुश्यजिह्वाछेदनमाप्नुयात्॥६२॥पंचाशत्क्षत्रियोदंड्यस्तथावैश्याभिशं
सने॥शूद्रेचैवार्द्धपंचाशत्तथाधर्मोविधीयते॥६३॥वैश्यस्यार्द्धेनदंड्यःशूद्रश्चोत्तमसाहसं॥शूद्रःक्रोशंस्तथा क्रोश
वैश्यःशतार्द्धदंडमर्हति॥६४॥सवर्णेक्रोशनेदंड्यास्तथाद्वादशकंदमे॥वादेषुवचनीयेषुतदेवद्विगुणंभ
सम्यक् वेत्॥६५॥एकविंशतियोवाचादारुणयाक्षिपेत्॥जिह्वायाःप्राप्नुयात्छेदंजघन्यप्रभवोहिसः॥६६॥नाम राम०
जातियेषामभिद्रोहेणकुर्वतः॥निःक्षेप्योमोमयःशंकुर्ज्वलन्नास्येदशांगुलः॥६७॥धर्मोपदेशंदर्पेणद्विजा ३८१

नामपिकुर्वतः॥तत्रमापेचतत्तैलंवक्त्रेश्रोत्रेचपार्थिवः॥६८॥श्रुतिदेशंचजातिंचकर्मशारीरमेवच॥वितथेनब्रु
वन्दंड्योराज्ञाद्विगुणसाहसं॥६९॥यस्तुपातकसंयुक्तंक्षिपेद्दुर्मतिरंततः॥उत्तमंसाहसंतस्मिन्दंडःपात्यो
यथाक्रमं॥७०॥राज्ञेनियमंप्रथमंजातमिसपः॥सर्वेतिद्विगुणंदंड्याविप्रलंभान्नप्रस्यतु॥७१॥भीत्यामयासा
भिहितंप्रमादेनाथवावदेत्॥भूयोनचैवंवक्ष्यामिसतुदंडार्द्धमाप्नुयात्॥७२॥काणंवाप्यथवाखंजमंधंवापितथा
विधं॥तथ्येनापिब्रुवन्दाप्योदंडंकार्षापणंपरं॥७३॥पितरंभ्रातरंज्येष्ठंमातरंश्वशुरंगुरुं॥आक्रोशयन्शतंदं
ड्यःपंथानंनत्यजेद्गुरोः॥७४॥गुरुवर्ज्जमार्गार्हमार्गेस्मानप्रयच्छति॥सदाप्यःकृष्णलंराज्ञातस्यपापप्रणतये॥
७५॥एकजातिंद्विजातिंचयेनांगेनापराध्नुयात्॥तदेवछेदयेत्तस्यक्षिप्रमेवाविचारयन्॥७६॥अवनिष्ठीवतोद
र्पाद्द्वावोष्ठौछेदयेन्नृपः॥अवमूत्रयतोमेढ्रमधःशब्दयतोगुदं॥७७॥महासनमभिप्रेप्सुरुत्कृष्टस्यावकृष्टजः॥
कट्यांकृतांकोनिर्वास्यएकंचैवास्यकर्त्तयेत्॥७८॥केशेषुगृह्णतोछेदंछेदयेदविचारितं॥पादयोर्नासिकायां
चग्रीवायांवृषणेषुच॥७९॥त्वग्भेदकःशतंदंड्योलोहितस्यचदर्शकः॥मांसभेदात्तुषट्निष्कान्प्रवास्यस्त्वस्थि
भेदकः॥८०॥अंगमंगकरस्यागतदेवोपहरेन्नृपः॥दंड्यकपारुष्यकृद्दंड्यःसमुत्थानव्ययंतथा॥८१॥अर्द्ध
पादकरःकार्योगोगजाश्वोष्ट्रघातकः॥पशुक्षुद्रमृगाणांचहिंसायांद्विगुणोदमः॥८२॥पंचाशत्तुभवेद्दंड्य

म० पु० स्तथैव मृगपक्षिषु॥ कृमिकीटेषु दंडः स्याद्रजतस्य च माषकं॥८३॥ तस्यानुरूपं मूल्यं च प्रदद्यात्स्वामिने तथा॥ स
३८२ स्वाम्येकानां सकलं द्रोषाणां दमस्तेच॥८४॥ वृक्षं तु सफलं छित्वा सुवर्णं दंडमर्हति॥ द्विगुणं दंडयेत्त्वेनं पथा
सीम्नि जलाशये॥८५॥ छेदनादफलस्यापि मध्यमः साहसः स्मृतः॥ गुल्मवल्लीलतानां च सुवर्णस्य च माषकं॥
८६॥ वृथाछेदी तृणस्यापि दंडः कार्षापणं भवेत्॥ त्रिभागं कृष्णलाद्दंड्यः प्राणिनस्ताडने तथा॥८७॥ देशकाला
नुरूपेण मूल्यं राजद्रुमादिषु॥ तत्स्वामिने तथा दद्यात् दंडयुक्तं च पार्थिवः॥८८॥ यत्राति वर्त्तते युग्यं वैगुण्या
त्प्राजकस्य तु॥ तत्र स्वामी भवेद्दंड्यो नाप्तश्चेत्प्राजको भवेत्॥८९॥ प्राजकश्चेद्भवेदाप्तः प्राजको दंडमर्हति॥ नाप्ति
दंडश्च तस्यापि तथैवाहीति कल्प्यते॥९०॥ द्रव्याणि यो हरेद्यस्य अज्ञातो ज्ञानतोपि वा॥ स तस्योत्पादयेत्तुष्टिं राज्ञो द
द्याच्च ततो दमं॥९१॥ यस्तु रज्जुं घटं कूपाच्चोरं छिंद्याच्च यः प्रपां॥ स दंडं प्राप्नुयान्माषं तच्च संप्रतिपादयेत्॥९२॥ धा
न्यं दशभ्यः कुंभेभ्यो हरतोभ्यधिको वधः॥ शेषेप्येकादशगुणं तस्य दंडं प्रकल्पयेत्॥९३॥ गोषु ब्राह्मणसंस्था
सु छुरिकायाश्च भेदने॥ अश्वापहारकश्चैव सद्यः कार्योर्द्धपादकः॥९४॥ सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य च।
मांसस्य मधुनश्चैव यच्चान्यत्पशुसंभवः॥९५॥ दध्नः क्षीरस्य तक्रस्य पानीयस्य घृतस्य च॥ अन्येषामादीनां मेध्या राम०
नां मोदकस्य च॥९६॥ पक्वान्नानां च सर्वेषां तन्मूल्याद्विगुणो दमः॥ पुष्पेषु हरिते धान्ये गुल्मवल्लीलतासु च॥९७॥ ३८२

अल्पेष्वपरिपूतेषु स्वेनान्येन विचेष्टितं॥ तत्र देवहरेत्तस्य वन्यादशपार्थिवः॥९८॥ द्विजोध्वगः क्षीणवृत्तिर्द्वाविक्षू
के च मूलके॥ त्रपुसे वारके द्वे द्वे तावन्मात्रं फलेषु च॥९९॥ यथा च सर्वकिस्तानां मुष्टिग्राहेण पार्थिवः॥ शाकं शाक
प्रमाणं च गृह्णन्नापि न दुष्यति॥१००॥ वानस्पत्यं मूलफलं दार्व्वग्न्यर्थं तथैव च॥ तृणं गोभ्य वहारार्थं अस्तेयं मनु
रब्रवीत्॥१०१॥ अदेववाटिका पुष्पं देवतार्थे तथैव च॥ आददानं परक्षेत्रान्न दंडं दातुमर्हति॥१०२॥ शृंगिणां नखि
नां राजन् दंष्ट्रिणां वा वधोद्यतं॥ यो हन्यात्स लिप्येत पापेनेति मनुर्जगौ॥१०३॥ शस्त्रोद्यतकरं चैव ब्राह्मणं वा
बहुश्रुतं॥ आततायिनमायांतं हन्याद्देवाविचारयन्॥१०४॥ आततायिवधे दोषो हंतुर्भवति कश्चन॥ प्रकाशे
वाप्रकाशे वा मन्युस्तं मन्युमृच्छति॥१०५॥ गृहक्षेत्राभिहर्त्तारं तथा पत्न्यभिगामिनः॥ अग्निदो गरदश्चैव तथा चात्यु
द्यतायुधः॥ अभिचारं च कुर्वाणो राजगामि च पैशुनं॥६॥ एते हि कथिता लोके धर्मज्ञैराततायिनः॥ परस्त्रीणां
च संभाषं सार्द्धं रण्ये गृहे पि वा॥७॥ नदीनां चैव संभेदे स संग्राहमवाप्नुयात्॥ न संभाषे सह स्त्रीभिः प्रतिषिद्धः पु
मान् क्वचित्॥१०८॥ यस्तु संभाषते स्त्रीभिः सुवर्णं दंडमर्हति॥ नैष चारणदारेषु विधिरात्मोपजीविषु॥९॥ अज
यंति मनुष्येस्तेनिगूलं विचरंत्यतः॥ किंचिदेव तु दाप्यः स्यात्संभाषस्यापवादतः॥११०॥ प्रेष्यासु चैव सर्वासु रहः प्र
व्रजितासु च॥ यः कामं दूषयेत्कन्यां स सद्यो वधमर्हति॥१११॥ सकामां दूषयेत्कन्यां स सद्यो वधमर्हति॥ सकामं

म०पु०
३८३

दूषयेद्यस्तु प्राप्नोप्रथमसाहसं॥१२॥भिक्षुकान्प्रव्रजितान्नारीयेपिचान्ये कुरीरय॥प्रविवेश्यात्यतिथिंस्तु प्राप्नुयादि
ग्रानंदमं॥१३॥यश्च संचारकस्तत्र पुरुषश्चतया भवेत्॥पारदारिकवद्दण्ड्यो यश्चस्यादवकाशदः॥१४॥बालां सं
दूषयेद्यस्तु परभार्यां नरः क्वचित्॥वधार्हं दोनवेन्नस्यअपराधी भवेत्स्त्रियः॥१५॥धिक्कृतामीनमेप्रजेयं येर्विलुप्य
ते॥कर्तुकेभ्यो र्थमादाय यः कुर्यात्किरमन्यथा॥१६॥तस्य सर्वस्वमादाय राजा तं विप्रवासयेत्॥येनियुक्तास्तु कार्येषु
हन्युः कार्याणि कार्यिणां॥१७॥निर्घृणाः क्रूरमनसः सर्वकर्मपिनोदिनः॥धनोष्मणापच्यमानास्तानि तुकारयेन्नृप
१८॥कूटशासनकर्तॄंश्च प्रकृतीनां च दूषकाः॥स्त्रीबालब्राह्मणघ्नांश्च वध्याःस्त्वसेविनस्तथा॥१९॥अमात्यः प्राड्वि
वाको वाय: कुर्यात्कार्यमन्यथा॥तस्य सर्वस्वमादाय राजा तं विप्रवासयेत्॥२०॥ब्रह्मघ्नश्च सुरापश्च तस्करो गुरु
तल्पगः॥एते सर्वे पृथक्दंड्या महापातकिनो नराः॥२१॥महापातकिनो वध्या ब्राह्मणं तु विवासयेत्॥कृतचि
ह्नं स्वकाद्देशात्कृतचिह्नकमंततः॥२२॥गुरुतल्पभगः कार्यो सुरापाने सुराध्वजः॥पेये तु पदं विद्यात् ब्रह्महं तु
कबंधकं॥२३॥असंभाष्या ह्यसंभाष्या असांवंध्या विशेषतः॥त्यक्ता ज्ञाति संबंधिबांधवैस्तु ते॥२४॥
स्फ महापातकिनां वित्तमादाय न्नृपतिः स्वयं॥अप्सुप्रक्षेपयेत्दंडं वरुणायोपपादयेत्॥२५॥सहोढौ नेविनाचो धा: राम·
रं घातयेद्धार्मिको नृपः॥सहोढ्यानं सोपकारं घातयेदविचारयन्॥२६॥ग्रामेष्वपि प्रयेकेचिच्चोराणां नक्तदा ३८३

राणेवामनप्रादुर्भावःसमाप्तः॥॥अर्जुनउवाच॥॥प्रादुर्भावपुराणेषुविष्णोरमिततेजसः॥सततंकथ्यते
विप्रवाराहइतिनःश्रुतं॥१॥नजानेतस्यचरितंनविधानंनविस्तरं॥नकर्मगुणसंस्थानंनमस्येयमनीषिणः॥
२॥किमात्मकोवराहोसौकामूर्तिःकास्यदेवता॥किंप्रमाणःप्रभावःकःकिंचानेनपुराकृतं॥३॥एतन्मेशंसतत्वे
जो नवाराहोसन्निविस्तरं॥यथार्थंचसमीतानांद्विजातीनांविशेषतः॥४॥शौनकउ०॥॥एतत्तेकथयिष्यामिपुराणं
ब्रह्मसंमितं॥महावराहचरितंकृष्णस्याद्भुतकर्मणः॥५॥एषनारायणोराजन्वाराहंवपुरास्थितः॥इमांयोगं
रा समुद्रस्थांउज्जहारारिमर्दनः॥६॥छंदोगाभिरुदाभिःश्रुतिभिःसमलंकृत॥सतःप्रसन्नतांकृत्वानिबोधविज
याधुना॥७॥इदंपुराणंपरमंपुण्यंवेदैश्चसम्मितं॥महावराहचरितंनास्तिकायनकीर्तयेत्॥८॥पुराणंवेदमखि
वे लंसांख्यंयोगंचदेववप:॥कार्त्स्न्येनविधिनाप्रोक्तंसोस्यार्थंविदिष्यति॥९॥विश्वेदेवास्तथासाध्यारुद्रादित्यास्तथा
श्विनौ॥प्रजानांपतयश्चैवसप्तचैवमहर्षयः॥१०॥मनःसंकल्पजाश्चैवपूर्वजाऋषयस्तथा॥वसवोमरुतश्चैवगं

म०पु०
४०५

धर्वयक्षराक्षसाः॥११॥ दैत्याः पिशाचाश्च नागाश्च भूतानि विविधानि च॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा म्लेंछाश्च वि
भुवि॥१२॥ चतुष्पादानि सर्वाणि तिर्यग्योनिगतानि च॥ जंगमानि च सत्वानि यच्चान्यज्जीवसंज्ञितं॥१३॥ कल्पेयु
गसहस्रांते ब्रह्मणो ऽह्नि तथागते॥ निर्वाणे सर्वभूतानां सर्वोत्पातसमुद्भवे॥१४॥ हिरण्याक्षिशिरखस्ततो भूत्वा
वृषाकपिः॥ शिखाभिर्व्यधमल्लोकान् शेषान्नशेषानिह देहिनः॥१५॥ दह्यमानास्तस्य तेजोराशिनिरुच्छिखः॥ वि
वर्षवर्षाद्भ्योगाहताश्चिरूपमङ्गिरानते॥१६॥ सांगोपनिषदो वेदाः सेतिहासपुराणकाः॥ विद्याः सर्वाः क्रियाश्चै
व सर्वधर्मपरायणाः॥१७॥ ब्रह्माणमग्रतः कृत्वा सयज्ञविप्रपतेर्मुखं॥ सर्वदेवगणाश्चैव त्रयस्त्रिंशच्च कोटयः॥
१८॥ तस्मिन्नह्नि संप्राप्तेहं सव्यकक्रमव्ययं॥ प्रविशंति महात्मानं हरिं नारायणं प्रभुं॥१९॥ तेषां भूयः प्रवृत्ता
निधनो ऽसन्निरिष्यते॥ यथा सूर्यस्य सततमुदयास्तमने ऽविह॥२०॥ पूर्णे युगसहस्रांते कल्पो निःशेष उच्यते॥
तस्मिन् जीवकृतं सर्वं निःशेषं समतिष्ठत॥२१॥ प्र[illegible]ष्टा सर्वभूतानां कल्पांतेषु पुनः पुनः॥ अव्यक्तः शाश्वतो देवो
यस्य सर्वमिदं जगत्॥२२॥ नष्टार्ककिरणे लोके चंद्रग्रहविवर्जिते॥ व्यक्तधूमाग्निवदनेत्यक्तयज्ञपक्षाग्नि त्र॥२३
अपक्षीगणसंघाते सर्वप्राणामरेपथि॥ अनयादाकुले रौद्रे सर्वतिस्तमसावृते॥२४॥ अहं त्वे सर्वलोके स्मिन् स्त्र
नावेकं सर्वकर्मणां॥ प्रशांते सर्वसंतापो मेन ए वै रिपरिष्ठते॥२५॥ आत्मश्चभावसंस्थाने लोके नारायणात्म

राम
४०५

के॥ परमेष्ठी हृषीकेशः शापनायोपचक्रमे॥२६॥ पीतवासा लोहिताक्षः कृष्णो जीमूतसंनिभः॥ शिखासहस्रविक
टजटाभारं समुद्वहन्॥२७॥ श्रीवत्सलक्ष्मसंयुक्तं रक्तचंदनभूषितं॥ विक्षोबिभ्रन्महावाक्षं संघुदिवतोपदं॥
२८॥ पुंडरीकसहस्रेण मूर्ध्यस्य मुकुटेमुना॥ पत्नी तस्य तथं लक्ष्मीर्देहमावृत्य तिष्ठति॥२९॥ ततः स्वपिति शां
तात्मा सर्वलोकसुखावहः॥ किमप्यमिति यो गात्मा विश्रायोगमुपागतः॥३०॥ ततो युगसहस्रे तु पूर्णे स पुरुष
सत्तमः॥ अयमेव विबुद्धस्तु बुध्यते विपुकाधीयः॥३१॥ ततः श्वेतपुते भूयः सर्वलोकस्य लोककृत्॥ नरावदे
वगणाश्चैव परमार्थेन कर्मणा॥३२॥ ततः संचिंतयन् कार्यं देवेषु समितिंजयः॥ संभवं सर्वलोकस्य विदधाति सत्त्व
कृपतिः॥३३॥ कर्ता चैवाधिकर्ता च संहर्ता च प्रजापतिः॥ नारायणः परं पारं नारायणः परं पदं॥३४॥ नाराय
णः परो यज्ञो नारायणः परा गतिः॥ स स्वयंभूरिति ज्ञेयः स स्रष्टा भुवनाधिपः॥३५॥ स सर्वैरपि विज्ञेयो ऽप्यषय
ज्ञः प्रजापतिः॥ यद्वेदितव्यं त्रिदशैस्तद्देवः परिवर्त्तते॥३६॥ यच्च वेद्यं भगवतो मध्यम अपि नतत्क्षितुः॥ प्रजानां पतयः
सर्वे ऋषयश्च महामरैः॥३७॥ तस्यांतमधिगच्छंति विचिन्वंत इति श्रुतिः॥ पदश्च परमं लोके न संति सततमसुराः॥
३८॥ प्रादुर्भाविषद्रूपं तद्दिक्षंति दिवौकसः॥ देशितं यदनेनैव तदपश्यंति देवताः॥३[illegible]॥ यन्न दर्शितवानेष कस्तं
ष्टुमिहार्हति॥ ब्राह्मणाः सर्वभूतानां अग्निमारुतयोगिनः॥४०॥ तेजसस्तमसश्चैव विधानमभूतस्य च॥ चतुराश्र

मधर्मेषुचातुर्होत्रिकजातिगः॥४१॥धनुसागरपर्यंतश्चतुर्युगनिवर्तकः॥तदेषसंहृत्यजगतकृत्वागर्भस्थमात्मनः
४२॥मुमोचांडंमहायोगेथतवर्षसहस्रकं॥सुरासुरद्विजभुजगाप्सरोगणैर्द्रुमौषधीक्षितिधरसंपक्षयुत्यकैः॥
प्रजापतिःश्रुतिभिरसुकुपंतदाम्नजजगमिदमात्मनामनुः॥४३॥इतिश्रीमत्स्यपुराणेवाराहप्रादुर्भावे॥
शौनकउवाच॥॥जागदंडमिदंसर्वंआसीतदिव्यंहिरण्मयं॥प्रजापतेरियंमूर्त्तिरितीयंवैदिकीश्रुतिः॥१॥संतु
वर्षसहस्रांतेविभेदोर्ध्वमुखंविभुः॥लोकसर्जनहेतोश्चविभेदाधोमुखंततः॥२॥भूयोष्टधाविभेदांडंविष्णु
र्वैलोकजन्मकृत॥चकारजगतःसर्वंविभागंसंविभागकृत॥३॥यछिद्रमूर्ध्वमाकाशंवरंयुक्तियुतांगतिः॥
विहितंविश्वयोगेनयदधस्तादवागतं॥४॥यदंडमकरोत्पूर्वंदेवलोकचिकीर्षया॥तत्रतत्सलिलंस्कन्नंसो
ऽभवत्कांचनोगिरिः॥५॥पौलैःसहस्रैर्महानाविषमामेदिनीहितः॥तैःसापर्वतजालौघैर्बहुयोजनविस्तरैः॥
द॥पीडितागुरुभिर्देविव्यथितामेदिनीतदा॥सहामरेर्भूमिबलंदिव्यंनारायणात्मकं॥७॥हिरण्मयंसमु
छिष्टंतेजोवैजलरूपिणं॥अशक्तावैधारयितुमधस्तात्प्रविवेशसा॥८॥पीड्यमानाभगवतस्तेजसातस्यसाक्षि
तिः॥पृथिवीत्राणस्वंतीदृष्टातामधोमधुसूदनः॥९॥उद्धारार्थंमनश्चक्रेतस्यावैहितकाम्यया॥१०॥श्रीभगवानु
वाच॥॥मत्तेजसापावसुधासमासाधतपस्विनी॥रसातलंप्रविशामिपंकेगौरिवदुर्बला॥१०॥पृथिव्युवाच॥॥

ध

सु

त्रिविक्रमायामितविक्रमायमहावराहायसुरोत्तमाय॥श्रीशार्ङ्गचक्रासिगदाधरायनमोस्तुतेदेववरप्रसीद॥
११॥तवदेहात्जगज्जातंपुष्करद्विजमुत्थितं॥ब्रह्मापामिहलोनांभूतानांशाश्वतंविदुः॥तवप्रसादाद्देवोपंदिवं
भुंक्तेपुरंदरः॥तवक्रोधाद्धिबलिनिधृताःसर्वेदैत्याजनार्दन॥१३॥धाताविधातासंहर्त्तात्वयिसर्वंप्रतिष्ठितं॥म
नुःकृतांतोनियंतायज्वनःपवनोपमः॥१४॥वर्णाश्चाश्रमधर्माश्चसागरास्तरवोचलाः॥नद्योधर्मश्चकामश्च
यज्ञोयज्ञस्यपाःक्रियाः॥१५॥विद्यावेद्यंचसत्वंचह्रीःश्रीःकीर्त्तिर्धृतिःक्षमा॥पुराणंवेदवेदांगंसांख्ययो
गोभवाभवौ॥१६॥जंगमंस्थावरंचैवभविष्यंचभवच्चयत॥सर्वंतत्त्रिषुलोकेषुप्रभावोपहितंतपः॥१७॥त्रिद
शा शोहारफलदःलयस्याश्चारुपल्लवः॥सर्वकमनःकांतःसर्वसत्वमनोहरः॥१८॥विमानानेकविटपस्तोयदां सत्व
बुमधुस्रवः॥दैत्यलोकमहास्कंधःसत्यलोकप्रकाशकः॥१९॥कालोभूत्वाप्रमत्ताभिरक्षीदयतेपुनः॥सा
गराकारंनिर्यासोरसातलजलाश्रयं॥२०॥नागेंद्रपादपोपेतोजंतुपक्षिनिषेवितः॥शीलाचारार्यगंधश्चस
र्वलोकमयोद्रुमः॥२१॥द्वादशार्कमयद्वीपोरुद्रैकादशपत्तनः॥वस्वष्टकाचलोपेतस्त्रैलोक्यांभोमहोदधिः॥
२२॥साध्यामाध्योर्मिकमलःसुपर्णानिलसेवितः॥दैत्यलोकमहाग्राहोयक्षोरगगणाकुलः॥२३॥पितामहा
धस्वगस्त्विरत्नभूषितः॥ह्रीश्रीकीर्त्तिश्चिरुपत्नोभितः॥२४॥कालयोगमहापर्वप्रियोगपतिरेकराट्॥रूप

विद्याधृतिःक्षमा

योगमहावीर्यो नारायण महार्णव ॥२५॥ त्वयासृष्टास्त्वयो लोकास्त्वयैव प्रतिसंहृताः ॥ विशंति योगिनः सर्वे त्वामेव
प्रतियोजिताः ॥२६॥ युगे युगे युगांताग्निः कालमेघो युगे युगे ॥ द्वापरे रक्तसंकाशः कृष्णः कृतयुगे भवान् ॥२७॥
कृते शुक्लस्वरूपस्त्वं त्रेतायां चंपकप्रभः ॥ वैवर्ण्यमभिधा नित्यं प्राप्नोसि युगसंधिषु ॥२८॥ वैवर्ण्यं सर्वकर्माणि
य मुत्पादयसि वेदवित् ॥ नासि धाता प्ररत्या पच्चसि वर्त्तते ॥२९॥ क्रोधयक्षांतिमयोसि त्वं प्रदीपयसि वर्षसि ॥ त्वं
ति हास्यासि मनिर्वाति वपि पासि जाग्रसि निः ॥३०॥ शोषयसि भूतानि कालो भूत्वा युगक्षये ॥ शेषमात्मानमा
लोक विशोषयसि तं पुनः ॥३१॥ युगांतारग्निर्लानादेषु सर्वभूतेषु किंचन ॥ घातेषु शेषो न स्थितस्माच्छेषोसि सं णो
ततं ॥३२॥ च्यवनो प्रतियुक्तेषु ब्रह्मेंद्रकरुणादिषु ॥ न च्यवसे स्थानात्तस्मादच्युत उच्यते ॥३३॥ ब्रह्मा
मणिं णमिंद्रं च यमं वरुणमेव च ॥ निगृह्य हरगांहु परो यस्मात्तस्माद्धरिरिहोच्यसे ॥३४॥ यन्मानयसि भूतानि व
पुषा यशसा श्रिया ॥ विमणवपुषा जे तस्मान्मानासि सनातनः ॥३५॥ यस्मात् ब्रह्मादयो देवा मनुजाश्चोग्र तेज
सः ॥ न ते त्वामभिगच्छंति तेनानंतस्त्वमुच्यसे ॥३६॥ न क्षीयसे न च्यवसे कल्पकोटिशतैरपि ॥ यस्मात्त्वमक्षर राम०
स्यादिस्तस्माद्विष्णुः प्रकीर्त्यसे ॥३७॥ बिभर्त्ति ज्योतिषा नित्यं त्रैलोक्यं सचराचरं ॥ सयत्नं यक्षगंधर्वसिद्धमहाग् य ४०१
तपन्नगे ॥३८॥ मात्तं त्वयि प्रविशति त्रैलोक्यं सचराचरं ॥ तस्माद्विष्णुरिति प्रोक्तः स्वयमेव स्वयंभुवा ॥३९॥ नार

प्रो

द्रस्युच्युते आपो ऋषिभिस्तत्त्वदर्शिभिः ॥ अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥४०॥ युगे युगे प्रणष्टां
गां विष्णो विंदसि तत्त्वतः ॥ गोविंदेति ततो नाम्ना प्रोच्यसे ऋषिभिस्तथा ॥४१॥ हृषीकाणींद्रियाण्याहुस्तत्त्वज्ञा
न विशारदाः ॥ ईशित्वे वर्त्तसे तेषां हृषीकेशस्ततो ह्यसे ॥ वसंति त्वयि भूतानि युगाब्दादीनि युगे ॥ त्वं वा वस कुगे
ति भूतेषु वासुदेवस्ततोच्यसे ॥४३॥ संकर्षयसि भूतानि कल्पे कल्पे पुनः ॥ ततः संकर्षणः प्रोक्तस्तत्त्वज्ञान पुनः
विशारदैः ॥४४॥ प्रतिव्यूहे न तिष्ठति सदेवासुरराक्षसाः ॥ प्रविष्टः सर्वकर्माणि प्रद्युम्नस्तेन चोच्यसे ॥४५॥ वि
रोधो विद्यते यस्मान्न ते भूतेषु कथ्यते ॥ अनिरुद्धस्ततः प्रोक्तः पूर्वमेव महर्षिभिः ॥४६॥ यत्त्वया धार्यते विश्वं
त्वया संह्रियते जगत् ॥ त्वं धारयसि भूतानि भुवनं त्वं बिभर्षि च ॥४७॥ यत्त्वया धार्यते किंचित्तेजसा च बलेन
वा ॥ मया हि धार्यते तत्र मा धृतं धार्यते त्वया ॥४८॥ न हि ते विद्यते भूतं त्वया यन्नात्र धार्यते ॥ त्वमेव कुरुषे देव ना
रायण युगे युगे ॥४९॥ महाभारावतरणं जगतो हितकाम्यया ॥ तवैव तेजसाक्रांता रसातलगता ॥५०॥ त्राप मयहं
स्वमा सुरश्रेष्ठ रसातलतलं गता ॥ दीना पिपीड्यमाना हं राक्षसैः क्रोधतत्परैः ॥५१॥ प्रणवश्चरणं नित्यमुपया
मि सनातनं ॥ तावन्मे स्ति भयं देव यावन्न त्वां प्रपद्ये ॥५२॥ शरण्यं मिमनसा शतशोप्युपलक्षये उपमानं त
रशक्या कर्तुं सेंद्रादिदैवतैः ॥५३॥ त्वमेव सततं वेत्सि तत्र मतः परं ॥५३॥ शौनक उवाच ॥ ततः प्रीतः सम

रसा तल

म०पु० गवानूपृथिव्याःस्त्राणंचक्रन्ततु॥कामममस्यैयथाकाममभिसंप्रेरितवान्हरिः॥५४॥अब्रवीच्चमहादेवीमा
धवीयंस्तवोत्तमः॥धारयिष्यतियोमर्त्योनास्तितस्ययदाभवः॥५५॥लोकान्निःकल्मषांश्चैववैस्लवान्प्रति
४०८ स पत्स्यते॥महच्छ्राश्चर्यंसर्वस्मिंमाधवीयंस्तवोत्तमं॥५६॥अधीतवेदःपुरुषोमुनिःप्रीतमानाभवत्॥५६॥॥श्रीभ
गवानुवाच॥॥माभैर्धरणिकल्याणिशांतिंव्रजममाग्रतः॥एषत्वामुचितंस्थानंप्रापयामिमनीषितं॥५७॥श्रो
नकउवाच॥॥ततोमहात्मामनसादिव्यंरूपमचिंतयत्॥किंतुरूपंमहत्कृत्वाउद्धरेधरामिमां॥५८॥जलक्री
डारुचिस्तस्मात्वाराहंरूपमास्थितः॥अदृश्यंसर्वभूतानांवाङ्मयंब्रह्मसंस्थितं॥५९॥शतयोजनविस्तीर्णं
उच्छ्रितंद्विगुणंततः॥नीलजीमूतसंकाशंमेघस्तनितनिस्वनं॥६०॥गिरिसंहननाभासंश्वेततीक्ष्णंचदंष्ट्रिणं॥
विद्युदग्निप्रतीकाशंआदित्यसमतेजसं॥६१॥पृथिव्युद्धरणार्थायप्रविवेशरसातलं॥वेदपादोयूपदंष्ट्रःक्रतु
दंष्ट्रःश्रुतीमुखः॥६२॥अग्निजिह्वोदर्भरोमाब्रह्मशीर्षोमहातपाः॥अहोरात्रेक्षणधरोवेदांगःश्रुतिभूषणः॥
६३॥अनासःपुरुकुंडःसमेद्योस्त्रमामहानत्यधर्मप्रियः॥श्रीमाश्चीलयाक्रमसत्कृतः॥६४॥प्रोषत्वेनमुखोघोरःप राम.
श्रुजानुर्मखाकृविः॥उक्रापत्नीगहोमोपवीजोषधिमहात्फलः॥६५॥वाद्यंतरात्मयंत्रस्थिविकृतिःसोमशोणि ४०८
तः॥वेदस्कंधोहविर्गंधोहव्यकव्यविभागवान्॥६६॥प्राग्वंशकायोद्युतिमान्जन्मदीक्षाभिरक्षितः॥दक्षि

णाहृदयोयोगीमहामंत्रमयोमहान्॥६७॥ततःकर्मिष्टचरकःप्रवर्गपवित्रभूषकः॥नानाछंदोगतियोगोगुह्यो
पतीन्वदासनः॥६८॥छायापत्नीमयोवैमणिसंगसमोत्थितः॥रसातलतलेमग्नोरसातलतलंगतः॥६९॥प्र
भुर्लोकहितार्थायदंष्ट्राग्रेणोज्जहारतां॥ततःस्वस्थानकमानीयपृथिवींपृथिवीधरः॥७०॥मुमोचपूर्वंमनाधा
रयित्वावसुंधरां॥ततोजगामनिर्वाणिंमेदिनीतस्यधारणात्॥७१॥चकारचनमस्कारंतस्मैदेवायशंभवे॥एवं
यज्ञवराहेणभूत्वाभूतहितार्थिनां॥७२॥उद्धृतापृथिवीदेवीसागरांतर्गतापुरा॥अयोध्यस्थितिदेवोजगतः
स्थापनेच्छया॥७३॥पृथिवीप्रविभागायमनसापंकजेक्षणः॥रसातलगतांदेवीमचिंत्यउरुविक्रमः॥७४॥सु
रोत्तमःप्रवरःवाराहरूपधृक्पृथ्वाकपिः॥प्रसन्नमयेकदंष्ट्र्यासमुद्धरद्धरणीमतुल्यविक्रमः॥७५॥॥इतिश्रीम
त्स्यपुराणेवाराहप्रादुर्भावःसमाप्तः॥ऋषयऊचुः॥॥नारायणस्यमहात्म्यंश्रुत्वायथाक्रमं॥नतृप्तिर्जायतेस्माकंस वाराहवि
वःपुनरिहोच्यतां॥१॥कथंदेवागताःपूर्वममरत्वंविचक्षणाः॥तपसाकर्मणावापिप्रसादात्कस्यतेमराः॥२॥सूत
उवाच॥॥यत्रनारायणोदेवोमहादेवश्चशूलभृत्॥तत्रामरत्वंसर्वेषांसहायेतत्रतोस्मृतो॥३॥पुरादेवासुरेयु
---विनीं द्धेहताश्चबातनुरौसुरैः॥पुनःसंजीविंद्यांप्राप्याभृगुनंदनः॥४॥संजीवयतिदैत्येंद्रान्यथासुप्तोत्थितानिव
तस्यतुष्टेनदेवेनदत्ताकरेणमहात्मना॥५॥मृतसंजीवनीनामविद्यादत्तामहाप्रभा॥तांतुमाहेश्वरींविद्यांमहेश्व

म०पु ४०९ मुखोकृता॥६॥नागविसंस्थितां दृष्ट्वासुसुदु:सदानवा:॥ततोमरत्वंदैत्यानां कृतंशक्रेण धीमता॥७॥यन्नास्तिसर्व
लोकानांदेवानांपक्षरक्षसां॥ननास्रपीणांचब्रलेंकोपेंद्रविसुषु॥८॥तंजव्याशंकरात्शक्रः परांविद्दतिमाग
तः॥ततोदेवासुरोघोरस्तुमलसुमहानभूत्॥९॥तत्रदेवैर्हतान्दैत्यान्लीलयैवक्षिसः॥शक्रोविद्याबलेनैचउत्था ग
पयतिदैत्यान्॥१०॥एवंविधेनशास्तुहृदस्तिरुदारधी॥हन्यमानास्ततोदेवा:शातशोयसहस्रशः॥११॥वि
षण्णवदनाः सर्वेविभूवुर्विह्वलेंद्रियाः॥ततस्तेसुविषण्णेषु भगवान्कमलोद्भवः॥१२॥मेरुपृष्ठेसुरेंद्राणामिदमा
हजगत्पतिः१२॥श्रीब्रह्मोवाच॥॥देवाःसंशृणुतमद्वाक्यंतदेवचनिरूप्यतां॥क्रियंतांदानवैःसार्द्धसख्यमत्राभि य
धीयतां॥१३॥क्रियतामम्रतोद्योगोमथ्यतांक्षीरवारिधीः॥सहायंवरुणंकृत्वाचक्रपाणिर्विबोध्यतां॥१४॥मथा
नंमंदरंकृत्वाशेषंनेत्रेणवेष्टयेत्॥दानवेंद्रोबलिःस्वामिस्तोकिंचनिवेद्यतां॥१५॥प्रार्थ्यतांकूर्मरूपश्चपातालेवि
ष्णुरव्ययः॥प्रार्थ्यतांमंदरःशैलोमंथकार्थेप्रवक्ष्यतां॥१६॥ततस्तुत्वावचनंदेवाजग्मुर्दानवमंदिरं॥अलंविरोध
भावेनभृत्यास्तवबलोधुना॥१७॥क्रियताममृतोद्योगोध्रियतांशेषनिक्रकं॥त्वयाचोतोद्धृतेदैत्यअमृतोमर राम
मंथने॥१८॥भविष्यामोनराःसर्वेत्वत्प्रसादान्नसंशयः॥एवमुक्तस्तदादेवैःपरितुष्टःसदानवः॥१९॥यथाव ४०९
दतदेवास्तथाकार्यमयाधुना॥दिव्यंसमम्रतंवातथाधुना॥२०॥सुहृदानिवयंप्राप्तान्स्नेणतान्वैवैरिणः॥

योनरज्यतेमत्वामेत्वावहविनरपति॥२१॥पाज्यपिष्यामिवःस्वानिधुनास्त्रेहपास्थितः॥शक्तोहमेकमेवा
त्रमथितुंक्षीरवारिधिं॥२२॥बाहुभ्यामेवक्षोत्स्येसर्वतःक्षीरवारिधिं॥आहरिष्येमृतंविगावपुक्तोदैत्यैःदेवैः थ
सार्द्धययौतदा॥२३॥मंदरंप्रार्थयामाससहायत्वेधराधरं॥मयाभवत्त्वमस्माकंनान्तमंथने॥२४॥सुरासुर
णांसर्वेषांइदंकार्यंमहाद्युतिः॥तथेतिमंदरःप्राहयथाबाधानवेमम॥२५॥यत्रस्थितामविष्यंमथिष्येवरु
त णालयं॥कल्प्यतांनेत्रकार्यंचयःसहस्रफणीमम॥२६॥तस्तुनिर्गतौदेवौकूर्मशेषौमहाबलौ॥विश्लोकाग
श्चतुर्थांशगधरणीधरणेस्थितो॥२७॥कुचुतुर्गर्वसंयुक्तंवचनंशेषकच्छपौ॥त्रैलोक्यधरणेनापीब्रह्मांड
मथनेनच॥२८॥नामेस्नानिभिवदेहेकिंतुमंदरवर्त्तते॥ततउत्पाद्यतंशैलंतत्क्षणात्क्षीरसागरे॥२९॥चिक्षेप
लीलयानागकूर्मश्चाधोव्यवस्थितः॥निराधारंयथाशैलंनत्रोकुर्देवदानवाः॥३०॥मंदरन्त्रामयंकर्तुंक्षीरोदमं
थनेतथा॥नारायणनिवासंतेजग्मुर्बलिसमन्विताः॥३१॥यत्रास्तेदेवदेवेशःस्वयमेवजनार्दनः॥तांत्रापस्तां
ततोदेवोस्थितपद्मोपमंश्रुतं॥३२॥योगनिद्रामुनिरतंपीतवाससमच्युतं॥हारकोयूरवर्द्धनगमहिपर्यंकसं
स्थितं॥३३॥पादपद्मेनपद्मायाःसत्रांतंनाभिमंडलं॥स्वयक्षंव्यंजनेनायवीज्यमानंगरुत्मता॥३४॥स्तूयमा
नंसमंताच्चसिद्धचारणकिन्नरैः॥आयुधेर्मूर्त्तिमद्भिश्चसेव्यमानंसमंततः॥३५॥सव्यबाहूपधानंतंतुष्टु

म॰पु॰ दैवदानवाः॥कृतांजलिपुटाः सर्वे प्रणताः सर्वतो दिशं॥३६॥देवा ऊचुः॥ ॥नमो लोकत्रयाध्यक्ष तेजसा जितभास्कर।
५१० नमो विष्णो नमो जिष्णो नमस्ते कैटभार्दन॥३७॥नमः सर्गक्रियाकर्त्रे जगत्पालयते नमः॥रुद्ररूपाय सर्वाय नमः
संहारकारिणे॥३८॥नमः स्वजायुधाद्दर्पेन नमो दानवघातिने॥नमः क्रमत्रयाक्रांतत्रैलोक्यायं नवाय च॥३९॥
नमः प्रचंडदैत्येंद्रकुलकालविलिङ्गिने॥नमो नाभिह्रदोद्भूतपद्मगर्भमहाबल॥४०॥पद्मभूतमहाभूतकर्त्रे हर्त्रे ज
--- गत्प्रिय॥जनिताशेषलोकेशक्रियाकारण॥४१॥अमारारिविनाशाय महासमरशालिने॥लक्ष्मीमुखाब्ज
मधुप नमः कीर्तिनिवासिने॥४२॥अस्माकममरत्वाय श्रियमुद्धियतामयं॥मंदरः सर्वशैलानामयुतायुत
विस्तर॥४३॥अनंतबलबाहुभ्यां मवष्टभ्यैकपाणिना॥मथ्यताममृतं देवाः स्वधास्वाहापगामिनां॥४४॥
ततः श्रुत्वा स भगवान् स्तोत्रपूर्वं वचस्तथा॥विहाय योगनिद्रां तामुवाच मधुसूदनः॥४५॥श्रीभगवानुवाच॥
स्वागतं विबुधाः सर्वे किमागमनकारणं॥यस्मात्कार्यादिह प्राप्तास्तद्भूत विगतज्वराः॥४६॥नारायणेनैवमुक्ताः
प्रोचुस्तत्र दिवौकसः॥अमरत्वाय देवेश मथ्यमाने महोदधौ॥४७॥यथामृतं स्यात् देवेश तथा नः कुरु माध राम
व॥त्वया विना न तच्छक्यमस्माभिः कैटभार्दन॥४८॥प्राप्तुं तदमृतं नाम ततोऽग्रे भव नो विभो॥इत्युक्तस्तैस्ततो वि ५१०
ष्णुरप्रधृष्योरिमर्दनः॥४९॥जगाम सहितो देवैर्यत्रास्तो मंदराचलः॥वेष्टितो नागभोगेन धृतेनामरदानवैः॥५०॥

विषमीतास्ततो देवा यतः पुच्छं ततः स्थिताः॥मुखतो दैत्यसंघास्तु सैंहिकेयपुरस्सराः॥५१॥सहस्रवदनं चास्य शि
रः सव्येन पाणिना॥दक्षिणेन बली देहं नागस्याकृष्टवांस्तदा॥५२॥दधार अमृतमंथायां मंदरं चारुकंदरं॥नारायण मं
---विबुधैर् स्तुजपुग्मद्वयेन तु॥५३॥सदेवासुरजैः सर्वैर्जयप्रदोऽपुरासरैः॥दिव्यं वर्षसहस्रां मथितः क्षीरसागरः॥५
४॥ततः श्रांतास्तु ते सर्वे देवा दैत्यपुरस्सरं॥ततः श्रांतेषु देवेषु मेघो भूत्वा बुशीकरान्॥५५॥ववर्षामृतकल्पस्ता
न् वबौ वायुश्च शीतलः॥श्रांतप्रायेषु देवेषु अश्रांतः कमलासनः॥५६॥कथ्यतां सिंधुरित्युवाच पुनः पुनः॥ मध्यताम
अवष्टंभयोगवंतः श्रियं प्राप्स्यथ वै सदा॥५७॥ब्रह्मप्रोत्साहिता देवा ममंथुः पुनरंबुधिं॥भ्राम्यमाणे ततः शैले स्व
योजनायुतशेखरे॥५८॥निर्जग्मुर्हस्तियूथानि वाराहसरभादयः॥श्वापदायुतलक्षाणि तथा पुष्पफलद्रु
मः॥५९॥ततः फलानां वीर्येण पुष्पैर्गंधरसेन तु॥क्षीरमंबुधिजं सर्वं दधिरूपमजायत॥६०॥ततस्तु सर्वजी
वेषु चूर्णितेषु सहस्रशः॥तदांबुधेर्मथ्यमाना वारुणी समजायत॥६१॥वारुणीगंधमाघ्राय मुमुदुर्दैत्यदा
नवाः॥तदास्वादेन बलिनो देवा दैत्यादयोऽभवन्॥६२॥ततोतिवेगान् जगरु नगेंद्रं सर्वतः पुरा॥मेथानमप
पश्चिस्तु मेरुस्तत्राचलो भवत्॥६३॥अनवस्त्रायतो विष्णुर्भुजमंदरबंधनः॥स वासुकिफणाजगनपाणिः
कृष्णोव्यजायत॥६४॥यथा पद्मोत्सले युक्तो ब्रह्मदंडोतिविस्तरः॥ध्वनिर्मेघसंस्त्रस्य जलधेस्थितस्तदा॥६५

भागेद्वितीयेसप्तवानादित्यास्तुततःपरं॥ततोरुद्रामहाबादेवावसवोऽगुह्यकादयः॥६६॥पुरुषोविष्णुतितिसुन
स्तुविष्टनरांवरो॥द्विमूर्धाविघ्नदंष्ट्रश्चसैंहिकेयोबलिस्तदा॥६७॥एतेचान्येचबहवोमुखनागेव्यवस्थिताः॥
ममंथुरंबुधिंहृष्टाबलेजेस्तेजोविभूषिता॥६८॥बभूवात्रमहाघोषःप्रलयेचघनोपमः॥उदधेर्मथ्यमान
स्यमंदरेणसुरासुरैः॥६९॥तत्रनानाजलचराविनिर्धूतामहाघनाः॥विलयंसमुपाजग्मुःशतशोऽथसहस्र
शः॥७०॥वारुणानिचभूतानिविविधानिमहीधरः॥पातालतलवासीनिविलयंसमुपानयत्॥७१॥तस्मिं
श्चभ्राम्यमाणेऽद्रौसंहृष्टाश्चपरस्परं॥वियतस्तरसापेतुःपर्वताग्रान्महाद्रुमाः॥७२॥तेषांसंघर्षणाच्चाग्निर ग्रा
र्चिर्भिःप्रज्वलन्मुहुः॥विद्युद्भिरिवनीलाभ्रमंवृतपोनम्दरंगिरिं॥७३॥ददाहकुंजरांश्चैवसिंहांश्चैवविनिःसृ
तान्॥विगतासूनिवषाणिसत्वानिविविधानिच॥७४॥तमग्निममरश्रेष्ठःप्रदहंतंयतस्ततः॥वारिणामे
घजेनेंद्रःशमयामाससर्वतः॥७५॥ततोनानारसास्तत्रनिपेतुःसागरांभसि॥महाद्रुमाणांनिर्यासाबहव
श्चौषधीरसाः॥७६॥तेषाममृतवीर्याणांरसानांपयसैववे॥अमरत्वंसुराजग्मुःकांचनच्छविसन्निभाः॥
स्थ ७७॥अंतस्यसमुद्रस्यतज्जातमुदकंपयः॥रसोत्तरैर्विमिश्रंचततःक्षीरमभूत्पयः॥७८॥ततोब्रह्माणमा
सीनंदेवावचनमब्रुवन्॥श्रांताःस्मसुभृशंब्रह्मन्नोद्भवत्यमृतंचयत्॥७९॥ऋतेनारायणात्सर्वेदैत्यादे

वोत्तमास्तथा॥चिरायितमिदंचापिसागरस्यापिमंथनं॥८०॥ततोनारायणंदेवंब्रह्मावचनमब्रवीत्॥विधत्स्वबलं
विष्णोभवानेवपरायणं॥८१॥श्रीविष्णुरुवाच॥॥बलंददामिसर्वेषांकर्मण्यस्मिन्समास्थिताः॥क्षोभ्यतांक्रम
शःसर्वैर्मंदरःपरिकीर्तितः॥८२॥॥इतिश्रीमत्स्यपुराणेअमृतमथने॥॥सूतउवाच॥॥नारायणवचःश्रुत्वा
बलिनस्तेमहोदधिं॥तत्पयःसहितास्तत्रचक्रिरेभृशमाकुलं॥१॥ततःशतसहस्रांशुसमानइवसागरात्॥प्र
सन्नाभःसमुत्पन्नःसोमःशीतांशुरुज्ज्वलः॥२॥श्रीरनंतरमुत्पन्नाघृतात्पांडुरवासिनी॥सुरादेवीसमुत्पन्नातुरगः
पांडुरस्तथा॥३॥कौस्तुभश्चमणिर्दिव्यउत्पन्नोऽमृतसंभवः॥मरीचिविकचःश्रीमान्नारायणउरोगमः॥४॥
पारिजातश्चविकचकुसुमस्तबकान्वितः॥अनंतरमुपद्रष्टंस्तेधूमंअंबरसंनिभं॥५॥आपूरितदिगाभोग
रं दुस्सहंसर्वदेहिनां॥यदाघ्रायसुराःसर्वेमूर्छिताःपरिलंबिताः॥६॥उपविष्टांबुधितटेस्वशिरोगत्यपाणि
ना॥ततःक्रमेणदुर्वारमनंतंप्रसहत्तदा॥७॥ज्वालामालाकुलाकारंसमंतात्भीषणाकृतिं॥तेनाग्निनापरि
म्राः क्षिप्ताप्रायशस्तुसुराः॥८॥दग्धाश्चाबभ्रमुस्तस्यकलादिशः॥प्रधानादेवदैत्याश्चभीषितास्तेनवह्निना॥९॥
डं अनंतरंसमुद्भूतास्तस्मात्तद्बिंदुभजातयः॥कृष्णसर्पमदादंष्ट्रारक्ताश्चपवनाशनाः॥१०॥श्वेतपीतास्तथाचान्ये
तथागोनासजातयः॥मशकाभ्रमरादंशमक्षिकाःशलभास्तथा॥११॥कर्णशृगालाक्षकीलशाश्चानेकाःस

म०पु०
४१२

जातयः॥ अपितोदंष्ट्रिणो रौद्रास्तथा वरविजातयः॥१२॥ दुग्धं हालाहलात्पुस्ता वसासो क्षिवत्स्नकाः॥ नालप
त्राद्यपश्चान्ये रातश्चोव कुम्भेदिनः॥१३॥ येषां गंधेन दग्धं ते गिरिशृंगाग्यं ध्रुवं॥१३॥ अनीतरं नालरसौ घर्मि
न्नं भिन्नां जना मे विषमाश्वसंतः॥ कायेन लोकांतर एवं केण काशैश्च वह्निप्रतिमैर्ज्वलद्भिः॥१४॥ सुवर्णमुक्ता
फलभूषितांगं किरीटिनं पीतदुकूलजुष्टं॥ नीलोत्पलाभैः कुसुमैः कृतार्थं गजेंतभीमाधर भीमवेगं॥१५
अम्भाक्षुरं भोनिधिमध्यसंस्थं स्वविग्रहं देहभयाश्रयंतं॥ विलोक्य तं भीषणवेगमुग्रं चेसुश्च भूताश्च नि
सुराश्च सर्वे॥१६॥ केचित्विलोक्यैव गतास्तभावं निमज्जंतां वाष्यपरप्रसन्नाः॥ वेमुर्मुखे स्यो निजपेनमु
ग्नअन्ये निपेतुश्च महास्सवेगाः॥१७॥ श्वासेन तस्य निर्दग्धा ततो विह्वलं दानवाः॥ दग्धांगारनिभा जा
तायेभूता दिव्यरूपिणः॥१८॥ ततस्तु संभ्रमाद्विष्णुरुवाचात्मसुरात्मकं॥१८॥ श्रीभगवानुवाच॥ कोप
वानंतव भक्तः किमिच्छसि कुतोपिवा॥ किं कृत्वातो प्रियं जाये वदेवाच क्ष्व मे खिलं॥१९॥ शौनक उवाच॥
तवनतस्य वचः श्रुत्वा विषोः कालाग्निसंभवः॥ उवाच कालकूटस्तु भिन्नदुंदुभिनिस्वनः॥२०॥ कालकूट राम०
उवाच॥ अहं हि कालकूटाख्यो विषो जलधिसंभवः॥ यदा नीजाम मथ्येषा परस्परवधैषिभिः॥२१॥ सु ४१२
रासुरैर्विमथीतो दुग्धांभोनिधिसमुद्भवः॥ अच्युतो हंतदा सर्वान्हंतुं देवान्तदामनवान्॥२२॥ सर्वान

हं हरिष्यामि क्षमात्रेण देहिनः॥ मां वा ग्रसधैर्वे सर्वे यूयं देवाः सवासवाः॥२३॥ श्रुत्वैतद्वचनं तस्य ततो भी
ताः सुरासुराः॥ ब्रह्मविष्णुपुरस्कृत्य गतास्ते शंकरांतिकं॥२४॥ निवेदितास्ततो द्वास्थो गणैर्दैत्यसुरासु
सुराः॥ अनुज्ञाताः स्त्रीं वनाथ विविशुर्गिरिशांतिकं॥२५॥ मंदरस्य गुहां हैमीं मुक्तामणिविभूषितां॥
सुखउमणिपोपानां वैदूर्यस्तंभमंडितां॥२६॥ तत्र देवासुरैः सर्वैर्नमस्थिनिर्धरणीं गते॥ ब्रह्माणमग्रतः
कृत्वाइदं स्तोत्रमुदाहृतं॥२७॥ देवदानवा ऊचुः॥ ॐ नमस्तुभ्यं विरूपाक्ष नमस्ते तिग्मचक्षुषे॥ नमः
पिनाकहस्ताय धन्विने कामरूपिणे॥२८॥ नमस्ते शूलहस्ताय कूटिने॥ नमस्ते लोक्यनाथाय भूतग्रा
मशरीरिणे॥२९॥ नमः सुरारिहंत्रे च सोमार्कवह्निचक्षुषे॥ ब्रह्मणे देवरूपाय नमस्ते विश्वरूपि
णे॥३०॥ सांख्ययोगाय भूतानां नमस्ते शंभु नायते॥ मन्मथांगविनाशाय नमः कालक्षयंकर॥३१॥ रंहसे देव
य नमस्ते वसुरेतसे॥ एकवीराय नमः पिंडकपर्दिने॥३२॥ हर्वैकंठे नमस्तुभ्यं नमस्त्रिपुरघातिने॥ शुद्धबो
धप्रबोधाय मुक्तिकैवल्यरूपिणे॥३३॥ लोकत्रयविधात्रे च वरुणेंद्राग्निरूपिणे॥ ऋग्यजुःसामवेदाय पु
रुषायेश्वराय च॥३४॥ अग्नये चैव चोग्राय विप्राय श्रुतिचक्षुषे॥ रजसे चैव सत्वाय नमस्ते तामसात्मने॥३५॥ अ
नित्यानित्यभासाय नमो नमो नित्यचरात्मने॥ व्यक्ताय चैवाव्यक्ताय व्यक्ताव्यक्तात्मने नमः॥३६॥ भक्तानामार्तिनाशा

म०पु०
४१३

यप्रियनारायणायच॥उमाप्रियायसर्वायनंदिवक्त्रकृतायच॥३७॥ऋतुमन्वन्तकल्पायपक्षमासदिनात्म
ने॥नानारूपायमुंडायवरुथपृथुमंडिने॥३८॥नमःकपालहस्तायदिग्वस्त्रायशिखंडिने॥एवंसुरासुरैः
स्थाणुःस्तुतस्तेषामुपागतः॥३९॥उवाचवाक्यंसीतानांस्मितान्वितशुभाक्षरं॥३९॥श्रीशंकरउवाच॥
किमर्थमागताब्रूतत्रासम्लानमुखांबुजाः॥किंवानीदृग्दाम्पद्यक्तामंमब्रूतमाचिरं॥४०॥इत्युक्तास्तेतु
देवेनप्रोचुस्तमसुराःसुराः॥४०॥सुरासुराऊचुः॥॥अमृतार्थेमहादेवमथ्यमानेमहोदधौ॥विषम
भूतमद्भूतंलोकसंज्ञायकारकं॥४१॥सउवाचयःसर्वेषांदेवानांभयकारकः॥सर्वान्भक्षयिष्यामिअ
थमामपिबत्स्वै॥४२॥तमशक्तावयंदेवस्तुंसोस्मान्हाक्तोमहोत्करः॥मुखनिश्वासमात्रेणसीतपत्रसम
द्युतिः॥४३॥विष्णुःकृष्णःकृतस्तेनयमश्चविमनात्मकः॥मूर्छिताःपतिताश्चान्येविप्रणाशंगताःपरे॥४४
अर्योनयक्रियायातिदुर्नगानांयथाविभो॥दुर्बलानांसंकल्पोपथ्याभवतिचापदं॥४५॥विषमेतत्समुद्भू
तंतस्मादमृतकांक्षया॥तस्मात्त्वमेववरदस्त्वंगतिस्त्वपरायणं॥४६॥भक्तानुकंपीभावज्ञोभुवनादीश्व
रोविभुः॥यज्ञोयज्ञभुक्सर्वहविःसोमसोम्योसुरांतकृत॥४७॥त्वमेकोनोगतिर्देवगीर्वाणामुपसर्गहृता
रक्षास्माकंतसंकल्पान्विरूपाक्षविषमज्वरान्॥४८॥तत्श्रुत्वाभगवानाहभगनेत्रांतकृद्भवः॥४८॥॥

राम०
४१३

देवदेवउवाच॥॥भक्षयिष्यामितंघोरंकालकूटंमहाविषं॥तथान्यदपिकृत्संकृत्स्नंदेवासुराःसुराः॥४९॥
तत्संवसाधयिष्यामितिहृष्टंविगतज्वराः॥तेसर्वेहृष्टरोमाणोबाष्पगद्गदकंठिताः॥५०॥आनंदाश्रुपरीता
क्षाःसनाथाइतिमेनिरे॥सुराब्रह्मादयःसर्वेतेसमाश्वस्तमानसाः॥५१॥ततःप्रगर्जुरत्नतिंततडिप्तितसत्क
तुः॥ततोययौद्रुतगतिनाककुद्मताहरपरातपवनगतिर्जगत्पतिः॥प्रधावितैरसुरसुरैश्चनायकैःस्ववाह
नैर्विचलितछत्रचामरैः॥५२॥पुरस्सरैस्सवमरमुनैःसमाश्रयःशिवोवशीशिखिकपिशोर्ध्वजूटकः॥आ
सायदुग्धोदधिसिंधुसिंधुंतकालकूटंविषमंस्मभक्षयत॥५३॥ततोदेवोमहादेवोविलोक्यविषमंविषं॥छा
पास्थानंसमास्थायसोपिवामपाणिना॥५४॥पीयमानेविषेतस्मिंस्ततोदेवामहासुराः॥जगुश्चननृतु
श्चापिसिंहनादांश्चपुष्कलान्॥५५॥चक्रुःशतक्रतुमुखाहिरण्याक्षादयस्तथा॥संस्तुवंतश्चदेवेशंप्र
सन्नाश्चास्तुवंस्तदा॥५६॥कंठदेशोतदाप्राप्तेविषोदेवमथाब्रवीत॥विरंचिप्रमुखादेवाबलिप्रमुखतोसुराः॥
५७॥शोभतेदेवकंठस्थेगात्रेकुंदनिभप्रभे॥भृंगमालानिभंकंठेतत्रैवास्तुविषंतव॥५८॥इत्युक्तःशंकरोदेव
स्तथात्याहसुरांतकः॥पीतेविषेदेवगणान्विमुच्यततोहरोमंदरशैलमेत॥तस्मिन्गतेदेवगणाःपुनस्तं
ममंथुरब्धिंविविधाप्रकारैः॥५९॥॥इतिश्रीमत्स्यपुराणेअमृतमंथनेकालकूटोत्पत्तिः॥॥सूतउवाच॥॥

म०पु० मथ्यमानेपुरस्मिन्जलधौसमदृश्यत॥ धन्वंतरिश्चभगवान्आयुर्वेदप्रजापतिः॥१॥ततोमदीरायताक्षीवितलोक
४१४ प्रमाथिनी॥ततोमृतश्चसुरभिःसर्वभूतभयापहा॥२॥जग्राहकामस्तांदिक्षुःकौस्तुभंचमहामणिं॥गजेंद्रंचस
हस्राक्षोह्यरत्नंचभास्करः॥३॥धन्वंतरिश्चजग्राहलोकारोगप्रवर्त्तकं॥छत्रंजग्राहवरुणःकुंडलेयज्ञाचीपतिः॥
पारिजाततरुंचैवजग्राहमुदितस्तदा॥धन्वंतरिस्ततोदेवआयुष्मानुदतिष्ठत॥५॥स्वतंकमंडलुंविभ्रदमृ
तंयत्रतिष्ठति॥एतदेवाद्भुतंदृष्ट्वादानवानामुपस्थितं॥६॥अमृतार्थेमहान्वादोममेतिचमजल्पतां॥ततोनाराय
णोमायामास्थितोमोहनीविभुः॥७॥स्त्रीरूपमतुलंकृत्वादानवानभिसंश्रितः॥ततस्तदमृतंतस्यैददुस्तेमू
ढचेतसः॥८॥स्त्रैर्येर्दानवदैतेयाःसर्वेतद्गतमानसाः॥अथावरणमुख्यानिमहाप्रहरणानिच॥९॥प्र
गृह्याभ्यद्रवन्वेगात्सहितादैत्यदानवाः॥ततस्तदमृतंदेवोविष्णुरादायवीर्यवान्॥१०॥जग्राहदानवेंद्रा
भ्यांनरेणसहितःप्रभुः॥ततोदेवगणाःसर्वेपपुस्तदमृतंतदा॥११॥विष्णोःसकाशात्संप्राप्यसंग्रामेतुमुलेस
ति॥ततःपिबत्सुसमकालंदेवेष्वमृतमीप्सितं॥१२॥राहुर्विबुधरूपेणदानवःप्रापतत्तदा॥तस्यकंठमनुप्रा राम०
प्तेदानवस्यामृतेतदा॥१३॥आख्यातंचंद्रसूर्याभ्यांसुराणांहितकाम्यया॥ततोभगवतातस्यशिरोछिन्नमलं ४१५
कृतं॥१४॥चक्रायुधेनचक्रेणपिबतोमृतमोजसा॥तच्छैलशृंगप्रतिमंदानवस्यशिरोहत्॥१५॥चक्रेणोत्कृत्तम
म

पतद्वाभ्यपद्वसुधातलं॥ततोवैरविनिर्बंधंकृतोराहुर्मुखेनवै॥१६॥शाश्वतश्चंद्रसूर्याभ्यांग्रसत्यद्यापिबाधते॥वि
हायभगवांश्चापिस्त्रीरूपमतुलंहरिः॥१७॥नानाप्रहरणैर्भीमैर्दानवान्समकंपयत्॥प्रासाःसुविपुलास्तीक्ष्णा
निःपतंतःसहस्रशः॥१८॥तोमरैश्चात्रनिर्भिन्नावमंतोरुधिरंबहु॥असिशक्तिगदाभिन्नानिपेतुर्धरणी
तले॥१९॥भिन्नानिपट्टिशैश्चापिशिरांसियुधिदारुणे॥तप्तकांचनमाल्यानिनिपेतुरनिशंतदा॥२०॥रुधि
रेणावलिप्तांगानिपेतुश्चमहासुराः॥अद्रीणामिवकूटानिधातुरक्तानिभूतले॥२१॥ततोहलहलाशब्दः
संबभूवसमंततः॥अन्योन्यंछिंदतांशस्त्रैरादित्येलोहितायति॥२२॥परिघैश्चायसैःपीतैःसन्निकर्षेचमुष्टि
भिः॥निघ्नतांसमरेन्योन्यंशब्दोदिवमिवास्पृशत्॥२३॥छिंधिभिंधिप्रधावंतःपातयेतिसरेतिच॥अश्रूयंतम
हाघोराःशब्दास्तत्रसमंततः॥२४॥एवंसुतुमलेयुद्धेवर्त्तमानेमहाभये॥नरनारायणौदेवौसमाजग्मतु
राहवे॥२५॥चित्रंदिव्यंधनुर्दृष्ट्वानरस्यभगवानपि॥चिंतयामाससवैचक्रंविष्णुर्दानवसूदनः॥२६॥ततोचि
राच्चिंतितमात्रात्वमासनंमहाप्रभंचक्रममित्रनाशनं॥विभावसोस्तुल्यमकुंठविक्रमंसुदर्शनंभीममसत्युत्
तमं॥२७॥तदागतंज्वलितहुताशनप्रभंभयंकरंकरिकरवालमच्युतः॥मुमोचवेगेनदनुलसुप्रवेगतोमहा
प्रभंदितिजगणावदारणे॥२८॥संवर्त्तकज्वलनसमानतेजसंपुनःपुनर्न्यपतत्तवेगवांस्तदा॥विदारयन्दितित

नयाः सह स्वशाः करेध्व तं पुरुषवरेण संयुगे ॥२९॥ दहन् कचित्तु ज्वलन इवातिलोहितः प्रसह्य तान् असुरगणा
न्न्यकृंतत ॥ प्रवेरितं वियति मुकुः क्षितौ तदा प्रपौरणे रुधीरमथोपि वीर्यवत् ॥३०॥ अथासुरा गिरिभिरही
नमानसा मुहुर्मुहुः सुरयुरुमर्दयंस्तदा ॥ महाबलाविधितिसुमेघवर्चसः सहस्रशो गगनमभिप्रपेदिरे ॥
३१॥ अथासुरान् पजनाः प्रपेदिरे सपादपा बहुविधमप्यरूपिणः ॥ महाद्रयः प्रतिगलिताश्च सानवः परस्प
रं हतमभीत्सनास्वराः ॥३२॥ ततो मही प्रचलितसाद्रिकानना महाद्रिपाप्रतिनिहताः समंततः ॥ परस्परं समभि
निगर्जतां बहुरणाजिरे भृशमभिसंप्रवर्त्तिते ॥३३॥ नरस्ततो वरकनकाग्रभूषणैर्महेषुभिः पमहानयैः सुरगण
विग्रहैस्तदा ॥ ततो मही लवणजलं ससागरं मृत्रासुराः प्रविविशुरर्दिताः सुरैः ॥३४॥ वियद्गतं ज्वलितहुताशनप्र
भं सुदर्शनं परिकुपितं निशाम्य च ॥ ततः सुरैर्विजयमवाप्य दंमरस्ससेव देशं गमितः सुहृज्जितः ॥३५॥ वृतस्तदा
दिवमथवे चसर्वतिस्ततोयताः सलिलधरापयागतं ॥ ततो मृतं समुनिहितमेव च क्रिरे सुराः परां मुदं ध्वगपुम्य प मध्य
त्तां ॥३६॥ दधुः स्मतंनिधिममृतस्य रक्षितुं क्षितिः किरीटिनं बलीभिरथामरैः सह ॥३७॥ ॥ इति श्री मत्स्यपुराणे
अमृतमंथने संसतं ॥ ॥ ऋषय ऊचुः ॥ प्रासादभवनादीनां वेशं विस्तरतो वद ॥ कुर्यात्केन विधानेन कश्च वास्तुरु राम॰
दाहृतं ॥१॥ ॥ सूत उवाच ॥ ॥ भृगुरत्रिर्वसिष्ठश्च विश्वकर्मा मयस्तथा ॥ नारदो नग्नजिच्चैव विशालाक्षः पुरंद ४९५

रः ॥२॥ ब्रह्मा कुमारो नंदीशः शौनको गर्ग एव च ॥ वासुदेवोनिरुद्धश्च तथा शुक्रबृहस्पती ॥३॥ अष्टादशैते विख्या
ता वास्तुशास्त्रोपदेशकाः ॥ संक्षेपेणोपदिष्टं यत्तु मनवे मत्स्यरूपिणा ॥४॥ तदिदानीं प्रवक्ष्यामि वास्तुशास्त्रम
नुत्तमं ॥ पुरांधकवधे घोरे घोररूपस्य शूलिनः ॥५॥ ललाटस्वेदसलिलमपतत्तद्भुवि भीषणं ॥ करालवदनं तस्मा
त्तत्भूतमुल्बणं ॥६॥ ग्रसमानमिवाकाशं सप्तद्वीपां वसुंधरां ॥ ततोंधकानां रुधिरमपायिपतितं क्षितौ ॥७
तेन तत्समरे सर्वं पतितं यन्महीतले ॥ तथापि तृप्तिमगमत्तत्भूतं न यदा तदा ॥८॥ तदा शिवस्य पुरतस्तपश्चक्रे
सुदारुणं ॥ क्षुधाविष्टं तु तद्भूतं आहर्तुं जगतीत्रयं ॥९॥ ततःकालेन संतुष्टो भैरवस्तस्य चाभवत् ॥ वरं वृणी
ष्व भद्रं ते यदभीष्टं तवानघ ॥१०॥ तमुवाच ततो भूतं त्रैलोक्यग्रसनक्षमं ॥ भवान्सीदेवदेवेश तथेत्युक्तं च शूलि
ना ॥११॥ ततस्तु त्रिदिवे सर्वं त्रिमंडलमथापतत् ॥ स्वदेहिनां तरिक्षं च रुंधानं प्रपतद्भुवि ॥१२॥ भीतभीतैस्ततो दे
वैर्ब्रह्मणा चैव शूलिना ॥ दानवासुररक्षोभिरवष्टब्धं समंततः ॥१३॥ येन तत्रैव चाक्रांतमतत्रैवावसत्पुनः ॥ निवा
यं सर्वदेवानां वास्तुरित्यभिधीयते ॥१४॥ अवष्टब्धेन तेनापि विज्ञप्ताः सर्वदेवताः ॥ प्रसीदध्वं सुराः सर्वे दुष्प्रा निमि
श्चलं कृता ॥१५॥ स्वास्याम्यहं किमाहारश्चावष्टब्धोत्यधोमुखः ॥ ततो ब्रह्मादिभिः प्रोक्तं वास्तुमध्ये तथा बलिः
१६॥ आहारो वैश्वदेवांते नूनमस्य भविष्यति ॥ वास्तुप्रशमनो यज्ञस्तव वाहारो भविष्यति ॥१७॥ यज्ञोत्सवावे

वबलिस्तवाहारोभविष्यति॥वास्तुपूजामकुर्वाणास्तवाहारोभविष्यति॥१९॥एवमुक्तस्ततोहृष्टःसवास्तुरभवत्तदा।
वास्तुयज्ञःस्मृतस्तस्मात्ततःप्रभृतिशांतये॥२०॥इतिश्रीमत्स्यपुराणेवास्तूत्पत्तिः॥॥सूतउवाच॥॥अथा
तःसंप्रवक्ष्यामिगृहकालविनिर्णयं॥यथाकालंशुभंज्ञात्वातदाभवनमारभेत॥१॥चैत्रेव्याधिमवाप्नोतियोगृ
हंकारयेन्नरः॥वैशाखेधेनुरत्नानिज्येष्ठेमृत्युंतथैवच॥२॥आषाढेभृत्यरत्नानिसत्रावश्चसमाप्नुयात्॥श्रा
वणेमृत्युलाभंतुहानिंभाद्रपदेतथा॥३॥पत्नीनाशोश्विनेविंद्यात्कार्त्तिकेधनधान्यकं॥मार्गशीर्षेतथाभ
क्तंपौषेतस्करतोभयं॥४॥लाभंचबहुगुणंविद्यात्फाल्गुनेकांचनंपुत्रमितिकालबलंस्मृतं॥५॥अश्विनीरो
हिणीमूलमुत्तरात्रयमैंद्रवं॥स्वातिर्हस्तानुराधाचगृहारंभेप्रशस्यते॥६॥आदित्यभौमवर्ज्यंतुसर्वेवाराःशुभा
वहाः॥वज्रव्याघातशूलेषुव्यतीपातातिगंडयोः॥७॥विष्कंभगंडपरिघवज्रयोगेषुकारयेत्॥सातौमैत्रे
चमाहेंद्रेगंधर्वेभिगरोहिणी॥८॥तथैवराजनसावित्रेब्राह्मेगृहमारभेत॥चंद्रादित्यबलंलब्ध्वाशु
भंलग्नंनिरीक्ष्यच॥९॥स्तंभोच्छ्रयादिकर्त्तव्यमन्यच्चपरिवर्जयेत्॥प्रासादेष्वेवमेवस्यात्कूपवापीषुचैवहि (राम. ४१६)
१०॥पूर्वंभूमिंपरीक्षेतपश्चाद्वास्तुंप्रकल्पयेत्॥श्वेतारक्तातथापीताकृष्णाचैवानुपूर्वशः॥११॥विप्रादेःश
स्यतेभूमिरतःकार्यंपरीक्षणं॥विप्राणांमधुरास्वादाकषायाक्षत्रियस्यतु॥१२॥कषायकटुकातद्वैश्यशूद्रे

षुशस्यते॥रत्निमात्रेततोगर्त्तेविलिप्तेचसर्वतः॥१३॥घृतमामसरावस्थंकृत्वावर्त्तिचतुष्टयं॥ज्वलयेद्भूपरीक्षा
र्थंपरितःक्रमतोमुखं॥१४॥दीप्तौपूर्वादिगृह्णीयाद्वर्णानामानुपूर्वशः॥वास्तुसाम्येहिकोनामदीप्यतेसर्वति
हृपः॥१५॥शुभदःसर्ववर्णानांप्रासादेषुगृहेषुच॥रत्निमात्रमधोगर्त्तेपरीक्ष्यखातपूरणे॥१६॥अधिकेसुख
माप्नोतिन्यूनेहानिःसमेसमं॥हलकृष्टेथवादेशेसर्वबीजानिवापयेत्॥१७॥त्रिपंचसप्तरात्रेणयत्रप्ररोहंति
तान्यपि॥श्रेष्ठाभूमेभूवर्जनीयेतरेषुसदा॥१८॥पंचगव्यौषधिजलैःपरीक्षितासमासयेत्॥एकाशीतिप
दंकृत्वारेखाभिःकनकेनच॥१९॥पश्चात्पिष्टेनवालिख्यसूत्रेणालोड्यसर्वतः॥दशपूर्वायतारेखादशचैवो
त्तरायता॥२०॥सर्ववास्तुविभागेषुज्ञेयानवचतुष्ककाः॥एकाशीतिपदंकृत्वावास्तुवित्सर्ववास्तुषु॥२१॥
पादस्थान्पूजयेद्देवान्त्रिंशत्तंचदशैवतु॥द्वात्रिंशद्बाह्यतःपूज्याःपूज्याश्चांतस्त्रयोदश॥२२॥नामतस्तान्प्र
वक्ष्यामिस्थानानिचनिबोधत॥ईशानकोणादिषुतान्पूजयेद्धविषानरः॥२३॥शिखीचैवाथपर्जन्योज
यंतःकुलिशायुधः॥सूर्यःसत्योभृशश्चैवआकाशोवायुरेवच॥२४॥पूषाचवितथश्चैवगृहक्षतयमावुभौ॥
गांधर्वोभृंगराजश्चमृगःपितृगणस्तथा॥२५॥दौवारिकोथसुग्रीवःपुष्पदंतोजलाधिपः॥असुरःशोष
णश्चैवरोगोहिर्मुख्यएवच॥२६॥भल्लाटःसोमःसर्पोथस्यदीतिस्तदितिस्तथा॥बहिर्द्वात्रिंशदेतेतुतदंतसु

अ

ततः शृणु ॥२७॥ ईशानादिचतुष्कोणसंस्थितं पूजयेत्बुधः ॥ आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च ॥२८॥ मध्येऽस्य
नवपदो ब्रह्मा तस्याष्टौ समीपगाः ॥ सव्येनैकांतरान् विद्यात्सर्वांस्तान्नामतः शृणु ॥२९॥ अर्यमा सविता चैव विवस्वा
न् विबुधाधिपः ॥ मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ॥३०॥ अष्टमश्चापवत्सस्तु परितो ब्रह्मणः स्मृ
ताः ॥ आपश्चैवापवत्सश्च पर्जन्योऽग्निर्दितिस्तथा ॥३१॥ पदकानां तु वायव्यापामे कोणे बहूषतः ॥ तन्मध्येव
हिर्भित्तिः स्यात् द्विपदास्ते तु सर्वशः ॥३२॥ अर्यचविवस्वांश्च मविम्मात्र स्तथैव च ॥ ब्रह्मणः परितो दिक्षु त्रिपदास्ते
तु सर्वशः ॥३३॥ वंशानिदानीं वक्ष्यामि ऋजूनपि पृथक्पृथक् ॥ तथा रोगोऽनिलः पुनः शिखिनं पुनः ॥३४॥ मुख्याद्
भ्रान्तथा विद्यान्वितथं यावदेव तु ॥ सुग्रीवाददितिं यावत् तं गणाजयंतमेव च ॥ एते वंशाः समाख्याताः क्वचित्तु
जय एव च ॥ एतेषां यस्तु संपातः पदमध्ये समं ततः ॥३६॥ नर्म चैतत्समाख्यातं त्रिशूलं कोणगं च यत् ॥ स्तम्भ
न्यासेषु वर्ज्यानि रज्जुबंधेषु सर्वदा ॥३७॥ कीलोच्छिष्टोपघातादि वर्जयेद्यत्नतो नरः ॥ सर्वत्र वास्तुनिर्दिष्टः पि
तृवैश्वानराय च ॥३८॥ मूर्धन्यग्निः समादिष्टो मुखे वायः समास्थिताः ॥ पृथ्वीधरोऽर्यमा चैव स्कंधयोस्तावथी
स्थितौ ॥३९॥ वक्षस्थलो चापवत्सः पूजनीयः सदा बुधैः ॥ नेत्रयोर्दितिपर्जन्यौ श्रोत्रेऽदितिजयंतकौ ॥४०॥ सर्पेन्द्रावं
संस्थौ च पूजनीयौ प्रयत्नतः ॥ सूर्यसोमादयस्तद्वत् बाह्वोः पंच च पंच च ॥४१॥ रुद्रश्च राजयक्ष्मा च वामहस्ते सम

मास्थितौ ॥ सावित्रः सविता तद्वत् हस्तमास्तं दक्षिणमास्थितौ ॥४२॥ विवस्वान् अथ मित्रश्च जठरे संव्यवस्थितौ ॥ पू
षा च पापयक्ष्मा च हस्तयोर्मणिबंधने ॥४३॥ तथैवासुरशोषौ च वामपार्श्वे समास्थितौ ॥ पार्श्वे तु दक्षिणे वर्गावित
त्ससगृहपक्षता ॥४४॥ ऊर्वोर्यमायोजान्वोर्गंधर्वपुष्पकौ ॥ जंघयोर्भृगसुग्रीवौ स्फिक्स्थो दौवारिको मृगः ॥४५॥ ज
यशक्रौ तथा मेढ्रे पादयोः पितरस्तथा ॥ मध्ये तु नवको ब्रह्मा हृदये स तु पूज्यते ॥४६॥ चतुःषष्टिपदो वास्तुः प्रासा
दे ब्रह्मणा स्मृताः ॥ गृहारंभे विकंभाद्भिः स्वामंगे यत्र पायते ॥४७॥ शल्यं च पतये स्तत्र प्रासादे तु वनेपि वा ॥ सश
ल्यं स रुजं यस्मादशल्यं शुभदायकं ॥४८॥ हीनांगी कांगतां वास्तोः सर्वथा तु विवर्जयेत् ॥ नगरग्रामदेशेषु सर्व
त्रैवं प्रकल्पयेत् ॥४९॥ चतुःशालं त्रिशालं च द्विशालं चैकशालकं ॥ नामतस्तान् प्रवक्ष्यामि स्वरूपेण द्विजोत्तम ॥५०॥ ॥
इति श्री मत्स्यपुराणे एकाशीतिपदनिर्णयो नाम ॥ सूत उवाच ॥ चतुःशालं प्रवक्ष्यामि स्वरूपान्नामतस्तथा ॥
चतुःशालं चतुर्द्वारैरलिंदैः सर्वतोमुखं ॥१॥ नाम्ना तत्सर्वतोभद्रं सुरदेवनृपालये ॥ पश्चिमद्वाररहितं नंद्यावर्तं प्र
चक्षते ॥२॥ दक्षिणद्वारहीनं तु वर्धमानमुदाहृतं ॥ पूर्वद्वारविहीनं तु स्वस्तिकं नाम विश्रुतं ॥३॥ रुचकं चोत्त
रद्वारविहीनं तत्प्रचक्ष्यते ॥ सौम्यशालाविहीनं यत् त्रिशालं धान्यकं च यत् ॥४॥ क्षेमवृद्धिकरं नृणां बहुपुत्रफलप्र
दं ॥ शालया पूर्वयाहीनं सुक्षेत्रमिति विश्रुतं ॥५॥ धन्यं यशस्यमायुष्यं शोकमोहविनाशनं ॥ शालया याम्यया

म॰पु॰
४१७

हीनंयेविशालेतुशालया॥६॥कुलक्षयकरंनृणांसर्वस्याधिभयावहं॥हीनंपश्चिमयापत्नुपक्षघ्नंनामतस्तुनः॥७॥
मित्रबंधुसुतानहंतियथासर्वभयावहं॥याम्यापराभ्यांशालाभ्यांधनधान्यफलप्रदं॥८॥क्षेमवृद्धिकरंनृणांतथा
पुत्रफलप्रदं॥यमसूर्यंचविज्ञेयंपश्चिमोत्तरशालकं॥९॥राजाग्निभयदंनृणांकुलक्षयकरंमहत्॥उदक्पूर्वंतुशा
लेद्वेदंडाख्यंतत्रतद्भवेत्॥१०॥अकालमृत्युभयदंपरचक्रभयावहं॥धनाख्यंपूर्वयाम्याभ्यांशालाभ्यांपश्चिमशा
लकं॥११॥तच्छस्त्रभयदंनृणांपराभवभयावहं॥चुल्लीपूर्वपराभ्यांतुसाभवेन्मृत्युसूचनी॥१२॥वैधव्यदायकं
स्त्रीणांअनेकभयकारकं॥काचमुत्तरयाम्याभ्यांभयदंनृणां॥१३॥सिद्धार्थवज्र्यान्यनिवेशालानिसदाबुधैः॥
तुशाला चतुर्यष्टिषुविस्तारोहीयतेष्टाष्टभिःकरैः॥१४॥चतुरंशोधिकोदैर्घ्यंपंचस्वपिनिगद्यते॥युवराजस्यवक्ष्यामि
तथाभवनपंचकं॥१५॥षड्भिःषड्भिस्तथाशीतिर्हीयतेतत्रविस्तरात्॥त्र्यंशेनवाधिकंदैर्घ्यंपंचस्वपिनिगद्य
ते॥१६॥सेनापतेःप्रवक्ष्यामितथाभवनपंचकं॥चतुश्चतुर्भिर्हीनास्याषष्टिस्तुविस्ताराःषड्भिःप्रहीयते॥१७॥
पंचाशंतेषुदैर्घ्यंषड्भागेनाधिकंभवेत्॥मंत्रीणामथविस्तारोतिथाभवनपंचकं॥१८॥चतुश्चतुर्भिर्हीनासात् राम॰
करषष्टिप्रविस्तरे॥आद्यंसेनाधिकंदैर्घ्यंपंचस्वपिनिगद्यते॥१९॥सामंतामात्यलोकानांवक्ष्येभवनपंचकं॥ ४१७
चत्वारिंशत्तथाष्टौचचतुर्भिर्हीयतेक्रमात्॥२०॥चतुर्थांशाधिकंदैर्घ्यंपंचस्वेतेषुशस्यते॥शिल्पिनांपकानांच २

वेश्यानांगृहपंचकं॥२१॥अष्टाविंशत्कराणांतुहीनाद्विस्तराक्रमात्॥द्विगुणंदैर्घ्यमेवोक्तंमध्यमाष्टकमेवतु॥
२२॥भूतकर्मांतिकानांतुतथाभवनपंचकं॥चतुर्थांशाधिकंदैर्घ्यंविस्तरात्तादृशोभवतु॥२३॥अर्धार्धिकरहानिः
संविस्तारात्यंचशःक्रमात्॥दैवज्ञगुरुवैद्यानांसभास्तारपुरोधसां॥२४॥तेषामपिप्रवक्ष्यामिसदाभव
नपंचकं॥चत्वारिंशत्प्रविस्ताराच्चतुर्भिर्हीयतेक्रमात्॥२५॥पंचस्वेतेषुदैर्घ्यंषड्भागेनाधिकंभवेत्॥चा
तुर्वर्ण्यस्यवप्रवक्ष्यामिसामान्यगृहपंचकं॥२६॥द्वात्रिंशतिकराणांचचतुर्भिर्हीयतेक्रमात्॥आषोडशा
दितिपरंहस्तमध्यावसायिनां॥२७॥दशांशेनत्रिभागेनत्रिभागेनाथपादिकं॥अधिकंदैर्घ्यमामिश्रंब्राह्मणा
दौप्रशस्यते॥२८॥सेनापतेर्नृपस्यापिचातुर्वर्ण्यस्यचांतरं॥वासकोपगृहंकार्यंगृहस्यांतरतस्तथा॥२९॥
नृपवासगृहंकार्यंभांडागारंतथैवच॥सेनापतेर्गृहस्यापिचतुर्दशस्यचांतरे॥३०॥वासकोपगृहंकार्यंरा
जपूज्येषुसर्वदा॥अंतरप्रभवाणांचतस्यतुगृहमिष्यते॥३१॥तथाषड्विंशतेरंगदितंवनवासिनां॥सेना
पतेर्नृपस्यापिसप्तत्यासहितास्त्विमे॥३२॥चतुर्दशहतेव्यासेशालान्यासःप्रकीर्तितः॥पंचत्रिंशान्वितेतस्मिन्अ
लिंदंसमुदाहृतं॥३३॥तथाषट्त्रिंशहस्तास्युःसप्तांगुलसमन्विताः॥प्रविस्तृत्यमूर्धनिशालानंदानंदैर्घ्यंपरतोभवेत्॥
३४॥दशांगुलाधिकान्यतःक्षत्रियस्यविधीयते॥पंचत्रिंशत्करावैश्येअंगुलानित्रयोदश॥३५॥चत्वार्येवतु

मूरूस्यसुतापंचदशांगुलैः॥त्र्यालायास्तुविभागेनयस्याभीवेष्टिकाभवेत्॥३६॥सोस्तीषंनामतवास्तुपश्चात्लोपा
श्रयंभवेत्॥वीर्थयोवीथिकायत्रस्तावत्पंभंतदुच्यते॥३७॥समंताद्वीथिकायत्रसुसुवेनदितोच्यते॥सुभदःसर्व
मेतस्याछिंनंतच्चचतुर्विधं॥३८॥विस्ताराद्योडशांशोभागस्तत्रयाहस्तचतुष्टयं॥यथासोभूमिकोछ्रायउपरिष्टात्
हीयते॥३९॥द्वादशांशेनसर्वासुभूमिकासुतथोछ्रयात्॥पक्केष्टकेभवेभित्तिःषोडशांशेनविस्तरात्॥४०॥
दारवेणविकल्पःस्यात्तथामन्मयभित्तिके॥गर्गमानेनमध्येतुसर्वशास्त्रुषुशस्यते॥४१॥गृहव्याससस्यपंचा
शादष्टादशाभिरंगुलैः॥संयुतोद्वारविष्कंभोद्विगुणेनोछ्रयोभवेत्॥४२॥द्वारशाखासुबाहुल्यंतउछ्रायःक
रसंमितैः॥अंगुलैःसर्ववस्तूनांपृथुत्वंशस्यतेबुधैः॥४३॥औदुंबरोत्तमंगेनतदर्द्धविप्रविस्तरैः॥४४॥॥इति
श्रीमत्स्यपुराणेवास्तुगृहमानभित्तिनिष्टयोगोनाम॥॥सूतउवाच॥॥अथातःसंप्रवक्ष्यामिस्तंभमानविनि अ
र्णयं॥कृत्वास्वभवनोछ्रायंसदासप्तगुणंबुधैः॥१॥अशीतिंशःपृथुलेस्यादग्रेनवगुणेसति॥स्तंभकंचतुर
स्रंस्यादष्टास्रोवज्रउच्यते॥२॥द्विवज्रःषोडशांशस्तुद्वात्रिंशांशःप्रकीर्तितः॥मध्यप्रदेशेयस्तंभोवृत्तोवृत्त
इतिस्मृतः॥३॥एतेपंचमहास्तंभाःप्रशस्ताःसर्ववास्तुषु॥पद्मवल्लीलतागुल्मपत्रदर्पणरूपिकाः॥४॥
स्तंभस्यनवमांशेनपद्मकुंभान्तरंनरः॥स्तंभतुल्यातुलाप्रोक्ताहीनाचोपतलाततः॥५॥त्रिभागेनेहसर्वत्र

चतुर्भागेनवापुनः॥हीनंहीनंचतुर्थांशात्तथासर्वासुभूमिषु॥६॥वासगेहानिसर्वेषांप्रविशेद्दक्षिणेनतु॥द्वारा
णितुप्रवक्ष्यामिप्रशस्तानिहयानितु॥७॥पूर्वेणेन्द्रंजायंतंचद्वारंसर्वत्रशस्यते॥याम्यंचवितथंचैवदक्षिणेनवि
दुर्बुधाः॥८॥पश्चिमेपुष्पदंतंचवारुणंचप्रशस्यते॥उत्तरेणचसौम्यंचसौम्यंचशुभदंमहत्॥९॥तथावास्तुषुसर्व
त्रवेधंद्वारस्यवर्जयेत्॥द्वारेतुरथ्ययाविद्धेभवेत्सर्वकुलक्षयः॥१०॥तरुणादोषबाहुल्यंशोकःपंकेनजायते॥अ
पस्मारोभवेन्नूनंकूपवेधेनसर्वदा॥११॥व्यथाप्रस्रवणेकीलेनाग्निभयंभवेत्॥विनाशोदेवताविद्धेस्तंभेनस्त्रीकृ नस्या
तोभवेत्॥१२॥तथावास्तुषुसर्वेषांवेधंद्वारस्यवर्जयेत्॥द्वारेतुरथ्ययाविद्धेभवेत्सर्वकुलक्षयः॥१३॥तरुणादोष
बाहुल्यंशोकपंकेनजायते॥अपस्मारोभवेन्नूनंकूपवेधेनसर्वदा॥१४॥व्यथाप्रस्रवणेतस्याकीलेनाग्निभ
यंभवेत्॥विनाशोदेवताविद्धेस्तंभेनस्त्रीकृतोभवेत्॥१५॥गृहभर्तुर्विनाशःस्यात्गृहेणगृहेप्यते॥अमेध्यावच
स्करावेद्धेगृहिणीबंधुकीभवेत्॥१६॥तथाचास्त्वंभयंविद्याजस्सगृहेणतु॥उछ्रायाद्विगुणांभूमिंत्यक्त्वावेधोन
जायते॥१७॥स्वयमुद्धाटितेद्वारेउन्मादोगृहवासिनां॥स्वयंवापिहितेविद्यात्कुलक्षणा॥१८॥मानाधिकेराजभयंनी ----
चेतस्करतोभयं॥द्वारादपिचयद्वारंतदंतकमुखंस्मृतं॥१९॥अध्वानंमध्यमेदेशेतुअधिकोयस्यविस्तरः॥वज्रंतु
संकटंमध्येसद्योभर्तृविनाशनं॥२०॥तथान्यपीडितंद्वारंबहुदोषकरंभवेत्॥मूलद्वारंतथान्यंतुनाधिकंशोध

म०पु०
४१९

यान्भवेत्॥२१॥ कुन्दस्त्रीपत्रवल्लीभिर्मूलभारंजोभयेत्॥ पूजयेच्चापितं बिल्वं बलिना चाक्षतोदकैः॥२२॥ भवनस्य वटः
पूर्वे दिग्भागे सार्वकामिके॥ उदुंबरस्तथा याम्ये वारुण्यां पिप्पलः शुभः॥२३॥ प्लक्षश्चोत्तरयो धान्या विपरीतस्त्वसियवया यो
स्तुवित्॥ गृहं कर्त्तुं गृहस्यापि विनाशः स्यात्स संचमे॥२४॥ स्तंभस्कंधात्स्युते कुंभे शिरोरोगं विनिर्दिशेत्॥ कुड्यापहा
रे सर्वस्य कुलस्यापि क्षयो भवेत्॥२५॥ मत्स्यस्थानात्स्युते कुंभे स्तंभे भग्ने तथा विदुः॥ करसंख्या विनाशे तु नाशं गृहप
ते र्विदुः॥२६॥ बीजौषधिविहीने तु भूते भो भयमादिशेत्॥ प्रागदक्षिणेन विन्यस्य सर्वं निवेशयेत्॥२७॥ ततः प्रदक्षिणेन मे छत्रं
स्त्वान्यसेत्स्तंभानू विचक्षणः॥ यस्मात्रयं करात्प्रणां यो जितात्प्रदक्षिणा॥२८॥ रक्षां कुर्वीत यत्नेन स्तंभोपद्रवनाशि
नी॥ तथा फलवतीं शाखां स्तंभोपरि निवेशयेत्॥२९॥ प्रागुदक्प्लवनं कुर्यात् दिग्गृहं तु न कारयेत्॥ स्तंभं वा तवनं
वापि द्वारं वा सगृहं तथा॥३०॥ दिग्मूढे कुलनाशः स्यान्न च संवर्धयेत् गृहं॥ यदि संवर्धयेत् गेहं सर्वमेव विवर्धयेत्॥३१॥
पूर्वेणा वर्धितं चास्तु कुर्यात् वैरानि सर्वदा॥ दक्षिणे वर्धितं वास्तु मृत्यवे स्यान्न संशयः॥३२॥ पश्चात् गृहं तु यद्वास्तु म
नेस्तत्क्षयकारकं॥ वर्धितं वा तथा सौम्ये बहुसंतापकारकं॥३३॥ आग्नेये यत्र वृद्धिः स्यात्तदग्निभयदं भवेत्॥ वर्धि
तं रक्षोकोणे शिशुक्षयकरं भवेत्॥३४॥ स्तंभो वा भवनं वापि द्वारं वा च गृहं भवेत्॥ वर्धितं चैव वायव्यां वातव्याधिप्र राम
कोपकृत्॥३५॥ ईशान्यां तु महाहानिर्वास्तोः संवर्द्धने सदा॥ ईशाने देवतागारं तथा शांतिगृहं भवेत्॥३६॥ महानसं ४१९

तथाग्नेये तस्तार्मे चोत्तरे जलं॥ गृहोपस्करशस्त्राणि नैरृत्ये स्थापयेद्बुधः॥३७॥ वर्द्धस्नानं हविः कुर्यात् स्नानमंड
पमेव च॥ धनधान्यं वायव्ये च कर्मशालां ततो बहिः॥३८॥ एवं वास्तुनिवेशः स्यात् गृहभर्तुः शुभावहः॥३९॥ ॥इ म
ति श्रीमत्स्यपुराणे वास्तुविद्यायां गृहनिवेशो नाम॥ ॥ सूत उवाच॥ ॥ अथातः संप्रवक्ष्यामि वृक्षाहरणमुत्तमं॥ ध
निष्ठापंचकं त्यक्त्वा विंध्यादिमतः परं॥१॥ ततः संवत्सरोद्दिष्टे दिने पाया पनं बुधः॥ प्रथमं बलिपूजां तु कुर्याद्वृ
क्षाय सर्वदा॥२॥ पूर्वोत्तरेण पतितं गृहदारु प्रशस्यते॥ अन्यथा न शुभं विद्यात् याम्या परनिपातनं॥३॥ क्षीरवृ
क्षोद्भवं दारु न गृहे विनिवेशयेत्॥ कृताधिवासं विहगै रनिलानलपीडितं॥४॥ गजावभग्नं च तथा विद्युन्नि
र्घातपीडितं॥ अर्धशुष्कं तथा दारु भग्नशुष्कं तथैव च॥५॥ चैत्य देवालयोत्पन्नं नदीसंगमजं तथा॥ स्मशानकू
पनिलयं तडागादिसमुद्भवं॥६॥ वर्जयेत् सर्वथा दारु यदिच्छेद्विपुलां श्रियं॥ तथा कंटकिनो वृक्षा नीपनिंबबि
भीतकाः॥७॥ श्लेष्मांतका सारतरूं वर्जयेत् गृहकर्मणि॥ असनश्च शाकमधुकं सर्जशालाः शुभावहाः॥८॥ चं
के दनं पनसं धन्यं सुरदारुहरिद्रकाः॥ द्वाभ्यामेव न वा कुर्यात् त्रिभिर्वा लिवनं शुभं॥९॥ बहुभिः कारितं यस्मादनेक
प्रयदं भवेत्॥ एकैव शिंशिपा धन्या श्रीपर्णी तिंदुकी तथा॥१०॥ एतेनान्य समायुक्ता वास्तुकार्ये फलप्रदाः॥
चंदनं पनसं धन्यं बलिना चाक्षतोदकैः॥११॥ भवनस्य वटः पूर्वे दिग्भागे सर्वकामिकः॥ उदुंबरस्तथा याम्ये वारु

ग्र्यां पिप्पलः शुभः ॥१२॥ प्लक्षश्चोत्तरतो धन्यो विपरीतास्त्वसिद्धये ॥ कंटकी क्षीरवृक्षश्च आसन्नः सफलो द्रुमः ॥१३॥ भार्याहा
निं प्रजाहानिं कुर्वंति क्रमशस्तथा ॥ न छिंद्याद्यदि तानन्यानंतरे स्थापयेत्सुमान् ॥१४॥ पुन्नागाशोकबकुलशमीतिल
कचंपकान् ॥ दाडिमीपिप्पलीद्राक्षास्तथा कुसुममंडपं ॥१५॥ जंबीरपूगपनसद्रुमकेतकीभिर्जातीसरोजश
तपत्रिकमल्लिकाभिः ॥ यन्नारिकेलिकदलीदलपाटलाभिर्युक्तं तदत्र भवनं श्रियमातनोति ॥१६॥ ॥इति श्रीमत्स्य
पुराणे वेधपरिवर्जनं ॥ ॥सूत उवाच ॥ ॥उदकूलं वंचयष्टास्तु समानं सुदिनं तथा ॥ परीक्ष्य पूर्ववत्कुर्यात्स्तंभोच्छ्रा
यं विचक्षणः ॥१॥ न देवधर्मसचिवचत्वराणां समीपतः ॥ कारयेद्भवनं प्राज्ञो दुःखशोकभयं तथा ॥२॥ तस्य प्रवे
शोऽस्तत्वारस्तनोत्सगेश्रितः शुभः ॥ प्रदक्षिणं प्रशस्यस्य सव्यावर्तः प्रशस्यते ॥३॥ अपसव्यो विनाशाय दक्षिणे शी
र्षकस्तथा ॥ सर्वकामफलं नृणां संपूर्णं नाम वा मतः ॥४॥ एवं प्रदेशमालोक्य यत्नेन गृहमारभेत ॥ अथ
सांवत्सरप्रोक्ते सुमुहूर्ते शुभलक्षणे ॥५॥ रत्नोपरि शिलां कृत्वा सर्वबीजसमन्वितां ॥ चतुर्भिर्ब्राह्मणैः स्तंभं वस्त्रा
लंकारसंयुतं ॥६॥ शुक्लांबरधरः शिल्पी सहितो वेदपारगैः ॥ स्नापितं सर्वौषधिसमन्वितं ॥७॥
चतुर्भिर्ब्राह्मणैः स्तंभं वस्त्रालंकारभूषितं ॥ नानाक्षतफलोपेतं वस्त्रालंकारसंयुतं ॥८॥ ब्रह्मघोषेण वाद्ये
न गीतमंगलनिस्वनैः ॥ पायसं भोजयेद्विप्रं होमं च मधुसर्पिषा ॥९॥ वास्तोः पते प्रजानीहि मंत्रेणानेन सर्वदा

२

सूत्रपाते तथा कार्यमेवं स्तंभोदये पुनः ॥१०॥ द्वारवंशोच्छ्रये तद्वत्प्रवेशसमये तथा ॥ वास्तूपशमने तद्वद्वास्तुयत्न
स्तु पंचके ॥११॥ ईशाने सूत्रपातः स्यादाग्नेये स्तंभरोपणं ॥ प्रदक्षिणं च कुर्वीत वास्तोः पदविलेखनं ॥१२॥ तर्जनीमध्य
मा चैव तथांगुष्ठस्तु दक्षिणः ॥ प्रवालरत्नकनकफलपुष्पाक्षतोदकं ॥१३॥ सर्वे वास्तुविभागेषु शस्तं पदविलेखनं ॥
न शस्त्रागारकाष्ठेन शस्त्रेणान च चर्मभिः ॥१४॥ न मांसास्थिकपालैश्च क्वचिद्वास्तु विलेखनं ॥ एभिर्विलेखनं कुर्यात्
दुःखशोकभयप्रदं ॥१५॥ यदा गृहप्रवेशः स्यात् शिल्पी तत्रोपपद्यते ॥ स्तंभसूत्रादिके तद्वत्तस्मा शुभफलोदयः
१६॥ आदित्याभिमुखं रौति शकुनिः परुषं यदि ॥ तुल्यकाले स्पृशेदंगं गृहभर्तुस्समानतः ॥१७॥ वास्तंतर्गतं विजानीया
न्नरः शल्यं भयप्रदं ॥ शकुनानंतरं यत्र हस्तशास्त्रपदं भवेत् ॥१८॥ तदंगसंभवं विद्याच्छल्यं तत्र विचक्षणः ॥ प्रस
र्यमाणे सूत्रे तु श्वगोमायुविलंघने ॥१९॥ तत्र शल्यं विजानीयात् खरशब्देऽतिभैरवे ॥ यद्दिशां ते तु दिग्भागे मधु
रं रौति वायसः ॥२०॥ धनं तत्र विजानीयात् स्वर्णं रजतं न पयक ॥ एतेनान्यसमा युक्ता वास्तुकार्ये शुभप्रदा ॥२१॥
तरुच्छेदे तथा पीते गोधां विद्याद्विचक्षणाः ॥ मार्जिष्ठवल्मीकिः स्यान्नीले सर्पं विनिर्दिशेत् ॥२२॥ अरुणे सरटं वि
द्यान्मुक्ता भेरीकमादिशेत् ॥ पिच्छिले सर्पकं विद्यात्तथा जलंभादिशेत् ॥२३॥ एवं विधं सर्वं तु वर्जयेद्वास्तु
कर्मणि ॥ सूत्रच्छिन्ने तु गृहली पातृमित्रः शकुनैः शुभैः ॥२४॥ व्यासेन गुणिते दैर्घ्ये अष्टाभिर्विकृते तथा ॥ तच्छेष मा

यतंविद्यात्अष्टमेदंतथाभिधाः॥२५॥ध्वजोधूम्रश्चसिंहश्चश्वखरेभःखरएवचगाइस्तीध्वांक्षश्चसर्वाद्याःकरोपा
भवेत्समी॥२६॥ध्वजःसर्वमुखोधन्योप्रसस्तद्वारेविशेषतः॥उदङ्मुखोभवेत्सिंहःप्राग्मुखोवृषणोभवेत्॥२७॥
दक्षिणाभिमुखोहस्तीसप्तभिःसमुदाहृतः॥एकेनध्वजउद्दिष्टस्त्रिभिःसिंहःप्रकीर्तितः॥२८॥पंचभिःवृषभः
प्रोक्तोत्रिकोणस्त्वतुवर्जयेत्॥तमेवाष्टगुणंकृत्वाकरस्तारंविचक्षणः॥२९॥सप्ताविंशाधृतेभागेक्षिपिंद्याद्वि
चक्षणः॥अष्टभिर्भाजितेरक्षेयःशेषःसव्ययोमतः॥३०॥व्ययाधिकंचकुर्वीतयतोदोषकरंभवेत्॥व्ययाधि
केभवेच्छांतिरित्याहभगवान्हरिः॥३१॥कृत्वायतोद्विजवरानयपूर्णकुंभंदध्यक्षतादिदलपुष्पफलोपशोभं॥
दत्वाहिरण्यवसनानितदाद्विजेभ्योमंगल्यशांतिविजयायगृहंविशेत्तु॥३२॥गृह्योक्तहोमविधिनाबलिकर्मकुर्यात् कं
प्रासादवास्तुशमनेचविधिर्यउक्तः॥संतर्पयेत्द्विजवरानथभक्ष्यभोज्यैःशुक्लांबरःस्वभवनंप्रविशेतसुरूपं॥
३३॥॥इतिश्रीवास्तुविद्यायांगृहप्रवेशोनाम॥॥ऋषयऊचुः॥क्रियायोगःकथंसिध्येत्गृहस्थादिषुसर्वदा॥
ज्ञानयोगसहस्राद्धिकर्मयोगोविशिष्यते॥१॥सूतउवाच॥॥क्रियायोगंप्रवक्ष्यामिदेवतार्चादिकीर्तनं॥देवयज्ञो
त्सवंवापिस्थापनार्चनमुच्यते॥२॥विष्णोस्तावत्प्रवक्ष्यामियथास्थानेप्रशस्यते॥शंखचक्रधरंशांतंपद्महस्तं
गदाधरं॥३॥छत्राकारंशिरस्तस्यकंबुग्रीवंशुभेक्षणं॥तुंगनासंशुक्तिकर्णंप्रशांतोरुभुजक्रमं॥४॥क्वचिदष्ट

करंविंद्याच्चतुर्भुजमथापिवा॥द्विभुजंवापिकर्तव्यंभुवनेषुपुरोधसा॥५॥देवस्याष्टभुजस्याथयथास्थानंनि
बोधमे॥खड्गोगदाशंखपद्मंदेयंदक्षिणतोहरेः॥६॥धनुश्चखेटकंचैवशंखंचक्रंचवामतः॥चतुर्भुजस्यवक्ष्या
मियथैवायुधसंस्थितिः॥७॥दक्षिणेनगदापद्मंवासुदेवस्यकारयेत्॥वामतःशंखचक्रेतुकर्तव्येभूतिमिच्छता
॥८॥कृष्णावतारेतुगदावामहस्तेप्रशस्यते॥यथेच्छयाशंखचक्रउपरिष्टात्प्रकल्पयेत्॥९॥अधस्तात्पृथि
वीदेवीकर्तव्यापादमध्यतः॥दक्षिणेप्रणतंतद्वत्गरुत्मंतंनिवेशयेत्॥१०॥वामतस्तुभवेल्लक्ष्मीःपद्महस्ता
शुभानना॥गरुत्मानग्रतस्थापिसंस्थाप्योभूतिमिच्छता॥११॥पत्नीश्चपुष्टिश्चकर्तव्येपार्श्वयोःपद्मसंयुते
तोरणंचोपरिष्ठात्तुविद्याधरसमन्वितं॥१२॥देवदुंदुभिसंयुक्तंगंधर्वमिथुनान्वितं॥पद्मपत्रस्रजोपेतं
सिंहव्याघ्रसमन्वितं॥१३॥तथाकल्पलतोपेतंस्तुवद्भिरमरेश्वरैः॥एवंविधोभवेद्विष्णुस्त्रिभागेनास्य
पीठिका॥१४॥नवतालप्रमाणास्तुदेवदानवकिंनराः॥अतःपरंप्रवक्ष्यामिमानोन्मानेविशेषतः॥१५॥जा
लांतरप्रविष्टानांभानूनांयद्रजःस्फुटं॥त्रसरेणुःसविज्ञेयोवालाग्रंतेतथाष्टभिः॥१६॥तदष्टकेनलिक्षांतुयूकालि
क्षाष्टकंतथा॥यवोयूकाष्टकंतद्वदष्टभिस्तैस्तथांगुलं॥१७॥स्वकीयांगुलमानेनमुखंस्यात्द्वादशांगुलं॥मुखमानेन
कर्तव्यासर्वावयवकल्पना॥१८॥सौवर्णीराजतीचापिताम्रीरत्नमयीतथा॥शैलदारुमयीचापिलोहसीसमयीत

म॰पु॰
४२२

या॥१९॥रीतिकाधातुमुक्ता च ताम्रकांस्यमयी तथा॥ शुभदारुमयी चापि देवतार्चा प्रशस्यते॥२०॥अंगुष्ठपर्वादा
रभ्य वितस्तीयावदेव तु॥ गृहेषु प्रतिमा कार्या नाधिका शस्यते बुधैः॥२१॥आषोडशात्तु प्रासादे कर्तव्या नाधि
का ततः॥ मध्योत्तमकनिष्ठा तु कार्या वित्तानुसारतः॥२२॥द्वारस्य यस्य यन्मानं अष्टधा तत्तु कारयेत्॥भा
गमेकं ततस्त्यक्त्वा परिशिष्टं तु यद्भवेत्॥२३॥भागद्वयेन प्रतिमा त्रिभागीकृत्य तत्पुनः॥पीठिका भागतः का
र्या नातिनीचा न चोच्छ्रिता॥२४॥प्रतिमामुखमानेन नवभागं प्रकल्पयेत्॥चतुरंगुला भवेत् ग्रीवा भागेन
हृदयं पुनः॥२५॥नाभिस्तस्मादधः कार्या भागेनैकेन शोभिता॥निम्नत्वे विस्तरत्वे च अंगुलं परिकीर्तितं
२६॥नाभेरधस्तात् मेढ्रं च भागेनैकेन कल्पयेत्॥त्रिभागमायतावूरू जानुनी चतुरंगुले॥२७॥त्रिभागेना
यते जंघे पादौ च चतुरंगुलौ॥ चतुर्दशांगुलस्तद्वत् मौलिरस्य प्रकीर्तितः॥२८॥ऊर्ध्वमानं इदं प्रोक्तं पृथुत्वं
च निबोधत॥ सर्वावयवमानेषु विस्तरं शृणुत द्विजाः॥२९॥चतुरंगुलं ललाटं स्यात् ऊर्ध्वं नासा तथैव च॥द्व
यंगुलं हनु तेषां प्रोक्तो ह्यंगुलसंमितौ॥३०॥चतुरंगुलं ललाटं तु तावन्मात्रौ भ्रुवौ मतौ॥अर्धांगुला भ्रुवोर्ले
खा मध्ये धनुराकृतिः॥३१॥उन्नताग्रा न चैता स्यात् श्लक्ष्णा तीक्ष्णा प्रशस्यते॥अक्षिणी द्व्यंगुलायामे तदर्धं वि स्या राम॰ ४२२
विस्तरा॥३२॥उन्नतोदरमध्ये तु रक्तांते शुभलक्षणे॥तारकार्धविभागेन दृष्टिः सा संच नागिकी॥३३॥द्व

ना
यंगुलं तु भ्रुवोर्मध्ये नासामूलमथांगुलं॥नासाग्रविस्तरं तद्वत्स्फुटमंगुलमानतः॥३४॥नासापुटबिलं तद्वत्
अर्धांगुलमुदाहृतं॥कपोलौ द्व्यंगुलौ तद्वत्कर्णमूलाद्विनिर्गतौ॥३५॥हन्वग्रमंडलं तद्वद्विस्तारो ह्यंगुलं भवेत्॥अ
र्धांगुला भवेद्राजी प्रणालस्य तु सा समा॥३६॥अर्धांगुलसमस्तद्वदुत्तरोष्ठस्य विस्तरः॥निष्पावसदृशं तद्वन्ना
सापुटदलं भवेत्॥३७॥सृक्किणी नातिरूपे तु मात्रामेकां तु विस्तृतौ॥कर्णयोरुपरिष्टाच्च मस्तकं द्वादशांगुलं॥
३८॥कर्णमूलौ षडंगुले कर्णौ श्रोत्रौ च समौ तयोः ऊर्ध्वं तु चतुरंगुलौ॥कर्णयोः श्रोत्रमात्रा तु॥३९॥ललाटपृष्ठतो
र्धेन प्रोक्तमष्टादशांगुलं॥षट्त्रिंशदंगुला ग्रीवा पृथुत्वेन विशिष्यते॥४०॥स्तनग्रीवांतरं प्रोक्तमेकतालं स्वयंभु
वा॥स्तनयोरंतरं तद्वद्द्वादशांगुलमिष्यते॥४१॥स्तनयोर्मंडलं तद्वद्द्व्यंगुलं परिकीर्तितं॥चूचुके मंडलस्यां
तः पादमात्रे उभे स्मृते॥४२॥त्रिणालं चैव विस्तारो वक्षःस्थलमुदाहृतं॥कक्षौ षडंगुलौ प्रोक्तौ बाहुमूलस्तनां
तरे॥४३॥चतुर्दशांगुलौ पादौ अष्टौ ह्यंगुलतः स्मृतः॥षडंगुलं परीणाहमंगुष्ठं ततस्तोन्नतं॥४४॥अंगुष्ठ
कलनात्तद्वत् आयामे स्यात् प्रदेशिनी॥चतुर्दशांगुलोत्तस्याः षोडशांशेन दीयते॥४५॥अनामिकाष्ट मध्यमांगुली
भागेन कनिष्ठापि च हीयते॥पर्वत्रितयेचांगुल्यो गुल्फौ द्व्यंगुलकौ मतौ॥४६॥पाणिर्द्व्यंगुलमात्रा च कृकाल
योश्च प्रकीर्तिता॥द्विपर्वांगुष्ठकः प्रोक्तः परीणाहाश्च अंगुलः॥४७॥कन्या सा चाष्टभागेन दीयते न मय द्वि

जा॥सप्तांगुलेनोच्छ्रयःकार्योंगुष्ठस्यविशेषतः॥४८॥जानुमध्येपरीणाहएकविंशतिकांगुलः॥जानूच्छ्रायोंगु
लैःप्रोक्तोमंडलंघ्यंगुलंपुनः॥४९॥ऊरुमध्येपरीणाहोअष्टाविंशतिकांगुलो॥एकत्रिंशादुपरिष्टाद्वृषणोतु
त्र्यंगुलौ॥५०॥पुरुषेपंचपंचाशत्कक्षान्येवतुवेष्टनं॥कक्षयोरुपरिष्टात्तुस्कंधोप्रोक्तोषडंगुलो॥५१॥अ
ष्टांगुलंतुविस्तारेग्रीवांचैवतुनिर्दिशेत्॥परीणाहेतुपात्रीवांकलाद्वादशनिर्दिशेत्॥५२॥आयामोभुजयो
स्तकृतद्विचत्वारिंशदंगुलं॥कार्यौबाहूशिखरंप्रमाणेषोडशांगुलं॥५३॥ऊर्ध्वेयबाहूपर्वंचविद्याद्दष्टादशांग
गुलं॥तथैकांगुलहीनंतुद्वितीयंपर्वचोच्यते॥५४॥बाहूमध्यपरीणाहेभवेदष्टादशांगुलः॥षोडशोक्तंप्रबा
हस्तुषट्कंसोग्रकरोमतः॥५५॥सप्तांगुलेकरतलेपंचमध्यांगुलीमता॥अनामिकामध्यमायाःसप्तभागेनही
यते॥५६॥तस्माच्चपंचभागेनकनिष्ठापरिहीयते॥मध्यमानामतुहीनातुपंचभागेनतर्जनी॥५७॥अंगुष्ठ
तर्जनीमूलादधःप्रोक्तस्तुतत्समः॥अंगुष्ठपरीणाहस्तुविज्ञेयश्चतुरंगुलः॥५८॥शेषाणामंगुलीनांतुभा
गभागेनहीयते॥मध्यमामध्यपर्वंचअंगुलद्वयमायतं॥५९॥यवोयवस्तुसर्वासांतस्मात्तस्मात्तुही
यते॥अंगुष्ठपर्वमध्यंतुतर्जन्यासहशंभवेत्॥६०॥पर्वद्वयाधिकंतद्वदग्रपर्वत्रिदाहृतं॥पर्वार्द्धेनखान्वि
द्यात्अंगुलीष्टसमंततः॥६१॥स्निग्धसूक्ष्मंप्रकुर्वीतईषद्रक्तंतथाग्रजः॥निम्नपृष्ठंभवेन्मध्येपार्श्वतःका

लयोस्थितं॥६२॥तथैवकेशवल्लीयंस्कंधोपरिदशांगुला॥स्त्रियःकार्यास्तुतन्वंग्यःस्तनोरुजंघनाधिका॥६
३॥चतुर्दशांगुलायामसुदरंतासुनिर्दिशेत्॥नानाभरणसंपन्नाकिंचित्तुस्तुभुजास्तथा॥६४॥किंचिद्दुमवे
त्दीर्घअलकाचलिकृत्तमा॥नासाग्रीवाललाटंचसार्द्धमासांत्रियंगुलं॥६५॥अर्द्धांगुलविस्तारःस्पते
धरपल्लवः॥अक्षिकंनेत्रयुग्मंतुचतुर्भागेननिर्दिशेत्॥६६॥ग्रीवावलिश्चकर्तव्याकिंचिद्दशांगुलोच्छ्रया॥एवंना
रीषुसर्वासुदेवानांप्रतिमासुच॥६७॥नवतालमिदंप्रोक्तंलक्षणंपापनाशनं॥६८॥॥इतिश्रीमत्स्यपुराणेदेवार्चा
नुकीर्तनेप्रमाणहस्तविभागोनाम॥सूतउवाच॥॥अतःपरंप्रवक्ष्यामिदेवाकारानविशेषतः॥देशकालेस्मृतो
रामोबालधारीवनिस्तया॥१॥वाराहोनरसिंहश्चसप्ततालस्तुवामनः॥मत्स्यकूर्मौविनिर्दिष्टौयथाशोभंस्वयंभु
वा॥२॥अतःपरंप्रवक्ष्यामिरुद्राकारमुत्तमं॥बाहूवारणहस्ताभौवृत्तंजंघोरुमंडलं॥३॥ऊर्ध्वंसेकस्तुकर्त
व्योदीर्घयतविलोचनः॥व्याघ्रचर्मपरीधानःकटिसूत्रत्रयान्विता॥४॥हारकेयूरसंपन्नाभुजगाररुणास्त
था॥बाहवश्चापिकर्त्तव्यानानाभरणभूषणाः॥५॥पीनोरुगंडफलकःकुंडलाभ्यामलंकृतः॥आजानुलंबबा
हुश्चसौम्यमूर्तिःसुशोभनः॥६॥खेटकंवामहस्तेतुखड्गंचैवतुदक्षिणे॥शक्तिंदंडंत्रिशूलंचदक्षिणेतुनिवेशये
त्॥७॥कपालंवामपार्श्वेतुनागंखड्वांगमेवच॥एकश्चवरदोहस्तस्तथाक्षवलयोपरः॥८॥वैशाखंस्थानकंकृत्वा

नत्यानिनवसंस्थिता॥नत्स्येदशानुजः कार्येगिजासुरवधेतथा॥९॥तथात्रिपुरदाहेचषोडशैवतुकीर्त्तिता॥शंखचक्र
गदाशंकुघंटात्राधिकाभवेत॥१०॥तथाधनुःपिनाकंचशरान्विषुवस्तथा॥चतुर्भुजोष्टबाहुर्वाज्ञानयोगेश्वरो
मतः॥११॥तीक्ष्णनासाग्रदशनःकरालवदनोमहान्॥भैरवःशस्यतेलोकेप्रत्यायतनेसंस्थितः॥१२॥नमैलाय
तनेकार्योनरवस्तुभयंकरः॥नारसिंहोवराहोवातथान्येपित्रयंकराः॥१३॥नाधिकानचहीनाङ्गाकर्त्तव्यादे
वताःक्वचित॥स्वामिनंघातयेतन्यूनाःकरालवदनास्तथा॥१४॥अधिकाशिल्पिनंहन्यात्कृशाचैवार्थनाशिनी॥
वक्रनासातुदुःखायसंक्षिप्तांगीभयंकरी॥१५॥कृशोदरीतुदुर्भिक्षंनिर्मांसाधननाशिनी॥चिपिटादुःखशोका
यअनेत्रानेत्रनाशिनी॥१६॥दुःखदाहीनवक्त्राचपाणिपादकृशातुसा॥हीनांगाहीनजंघाचभ्रमोन्मादकरी
नृणां॥१७॥शुष्कवक्त्रातुराजानंकटिहीनाचयाभवेत॥पाणिपादविहीनायांजायतेमरकोमहान॥१८॥जंघा
जानुविहीनाचशत्रुकल्याणकारिणी॥पुत्रमित्रविनाशायहीनवक्षःस्थलेतुया॥१९॥संपूर्णावयवायातु
आयुर्लक्ष्मीप्रदासदा॥एवंलक्षणमासाद्यकर्त्तव्यःपरमेश्वरः॥२०॥स्तूयमानःसुरैःसर्वैःसमंतादृश्यपंति
यं॥शक्रेणनंदिनाचैवमहाकालेनशंकरः॥२१॥प्रणतोलोकपालैस्तुपार्श्वेनगरनायकः॥नित्यनृंगीरटी
श्चैवभूतवैतालसंवृतः॥२२॥सर्वेहृष्टास्तुकर्त्तव्याःस्तुवंतःपरमेश्वरं॥गंधर्वविद्याधरकिन्नराणांअथाप्सरो

गुह्यकनायकानां॥गणैरनेकैःशतशोमहेंद्रमुनिप्रवीरैरपिनम्यमानं॥२३॥धृताक्षसूत्रैःशतशःप्रवालपुष्पोप
हारप्रचयंददद्भिः॥संरंजमानंभगवंतमाद्यंनेत्रत्रयेणापरमंप्रजानां॥२४॥॥इतिश्रीमत्स्यपुराणेनर्त्तेश्वरी
कीर्त्तनंनाम॥सूतउवाच॥॥अधुनासंप्रवक्ष्यामिअर्द्धनारीश्वरंपरं॥अर्द्धेनदेवदेवःस्यातनारीरूपंसुशोभनं॥१॥
ईशार्द्धंतुजटाभागेबालेंदुकलयायुतं॥अर्द्धेनचापिदातव्योसीमंततिलकावुभौ॥२॥वासुकिंदक्षिणेकर्णेवामेकुं
डलमादिशेत॥बालिकाचोपरिष्टात्तुकापालंदक्षिणेकरे॥३॥त्रिशूलंचापिकर्त्तव्यंदेवदेवस्यशूलिनः॥वामतो
दर्पणंदद्यातउत्पलंवाविशेषतः॥४॥वामबाहौचकर्त्तव्यःकेयूरवलयान्वितः॥उपवीतंचकर्त्तव्यंमणिमुक्ताम
यंतथा॥५॥स्तनभारमथार्द्धेतुवामेपीनंप्रकल्पयेत॥दारार्द्धमुत्पलंकुर्यात्श्रोणिएपार्द्धेतुतथैवच॥६॥लिंगमूर्ध्वकं
कुर्यात्त्वाअजिनकृत्तिंवरं॥वामेलंबपरीधानंकटिसूत्रत्रयान्वितं॥७॥नानारत्नसमोपेतंदक्षिणंभुजमाश्रि
तं॥देवस्यदक्षिणंपादंपार्वत्यादर्शयेत्सदा॥८॥अर्द्धनारीश्वरस्येदंरूपमस्मिन्मुदाहृतं॥लोचनत्रयसंयुक्त
मुमेकस्कंधपाणिनं॥९॥दक्षिणेनोत्पलंवामेकुचभारेकुरं॥दीपिचर्मपरीधानानारत्नोपनीतिनं॥१०॥सुप्रति
ष्ठसुवेषंचतथार्द्धेंदुकृतासनं॥वामेतुसंस्थितादेवीतस्योरूबाहुगृहिता॥११॥शिरोभूषणसंयुक्तैरलकैर्ललिता
ननां॥सबालिकाकर्णवतीललाटतिलकोज्ज्वला॥१२॥मणिकुंडलसंयुक्ताकर्णिकाभरणान्विता॥हारकेर

नं

रवऊलाहरवक्रावलोकिनी॥१३॥वामांगो देवदेवस्य स्थांती लीलयातनः॥ दक्षिणंतु बहिः कृत्वा बाऊं दक्षिण
तो पिवा॥१४॥स्कंधे च दक्षिणे वा यस्त्रां संगुलिजैः क्वचित॥वामे च दर्पणं दद्यात् उत्पलं वा सुशोभनं॥१५॥कृति
स्तत्र तथ्यं चैव वनितो वस्मालं बकं॥जयाच विजया चैव कार्तिकेय विनायकौ॥१६॥ पार्श्वयो र्दर्शयेत्तत्र तोरणे ग
णत्युत्यकं॥माला विद्याधरा ऊणा नभस्य संगुणान्॥१७॥तत रूपमुमेशस्य कर्तव्यं मूर्तिमिछाता॥शिवनारा
यणं वक्ष्ये सर्वपापप्रणाशनं॥१८॥वामार्द्धे माधवं कुर्यात् दक्षिणे शूलपाणिनां॥बाऊद्वयं च कृष्णस्य मणिकेयू
रभूषितं॥१९॥शंखचक्रधरं शांतमारक्तांगुलिविभ्रमां॥मणिरत्नैश्च संयुक्तपादनागविभूषितं॥२०॥शिवनारा
यणस्यैवकर्तव्यं रूपमुत्तमं॥माधवराहं वक्ष्यामि पद्महस्तं गदाधरं॥२१॥तीक्ष्णदंष्ट्रोग्रघोणाढ्यं मेदिनीवामकू
र्परं॥दंष्ट्राग्रेणोद्धृता पात्रधरणी मुत्पलान्वित॥२२॥विस्मयोत्फुल्लनयना मुपरिष्टात्प्रकल्पयेत्॥दक्षिणं क
टिसंस्थं तु करं तस्याः प्रकल्पयेत्॥२३॥नारसिंहं प्रकर्तव्यं भुजाष्टकसमन्वितं॥रौद्रं सिंहाननं तद्वद्विदारीत मुरसे
क्षणं॥२४॥स्तब्ध्यपीत सटाकर्षं दारयंतं दितेः सुतं॥विनिर्गतांत्रजालं च दानवं परिकल्पयेत्॥२५॥वमंतं रुधिरो
द्गारं भ्रुकुटीकृतलक्षणं॥युध्यमानस्तु कर्तव्यः क्वचित्करणबंधनैः॥२६॥परिश्रांतेन दैत्येन तर्ज्यमानं भुजंमुरुः॥ राम. ४२६
दैत्यं प्रदर्शयेत्तत्र खड्गखेटकधारिणं॥२७॥स्तूयमानं तथा विष्णुं दर्शयेदमराधिपं॥तथा त्रिविक्रमं वक्ष्ये ब्रह्मांड

क्रमणोल्बणं॥२८॥पादपार्श्वे तथा राहुं परितुष्टां प्रदर्शयेत्॥अधस्ताद्वामनं तद्वत्कल्पयेत्सकमंडलुं॥२९॥दक्षि
णे छत्रकं विद्यात् सुखं दीनं प्रदर्शयेत्॥भृंगारधारिणं तद्वत् बलिं तस्य च पार्थिव॥वेदनं वापि कुर्वंगरुडं चास्य द
र्शयेत्॥मत्स्यरूपं तथा मत्स्यं कूर्मं कूर्माकृतिं न्यसेत्॥३१॥एवं रूपस्तु भगवान् कार्यो नारायणो हरिः॥ब्रह्मा
कमंडलुधरः कर्तव्यः सचतुर्मुखः॥३२॥हंसारूढः क्वचित्कार्यः क्वचिच्च कमलासनः॥वर्णेन पद्मगर्भाभश्चतु
र्बाहुः शुभेक्षणः॥३३॥कमंडलुं वामकरे स्रुवं हस्ते च दक्षिणे॥बाहुदंडधरं तद्वत् दिव्ययज्ञोपवीतिनं॥३४॥
आज्यस्थाली तथा पार्श्वे वेदाश्च चतुरः पुनः॥वामपार्श्वे तु सावित्री दक्षिणे न सरस्वती॥३५॥अग्रे च ऋषयस्त
द्वत्कार्याः पैतामहे पदे॥कार्त्तिकेयं प्रवक्ष्यामि तरुणादित्यसंनिभं॥३६॥कमलोदरवर्णाभं कुमारंकं॥गंड
केरकैर्युक्तं मयूरवरवाहनं॥३७॥स्थानेदक्षिणपार्श्वस्य खड्गं शरः शूलं तथैव च॥३८॥वरदश्चैव हस्तः स्या
दथवाऽभयदो भवेत्॥एते दक्षिणतो ज्ञेयाः केयूरकटकोज्ज्वलाः॥३९॥धनुः पताका मुष्टिश्च तर्जनी तु प्र
सारिता॥खेटकं ताम्रचूडं च वामहस्ते तु शस्यते॥३९॥द्विभुजस्य करे शक्तिर्वामे स्यान्मुकुटोपरि॥चतुर्थेचद्रा
क्षिपाशौ वामतो दक्षिणेनु वसिः॥४०॥वरदो भयदो वापि दक्षिणे स्याद्गुलीयकं॥विनायकं प्रवक्ष्यामि गज
वक्त्रं त्रिलोचनं॥४१॥लंबोदरं चतुर्बाहुं व्यालयज्ञोपवीतिनं॥स्तब्धकर्णं बृहत्तुंडमेकदंष्ट्रं पृथूदरं॥४२॥स्वदं

म०पु० ४२७

तंदक्षिणकरे उत्पलंचापरे तथा॥ मोदकाःपरशुंचैव वामतःपरिकल्पयेत्॥४३॥ बृहत्कुक्षिमसहनंपीनस्कंधांहिपा
णिकं॥ युक्तंबुद्धिकुबुद्धिभ्यां अधस्तान्मूषकान्वितं॥४४॥ कात्यायन्याःप्रवक्ष्यामिरूपंदशभुजंतथा॥ त्रयाणाम
पिदेवानामनुकारानुकारिणीं॥४५॥ जटाजूटसमायुक्तांअर्द्धेंदुकृतलक्षणां॥ लोचनत्रयसंयुक्तांपद्मेंदुसदृ
शाननां॥४६॥ अतसीपुष्पसंकाशांसुप्रतिष्ठांसुलोचनां॥ नवयौवनसंपन्नांसर्वाभरणभूषितां॥४७॥ सुचारुद
शनांतद्वत्पीनोन्नतपयोधरां॥ त्रिभंगवलिसंछन्नांमहिषासुरमर्दिनीं॥४८॥ त्रिशूलंदक्षिणेदद्यात्खड्गं
चक्रंतथैवच॥ तीक्ष्णबाणंतथाशक्तिंवामतोपिनिबोधत॥४९॥ खेटकंपूर्णचापंचपाशमंकुशमेवच॥ घंटां
वापरशुंचापिवामतःसंनिवेशयेत्॥५०॥ अधस्तान्महिषंतद्वत्विशिरस्कंप्रदर्शयेत्॥ शिरश्छेदोद्भवंतद्वद्दान
वंखड्गपाणिनं॥५१॥ हृदिशूलेननिर्भिन्नंतिर्यग्वृध्वंचभूषितं॥ रक्तंरक्तीकृतांगंचरक्तविस्फारितेक्षणं॥५२॥ वे
ष्टितंनागपाशेनभ्रुकुटीभीषणाननं॥ वमद्रुधिरवक्त्रंचदेव्याःसिंहंप्रदर्शयेत्॥५३॥ देव्यास्तुदक्षिणंपादंसमं
सिंहोपरिस्थितं॥ किंचिदूर्ध्वंतथावाममंगुष्ठंमहिषोपरि॥५४॥ स्तूयमानंचतद्रूपममरैःसंनिवेशयेत्॥ इदा
नींसुरराजस्यरूपंवक्ष्येविशेषतः॥५५॥ सहस्रनयनंदेवंमत्तवारणसंस्थितं॥ पृथूरुवदनंचैवसिंहस्कंधंमहा
भुजं॥५६॥ किरीटकुंडलधरंपीवरोरुभुजेक्षणं॥ वज्रोत्पलधरंतद्वत्नानाभरणभूषितं॥५७॥ पूजितंदेवगं राम ४२७

धर्वैरप्सरोगणसेवितं॥ छत्रचामरधारिण्यःस्त्रियःपार्श्वेप्रदर्शयेत्॥ सिंहासनगतंचापिगंधर्वगणसेवितं॥ इंद्रा
णींवामतश्चास्यकुर्यादुत्पलधारिणीं॥५८॥॥ इतिश्रीमत्स्यपुराणेदेवताकारकीर्त्तनं॥ सूतउवाच॥॥ प्रभाक
रस्यप्रतिमामिदानींशृणुतद्विजाः॥ रथस्थंकारयेद्देवंपद्महस्तंत्रिलोचनं॥१॥ सप्ताश्वंचैकचक्रंचरथंतस्यप्रकल्पये
त्॥ मुकुटेनविचित्रेणपद्मगर्भसमप्रभं॥२॥ नानाभरणभूषाभ्यांभुजाभ्यांधृतपुष्करं॥ स्कंधस्थेपुष्करेतेतुली
लयैवधृतेसदा॥३॥ चोलसंछन्नवपुषंक्वचिच्चित्रेषुदर्शयेत्॥ वस्त्रयुग्मसमोपेतंचरणौतेजसावृतौ॥४॥ प्रती
हारौतुकर्त्तव्यौपार्श्वयोर्दंडिपिंगलौ॥ कर्त्तव्यौतुखड्गहस्तौचपार्श्वयोःपुरुषावुभौ॥५॥ लेखनीकृतहस्तौचपार्श्वेधातारमव्य
यं॥ नानादेवगणैर्युक्तमेवंकुर्याद्दिवाकरं॥६॥ अरुणःसारथिश्चास्यपद्मिनीपत्रसंनिभः॥ अश्वाश्चवलयग्रीवाः ना
प्रस्थितास्तस्यपार्श्वयोः॥७॥ भुजंगरज्जुभिर्बद्धाःसप्ताश्वारश्मिसंयुताः॥ पद्मसंचारसंस्थंवापद्महस्तंप्रकल्पये
त्॥८॥ वह्नेस्तुलक्षणंवक्ष्येसर्वकामफलप्रदं॥ दीप्तंसुवर्णवपुषमर्द्धचंद्रासनस्थितं॥९॥ बालार्कसदृशंतस्यव
दनंचापिदर्शयेत्॥ यज्ञोपवीतिनंदेवंलंबकूर्चंभुवंतथा॥१०॥ कमंडलुंवामकरेदक्षिणेत्वक्षसूत्रकं॥ ज्वाला
वितानसंयुक्तमजयाहस्तमुत्तमं॥११॥ कुंडलेचापिकुर्वीतमूर्ध्निसुमुकुटान्वितं॥ अथोयमंप्रवक्ष्यामिदंडपाश
धरंविभुं॥१२॥ महामहिषमारूढंकृष्णांजनचयोपमं॥ सिंहासनगतंचापिदीप्ताग्निसमलोचनं॥१३॥ महिषंचित्र

म.पू.
४२८

युतं च कालाख्यं किंकरांस्तथा॥ समंताद्दर्शयेत्तस्य सौम्यान् देवासुरांस्तथा॥१४॥ राक्षसेंद्रं तथा वक्ष्ये लोकपालं च नि
र्ऋतिं॥ नानारूपं महाकायं रक्षोभिर्बहुभिर्वृतं॥१५॥ खड्गहस्तं महानीलं कज्जलघनसंनिभं॥ नरयुक्तविमा
नस्थं पीताभरणभूषितं॥१६॥ वरुणं च प्रवक्ष्यामि पाशहस्तं महाबलं॥ शंखस्फटिकवर्णाभं पीतहारांबरान्वितं।
१७॥ झषासनगतं शांतं किरीटांबरधारिणं॥ वायुरूपं प्रवक्ष्यामि धूम्रं तु मृगवाहनं॥१८॥ चित्रांबरधरं तूणं तेवा
मं कुंचितभ्रुवं॥ मृगाधिरूढं वरदं पताकाध्वजसंयुतं॥१९॥ कुवेरं च प्रवक्ष्यामि कुंडलाभ्यामलंकृतं॥ हारके
यूररचितं चित्रांबरधरं शुभं॥२०॥ गदाधरकरं कुर्यात्तिवरदं मुकुटान्वितं॥ गुह्यकैर्बहुभिर्युक्तं धनव्यग्रक
रैस्तथा॥२१॥ तथैवेशं प्रवक्ष्यामि धवलं धवलेक्षणं॥ त्रिशूलपाणिनं चैव त्र्यक्षं वृषगतं प्रभुं॥२२॥ मातृणां लक्षणं
वक्ष्ये यथावदनुपूर्वशः॥ ब्रह्माणी ब्रह्मसदृशी चतुर्वक्त्रा चतुर्भुजा॥२३॥ हंसारूढा च कर्तव्या साक्षसूत्रकमंड
लुः॥ महेश्वरस्य रूपेण तथा माहेश्वरी मता॥२४॥ जटामुकुटसंयुक्ता वृषस्था चेंदुशेखरा॥ कपालशूलखट्वांगव
रदा च चतुर्भुजा॥२५॥ कुमाररूपा कौमारी मयूरवरवाहना॥ रक्तवस्त्रधरा तद्वत् शूलशक्तिधरा शुभा॥२६॥ हारके
यूरसंपन्ना कृकवाकुधरा तथा॥ वैष्णवी विष्णुसदृशी गरुडे तं समाश्रिता॥२७॥ चतुर्बाहुश्च वरदा शंखचक्रगदा राम.
धरा॥ सिंहासनगता वापि बालकेन समन्विता॥२८॥ वाराहीं च प्रवक्ष्यामि महिषोपरि संस्थितां॥ वाराहसदृशी ४२

देवी लोचनैर्बहुभिर्वृता॥२९॥ तप्तकांचनवर्णाभां दिव्याभरणभूषितां॥ तीक्ष्णखड्गधरां तद्वत् दानवेंद्रवि
नाशनीं॥३०॥ माहेश्वरीं प्रवक्ष्यामि यथारूपां यथायुधां॥ दीर्घजिह्वां कर्ध्वकेशीं अस्थिखंडैश्च मंडितां॥३१॥
दंष्ट्राकरालवदनां कुर्याच्चैव कृशोदरीं॥ कपालमालिनीं देवीं मुंडमालाविभूषितां॥३२॥ कपालं वामहस्ते तु मांस
शोणितपूरितं॥ सकेशं च वरो न्यस्मिन् शस्त्रिदक्षिणे करे॥३३॥ गृध्रस्था वामसंस्था वा निर्मांसा विनतोदरी॥ क
रालवदना तद्वत् कर्तव्या सा त्रिलोचना॥३४॥ चामुंडा बहुघंटा च द्वीपिचर्मधरा शिवा॥ दिग्वस्त्रा कालिका त
द्वत् रासभस्था कपालिनी॥३५॥ सुरक्तपुष्पाभरणा वर्द्धनीध्वजसंयुता॥ विनायकं च कुर्वीत मातॄणामग्रतः
सदा॥३६॥ वरेश्वरेश्च भगवान् वृषारूढो धनुर्धरः॥ वीणाहस्तस्त्रिशूली च मातॄणामग्रतो भवेत्॥३७॥ श्रियं
देवीं प्रवक्ष्यामि नवे वयसि संस्थितां॥ सुयौवनां पीतगंडां रक्तोष्ठीं कुंचितभ्रुवां॥३८॥ पीनोन्नतस्तनवतीं मणिकुं
डलमंडितां॥ समंडलं मुखं तस्याः शिरः सीमंतभूषितं॥३९॥ पद्मस्वस्तिकशंखैर्वा भूषिता छत्रमालकैः॥
कंचुकाबद्धगात्रौ च हारभूष्यौ पयोधरौ॥४०॥ नागहस्तोपमौ बाहू केयूरकटकोज्वलौ॥ पद्मं हस्ते तु दातव्यं
श्रीफलं दक्षिणे करे॥४१॥ मेखलाभरणां तद्वत् तप्तकांचनसंनिभां॥ नानाभरणसंपन्नां शोभनांबरधारि
णीं॥४२॥ पार्श्वे तस्याः स्त्रियः कार्याश्चामरव्यग्रपाणयः॥ पद्मासनोपविष्टा तु पद्मसिंहासनस्थिता॥४३॥ क

म०पु०
४२९

रस्यंताप्यमानासांदंगराभ्यामनेकशः॥मध्याजयंवैचरणोभंगराभ्यांतथाकरौ॥४४॥स्तूयमानाचदेवेशैस्तथा
गंधर्वगुह्यकैः॥तथैवपक्षणीकार्यासिंहासुरनिषेविता॥४५॥पार्श्वयोःकालकातस्यास्तोरणेदेवदानवाः॥
नागाश्चैवतुकर्त्तव्याःखड्गखेटकधारिणः॥४६॥अधस्तात्मकृतिस्तेषांनाभेरूर्ध्वंवपोरुपी॥फणाश्चमूर्ध्निकर्त्तव्या
द्विजिह्वाबहवःसमाः॥४७॥पिशाचाराक्षसाश्चैवभूतावैतालजातयः॥निर्मांसाश्चैवतेसर्वेरौद्राविकृतरूपिणः
४८॥क्षेत्रपालश्चकर्त्तव्योजटिलोविकृताननः॥दिग्वासाजटिलस्तद्वत्श्वगोमायुनिषेवितः॥४९॥कपालंवा
महस्तेतुशिरःकेशेषुचोधृतं॥दक्षिणेशास्त्रिकांदद्यात्असुरान्जयकारिणीं॥५०॥अथातःसंप्रवक्ष्यामिद्वि
भुजंकुसुमायुधं॥पार्श्वेचास्यखरंवतस्यमकरध्वजसंयुतं॥५१॥दक्षिणेपुष्पबाणंवामेपुष्पमयंधनुः॥प्री
तिःस्याद्दक्षिणेतस्याभोजनोपस्करान्वितं॥५२॥वामपार्श्वेतुकर्त्तव्यारतिश्शरणसारसान्वितं॥पटश्चपाटवश्चैवरत
रःकामातुरस्तथा॥५३॥पार्श्वतोजलवापीचवनंनंदनमेवच॥सुशोभनश्चकर्त्तव्योभगवान्कुसुमायुधः॥
५४॥संस्थानमीषद्वक्रंस्याद्विस्मयस्मितनेत्रकं॥॥तद्देवातःप्रोक्तंप्रतिमालक्षणंमया॥५५॥विस्तरेणनश
क्नोतिबृहस्पतिरपिद्विजा॥५६॥॥इतिश्रीमत्स्यपुराणेदेवतानुकारेप्रतिमालक्षणं॥॥सूतउवाच॥॥पिंडिका
लक्षणंवक्ष्येयथावदनुपूर्वशः॥पीठोच्छ्रायंयथावच्चभागान्षोडशकारयेत्॥भूमावेकःप्रविष्टःस्याच्चतुर्भि

राम:
४२९

जगतीगतः॥वृत्तोभागस्तथैकःस्याद्वृत्तःपट्टस्तुभागतः॥२॥भागैस्त्रिभिस्तथाकंठस्तपिंडस्तुभागतः॥भागाभ्या
मूर्ध्वपिंडस्तुशेषभागेनपिंडिका॥३॥प्रविष्टोभागएवैकोजगतीयावदेवतु॥निर्गतस्तुपुनस्तस्यायावद्वैशेष
पिंडिका॥४॥वारिनिर्गमनार्थंतुतत्रकार्याप्रणालिका॥पिंडिकानांतुसर्वासामेतत्सामान्यलक्षणं॥५॥विशेषाद्दे
वताभेदान्शृणुध्वंद्विजसत्तमाः॥संडिलाचाप्यवापीचयक्षादेवीयमंडला॥६॥ज्ञेयपद्मैश्चैवत्रिमेखलाचतुरस्रा
यतावेदीतत्रोलिंगेषुयोजयेत्॥मंडलावर्तुलायातुमेखलाद्विगुणान्विता॥७॥संरक्तामेखलामध्येपूर्णचंद्रातु
साभवेत्॥मेखलापंचसंयुक्तायावद्युग्मविज्ञिकाभवेत्॥८॥षोडशास्त्राभवेत्पद्माकिंचिद्ध्रस्वातुभूस्तनतः॥त
थैवधनुषाकारासार्द्धचंद्राप्रशस्यते॥९॥त्रिशूलसदृशीतद्वत्त्रिकोणाऊर्ध्वतोमता॥प्रागुदक्प्रवणात्तद्व
त्प्रशस्तालक्षणान्विता॥१०॥परिवेषत्रिभागेननिर्गमंतत्रकारयेत्॥विस्तारंतत्प्रमाणंचमूलेचाग्रेतथापि
च॥११॥जलमार्गश्चकर्त्तव्यस्त्रिभागेनसुशोभनः॥लिंगस्यार्द्धविभागेननिर्गमंतत्रकारयेत्॥१२॥स्थौल्येनम
मधिष्ठेतामेखलातत्रभागेनस्त्रातापैतत्प्रमाणतः॥१३॥अथवापादहीनंतुशोभनंकारयेत्सदा॥उत्तरस्यांप्र
णालंचप्रयाणादधिकंभवेत्॥१४॥स्थंडिलायामथारोग्यंधनंचाप्यांचपुष्कलं॥गोपदानुभवेद्यक्षीवेदीसंप
त्प्रदाभवेत्॥१५॥मंडलायांभवेत्कीर्तिर्वरिदापूर्णचंद्रिका॥आयुःप्रदाभवेद्यत्रापद्मासौभाग्यप्रदायिनी॥१६॥

पुत्रप्रदार्द्धचंद्रास्या त्रिकोणा शत्रुनाशिनी॥ देवस्य यजनार्थं तु पिंडिका दश कीर्तिता॥१७॥ शैला शैलमयी दिव्या पार्थि
वे पार्थिवी मता॥ दारुजे दारुजां कुर्यान्मिश्रे मिश्रां तथैव च॥१८॥ नान्ययोनिषु कर्तव्या सदा शुभफलेप्सुभिः॥ अ
र्चयाम सम मंदे घ्यं लिंगाया मं समं तथा॥१९॥ यस्य देवस्य या योनिस्तां पिंडे परिकल्पयेत्॥ एवमेतत्समाख्यातं समा
सात्पीठलक्षणं॥२०॥ ॥इति श्रीमत्स्यपुराणे पिंडिकानुकीर्तनं॥ ॥सूत उवाच॥ ॥अथातः संप्रवक्ष्यामि लिंगलक्ष
णमुत्तमं॥ सुस्निग्धं च सुवर्णं च लिंगं कुर्याद्विचक्षणः॥१॥ प्रासादस्य प्रमाणेन लिंगमानं विधीयते॥ लिंगमाने
न वा विंद्यात्प्रासादस्यमलक्षणं॥२॥ चतुरस्रे समे गर्ते ब्रह्मसूत्रं निपातयेत्॥ वामेन क्रमसूत्रस्य अर्यांल्लिंग
मेव च॥३॥ प्रागुत्तरेण लीनं तु दक्षिणापुरमाश्रितं॥ पुरस्यापरदिग्भागे सर्वद्वारं प्रकल्पयेत्॥४॥ पूर्वेण चाप
रं द्वारं महेंद्रं दक्षिणोत्तरे॥ द्वारं विभज्य पूर्वं तु एकविंशतिभागिकं॥५॥ मध्ये भागतो ता ता ब्रह्मसूत्रं प्रकल्पय
त्॥ तस्मादेवं त्रिधा कृत्वा भागं चोत्तरतस्त्यजेत्॥६॥ एवं दक्षिणतस्त्यक्त्वा ब्रह्मस्थानं प्रकल्पयेत्॥ भागार्द्धेन तु त्
लिंगं कार्यं न दीर्घ शस्यते॥७॥ पंचभागेन भक्तं तु त्रिभागे ज्येष्ठमुच्यते॥ भाजितेन व धा गर्भे मध्यमं पंचभागिकं राम
८॥ एकस्मिन्नेव नवधा गर्भे लिंगानुकारं वै येत्॥ मानस्त्वं चं विभज्याय नवधा गर्भभाजितं॥९॥ ज्येष्ठार्द्धकमसा
र्द्धं तु तया मध्यममध्यमं॥ एवं गर्भः समाख्यातस्त्रिभिर्भागैर्विभाजयेत्॥१०॥ ज्येष्ठं तु त्रिविधं ज्ञेयं मध्यमं त्रिविधं त ४३

था॥ कनिष्ठं त्रिविधं तद्वत् लिंगमेवं न वै भवेत्॥११॥ नाग्नधर्मष्टभागेन विभज्याय समं बुधः॥ अष्टास्त्रं कारयेत्तद्वत्पू
र्ववृत्तं वमेव तु॥१२॥ षोडशास्त्रं कृतं पश्चात् वर्तुलं कारयेत्ततः॥ आयामं तद्वदेवास्य नाभेवै कुंडलाकृतं॥१३
माहेश्वरं त्रिभागे तु ऊर्ध्वं वृत्तेन यच्छ्रितं॥ अधस्तात् ब्रह्मभागस्तु चतुरस्रो विधीयते॥१४॥ अष्टास्रो वैष्णवो भा
गो मध्यस्य उदाहृतः॥ एवं प्रमाणयुक्तं च लिंगं वृद्धिप्रदं भवेत्॥१५॥ अथान्यदपि वक्ष्यामि गर्भमानप्रमाणतः
गर्भमानप्रमाणेन लिंगं समुचितं भवेत्॥१६॥ चतुर्धा तद्विभज्याय विष्कंभं तु प्रकल्पयेत्॥ तद्देवद्वारतः सूत्रं
भागत्रयविकल्पितं॥१७॥ अधस्तात् चतुरस्रं तु अष्टास्रं मध्यभागतः॥ पूजाभागस्ततो वृत्तं न च भागस्तथोच्यते॥
१८॥ आयामे तत्र वेत्स्त्रं नारदस्य चतुरस्रकं॥ चतुरस्रं परित्यज्य अष्टास्रं संयजेत्॥१९॥ तस्याप्यूर्ध्वं परित्य
ज्य ततो वृत्तं तु कारयेत्॥ शिरः प्रदक्षिणं चैव मक्षिप्तं मूलकोपवत्॥२०॥ ज्येष्ठपूज्यं भवेल्लिंगमस्ता द्विपुलं च
यत्॥ शिरः संक्षिप्तदा क्षिप्तं मोजक्षण्यान्वितं॥२१॥ सौम्यं च दृश्यते यस्य लिंगं तद्वृद्धिदं भवेत्॥ अधमूले च म ५
ध्ये च प्रमाणाणां सवतिः स्मृते॥२२॥ एवंविधं तु यल्लिंगं भवेत्तत्सार्वकामिकं॥ अन्यथा यज्भवेल्लिंगं तदसत्प्रच
क्षते॥२३॥ एवं रत्नमयं कुर्यात्स्फाटिकं पार्थिवं तथा॥ शुभं दारुमयं वापि यद्वा मनसि वर्तते॥२४॥ ॥इति श्री
मत्स्यपुराणे देवताच्चानुकीर्तनं समाप्तं॥ ॥ऋषय ऊचुः॥ ॥देवतानामथैतासां प्रतिष्ठाविधिमुत्तमं॥ वदस्व

तयथान्यायंसर्वेषामेवसेव्यते॥१॥॥सूतउवाच॥॥अथातःसंप्रवक्ष्यामिप्रतिष्ठाविधिमुत्तमं॥कुंडमंडपवेदीनांप्र
माणंचयथाक्रमं॥२॥चैत्रेवाफाल्गुनेवापिज्येष्ठेवामाधवेतथा॥माघेवासर्वदेवानांप्रतिष्ठाशुभदाभवेत्॥३॥प्राप्य
पक्षंशुभंशुक्लंअतीतेदक्षिणायने॥पंचमीचद्वितीयाचतृतीयासप्तमीतथा॥४॥दशमीपूर्णमासीचतथाश्रेष्ठा
त्रयोदशी॥आसुप्रतिष्ठाविधिवत्कृताबहुफलाभवेत्॥५॥आषाढद्वेतथामूलंउत्तरात्रयमेवच॥ज्येष्ठाश्रवण
रोहिण्यःपूर्वाभाद्रपदातथा॥६॥तथाश्विनीरेवतीचपुष्योमृगशिरस्तथा॥अनुराधतथास्वातिःप्रतिष्ठादिषु
शस्यते॥७॥बुधोबृहस्पतिःशुक्रस्त्रयएतेशुभावहाः॥एतैर्निरीक्षितंलग्नंनक्षत्रंप्रशस्यते॥८॥ग्रहताराबलं
लब्ध्वाग्रहपूजांविधायच॥निमित्तंशकुनंलब्ध्वावर्जयित्वाद्भुतादिकं॥९॥शुभयोगेशुभस्थानेषुक्रूरग्रहविवर्जिते॥
लग्नेऋक्षेचकुर्वीतप्रतिष्ठादिकमुत्तमं॥१०॥अयनेविषुवेतद्वत्षडशीतिमुखेतथा॥एतेषुस्थापनाकार्याविधि
धिदृष्टेनकर्मणा॥११॥प्राजापत्येतुशयनंसततंचसदाभवेत्॥मुहूर्तेस्थापनंकुर्यात्पुरवाह्येविचक्षणः॥
१२॥प्रासादस्योत्तरेवापिपूर्वेवामंडपोभवेत्॥हस्तान्षोडशकुर्वीतदशाद्वादशवापुनः॥१३॥मध्येवेदिकयायु
क्तःपरिक्षिप्तःसमंततः॥पंचसप्तापिचतुरःकरान्कुर्वीतवेदिकां॥१४॥चतुर्भिस्तोरणैर्युक्तोमंडपःस्याच्चतुर्मु
खः॥प्लक्षद्वारंभवेत्पूर्वेयाम्येचौदुंबरंभवेत्॥१५॥पश्चादश्वत्थघटितंन्यग्रोधंचतथोत्तरं॥भूमौहस्तप्रविष्टानि

चतुर्हस्तानिचोच्छ्रये॥१६॥सुपलिप्तंस्थलंश्लक्ष्णंभूतलंस्यात्सुशोभनं॥वस्त्रैर्नानाविधैस्तद्वत्पुष्पपल्लवपूरितं
१७॥एवंनिवेश्यपतंगान्गंधधूपार्चनादिभिः॥ध्वजाधिरोहणंकार्यंमंडपस्यसमंततः॥१८॥ध्वजांश्चलोकपाला
मान्सर्वदिक्षुनिवेशयेत्॥पताकाजलदाकारामध्येस्यात्मंडपस्यतु॥१९॥गंधधूपादिकंकुर्यात्स्वैःस्वैर्मंत्रै
र्यथाक्रमं॥ऊर्ध्वंतुब्रह्मणोदेवस्त्वधस्तादथवासुकिः॥२०॥संहितायांतुयेमंत्राःस्वदैवताःश्रुतौस्मृताः॥तैःपूजा
लोकपालानांकर्तव्याचसमंततः॥२१॥त्रिरात्रमेकरात्रंवापंचरात्रमथापिवा॥अधिवासस्त्रिरात्रेवाकार्यःस्या
दधिवासनं॥२२॥एवंसतोरणंकृत्वाअधिवासनमंडपं॥तस्यचोत्तरतःकुर्यात्स्नानमंडपमुत्तमं॥२३॥तदर्द्धेनवि
भागेनचतुर्भागेनवापुनः॥अनाग्नीलिंगमर्च्चावाशिल्पिनेपूजयेत्बुधः॥२४॥वस्त्राभरणरत्नैश्चयेपितत्प
रिचारकाः॥क्षमध्वमितितान्ब्रूयात्यजमानोप्यतःपरं॥२५॥देवप्रस्तरणंकृत्वानेत्रज्योतिःप्रकल्पयेत्॥
लक्षणोद्धारणंवक्ष्येलिंगस्यापिसमासतः॥२६॥सर्वतस्तुबलिंदत्वासिद्धार्थघृतपायसैः॥शुक्लपक्षेरलंकृ
त्यघृतगुग्गुलधूपितं॥२७॥विप्रवाचनकंकुर्यात्दत्वाशक्त्याचदक्षिणां॥गामेकांकांचनंचैवस्थापकायनि
वेदयेत्॥२८॥लक्षणंकारयेत्तत्र्मंत्रेणानेनवैद्विजाः॥ओंनमोभगवतेतुभ्यंशिवायरवयेनमः॥२९॥हि
रण्यरेतसेविष्णोविश्वरूपायतेनमः॥मंत्रोयंसर्वदेवानांनेत्रज्योतिःष्वपिस्मृतः॥३०॥एवमामंत्र्यतंदेवंका

म० पु०
४३२

चनेनविलेषयेत्॥मंगल्यानिचवाद्यानिब्रह्मघोषैश्चगीतकं॥३१॥सिद्धार्थंकारयेद्विद्वान्अमंगल्यविनाशनं॥ल
क्षणोधरणंकुर्यात्लिंगस्यतुसमाहितः॥३२॥त्रिधाविभज्यपूजांगंलक्षणंस्याद्विधार्मिकंगलक्षणंस्याद्विधा
र्मिकं॥रेखात्रयंतुकर्त्तव्यंपसंयुतां॥३३॥नस्थूलंनकृशांतद्वत्छेदभेदविवर्जितां॥निम्नयेनप्रमाणेनज्येष्ठ
लिंगस्यकारयेत्॥३४॥सूक्ष्मातत्तुकर्तव्यासदामध्यमकंन्यसेत्॥अष्टमकंततःकृत्वासक्माभागपूर्वु
धः॥३५॥संयावनस्यरेखास्तुपार्श्वयोःस्तुरयोःसमं॥भागत्रिकंचभागार्द्धंकारयेत्संगमेनरः॥३६॥तावत्प्र
लंबयेद्विद्वान्यावत्भागचतुष्टयं॥रेखयोःसंगमंतद्वत्द्वौभागौष्युताभवेत्॥३७॥एवमेतत्समाख्यातंस
माद्यल्लक्षणंमया॥३८॥॥इतिश्रीमत्स्यपुराणेतिप्रतिष्ठानुकीर्तनंमंडपाध्यायः॥॥सूतउवाच॥॥अतःपरं
प्रवक्ष्यामिमूर्त्तिपानांतुलक्षणं॥स्थापकस्यसमासेनलक्षणंशृणुतद्विजाः॥१॥सर्वविपवसंपूर्णोवेदमं
त्रविशारदः॥पुराणवेत्तातत्त्वज्ञोदंभलोभविवर्जितः॥२॥कृष्णसारचदेशीयउत्पन्नःशुभाकृतिः॥शौचा
चारपरोनित्यंपाखंडकुलनिःस्पृहः॥३॥समःशत्रौचमित्रेचब्रह्मोपेंद्रहरिप्रियः॥ऊहापोहेनतत्वज्ञोशा
स्तुज्ञास्त्रस्यपारगः॥४॥आचार्यस्तुभवेन्नित्यंसर्वदोषविवर्जितः॥मूर्त्तिपास्त्रद्विधाश्चैवकुलीनाऋज राम
वस्तथा॥५॥द्वात्रिंशतषोडशावापिअष्टौवावेदपारगाः॥ज्येष्ठमध्यकनिष्ठास्तुमूर्त्तिपाश्चप्रकीर्त्तिताः॥६॥ ४३२

ततोलिंगमथार्चांवानीत्वास्नपनमंडपं॥गीतमंगलशब्देनस्नपनंतत्नकारयेत्॥७॥पंचगव्यकषायेनमृद्भिःसं
स्वच्छेदकेनच॥शौचंतत्रप्रकुर्वीतदेवमंत्रचतुष्टयं॥८॥समुद्रज्येष्ठमंत्रश्चआपोहिष्ठेत्यथापरः॥एवंस्नाप्य
ततोदेवंसुगंधगंधानुलेपनैः॥९॥प्रच्छाद्यवस्त्रयुग्मेनअजिवाद्याभिवाहयेत्॥उत्थापयेत्ततोदेवंप्रतिष्ठ
ब्रह्मणस्पते॥१०॥आवोराजेतिचतथारयेतिष्ठेतिचापरः॥रथेब्रह्मरथेवापिधृतांत्रिसिंगयोन्नच॥११॥आ
रोप्यचानयेद्विद्वान्आकृष्णेनप्रवेशयेत्॥ततश्चास्त्रीयंत्रश्याप्यायोस्थापयेत्स्थानकेबुधः॥१२॥कुशानास्त्री
र्यपुष्पाणिस्थापयेत्सामुखंततः॥ततस्तुविप्रानुकलशैर्वस्त्रकांचनसंयुतैः॥१३॥शिरोभागेतुदेवस्यवद
ब्देतंनियोजयेत्॥आपोदेवीतिमंत्रेणआपोस्मान्माचरेतिच॥१४॥ततोदुकूलपट्टैश्चछाद्यात्त्रोपधानकं॥द
द्याच्छिरसिदेवस्यकौशेयंवाविचक्षणः॥१५॥मधुनासर्पिषाभ्यज्यभज्यसिद्धार्थकैस्तथा॥आप्यायस्वेतिमं
त्रेणयातेरुद्रशिवेतिच॥१६॥उपविश्याचयेद्देवंगंधपुष्पैःसमंततः॥सितंप्रतिसरंदद्यात्तदाहस्तेतिमंत्रि
तं॥१७॥दुकूलपट्टैःकार्पासैर्नानाचित्रैरथापिवा॥आच्छादैवंसर्वत्रछत्रचामरदर्पणं॥१८॥पार्श्वतःस्थाप
येत्तत्रविमानंपुष्पसंयुतं॥रत्नान्यौषधयस्तैवगृहोपकरणानिच॥१९॥भाजनानिविचित्राणिशयनान्या
सनानिच॥अभिलास्तरमंत्रेणयथाभिप्रवरोन्यसेत्॥२०॥क्षीरंक्षौद्रंघृतंतत्भक्तंभोज्यान्नपायसं॥प

म०पु०
४३२

ड्विधैश्वरसैस्तद्वत्समं तात्परि पूज्यैर्जयेत् ॥२१॥ बलिं दत्वा प्रयत्नेन मंत्रेणानेन सूरिणा ॥ त्र्यंबकं यजामहे इति म
र्वज्ञानकेषु वि ॥२२॥ मूर्त्तिमात्स्थापयेत्पश्चात् सर्वदिक्षु विचक्षणः ॥ चतुरो द्वारपालांश्च द्वारेषु विनिवेशयेत् ॥
२३॥ श्रीसूक्तं पावमानं च सोमं सूक्तं सुमंगलं ॥ तथा च शांतिकाध्यायं न्नत्रसूक्तं तथैव च ॥२४॥ रक्षोघ्नं च तथा सू
क्तं पूर्वतो बह्वृचः पठेत् ॥ रौद्रं पुरुषसूक्तं च सोपाध्यायं मनुक्रियं ॥२५॥ तथैव मंडलाध्यायं यजुर्विद्दक्षिणे
जपेत् ॥ वासुदेवं बृहत्साम ज्येष्ठं सामरथंतरं ॥२६॥ तथा पुरुषसूक्तं च रुद्रसूक्तं सुशांतिकं ॥ गारुडानि च सा
मानि छंदोगः पश्चिमे जपेत् ॥२७॥ अथर्वांगिरसं तद्वत् नीलरुद्रं तथैव च ॥ तथा पराजिता देवी सप्तसूक्तं स
रौद्रकं ॥२८॥ तथैव शांतिकाध्यायमाथर्वश्चोत्तरे जपेत् ॥ शिरःस्थाने तु देवस्य स्थापको होममाचरेत् ॥२९॥
ततो होमसहस्रेण कृत्वा तस्य ततः ॥ नातिमध्यं तथा च क्षः निरस्थाप्याज भेत्सुन ॥३०॥ आस्तमात्रेषु कुंडेषु
मूर्त्तिपाः सर्वतो दिशं ॥ समे खलेतु ते कुर्युर्योनि वक्त्रेषु चादरात् ॥३१॥ वितस्तिमात्रा योनिः स्यात् गजोष्ठसदृशी
तथा ॥ आयताच्छिद्रसंयुक्ता पार्श्वतः कलपोच्छ्रिता ॥३२॥ कुंडात्कलानुसारेण सर्वतश्चतुरंगुला ॥ विस्तरेणोच्छ्
यात् द्व्यंगुल स्वास समाभवेत् ॥३३॥ वेदीभित्ति परित्यज्य त्रयोदश विरंगुले ॥ एवं नवसु कुंडेषु लक्षणं वै बहुरूप राम०
ते ॥३४॥ आग्नेय राक्षयाम्येषु होतव्यास्तु दशान्विते ॥ शांतयो ब्रो कपाले न्योमूर्त्तिभिः क्रमशस्ततः ॥३५॥ त ४३२

थाम्यंत्रिपदे वा नो होमं कुर्युः समंततः ॥ वसुधा वसुरेताश्च यजमानो दिवाकरः ॥३६॥ जलं वायुस्तथा सोम आकाशश्चाष्ट
मः स्मृतः ॥ देवस्य मूर्तयस्त्वष्टौ एताः कोणेषु संस्मरेत् ॥३७॥ एतासामधिपान्वक्ष्ये पवित्रान्मूर्त्तिनामतः ॥ पृथ्वीपतिश्च
सर्वत्र पशुपश्चाग्निरेव च ॥३८॥ यजमानस्तथैवोग्रो रुद्रश्चादित्य एव च ॥ भवो जलं सदा भाति वायुमीशान एव च ॥३९
महादेवस्तथा सोमं भीमश्चाकाशमेव च ॥ सर्वदेवमयं शिवस्तु मूर्त्तिपा ह्येत एव तु ॥ ४०॥ एतेभ्यो वैदिकैर्मंत्रैर्यथास्व
होममाचरेत् ॥ यथा शांतिघटं कुर्यात् पुरिकुंडेषु सर्वतः ॥ ४१॥ शतानेवा सहस्रां ते स्नुक्पूर्णाहुतिरिष्यते ॥ सम्पा
तं प्रथिम्यं तु प्रशांत्या विनिक्षिपेत् ॥४२॥ आहुतीनां संपातं पूर्वकुंडेतु विन्यसेत् ॥ मूलमध्योत्तमांगेषु देवतेना
वसेच्चयेत् ॥४३॥ स्थितं च पाराकृतिरिवारिणा ॥ प्रतिमा पेषुन् पंच नैवेद्यं चंदनोदकं ॥४४॥ पुनः पुनः प्रकुर्वी
त होमः कार्यः पुनः पुनः ॥ दातव्या यजमानेन दक्षिणा ॥४५॥ सितवस्त्रैश्च ते सर्वे पूजनीयाः समंततः ॥ विचित्रैर्हे
म कटकैर्हेमसूत्रांगुलीयकैः ॥४६॥ वासोभिः शयनीयैश्च परिधाप्याः स्वशक्तितः ॥ भोजनं चापि दातव्यं यावन्न
स्याधिवासनं ॥४७॥ त्रिसंध्यं तु बलिर्देयो भूतेभ्यः सर्वतो दिशं ॥ ब्राह्मणान्भोजयेत्स्वं वंशोपान्वर्ष्मस्तु कामतः ॥४८
रात्रौ महोत्सवः कार्यो नृत्यगीतमंगलैः ॥ सदा पूज्यः प्रयत्नेन चतुर्थीकर्म यावता ॥ ४९॥ त्रिरात्रमेकरात्रं पंचरा
त्रमथापि वा ॥ सद्योरात्रमथो कुर्यात्तत्क्षं चित्त्वशोधिवासने ॥ ५०॥ सर्वयित फलं तस्मात् अधिवासोत्सवः सदा ॥५०

म०पु०
४३५

इतिश्रीमत्स्यपुराणेअधिवासनविधिः॥ ॥सूतउवाच॥ ॥कृत्वाधिवासंदेवानांसत्रंकुर्यात्समाहितः॥प्रासादस्ये
त्वनुरूपेणमनोलिंगस्यवापुनः॥१॥उष्णोदकेनप्रासादंप्रोक्ष्यमंत्रेणतेनतु॥पादयेद्दक्षसूत्रंतुद्वारमूर्त्तैतयैवच॥२
आग्नेयेकिंचिदीशानेमध्यंज्ञात्वादिशानुबुधैः॥ततःकूर्मशिलाप्रोक्तासदाब्रह्मशिलाधिका॥३॥उपर्युपरिस्थितात
स्वब्रह्मनागादिकाशिलाः॥ततस्तुपिंडिकाकार्यापूर्वोक्तमानलक्षणैः॥४॥ततःप्रक्षाल्यतांकृत्वापंचगव्येनपिंडि
कां॥काषायतोयेनमंत्रयुक्तेनसर्वतः॥५॥सर्वताचश्रियेमंत्रंपिंडिकासुनियोजयेत्॥ततउत्थाप्यदेवेशंगंनि
एकस्मणोतिच॥६॥आनीयगर्भभवनेपीठंसंस्थापयेत्बुधः॥अर्घपाद्यादिकंतत्रमधुपर्कंप्रयोजयेत्॥७॥त
तोमुहूर्त्तेविश्राम्यरत्नन्यासंसमाचरेत्॥वज्रमौक्तिकवैडूर्यशंखस्फटिकमेवच॥८॥पुष्परागेंद्रनीलंचपूर्वादितः
क्रमात्॥तालकंसलिलंवज्रमंजनंश्यामकमेवच॥९॥कांसंकासीसमाक्षीकंगैरिकांश्चादितःक्रमात्॥गोधूमय
वंतद्वत्तिलमुद्गंतथैवच॥१०॥नीवारमथश्यामाकंसर्षपंक्रीव्रीहिमेवच॥न्यसेत्क्रमेणपूर्वादिचंदनंरक्तचंद
नं॥११॥अगरुंपीजनंचैवउशीरंचततःपरं॥वैष्णवीसहदेवीचलक्ष्मणंचततःपरं॥१२॥सर्वोकपालनाम्नातुन्य
सेत्प्रणवपूर्वकं॥सर्वबीजानिधातूंश्चरत्नान्यौषधयस्तथा॥१३॥कंचनंपद्मरागंचपारदंपद्ममेवच॥कूर्मधरांच राम
पंतन्न्यसेत्पूर्वादितःक्रमात्॥१४॥व्रतनंतुद्भतथासङ्नासुःपरस्परं॥पुलकंविद्रुमंताम्रंकांस्यंवैवारकूटकं ४३५

१५॥रजतंविमलंपुष्पंलोहंचैवक्रमेणतु॥कांचनंहरितालंचसर्वभावेचनिक्षिपेत्॥१६॥दद्यात्बीजौषधिस्थानेम
हदेवींजयामपि॥न्यासमंत्रानतोवक्ष्येलोकपालादिकानिह॥१७॥उग्रस्तुसहसादीप्तःसर्वदेवाधिपोमाह
न॥शूलहस्तोमहासत्वतस्मैसत्वंनमोनमः॥१८॥नैरृतंचपुनःकृष्णःसर्वरक्षोधिपोमहान्॥शूलहस्तोवि
रूपाक्षतस्मैनित्यंनमोनमः॥१९॥नैरृतंचपुनःकृष्णःसर्वरक्षोधिपोमहान्॥शूलहस्तोविरूपाक्षस्तस्मैनित्यं
नमोनमः॥२०॥ॐकारपूर्वकात्येतेन्यासबलिंनिवेदयेत्॥मंत्राःस्युःसर्वकार्याणामृद्धिपुत्रफलप्रदाः॥२१॥
असंकृत्वातुमंत्राणांपायसेनानुलेपितं॥पीठेनाच्छादयेत्सूत्रंक्रकेनोपरियन्त्रवः॥२२॥ततउत्थाप्यदेवेशंद
षेशोतुसुशोभने॥ध्रुवमुत्थाप्यदेवेशंदृष्टांशेतुसुशोभने॥२३॥ध्रुवाद्यौरितिमंत्रेणतत्रोपरिन्यवेशयेत्॥तत
स्थिरीकृतस्यास्यहस्तंदत्वातुमस्तके॥२४॥ज्ञात्वापरमकांसंदेवादेवतुनिःफलं॥देवज्ञनंतयासामरूपस्यकांत
यैवच॥२५॥आत्मानमीश्वरंकृत्वानानाभरणभूषितं॥पूज्यदेवस्यपद्रूपंतध्यानेसंस्मरेत्सदा॥२६॥अत
सीपुष्पसंकाशंशंखचक्रगदाधरं॥संस्थापयामिदेवेशंदेवोभूत्वाजनार्दनः॥२७॥अक्षंचदशबाहुंचचंद्र
र्द्धकृतशेखरं॥सहस्रकिरणंशांतमप्सरोगणसंयुतं॥२८॥पद्महस्तंमहाबाहुंस्थापयामिदिवाकरं॥वेद
मंत्रास्त्वथायोगांतस्यरूपस्यस्थापने॥२९॥विष्णोस्तुवैष्णवास्तुकृतब्राह्माब्रह्मणिवैबुधः॥सौराःसूर्यस्यज

प्रव्यास्त्रघास्येपुतदाश्रयाः ॥३०॥ वेदमंत्रप्रतिष्ठातु यस्मादानंददायिनी ॥ स्नापयेद्यंतु देवेशं तत्प्रधानंतु कल्प
येत् ॥३१॥ तस्यपार्श्वेस्थितानन्यान्संस्मरेत्सपरिवारितः ॥ बाणनंदिमहाकालं वृषभं गिरिरिटिं गुहं ॥३२॥ दीपांच
लोहकंचैव विघ्नंब्रह्माणमेवच ॥ रुद्रंशाकंजयंतंच लोकपालान्समंततः ॥३३॥ तथैवाप्सरसः सर्वागंधर्वगण
नायकाः ॥ योयत्रस्थाप्यतेदेवस्तस्यतत्परितःस्मरेत् ॥३४॥ अप्पहीयत्तयारुद्रमंत्रेण नेनयत्नतः ॥ यस्यसिंहा
सनेयुक्तायाग्रंभूतास्तयास्वराः ॥३५॥ तमहंत्र्यक्षमीशानं शिवंरुद्रमुमापतिं ॥ आवाहयामि सगणं सप
त्नीकंवृषध्वजं ॥३६॥ ओंआगच्छभगवन्नत्रानुग्रहाय शिवोभव ॥ शाश्वतोभगवन्पूजांगृहाणत्वंनमोनमः
॥३७॥ ॥स्वागतंभवतः ॥ नमःसोमायसगणायसपरिवाराय प्रतिगृह्णातुभगवान्मंत्रपूतमिदंपाद्यमाचमनी
यमासनं ॥ ब्राह्मणाभिहितंनमोनमःस्वाहा ॥ ॥ ततःपुण्याहघोषेण ब्रह्मघोषैः सुपुष्कलैः ॥ स्नापयीततंदेवंद
धिक्षीरघृतेनच ॥३८॥ मधुशर्करयातद्वत्तत्पुष्पगंधोदकेनच ॥ शिवध्यानेनकश्चित्तत्सुमंत्रानेतानुदीरयेत् ॥३९॥
यज्जाग्रतोदूरमुदैति ॥ ततोविराडजायतइति च ॥ सहस्रशीर्षापुरुषइतिच ॥ अग्निलाभ्ररतोनमइति ॥ पुरुष
एवेदंसर्वंनैति ॥ येनेदंभूतमिति ॥ सर्वाश्वेतानप्रतिष्ठास्तुमंत्रानातज्ज्ञापुनःपुनः ॥ चतुःकृत्वःसंवदन्निर्मलमध्ये
शिरःस्वपि ॥४०॥ स्नापितानुततोदेवायजमानःसमन्वितः ॥ आचार्यंपूरयेद्भक्त्यावस्त्रालंकारभूषणैः ॥४१॥ दीन

धकृपणास्तद्वत्ये चान्येसमुपस्थिताः ॥ ततस्तुमधुनादेवंप्रथमेऽहनिलेपयेत् ॥४२॥ निद्रयात्रिस्त्रिसिद्धार्थैर्द्वितीयेन
ऽहितद्वत् ॥ चंदनेनयवैस्तद्वत्तृतीयेऽहनिलेपयेत् ॥४३॥ मनःशिलाप्रियंगुमांसंचतुर्येऽहनिलेपयेत् ॥ सौभाग्य
सुखदंयस्मात्लेपनंव्याधिनाशनं ॥४४॥ परंप्रीतिकरंनृणांएतद्विद्धिद्विरोदितुः ॥ कृष्णाजिनंतिलांस्तद्वत्प
चमेऽह्निविशेषतः ॥४५॥ षष्ठेतुसघृतंदद्या चंदनंपद्मकेसरं ॥ रोचनांरागपुष्पंचसप्तमेऽहनिवापयेत् ॥४६॥ त
त्रसद्योधिवासःस्यात्तत्रसर्वंनिवेदयेत् ॥ स्थितंतुचालयेद्देवमन्यथादोषमाप्नुयात् ॥४७॥ भूरयेछिन्नताभिस्तु
निच्छिद्रंसर्वतोभवेत् ॥ लोकपालस्यदिग्भागेयस्यसंदिष्टवान्विभुः ॥४८॥ तस्यलोकपदेयाश्वेतास्वदक्षिणा ॥
ईशायवारुणंदद्यात्कांचनंवास्वविनवान् ॥४९॥ अग्नेःसुवर्णमेवस्याद्यमस्यमहिषंतथा ॥ अनलेवकांचनं
दद्यात्कृशरंराक्षसंप्रति ॥५०॥ वरुणंप्रतिमुक्तानिसम्यक्तानिप्रदापयेत् ॥ इतिकांवायवेदद्यात्वस्त्रयुग्मेनसं
युतां ॥५१॥ सोमायधेनुर्दातव्यारतंसहपंक्तिवे ॥ यस्यायस्यांसंचलतिशांतिःस्यात्तत्रतत्रतु ॥५२॥ अन्यथातुभ
वेद्घोरंभयंकुलविनाशनं ॥ अचलंकारयेत्यत्नात्सिकताभिःसुरेश्वरं ॥५३॥ अन्नंवस्त्रंचदातव्यंपुण्याह
जयमंगलं ॥ त्रिपंचदशासप्तैवदिनानिस्यान्महोत्सवः ॥५४॥ चतुर्थेऽह्निमहास्नानंचतुर्थीकर्मकारयेत् ॥ दक्षि
णांचपुनस्तद्वत्देयास्तत्रापिशक्तितः ॥५५॥ देवप्रतिष्ठाविधिरेषतुम्यंनिवेदितःपापविनाशहेतुः ॥ यस्मा

तन्तुधैः पूर्वमिनंतत्रुक्रमनंतविद्याधरदेवजुष्टं॥५६॥ ॥इतिश्रीमत्स्यपुराणेप्रतिष्ठानुकीर्त्तनंसमाप्तं॥ ॥सूतउवाच॥
अथातःसंप्रवक्ष्यामिदेवस्नपनमुत्तमं॥ अर्चस्यापिसमासेनश्रृणुध्वंविधिमुत्तमं॥१॥ दध्यक्षतंकुशाग्राणिक्षी
रंदूर्वातथामधुः॥ यवाःसिद्धार्थकास्तद्वद्दद्यागोर्दफलैःसह॥२॥ गजाश्वरथवल्मीकवाराहोत्खातमंडलात्।
अश्मगारात्रयातीर्थाध्वदाफ्रोमजलादपि॥३॥ कुंभेतुमृत्तिकांदद्यात्घृतासीतिमंत्रतः॥ शंनोदेवीत्यपामंत्र
आपोहिष्ठाइतिऋचा॥४॥ सवितापगोमूत्रंगंधद्वारेतिगोमयं॥ अभिमंत्रणतयादुग्धेदधिक्रावोत्सुदा
हृतं॥५॥ तेजोसीतिघृतंतद्वत्देवस्यत्वेतिवोदकं॥ कुशामिश्रंक्षिपेद्विद्वान्पंचगव्यंक्षिपेत्ततः॥६॥ आप्याय
पंचगव्येनदध्नाघृतेनवेततः॥ कुशोदकेनचस्नातमग्नआयाहिकारयेत्॥७॥ ततस्तुगंधतोयेनसावित्र्या
भिमंत्रितं॥ ततोघटसहस्रेणसहस्रार्द्धेनवापुनः॥८॥ तस्याप्यर्धेनवाकुर्यात्अष्टवाष्टशतेनवा॥ चतुःष
ष्ट्याप्यवास्नानंतदर्धार्धेनवापुनः॥९॥ चतुर्थीरथवाकुर्यात्घटानामल्पवित्तवान्॥ सौवर्णैराजतैर्वापि
ताम्रैश्चारीतिकोद्भवैः॥१०॥ कांस्यैर्वापार्थिवैर्वापिस्नपनंशक्तितोभवेत्॥ सहदेवीत्रथाव्याघ्रीबलावातिब
लातथा॥११॥ शंखपुष्पीतथासिंहीअष्टमीचसुवर्चला॥ महौषध्यष्टकंत्येतन्मजास्नानेषुयोजयेत्॥१२॥
यवगोधूमनीवारतिलश्यामाकशालयः॥ प्रियंगवाव्रीहयश्चस्नानेषुपरिकल्पयेत्॥१३॥ स्वस्तिकंपद्मकं

शंखमुत्पलंकमलंतथा॥ श्रीवत्संवरुणंतद्वत्नंद्यावर्त्तंतवाष्टकं॥१४॥ एतानिगोमयेकुर्यात्सदाचक्रमयात
तः॥ पंचवर्त्तिप्रदीपेनतद्वत्पंचवर्तुरजास्तथा॥१५॥ दूर्वाक्षिप्तलाजकृतनीराजनविधिस्ततः॥ एवंनीराजनंकृ
त्वादद्यादाचमनंततः॥१६॥ मंदाकिन्यास्तुयद्वारिसर्वपापहरंशुभं॥ ततोवस्त्रयुगंदद्यान्मंत्रेणानेनसुव्रतः॥
१७॥ वेदसूक्तसमायुक्तेयज्ञदानसमन्विते॥ सर्ववर्णप्रभेदेववाससीतविनिर्मिते॥१८॥ ततस्तुचंदनंदद्या
तमंकर्पूरकुंकुमैः॥ इमस्तुवारयेन्मंत्रंदर्पणाणिमयुक्ततः॥१९॥ शरीरंतेनजानामिचेष्टानैवच॥ मयानि
वेदितोगंधःप्रतिगृह्यविलिप्यतां॥२०॥ चत्वारिंशतिवरानदद्यातचैवप्रदक्षिणान्॥ त्वंसूर्यचंद्रज्यो
तींषिविद्युदग्निस्तथैवच॥२१॥ त्वमेवसर्वज्योतींषिदीपोयंप्रतिगृह्यतां॥ ततस्त्वाभरणंदद्यान्महाभूषा
यतेनमः॥२२॥ अनेनविधिनाकृत्वासप्तरात्रंमहोत्सवं॥ देवकुंभैस्ततःकुर्याद्यजमानोभिषेचनं॥२३॥
चतुर्भिरष्टभिर्वापिद्वाभ्यामेकेनवापुनः॥ सपंचरत्नकनकैःसितवस्त्राभिवेष्टनैः॥२४॥ देवस्यत्वेतिमंत्रेणसाम्न
वाप्यवणेनच॥ अभिषेकेचयेमंत्रानवग्रहमखेस्मृताः॥२५॥ सितांबरधरःस्नात्वादेवान्संपूजयेत्ततः॥ स्नाप
केपूजयेत्भक्त्यावस्त्रालंकारभूषणैः॥२६॥ यत्नादानिसर्वाणिमंडपोपस्कराणिच॥ यच्चास्यदयितंगेहेतद
चार्यायदापयेत्॥२७॥ सुप्रसन्नेगुरौतस्मात्तुष्यंतेसर्वदेवताः॥ नेतद्विशीलेननंदामिकेनचौरेयनानात्म

म०पु० ४३७

वता च कार्यं॥ विप्रेण कार्यं श्रुतिपारगेण स्वहस्तधर्माभिरतेन नित्यं॥ २८॥ पाषंडिनं यस्तु करोति बुध्या विहाय विप्रान् श्रु
तिधर्मयुक्तान्॥ गुरुं प्रतिष्ठादिषु तन्नृनं कुलक्षयः स्यादचिरादसृग्ज्यः॥ २९॥ स्थानेपि विप्राश्चैः परिवृत्य तेन दहन्त्यतोपत्य
चिरेण लोके॥ विप्रैः कृतं यत्र गुरुत्वं कुले स्यात्तत्रप्त्यतो याति चिरं च कालं॥ ३०॥ ॥ इति श्रीमत्स्यपुराणे देवतास्नानसमा
प्तं॥ ॥ ऋषय ऊचुः॥ ॥ प्रासादाः कीदृशाः सूत कर्तव्या भूतिमिच्छता॥ प्रमाणं लक्षणं तद्वद्विस्तरतो धुना॥ १॥ सूत
उवाच॥ ॥ अथातः संप्रवक्ष्यामि प्रासादविधिनिर्णयं॥ वास्तोपरीक्षिते सम्यक्कृत्वा वास्तु देहे विचक्षणः॥ २॥ वास्तुपूजा
मनं कुर्याद्विद्विज बलिकर्म च॥ जीर्णोद्धारे तथोद्याने तथा गृहनिवेशने॥ ३॥ नवप्रासादभवने प्रासादपरिकी
र्तने॥ द्वाराभिवर्तने तद्वत्प्रासादोभवनेषु च॥ ४॥ वास्तुपशमनं कुर्यात्पूर्वमेव विचक्षणः॥ एकाशीतिपदं लि
ख्य वास्तुं मध्ये निपिष्टकैः॥ ५॥ होममत्रैव मेखलेकार्यं कुंडे हस्तप्रमाणके॥ यवैः कृष्णतिलैस्तत्र मद्भिः सारवृक्षकैः॥
६॥ पालाशैर्वारुणैर्वापि मधुसर्पिःसमन्वितैः॥ कार्यस्तु पंचभिर्विल्वैर्विल्वबीजैस्तथापि च॥ ७॥ होमांते भक्ष्यभोज्यैश्च
वास्तुदेवे बलिं हरेत्॥ तद्वद्विशेषनैवेद्यमिदं दद्यात्क्रमेण तु॥ ८॥ हरकोणाहृतानां तु शिखिने विनिवेदये
त॥ ओदनं मोत्सजं दद्यात्तत्पर्जन्याय घृतान्वितं॥ ९॥ जपाश्च ध्वजानीतानपिष्टं कूर्मं च संन्यसेत्॥ इंद्राय पंचगव्या
नि पैष्टं च कुशरं तथा॥ १०॥ वितानकं च सूर्याय धूम्राशक्तिं तथैव च॥ सत्याय घृतगोधूमं मत्स्यं दद्यात्ततोपच॥ राम ४३७

११॥ वाकुलोस्यांतरिक्षाय दद्यात्सक्तुं स्ववायवे॥ लाजा पूषे च दातव्या वितथे च णकोदनं॥ १२॥ गृहक्षताय मध्व
न्नं यमाय पिशितादनं॥ गंधोदनं च गंधर्वे भृंगे मेषस्य जिह्विका॥ १३॥ मृगाय यावकं दद्यादसुरामता॥ घृतोद
नं च शोषाय यवान्नं पापयक्ष्मणे॥ १४॥ घृतं लड्डुकान् सुरगोपनागे पुष्पफलानि तु॥ मक्षं सुख्याय दातव्यं मु
ग्दोदनमतः परं॥ १५॥ भल्लाटस्थानके दद्यादिंद्राय घृतसंप्लुतं॥ घृतोदनं तु मित्राय रुद्राय सं॥ १६॥ अपकं च
तथा मांसं देयं नागाय यक्ष्मणे॥ पृथ्वीधराय मांसानि कूष्मांडानि च दापयेत्॥ १७॥ पंचगव्यं पयश्चैव तिलाक्ष
तमयं तथा॥ लक्ष्मनोज्यं च विविधं ब्रह्मणो विनिवेदयेत्॥ १८॥ एवं संपूजिता देवाः शांतिं कुर्वंति ते सदा॥ सर्वे
भ्यः कांचनं दद्याद्ब्रह्मणे गां पयस्विनीं॥ १९॥ राक्षसानां बलिं देयो मांसोदनमयस्तथा॥ ईशानभागमाश्रि
त्य धूरण्या विनिवेदयेत्॥ २०॥ मांसोदनं च रुधिरं हारिद्रोदनमेव च॥ आग्नेयीं दिशमाश्रित्य विदार्यै विनि
वेदयेत्॥ २१॥ मत्स्योदनं सरुधिरं मत्स्यखंडैश्च संप्लुतं॥ पीतरक्तं बलिं दद्यात्पूतनायै स रक्षसे॥ २२॥ वायव्ये
पापराक्षस्यै मत्स्यं मांसं सुरासवं॥ पापसंतापि दातव्यं स्वनाम्ना परितः क्रमात्॥ २३॥ नमस्कारांतसंयुक्तेन
तत प्रणवाद्येन संयुतः॥ सर्वौषधिस्नानं यजमानं नमस्कारयेत्॥ २४॥ विप्रांस्तु पूजयेद्भक्त्या ये चान्ये गृहमावि
शेत्॥ एतद्वास्तुप्रशमनं कृत्वा कर्म समाचरेत्॥ २५॥ प्रासादभवनोद्याने प्रारंभ परिकीर्तने॥ पुरवेश्मप्रवे

ग्रेषुसर्वदोषाप्रवर्त्तन्ति॥२६॥एतद्वास्तुप्रशमनंकृत्वासूत्रेणवेष्टयेत्॥रक्षोघ्नपावमानेनसूक्तेनतुविनादिक॥
२७॥तस्यमंगलवाद्यैश्चकुर्यात्ब्राह्मणवाचनं॥अनेनविधिनायस्तुप्रतिसंवत्सरंबुधः॥२८॥गृहेवायतनेकु
र्यात्नसदुःखमवाप्नुयात्॥नचव्याधिभयंतस्यनचबंधुजनक्षयः॥२९॥जीवेद्वर्षशतंसाग्रंस्वर्गेकल्पंचमि
तिष्ठति॥३०॥ ॥इतिश्रीमत्स्यपुराणेवास्तुउपशमनोनाम॥ ॥सूतउवाच॥ ॥एवंवास्तुबलिंकृत्वाभजेत्षोडश
भागकं॥तस्यपादद्वादशकंश्राद्धंततस्तुपरिकल्पयेत्॥१॥चतुर्भागेनविस्तुःस्यात्उच्छ्रायंसमानतः॥द्विगुणःशिख यः
रोच्छ्रायोभित्त्युच्छ्रायात्तुमानतः॥२॥शिखरार्द्धस्यचार्द्धेनविधेयातुप्रदक्षिणा॥चतुर्दिक्षुतथाज्ञेयंनिर्गमंतुततो
बुधैः॥३॥पिंडिकार्द्धेनभागःस्यात्तन्मानेनतुभित्तयः॥बाह्यभित्तिप्रमाणेनउत्सेधस्तुभवेत्पुनः॥४॥भित्त्यु
च्छ्रायात्तुद्विगुणःशिखरेस्यात्समुच्छ्रयः॥शिखरस्यचतुर्भागात्कर्तव्यातुप्रदक्षिणा॥५॥प्रदक्षिणायास्तुमत
स्यग्रतोमंडपोभवेत्॥तस्यचार्द्धेनकर्तव्यस्त्वग्रतोमुखमंडपः॥६॥प्रासादान्निर्गतोकालोकपालोगर्भमानतः॥
ऊर्ध्वंभित्त्युच्छ्रयात्तस्यमंजरीतुप्रकल्पयेत्॥७॥मंजर्याश्चार्द्धभागेनशुकनासंप्रकल्पयेत्॥ऊर्ध्वंतथार्द्धभागे
नवेदिबंधोनवेदिह॥८॥वेद्याश्चोपरियच्छेषंकंठमामलसारकं॥एवंविभज्यप्रासादंशोभनंकारयेद्बुधः॥ राम:
९॥तथान्यत्प्रवक्ष्यामिप्रासादस्यैवलक्षणं॥गर्भमानप्रमाणेनप्रासादंशृणुतद्विजाः॥१०॥विभज्यनवधात ४३८

स्यमध्येस्याल्लिंगपीठिका॥पादाष्टकंतुरुचिरंपार्श्वतःपरिकल्पयेत्॥११॥मानेनतेनविस्तारोभित्तीनांतुविधीय
ते॥पंचपंचगुणंकृत्वाभित्तीनामुच्छ्रायोभवेत्॥१२॥सएवशिखरस्यापिद्विगुणःस्यात्समुच्छ्रयः॥चतुर्धशिखरा
रंभक्त्वाअर्द्धभागद्वयस्यतु॥१३॥शुकनासंप्रकुर्वीतत्ततीयेवेदिकामता॥कंठमामलसारंतुचतुर्थेपरिकल्प
येत्॥१४॥कपोलपोस्तिसंहारोद्विगुणोस्यविधीयते॥शोभनैःपत्रवल्लीभिरलकैश्चविभूषितः॥१५॥प्रासा
दोयंतृतीयस्तुमयातुल्यंनिवेदितः॥सामान्येनपरंतद्वत्प्रासादंशृणुतद्विजाः॥१६॥त्रिभेदंकारयेत्स्मैत्रंयत्र
तिष्ठतिदेवता॥रथांकितेनमानेनबाह्यभागविनिर्गतिः॥१७॥नेमिःपादेनविस्तीर्णाप्रासादस्यसमंततः॥भित्ति
श्चद्विगुणाकार्यातस्यामानेनवेदिह॥१८॥सएवभित्तेरुत्सेधोद्विगुणःशिखरेमतः॥प्राग्बीजेपंचभागेन
निष्कारंतपेच्छते॥१९॥कारयेत्शिखरेतद्वत्प्राकारस्यविभागतः॥प्राग्बीजंपंचभागेननिःकाशेनविशेषि
ते॥२०॥कुर्यात्वापंचभागेप्राग्ग्रीवंकर्णमूलतः॥स्थापयेत्कनकंतत्रसगर्भेतिमहारभूत॥२१॥एवंतुत्रि
विधंकुर्यात्ज्येष्ठमध्येकनियंसे॥लिंगानुमानभेदेनरूपभेदेनवापुनः॥२२॥एतेसमासतःप्रोक्तानामतःशृणु
ताधुना॥मेरुमंदरकैलासकुंभश्रृंगमृगांगारुतया॥२३॥विमानछंदकस्तद्वत्चतुरस्रस्तथैवच॥अष्टास्रः
षोडशास्रश्चवर्तुलःसर्वभद्रकः॥२४॥सिंहास्योनंदनश्चैववनिधिवर्धनिकस्तथा॥हंसोवृषभवत्सश्चपद्मके

म०पु० त्रासमुद्गकः॥२५॥प्रासादनामतःप्रोक्तद्विभागंश्रृणुतद्विजाः॥शतश्रृंगश्चतुर्द्वारोभूमिकाषोडशोछ्रिता॥२६॥
४३९ नानाविचित्रशिखरोमेरुःप्रासादउच्यते॥मंदरोद्वादशःप्रोक्तःकैलाशोनामधूमिकः॥२७॥विमानस्तव्धक
स्तद्वत्अनेकशिराननः॥वृषस्त्वोछ्रूपतस्तुल्योमंडलश्चासवर्जितः॥२८॥सिंहःसिंहसमाज्ञेयेगजोगजसम
स्तथा॥कुंभकुंभाकृतिस्तद्वत्भूमिकानवकोछ्रयः॥२९॥अंगुलीपुटसंस्थानःपंचांडकाविभूषितः॥षोड
शास्तुसमंताश्चविज्ञेयःसमुद्गकः॥३०॥पार्श्वयोश्चंद्रशालश्चउछ्रायोभूमिकाद्वयं॥तथैवपद्मकःप्रोक्तउ
छ्रायोभूमिकात्रयं॥३१॥षोडशास्तुसविशेषोविचित्रशिखरःशुभः॥मृगराजस्तुविज्ञानश्चंद्रशालाविभू
षितः॥३२॥प्राग्ग्रीवेनविशालेनभूमिकासनसमन्वितः॥अनेकचंद्रशालास्तुगजप्राकारइष्यते॥३३॥पर्यस्तु
गृहराजावैगरुडोनामतः॥प्रसमशोछ्रूपस्तद्वत्चंद्रशालप्रपान्वितः॥३४॥भूमिकाशिखराशितिबाह्यतः
पवर्तीभवेत्॥तथान्योगरुडस्तद्वत्उछ्रायाद्दशभूमिकः॥३५॥सप्तकाःपंचकाश्चैवशालाप्रासादायेमयोदि
ताः॥सिंहस्यतेसमाज्ञेयायेचान्येतत्प्रमाणतः॥३६॥चंद्रशालैःसमोपेताःसर्वप्राग्ग्रीवसंयुताः॥ऐष्टिका राम
दारकाश्चैवशैलावास्तुःसतोरणा॥३७॥मेरुःपंचसहस्रःस्यात्मंदरःपादहीनकः॥चत्वारिंशत्तुकैलाशश्चतु ४३९
स्त्रःसद्विमानकः॥३८॥नंदिवर्धनकस्तद्वत्द्वात्रिंशतसमुदाहृतः॥त्रिंशद्भिर्नंदनःप्रोक्तःसर्वतोभद्रकस्तथा॥३९

एतेषोडशसाहस्राश्चत्वारोद्वेववल्लभाः॥वर्तुलःपद्मकश्चैवत्रिंशद्दशउदाहृतः॥४०॥गजसिंहश्चकुंभश्चवलभ्यान्
दारुकस्तथा॥कैलाशोमृगराजश्चविमानछंदकोगजः॥४१॥एतेद्वादशसाहस्रास्तेषांसिंहनंदनौ॥गरुडो
ष्टकराज्ञेयोदशोदशउदाहृतः॥४२॥एवमेतेप्रमाणेनकर्तव्याःशुभलक्षणाः॥यक्षराक्षसनागानांमातृ
स्थानमिहेष्यते॥४३॥तथामेर्वादयःसप्तप्रेक्षिंगेशुभावहाः॥श्रीवृक्षकादयश्चाष्टौमध्यमेस्तत्प्रकीर्तिताः॥
४४॥तथाहंसादयःसप्तकन्यकेशुभदाःस्मृताः॥चलतीछदकेगौरीजटामुकुटधारिणी॥४५॥वरदाभय
दातद्वत्साक्षसूत्रकमंडलुः॥गृहेतुरत्नमुकुटउत्संगांकुशधारिणी॥४६॥वरदाभयदावापिपूजयेच्चम
भद्रिका॥तपोवनेस्थितातदापूजयेत्पुनःपुनः॥४७॥देवोविनायकस्तद्वत्वलभीछंदकोत्तमौ॥४८॥
इतिश्रीमत्स्यपुराणेप्रासादानुकीर्तनंनाम॥॥सूतउवाच॥॥अथातःसंप्रवक्ष्यामिमंडपानांतुलक्षणं॥
मंडपप्रवरान्वक्ष्येप्रासादस्यानुरूपतः॥१॥त्रिविधामंडपाःकार्याज्येष्ठमध्यकनीयसः॥नामतस्तान्प्रवक्ष्या
मिशृणुध्वंद्विजसत्तमाः॥२॥पुष्पकःपुष्पभद्रश्चसुव्रतोमृतनंदनः॥कौशल्योबुद्धिसंकीर्णोगजभद्रोजयाव
हः॥३॥श्रीवत्सोविजयश्चैवकर्णिकारःशतर्द्धिकः॥सिंहश्चश्यामभद्रश्चतथैवच॥४॥सप्तविंशसमाख्यातल
क्षणंशृणुतद्विजाः॥स्तंभायत्रचतुःषष्टिःपुष्पकःसउदाहृतः॥५॥द्विषष्टिःपुष्पभद्रस्तुषष्टिस्तुप्रतउच्यते॥अ

म०पु०
४४०

ष्टपंचाशकस्तंभः कथ्यते मत मंथनः ॥६॥ कौशल्यः षट्पंचाशत् चतुःपंचाशता पुनः ॥ नाम्ना तु बुद्धिसंकीर्णो
द्विहीनो गजभद्रकः ॥७॥ जया वहस्तु पंचाशत् श्रीवत्सस्तु द्विहीनः स्याद्यास्तु संकीर्णकिस्मृत ॥८॥ द्वाभ्यामेतस्य
हीयेत ततः श्रुतिधरो परः ॥ चत्वारिंशाद्यस्त्वरुद्रस्माद्विहीनो विशालकः ॥९॥ द्वाविंशश्चैव सुश्लिष्टस्त्र्योविहीनः श
त्रुमर्दनः ॥ द्वात्रिंशाङ्गागपंचस्तु विंशाद्विमनिस्तुतः ॥१०॥ अष्टाविंशान्मणिभद्रः सुग्रीवस्तु विहारकः ॥ द्वात्रिंश
दरिषोरेपः कर्णिकारस्तु विंशतिः ॥११॥ पादाद्वै कोष्ठादशाभिर्दिरिष्टः सिंह उच्यते ॥ द्विहीनः श्यामभद्रस्तु शाकल्प्य
निगद्यते ॥१२॥ श्यामभद्रः कथितो कोष्ठादशस्तंभसंयुतः ॥ मंडपाः कथितास्तुभ्यं यथावल्लक्षणान्विताः ॥१३॥
त्रिकोणवृत्तमर्धेंदुरष्टकोणद्विरष्टकं ॥ चतुःकोणंतु कर्तव्यं संस्थाने मंडपस्य तु ॥१४॥ राज्यं च विजयं चैव वशत्रु
घातनमेव च ॥ पुत्रलाभः स्त्रियः पुष्टिस्त्रिकोणादिक्रमात् भवेत् ॥१५॥ एवं तु भवनं दः प्रोक्तोत्यन्यथा तु भयावहः ॥
चतुःषष्टिपदं कृत्वा मध्ये द्वारं प्रकल्पयेत् ॥१६॥ विस्तारद्विगुणोच्छ्राया द्विशागाद्यक्रटिर्भवेत् ॥ विस्ताराद्विगु
वेत गर्भो भित्तयोन्याः समंततः ॥१७॥ गर्भपादेन विस्तीर्णं द्वारं द्विगुणमायतं ॥ उच्छ्रायः पादविस्तीर्णः शाखा राम
स्तु दुंबरः ॥१८॥ विस्तारपादप्रतिमं बाहुल्यं शाखयास्तु तं ॥ त्रिपंचसप्तनवभिः शाखाभिर्द्वारमिष्यते ॥१९॥ ४४०
कनिष्ठा मध्यमं ज्येष्ठं यथायोग्यं प्रकल्पयेत् ॥ अंगमारसस्पर्द्धसारिषट्स प्रथष्टिकं ॥२०॥ विशत्रिंशोत्तराधम

पुत्रममेव च ॥ सपंचाशीतिसहितं वा तत निर्गमिसंभवेत ॥२१॥ अधिकं दशभिस्तद्वत् तथा षोडशभिः स्मृतं ॥ शतमानंत
तीयं तु नवत्याशीतिभिस्तथा ॥२२॥ दश द्वाराणि चैतानि क्रमेणोक्तानि सर्वदा ॥ अन्यानि वर्जनीयानि मनसो द्वेगदानि
तु ॥२३॥ द्वारवेधं प्रयत्नेन सर्वथा तु विवर्जयेत् ॥ रथकोणभ्रमद्वारस्तंभकूपध्वजादपि ॥२४॥ कुड्यश्वभ्रेण वावि
द्धं द्वारं नशुभदं भवेत् ॥ क्षयश्च दुर्गतिश्चैव प्रसवः शून्यं तथा ॥२५॥ दोषमप्पिं वंधनं रोगाः दारिद्र्यं कलहं तथा ॥ विरो
धश्चार्थनाशश्च सर्वं वेधाद्भवेत् क्रमात् ॥२६॥ पूर्वेण फलिनो वृक्षाः क्षीरवृक्षास्तु दक्षिणे ॥ पश्चिमेन जलं श्रेष्ठं पद्मोत्प
रमेवा ॥२७॥ प्राग्वति श्चापि कर्त्तव्यं पारावालालयादिकं ॥ याम्ये तपोधनस्थाने नैऋत्ये तु विनायकं ॥२८॥ वारुणे श्री
निवासस्तु वायव्ये ग्रहमालिका ॥ उत्तरे यक्षालोदेशं तु निर्माल्यस्थानमुत्तमं ॥२९॥ वारुणे सोमदैवत्ये बलिनिर्वप
णं स्मृतं ॥ पुरतो वृषभस्थाने शेषेस्यात्कुसुमायुधः ॥३०॥ जलवापीतथेशाने विष्णुं च जलशायिनं ॥ पंचक्रोशेत
तं कुर्यात्तस्यं नमंडपसंयुतं ॥३१॥ घंटावितानकस्ततोरणाविन्नयुक्तं नित्योत्सवप्रमुदितेन जनेन सार्द्धं ॥ कार्पासदास्तु
रगृहं विविधध्वजांकं श्रीसलेतमुंचतिसदा दिवि पूज्यते च ॥३२॥ एवं महार्चनविधावपि शक्तितास्यात् संस्थापमं
सकलमंत्रविधानयुक्तं ॥ गोवत्सकांचनहिरण्यधराप्रधानं देयं गुरुद्विजवरेषु तथा तदानं ॥३३॥ ॥ इति श्रीमत्स्य
पुराणे प्रासादकीर्तनं समाप्तं ॥ ॥ ऋषय ऊचुः ॥ ॥ पूरोर्वंशस्त्वया सूत सम हिष्णो निवेदितः ॥ सूर्यवंशोन्नृपायेतु

म०पु०
४४१

भविष्यंतीहतान्वद॥१॥तथैवयादवेवंशेराजानःकीर्त्तिवर्द्धनाः॥कलौयुगेभविष्यंतितानपीशावस्वनः॥२॥संशं
तेनानयोयाश्चराज्यंप्राप्स्यंतिसुव्रत॥ब्रूहिसंक्षेपतस्तास्तांपथाभाव्यमनुक्रमात्॥३॥सूतउवाच॥॥बृहद्बलस्य
दायादोवीरोराजानुरुक्षयः॥नुरक्षयसुतश्चापिवत्सव्यूहोमहायशाः॥४॥वत्सव्यूहात्प्रतिव्योमस्तस्यपुत्रोदि
वाकरः॥तस्यैषामध्यदेशेतुअयोध्यानगरीशुभा॥५॥दिवाकरस्यस्वहितासहदेवोमहायशाः॥सहदेवस्य
भविताध्रुवाख्योवैमहायशाः॥६॥तस्यपुत्रोव्योमहाभागःप्रतीपाश्वस्तत्सुतः॥प्रतीपाश्वसुतश्चापिसुप्र
तीप्याभविष्यति॥७॥मरुदेवसुतस्तस्यसुनक्षत्रस्तत्सुतोभवेत्॥किंनरश्चाक्षरस्तवतत्भविष्यतिपरंतपः॥८॥किं
नरादंतरिक्षस्तुभविष्यतिमहामनाः॥सुवर्णश्चांतरिक्षस्यसुवर्णस्याप्यमित्रजित्॥९॥सुमित्रजोबृहद्भ्राजस्य
वीर्यवान्॥पुत्रःकृतंजयोनामधार्मिकस्सभविष्यति॥१०॥कृतंसुतंजयोविद्वानस्तभविष्यतिरणंजयः॥भविता
संजयश्चापिवीरोराजारणंजयात्॥११॥रणंजयसुतःशाक्योशाक्यात्सुद्धोदनःपुनः॥शुद्धोदनस्यभविताशुद्धार्ह
हसनःसुतः॥१२॥प्रसेनजित्ततोभाव्यःक्षुद्रकोभवरान्नृपः॥क्षुद्रकात्क्षुद्रकोभाव्यःक्षुद्रकात्सुरथःसुतः॥
१३॥सुमित्रःसुरथश्चापिअन्त्यश्चभवितानृपा॥एतेइक्ष्वाकवःप्रोक्ताभविष्यंतिकलौयुगे॥१४॥बृहद्बलान्व राम०
यायेतुभविष्यःशुद्धवंशराजाः॥निःशेषाःकथिताश्चैवन्नृपायेवैपुरातनाः॥१५॥अत्रानुवंशश्लोकोयंगीतोवि ४४४

प्रैःपुरातनैः॥इक्ष्वाकूणामयंवंशश्लोकोयंविप्रैःपुरातनैः॥१६॥इक्ष्वाकूणामयंवंशःशाठोलश्चसमुदाहृतः॥अ
तऊर्ध्वंप्रवक्ष्यामिमागधायेबृहद्रथा॥१७॥पूर्वेणयेजरासंधात्सहदेवान्वयेनृपा॥अतीतावर्त्तमानाश्च
भविष्याश्चनिबोधत॥१८॥संग्रामेभारतेहतेतेयेश्रुतुकामहीइयं॥सहदेवस्यदायादोराजाभूत्समितिधृ
त॥१९॥पंचाशतंतथाष्टौचसमाराज्यमकारयत्॥चत्वारिंशत्समामित्राशुस्काचैवदिवंगतः॥२०॥पंचाशतंसमाः
पृष्टःसुमित्रःप्राप्तवान्महीं॥बृहत्कर्मातुपात्रिंशत्माप्राप्नेमांवसुंधरां॥२१॥श्रुतंजयश्चवर्षाणांचत्वारिंशत्भ
विष्यति॥अष्टाविंशतिवर्षाणिमहींसंप्राप्स्यतिप्रभुः॥२२॥अष्टपंचाशतंचाष्टाराज्येस्थास्यतिचैशुचिः॥अष्टाविं
शत्समाराजाक्षेमोभोक्ष्यतिमेदिनीं॥२३॥क्षेमकस्यसुतःषष्ठिराज्यंप्राप्स्यतियत्नतः॥अष्टविंशत्समाराज्यं
सुनेत्रोभोक्ष्यतेनृप॥२४॥सर्वजित्पृथिवींराजाअशीतिंप्राप्स्यतेनृपः॥विश्वजिद्वैववर्षाणिपंचविंशद्भविष्यति
२५॥ ॥इतिश्रीमत्स्यपुराणेभविष्यराजानुकीर्त्तनं॥ ॥सूतउवाच॥ ॥बार्हद्रथेष्वतीतेषुवीतहोत्राश्चवंतिषु
पुलिकाःस्वामिनंहत्वास्वंपुत्रमभिषेक्ष्यति॥१॥मिषतांक्षत्रियाणांतुबालकःपुलिकोद्भवः॥सवैप्रजातस्स
मंतोभविष्योनयवर्जितः॥२॥त्रयोविंशत्समाराजाभवितासनरोत्तमः॥अष्टाविंशतिवर्षाणिबालकोभविता
नृपः॥विशाखयूपोभवितारात्रिपंचाशत्तथासमाः॥एकविंशत्समाराजासूर्यकस्तुभविष्यति॥४॥भविष्यातिनं

म०पु० ४४२

पस्त्रिंशाक्तस्तुतोनंदिवर्द्धनिः॥द्विपंचाशत्सतं भूत्वाप्रणष्टः पंचते नृपाः॥५॥कृत्वाते पांयशः कृत्स्नं सुश्रुताको भवि
ष्यति॥वाराणस्यांसुतस्तस्य प्राप्स्यति गिरिव्रजं॥६॥शिशुनाकस्तु वर्षाणि चत्वारिंशद्भविष्यति॥काकवर्णस्सुतस्त
स्य षड्विंशत् प्राप्स्यति महीं॥७॥षट्त्रिंशतिं च वर्षाणि क्षेमधर्मा भविष्यति॥चत्वारिंशत्समाराजा क्षेमार्चिः प्राप्स्यते
महीं॥८॥अष्टाविंशतिवर्षाणि विंध्यसेनो भविष्यति॥भविष्यति समाराजा भवकं गायतो नृपः॥९॥भूमिपुत्रस्सुत
स्तस्य चतुर्दश भविष्यति॥अजातशत्रुर्भविता सप्तविंशत्समा नृपः॥१०॥चतुर्विंशत्समाराजा वसकस्तु भविष्यति॥
उदासी भविता तस्मात्त्रयस्त्रिंशत्समा नृपः॥११॥इत्येते भवितारो वै दश द्वौ शिशुनाकजाः॥शतानि त्रीणि पूर्णानि
षष्टिवर्षाधिकानि च॥१२॥शैशुनाका भविष्यंति राजानः क्षत्रबंधवः॥एतैः सार्द्धं भविष्यंति यावत्कालं नृपाः परे॥
१३॥तुल्यकालं भविष्यंति सर्वे ह्येते महीक्षितः॥चतुर्विंशस्तथेक्ष्वाकुः पंशतिः॥१४॥काषेयास्तु चतुर्विंशत् अष्टावि
शत्सुहैहयाः॥कलिंगाश्चैव द्वाविंशत् अश्मकाः पंचविंशतिः॥१५॥कुरवश्चापि षट्त्रिंशद् अष्टाविंशत्तु मैथिलाः
सूरसेनास्त्रयोविंशद्वीतिहोत्राश्च विंशतिः॥१६॥एते सर्वे भविष्यंति एककालं महीक्षितः॥महानंदिसुतश्चापि
शूद्र्यां कलिकांशतः॥१७॥उत्पत्स्यते महापद्मः सर्वक्षत्रांतको नृपः॥ततः प्रभृति राजानो भविष्याः शूद्रयोन
यः॥१८॥एकराजा महापद्म एकछत्रो भविष्यति॥अष्टाशीतिं स वर्षाणि पृथिव्यां च भविष्यति॥१९॥सर्वक्षत्र

राम. ४४२

मथोत्साद्य भाविना र्थेन नोदितः॥कुशाद्यादि सुताह्यष्टौ समा द्वादश ते नृपाः॥२०॥महापद्मस्य पर्याये भविष्यंति नृपाः
क्रमात्॥उद्धरिष्यति कौटिल्यः समैर्द्वादशभिः सतान्॥२१॥भुक्त्वा महीं वर्षशतं ततो मौर्यं गमिष्यति॥भविता शत
धन्वा तु तस्य पुत्रस्तु षट्समाः॥२२॥बृहद्रथस्तु कर्माणि तस्य पुत्रस्तु विंशतिः॥षट्त्रिंशत्समाराजा नु भविता को
शाएव च॥२३॥सप्तानां दश वर्षाणि तस्य नप्ता भविष्यति॥राजा दशरथोष्टौ तु तस्य पुत्रो भविष्यति॥२४॥भ
विता नव वर्षाणि तस्य पुत्रस्तु सप्ततिं॥इत्येते दश मौर्यास्तु ये भोक्ष्यंति वसुंधरां॥२५॥सप्तत्रिंशच्छतं पूर्णं तेभ्यः
सुगांगमिष्यति॥पुत्रमित्रस्सनानीः समुद्धृत्य स दाग्रहात्॥२६॥कारयिष्यति वै राज्यं षट्त्रिंशतिसमा नृपः॥वसु
मित्रसुतो भाव्यो दश वर्षाणि वै नृपाः॥२७॥भविता सुवाज्येष्ठः सप्तवर्षाणि वै नृपः॥ततोंतकः समा ह्यौ तस्य पुत्रो भ
विष्यति॥२८॥भविष्यति समास्तस्मात्त्रीणि वर्षाणि वै ततः॥भविता वज्रमित्रस्तु समाराजा पुनर्नव॥२९॥द्वात्रिं
शत्तु समं भागः समभागात्ततो नृपः॥भविष्यति सुतस्तस्य देवभूमिः समा दश॥३०॥दशैते शुंगराजानो भोक्ष्यंतीमां
वसुंधरां॥शतं पूर्णं शते द्वे तु ततः शुंगो हनिष्यति॥३१॥अमात्यो वसुदेवस्तु प्रसत्यास्वसनी नृप॥देवभूमिं तथोच्छा
घ्य शुंगः स भविता नृपः॥भविष्यति समाराजा नव कंगायतो द्विजः॥भूमिमित्रस्सुतस्तस्य चतुर्दश भविष्यति॥३३॥
नारायणस्सुतस्तस्य भविता द्वादशैव तु॥सुशर्मा तत्सुतश्चापि भविष्यति दशैव तु॥३४॥इत्येते शुंगवत्यास्तु स्मृताः

कांजायनान्नृपे॥ चत्वारिंशद्द्विजा ह्येते काण्वायना भोक्ष्यंति चैव हि॥३५॥ चत्वारिंशत्तं चैव भोक्ष्यंती मां वसुंधरां॥ एते प्रणत
सामंता भविष्या धार्मिकाश्च ये॥३६॥ तेषां पर्यायकाले तु भूमिरंध्रां गमिष्यति॥३६॥ ॥इति श्रीमत्स्यपुराणे भविष्य
राजानुकीर्तनं॥ ॥सूत उवाच॥ ॥काण्वायनस्ततो भृत्यः सुशर्माणं प्रसह्य तं॥ सुतानां चैव ढेषं क्षिपित्वा सुबलायसः
१॥ शिस्रकांध्रः सजातीयः प्राप्स्यतीमां वसुंधरां॥ त्रयोविंशत्समा राजा शिस्रकस्तु भविष्यति॥२॥ श्रीमर्ककर्णी भ
विता तस्य पुत्रस्तु वै समाः॥ पूर्णोत्संगस्तु वै राजा वर्षाण्येष्टादशैव तु॥३॥ पंचाशत्तं समाः षड्अशीतकर्णी भविष्यति।
दशा चाष्टौ च वर्षाणि तस्य लंबोदरः सुतः॥४॥ अपीतको दश द्वे तु तस्य पुत्रो भविष्यति॥ दशा चाष्टौ च वर्षाणि संघ
स्वापि भविष्यते॥५॥ सप्तवर्षो क्ष्यते राजा समा अष्टौ दशैव तु॥ स्कंधस्वातिस्तथा राजा सप्त चैव भविष्यति॥६॥ मृगें
द्रः स्वातिकर्णस्तु भविष्यति समास्त्रयः॥ कुंतलः स्वातिकर्णश्च भविता ह्येष समान्नृपः॥७॥ एकसंवत्सरो राजा स्वाति
कर्णो भविष्यति॥ षट्त्रिंशत्तं च वर्षाणि पुलोमावि भविष्यति॥८॥ भविता गौरकृष्णस्तु वर्षाणि पंचविंशतिः॥ ततः
संवत्सरान् चट्शाल्यो राजा भविष्यति॥९॥ पंचमंतलको राजा भविष्यति समान्नृपः॥ पुरींद्रसेनो भविता तस्मात्सौम्यो
भविष्यति॥१०॥ राजा दशातिकर्णस्तु षण्मासो भवे भविष्यति॥ अष्टाविंशति वर्षाणि शिवस्वातिर्भविष्यति॥११॥ शि
वश्री वै पुलोमा तु सदैव भविता नृपः॥ शिवस्कंधशतेकर्णि र्भविता सात्मजः समाः॥१२॥ नव वर्षाणि यस्त्रश्रीः कु

रुते शातकर्णिनी॥ षड्वे भविता यस्मात् विजयस्तु समं ततः॥१३॥ चेंडश्रीः शातकर्णिस्तु तस्य पुत्रः समा दश॥ पुलोमा
स सप्त वर्षाण्यन्यस्तेषां भविष्यति॥१४॥ एकोनानवतिं ह्येते अंध्रा भोक्ष्यंति वै महीं॥ तेषां वर्षशतानि स्युश्चत्वारि षष्टि
रेव च॥१५॥ अंध्राणां संस्थिते राज्ये तेषां भृत्यान्वयो नृपाः॥ सप्तैवांध्रा भविष्यंति दशाभीरास्तता नृपाः॥१६॥ सप्त
मर्दभिनश्चापि शकाश्चैव दशैव तु॥ यवनाष्टौ भविष्यंति तुषारास्तु चतुर्दश॥१७॥ त्रयोदश पुरंडाश्च हूणा ह्येकोनविंश
तिः॥ यवनाष्टौ भविष्यंति सप्ताशीतिमहीमिमां॥१८॥ सप्तगर्दभिनो भूपा भोक्ष्यंती मां वसुंधरां॥ सप्त वर्षसहस्राणि
तुषाराणां मही स्मृता॥१९॥ शतानि त्रीणि चत्वारि नवत्याष्टौ दशैव तु॥ अंध्राः श्रीपर्वतीयाश्च ते वै पंचाशतं समाः॥ स
प्तषष्टिसहस्राणि दशाभीरास्ततस्तु वै॥ तेषूत्सन्नेषु काले तु ततः किलकिला नृपः॥२१॥ भविष्यंतीह यवना धर्मतः का
मतोर्थतः॥ ते विमिश्राः जनपदा पाञ्चा पद्मि च्छाश्च सर्वशः॥२२॥ विपर्ययेण वर्तंते क्षयमेष्यंति वै प्रजाः॥ लब्धान्य
तथ्रुवाश्चैक गम्भीर्वै नृपास्ततः॥२३॥ कूर्मना महता सर्वे आपन्नेछाश्च सर्वशः॥ अधार्मिकाश्च जन्मर्षपाखंडास्तु तथै
व च॥२४॥ प्रनष्टेन पराष्टेतु संधिशिष्टे कलौ युगे॥ किंचिष्टाः प्रजास्ता वै धर्मनिष्टपरिग्रहाः॥२५॥ असाधनात्यसत्वा
स्व्याधिशोकेन पीडिताः॥ अनावृष्टिहतश्चैव परस्परवधे स्वव॥२६॥ अशरण्याः परीचसंक्रंदं घोरमाश्रिताः॥ सुह
त्यवतवस्त्वत्यो भविष्यंति खिन्नास्तथा॥२७॥ एवं नष्टेषु नष्टेषु प्रजाः सर्वगृहाणि च॥ नष्टस्नेहा निरापत्रास्सः कृत्वा

तत्वरिगणः॥२८॥ वर्णाश्रमपरिभ्रष्टाअधर्मनिरतास्तथा॥ सरित्सवंतं वासिन्यो भविष्यंत्यखिलाः सदा॥ २९॥ पत्तनम्
लफलाहाराश्चीरपत्राजिनांबराः॥ वृत्त्यर्थमभिलिप्संतस्सश्चरिष्यंति वसुधरां॥ ३०॥ आतंकंसमनुप्राप्ताः प्रजाः कलिलि
युगांतरे॥ निःशेषास्तु भविष्यंति सार्द्धं कलियुगेन तु॥ ३१॥ क्षीणे कलियुगे तस्मिन् दिव्यवर्षसहस्रके॥ ससंध्यांशे षनि
शेषकृतं तु पत्स्यते॥ ३२॥ एषवंशक्रमः कृत्स्नः कीर्त्तितोयं मयाक्रमात्॥ अतीतो वर्त्तमानश्च तथैवानागतश्च यः॥ ३३॥ म
हामस्याभिषेकात्तु यावज्जन्मपरीक्षितः॥ एवमेव सहस्रं तु ज्ञेयं पंचाशतोत्तरं॥ ३४॥ पुलोमास्तु तथांध्रकमहापद्मांतरे
पुनः॥ अनंतरं शता अष्टौ षट्त्रिंशद्वुसमास्तथा॥ ३५॥ भवेत्कालांतरं ज्येष्ठं त्वांतादा परीक्षितः॥ भविष्येतत्समाख्या
तः पुराणे श्रुतिसंपिभिः॥ ३६॥ सप्तर्षयस्तथा प्रांशु प्रदीप्तेनाग्निनासमं॥ सप्तविंशतिभाव्येन अंध्राणां तेन्वगास्तुनः।
३७॥ सप्तविंशातिपर्यंति कृत्स्ने नक्षत्रमंडले॥ सप्तर्षयस्तु तिष्ठंति पर्यायेण मतं शतं॥ ३८॥ सप्तर्षीणां तु पर्यायेत
त्स्मृतं दिव्यसंख्यया॥ तदोदिता तथा षष्टि दिव्या ह्यानि च सप्ततिः॥ ३९॥ तेभ्यः प्रवर्त्तते कालो दिव्यं सप्तर्षिभिस्तु वै॥ सप्त
र्षीणां तु यः पूर्वं डयनवेन दृश्यते निशि॥ ४०॥ सो मध्येतु नक्षत्रं दृश्यते समं दिवि॥ तेन सप्तर्षयो ज्ञेया युक्ता व्योम्नि
शतं समाः॥ ४०॥ ततः प्रवृत्तं यं सर्वलोको व्याप्य स्थितो नृशं॥ अनृतोपहता लुब्धा धर्मतः कामतोर्थतः॥ ४१॥ श्रौतस्मा
र्त्ते प्रशिथिले नष्टे वर्णाश्रमे तथा॥ संकरं दुर्बलान्मन्नः प्रतिपत्स्यंति मोहिताः॥ ४२॥ ब्राह्मणाः शूद्रयोनिस्थाः शूद्रा वैमं

त्रयोनयः॥ उपस्थास्यंति विप्रास्तु वदार्थमति विप्रयः॥ ४३॥ क्रमणैव हि दृश्यंते स्वप्न निभवाहवं॥ क्षयमेव गमिष्यंति क्षी
णशेषायुगे॥ ४४॥ यस्मिन्कृष्णो दिवं याते तस्मिन्नेव तदाहनि॥ प्रतिपन्नं कलियुगं प्रमाणं तस्य मे शृणु॥ ४५॥ च
तुःशती सहस्रं तु तदा संध्या प्रवर्त्तते॥ निःशेषतदा तस्मिन् कृतं वै प्रतिपत्स्यते॥ ४६॥ ऐडश्चैक्ष्वाकुवंशस्तु तदा दे
वैः प्रकीर्त्तितः॥ इक्ष्वाकोसंस्थितं क्षत्रं सुमित्रांतं भविष्यति॥ ४७॥ ऐडं क्षत्रं समाक्रांतं सोमवंशविदो विदुः॥ एवं वि
वस्वतः पुत्राः कीर्त्तिताः कीर्त्तिवर्धनाः॥ ४८॥ अतीता वर्त्तमानाश्च तथैवानागताश्च ये॥ ब्राह्मणाः क्षत्रियावैश्या
स्तथा शूद्राश्च ते स्मृताः॥ ४९॥ वैवस्वतें तरे तस्मिन्निति वंशाः समाप्यते॥ देवापिः पौरवो राजा ऐक्ष्वाकुर्यश्च ते मताः।
५०॥ महायोगबलोपेतौ कलापग्रामसंस्थितौ॥ एतौ क्षत्रप्रणेतारौ निवर्त्तेति चतुर्युगे॥ ५१॥ सुवर्चामिरपुत्रस्तु ईक्ष्वा
कोयाभविष्यति॥ निविंशे युगे शावैवंशस्यादिर्भविष्यति॥ ५२॥ देवापिपुत्रः सत्यस्तु ऐडानांभविता नृपः॥ क्षत्रप्रा
वर्त्तकावेता भविष्ये चतुर्युगे॥ ५३॥ एवं सर्वेषु विज्ञेयं संतानार्थलक्षणं क्षीणे कलियुगे चैव तिष्ठंतीति चतुर्युगे॥
५४॥ सप्तर्षयस्तथा श्राद्धमस्ये त्रेतायुगे पुनः॥ एवं क्षत्रस्य चोच्छेदः संबंधो वै स्मृता द्विजाः॥ ५५॥ मन्वंतराणां सप्ता
नं संतानश्च स्मृतौ॥ अतिक्रांता युगाश्चैव ब्रह्म क्षत्रस्य संभवः॥ ५६॥ यथा प्रशांतिस्तेषां वै प्रकृतीनां यथाक्षयः॥ सप्त
र्षयोविदुस्तेषांदीर्घायुसंतपोयथा॥ ५७॥ एतेनक्रमयोगेन ऐकावैक्ष्वाकिको मतः॥ उत्साद्यमानास्ते नाम्नक्षीयमा

म०पु०
४४५

एाः कलौयुगे॥५८॥अनुयांति ऋयाख्यासुयावत्सवंत्नरक्षयं॥जामदग्न्येनरामेयास्तत्रंनिरवशिष्यते॥५९॥कृ
तेयंवसुधासर्वक्षित्रियैर्वसुधाधिपैः॥द्विवंशाकरणंसर्वंकीर्त्तयिष्येनिबोधते॥६०॥ऐंडेचेक्ष्वाकुवंशंचप्रकृतिं
परिचक्ष्यते॥राजानःश्रेणिबद्धाश्चतथान्येक्षत्रियाभुवि॥६१॥ऐडवंशास्सुभूयांशोनतथेक्ष्वाकवोमताः॥तेषां
मेवशतंपूर्णंकुलानामधिरोहतां॥६२॥तावदेवचभोजानांविस्तरोद्विगुणःस्मृतः॥भोजानांद्विगुणंक्षत्रंचतु
र्धानयथातथं॥६३॥तेषुतातांशतान्मानोक्तवस्तान्निबोधत॥बीजाश्चैवभविष्यंतिब्रह्मक्षत्रस्यतेपुनः॥६४॥
एवमेवतुसर्वेष्ठुतिष्ठंतीत्यंतरेषुच॥सप्तर्षयोनृपैःसार्द्धंसंतानार्थंपुरोशतं॥६५॥शतंवैप्रतिविंध्यानांशतंन
गाःशतंहयाः॥शतमेकंधार्त्तराष्ट्राअशीतिर्जनमेजयाः॥६६॥शतंवैब्रह्मदत्तानांवीराणांकुरवःशतं॥ततःश
तेचपंचालाःशतंकाशकुशादयः॥६७॥तथापरेसहस्रेद्वेयेनीपाःशशबिंदवः॥इष्टवंतश्चतेसर्वेसर्वेनियु
तदक्षिणाः॥६८॥एवंराजर्षयोतीताःशतशोथसहस्रशः॥मानोर्वैवस्वतस्यास्मिन्वर्त्तमानांतरेविभो॥६९॥तेषां
तोनिधनोत्पत्तौलोकेसंस्थितयःसमाःस्थिताः॥नशक्योविस्तरस्तेषांसंतानस्यपरस्परं॥७०॥तत्स्वपरियोगेनवकुं
वर्षशतैरपि॥अष्टाविंशसमाख्याताःगतावैवस्वतेंतरं॥७१॥एतेदेवगणैःसार्द्धंशिष्टापन्नान्निबोधत॥चत्वारिं
शत्त्रयश्चैवभविष्यास्तेमहात्मनः॥७२॥अवशिष्टायुगाख्यास्तुततोवैवस्वतोक्षयएतदुःकीर्त्तितंसर्वंसमासमास

राम०
४४५

योगतः॥७३॥पुनरुक्तबहुत्वात्तुनशक्यंविस्तरेणतु॥वकुंराजर्षयश्चैवअतीतास्तेयुगैःसह॥७४॥एतेययाति
वंशानांपंचविंशतिकिंशांपते॥कीर्त्तिनाद्युतिमंतस्तेयएतांधारयेन्नरः॥७५॥सवराज्जनतेपंचदुर्लभानिहलौकि
कान॥आयुःकीर्त्तिंधनंस्वर्गंपुत्रवांश्चापिजायते॥धारणात्श्रवणात्चैवपंचसर्गस्यधीमतः॥७६॥इतिश्रीमत्स्य
पुराणेभविष्यराजानुकीर्त्तनंसमाप्तं॥ऋषयऊचुः॥श्रयोपार्जन्यमर्थानांवर्द्धनंचाभिरक्षणं॥सत्यवत्मतिपत्ति
श्चसर्वशास्त्रेषुपठ्यते॥१॥कृतकृत्योभवेत्केनततःस्त्रीधर्मविन्नबुधः॥महादानेनदत्तेनतन्नोविस्तरतोवद॥
२॥सूतउवाच॥अथातःसंप्रवक्ष्यामिमहादानानुकीर्त्तनं॥दानधर्मेपिपन्नोक्तंविष्णुनाप्रभविष्णुना॥३॥स
र्वपापक्षयकरंनृणांदुःस्वप्ननाशनं॥यत्तत्षोडशधाप्रोक्तंवासुदेवेनभूतले॥४॥पुण्यंपवित्रमायुष्यंसर्वपा
पहरंपरं॥पूजितंदेवताभिश्चब्रह्मविष्णुशिवादिभिः॥५॥आद्यंतुसर्वदानानांतुलापुरुषसंज्ञितं॥हिरण्यगर्भदा
नंचब्रह्मांडंतदनंतरं॥६॥कल्पपादपदानंचगोसहस्रंतुपंचमं॥हिरण्यकामधेनुंचहिरण्याश्वस्तथैवच॥७॥
हिरण्याश्वरथस्तद्वद्धेमहस्तिरथस्तथा॥पंचलांगलकंतद्वद्धरादानंतथैवच॥८॥द्वादशंविश्वचक्रंचततः
कल्पलतात्मकं॥सप्तसागरदानंचरत्नधेनुस्तथैवच॥९॥महाभूतघटस्तद्वत्षोडशंपरिकीर्त्तितं॥सर्वाण्ये
तानिकृतवान्पुराशांबरसूदन॥१०॥वासुदेवश्चभगवानंबरीषश्चपार्थिवः॥कार्त्तवीर्यार्जुनोनामप्रह्ला

दःपृथुरेवच॥११॥कुर्युरण्येमहीपालाःकेचिच्चभरतादयः॥यस्माद्विघ्नसहस्रेणमहादानानिसर्वदा॥१२॥र
क्षंतेदेवतादेशानैकैकंसतिभूतले॥एषामन्यतमंकुर्याद्वासुदेवप्रसादतः॥१३॥ससस्यामन्यथाकर्तुंअपिश
क्रेणभूतले॥तस्मादाराध्यगोविंदमुमापतिविनायकौ॥१४॥महादानमथैकंकुर्याद्विप्रैश्चैवानुमोदितः॥एता
वदेवमनुनापरिपृष्टोजनार्दनः॥१५॥यथावदनुवक्ष्यामिशृणुध्वमृषिसत्तमः॥१५॥मनुरुवाच॥॥महादाना
नियानीहपवित्राणिशुभानिच॥रहस्यानिप्रदेयानितानिमेकथयाच्युत॥१६॥मत्स्यउवाच॥॥नोक्तानियानि
गुह्यानिमहादानानिषोडश॥तानितेसंप्रवक्ष्यामियथावदनुपूर्वशः॥१७॥तुलापुरुषयोगोयंयेषामादौवि
धीयते॥अयनेविषुवेपुण्येव्यतीपातेदिनक्षये॥१८॥युगादिषुपरागेषुतथामन्वंतरादिषु॥संक्रांतौवैधृति
दिनेचतुर्दश्यष्टमीषुच॥१९॥सितंपंचदशीषष्टमीषुच॥यज्ञोत्सवविवाहेषुदुःस्वप्नाद्भुतदर्शने॥२०॥द्रव्य
ब्राह्मणलाभेवाश्रद्धावायत्रजायते॥तीर्थेवायतनेगोष्ठेकूपारामसरित्सुच॥२१॥गृहेवायतनेवापितडागे
रुचिरेपिवा॥महादानानिदेयानिसंसारभयभीरुणे॥२२॥अनित्यंजीवितंयस्मात्वसुजातीवचंचलं॥केशेषु
चगृहीतःसन्मृत्युनाधर्ममाचरेत॥२३॥पुण्यांतिथिमथासाद्यकृत्वाब्राह्मणवाचनं॥षोडशारत्निमात्रंतुद
शद्वादशवाकरान्॥२४॥मंडपंकारयेत्विद्वान्चतुर्भवाननंबुधः॥सप्तहस्तानवेवेदीमध्येपंचकरापवा॥२५

तन्मध्येतोरणंकृत्वासारदारुमयंबुधः॥कुर्यात्चत्वारिकुंडानिचतुर्दिक्षुविचक्षणः॥२६॥समेखलायोनियुतानि
तानिसम्यक्कुंडानिसुशोभनानि॥पूर्वोत्तरेहस्तमिताचवेदिग्रहादिदेवेश्वरपूजनाय॥२७॥यथार्चनंब्रह्मशि
वाच्युतानांतथैवकार्यफलमाल्यवस्त्रैः॥लोकेशवर्णैःपरितःपताकामध्येध्वजःकिंकिणिकायुतः॥२८॥द्वा
रेषुकार्याणिचतोरणानिचत्वार्यपिक्षीरवनस्पतीनां॥द्वारेषुकुंभद्वयमत्रकार्यंसगंधमृत्स्नावरमंत्रयुक्तं॥
२९॥शाकद्रुमस्यंदनदेवदारुश्रीपर्णिबिल्वप्रियकांजनोत्थं॥स्तंभद्वयंहस्तयुगाभिखातंकलाहटंपंचकरोछ्रि
तंच॥३०॥तदंतरंहस्तचतुष्टयंस्यात्ययोन्तरंगावितदंगमेव॥समानजातीश्चतुलाचलंस्याद्धेमेनमुक्तेनचपोह
षयुक्ता॥३१॥दैर्घ्येणसाहस्तचतुष्टयंस्यात्त्रिषुत्वमस्याश्चदशांगुलानि॥सुवर्णपात्राभरणानुकार्योमिलोह
पादद्वयंस्यंखलानि॥३२॥युतासुवर्णैस्तनुरत्नमालाविभूषितामाल्यविलेपनैश्च॥चक्रेलिखेद्वाजिपत्रयुक्तं
नानारजोभिस्तुवितन्वकीर्णं॥३३॥वितानकंचोपरिपूर्णवर्णंसंस्थापयेत्पुष्पफलोपशोभं॥अथर्त्विजोवि
दध्याकार्याःसुरूपवेषोन्वयशीलयुक्ताः॥३४॥विद्यासमृद्धाःपटवोनुकूलापेचार्यदेशप्रभवाद्विजेंद्राः॥गु
रुश्चवेदोर्थविचारदक्षःसमुज्ज्वलःशीलकुलाभिरूपः॥३५॥कार्यःपुराणाभिरतोतिदक्षःप्रसन्नगंभीरस्वर
स्वतीकः॥सितांबरःकुंडलहेमसूत्रकेयूरकंठाभरणाभिरामः॥३६॥पूर्वेणऋग्वेदविदोभवंतियजुर्विदोदक्षि

म०पु०
४४७

णनश्वरास्त्ता॥स्नाप्यो द्विजोसामविद्दौच पश्चादाथर्वणस्त्वनंतरश्च कार्यो॥३७॥विनायकादिग्रहलोकपालवस्वष्टकादि
त्यमरुद्गणानां॥ब्रह्माच्युतेशार्कवनस्पतीभ्यः समंत्रकंहोममथत्र कुर्यात्॥३८॥जप्यानि सूक्तानि तथैव चैकम
नुक्रमेणैव यथास्वरूपं॥होमावसाने कृततूर्यनादे गुरुर्गृहीत्वा बलिपुष्पधूपान्॥३९॥आवाहयेल्लोकपतिक्र
मेणमंत्रैरमीभिर्यजमानयुक्तः॥एह्येहि सर्वामरजुष्टसिद्धैर्नतर्जिजोवज्रधरामरेशः॥४०॥संवीज्यमानोमरसं
गणेनरक्षोध्वरंसोभगवन्नमस्ते॥४०॥ओंअग्नयेनमः॥ ॥एह्येहि रक्षोगणनायकस्त्वंमृगालवैतालपिशाचसं
घैः॥ममाध्वरंपाहि शुभादिनाथलोकेश्वरस्त्वंभगवन्नमस्ते॥४१॥ओंनैर्ऋतायनमः॥एह्येहियादोगणवारि
धीनांगणेनपर्जन्यसदाप्सरोभिः॥विद्याधरेंद्रामरगीयमानःपाहित्वमस्मान्भगवन्नमस्ते॥४२॥ओंवरुण
यनमः॥ ॥एह्येहियज्ञेश्वररक्षणाय मृगाधिरूढः सहदेवसंघैः॥प्राणाधिपः कालकविःसहायोगृहाणपूजां
भगवन्नमस्ते॥४३॥ओंवायवेनमः॥एह्येहियज्ञेश्वरयज्ञरक्षांविधत्स्वनक्षत्रगणेनसार्द्धं॥सर्वौषधीभिःपितृ
भिःसहैवगृहाणपूजांभगवन्नमस्ते॥४४॥सोमायनमः॥ ॥एह्येहिविश्वेश्वरनस्त्रिशूलकपालखट्वांगधरेणसा
र्द्धं॥लोकेनभूतेश्वरयज्ञसिद्ध्यैगृहाणपूजांभगवन्नमस्ते॥४५॥ओंईशानायनमः॥एह्येहिपातालधराधरेंद्र
नागांगनाकिंनरगीयमानः॥रक्षोगणेंद्रामरलोकसार्द्धमनंतरक्षाध्वरमस्मदीयं॥४६॥ओंअनंतायनमः॥

राम
४४७

एह्येहिविश्वाधिपतेमुनींद्रलोकेनसार्द्धंपितृदेवतानि॥विश्वाधरन्नःसततंशिवायपितामहस्त्वंभगवन्नम
स्ते॥४७॥ओंब्रह्मणेनमः॥त्रैलोक्येयानिभूतानिस्थावराणिचराणिच॥ब्रह्मविष्णुशिवैःसार्द्धंरक्षांकुर्वंतु
तानिमे॥४८॥देवदानवगंधर्वयक्षराक्षसपन्नगाः॥ऋषयोमनवोगावोदेवमातरएवच॥४९॥सर्वेम
माध्वरेरक्षांप्रकुर्वंतुमुदान्विताः॥इत्यावाह्यसुरान्दद्यात्ऋत्विग्भ्योहस्तभूषणान्॥५०॥कुंडलानिच
हैमानिसूत्राणिकनकानिच॥द्विगुणंगुरवेदद्यात्भूषणाच्छादनादिकं॥५१॥जपेयुःशांतिकाध्यायं
जापकाःसर्वतोदिशं॥उपोषितास्ततःसर्वेकृत्वैवमधिवासनं॥५२॥ततोमंगलशब्देनस्नापितावि
प्रपुंगवैः॥त्रिःप्रदक्षिणमावृत्यगृहीतःकुसुमांजलिः॥५३॥शुक्लमाल्यांबरोभूत्वातांतुलामभिमंत्रयेत्॥न
मस्तेसर्वदेवानांशक्तिस्त्वंसत्यमास्थिता॥५४॥साक्षीभूताजगद्धात्रीनिर्मिताविश्वयोनिना॥एकतःसर्वसत्या
नितथानृतशतानिच॥५५॥धर्माधर्मकृतांमध्येस्थापितासिजगद्धिते॥त्वंतुलेसर्वभूतानिप्रमाणमिहकी
र्तिता॥५६॥मातुलोयस्तसंसारोदुर्धरस्त्वनमोस्तुते॥योसौतत्त्वाधिपोदेवःपुरुषःपंचविंशकः॥५७॥सए
षोधिष्ठितोदेवित्वयितस्मान्नमोनमः॥नमोनमस्तेगोविंदतुलापुरुषसंज्ञक॥५८॥त्वंहरेतारयस्वास्मा
न्संसारसागरात्॥पुण्यकालेसमासाद्यसत्वेवमधिवासतां॥५९॥पुनःप्रदक्षिणीकृत्यतांतुलामारुहेद्गु

म०पु० ४४६

धः॥ सखड्गचर्मकवची सर्वाभरणभूषितः॥६०॥ धर्मराजमथादाय हेमसूत्रेण संयुतं॥ करोभ्यां बद्धमुष्टिभ्यां
मास्ये पश्यत्करोन्मुखं॥६१॥ ततोपरे तुलाभागे न्यसेयुर्द्विजपुंगवाः॥ साम्याद्भ्यधिकं यावत्कांचनं याति
निर्मलं॥६२॥ पुष्टिकामस्तु कुर्वीत भूमिस्थं तु नरेश्वर॥ क्षणमात्रं ततः स्थित्वा पुनरेतदुदीरयेत्॥६३॥ नमस्ते स
र्वभूतानां साक्षिभूते सनातनी॥ पितामहेन देवि त्वं निर्मिता परमेष्ठिना॥६४॥ त्वया धृतं जगत्सर्वं सस्थावरजंग
मं तथा॥ सर्वभूतात्मभूतस्थे नमस्ते भूतधारिणी॥६५॥ ततोतीर्य गुरवे सर्वमर्धं निवेदयेत्॥ ऋत्विग्भ्योप
रमर्धं तु विप्रोदकपूर्वकं॥६६॥ गुरवे ग्राममरत्निकर्त्विग्भ्यश्च निवेदयेत्॥ प्राप्य तेषामनुज्ञां तु तथान्येभ्योपि
दीयते॥६७॥ दीनानाथविशिष्टादीन् पूजयेत् ब्राह्मणैः सह॥ न चिरं धारयेत् गेहे हेमसंतोलितं बुधः॥६८॥
तिष्ठद्भयावहं यस्मात् शोकव्याधिकरं नृणां॥ शीघ्रं परस्वीकरणात् श्रेयः प्राप्नोति मानवः॥६९॥ अनेन विधिना य
स्तु तुलापुरुषमाचरेत्॥ प्रतिलोकाधिकस्थाने प्रतिमन्वंतरं वसेत्॥७०॥ विमानेनार्कवर्णेन किंकिणीजालमा
लिना॥ पूज्यमानोप्सरोभिश्च ततो विष्णुपुरं व्रजेत्॥७१॥ कल्पकोटिशतं मात्रं तस्मिन्लोके महीयते॥ कर्मक्षया
दिह पुनर्जयिनेकु विराजराट्॥७२॥ नृपालिमौलिमणिरंजितपादपीठः श्रद्धान्वितो भवति यत्तमयोत्रवाजी॥ दी
प्रप्रतापजितसर्वमहीतलोकौ यादीप्यमानमपि पश्यति न क्रियुक्तः॥७३॥ कालांतरे स्मरती वाचयतीह लो

राम ४४६

के यो वा शृणोति पततीह समानरूपः॥ सोपि प्रमोद ज्ञातमंयुत तत्स्वरूपः प्राप्नोति धाम तु पुरंदरदेवजुष्टं॥७४॥ ॥इ
ति श्रीमत्स्यपुराणे महादानानुकीर्तने पुरुषदानमाहात्म्यं॥ ॥श्रीमत्स्य उवाच॥ ॥अथातः संप्रवक्ष्यामि महा
दानमनुत्तमं॥ नाम्ना हिरण्यगर्भाख्यं महापातकनाशनं॥१॥ पुण्यं दिनमथासाद्य तुलापुरुषदानवत्॥ ऋ
त्विग्मंडपसंभारभूषणाच्छादनानि च॥२॥ कुर्यादुपोषितस्तद्वल्लोकेशावाहनं पुनः॥ त्रिनागहीनं विस्तारमा
ज्यक्षीरानिपूजितं॥३॥ दशास्त्राणि सरत्नानि दात्वस्त्रीतथैव च॥ हेमनालं सपिटकं बहिरादित्यसंयुतं॥४॥ तथै
वाम्नरंगं नानेरूपहीं वीततुकांचनं॥ पार्श्वतः स्थापयेत्तत्र दधि मंदं डकमंडलुं॥५॥ पद्माकारं पिधानं स्यात् समं
तादिसंकुलं॥ मुक्तावलीसमोपेतं पद्मरागदलान्वितं॥६॥ तिलद्रोणे परिगतं वेदिमध्ये व्यवस्थितं॥ ततो मंगलश
घो ब्देन ब्रह्मघोषस्वरेण च॥७॥ सर्वौषध्युदकस्नातः स्नापितो द्विजपुंगवैः॥ शुक्लमाल्यांबरधरः सर्वाभरणभूषितः॥८
इममुच्चारयेन्मंत्रं गृहीतकुसुमांजलिः॥ नमो हिरण्यगर्भाय हिरण्यकवचाय च॥९॥ सप्तलोकसुराध्यक्ष जगद्धा
त्रे नमो नमः॥ भूर्लोकप्रमुखा लोकास्तव गर्भे व्यवस्थिताः॥१०॥ तस्मान्मामुद्धराशेषदुःखसंसारसागरात्॥ एव
मामंत्र्य तन्मध्यमाविश्य स्थाउदङ्मुखः॥११॥ मुष्टिभ्यां परिसंगृह्य धर्मराजचतुर्मुखौ॥ जानुमध्ये शिरः कृत्वा ति
ष्ठेदुच्छ्वासपंचकं॥१२॥ गर्भाधानं पुंसवनं सीमंतोन्नयनं तथा॥ कुर्याद्धिरण्यगर्भस्य ततस्ते द्विजपुंगवाः॥१३

म०पु०
४४९

गीतमंगलघोषेणगुरुस्थापयेत्ततः॥जातकर्मादिकाःकार्याःक्रियाःषोडशचापराः॥१४॥सूच्यादिकंचगुरवे
दत्वामंत्रमिमंजपेत्॥ओंनमोहिरण्यगर्भायविश्वगर्भायवैनमः॥१५॥चराचरस्यजगतोगृहभूतायवैनमः॥
यथाहंजनितःपूर्वंमर्त्यजन्मासुरोत्तमः॥१६॥त्वद्गर्भसंभवादेवदिव्यदेहोभवाम्यहं॥चतुर्भिःकलशैर्भूयस
ततस्तेद्विजपुंगवाः॥१७॥स्नानंकुर्युःप्रसन्नांगाःसर्वाभरणभूषिताः॥देवस्यत्वेतिमंत्रेणस्थितस्यकनकासने
१८॥अद्यजातस्यतेंगानिद्यनिक्षेप्स्यामहेवयं॥दिव्येनानेनवपुषाचिरंजीवसुखीभव॥१९॥ततोहिरण्यगर्भंतुतै भं
भ्योदद्याद्विचक्षणः॥तोहृज्यसर्वभागेनबहुभ्योवातदाज्ञया॥२०॥तत्रोपकरणंसर्वंगुरवेविनिवेदयेत्॥पादुको
पानहच्छत्रंचामरासनभाजनं॥२१॥ग्रामंवाविषयंवापियदन्यद्दयितंभवेत्॥अनेनविधिनायस्तुपुण्येहनि
निवेदयेत्॥२२॥हिरण्यगर्भदानंसब्रह्मलोकेमहीयते॥कलिकलिषविमुक्तःपूजितःसिद्धसाध्यैरमरम
लाभूज्यमानोप्सरोभिः॥पितृशतमथबंधून्पुत्रपौत्राननेकान्नपिनरकनिमग्नांस्तारयेदेकएव॥२३॥इतिपठति
यइत्थंयःशृणोतीहसम्यङ्मधुरिपुवलोकेपूज्यतेसर्वसिद्धैः॥मतिमपिवजनानांयोददातिप्रियार्थंविबुधपति
जनानांनायकःस्यादमोघः॥२४॥ ॥इतिश्रीमत्स्यपुराणेमहादानानुकीर्तनेहिरण्यगर्भप्रदानिकोनाम॥ ॥मत्स्यउ राम
वाच॥ अथातःसंप्रवक्ष्यामिब्रह्मांडविधिमुत्तमं॥यच्छ्रेष्ठंसर्वदानानांमहापातकनाशनं॥१॥पुण्यंदिनमथासा ४४९

द्यतुलापुरुषदानवत्॥ऋत्विग्मंडपसंभारभूषणाच्छादनादिकं॥२॥लोकेशावाहनंतद्वत्अधिवासनकंतथा
कुर्याद्विंशपलादूर्ध्वंआसहस्राच्चशक्तितः॥३॥कलशद्वयसंयुक्तंब्रह्मांडकांडमंबुधः॥दिग्गजाष्टकसंयुक्तं
षड्वेदांगसमन्वितं॥४॥वितस्तिरंगुलिशतंयावदायामविस्तरं॥कौशेयवस्त्रसंवीतंतिलद्रोणेपरिन्यसेत्॥५॥त
थाष्टादशधान्यानिसमंतात्परिकल्पयेत्॥पूर्वेणानंतशयनंप्रद्युम्नंपूर्वदक्षिणे॥६॥प्रकृतिंदक्षिणेदेशेसंकर्षणम
तःपरं॥अपिमुत्तरतोहैमंवासुदेवमतःपरं॥७॥समंतात्गुरुपीतस्थानचीयत्कांचनंबुधः॥स्थापयेद्वस्त्रसंवीतान्
पूर्णकुंभान्दशैवतु॥८॥दशैवतुनवोदेयाःसहेमांबरदोहनाः॥पादुकोपानहच्छत्रचामरासनदर्पणैः॥९॥भक्ष
भोजनदीपेक्षुफलमाल्यानुलेपनैः॥होमाधिवासनांतेचस्नापितोवेदपुंगवैः॥१०॥इममुच्चारयेन्मंत्रंत्रिःकृत्वाथप्र
दक्षिणं॥नमोस्तुविश्वेश्वरविश्वधामविश्वेश्वराधारजगत्सवित्रे॥सप्तास्वलोकामरभूतलेशगर्भेणसार्द्धंवितराभि
रक्षां॥११॥येदुःखितास्तेसुखिनोभवंतुप्रयांतुपापानिचराचराणां॥त्वद्दानशस्त्राहतपातकानांब्रह्मांडदेश
प्रलयंव्रजंतु॥१२॥एवंप्रणम्यामरविश्वगर्भंदद्यात्द्विजेभ्योदशधाविभज्य॥भागद्वयंतत्रगुरोःप्रकल्प्यसमंभजेच्छे
षमतःक्रमेण॥१३॥स्वल्पेचहोमंगुरुरेकएवकुर्यादथैकाग्निविधानयुक्त्या॥सएवसंपूज्यतमोल्पवित्तैर्यथोक्तव
स्त्राभरणादिकेन॥इत्थंतुपश्यदखिलंपुरुषोत्रकुर्यात्ब्रह्मांडदानमधिगम्यमहर्द्धिदानं॥संतारयेत्पितृपिताम

हपुत्रपौत्रबंधुप्रियातिथिकलत्रशता एकंस ॥ १४ ॥ ब्रह्मांडदानशाकलीकृतपादयोघमानंदयेत्स्वजननीकुलमप्यशे
षं ॥ इतिपठतिशृणोतिवायदिव्यंसुरभवनेषुगृहेषुधर्मिणां ॥ मतिमपिचददातिमोदतेसवेषरपातर्जवतेसहाप्सरो
भिः ॥ १६ ॥ ॥ इतिपुमत्स्यपुराणेब्रह्मांडप्रधानिको नाम ॥ श्रीमत्स्यउवाच ॥ ॥ कल्पपादपदानाख्यमतःपरमनुत्तमं
महानंदप्रवक्ष्यामिसर्वपातकनाशनं ॥ १ ॥ पुण्यंदिनमथासाद्यतुलापुरुषदानवत् ॥ पुण्याहवाचनंकृत्वा लोके
शावाहनंबुधः ॥ २ ॥ ऋत्विग्मंडपसंभारभूषणाच्छादनादिकं ॥ कांचनान्कारयेद्वृक्षान्नानाफलसमन्वितान् ॥
३ ॥ नानाविधानिवस्त्राणिभूषणानिचकारयेत् ॥ शक्तितस्त्रिपलादूर्ध्वमासहस्रात्प्रकल्पयेत् ॥ ४ ॥ अर्द्धकृप्तसुव
र्णस्यकारयेत्कल्पपादपं ॥ गुडप्रस्थोपरिस्थाप्यसितवस्त्रयुगावृतं ॥ ५ ॥ ब्रह्मविष्णुशिवोपेतंपंचशाखंसभास्करं ॥
कामदेवमधस्ताच्चसकलत्रंप्रकल्पयेत् ॥ ६ ॥ संतानंपूर्वतस्तद्वत्कापश्चात्लवणोपरि ॥ संतानंवत्तत्तुरीयां
शेनकल्पयेत् ॥ ७ ॥ मंदारंदक्षिणेपार्श्वेश्रियासार्द्धंघृतोपरि ॥ पश्चिमेपारिभद्रंतुसावित्र्यासहजीरके ॥ ८ ॥ सुर
भीसंयुतंतद्वत्तिलेषुहरिचंदनं ॥ तुरीयांशेनकुर्वीतसौम्येनफलसंयुतं ॥ ९ ॥ कौशेयवस्त्रसंयुक्तानिजमाल्य
फलान्वितान् ॥ तथाष्टौपूर्णकलशान्पादुकासनभाजनं ॥ १० ॥ दीपकोपानहछत्रचामरासनसंयुतं ॥ फलमा
ल्यायुतंतद्वत्उपरिष्टाद्वितानकं ॥ ११ ॥ तथाष्टादशधान्यानिसमंतात्परिकल्पयेत् ॥ होमाधिवास

नांतेचस्नापितोविप्रपुंगवैः ॥ १२ ॥ त्रिःप्रदक्षिणमावृत्त्यमंत्रमेतदुदीरयेत् ॥ नमस्तेकल्पवृक्षायचिंतितार्थप्र
दायिने ॥ १३ ॥ विश्वंभरायदेवायनमस्तेविश्वमूर्त्तये ॥ यस्मात्त्वमेवविश्वात्माब्रह्मास्थाणुर्दिवाकरः ॥ १४ ॥ मूर्त्तामू
र्त्तपरंबीजमतःपाहिसनातन ॥ त्वमेवधार्यतेसर्वंत्वमतःपुरुषोव्ययः ॥ १५ ॥ संतानाद्यैरुपेतःसन्पाहिसं
सारसागरात् ॥ एवमामंत्र्यतंदद्यात्गुरवेकल्पपादपं ॥ १६ ॥ चतुर्भ्यश्चापिऋत्विग्भ्यःसंतानादीन्प्रकल्पयेत् ॥
स्वल्पेत्वेकाग्निवःकुर्यात्गुरुमेवाभिपूजयेत् ॥ १७ ॥ नवित्तशाठ्यंकुर्वीतनचविस्मयवान्भवेत् ॥ अप्सरोभिःप
रीवृतःसिद्धचारणकिंनरैः ॥ १८ ॥ भूतान्भाव्यांश्चमनुजांस्तारयेद्रोमसंमितान् ॥ स्तूयमानादिवःपृष्ठेपुत्रपौ
त्रप्रपौत्रकैः ॥ १९ ॥ विमानेनार्कवर्णेनविष्णुलोकंसगच्छति ॥ दिविकल्पशतंतिष्ठेत्भोजराजोभवेत्ततः ॥ २० ॥ ना
रायणबलोपेतोनारायणपरायणः ॥ नारायणकथासक्तोनारायणपुरंवसेत् ॥ २१ ॥ योवापठेत्कल्पतरुप्रदा
नंयोवाशृणोतिपुरुषोल्पधनःलः ॥ सोपीन्द्रलोकंवसतेसुरोभिरन्वितरंभापविमुक्तदेहः ॥ २२ ॥ ॥ इतिश्रीमत्स्यपु
राणेकल्पपादपदानं ॥ ॥ श्रीमत्स्यउवाच ॥ ॥ अथातःसंप्रवक्ष्यामिमहादानमनुत्तमं ॥ गोसहस्रप्रदानाख्यंसर्वपा
पहरंशुभं ॥ १ ॥ पुण्यांतिथिमथासाद्ययुगमन्वंतरादिकां ॥ पयोव्रतस्त्रिरात्रंस्यादेकरात्रमथापिवा ॥ २ ॥ लोकेशावा
हनंकृत्वातुलापुरुषदानवत् ॥ पुण्याहवाचनंकृत्वाहोमंकुर्यात्तथैवच ॥ ३ ॥ ऋत्विग्मंडपसंभारभूषणाच्छादना

म०पु०
४५१

दिकं॥ वृषं लवणसंयुक्तं वेदिमध्येधिवासयेत्॥४॥ गोसहस्राद्विशिष्टं तत्सर्वां दशकमेव च॥ गोसहस्रं बहिः कुर्या
त्वस्त्रमाल्यविलेपितं॥५॥ सुवर्णशृंगाभरणं रूप्यखुरसमन्वितं॥ अथ तः प्रवेशयेद्दशकं वस्त्रमाल्यैः प्रपूजये
त्॥६॥ सुवर्णघंटिकायुक्तं ताम्रदोहनिकान्वितं॥ सुवर्णतिलकोपेतं हेमपट्टैः स्वलंकृतं॥७॥ कौशेयवस्त्रसंवी
तं माल्यगंधैर्विलिपितं॥ हेमरत्नमयैः शृंगैश्चामरैरुपशोभितं॥८॥ पादुकोपानहच्छत्रभाजनासनसंयुतं॥ गवां र
शकमध्ये स्यात्कांचनो नंदिकेश्वरः॥९॥ कौशेयवस्त्रसंवीतो नानाभरणभूषितः॥ लवणद्रोणशिखरे माल्येक्षु
फलसंयुतः॥१०॥ कुर्यात्पलशतादूर्ध्वं सर्वमेतदशेषतः॥ शक्तितः पलसाहस्रत्रितयं यावदेव तु॥११॥ पुण्यका
लं समासाद्य गीतमंगलनिःस्वनैः॥ सर्वौषध्युदकस्नानं कारितो वेदपारगैः॥१२॥ इममुच्चारयेन्मंत्रं गृहीतकुसु
मांजलिः॥ नमो वो विश्वमूर्तिभ्यो विश्वमातृभ्य एव च॥१३॥ लोकाधिवासिनीभ्यश्च रोहिणीभ्यो नमो नमः॥ गवामंगे
षु तिष्ठंति भुवनान्येकविंशतिः॥१४॥ ब्रह्मादयस्तथा देवा रोहिण्यः पांतु मातरः॥ गावो ममाग्रतः संतु गावो मे सं
तु पृष्ठतः॥१५॥ गावः शिरसि मे संतु गवां मध्ये वसाम्यहं॥ यस्मात्त्वं वृषरूपेण धर्म एव सनातनः॥१६॥ अष्टमूर्तेर
धिष्ठानमतः पाहि सनातन॥ इत्यामंत्र्य ततो दद्यात्गुरवे नंदिकेश्वरं॥१७॥ सर्वोपस्करणोपेतं गोयुगं च विचक्ष
णः॥ ऋत्विग्भ्यो धेनुमेकैकां दशकाद्विनिवेदयेत्॥१८॥ गवां शतमथैकैकं तदर्धं वाथ विंशतिः॥ दश पंच वाथ वाद

राम०
४५१

द्यादन्येभ्यस्तदनुज्ञया॥१९॥ नैतद्बहुभ्यो दातव्यमायतो दोषकरी भवेत्॥ बह्वीश्चैकस्य दातव्या धीमदारोग्यवृद्धये॥२०
पयोव्रतस्तिष्ठेत एकं गोसहस्रदः॥ श्रावयेत्शृणुयाद्वापि महादानानुकीर्त्तनं॥२१॥ तद्दिने ब्रह्मचारी स्याद्यदि
छेदिपुलां श्रियं॥ अनेन विधिना यस्तु गोसहस्रप्रदो भवेत्॥२२॥ सर्वपापविनिर्मुक्तः सिद्धचारणसेवितः॥ विमा
नेनार्कवर्णेन किंकिणीजालमालिना॥२३॥ सर्वेषां लोकपालानां लोके संपूज्यते नरैः॥ प्रतिमन्वंतरं तिष्ठेत् पुत्र
पौत्रसन्वितः॥२४॥ यावत्कल्पशतं साग्रं राजराजो भवेन्नतः॥ अश्वमेधशतं कुर्याच्छिवध्यानपरायणः॥२५॥
वैष्णवं लोकमासाद्य ततो मुच्येत बंधनात्॥ पितरश्चास्य नंदंति गोसहस्रफलप्रदं॥२६॥ अपि स्यात्स कुलेस्माकं
पुत्रो दौहित्र एव च॥ गोसहस्रप्रदो भूत्वा नरकादुद्धरिष्यति॥२७॥ इति पठति य एतत् गोसहस्रप्रदानं हरि
भुवनमुपेयात्सस्मरेद्वाथ पश्येत्॥ अनुभवति मुदं वा यः समाने स कामं प्रहतिकलुषदेहः सोपि याती प्रलोकं॥
२८॥ ॥इति श्रीमत्स्यपुराणे गोसहस्रप्रदानिकं नाम॥ ॥मत्स्य उवाच॥ ॥अथातः शृणु भूपाल कामधेनुमतः परं॥
---- सर्वकामफलान्हंणां महापातकनाशिनीं॥१॥ लोकेशावाहनं तद्वदधिवासनं॥ तुलापुरुषवत् कुर्यात्कुंडमंडपवे
दिकां॥२॥ अल्पेप्येकाग्निवत् कुर्यात्गुरुरेव समाहितः॥ कांचनस्य विशुद्धस्य धेनुं वत्सं च कारयेत्॥३॥ वेद्यां कृ
ष्णाजिनं न्यस्य गुडप्रस्थसमन्वितां॥ न्यसेदुपरि तां धेनुं महारत्नैरलंकृतं॥४॥ तथा पाशदश धान्यानि समंतात्स

रिकल्पयेत्॥इक्षुदंडाष्टकं तद्वत् नानाफलविभूषितं॥५॥भोजनं चासनं तद्वत्ताम्रदोहनिकां तथा॥कौशेयवस्त्रद्वयसं
प्रयुक्तां दीपातपत्राभरणाभिरामां॥सचामराकुंडलिनीं सघण्टां सुवर्णशृंगीं परिकल्प्य पादं॥६॥रसैश्च सर्वैः परि
तोपि जुष्टां दरिद्रया पुष्पफलैरनेकैः॥अजाजिकस्तुंबुरशर्कराभिर्वितानकं चोपरि पंचवर्णं॥७॥स्नातस्ततो मंगल
घोषशब्दैः प्रदक्षिणीकृत्य सपुष्पहस्तः॥आवाहयेत्तां गुरुणोक्तमंत्रैर्द्विजाय दद्यादथ दर्भपाणिः॥८॥त्वं सर्व
देवगणमंदरसर्वभूता विश्वेश्वरी त्रिपथमाप्यधिपर्वतानां॥त्वद्दानकेनमकलीकृतपातकौघः प्राप्तोस्मि नि
र्वृतिमतीव ततो नमामि॥९॥लोके यथेप्सितफलार्थविधायिनीनामासाद्य कोहि भवदुःखमुपैति मर्त्यः॥सं
सारदुःखशमनाय ततः स्वकामं त्वामद्य वमति देवगणा वदंति॥प्राप्नोति धाम स पुरंदरदेवजुष्टं कन्यागणैः
परिवृतः परमिंदुमौले॥१०॥इति श्रीमत्स्यपुराणे महादानानुकीर्तनिकामधेनुप्रदानिकं नाम॥ ॥मत्स्य
उवाच॥ ॥अथातः संप्रवक्ष्यामि हिरण्याश्वविधिं परं॥यस्य प्रदानात्पुरुषआनंत्यं फलमश्नुते॥१॥पुण्यां
तिथिमथासाद्य नत्वा ब्राह्मणवाचनं॥लोकेशावाहनं कुर्यात्तुलापुरुषदानवत्॥२॥ऋत्विग्मंडपसंभारभूषणा राम
छादनादिकं॥स्वल्पेप्येकाग्निवत्कुर्याद्धैमवाजिमखं बुधः॥३॥स्थापयेद्वेदिमध्ये तु कृष्णाजिनतिलोपरि॥कौ ४५२
शेयवस्त्रसंवीतं कारयेद्धैमवाजिनं॥४॥शक्तितस्त्रिपलादूर्ध्वमासहस्रपलाद्धया॥पादुकोपानहच्छत्रचामरा

सनभाजनैः॥५॥पूर्णकुंभाष्टकोपेतं माल्येक्षुफलसंयुतं॥शय्यां सोपस्करां तद्वद्धैममार्तंडसंयुतां॥६॥ततः सर्वौ
षधिस्नातः स्नापितो द्विजपुंगवैः॥इममुच्चारयेन्मंत्रं गृहीतकुसुमांजलिः॥७॥नमस्ते सर्वदेवेश वेदाहरण
लंपट॥वाजिरूपेण मामस्मात्पाहि संसारसागरात्॥८॥त्वमेव सप्तधा कृत्वा छंदोरूपेण भास्करं॥यस्मा
त्त्वमसे ये लोकानतः पाहि सनातन॥९॥एवमुच्चार्य गुरवे तमश्वं विनिवेदयेत्॥दत्वा पापक्षयात्स्नातो लोकममे
तिगणाश्वतं॥१०॥गोभिर्विभवतः सर्वानृत्विजश्चापि पूजयेत्॥सर्वं तथोपकरणं गुरवे विनिवेदयेत्॥११॥सर्वंधान्या
दिकं दत्वा भुंजीनातैलमेव च॥पुराणश्रवणं तद्वत्कारयेद्भोजनादनु॥१२॥इमं हिरण्याश्वविधिं करोति सं हृत्य
मानो दिवि देवसंघैः॥विमुक्तपापः स पदं मुरारेः प्राप्नोति सिद्धैरभिपूजितः सन्॥१३॥इति पठति य एतद्धैमवा
जिप्रदानं सकलकलुषमुक्तः सोश्वमेधेन युक्तः॥कनकमयविमानो नाकलोकं प्रयाति त्रिदशपतिवधूभिः पू
ज्यते योथ पश्येत्॥१४॥यो वा शृणोति पुरुषोल्पधनः स्वकाले हैमाश्वदानमभिनंदति चेह लोके॥सोपि प्र
याति कलिकल्मुषमुक्तदेहः स्थानं पुरंदरमहेश्वरदेवजुष्टं॥१५॥ ॥इति श्रीमत्स्यपुराणे महादानानुकीर्त
ने हिरण्याश्वप्रदानो नाम॥ ॥अथातः संप्रवक्ष्यामि महादानमनुत्तमं॥पुण्यमश्वरथं नाम महापातकनाशनं॥
१॥पुण्यं दिनमथासाद्य कृत्वा ब्राह्मणवाचनं॥लोकेशावाहनं कुर्यात्तुलापुरुषदानवत्॥२॥ऋत्विग्मं

म०पु० ४५२

उपसंभारभूषणाच्छादनादिकं॥कृष्णाजिनेतिलानकृत्वा कांचनंकारयेद्रथं॥३॥सप्ताश्वंचतुरश्वंवाश्वत्थसज्जंच
कूबरं॥ऐंद्रनीलेनरत्नेनध्वजरूपेणसंयुतं॥४॥लोकपालाष्टकोपेतंपद्मरागदलान्वितं॥चत्वारःपूर्ण
कलशाधान्यान्यष्टादशैवतु॥५॥कौशेयवस्त्रसंयुक्तमुपरिष्टाद्वितानकं॥माल्येक्षुफलसंयुक्तंपुरुषेण
समन्वितं॥६॥योपरक्तःपुमान्कुर्यात्तन्नाम्नाधिवासनं॥छत्रचामरकौशेयवस्त्रोपानहसंयुतं॥७॥गो
भिर्विभवतःसार्द्धंदद्याच्छयनासनं॥कुर्यात्त्रिविफलातद्धर्धंशक्तितःकारयेद्धुवं॥८॥अश्वाष्टकेनसंयुक्तं
चतुर्भिरथवाजिभिः॥धाम्यामथयुतंदद्यात्हेमसिंहध्वजान्वितं॥९॥चक्ररक्षावुभौतस्यतुरगस्थावरान्वि
तौ॥पुण्यकालंतथाप्राप्यपूर्ववत्स्थापितोद्विजेः॥१०॥त्रिःप्रदक्षिणमावृत्यगृहीतकुसुमांजलिः॥स्र
क्माल्यांबरधरःइमंमंत्रमुदीरयेत्॥११॥नमोनमःपापविनाशनायविश्वात्मनेवेदतरंगमाय॥धाम्ना
मधीशायभवायपापौघदावानलदेहिशांतिं॥१२॥वस्वष्टकादित्यमरुद्गणानांत्वमेवधातापरमं
निधानं॥यतस्ततोमेहृदयंप्रपातुधर्मैकतानत्वमघौघनाशात्॥१३॥इतितुरगरथप्रदानमेतद्भवभय
सूदनमत्रयःकरोति॥एकल्मषपटलैर्विमुक्तदेहःपरममुपैतिपदंपिनाकपाणेः॥१४॥देदीप्यमानवपुषाविजि
तप्रभावमाक्रम्यमंडलमखंडलभानो॥सिद्धांगनानयनषट्पदपीयमानवक्त्रांबुजोंबुजभवेनचिरंसहास्ते॥ राम: ४५३

१५॥इतिपठतिशृणोतियोथवापश्येत्ततुरगरथसमहाप्रदानमस्मिन्॥नसनरकपुरंव्रजेत्कदाचित्नरकरि
पोर्भवनंप्रयातिभूयः॥१६॥॥इतिश्रीमत्स्यपुराणेहिरण्याश्वरथप्रदानिकोनाम॥॥श्रीमत्स्यउवाच॥॥
अथातःसंप्रवक्ष्यामिहेमहस्तिरथंशुभं॥यस्यप्रदानात्भवनंवैष्णवंप्राप्यतेनरैः॥१॥पुण्यांतिथिमथासा
द्यतुलापुरुषदानवत्॥विप्रवासनकंकुर्यात्लोकेशावाहनंबुधः॥२॥ऋत्विग्मंडपसंभारभूषणाच्छादनानि
च॥अत्राप्युपोषितस्तद्वत्ब्राह्मणैःसहशोभनं॥३॥कुर्यात्पुष्परथाकारंकांचनंमणिभूषितं॥वलभीभिर्विचि
त्राभिश्चक्रतुसमन्वितं॥४॥लोकपालाष्टकोपेतंलक्ष्मीपुष्टिसमन्वितं॥कृष्णाजिनतिलद्रोणंकृत्वासंस्थाप
येद्रथं॥५॥तथाष्टादशधान्यानिभाजनासनचंदनैः॥दीपकोपानहच्छत्रपादुकादर्पणान्वितं॥६॥ध्वजेगरु
डंकुर्यात्कूबराग्रेविनायकं॥नानाफलसमायुक्तंउपरिष्टेतवितानकं॥७॥कौशेयंपंचवर्णंचअम्लानकुसु
मान्वितं॥चतुर्भिःकलशैःसार्द्धंगोभिरष्टभिरन्वितं॥८॥चतुर्भिर्हेममातंगैर्मुक्तादामविभूषितैः॥स्वरूपत
करीभिश्चयुक्तंफलानिवेदयेत्॥९॥नमोनमःशंकरपद्मजार्कलोकेशविद्याधरवासुदेवैः॥त्वंसेव्यसेवेदपु
राणयज्ञेतेजोमयस्यंदनमाक्ररस्मात्॥१०॥यत्त्वत्पदंपरमगुह्यतमंमुरारिरानंदहेतुगुणरूपविमुक्तवंतः॥
योगैकतानमनसोःसहसाःसमाधौपश्यंतितंत्वमधिनाथरथोधिरूढः॥११॥यस्मात्त्वमेवभवसागरसंप्लुता

म०पु०
४५४

नांआनंदधरणानपात्रं॥तस्मादघौघशमनेनकुरुप्रसादंचामीकरेभरथमाधवसंप्रदानात्॥१२॥इत्थंप्रणम्यकन
केभरथप्रदानंयःकारयेत्सकलपापविमुक्तदेहः॥विद्याधरामरमुनींद्रगणाभिजुष्टंप्राप्नोत्यसौपदमनुत्तममिंद
मौलेः॥१३॥कृतदुरितवितानप्रज्वलद्वह्निजालव्यतिकरकृतदाहोद्वेगभाजोपिबंधून्॥नयतिचपितृपुत्रोवाद
प्यशेषान्कृतरथदानःशाम्भुतंसत्यविष्णोः॥१४॥इतिश्रीमत्स्यपुराणेहेमहस्तिरथदानंनाम॥॥मत्स्यउवा
च॥अथातःसंप्रवक्ष्यामिमहादानमनुत्तमं॥पंचलांगलकंनाममहापातकनाशनं॥१॥पुण्यांतिथिमथा
साद्ययुगादिग्रहणादिकं॥भूमिदानेनरोदद्यात्पंचलांगलिकन्वितं॥२॥कर्वटंखेटकंचापिग्रामंवासस्य
शालिनं॥निवर्त्तनशतंवापितदर्द्धंवापिशक्तितः॥३॥सारदारुमयान्कृत्वाहलानिपंचसुव्रतं॥सर्वोपस्क
रयुक्तानितथान्यानिचकांचनानिच॥४॥वृषलक्षणसंयुक्तान्दशैवतुधुरंधरान्॥सुवर्णशृंगाभरणान्मु
क्तालांगूलभूषणान्॥५॥रूप्यपादाग्रतिलकान्मुक्ताकौशेयभूषितान्॥स्रग्दामचंदनयुतान्शालायाम
धिवासयेत्॥६॥पर्जन्यादित्यरुद्रेभ्यःपायसंनिर्वपेत्चरुं॥एकस्मिन्नेवचक्रंतुगुरुर्वाग्मीनिवेदयेत्॥७॥पाला
शसमिधस्तद्वत्आज्यंकृष्णतिलांस्तथा॥तुलापुरुषवत्कुर्यात्लोकेशावाहनंबुधः॥८॥ततोमंगलदद्दौदंनः राम०
स्रक्माल्यांबुधः॥आरुहद्विजपदंपद्मंहेमरत्नांगुलीयकं॥९॥कौशेयवस्त्रकटकेर्मणिभिःपरिभूषयेत्॥श ४५८

य्यांसोपस्करांतद्वत्धेनुमेकांपयस्विनीं॥१०॥तथाष्टादशधान्यानिसमंतादधिवासयेत्॥ततःप्रदक्षिणीकृत्यग्र
हीतकुसुमांजलिः॥११॥इममुच्चारयेन्मंत्रमथसर्वंनिवेदयेत्॥सप्तदेवगणाःसर्वेस्थावराणिचराणिच॥१२॥
धुरंधरामेतिष्ठंतुतस्माद्भक्तिःशिवेस्तुमे॥यस्माच्चापिप्रदानस्यकलांनार्हंतिषोडशीं॥१३॥दानान्यन्यानि
मेभक्तिर्धर्मएषोवृषोभवेत्॥दंडेनसप्तहस्तेनत्रिंशद्दंडानिवर्तनं॥१४॥त्रिभागहीनंगोवर्यममाहप्रजाप
तिः॥मानेनानेनयोदद्यात्तवर्त्तनंबुधः॥१५॥विधीमानेनस्वाश्वक्षीपतेपापसंहतिः॥तदर्द्धमथवादद्यात्अ
पिगोचर्ममात्रकं॥१६॥भुवस्थानमात्रेचसोपिपापैःप्रमुच्यते॥यावंतिलांगलमुखायमखानिभूमेर्भासांपति
र्दुहितुरंग्वरोमकाणि॥तावंतिशंकरपुरेसमाहितःस्यात्भूमिप्रदानमिहयःकुरुतेमनुष्यः॥१७॥गंधर्वकिं
नरसुरासुरसिद्धसंघैराधूतचामरमुपेत्यमहद्विमानं॥संपूज्यतेपितृपितामहबंधुयुक्तःशंभोःपरंव्रजतिचाम
रनायकःसन्॥१८॥इंद्रत्वमप्यधिगतंयक्षमभ्युपैतिभूमिलांगलधुरंधरसंप्रदानात्॥तस्मात्पवापटक्षका
रिभूमेर्दानंविधेयमतिभूतिभूमिजवाय॥१९॥इतिश्रीमत्स्यपुराणेपंचलांगलप्रदानिकंनाम॥श्रीमत्स्यउवाच॥
अथातःसंप्रवक्ष्यामिधरादानमनुत्तमं॥पापक्षयकरंनृणाममंगल्यविनाशनं॥१॥कारयेत्पृथिवींहैमींजंबू
द्वीपानुकारिणीं॥मर्यादापर्वतवतींमध्येमेरुसमन्वितां॥२॥लोकपालाष्टकोपेतांनववर्षसमन्वितां॥नदीनद

म॰पु॰ स्रतोपेतां अंतःसाररवेष्टितां ॥३॥ नहारनसमकीर्णविसुरुक्मार्कसंयुता ॥ हेम्नःपालसहस्रेण तदर्द्धेनाथवा
४५५ क्रितः ॥४॥ शततत्रयेण वा कुर्यात् द्विशतेन शतेन शतेन च ॥ कुर्यात्पंचपलादूर्ध्वं अशक्तोपि विचक्षणः ॥५॥ तुला
पुरुषवत्कुर्यात्तिलो केशावाहनं बुधः ॥ ऋत्विग्मंडपसंभारभूषणाछादनादिकं ॥६॥ वेद्यां कृष्णाजिने कृत्वा
तिलस्योपरि विन्यसेत् ॥ तथाष्टादशधान्यानि रसांश्च लवणानि च ॥७॥ तथाष्टौ पूर्णकलशान् समंतात् परि
कल्पयेत् ॥ वितानकं तु कौशेयं फलानि विविधानि च ॥८॥ तथांशुकानि रम्याणि श्रीपर्णशकलानि च ॥ पुण्य
इत्येवं रचयित्वा तामधिवासनपूर्वकं ॥९॥ शुक्लमाल्यांबरधरः शुक्लाभरणभूषितः ॥ प्रदक्षिणां ततः कुर्यात्
गृहीतकुसुमांजलिः ॥१०॥ पुण्यकालं तमासाद्य मंत्रानेतानुदीरयेत् ॥ नमस्ते सर्वदेवानां भूमिलं भवनं यतः
१२॥ धात्री च सर्वभूतानां अतः पाहि वसुंधरे ॥ वसु धरयते यस्मात् त्सुचाति निर्मलं वसु ॥१२॥ वसुंधरा ततो जा
ता तस्मात्पाहि भयादलं ॥ चतुर्मुखोपि नो गछेत् यस्मादंतं तवाचये ॥१३॥ अनंताय नमस्तस्मात्पाहि संसार
सागरात् ॥ त्वाप लक्ष्मी गोविंदे शिवे गौरीति संस्थितः ॥१४॥ गायत्री ब्रह्मणः पार्श्वे ज्योत्स्ना चंद्रे रवौ प्रभा ॥ बुद्धि
बृहस्पतौ ख्याता इंद्राणी त्वं शतक्रतौ ॥१५॥ विश्वं व्याप्य स्थिता यस्मात् तस्माद्विश्वंभरा स्मृता ॥ धृतिः क्षांतिः राम ४५५
क्षमा क्षोणी पृथ्वी वसुमती च सा ॥१६॥ एताभिर्मूर्तिभिः पाहि देवि संसारसागरात् ॥ एवमुच्चार्य तां देवीं ब्राह्म

णेभ्यो निवेदयेत् ॥१७॥ धरार्द्धं वा चतुर्भागं गुरवे प्रतिपादयेत् ॥ शेषं चैवाथ ऋत्विग्भ्यः प्रणिपत्य विसर्जयेत् ॥
१८॥ अनेन विधिना यस्तु दद्यात् देवीं धरां बुधः ॥ पुण्यकाले तु संप्राप्ते स पदं याति वैष्णवं ॥१९॥ विमानेनार्क
वर्णेन किंकिणीजालमालिना ॥ नारायणपुरं गत्वा कल्पत्रयमथावसेत् ॥२०॥ पितृपौत्रप्रपौत्रांश्च तारये
देकविंशतिं ॥ इति पठति य इत्थं यः शृणोति प्रसंगात् अपिकलुषविताने मुक्तसंगः समंतात् ॥ दिवमुपरवधू
भिर्याति संप्रार्थ्यमानः पुरममरसहस्रैरर्चितश्चंद्रमौलेः ॥२१॥ ॥ इति श्रीमत्स्यपुराणे पृथ्वीदानं नाम ॥
श्रीमत्स्य उवाच ॥ ॥ अथातः संप्रवक्ष्यामि महादानमनुत्तमं ॥ विश्वचक्रमिति ख्यातं सर्वपातकनाशनं ॥१॥
तपनीयस्य शुद्धस्य विशुवादिषु कारयेत् ॥ ज्येष्ठं पलसहस्रेण तदर्द्धेन तु मध्यमं ॥२॥ तदर्द्धेन कनिष्ठं स्यात् त्रि
स्य चक्रमुदाहृतं ॥ अन्यद्विंशपलादूर्ध्वं अशक्तोपि निवेदयेत् ॥३॥ षोडशारं ततश्चक्रं च मतेस्त्वष्ट
कावृतं ॥ नाभिमध्ये स्थितं विष्णुं योगारूढं चतुर्भुजं ॥४॥ शंखचक्रे स्य पार्श्वे दिव्याष्टकसमावृतं ॥ द्विती
यावरणे तद्वत्पूर्वतो जलशायिनं ॥५॥ अत्रिर्भृगुर्वसिष्ठश्च ब्रह्मा कश्यप एव च ॥ मत्स्यकूर्मो वरा
हश्च नरसिंहोथ वामनः ॥ रामो रामश्च कृष्णश्च बुधः कल्की च ते दश ॥ तृतीयावरणे गौरी मातृभि
र्वसुभिर्युता ॥७॥ चतुर्थे द्वादशादित्या वेदाश्चत्वार एव च ॥ पंचमे च पंचभूतानि रुद्रा एकादशे

म०पु०
४५६

वतु॥८॥ लोकपालाष्टकं पश्चेद्दिग्मातंगास्तथैव च॥ सप्त मेरूणि सर्वाणि मंगल्यानि चकारयेत्॥९॥ अंतरात
रेतो देवात् विन्यसेदष्टमे पुनः॥ तुलापुरुषवत्शेषं समंतात्परिकल्पयेत्॥१०॥ ऋत्विग्मंडपसंभारभूषणाछा
दनादिकं॥ विश्वचक्रं ततः कुर्यात् कृष्णाजिनतिलोपरि॥११॥ तथाष्टादश धान्यानि रसांश्च लवणादिकान्।
पूर्णकुंभाष्टकं चैव वस्त्राणि विविधानि च॥१२॥ शाल्मीक्षुफलरत्नानि वितानं चापि कारयेत्॥ ततो मंगलशब्दे
न स्नातः शुक्लांबरो गृही॥१३॥ होमाधिवासनांते तु गृहीतकुसुमांजलिः॥ इममुच्चारयेन्मंत्रं त्रिः कृत्वा तु प्र
दक्षिणं॥१४॥ नमो विश्वमयायेति विश्वचक्रात्मने नमः॥ परमानंदरूपित्वं पाहि संसारसागरात्॥१५॥ तेजो
मयमिदं यस्मात्सदा पश्यंति योगिनः॥ हृदि तत्त्वगुणातीतं विश्वचक्रं नमाम्यहं॥१६॥ वासुदेवे स्थितं चक्रं च
क्रमध्ये तु माधवः॥ अन्योन्याधाररूपेण प्रमाभिः स्थिताविह॥१७॥ विश्वचक्रमिदं यस्मात् सर्वपापहरं परं॥
आयुधं चाधिवासश्च तनायुध्वरमामिव॥१८॥ इत्यामंत्र्य च यो दद्यात् विश्वचक्रं विमत्सरः॥ विमुक्तः सर्वपापे
भ्यो विष्णुलोके महीयते॥१९॥ वैकुंठलोकमासाद्य चतुर्बाहुः सनातनः॥ सेव्यते अप्सरसां संघैस्तिष्ठेत्कल्पशतत
त्रयं॥२०॥ प्रणामं चापि यः कुर्याद्विश्वचक्रं दिने दिने॥ तस्यायुर्वर्द्धते नित्यं लक्ष्मीश्च विपुला भवेत्॥२१॥ ॥इ
तिकलजन्मान्तराधिवासवितरतिपल्लपनीयषोडशारं॥ हरिभवजगतः ससिद्धसुरेशसुनमधिगम्य नमस्

रा.
४५

तेशिरोभिः॥२२॥ असिदर्शनतां भयातिशक्रोर्मदनसुदर्शनितां चकामिनीनां॥ सुदर्शनिवेशवानुरूपः क
नकसुदर्शनिदामदग्धपापः॥२३॥ कृतयुरुदुरितानि षोडशाः प्रवरसुदर्शनिदानतो नस्थैरे॥ संबुभ्रजेंद्र
रारि धामभित्वा नवमतितो भयानिभूय॥२४॥ इति श्रीमत्स्यपुराणे महादानानुकीर्तने विश्वचक्रप्रदानि
कं नाम॥॥ श्रीमत्स्य उवाच॥ अथातः संप्रवक्ष्यामि महादानमनुत्तमं॥ महाकल्पलतां नाम महापातकना
शनं॥१॥ पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाचनं॥ ऋत्विग्मंडपसंभारभूषणाछादनादिकं॥२ तुला
पुरुषवत्कुर्यात् लोकेशावाहनं बुधः॥ चामीकरमयीः कुर्यात् दशकल्पलताः शुभाः॥३॥ नानापुष्पफ
लोपेता नानांशुकविभूषिताः॥ विद्याधरसुवर्णानां मिथुनैरुपशोभिताः॥४॥ हारादिभिः शुभैः शुभैः फ
लानि च विहंगमैः॥ लोकपालानुसारिण्यः कर्तव्यास्तासु देवताः॥५॥ ब्रह्माणं च ततः शाकिंलवणस्योपरि
न्यसेत्॥ अधस्तात्तयामध्ये पद्मशंखरसेभमे॥६॥ इंद्रनामनस्था तु युजे पूर्वतः कुलिशायुधाः॥ रजनीसं
स्थिताग्नेयी श्रुचपाणिरघ्यातले॥७॥ याम्येन महिषारूढा गदिनि तंडुलोपरि॥ घृते तु नैर्ऋती न्यास्यासरव
ड्गादक्षिणे करे॥८॥ वारुण्यां वारुणी क्षीरे झषस्था नागवासिनी॥ पताकिनी च वायव्ये मध्यस्था शाकरी
परि॥९॥ सौम्या निलोकसंस्थाप्य शंखिनि निधीस्थिता॥ माहेश्वरी वृषगता नचनीते त्रिशूलिनी॥१०॥ मो

ति

शिलोवरदास्य घृतकर्त्तव्या वालिकान्विता॥ शक्त्या पंचपलादूर्ध्वआसहस्रात्प्रकल्पयेत्॥११॥ सवत्साश्चोप
रिष्टाप्यंपंचवर्णंवितानकं॥ दधेनवोदशकुंभाश्चवस्त्रयुग्मानिचैवहि॥१२॥ मध्यमेहेतुगुरवेकृतिग्भ्यो
न्यस्तथैवच॥ ततोमंगलशब्देनस्नातः शुक्लांबरोबुधः॥१३॥ प्रदक्षिणमथाहृत्यमंत्रानेतानुदीरयेत्॥
नमोनमः पापविनाशिनीभ्यो ब्रह्मांडलोकेश्वरपालिनीभ्यः॥ आशंसिताधिकफलप्रदाभ्यो दिग्भ्यस्तथा
कल्पलतावधूभ्यः॥१४॥ इतिसकलदिगंगनाप्रधानंनवमयसूदनकारियःकरोति॥ अभिमतफलदेश
नाकलोकेवसतिपितामहवत्सराणित्रिंशत्॥१५॥ परितमथसतारयेत्क्षणाद्देसचदुरितौघविधुतेशुद्ध
देहः॥ सुरपतिवनितासहस्रसंघैः परिवृतमंबुरुहोद्भवाभिनमं॥१६॥ इतिविधानमिदंदिगंगनानांक
नककल्पलताविनिवेदकं॥ पठतीयःस्मरतीहतथेक्षतिसपदमेतिपुरंदरसेवितं॥१७॥ ॥इतिश्रीमत्स्यपुरा
णेकल्पलताप्रदानिकोनाम॥ ॥श्रीमत्स्यउवाच॥ ॥अथातःसंप्रवक्ष्यामिमहादानमनुत्तमं॥ सप्तसागरकं
नामसर्वपापप्रणाशनं॥१॥ पुण्यंदिनमथासाद्यकृत्वाब्राह्मणवाचनं॥ तुलापुरुषवत्कुर्यात्लोकेशावा
हनंबुधः॥२॥ ऋत्विग्मंडपसंभारभूषणाच्छादनादिकं॥ कारयेत्सप्तकुंडानिकांचनानिविचक्षणः॥३॥ प्रा राम
देशमात्राणितथारत्निमात्राणिवापुनः॥ कुर्यात्सप्तपलादूर्ध्वआसहस्राच्चशक्तितः॥४॥ संस्थाप्यानिचसर्वा ४५७

णिकृष्णाजिनतिलोपरि॥ प्रथमंपूरयेत्कुंडंलवणेनविचक्षणः॥५॥ द्वितीयंपयसातद्वत्तृतीयंसर्पिषापुनः॥
चतुर्थंतुगुडेनैवदध्नापंचममेवच॥६॥ षष्ठंशर्करयातद्वत्सप्तमंतीर्थवारिणा॥ स्थापयेल्लवणस्यांतेब्रह्माणं
कांचनंशुभं॥७॥ केशवंक्षीरमध्येतुघृतमध्येमहेश्वरं॥ भास्करंगुडमध्येतुदधिमध्येसुराधिपं॥८॥ शर्क
रायांन्यसेल्लक्ष्मींजलमध्येचपार्वतीं॥ सर्वेषुसर्वरत्नानिचसमंततः॥९॥ तुलापुरुषवच्छेषमत्राद्यपरिक
ल्पयेत्॥ ततोवारुणहोमांतेस्नापितोविप्रपुंगवैः॥१०॥ त्रिःप्रदक्षिणमावृत्यमंत्रानेतानुदीरयेत्॥ नमोवः
सर्वसिंधूनामाधारेभ्यःसनातनः॥११॥ जंतूनांप्राणदेभ्यश्चसमुद्रेभ्योनमोनमः॥१२॥ क्षीरोदकाज्यदधि
माधवलाचनेक्षुसारामृतेनभुवनत्रयजीवसंघान्॥ आनंदयंतीवसुभिश्चयतोभवंतस्तस्मान्ममाप्यघविघ
तेमलंविधध्वं॥१३॥ यस्मात्समस्तभुवनेषुभवंतएवतीर्थापरधर्मणप्रतापं॥ पापक्षयांवरविलेपनदीषणा
यलोकस्यबिभ्रतितदस्तुममापिलक्ष्मीः॥३१॥ इतिरसामरसंयुतंसर्वज्ञानस्तुचिरविस्मयवाभिहसामरान्॥
अमलकांचनरत्नमयेसपदस्तुपैतिहरेरमराहृतः॥२४॥ सकलपापविघातविराजितःपितृपितामहपुत्रश
तत्रयं॥ नरकलोकसमाकुलमप्यलंव्रजतिसोपिपितेशिवमंदिरं॥२५॥ ॥इतिश्रीमत्स्यपुराणेमहादानानुकी
र्तनेसप्तसागरप्रदानिकोनाम॥ ॥श्रीमत्स्यउवाच॥ ॥अथातःसंप्रवक्ष्यामिमहादानमनुत्तमं॥ रत्नधेनुरिति

स्यातं गोलोकफलदं नृणां ॥१॥ पुण्यं दिनमथासाद्य तुलापुरुषदानवत् ॥ लोकेशावाहनं कृत्वा ततो धेनुं प्रकल्प
येत् ॥२॥ भूमौ कृष्णाजिनं कृत्वा लवणद्रोणसंयुतं ॥ धेनुं रत्नमयीं कुर्यात्संकल्प्य विधिपूर्वकं ॥ स्थापयेत्पद्मरा
गाणामेकाशीतिं मुखे बुधः ॥ पुष्परागशतं तद्वत्प्रोथयोः परिकल्पयेत् ॥४॥ ललाटे हेमतिलकं मुक्ताफलशतं
दृशोः ॥ भ्रूयुगे विद्रुमशतं शुक्ती कर्णमयं स्थितं ॥५॥ कांचनानि च शृंगाणि शिरो वज्रशतात्मकं ॥ ग्रीवायां नेत्र
पट्टकं गोमेदकशतात्मकं ॥६॥ इंद्रनीलशतं पृष्ठे वैडूर्यशतं पार्श्वयोः ॥ स्फाटिकैरुदरं कार्यं सौगंधिकशतैः क
टिं ॥७॥ खुरा हेममयाः कार्याः पुच्छं मुक्तावलीमयं ॥ सूर्यकांतेंदुकांतौ च घ्राणे कर्पूरचंदने ॥८॥ कुंकुमा
नि च रोमाणि रूप्यां नाभिं च कारयेत् ॥ गारुत्मतशतं तद्वदपाने परिकल्पयेत् ॥९॥ तथान्यानि च रत्नानि
स्थापयेत्सर्वसंधिषु ॥ कुर्याच्छर्करया जिह्वां गोमयं च गुडात्मकं ॥१०॥ गोमूत्रमाज्यं तथा दधि दुग्धं स्वरूपतः ॥
पुच्छोर्ध्वे चामरं दद्यात्समीपे ताम्रदोहनं ॥११॥ कुंडलानि च हैमानि भूषणानि प्रशक्तितः ॥ कारयेदेवमेवं तु च
तुर्थांशेन वत्सकः ॥१२॥ ऋत्विग्भ्यो दक्षिणां दद्यात् धेनुमामंत्रयेत्ततः ॥ रत्नधेनुं तथामंत्र इममुच्चारयेत्ततः ॥
१३॥ त्वां सर्वदेववरधाम यतः पठंति रुद्रेंद्रविष्णुकमलासनवासुदेवाः ॥ तस्मात्समस्तभुवनत्रयदेवयुक्ता मां राम
पाहि देवि भवसागरपीड्यमानं ॥१४॥ आमंत्र्य चेत्थमभितः परिवृत्य भक्त्या दद्यात्द्विजाय गुरवे जलपूर्वकं ४५९

तं ॥ यः पुण्यमाप्य दिनमेव कृतोपवासः पापैर्विमुक्ततनुरेति पदं मुरारेः ॥१५॥ इति सकलविधिज्ञो रत्नधेनुप्रदा
नं वितरति स विमानं प्राप्य देदीप्यमानः ॥ सकलकलुषमुक्तो बंधुभिः पुत्रपौत्रैः सह मदनसरूपः स्थानमभ्ये
ति विष्णोः ॥१६॥ ॥ इति श्रीमत्स्यपुराणे रत्नधेनुप्रदानिकोनाम ॥ ॥ श्रीमत्स्य उवाच ॥ ॥ अथातः संप्रवक्ष्यामि म
हादानमनुत्तमं ॥ महाभूतघटंनाम महापातकनाशनं ॥१॥ पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाचनं ॥ ऋ
त्विग्मंडपसंभारभूषणाच्छादनादिकं ॥२॥ कारयेत् कांचनं कुंभं महारत्नान्वितं बुधः ॥ प्रादेशादंगुलशतं सचेत्कु
र्यात्प्रमाणतः ॥३॥ क्षीराज्यपूरितं तद्वत्कल्पवृक्षसमन्वितं ॥ पद्मासनगतं तद्वद्ब्रह्मविष्णुमहेश्वरं ॥४॥ वार
हेणोद्धृतं तद्वत्कुर्यात्पृथ्वीं सपंकजां ॥ वरुणं चासनगतं कांचनं पुष्करोपरि ॥५॥ हुताशनं मेषगतं वायुं कृ
तमृगासनं ॥ तथा कोशाधिपं कुर्यान्मूषकस्थं विनायकं ॥६॥ विन्यसेत् घटमध्ये तावपंचकसंयुतात् ॥ ऋग्वे
दस्याक्षसूत्रं स्याद्यजुर्वेदस्य पंकजं ॥७॥ सामवेदस्य वीणा स्याद्धेनुं दक्षिणतो न्यसेत् ॥ अथर्ववेदस्य पुनस्त
स्रावौ कमले करे ॥८॥ पुराणवेदो वरदः साक्षसूत्रकमंडलुः ॥ परितः सर्वधान्यानि चामरासनदर्पणं ॥९॥
पादुकोपानहच्छत्रं दीपका भूषणानि च ॥ साज्यायजनं कुंभांश्च पंचकर्हं विनायकी ॥१०॥ स्नात्वाधिवासनं कु
र्यादिमं मंत्रमुदीरयन् ॥ नमो वः सर्वदेवानामाधारेभ्यश्चराचरे ॥११॥ महाभूतादिदेवेभ्यः शांतिरस्तु शिवं मम ॥

म० पु०
४५९

यस्मान्नकिंचिदप्यस्तिमहाम्रतैर्विनात्मकं॥१२॥ब्रह्मामेसर्वम्रतेतस्माद्वारक्षयास्तुमे॥इत्युच्चार्यमहाम्रतघटं
योविनिवेदयेत॥१३॥सर्वपापविनिर्मुक्तः प्रयातिपरमांगतिं॥विमानेनार्कवर्णेनपित्रवंधुसमन्वितः॥१४॥
स्तूयमानोवरस्त्रीभिःपदमभ्येतिवैष्णवं॥षोडशैतानियःकुर्यान्महादानानिमानवः॥१५॥नतस्यपुनरावृत्ति
रिहलोकेतिजायते॥इतिपठतियइत्थंवासुदेवस्यपार्श्वेसस्तुतपित्रकलत्रःसंश्रणोतीहसम्यक॥हरत्तुवनम
नासोमंतरेत्वार्कलक्ष्म्याश्चिरममरवधूभिर्मोदतेसोपिकल्पं॥१६॥॥इतिश्रीमत्स्यपुराणेमहादानानुकीर्त
नेम्रतघटप्रदानिकोनाम॥॥इतिषोडशमहादानानिसमाप्तानि॥॥मनुरुवाच॥॥कल्पमानमयाप्रोक्तंमन्वं
तरयुगेषु च॥इदानींकल्पनामानिसमासात्कथयाच्युत॥१॥श्रीमत्स्यउवाच॥॥कल्पानुकीर्त्तनंवक्ष्येसर्वपा
पप्रणाशनं॥तस्यानुकीर्त्तनादेववेदपुण्येनयुज्यते॥२॥प्रथमःश्वेतकल्पस्तुद्वितीयोनीललोहितः॥वामदेव
स्तृतीयस्तुततोरथ्यांतरोपरः॥३॥रौरवःपंचमःप्रोक्तःषष्ठःप्राणइतिस्मृतः॥सप्तमोथबृहत्कल्पःकंदर्पोष्ट
मउच्यते॥४॥सद्योथनवमःप्रोक्तईशानोदशमःस्मृतः॥ध्यानएकादशःप्रोक्तस्तथासारस्वतोपरः॥५॥त्रयोदश
उदाहृतस्तुगरुडोथचतुर्दशः॥कौर्मःपंचदशोज्ञेयःपौर्णमासीप्रजापते॥६॥षोडशोनारसिंहस्तुवटोप्रटः॥
आग्नेयोष्टादशःप्रोक्तःसोमकल्पस्तथापरः॥७॥मानवोविंशमःप्रोक्तःसस्तुमानिंचापरः॥पुरुं छंडाश्चपरस्त नि

राम
४५

रोचा
वतलक्ष्मीकल्पस्तथापरः॥८॥चतुर्विंशतिमःप्रोक्तःसावित्रीकल्पसंज्ञकः॥पंचविंशतिमोघोराइस्तुतथापरः॥
९॥सप्तविंशोथवैराजोगौरिकल्पस्तथापरः॥माहेश्वरस्तथाप्रोक्तस्त्रिपुरप्रययातिचु॥१०॥पित्रकल्पस्तथैवा
न्योधाकुतूब्रह्मणःस्मृतः॥इत्येवंब्रह्मणोमासःसर्वपातकनाशनः॥११॥आतथेवाद्मिमाहात्म्यंयस्मिन्यस्य
विधीयते॥तस्यकल्पश्शतंनामविहितंब्रह्मणापुरा॥१२॥संकीर्णास्तामसाश्चैवराजसाःसात्विकास्तथा॥रज
स्तमोमयास्मृत्त्रयउदाहृताः॥१३॥संकीर्णेचसरस्वत्याःपित्रणांचुष्टिरुच्यते॥अग्नेःशिवस्यमाहात्म्यंतत्सरू
पेणवर्ण्यते॥१४॥साधिकेषाधिकंतवृत्विष्णोर्माहात्म्यमुच्यते॥मयैवघोषुसंसिद्धागमिष्यंतिपरांगतिं॥१५॥ब्रा
ह्मसामृमयंवस्तुपगेत्यवर्णिपवर्णि॥तस्यधर्मांश्चब्रह्माकरोतिविपुलंप्रियं॥१६॥यस्तुदद्याद्विमानकृत्वाहिमा
एयपवर्णि॥ब्रह्माविष्णुपदेकल्पंमुनिभिःपूज्यतेदिवि॥१७॥सर्वपापक्षयकरंकल्पदानंयतोभवेत॥मुनिरूपा
स्तथाकृत्वादद्यात्कल्यान्विचक्षणः॥१८॥पुराणंसंहिताचेयंतवरूपमयोदिता॥सर्वपापहरानित्यमारो
ग्यश्रीफलप्रदा॥१९॥ब्रह्मसंवत्सरशतादेकाहःशैवउच्यते॥शैववर्षशतादेकनिमिषंवैष्णवंविदुः॥२०॥य
दासावोजागर्तितिदेवंचेष्टतेजगत॥यदास्वपितिशांतात्मातदासर्वंप्रलीयते॥२१॥सूतउवाच॥इत्युक्त्वादेवदे
वेशोमत्स्यरूपीजनार्दनः॥पश्यतांसर्वदेवानांतत्रैवांतरधीयत॥२२॥वैवस्वतोपिभगवान्ब्रह्मज

म०पु० द्विविधाःप्रजाः॥स्वांतरंपालयामासमार्त्तंडकुलवर्द्धनः॥२३॥यस्यमन्वंतरंचैतदताचानुवर्त्तते॥पुण्यंपवित्रमे
४६० तद्वःकथितंमत्स्यभाषितं॥पुराणंसर्वशास्त्राणांगतितंमूर्ध्निसंस्थितं॥२४॥ ॥इतिश्रीमत्स्यपुरा
णेकल्पानुकीर्त्तनंनाम॥ ॥सूतउवाच॥ ॥एतद्वःकथितंसर्वंयदुक्तंविष्णुरूपिणा॥मात्स्य
पुराणमखिलंधर्मकार्यसाधनं॥१॥पत्रादिसर्गःसर्वादौब्रह्मांडकथनंतथा॥सांख्यंशारीर
कंतद्वत्चतुर्मुखसुखोद्भवः॥२॥देवासुरविसर्गश्चमरुतोत्पत्तिरेवच॥मदनद्वादशीतद्वत्
लोकपालाभिषेचनं॥३॥मन्वंतराणामुद्देशपोवैण्यराजाभिवर्णनं॥सूर्यवैवस्वतोत्पत्तिर्बु
धस्यागमनंतथा॥४॥सूर्यवंशानुकथनेश्राद्धकल्पस्तथैवच॥पितृतीर्थप्रचारश्चनोत्पत्ति
स्तथैवच॥५॥कीर्त्तनंसोमवंशस्यययातिचरितंतथा॥कार्त्तवीर्यस्यमाहात्म्यंवृष्णिवंशानुकी
र्त्तनं॥६॥भृगुशापस्तथाविष्णोर्दैत्यशापस्तथैवच॥कीर्त्तनंपुरुवंशस्यवंशोहौताशनस्त
था॥७॥पुराणकीर्त्तनंतद्वत्क्रियायोगस्तथैवच॥व्रतंनक्षत्रपुरुषंमार्त्तंडशयनंतथा॥८
कृष्णाष्टमीव्रतंतद्वत्रोहिणीचंद्रसंज्ञितं॥तडागविधिमाहात्म्यंपादपोत्सवएवच॥९॥सौभा राम
ग्यशयनंतद्वत्अगस्त्यव्रतमेवच॥तथानंततृतीयाचतिथिःकल्याणिनीतथा॥१०॥आर्द्रा ४६१

नंदकरीतद्वत्तथैवांगारकव्रतं॥सप्तमीसप्तकंतद्वत्विशोकद्वादशीव्रतं॥११॥मेरु
प्रदानंदशधाग्रहशांतिस्तथैवच॥ग्रहस्वरूपकथनंतथाशिवचतुर्दशी॥१२॥तथास
र्वफलत्यागःसूर्यवारव्रतंतथा॥संक्रांत्यास्नापनंतद्वत्विभूतिद्वादशीव्रतं॥१३
षष्टिव्रतानांमाहात्म्यंतथास्नानविधिक्रमः॥प्रयागस्यमाहात्म्यंचभुवनस्यतुकी
र्त्तनं॥१४॥पलाश्रमव्रतंतद्वत्द्वीपलोकानुकीर्त्तनं॥तथांतरिक्षंचक्रौषध्रुवमाहात्म्य
मेवच॥१५॥भवनानिसुरेंद्राणांत्रिपुरशोषणंतथा॥पितृप्रवारमाहात्म्यंमन्वंतरवि
निर्णयः॥१६॥वज्रांगस्यचसंभूतिस्तारकोत्पत्तिरेवच॥तारकासुरमाहात्म्यंब्रह्मदे
व्यनुमंत्रणं॥१७॥पार्वतीसंभवस्तद्वत्तथाशिवतपोवनं॥अनंगदेहदाहस्तुरवि
शोकस्तथैवच॥१८॥गौरीतपोवनंतद्वत्शिवकाव्यप्रसादनं॥पार्वतीशिवसंवादस्त
थैवोद्वाहमंगलं॥१९॥कुमारस्यतथोत्पत्तिःकुमारविजयस्तथा॥तारकस्यवधोघोरो
नारसिंहोपवर्णनं॥२०॥पद्मोद्भवविसर्गस्तुतथैवांधकसूदनं॥वाराणस्यास्तुमाहा
त्म्यंनर्मदायास्तथैवच॥२१॥तथोभयमुखीनामदानंकृष्णाजिनस्यच॥तथासावित्र्यु

पाख्यानंराजधर्मस्तथैवच॥२२॥यात्रानिमित्तकथनंस्वप्नमंगल्पनंवा॥मतस्यस्तुमाहात्म्यं
तथाक्षीरोदमंथनं॥२३॥अमृतस्यभवंतद्वत्कालकूटाभिशातनं॥देवासुरविम
र्दश्चवास्तुविद्यातथैवच॥२४॥प्रतिमालक्षणंतद्वन्मंडपानांचलक्षणं॥भविष्य
राजानुद्देशोमहादानानुकीर्तनं॥२५॥कल्पानुकीर्तनंतद्वद्ग्रंथानुक्रमणेतथा॥ए
तत्पवित्रमायुष्यमेतत्कीर्तिविवर्धनं॥२६॥एतत्सर्वगुणोपेतमेतत्कल्मषना
शनं॥अस्मात्पुराणादपिचपादमेकंपठेत्तुयः सर्वविमुक्तमापः॥नारायणस्या
स्पदमेतिनूनंपदंसदिव्यानिसुखानिभुंक्ते॥२७॥पुराणमेतत्सकलंहरस्यश्रद्धा
न्वितःपुण्यमिदंशृणोति॥कृत्वाश्वमेधावभृथप्रभावंफलंसमाप्नोतिहरेःप्रसादा
त्॥२८॥शिवंविष्णुंसमभ्यर्च्यब्राह्मणंसदिवाकरं॥श्लोकंश्लोकार्धपादंवाश्रद्धयायः
शृणोतिच॥२९॥श्रावयेद्वापिधर्मज्ञस्तत्फलंशृणुतद्विजाः॥ब्राह्मणोब्रह्मवर्चस्वीक्षत्रि
योलभतेमही॥३०॥वैश्योधनमवाप्नोतिसुखंशूद्रस्तुवंदति॥आयुष्मान्पुत्रवान्यश्च

लक्ष्मीवान्पापवर्जितः॥श्रुत्वापुराणमखिलंशत्रुभिश्चापराजितः॥३१॥ ॥श्री॥
इतिश्रीमत्स्यपुराणेचतुर्दशसाहस्र्यांसंहितायांकल्पानुकीर्तनंनाममत्स्यपुरा
णंसमाप्तं॥ ॥श्रीरस्तु॥ ॥श्रीकृष्णगोपिजनवल्लभायनमः॥ ॥श्रीरामचंद्र॥